UNIVERSITY OF DELHI

ARTS LIBRARY

ARTS LIBRARY

(DELHI UNIVERSITY LIBRARY SYSTEM)

Cl No 891.21 9 | 11C19.2

Ac No E3511 | Date of release for laon

This book should be returned on or before the date last stamped below An overdue charge of Rupee One will be charged for each day the book is kept overtime

(Authority EC Res 200 dated 27th August 1996)

ṚGARTHADĪPIKĀ

A pre-Sāyaṇa and hitherto unpublished commentary

ON

ṚGVEDASAṀHITĀ

By

MĀDHAVA, SON OF ŚRĪVEṄKAṬĀRYA

Edited

From original palm-leaf Malayalam MSS. with extracts from other commentaries

By

LAKSHMAN SARUP

M.A. (PANJ.), D. PHIL. (OXON.)

Officier d' Academie (France), Vice-Principal, Oriental College, Head of the Sanskrit Department, and Professor of Sanskrit Literature at the University of the Panjab, Lahore

VOL. II

PUBLISHED BY

MOTILAL BANARSIDASS

Oriental Publishers

SAID MITHA, LAHORE

पञ्जाब ओरियन्टल सीरिज़ नं० २७

ऋक्संहिताव्याख्यातुस्सायणाचार्यात्प्राग्भवेन

श्रीवेङ्कटार्यतनूद्भवेन श्रीमाधवेन

विरचिता

अप्रकाशितपूर्वा, ऋग्वेदसंहिताव्याख्या

ऋगर्थदीपिका

पञ्चनदीये विश्वविद्यालये संस्कृताचार्यैः संस्कृतविभागाध्यक्षैश्च

लक्ष्मणस्वरूप, एम० ए० (पंजाब), डी० फ़िल० (ऑक्सफ़ोर्ड),

आफ़िसर एकेडेमी (फ़्रान्स) इत्येतैः

मलयलिपिलिखितानि प्राचीनतालपत्रादर्शपुस्तकानि पर्यालोच्य

पूर्वापरव्याख्यानोद्धृतैः सन्दर्भैश्चालङ्कृत्य

सम्पादिता

द्वितीयो भागः

लवपुरीयपञ्जाबसंस्कृतपुस्तकालयाध्यक्षैः

मोतीलाल बनारसीदास इत्येतैः

प्रयागस्थे 'ला जर्नल' इति नाम्नि

मुद्रणालये मुद्रापयित्वा प्रकाशितः

TO

THE RIGHT HONOURABLE

Dr. Sir SHADI LAL, Kt.

P.C., LL.D., R.B., B.C.L., Barrister-at-Law

Member of the Judicial Committee of the Privy Council

Ex-Chief Justice of the Lahore High Court

AS A HUMBLE MARK OF

PROFOUND RESPECT

AND ADMIRATION

TABLE OF CONTENTS

		PAGE
I.	List of Abbreviations	11—14
II.	Preface	15—18
III.	TEXT—	
1.	Introductory remarks to the First Chapter of the Second *Aṣṭaka*	3—7
2.	One hundred and twenty-second hymn ..	7—16
3.	One hundred and twenty-third hymn	16—24
4.	One hundred and twenty-fourth hymn	24—35
5.	One hundred and twenty-fifth hymn	35—41
6.	One hundred and twenty-sixth hymn	41—48
7.	One hundred and twenty-seventh hymn ..	48—58
8.	One hundred and twenty-eighth hymn	59—65
9.	One hundred and twenty-ninth hymn	65—76
10	One hundred and thirtieth hymn	76—84
11.	One hundred and thirty-first hymn	84—90
12.	One hundred and thirty-second hymn	90—95
13.	One hundred and thirty-third hymn	96—100
14.	One hundred and thirty-fourth hymn	100—105
15.	One hundred and thirty-fifth hymn	105—112
16	One hundred and thirty-sixth hymn	112—117
17.	Introductory remarks to the Second Chapter of the Second *Aṣṭaka*	118—119
18.	One hundred and thirty-seventh hymn	119—121
19.	One hundred and thirty-eighth hymn	121—125
20.	One hundred and thirty-ninth hymn	126—134
21.	One hundred and fortieth hymn	135—143
22.	One hundred and forty-first hymn	143—151
23.	One hundred and forty-second hymn	151—156
24.	One hundred and forty-third hymn	157—161
25.	One hundred and forty-fourth hymn	162—166
26.	One hundred and forty-fifth hymn	166—169
27.	One hundred and forty-sixth hymn	169—172
28.	One hundred and forty-seventh hymn	172—176
29.	One hundred and forty-eighth hymn	177—179

PAGE

30. One hundred and forty-ninth hymn .. .. 180—182
31. One hundred and fiftieth hymn .. .. .. 182—185
32. One hundred and fifty-first hymn .. .. 185—191
33. One hundred and fifty-second hymn .. .. 192—195
34. One hundred and fifty-third hymn .. .. 196—198
35. One hundred and fifty-fourth hymn .. .. 199—205
36. One hundred and fifty-fifth hymn .. .. 205—209
37. One hundred and fifty-sixth hymn .. .. 209—212
38. One hundred and fifty-seventh hymn .. .. 213—216
39. Introductory remarks to the Third Chapter of the Second *Aṣṭaka* .. . . 216—219
40. One hundred and fifty-eighth hymn .. .. 219—223
41. One hundred and fifty-ninth hymn .. .. 223—226
42. One hundred and sixtieth hymn . .. 226—229
43. One hundred and sixty-first hymn .. .. 229—239
44. One hundred and sixty-second hymn .. .. 239—258
45. One hundred and sixty-third hymn .. .. 259—271
46. One hundred and sixty-fourth hymn .. .. 271—352
47. One hundred and sixty-fifth hymn .. .. 352—363
48. Introductory remarks to the Fourth Chapter of the Second *Aṣṭaka* .. .. 363—365
49. One hundred and sixty-sixth hymn .. .. 365—373
50. One hundred and sixty-seventh hymn .. .. 373—379
51. One hundred and sixty-eighth hymn .. .. 379—384
52. One hundred and sixty-ninth hymn .. .. 384—389
53. One hundred and seventieth hymn .. .. 389—392
54. One hundred and seventy-first hymn .. .. 392—395
55. One hundred and seventy-second hymn .. 396—397
56. One hundred and seventy-third hymn .. .. 397—405
57. One hundred and seventy-fourth hymn .. 405—411
58. One hundred and seventy-fifth hymn .. .. 412—414
59. One hundred and seventy-sixth hymn .. .. 414—417
60. One hundred and seventy-seventh hymn .. 417—419
61. One hundred and seventy-eighth hymn .. 419—421
62. One hundred and seventy-ninth hymn .. .. 421—425
63. One hundred and eightieth hymn .. .. 426—431
64. One hundred and eighty-first hymn .. .. 431—436

PAGE

65. One hundred and eighty-second hymn .. .. 336—441
66. One hundred and eighty-third hymn .. .. 441—444
67. Introductory remarks to the Fifth Chapter of the Second *Aṣṭaka* .. .. 444—445
68. One hundred and eighty-fourth hymn .. .. 445—449
69. One hundred and eighty-fifth hymn .. .. 449—454
70. One hundred and eighty-sixth hymn .. .. 455—460
71. One hundred and eighty-seventh hymn .. 461—465
72. One hundred and eighty-eighth hymn . .. 465—468
73. One hundred and eighty-ninth hymn . .. 469—473
74. One hundred and ninetieth hymn .. .. 474—479
75. One hundred and ninety-first hymn. .. . 479—487

IV. Appendix I. The Commentary of the *Satapatha-Brāhmaṇa* on such stanzas of the first *maṇḍala* of the *Ṛgveda* as occur in the *Śukla Yajurveda* and are explained in the former .. .. 489—500

V. Appendix II Extracts from the Commentaries of Uvaṭa and Mahīdhara on such stanzas of the first one hundred and twenty-one hymns of the first *mandala* of the *Ṛgveda* as occur in *Mādhyandinī* recension of the *Śukla Yajurveda* 501—569

VI. Appendix III. Extracts from the Commentary of Dyā Dvivedā on such stanzas of the first *maṇḍala* of the *Ṛgveda* as are explained by him in the *Nītimañjarī* .. .. 570—613

VII. Appendix IV. Extracts from the Commentary of Guṇavisnu on such stanzas of the first *maṇḍala* of the *Ṛgveda* as are explained by him in his Commentary on the *Chāndogyamantra* .. 614—622

VIII. Supplement: *Padapāṭha* on hymns 122-191 of the first *maṇḍala* of the *Ṛgveda* .. .. 1—213

LIST OF ABBREVIATIONS

Ā	Ātmanepada
AA.	AitareyaĀraṇyaka
abl.	ablative case
AB.	AitareyaBrāhmana
AV.	Atharvaveda
acc.	accusative case
Amara.	Amarakoṣa
Anu	Anuvākānukramanī
APR.	AtharvavedaPrātiśākhya
Aśs	ĀśvalāyanaŚrautaSūtra
At.	Ātmānanda's commentary on Rv. I 164.
BB	Bhaṭṭabhāskara Miśra's commentary on the Taittirīya Samhitā
BD	Brhaddevatā
Brh. U	Brhadāranyakopanisad
caus.	causal
Chā U.	Chāndogyopanisad
CHMB	Chāndogyamantrabhāsya by GunaVisnu
D	A palm-leaf Malayalam ms , at the Lal Chand Library of the D. A. V. College, Lahore.
dat.	dative case
Dur.	Durgācārya's commentary on the Nirukta.
Ed.	Editor
F.	A fragment of a Devanāgarī ms.
fem	feminine gender
gen.	genitive case
gend.	gender
imf.	imperfect
inj.	injunctive
inst.	instrumental case
KAS.	Kautalya's Arthaśāstra
Kā Śr.	Kātyāyana's ŚrautaSūtra
Kath. U.	Kathopanisad
Kau. Br.	KausītakiBrāhmana
Kau. Up.	Kausītaki Upanisad
Ken. U.	Kenopanisad

KS. KSA.	Kātyāyana's Sarvānukramaṇī
Lit.	Literally
Loc.	Locative case
M.	A Devanāgarī transcript of a Madras ms.
Mah.	Mahīdhara, a commentator of the *ŚuklaYajurveda.*
Mahanar. Up.	Mahānārāyanopaniṣad
Maitr. Up.	Maitrāyaṇī Upaniṣad
Maitri Up.	Maitrī Upaniṣad
Manu.	Manusmṛti
Mas.	masculine gender
Mu. U. Muṇḍaka U.	Muṇḍakopaniṣad
MS.	manuscript
MSS.	manuscripts
N.	Nirukta of Yāska
Ngh.	Nighaṇṭu
nom.	nominative case
Nṛs. U.	Nṛsiṃhottaratāpinī Upaniṣad
NS.	NidānaSūtras
P.	A palm-leaf Malayalam ms. at the Panjab University Library
p.	page
Pa.	Pāṇini's Aṣṭādhyāyī
Perf.	Perfect
Pers.	Person
pl.	plural number
PMBH.	Patañjali's Mahābhāṣya
PP.	Padapāṭha
Parāśara.	Parāśarasmṛti
Praśna. U.	Praśnopaniṣad
R.	The Ṛgvedānukramaṇī of Mādhavabhaṭṭa, edited by C. Kunhan Raja, Madras University Sanskrit Series, No. 2.
red.	reduplicated
Ṛgvidh.	Ṛgvidhāna, edited by Meyer
RPR.	ṚgvedaPrātiśākhya
RV.	Ṛgveda
S.	K. Sāmbaśiva Śāstri's edition of the Ṛksaṃhitā with the Bhāṣya of Skandasvāmin and the commentary

	of Veṅkaṭamādhavārya, Trivandrum Sanskrit Series, No. 96
ŚA.	ŚāṅkhāyanaĀraṇyaka
ŚB.	ŚatapathaBrāhmaṇa
Śāṅ. Br.	ŚāṅkhāyanaBrāhmaṇa
Śāṭ.	ŚāṭyāyanaBrāhmaṇa
ṢVB.	ṢaḍviṃśaBrāhmaṇa
SDS.	Sarvadarśanasaṃgraha
Sing.	Singular number
SK.	Skandasvāmin's commentary on the Ṛgveda
SKN.	Skandasvāmin's commentary on the Nirukta of Yāska
Skr.	Skandasvāmin's Ṛgvedabhāṣya, edited by C. Kunhan Raja, Madras University Sanskrit Series, No 8.
Skt.	Skandasvāmin's Bhāṣya on the Ṛgveda, Trivandrum edition
Śr. Sū	ŚrautaSūtra
SSS.	ŚāṅkhāyanaŚrautaSūtra
Śve. U.	Śvetāśvataropaniṣad
Sy	Sāyanācārya's commentary on the Ṛgveda, Poona edition
TA.	TaittirīyaĀraṇyaka
TB.	TaittirīyaBrāhmaṇa
Tāṇḍya TMB.	TāṇḍyaMahāBrāhmaṇa
TS.	TaittirīyaSaṃhitā
T.U.	Taittirīyopaniṣad
U.	Uvaṭa
U. Unādi	UṇādiSūtras
Vaij.	VaijayantīKoṣa
Var.	Vārtika on Pāṇini's Astādhyāyī
VM.	Mādhava, son of ŚrīVeṅkaṭārya
VNS.	Vararuci's NiruktaSamuccaya
Voc.	Vocative case.
Vol.	Volume
VPR.	VājasaneyīPrātiśākhya
VS.	VājasaneyīSaṃhitā
YPR.	YajurvedaPrātiśākhya
YV.	Yajurveda

अ. अध्या.	अध्याय
आर्य	आर्यभट्टीय
आ. श्रौ. सू.	आश्वलायनश्रौतसूत्र
उ. उणा.	उणादिसूत्र
ऋ ऋ स.	ऋग्वेदसहिता
ऋ. प्रा.	ऋक्प्रातिशाख्य
ऐ ब्रा.	ऐतरेयब्राह्मण
क.	कण्डिका
का.	कात्यायनश्रौतसूत्र
का. स.	कात्यायनसर्वानुक्रमणी
का. स. द्वा. का.	कात्यायनसर्वानुक्रमणी द्वादशकाण्डिका
कौ. ब्रा.	कौषीतकिब्राह्मण
गो. गो. गृ. सू.	गोभिलगृह्यसूत्र
गो. स्मृ.	गोभिलस्मृति
ता. ब्रा.	ताण्ड्यब्राह्मण
तै. आ.	तैत्तिरीय आरण्यक
तै. स.	तैत्तिरीयसहिता
नि. निरु.	निरुक्त
निघ.	निघण्टु
पा.	पाणिनि-अष्टाध्यायी
पार	पारस्करगृह्यसूत्र
पा. वा	पाणिनिवार्तिक
भ. गी	भगवद्गीता
मनु	मनुस्मृति
म. भा. शा. प.	महाभारत शान्तिपर्व
वे. दी	वेदार्थदीपिका [षड्गुरुशिष्यविरचिता सर्वानुक्रमणीव्याख्या]
श. श. ब्रा.	शतपथब्राह्मण
शा. आ.	शाङ्खायन आरण्यक
शां. ब्रा.	शाङ्खायनब्राह्मण
शां. श्रौ सू.	शाङ्खायनश्रौतसूत्र
सा. भा.	सायणभाष्य

PREFACE

The present volume completes the commentary of Mādhava, son of ŚrīVeṅkaṭārya on the first *maṇḍala* of the *Ṛgveda*. The ms. material has already been described[1] and need not be repeated here. The constitution of the text of the commentary is based on the collation of mss. P. D. and M. Apart from various readings, the mss. have transmitted the text of the commentary in one recension only. Occasionally, all the three mss. have preserved an identical error, e g., तरुणा is read by all the mss. on p. 17. As an epithet of उषा 'Goddess of dawn', the reading should be तरुणी and not तरुणा। Similarly देवि in RV. I. 123. 3 on p 17 is in the vocative case and should have also been explained by a vocative in the commentary but all the mss. read देवी which is not in the vocative. Evidently the reading of the mss. i.e. देवी is not correct. It should have been देवि and not देवी. In such cases also, there has been no departure from the evidence of mss. I have adopted the reading, unanimously preserved by all the mss. The authority of the mss. has not been set aside Their testimony has been followed with fidelity. I have contented myself with the suggestion of emendations in footnotes, e.g., see footnotes 14, 16, 23, 24 on p. 17; 1 on p. 23; 8 on p. 28; 8 on p. 30; 1 on p. 33; 17 on p. 34; 1 on pp. 50, 51; 11 on p. 57; 19 on p. 58; and so on. But as far as the text of the commentary is concerned, no interference whatsoever has been allowed.

Mādhava explains each and every word of a Vedic stanza. Here and there, the same word or words are repeated in a Vedic stanza. In such cases, Mādhava explains the word once only. It would have been quite unnecessary to explain the same word twice. I have however taken the precaution to point out in footnotes that Mādhava has commented on such repeated words once only. See footnotes 8 on p. 50; 12 on p. 51; 3 on p. 53; 2 on p. 54; 22 on p. 55; 18 on p. 56; 6 and 31 on p. 57; 17 on p. 60; 26 on p. 61; 25 on p. 62; 12 on p. 64 and so on.

---

[1] Preface to Vol. I. pp. 34-40.

As already pointed out, Mādhava ordinarily explains each and every word of a Vedic stanza. But he passes over a word occasionally. If an unrepeated word of a Vedic stanza is left unexplained in the commentary, I have mentioned this fact also in the footnotes. See footnotes 21 on p. 7; 5 on p. 16; 19 on p. 18; 7 and 18 on p. 23; 11 on p. 25; 17 on p. 29; 24 on p. 32; 15 on p. 33; 8 on p. 52; 25 on p. 58; 20 on p. 66; 18 on p. 67 and so on. In the footnotes I have also supplied the explanation of such ignored words from the commentaries of other commentators.

In the footnotes, the interpretation of Mādhava has been throughout compared with that of Sāyanācārya. In addition, the following commentaries have also been utilised:—(1) Yāska's *Nirukta*, (2) Durgācārya's commentary on the *Nirukta*, (3) Skandasvāmin's commentary on the *Nirukta*. These three commentaries have been exploited with regard to such *Ṛgvedic* stanzas as occur in the *Nirukta*.

It is well known that the *Yajurveda* has borrowed a good many stanzas from the *Ṛgveda*. The *ŚatapathaBrāhmaṇa* has commented on the first eighteen chapters of the *ŚuklaYajurveda*. Both Uvaṭa and Mahīdhara have written commentaries on the whole of the *ŚuklaYajurveda*. The commentaries of the *ŚatapathaBrāhmaṇa*, Uvaṭa and Mahīdhara have been exploited with regard to such *Ṛgvedic* stanzas as occur in the *ŚuklaYajurveda*. Extracts from the commentaries of Uvaṭa and Mahīdhara on the first 121 hymns are in Appendix II and on 122-191 hymns in the footnotes.

The commentary of BhaṭṭaBhāskaraMiśra on the *Taittirīya Saṃhitā* has been explored with regard to such *Ṛgvedic* stanzas as occur in the *TS*.

There are no commentaries available on the other *Saṃhitās* of the Black *Yajurveda* such as the *Maitrāyaṇī*, the *Kāṭhaka*, and the *Kapiṣṭhala, Saṃhitās*.

The commentaries of Sāyaṇacārya on the *AtharvaVeda* and other *Saṃhitās* have been ignored as his commentary on the *Ṛgveda* itself has been fully made use of.

Dyā Dviveda has explained a good many stanzas of the *Ṛgveda* in his *Nītimañjarī*. Extracts from his commentary are added in Appendix III. Dyā Dviveda was a learned scholar. His commentary is full of quotations from the *Saṃhitās, Brāhmaṇās,*

Araṇyakas, *Upaniṣads*, the *Ṛgvedaprātiśākhya*, the *Bṛhaddevatā* the *Śrautasūtras*, Kātyāyana's *Sarvānukramaṇī*, *Anuvākānukramaṇī*, Pāṇini's *Aṣṭādhyāyī*, *Gṛhyasūtras*, *Vedārthadīpikā*, *Sāyaṇabhāṣya*, *Uṇādisūtras*, *Smṛtis* etc. Most of these quotations have been traced for the first time in appendix III.

Dyā Dviveda has anticipated the modern Comparative Method in the interpretation of the *Ṛgveda*. He often supports his explanation with parallel passages of the *Ṛgveda* itself. He is thus a precursor of European Interpreters of the *Ṛgveda*. The commentary of Dyā Dviveda is very interesting and scholarly. It is a pity that he did not comment on the whole of the *Ṛgveda*.

Guṇavisnu is supposed to be a pre-Sāyana commentator. I have given extracts from his commentary on such *Ṛgvedic* stanzas as occur in the *Chāndogyamantra*.

I have also made use of Ātmānanda's* commentary on RV. I. 164., as far as that hymn is concerned.

In this way, I have utilised all the commentaries on the *Ṛgveda* itself as well as on the hymns and the stanzas of the RV., borrowed by other *Saṃhitās*, Vedic writers and works. All the commentaries, available from Indian sources have been accounted for. I have thus endeavoured to compile in footnotes and appendices an Indian thesaurus of *Ṛgvedic* interpretation. This bringing together in one place of all or almost all the different Indian interpretations of the *Ṛgveda* will afford a basis for a critical and comparative study of the *Ṛgveda*.

ACKNOWLEDGEMENT OF OBLIGATION

It is a pleasure to put on record my thanks to the American Oriental Society. They have taken a lively interest in the present publication. The following letters which I received from the Secretary of the Society do not stand in need of any comment.

Dr. Lakshman Sarup
23, Lodge Road
Lahore, India

PRINCETON UNIVERSITY
PRINCETON NEW JERSEY
August 4, 1939

Dear Dr. Sarup,

The American Oriental Society has considered your appli-

*Published by Messrs Motilal Banarsidas, Said Mitha, Lahore.

cation for a subvention in aid of your proposed edition of the Rig-Veda.

I am sending you a statement about the value of the work, which you may use for your special purposes in India.

We are trying to raise a small sum from America in support of your project, which seems to us of great importance and value. The American Oriental Society has no money which it can appropriate for this purpose, but it gladly gives hearty approval.

This is the best we can do.

With best wishes.

Sincerely yours
(Sd.) HAROLD H. BENDER

Dr. Lakshman Sarup
23, Lodge Road
Lahore, India

PRINCETON UNIVERSITY
PRINCETON NEW JERSEY
August 4, 1939

Dear Dr. Sarup,

The American Oriental Society has carefully considered your proposed publication of an edition of the Rig-Veda, with the heretofore unpublished commentary of Madhava, and elaborate critical apparatus. We all think very highly of this work, so far as we can control it at this distance. The American Oriental Society officially recommends it.

Faithfully yours
(Sd.) HAROLD H. BENDER

Mr. Bender also recommended this publication to the Carnegie International Association.

I believe this is the only case in which the American Oriental Society has taken such an interest in the work of an Indian Scholar. They have gone out of their way to raise subscriptions for its publication.

If this edition is found useful and if it gives any help in a scientific study of the *Ṛgveda*, I shall feel my labour amply repaid.

ORIENTAL COLLEGE
LAHORE

LAKSHMAN SARUP

अथ ऋग्वेदे द्वितीयाष्टके प्रथमोऽध्यायः ।

अथ द्वितीयेऽष्टके प्रथमोऽध्यायः ।[1]

द्वितीयोऽथाष्टकस्तस्मिन्नध्यायादिषु वक्ष्यते ।
यत्किञ्चिदिह वक्तव्यमाख्यातेष्वस्ति वैदिकैः ॥

चत्वारि पदजातानि तत्र नामानि कानिचित् ।
आख्यातान्युपसर्गाश्च निपाताश्च तथापरे ॥[2]

शब्दैरुच्चरितैर्द्रव्यं यैरिह प्रतिपद्यते ।
तन्नाम कवयः प्राहुरग्निर्वायुस्तथाश्विनौ ॥[3]

अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः ।
तन्नाम कवयः प्राहुर्लिङ्गसङ्ख्यासमन्वितम् ॥[4]

निर्देशः कर्म करणं सम्प्रदानमपकर्षणम् ।
स्वाम्यर्थोऽथाधिकरणं विभक्त्यर्थाः प्रकीर्त्तिताः ॥[5]

---

१. Omitted by P. हरिः श्रीगणपतये नमः D.

२. Cf. RPR. 12.5:699; APR. i. 1; VPR. 8.49-52; KAS. II. 10; 28 p. 72; PMBH. 1. 1.1. p.3; SDS. p. 96-140;

३. Cf. BD. I. 42. Durgācārya quotes the following stanza in his commentary on the *Nirukta* 1.1. तथाचोक्तम्—
शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते ।
तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥

४. Cf. BD. I.43. Durgācārya quotes this stanza, *loc. cit.* The first three verses (*Pādas*) are identical. Durga reads the fourth verse in the following manner : भेदे वचनलिङ्गयोः ।

५. ०म्या० P.

६. Durgācārya quotes the stanza in an identical manner except that he reads ०प्यधि० for ०थाधि० of VM. in the third verse and प्रदानम् for सम्प्रदानम् of VM. in the second verse. The second verse in the text of VM. has one syllable too many.

नामानि नमयन्त्यर्थं[1] प्रधानमिति नामता ।
कारकाणि च तान्याहुः क्रियां कुर्वन्ति तानि[2] हि ॥

कारकाणां[3] परिस्पन्दः फलस्यैकस्य साधकः[4] ।
लोके पूर्वापरीभूतः क्रियेति व्यपदिश्यते ॥

वदन्ति वैयाकरणा धातुवाच्यां[5] क्रियां च ताम् ।
कालः सङ्ख्या कारकं च प्रत्ययार्थाः प्रकीर्त्तिताः ॥

आख्यातस्य[6] च नाम्नश्च सम्बन्धात्स्वार्थदर्शिनः[7] ।
उपसर्गाश्च[8] निपाताश्च न स्वतन्त्रा इति स्थितिः[9] ॥

आख्यातशब्देषु भवन्ति भेदा[10]
धातुः क्रियामेकफलां[11] ब्रवीति ।
अर्थे प्रवृत्त विरते च धातो-[12]
र्लट् स्मर्यते शब्दविद्भिः पुराणैः[13] ॥

"सुतपाव्ने सुता इमे शुचयो यन्ति वीतये"[14] ।
इत्याह गच्छतः सोमानृषिर्हस्तेन दर्शयन् ॥

"प्रति त्यं चारुमध्वरं गोपीथाय[15] प्र हूयसे[16] ।"
"परा हि मे विमन्यवः पतन्ति वस्यइष्टये[17] ॥"[18]

---

१. नमन्त्य० P.
२. यानि is suggested for तानि
३. कारणानां M.
४. Omitted by P. ५. ०ख्यं D.
६. Omitted by P.D.
७. ०ख्याः स्वा० M. ०ख्यात्स्वाभ्यर्थ० P.D.
८. च is omitted by R.
९. In both the second and third *Pādas* of this verse one syllable is too many.
१०. ०दाः P. ११. ०धु P.
१२. ध्वृत्ते P. १३. पूरणैः P.
१४. RV. I. 5.5ab.
१५. ह of आह is omitted by P.
१६. प्रती० P.D.
१७. चरु० M. १८. ०ताय P.
१९. RV. I. 19.1ab.
२०. वरा M. २१. RV. I. 25.4ab.

"त्वा[1] यामि ब्रह्मणा[2] वन्दमान-
स्तदा[3] शास्ते[4] यजमानो हविर्भिः[5]"।
"तदिन्नक्तं[6] तद्दिवा[7] मह्यमाहु-
स्तदयं केतो[8] हृद[9] आ वि[10] चष्टे" ॥

धात्वर्थस्य प्रवृत्तस्य मन्त्रेष्वेषु प्रतीयते।
विस्पष्टं वर्तमानत्वमीदृशाः सन्ति चापरे ॥

भवन्ती वर्तमानस्य सामीप्येऽपि[11] प्रयुज्यते।
"अग्निमीळे[12] पुरोहितं[13]" "सुम्नाय[14] वर्तयामसि[15]" ॥
"इहेन्द्राग्नी उप[16] ह्वये[17]" "सुते सोमं[18] हवामहे[19]"।
एते भवन्ति सूक्तादौ सूक्तान्तस्था इमे पुनः ॥
"अर्कैश्च[20] नि ह्वयामहे[21]" "तं त्वा वयं पतिमग्ने[22]"।
"वामवसे जोहवीमि[23]" बहवः सन्ति तादृशाः ॥

अथापि[24] वर्तमानत्वं क्वचिन्नैव विवक्षितम्।
"वायविन्द्रश्च[25] चेतथः[26]" "दक्षं दधाते अपसम्[27]" ॥
"प्र चेतयति केतुना। धियो विश्वा[28] वि राजति"।
"सद्यो दाशुषे[29] क्षरसि" पादास्तत्र निदर्शनम् ॥

---

१. तत्वा P.D.M. २. वन्द्य० D.
३. RV. I.24.11.ab.
४. को P. केतो D. ५. हृदय M.
६. RV. I.24.12.ab
७. ०मानायत्व० M.
८. Cf. Pā. III. 3.131.
९. RV. I. 1.a १०. ०था M.
११. RV. VIII. 57.1.b
१२. RV. I. 21.1.a
१३. RV. III. 40.1.b १४. अर्कै० M.
१५. RV. I. 47.10.b
१६. पितुम० M. १७. RV. I. 60.5.a
१८. A fragment of RV.I.34.12b.
१९. प्रवर्त० M.
२०. चेततः P. RV. I. 2.5a.
२१. अवसम् P. RV. I. 2.9c.
२२. RV. I. 3.12bc.
२३. RV. I. 27.6c.

एवं यदादियोगे च "यं रक्षन्ति प्रचेतसः"[1] ।
"यत्र ग्रावा पृथुबुध्नः"[2] "यं यज्ञं नयथा नरः"[3] ॥
"वेद मासो धृतव्रतः"[4] विक्वापि च दृश्यते ।
"यद्देवानां मित्रमहः"[5] अग्नेर्भ्राजन्ते अर्चयः"[6] ॥
तथा तच्छब्दयोगे च "स इद् देवेषु गच्छति"[7] ।
"येषामिन्द्रस्ते जयन्ति"[8] पादौ तत्र निदर्शनम् ॥
अथापि दृश्यते भूते "कारमंशाय जिन्वथः"[9]
"शत्रुं न किला विवित्से"[10] "आपडा शुष्मास्य भेदति"[11] ॥
"कदा क्षत्रश्रियं नरमा वरुणं करामहे"[12] ।
प्रयुज्यते भवन्त्यत्र कदायोगे भविष्यति ॥
"न ता मिनन्ति मायिनः"[13] "य ईङ्खयन्ति पर्वतान्"[14] ।
"प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन्"[15] ॥
विधापराः पदेष्वेषु बहवः सन्ति तादृशः ।
इच्छन्तोऽपि न हिंसन्ति जातास्तेऽभीङ्खयन्ति च ॥

---

१. RV. I. 41.1ᵃ.
२. RV. I. 28.1ᵃ.
३. ०थां M.
४. RV. I. 41.5ᵃ.
५. ०तोः P. RV.I. 25.8ᵃ.
६. य देo P.
७. RV. I. 44.12ᵃ.
८. अग्ने भ्राo P.D.M.
९. RV. I. 44.12ᵈ.
१०. RV. I. 1.4ᶜ.
११. RV. VIII. 16. 5ᶜ.
१२. वृत्रे P.
१३. A fragment of RV. I. 112. 1ᶜ.
१४. ०त्सा M. RV. I. 32.4ᵈ.
१५. RV. VIII. 40. 11ᵈ.
१६. वरणं M. १७. RV. I. 25. 5ᵃᵇ.
१८. RV. III. 56. 1ᵃ.
१९. ईख० M. २०. RV. I. 19. 7ᵃ.
२१. RV. I. 39. 5ᵃᵇ.
२२. विधाः पराः is suggested for विधापराः
२३. एषु is omitted by P.
२४. ०स्तेभीङ्ख० P.D.M.

दृश्यन्ते चास्य वामीये...तथाविधा विधाः ।
शब्दज्ञहृदयस्यास्ताः शक्याः शब्दैर्न भाषितुम् ॥

छन्दसोऽनुविधानाय यत्र भूतभविष्यतोः ।
लट् प्रयुक्तो न कालस्य विवक्षा तत्र विद्यते ॥

कदादियोगे कालस्य भवत्यभिभवो यथा ।
अर्थस्वभावश्च तथा कालं वाक्येषु बाधते ॥ इति ॥

I. 122.

प्र वः पान्तं रघुमन्यवोऽन्धो यज्ञं रुद्राय मीळ्हुषे भरध्वम् ।
दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥१॥

प्र वः पान्तम् । कक्षीवान् ।

भरध्व यूयम् । पानीयम् । हे लघुस्तुतय । सोमम् । यज्ञ च । रुद्राय । सेक्त्रे । दिवः । वीरैर्मरुद्भिः सह । स्तुतिः क्रियते । प्राज्ञस्य । मरुता पितरा ते पितरिति त इमे मरुतश्च । इषुधिना प्रेर्यमाणाः सेनास्विव शराः । द्यावापृथिव्योर्मध्ये पतन्ति तै स्तूयत इति ।

---

१. चान्य P. २. चामीये M.
३. वृत्तिभेदास्तथाविधाः R.
४. स्यास्ते R.
५. प्रयुङ्क्ते P.D. ६. तथादि० M.
७. ०न्त्य० P.D.M.
८. रध्वरं P. प्रकर्षेण सम्पादयत Sy.
९. पालनशीलं पातव्यं वा Sy.
१०. लघुस्तोत्रा अल्पोचित ऋत्विजः Sy.
११. सा० M. अन्नमाज्यसोमादिलक्षणम् Sy.
१२. यागसाधनम् Sy.
१३. दद्-दुःखं तद्धेतुभूतं दुरितं वा । तस्य प्रावयित्र एतन्नामकाय देवाय Sy.
१४. फलस्य वर्धित्रे Sy.
१५. खलीकसकाशात् । उपलक्षणमेतत् । लोकत्रयादप्यसुरस्य निरसितव्यानामसुराणां निरसितुः Sy.
१६. अमित्राणां विविधमीरकैर्वीर्योपेतैर्वा तदनुचरैर्मरुद्गादिभिः सह Sy.
वीरो वीरयत्यमित्रान् । वेतेर्वा स्याद् गतिकर्मणो वीरयतेर्वा N. 1. 7.
१७. मरुतां पितरा ते पितरिति seems to be a quotation but the meaning is doubtful.
१८. ० धीनां P. इषुध्या शत्रून्यथा निरस्यति तथा...इषवो धीयन्तेऽत्रेतीषुधिः Sy.
१९. इमराः M.
२०. निरसितारं तमेव देवं रोदस्योर्गिरोधनत्वयोर्द्यावापृथिव्योर्मध्ये वर्तमानान्मरुतश्चास्तोषि स्तौमि Sy.
२१. VM. ignores प्र

पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥२॥

पत्नीव पूर्वहूतिम् । यथा पत्नी पतिं वर्धयितुमनेकप्रकारं जानाति तद्वत् । पूर्वाह्णानं स्तोतारम् । वर्धयितुम् । अहोरात्रे । अनेकप्रकारम् । जानीतः । तयोरुषा निवृत्तप्रसवा इव गौः । तिरोहितम् । वर्णम् । आच्छादयन्ती । सूर्यस्य । श्रिया । हितरमणीयैस्तेजोभिरात्मीयैश्च । सुदर्शना भवति ।

ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥३॥

ममत्तु नः । मादयतु । अस्मान् । परितो गन्ता । जगच्छादकस्य तमसो हन्ता सूर्यः ।

---

१. पत्नी यथा . . . पत्युः पूर्वाह्णानं . . . वर्धयितुं शीघ्रगतिर्भवति तद्वत् Sy.

२. अस्मदीयं पूर्वाह्णानं वर्धयितुम् . . . । यद्वा । ववृधध्यै अस्मद्वर्धनाय Sy.

३. अहोरात्रे देवते अपि . . . शीघ्रमागच्छतमिति शेषः Sy.

४. बहुप्रकारं बहुविधैः स्तोत्रैः Sy.

५. ज्ञायमाने सत्यौ . . . वर्धनोपायान् जानत्यौ भवतमिति शेषः Sy.

६. अथ केवलोषा उच्यते Sy.

७. स्तरीः शत्रूणां हिंसकस्तेजसाच्छन्नो वाऽऽदित्यः, स इव Sy.

८. व्युतं विततं विशेषेण सम्बद्धम् Sy.

९. अत्कमक्तं सन्ततं वा रूपम् Sy.

१०. वारयन्ती Sy.

११. श्रिया शोभया Sy.

१२. हिरण्यवर्णै रश्मिभिः . . . । यद्वा । हिरण्यैर्हितरमणीयैः प्रकाशैर्धनविशेषैर्वा Sy.

१३. शोभनं दृश्यमाना । सूर्यस्य पुरोगामिनी रश्मिभिः सत्त्वेषा जगद् भासयति । तावृक्थ्या अस्मत्पूर्वहूतिं वारयन्तित्यर्थः । यद्वा. . . धनविशेषैः. . . सहागच्छतु Sy.

१४. Cf. BB. on. TS. 2.1.11.1. तृप्यतु नः, अस्मदर्थमस्मान्वाऽभिमतप्रदानेन तर्पयतु BB.

१५. परितः सर्वतो भक्षयिता । 'श्वन्नुक्षन्' इत्यादिना जनेः कनिन्प्रत्ययो निपात्यते । अजेर्वा जिनातेर्वाऽग्निरुच्यते BB.

१६. जगच्छामकस्य P.D.
च्छामकस्य M.
वसनार्हो गार्हपत्यादिरूपेण, यद्वा वासकानामाच्छादकानां वृक्षादीनां हन्ता, अग्निः । अथवा वसर्हा वासार्हो वासरस्य गमयिता . . . आदित्यः Sy.
वसर्हा—अग्निहोत्रशरणाभिमुखस्थानार्हा वसनार्हा । नाशब्दो लुप्यते, पृषोदरादिः, 'सुपां सुलुक्' इति सोराकारः । यद्वा वसितृणां छादयितृणां काष्ठादीनां हन्ता । छान्दसो रेफोपजनः । वस्तेः पचाद्यचि हन्तेः क्विप् । कश्चिदाह—'वासरस्य हन्ता गमयिता वसर्हा ।' वर्णविकारलोपौ छान्दसौ । आदित्य उच्यते BB.

ममत्तु च। वातः। अपाम्। वर्षणवान्। तीक्ष्णीकुरुतम्। युवां च। अस्मान्। इन्द्रापर्वतौ! तदिदमभिलषितं धनम्। अस्मभ्यम्। विश्वे। देवाः। प्रयच्छन्तु।

उत त्या मे यशसा शेवतायै व्यन्ता पान्तौशिजो हुवध्यै।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥४॥

उत त्या। अपिच। इन्द्रापर्वतौ। अन्नेन। मम। श्वेतनायै भवतश्चेति मान कुरुतः। खादन्तौ। पिबन्तौ च। कक्षीवान् आह्वातु प्रवृत्त। यूयमपि तयोर्यागार्थम्।

---

१. वातो वायुश्च Sy. BB.
२. वृष्टिपुषकानाम् Sy.
३. ० वां M. वृष्टिपुत्पादकः . . . वायुः Sy. अपां वृषा वर्षिता पर्जन्यस्तद्वान् तत्सहितो वातः। अनो नुट् BB.
४. शोधयतमित्यर्थः Sy. शिशीतं तनूकुरुतं निर्मलीकुरुतम्। श्यतेः, 'बहुलं छन्दसि' इति शपश्लुरीत्वं च BB.
५. अस्मद्बुद्धिं वा Sy.
६. इन्द्रः प्रसिद्धः। पर्वतः पर्ववान्वृष्ट्यादिपूरणवान् पर्जन्यः। तौ . . . युवाम् Sy. पर्वतस्संवत्सर इत्येके BB.
७. तत् तस्मात्, यस्मादहं सर्वान्देवान्स्तौमि तस्मात् Sy. तस्मात् BB.
८. सर्वेऽपि देवाः Sy. विश्वेऽपि देवा अन्येऽपि जनाः BB.
९. अस्माकं . . . प्रभूतमन्नं प्रदातुमिच्छन्तु। समृद्धान्नप्रदानेन प्रीणयन्त्वित्यर्थः Sy. अन्नं वातुमिच्छन्तु। वरिवोऽन्नम्। छन्दसि परेच्छायामिति क्यच् BB.
१०. तच्छब्दसमानार्थस्त्यच्छब्दः Sy. उतशब्दोऽप्यर्थे। त्यच्छब्दः समानार्थः। त्यच्छब्दश्रुतेर्योगार्थसम्बन्धो यच्छब्दोऽध्याहार्यः SKN.
११. यौ स्तुत्यत्वेन प्रसिद्धौ तावश्विनौ। अत्र यद्यपि विशेषो न श्रुतस्तथापि सूक्तस्य वैश्वदेवत्वादुषःसम्बन्धाद् द्विवचनलिङ्गाच्चाश्विनाविति गम्यते। तावृशावश्विनौ Sy. यौ पूर्वमहं स्तुतवान्वैश्वदेवत्वात्सूक्तस्य त्यौ तावप्यश्विनौ SKN. अश्विनौ Dur. १२. यश इत्यन्नं बलं कीर्तिर्वोच्यते। तद्वन्तौ Sy. यशश्शब्दोऽत्र धननामा, अन्ननामा वा, कीर्तेश्च पर्यायो वा। अन्तर्णीतमत्वर्थश्च द्रष्टव्यः। तेन धनवन्तौ वा कीर्तिमन्तौ वा SKN. हविर्लक्षणेन धनेन तर्प्यमाणौ Dur. १३. तादर्थ्यचतुर्थ्येषा। ममार्थाय भवनुग्रहायेत्यर्थः SKN.
१४. श्वेत० P.D. 'श्वेतनायै,' इति षष्ठ्यर्थे चतुर्थी। विश्वं जगच्छ्वेतयन्त्या उषसस्तत्सम्बन्धिनि काले। उषःकालीनाह्वानाय यतेयम्(यतेय) इति शेषः Sy. श्वेतनेत्येतदपठितमप्युषोनाम द्रष्टव्यम्। षष्ठ्यर्थे चात्र चतुर्थी। तच्छ्वेतेश्चोदयकाल इति शेषः। उषस उदयकाले SKN. उषसः काले प्राप्ते Dur.
१५. चरुपुरोडाशादिकम् Sy. व्यन्तौ खादन्तौ, पुरोडाशादीनि SKN.
वीतां भक्षयेतां पुरोडाशम् Dur.
१६. आज्यसोमादिकम् Sy. पिबन्तौ सोमम् SKN. पिबेतां सोमम् Dur.
१७. हे ऋत्विजः! वो यूयम्। प्रथमार्थे द्वितीया Sy. व इत्यपि प्रथमायाः स्थाने वसादेशश्छान्दसत्वात्। यूयमपि हे पुत्राद्य ऋत्विजो वा SKN. हे . . . मेधाविन ऋत्विजः! Dur.

[1]अग्निम्। [2]प्रकृणुध्वं पुरस्कुरुत। कीर्तनीयस्य। [3]अन्नस्य। [4]निर्मातारौ तौ च। अग्रतः [5]कृणुतम्। [6]रास्पि [7]रपतेः शब्दकर्मणः। [8]

आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ॥५॥

[10]आ वो [9]रुवण्युम्। [11]आह्वातु प्रवृत्तः। [12]युष्मदर्थम्। [13]वरणशीलमग्निम्। कक्षीवान्।

---

१. उदकानां नपातं नपातयितारं तासां नप्तारं वाऽग्निम्। अद्भ्य ओषधिवनस्पतयस्ताभ्योऽग्निरित्यपां नप्तृत्वमग्नेः Sy. प्लुवाग्नपात् सविता। कथम्? अद्भ्यो हि वैद्युतात्मनाऽग्निर्जायते। अग्नेः सविता 'अग्नेर्वा आदित्योऽजायत' इति श्रुतेः। अथवा ...अद्भ्य ओषधिवनस्पतयः [ताभ्योऽग्निरिति] अग्निं नपातम् SKN.

२. करोतिरत्र क्रियासामान्यवाची क्रियाविशेषे स्तोत्रे पर्यवस्यति। प्रकर्षेण स्तुध्वमित्यर्थः Sy. करोतिरत्र क्रियासामान्यवचनत्वात्स्तुतौ वर्तते। प्रकर्षेण स्तुत SKN. अप्येतस्मिन्कर्मणि भागिनं ...कृणुध्वम् Dur. ३. रपणशीलस्य वा रसनशीलस्य वा शब्दकारिणो वर्षभूतस्योदकस्य प्राप्त्यर्थम् Dur.

४. तादृशस्य मनुष्यस्य मम Sy. आयोर्मनुष्यनामेदं मनुष्यस्तोतुरित्यर्थः। मेघस्य वा स्वेनानुग्रहेण निर्मात्रोरनयोर्गमनस्वभावकस्य SKN. अथ वा स्तोतुः पुत्रस्य प्राप्त्यर्थम्। 'आयवः' इति हि मनुष्यनाम Dur. ५. मातृवद्धितकारिण्यावहोरात्रदेवते अपि प्र कृणुध्वम् Sy. प्रकर्षेण मातृभूते द्यावापृथिव्यौ स्तुत SKN. द्यावापृथिव्यावपि सर्वभूतनिर्मात्र्यौ कृणुतैवैतस्मिन्कर्मणि भागिन्यावित्येतच्च वः प्रब्रवीमि Dur. ६. कुरुत or कृणुध्वम् is suggested for कृणुतम्

७. रास्पि M. रास्पिनो रास्पी। रपतेर्वा। रसतेर्वा N.6.21. रपते रसतेर्वा शब्दनार्थस्य घञन्तस्य कृतसकारपकारोपजनस्य रास्य इति भवति। तदस्यास्तोति रास्पि स्तोत्रम्। तद्वान् रास्पिनः स्तोता। ...अथवा रास्पिनस्य। एको मत्वर्थप्रत्ययश्छान्दसः। प्रवर्षणध्वनियुक्तस्य वृष्ट्युदकस्य गमनशीलस्य निर्मात्र्यावहोरात्रे प्र कृणुध्वम् Sy. स्तुतीनां रापितृ रासितुर्वा SKN. 'रपतेर्वा' शब्दार्थस्य 'रसतेर्वा' शब्दार्थस्यैव रपणशीलो वा रसनशीलो वा यः स रास्पी।...एवमत्र रास्पिशब्देनोदकं स्तोता वाभिधीयते, शब्दसारूप्यादर्थाविरोधाच्च Dur.

८. रवतेः P.D.M.

९. A fragment of the 4th *Pāda*, i.e. रास्पिनस्यायोः is quoted in N. 6.21. Both Skandasvāmin and Durgācārya quote and comment on the stanza in full, *loc. cit.* SKN. II. 464.

१०. रुपण्युं P. ०ण्यं D.

११. युष्मदाह्वानायाच्छ आ वोचेय, आभिमुख्येन ब्रवीमि Sy.

१२. हे देवाः...वो युष्माकं सम्बन्धिनम् ...मह्वाऽऽह्वाप्यह्विनावेवोच्येते। तस्मिन्पक्षे बहुवचनं पूजार्थम् Sy.

१३. रवण० is suggested for वरण०। रवणीयं शब्दनीयं शंसं स्तोत्रम् Sy.

घोषेव शिवत्रिणी। शुक्लवर्णस्य[1]। नाशाय[2]। प्रवोचेय[3]। युष्माकम्। पोषकाय[4]। अग्नेः। दानाय[5]। तस्य वसूनां विस्तारमग्नेरौदार्यं भवदर्थं कीर्तयामीत्यर्थः[6]।

श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम्।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ॥६॥

श्रुतं मे मित्रावरुणा[7]। मम। इमानि। आह्वानानि[8]। अपि च। शृणुतम्। यज्ञे[9]। सर्वतः[10]। एव[11]। शृणोतु[12]। अस्मान्[13]। श्रवणीयदाना[14]। शोभनकीर्त्तिः[15]। शोभनपर्यन्तक्षेत्रा[16]। सरस्वती[17]। आत्मीयैरुदकैः सह[18]।

स्तुषे सा वां वरुण मित्र रातिर्गर्वां शता पृक्षयामेषु पज्रे।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन् ॥७॥

स्तुषे सा वाम्[19]। स्तुतासीत्। मित्रावरुणौ! अन्नार्थेष्वभिगमनेषु[20]। मा। युवयोः। गोशतात्मिका[21]। राति[22]। कक्षीवति मह्य जानपदे. कथितेत्यर्थः। श्रुतरथनाम्नि[23]। प्रियरथे राजनि[24]।

---

१. एतन्नामिका ब्रह्मवादिनीव। सा यथा ... श्वेतवर्णस्य स्वशरीरगतत्वग्रोगस्य ... नाशनाय यथाश्विनोः शंसमकार्षीत्। तद्वदहमपीत्यर्थः Sy.
२. घोषे ... वर्णस्य missing M.
३. प्रा० P. अच्छ, आभिमुख्यगमनेन वोचेय स्तौमि Sy.
४. पोषकाय, एतन्नामकाय देवायापि Sy.
५. आभिमुख्येन फलस्य दात्रे Sy.
६. VM. ignores शंसम्। आ। अच्छ।
७. ०णौ P. एतन्नामानावहोरात्राभिमानिदेवौ Sy.
८. न केवलमस्मदाह्वानम् Sy.
९. यागगृहे Sy.
१०. उद्गात्राविभिः सर्वतः क्रियमाणम् Sy.
११. एतत्स्तोत्रमपि Sy.
१२. शृणुतम् Sy.
१३. आ० D. सर्वत्र श्रूयमाणधनस्तावृशदानो वा Sy.
१४. अस्मदाह्वानस्य सम्यक् श्रोता Sy.
१५. सुक्षेत्राण्यद्भिर्वृष्टिजलैः क्लेदयन्निति शेषः। यद्वा। अस्मत्क्षेत्राण्यद्भिः सुक्षेत्राणि सस्याविसमृद्धानि कुर्वन्नो हवं शृणोतु। सुक्षेत्रत्वलाभाय शृणोत्वित्यर्थः Sy.
१६. जलाभिमानी देवः Sy.
१७. VM. ignores श्रुतम्, मित्रावरुणा
१८. युवामहं स्तुषे स्तुवे। व्यत्ययेन मध्यमः Sy.
१९. पृक्ष इत्यकारान्तोऽप्यस्ति। पृक्षाणामन्नानां नियमनं येषु स्तोत्रेषु यज्ञेषु वा तेषु निमित्तभूतेषु भवत्विति शेषः Sy.
२०. शोश० M. २१. ०तान्मि० D. शतानां शतसङ्ख्यानामपरिमितानां गवां सम्बन्धिन्यसङ्ख्यातगोविषया Sy.
२२. दानम् Sy.
२३. सर्वत्र प्रसिद्धरथोपेते Sy.
२४. प्रीयमाणरथयुक्ते सर्वदा रथप्रिये पज्रे च मध्येव Sy.

दीयमाना गावः। क्षीघ्रं मयि। पोषम्। नियच्छन्तः। आगताः।

अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः।
जनो यः पञ्चेम्यो वाजिनीवानश्वावतो रथिनो मह्या सूरिः ॥८॥

अस्य स्तुषे। अस्य। स्तुतमासीत्। महाधनस्य। धनं तद् वयम्। सह। पुत्रैः। सम्भजेमहि। तस्माद् मनुष्यात्? । जनः। य । अङ्गिरोभ्य । दत्ताग्रः। अश्ववतः। रथवतो धनस्य। कक्षीवते। प्रेरयिता।

जनो यो मित्रावरुणावभिद्रुग्पो न वां सुनोत्यक्ष्णयाध्रुक्।
स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ॥९॥

जनो यः। जन । य । युवयोः। मित्रावरुणौ! अभिद्रोह करोति। सोमोदकानि च यः। युवयोः। न। सुनोति। जह्याद्द्रोह कुर्वन्। स जन । स्वयमेव। हृदये। विषादम्। निधत्ते।

---

१. दंय० P. प्रीतिं धारयन्तः Sy.
२. आगमनानन्तरमेव Sy.
३. पोषयं D. गवादिपोषम् Sy.
४. अवरुन्धाना अस्मास्वेव स्थापयन्तः। यद्वा मयि पुष्टिं दधानाः कुर्वाणा निरुन्धानासः कृतामेव पुष्टिं मयि स्थिरां कुर्वन्तः... आगच्छन्तु Sy.
५. स्तुषे M.
६. स्तुषमा० M. स्तुषे स्तुवे। व्यत्ययेन मध्यमः। धनलाभाय प्रभूतधनं देवसङ्घं स्तौमीत्यर्थः Sy.
७. महत् M. महि महत् पूज्यं मघो धनमन्नं वा यस्य देवसङ्घस्य स तथोक्तः Sy.
८. परस्परैकमत्येन Sy.
९. शोभनपुत्राद्युपेताः सन्तः Sy.
१०. स्पृहणं धनं... लभेमहि Sy.
११. ०ध्यान् M. नहुषः। मनुष्यनामैतत्। परस्परस्नेहबन्धोपेता मनुष्या वयं कक्षीवन्तः Sy.
१२. देवजनो यश्च देवसङ्घः Sy.
१३. अङ्गिरोगोत्रोत्पन्नेभ्यः कक्षीवद्भ्यः। 'पञ्चा वा अङ्गिरसः' इति श्रुतेः Sy.
१४. वाजोऽन्नम्। तद्वती क्रिया वाजिनी। तया तद्वान् भवति। यद्वा। एको मत्वर्थीयप्रत्ययश्छान्दसः। अस्मभ्यं प्रदेयेन वसुना वाऽन्नेन तद्वान्भवतीत्यर्थः Sy.
१५. बहुभिस्तद्वत्तैरश्वैस्तद्वतः Sy.
१६. प्रेरको भवति। अश्वानां रथानां प्रेरयितारं देवसङ्घं स्तुष इत्यर्थः Sy.
१७. अभितो द्रोग्धा भवति। अयष्टा भवतीत्यर्थः Sy.
१८. सोमरसान् Sy.
१९. अभिषवं न करोति। युवामतिरिक्तान्यदेवतार्थं सुनोतीत्यभिप्रायः Sy.
२०. वक्रेण मार्गेण द्रुह्यति, अन्यथाप्रकारेण द्रुह्यति Sy.
२१. कुर्व D.
२२. स मूढो द्विविधो जनः Sy.
२३. जनस्य यमेव M.
२४. व्याधिम्... स्वचित्ते... स्थापयति। अनुष्ठातृणां भोगान्पश्यन्व्यथितो भवतीत्यर्थः Sy.

यदि। एनं जनम्। स्तुतिभिः सह। यज्ञयुक्तः कक्षीवान् प्रज्वलन्युवयोः स्तोता। प्राप्नोत्यन्यो वा यजमानो व्यथन्ते यजमानाः प्रज्वलन्तं दृष्ट्वेति।

स वाधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः ॥१०॥

स बाधतः। स.। महत. शत्रून्। मनुष्यान्। दमनपरै. सुष्ठु परिवृत। बलवत्तरः। मनुष्याणाम्। उद्गूर्णान्न'। विसृष्टधनः। अभियाति। बहुशत्रुमध्ये गच्छन्। सर्वविधेषु। युद्धेषु। सदा। एव। शूरो यो जन. पञ्चेभ्यो दत्ताश्न इति।

अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यभिरवस्य राधः प्रशस्तये महिना रथवते ॥११॥

अध ग्मन्ता। इष्टाश्वप्रभृतिषु सप्तसु राजसु भिक्षितु प्रवृत्तस्तानाह। सम्प्रति। आगच्छत। आगत्य चास्य स्तोतु.। मनुष्यस्य। आह्वानम्। शृणुत च। अन्नस्य। राजान। हे मदयि-

---

१. यत्। लिङ्व्यत्ययः। य उक्तविलक्षणः पुमान् Sy.
२. एनं सोमरसम् Sy.
३. स्तुतिः M. होत्राभिः। वाङ्नामैतत्। स्तुतिवाग्भिः Sy.
४. यज्ञ omitted by P. and D. यज्ञवान् परिगृहीतयज्ञः Sy.
५. स्तोका M.
६. व्याप्नोति, स्तुवन् सोममभिषुणोतीति यावत्। स नरः पृत्सु यातीति वक्ष्यमाणेन सह सम्बन्धः Sy.
७. ० लयन्तं P. ० लन् M.
८. Omitted by P.
९. प्राव० P.
१०. M. adds अति अपि after महतः। महन्नामैतत्। हिंसकान् महतोऽपि Sy.
११. ०ध्यं P. नहुषः। मनुष्यनामैतत्। मनुष्यान् शत्रून् प्रति Sy.
१२. दान्तैरश्वैः सुष्ठु प्रेरितः Sy.
१३. अतिशयेनाभिभविता। अथवाऽतिशयेन बलवान् Sy.
१४. नराणां स्वसमानानां मध्ये Sy.
१५. ०र्णन्नः P. उद्गूर्णदीप्तिः प्रख्याताग्नो वा Sy.
१६. M. adds अपि before विसृष्टधनः। अर्थिभ्यः प्रवृत्तधन एवं महानुभावः Sy.
१७. बाहुं D. बाह्वं M. भृशं सर्ता, अशङ्कितगमनः सन् Sy.
१८. सर्वेषु जन्येषु सङ्ग्रामेषु Sy.
१९. वज्रे० P.M.
२०. ०न्त D. P.
२१. इष्ट्वाश्व० P. इष्वाश्व० D. इष्टाश्वप्र० M.
२२. अथ श्रवणानन्तरम् Sy.
२३. चास्य D.
२४. स्तोतुं M. स्तोत्राविप्रेरकस्य Sy.
२५. अन्यस्य M. अमरणस्य Sy.
२६. राजमानाः सर्वस्येश्वरा वा Sy.

तारः! वायोः। निर्गच्छतः। यत्। धनं स्तोत्रे भवति। प्रशंसनाय। महत्तया। रथयुक्ताय तवस्मभ्यमपि दत्तेति वाक्यशेषः। वायुर्निर्गतो यद्धनं स्तोतृभ्यः प्रयच्छति भूतेरीश्वरस्तादृशमस्मभ्यं दत्त। अल्पं धनं शिरोवाह्यं भवति बहु चेदनोवाह्यं बहुतरं चेद्रथवाह्यम्। तच्छ्रद्धत्ते रथवान्।

एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे।
द्युम्नानि येषु वसुताती रारन्विश्वे सन्वन्तु प्रभृथेषु वाजम् ॥१२॥

एतं शर्धम्। एतम्। वेगम्। धारयामः। गच्छत। प्राज्ञस्य वायोः, योऽयं पुरुषे प्रविष्टः प्राणात्मकः शर्धस्तस्यान्नेन धारणं भिक्षितेनेति। अवोचन्। दशावयवस्य। व्याप्त्यर्थम्। अन्नानि। येषु। उदारः। प्रयच्छन्भातीति। सर्वे ते प्राणाश्च। दातृषु। अन्नम्। भजन्ताम्।

---

१. हे मम दयि० M. मादयितारः Sy.
२. वयोः P. नभसि व्याप्ता यूयम् Sy.
३. ०ते P. निर्गतरक्षकस्य, युष्मद्व्यतिरेकेण रक्षकान्तररहितस्य। अथवा निर्गतो मुखाद्युच्चरितो रवः शब्दः स्तोत्ररूपो यस्य तादृशस्य Sy.
४. यस्मात् Sy.
५. राधः समृद्धिसाधनं हविर्लक्षणं संराधकं स्तोत्रं वा Sy.
६. प्रशस्तये प्रशंसितुं कामयध्वे। तस्माद्वाह्वानं शृणुतागच्छत चेति Sy.
७. महिम्ना माहात्म्येन Sy.
८. रथवतो यजमानस्य। षष्ठ्यर्थे चतुर्थी Sy.
९. ०स्मभ्यमपि D.
१०. ०निर्गच्छतः P.D.
११. इदानीं दातव्यत्वेन वर्तमानम् Sy.
१२. परेषामभिभावकमन्नं तत्प्राप्तिहेतुं बलं वा Sy.
१३. विदधाम करवाम, इत्यवोचन् देवाः Sy.
१४. ० तं M.
१५. व० P.D. हविरादिप्रेरकस्य यजमानस्य सम्बन्धिनः Sy.
१६. ० शते व P.D.
१७. ०चं D.M. अवयोचन् P.
१८. M. adds तस्य after दशावयवस्य। दशेन्द्रियसंवर्धकत्वेन दशावयवस्यान्नस्य Sy.
१९. प्राप्तये वयमाहूताः स्म तस्मै यजमानाय Sy.
२०. द्योतमानान्यन्नानि Sy.
२१. देवेषु Sy.
२२. दारः P.M. वसूनां धनानां तातिर्विस्तारश्च, वसून्येव वा ... तातिस्तनोतेः Sy.
२३. रमन्ते भृशम्... रारन् इति रमतेः Sy.
२४. भवती० M.
२५. ० णाः पदाः D.M. ० णाः व वा० P. देवाः Sy.
२६. प्रकृष्टभरणेषु यागेषु Sy.
२७. सन्वन्तु ददतु प्रयच्छन्तु...'षणु दाने' Sy.
२८. यद्वा। यस्य सूरेः स्वभूतस्य च दशतयस्य दश चमसेष्ववस्थितस्य सोमस्य प्राप्तये वयमाहूताः स्म तस्मा एतं शर्धं धाम इत्यवोचन्। यस्मादेवं तस्मात्प्रभृथेषु यागेषु वाजं तादृशं सोमलक्षणमन्नं विश्वे देवाः सन्वन्तु सम्भजन्ताम् Sy.

मन्दामहे दशतयस्य धासेर्द्विर्यत्पञ्च बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नृन् ॥१३॥

मन्दामहे । स्तुमः । प्राणस्य । अन्नार्थम् । यस्मात् । दश प्राणा. । अन्नानि । बिभ्रतः । वर्तन्ते । किममी राजान. सम्प्रति । इष्टाश्वः । इष्टरश्मिः, अन्ये च पञ्च । दरिद्राणां तरणस्य । ईश्वराः । याचितून् मनुष्यानन्नप्रदानेन । साधयन्तीति समीपस्थान्पृच्छन्ति ।

हिरण्यकर्ण मणिग्रीवमर्णस्तको विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सुद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ॥१४॥

हिरण्यकर्णम् । हिरण्मयालङ्कारयुक्तकर्णम् । मणिभिरलङ्कृतग्रीव शिर.कण्ठयो क्रमेण वर्णने नाम च सर्वनिघात दृष्टम् । तत् । धनम् । अस्मभ्यम् । विश्वे । देवा । प्रयच्छन्तु मया स्तुता उत्तरस्यामृचि । वक्ष्यमाणेषूभयविधेषु । या गावस्ता । अस्मान् । आकामयन्ताम् । प्रेर-

---

१. मन्दामहे स्तुमो वयं देवान् । 'मदि स्तुतौ' Sy. २. दशेन्द्रियतृप्तिसाधनत्वेन दशावयवस्यान्नस्य Sy.
३. दशविधान्यन्नानि । दशचमसगृहीतत्वाद्वान्नस्य दशविधत्वम् Sy.
४. धारयन्तो दश चमसानध्वर्यवः Sy.
५. यन्ति होमाय गच्छन्त्याहवनीयं प्रति । यद्वा 'आश्वमेधिकानि दशान्नानि जुहोति' इत्याम्नातान्याज्यमध्वादीनि दशविधान्यन्नानि विश्वेभ्यो देवेभ्यो होतुं धारयन्तो यन्ति यदा तदा मन्दामह इति Sy.
६. किमृञ्जते किं प्रसाधयति । तथेष्टरश्मिश्च किमृञ्जते Sy.
७. ०श्च D. एतन्नामको राजा Sy.
८. इष्टाश्चेष्ट० M.
९. एते इदानीं वर्तमानाः, ईशानासः पृथिव्या ईश्वरा राजानश्च किं प्रसाधयन्ति । यद्वा येवां स्तोतृणामस्माकमेते स्तुता देवा ईशानासः स्वामिनः, किल तावुशन्तश्च शत्रूणां तारकाशून् कर्मनिर्वाहिकामस्मानिष्टाश्वादयः किं साधयन्ति किमुपद्रवन्ति न प्रभवन्तीत्यर्थः Sy.
१०. ०रः M.
११. नेतृन्कर्मणामेवं महानुभावान्वरुणादीन् Sy. १२. ०न्ती P.
१३. हिरण्यविकारकुण्डलाद्युपेतकर्णम् Sy.
१४. ० युक्तकर्मणि अलङ्कृत० M. रत्नाद्युपेतकण्ठम् Sy.
१५. एतद्द्वयं सर्वावयवस्याप्युपलक्षणम् । एवं सर्वाङ्गाभरणयुक्तम् Sy.
१६. अरणीयं रूपं तद्वन्तं पुत्रादिकमित्यर्थः । उक्तलक्षणमस्मदीयं रूपं वा Sy.
१७. परिचरन्तु प्रयच्छन्त्वित्यर्थः Sy.
१८. उभयेषु स्तोतृषु यष्टृषु च । यद्वाऽस्माकमुभयेषु ऐहिकामुष्मिकविषयेषूभयविधेषु फलेषु Sy.
१९. विकारे प्रकृतिशब्दः । क्षीराज्यादीनि हवींषि च Sy.
२०. अस्माकं सम्बन्धिषु Sy.
२१. अकामयन्तां P.D. आकामयन्त M. कामयन्ताम् . . . आ चाकन्विति वा योज्यम् । पर्याप्तं कामयन्तामित्यर्थः Sy.

[1] [2] [3] [4] [5]
यितुः। वाचः। सद्यः। गच्छन्त्यः।

चत्वारो मा मशुर्शारस्य शिशुत्रयो राज्ञ आयवसस्य जिष्णोः।
रथो वां मित्रावरुणा दीर्घाप्साः स्यूमंगभस्तिः सूरो नाद्यौत् ॥१५॥

[6] [7] [8] [9]
चत्वारः। मशर्शारो नाम कश्चित् तस्य। पुत्राः। चत्वारः। एवमायवसस्य। राज्ञः
[10]
पुत्रा.। त्रयस्त इमे मान्योतयन्तु ? एव मित्रावरुणौ ! यो वाम्। रथ'। दीर्घगमन.। अनुस्यूतरश्मिः।
[11] [12] [13]
तेजसा सूर्य.। इव। मा प्रति द्योतते निरूपणीयं प्राज्ञैः।

I.123.

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः।
कृष्णादुदस्थाद्यर्या विहायाश्चिकित्सन्ती मानुषाय क्षयाय ॥१॥

[14] [15]
पृथू रथः। उषसि भिक्षणप्रवृत्तान्दानप्रवृत्तांश्च दृष्ट्वा वदति। विस्तीर्ण। दक्षिणाया'।
[16] [17] [18] [19] [20] [21]
रथः। युक्त। त चैनं दक्षिणाया रथम्। अमृता। देवाः। आस्थिता'। कृष्णाश्चैशात्तमसः।

---

१. अर्यः, अरणीयो विश्वेषां देवानां सङ्घः Sy. २. स्तुतीः Sy.
३. अस्मदागमनानन्तरमेव Sy.
४. स्तोतुर्मुखाभिर्गच्छन्तीः Sy.
५. VM. ignores आ
६. मशकीकृत्य भृशं शृणोति शारयति वा-ऽभित्रानिति मशर्शारः, एतन्नामकस्य राज्ञः Sy. ७. शिशवः शिशुवद-प्रबुद्धाश्चत्वारः पुत्रा बाधन्त इति शेषः। शिशुशब्दस्य 'असाविवुच्छन्दसि वा वचनम्' इति गुणाभावः Sy.
८. सर्वतः प्राप्तान्नस्य, एतन्नाम्नो राज्ञो जयशीलस्य पुत्रास्त्रयस्तेऽपि बाधन्त इति शेषः Sy. ९. अप्स इति रूपनाम। अतिविस्तृतरूपः Sy.
१०. स्यूममिति सुखनाम। सुखकरदीप्तिः Sy.
११. ० तने P.D.M. अद्यौत् द्योततां। उक्तानामस्मद्विरोधिनां पुरतः स्फुरन् भयजनको भवत्वित्यर्थः। द्युतेः...लुङ्
Sy. १२. ०ज्ञे M.
१३. Ms. D. puts the figure ॥१२२॥ here to indicate the end of one hundred and twentysecond hymn. No such number is given in P. and M.
१४. ०त्तां P. १५. प्रबुद्धायाः स्वव्यापार-कुशलाया उषोदेवतायाः।...अत्र यद्यपि देवताविशेषो न श्रुतस्तथाप्युषस्यत्वादुषस इति गम्यते Sy.
१६. यतस्तं P. अश्वैर्युक्तः सन्नद्धोऽभूत् Sy.
१७. ०णार० M.
१८. अमरणधर्माणः Sy.
१९. वः P.D. देवनशीला द्युविभाजो देवाः Sy. २०. आस्थितवन्तः। देवयजनं गन्तुमारब्धा इत्यर्थः Sy.
२१. ०ष्यां मै० M. निकृष्टवर्णात् Sy. कृष्णं कृष्यतेः। निकृष्टो वर्णः N.2.20.

उदस्थात्[1]। अर्यानां[2] दात्री। महत्युषा[3]। मानुषाय[4]। लोकाय[5]। तेजसा प्रज्ञानं कुर्वती[6]।

पूर्वा विश्वस्माद्भुवनादबोधि जयन्ती वाजं बृहती सनुत्री।
उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥२॥

पूर्वा विश्वस्मात्[7]। सुप्ताद् विश्वस्माद्[8]। भूतजातात्[9]। पूर्वेयम्[10]। प्रबुध्यते[11]। जयन्ती। अन्नम्[12]। महती[13]। दात्री[14]। दिव्युच्चैरात्मानम्[15]। प्रकाशयति[16]। तरुणा[17]। पुन पुनर्जायमाना[18]। सैषा[19]। आगच्छतु[20]। मुख्या[21]। प्रथममेवाह्वयति मयि[22]।

यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥३॥

यदद्य भागम्[23]। यत्[24]। अद्य[25]। धनम्[26]। प्रयच्छसि[27]। मनुष्येभ्य[28]। एषा[29]। देवी[30]। मनुष्येषु[31]।

---

१. उत्थिताऽभूत् Sy.
२. अरणीया पूजनीया Sy.
३. विविधगमनयुक्ता महती वा। विहाया इति महन्नाम। 'विहाया यह्वः' (Ngh. 3.3.) इति तन्नामसु पाठात् Sy. ४. मनुष्याणां निवासाय Sy.
५. ०न्ति P. अन्धकारनिवारणरूपां चिकित्सां कुर्वती तमो निवारयन्तीत्यर्थः Sy.
६. Omitted by M. सर्वस्मात् Sy.
७. प्रथमा सतीयमुषाः Sy.
८. बुद्धाऽभूत्। उषःकालमवगत्य हि पश्चात्सर्वे प्राणिनः प्रतिबुध्यन्ते Sy.
९. जन्ती M. प्रकाशं निर्वर्त्यान्धकारं जयन्ती पराभवं कुर्वती। यद्वा... यजमानार्थमन्नं सम्पादयन्ती Sy.
१०. वाजं गमनशीलं प्रकाशं... यद्वा वाजशब्दोऽन्ननामसु पठितत्वादन्ननाम। 'अन्नं वै वाजः' (SB.9.3.4.1., TB.1.3.6.2.) इति श्रुतेश्च Sy.
११. सर्वं जगत्सम्भजन्ती, दात्री वा प्रकाशस्य Sy. १२. उद्यता सती Sy.
१३. विबुध्यते। सर्वं जगत्पश्यतीत्यर्थः Sy.
१४. तरुणी is suggested for तरुणा। मिश्रणशीला नित्ययौवना वा Sy.
१५. पुनः पुनर्भवनशीला प्रतिदिनं वर्तमानत्वात् Sy.
१६. सोषाः is suggested for सैषा।
१७. देवयजनदेशं प्रत्यागच्छतु Sy.
१८. ०ख्य P.D. प्रकृष्टा सती Sy. प्रथम इति मुख्यनाम। प्रतमो भवति N.2.22.
१९. ०मेव बह्वाय० M. इतरदेवेभ्यः पूर्वमाहूता सती शीघ्रमेवागच्छतीत्यर्थः Sy.
२०. यम् Sy.
२१. भजनीयं स्वकीयप्रकाशस्यांशम् Sy.
२२. विभज्य ददासि... नृभ्यो यजमानेभ्यो देवानां भागं विभज्य ददासि। उषसि प्रवृत्तायां हवियो दीयमानत्वादुषसो दातृत्वमुपचर्यते Sy.
२३. उषः ! is suggested for एषा।
२४. देवि ! is suggested for देवी। देवनशीले हे उषः ! उषःकालाभिमानिदेवते ! Sy.
२५. मनुष्याणां पालयित्री त्वम् ... यद्वा मर्त्येत्रा मर्त्येषु मध्ये Sy.

शोभनजनने[1] ! अस्मिन् काले[2]। देवः। सविता[3]। अस्मान्[4]। अपापान्[5]। वदतु[6]। दममनाः[7]।
सूर्याय यथोदितो देवः सूर्योऽस्माभ्र बाधते तथा ब्रवीतु।

गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना ।
सिषासन्ती द्योतना शश्वदागादग्रंमग्रमिद्भजते वसूनाम् ॥४॥

गृहंगृहम्[8]। गृहं गृहम्। उषा[9]। अभिगच्छति[10]। दिवसे दिवसे[11]। नमनम्[12]। दधाना। जगत्
सम्भक्तुमिच्छन्ती[13]। तेजसा द्योतयन्ती[14]। सर्वदा[15]। आगच्छतु सेय सर्वेषामेव[16]। धनाना हविष्ट्वमा-
पन्नानाम्[17]। अग्रम्[18]। एव। भजतेऽग्निहोत्रेषु[19]।

भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व ।
पश्चा स दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥५॥

भगस्य स्वसा[20][21][22]। भगस्य देवस्य। स्वसा सह प्रादुर्भावात्। वरुणस्यापि[23]। जामिः[24]। उष !

---

१. भागविषये Sy. २. सविता प्रेरकः Sy.
३. यागयोग्यान् Sy.
४. ब्रवीतु अनुगृह्णात्वित्यर्थः Sy.
५. दमूना यजमानेभ्योऽभिमतफलदानमना Sy. दमूना दममना वा। दानमना वा। दान्तमना वा। अपि वा दम इति गृहनाम। तन्मनाः स्यात् N.4.4.
६. सूर्या P.M. अस्मद्यागदेशं प्रति सूर्यस्यागमनार्थम् Sy.
७. Omitted by M. तत्तद् यज्ञगृहम् Sy.
८. अहना। उषोनामैतत्। 'अहना द्योतना' (Ngh. 1. 8.) इति तन्नामसु पाठात्। सा देवी Sy. ९. अपिग० P.M. ०षापिग० D. अच्छ आभिमुख्येन Sy.
१०. प्रत्यहम्। 'दिवेदिवे द्यविद्यवि' (Ngh. 1. 9.) इत्यहर्नामसु पाठात् Sy.
११. See notes No. ११ and 2 on RV. 1. 68. 4 and RV. 1. 80. 3. respectively, vol. I. pp. 340, 388. अधि अधिकं, नाम नमनं प्रह्वत्वं प्रतिगृहमुद्योगं प्रकाशनकर्म Sy.
१२. दधाना धारयन्ती। यद्वाऽधिदधानाऽधिकं धारयन्ती Sy. १३. कृत्स्नं जगद् द्योतनशीला Sy. १४. प्रतिदिनम् Sy.
१५. आगच्छति। पूर्वं यातीत्युक्तत्वात्पुनरागादिति वचनमावश्यकत्वद्द्योतनार्थम् Sy.
१६. हविर्लक्षणानाम् Sy.
१७. अग्रमित् तत्तच्छ्रेष्ठभागम् Sy.
१८. भजते सेवते स्वीकरोतीत्यर्थः Sy.
१९. VM. ignores अधि। अग्रम्
२०. M. repeats भगस्य स्वसा भगस्य स्वसा।
२१. सर्वैर्भजनीयस्यादित्यस्य Sy.
२२. ०सापि P. स्वसृस्थानीयासि। तेन सहोत्पद्यमानत्वात्सदृस्पृज्येत्यर्थः Sy.
२३. तमोवारकस्य सवितुर्देवस्य Sy.
२४. भगिनीस्थानीयासि। एकस्मिन्नेव स्थाने उत्पद्यमानत्वात्। जनयन्त्युत्पादयन्त्यस्यास्यामपत्यमन्य इति जामिः। यद्वा जमति गच्छति स्वोत्पत्तिस्थानादन्यत्रेति Sy. न जामये भगिन्यै। जामिरन्येऽस्यां जनयन्ति जामपत्यम्। जमतेर्वा स्याद् गतिकर्मणः। निर्गमनप्राया भवति N.3.6.

सत्ये[१]! अग्निमा[२]। त्वमस्मान्[३] जरां कालेन[४] गमय[५]। पश्चात्[६]। स[७] गच्छत्वस्माकम्। पापस्य[८]। निधाता[९]। तं वयम्[१०]। धनात्मकेन[११]। रथेन[१२]। जयेमेति[१३]।

उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः।
स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः ॥६॥

उदीरताम्[१४]। उद्गच्छन्ति[१५]। वाचः[१६]। प्रज्ञाश्च[१७]। अग्नयश्चाग्निहोत्रेषु[१८]। दीप्यमानाः[१९]। उत्तस्थुः[२०] स्पृहणीयानि[२१]। धनानि[२२]। तमसा। तिरोहितानि[२३]। प्रकाशयन्ति[२४]। उषसः[२५]। व्युच्छन्त्यः[२६]।

---

१. सुष्ठु मनुष्याणां नेत्रि! Sy.
२. ०त्यें...मा missing M. इतरदेवेभ्यः पूर्वा, उत्कृष्टा वा सती Sy.
३. ०स्मात् M.
४. स्तुता भव। जरितः स्तुत्यर्थः Sy. जरा स्तुतिः। जरतेः स्तुतिकर्मणः N.10.8.
५. त्वत्प्रीत्यनन्तरम् Sy.
६. सं P.D.
७. ०त्वं अस्मा० P. दध्याः, गच्छतु। वचनव्यत्ययः। दध्यतिर्गत्यर्थः। 'दध्यति बध्नोति' (Ngh. 2. 14.) इति गत्यर्थेषु पाठात् Sy.
८. यः कश्चिद्दुःखस्य तवुत्पादकपापस्य वा Sy.
९. ०धाना P.D. धारयितास्ति Sy.
१०. यदि स पापी बलीयांस्तम् Sy.
११. दक्षिण्यया प्रवृद्धया सहायभूतया त्वया Sy.
१२. Omitted by P.D. रथेन, अस्मदीयरथादिसाधनेन च जयेम Sy.
१३. VM. ignores यः
१४. ०तं D.
१५. ०न्ती P. उद्गच्छन्तु। हे ऋत्विज उत्कृष्टं यथा भवति तथा स्तोत्रं प्रवर्तयध्वम् Sy.
१६. प्रियसत्यात्मिका वाचः Sy.
१७. पुरं शरीरं यासु धीयते ताभिर्वा ताः पुरन्धयः प्रज्ञाः प्रयोगविषयाः। ता अप्युन्मिषन्तु। प्रज्ञोपलक्षितानि कर्माणि प्रवर्तन्तामित्यर्थः। यद्यपि प्राणवायुना शरीरं धार्यते तथापि 'यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः' (Kau. Up 3. 3.) इति श्रुतेः प्राणप्रज्ञयोरेकत्वात्प्रज्ञायाः शरीरधारणमविरुद्धम् Sy.
१८. आहवनीयाद्याः Sy.
१९. अत्यन्तं दीप्यमानाः Sy.
२०. उत्तिष्ठन्तु। प्रज्वलयन्त्वित्यर्थः Sy.
२१. ०त्रे...वी...स्पृ० M.
२२. तनानि M. वासयोग्यानि यज्ञसाधनभूतहविरादीनि Sy.
२३. अपगूढानि अन्धकारेणात्यन्तं गोपितानि Sy.
२४. यथावस्तु प्रकटीकुर्वन्ति तस्मात्स्तोत्रादिकं कुर्वन्त्वित्यर्थः Sy.
२५. विविधं भासमानाः Sy.
२६. VM. ignores one उत्

अपान्यदेत्यभ्यन्यदेति विषुरूपे अहनी सं चरेते ।
परिवितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥७॥

अपान्यदेति । रात्रिसञ्ज्ञकमेकम् । अपगच्छति । अभिगच्छति । अहः । नानारूपे । अहोरात्रे । सञ्चरेते । परितो निवसन्त्योरेतयो. । अन्या रात्रि । आत्मीयं तम । गुहायाम् । करोति नाशयत्यन्या । द्योतते । उषा । दीप्यमानेन । रथेन ।

सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम ।
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः ॥८॥

सदृशीरद्य । समाना. । अद्य । समाना । एव । इव. इव उषसः सदंकरूपाः ।

---

१. इदानीमहोरात्रस्तुतिद्वारा उषाः स्तूयते ... अत्राह्नः साहचर्यात्तत्प्रतियोगित्वाच्च रात्रिरप्यहरित्युच्यते...रात्रिरूपमहः Sy.
२. अभिग० M. ०च्छन्ति P. प्रतिलोमं गच्छति वा Sy. अपेत्येतस्य प्रातिलोम्यम् N.1.3.
३. ० च्छन्ति P. आभिमुख्येन गच्छति ... रात्र्यां प्रतिनिवृत्तायामहरभिमुखमागच्छतीत्यर्थः Sy. अभीत्याभिमुख्यम् N.1.3.
४. दिवसाख्यमहः Sy. ५. ०पेण P.
६. अहश्च रात्रिश्चोभे Sy. See note No. ५ on RV. I. 113. 3.
७. ० चरते P. समित्येकीभावे । सहैवाव्यवधानेन चरतः Sy. ८. पर्यायेण निवसतोः परिक्षपयतोर्वा । प्राणिनामहस्त्वतीतेष्वायुषः क्षयात् परिक्षपणं प्रसिद्धम् Sy. ९. निवस्यन्त्योरो ... न्या P.
१०. ०रात्रीयम् P. ११. तमोरूपा Sy.
१२. पदार्थानां गूहनम् Sy.
१३. ० ति रन्या D. ० यन्त्य० P. अन्या अहरेकदेशभूता च Sy. १४. प्रकाशते, प्रकाशयति वा सर्वम् । रात्रिस्तमोरूपत्वात् सर्वं जगद् आवृणोति । उषास्तु सर्वान्भावान्प्रकाशयतीत्युषसः स्तुतिः Sy.
१५. भूमं द्वीपेन Sy. १६. परस्परं सदृश्यः Sy.
१७. अस्मिन्नहनि Sy.
१८. उशब्दोऽपिशब्दार्थः । इच्छब्द एवार्थः Sy.
१९. श्वश्चोषः P. श्वश्चोषसः D. श्वे श्वोषसः M. One श्वः is redundant. श्व इत् परस्मिन्नप्यहनि Sy.
२०. अद्यतन्योऽपि श्वस्तनीभिः सदृश्यः, श्वस्तन्यश्चाद्यतनीभिः । एवमहरन्तरेण सादृश्यम् । कथं सादृश्यमिति तदुपपाद्यते । यदा नक्षत्राणि न दृश्यन्ते, सूर्यश्च नोदेति, उषःकालः । स चैकविंशतिघटिकाभिः षड्विंशतिपराभिश्च सम्मितः । सूर्यो हि प्रतिदिनमेकोनषष्ट्यधिकपञ्चसहस्रत्रयोजनानि मेरुं प्रादक्षिण्येन परिभ्रमति । तथा सति यत्र यत्र लङ्कादिभूप्रदेशे सूर्यो गच्छति तस्य तस्य पुरस्तात् त्रिंशद्योजनमुषा अपि गच्छति । सूर्यो यस्मिन्देशे गच्छति तत्र त्रिंशद्योजनं पुरस्ताद्देशस्थितानामुदितो दृश्यते । एवं सर्वप्रदेशेष्वपि । तथोषा अपि यत्र गच्छति ततः पुरस्तात् त्रिंशद्योजनभूभागवर्तिनामुदिता दृश्यते । एवं लङ्कादिसर्वप्रदेशस्थितानामप्युषस उदयोऽवगन्तव्यः । एवं च सत्येकस्मिन्भूभागे यावत्कालं यथोषाः प्रकाशयति तथा भूभागान्तरेऽपि तावन्तं कालं प्रकाशयति । एवमुत्तरोत्तरैकस्मिन्नेवाहनि सर्वप्रदेशवर्तिनामप्युषसः सदृश्यः । प्रदेशबाहुल्यमपेक्ष्योक्तं बहुत्वाद् बहुवचनम् Sy.

दीर्घम्[1]। वरुणस्य[2]। स्थानम्[3]। सेवन्त[4] उदयगिरेश्चान्तरालं[5] सेवन्ते। अनवद्या[6] उषस[7]। सद्य एकेनाहोरात्रेण। त्रिंशतम्। योजनानि[8]। आदित्यम्। परितो गच्छन्ति। एकैकेति[9] त्रिंशन्मुहूर्ता अहोरात्रयोस्तानादित्यमेता[10] अन्वहं परिगच्छन्तीत्येकस्मिन् योजने यदादित्यस्तिष्ठति तदैकं मुहूर्तमिति[11]।

जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची।
ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती ॥९॥

जानत्यह्नः[12]। प्रथमस्य[13]। अह्नोऽहर्मुखस्य। नमनम्[14]। अवगच्छन्ती[15]। शुक्लवर्णा[16]। श्वेति[17]मानमञ्चन्ती। रात्रे[18]। अजनिष्ट[19]। आदित्यस्य[20]। योषा[21]। न[22]। हिनस्ति[23]। स्थानम्[24]। अन्वहम्[25]। सस्कृतं स्थान तत्[26]। आगच्छन्ती[27]।

---

१. उक्तरीत्यात्यन्तमायतम् Sy.
२. तमोनिवारकस्य सूर्यस्य Sy.
३. मेरुवलयम् Sy.
४. ० वन्न M. प्रतिदिनं सेवन्ते Sy.
५. ० न्तालं M.
६. शुद्धाः। तासामुदयात्सर्वे भावा अनवद्या भविष्यन्ति किमु वक्तव्य तासामनवद्यत्वे Sy.
७. सूर्यो यत्र यत्रोदेति ततस्तत्रस्त्रिंशद्योजनं पुरस्ताद् उद्यन्तीत्यर्थः Sy.
८. निर्वहन्तीत्यर्थः Sy.
९. ० कैवे P.D. किञ्चासां मध्य एकैकोषा लङ्कायामेकैकभूभागवर्तिनां क्रतुं गमनागमनादिरूपं कर्म तद्विषयां प्रज्ञां वा... सद्यस्तदानीमेव स्वोदयकाल एव...। तत्तद्भूभागविशेषेण सूर्यस्योदयो ज्योतिःशास्त्रे प्रदर्शित :—
उदयो यो लङ्कायां
सोऽस्तमयः सवितुरेव सिद्धपुरे।
मध्याह्नो यवकोट्यां
रोमकविषयेऽर्धरात्रः स्यात् ॥ इति।
(आर्य.४.१३) Sy.
१०. ० मेका M. ११. ति of इति is missing in P. १२. ० ग्य० D. १३. मुख्यस्य प्रथमानस्य वा Sy.
१४. गम० M. आगमनम् Sy.
१५. प्राणिनां प्रज्ञापयन्तीत्यर्थः Sy.
१६. स्वतो दीप्ता Sy.
१७. श्वेति० M. श्वेत्यं गच्छन्ती, प्रकाशं प्राप्नुवती Sy.
१८. निकृष्टात्तमसः सकाशात् Sy.
१९. प्रादुर्भवति। यद्यपि तमसः सकाशाज्ज्योत्पद्यते तथापि तदनन्तरभावित्वात्तत उत्पद्यत इत्युपचर्यते Sy.
२०. सत्यभूतस्यादित्यस्य Sy.
२१. मिश्रयन्ती Sy.
२२. हिरन० D. तदीयं तेजो न पराभवति Sy.
२३. तेजोयुक्तं स्थानम् Sy.
२४. सर्वेष्वहःसु Sy.
२५. अलङ्कारशोभां कुर्वती Sy.
२६. यद्वा, ऋतस्य सत्यभूतस्य यज्ञस्य धाम देवयजनाख्यं स्थानं योषा मिश्रणशीला सती न मिनाति न हिनस्ति। किन्त्वहरहः सर्वेषु यागदिवसेषु निष्कृतं हविरादीनां प्रकाशनरूपमलङ्कारमाचरन्ती कुर्वती तादृश्युषा अजनिष्टेति पूर्वान्वयः Sy.
This stanza is omitted by P.

कन्येव तन्वा शाशदानाँ एषि देवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥१०॥

कन्येव[1] तन्वा[2]। कन्येव[3]। आत्मशरीरेण। जगदाच्छादयन्ती। गच्छसि[4]। देवि[5]! देवान्[6]। यष्टुमिच्छन्तम्[7]। हसन्ती[8]। युवतिर्यथा। पुरस्तादात्मीय[9] वक्ष[10] प्रकाशयत्येवं त्वमात्मीयानि। वक्षांसि[11]। आविष्करोषि[12]। व्युच्छन्ती[13] देशेष्वनेकेषु प्रादुर्भावाद् बहुवचनं वक्षांसीति[14]।

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त ॥११॥

सुसंकाशा[15]। शोभनसदर्शना। मात्रोद्वर्तितशरीरा[16]। कन्येव[17] त्वम्। तन्वम्[18]। आविष्कृणुषे[19]।

---

१. कन्येव तन्वा omitted by P.
२. सा यथा जनान्तिके विवसना सञ्चरति तथा हे उषस्त्वं कन्या कमनीया अप्रगल्भा सती Sy. कन्या कमनीया भवति। क्वेयं नेतव्येति वा [कमनेनानीयत इति वा] कनतेर्वा स्यात्कान्तिकर्मणः N.4.15.
३. शाशाद्यमाना स्पष्टतां प्राप्नुवती Sy. शाशदानः शाशाद्यमानः N.6.16.
४. पश्चात्प्रगल्भा सती ... देवनशीले ! Sy.
५. द्योतनस्वभावं सूर्यरूपं प्रियम् Sy.
६. यष्टु० D.M. अभिमतं दातुमिच्छन्तम् Sy.
७. हवन्ती P. सम् ईषद्धसन्ती। हास्यं कुर्वती Sy.
८. यौवनोपेता सती Sy.
९. ० स्तात् अत्मी० D. पत्युः सूर्यस्य पुरतः Sy.
१०. पक्षं M.
११. वक्षसोपलक्षितानवयवान् Sy.
१२. प्रकटीकरोषि Sy.
१३. अत्यर्थं भासमाना Sy.
१४. यद्वा युवतिरिति लुप्तोपमा। यथा लोके प्रगल्भा योषित्पुरस्तात्प्रियतमस्य पुरतः संस्मयमाना दन्तप्रदर्शनायेषद्धसनं कुर्वती वक्षांसि वक्षसोपलक्षितानि गोप्यानि बाहुमूलस्तनादीन्याविष्करोति तथा त्वमपीत्यर्थः। यद्वा पुरस्तात् पूर्वस्यां दिशि संस्मयमाना स्मितोपमप्रकाशं कुर्वती युवतिः सर्वेषु भावेषु मिश्रणशीला वक्षांसि। वक्ष इति रूपनाम। दन्तस्थानीयानि नीलपीतादीनि रूपाण्याविष्करोषि Sy.
१५. अत्यर्थं प्रकाशमाना Sy.
१६. मातृभिर्जननीभिः शुद्धीकृता...मात्राविना स्वलङ्कृताऽत्यन्तं शोभना सती Sy.
१७. योषेव। ....यथा लोके...स्वकीयं लावण्योपेतं सर्वशरीरं दर्शनायाविष्करोति, तद्वत्त्वमपीत्यर्थः Sy.
१८. स्वकीयां तनुम् Sy.
१९. प्रकटयसि। ...अत्र कमिति पादपूरणः। अत्र विशेषस्याभावात्। ... यद्वा कमिति सुखवचनः। सुखं यथा भवति तथाऽऽविष्कृणुष इत्यर्थः Sy. मिताक्षरेष्वनर्थकाः। कमीमिद्धिति N.1.9.

दर्शनाय यथा त्वां सर्वे पश्येरन्[१]। कल्याणी[२]। त्वम्। प्रकर्षेण। व्युच्छ[३]। तदिदम्। तव रूपम्[४]। अन्या[५] गताः। उषसः। न[६]। व्याप्नुवन्[७] न त्वत्सदृशरूपा गता इति[८]।

अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य ।
परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः ॥१२॥

अश्वावतीः[९]। अश्ववत्य.[१०]। गोमत्य[११]। सर्ववरणीया[१२]। सूर्यस्य। रश्मिभि। संयतमानाः[१३] उषस काश्चन[१४]। परायन्ति[१५]। अपरा आयन्ति। भद्राणि बहूनि[१६]। नामानि निगमपठितानि। दधाना.[१७]। उषसः[१८]।

ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि ।
उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः ॥१३॥

ऋतस्य रश्मिम्[१९]। आदित्यस्य। रश्मिम्। अनुबध्नन्ती[२०]। कल्याणं कल्याणम्। प्रज्ञानम्[२१]।

---

१. पश्येयुः is suggested for पश्येरन्।
२. भद्रा कल्याणशीला Sy.
३. आवरकमन्धकारं विप्रकृष्टं यथा भवति तथा विवासय। अत्र यद्यपि विशेषो न श्रुतस्तथापि प्रकाशनिवर्त्यत्वात्परिहरणीयत्वाच्च व्युदसनीयं तम एवेति गम्यते Sy. ४. तद् व्युदसनम् Sy.
५. ० न्यग० P.D. अतीता आगामिन्यश्च Sy. ६. नव M. न व्याप्नुवन्ति तथा व्युच्छेति भावः। नशिर्व्याप्तिकर्मा। 'इन्वति नक्षति' (Ngh. 2. 18.) इति व्याप्तिकर्मसु पाठात् Sy.
७. VM. ignores कम् and उषः।
८. Omitted by P.
९. बहुभिरश्वैस्तद्वत्यः Sy.
१०. बहुभिर्गोभिस्तद्वत्यः Sy. ११. विश्वे वारा वरणीयाः कालो यासां तास्तथोक्ताः। सार्वकालीना इत्यर्थः। यद्वा विश्वे वरितारो यासु ता विश्ववाराः। विश्वैर्वरणीया इत्यर्थः Sy. १२. सूर्यरश्मिभिः सार्कं तमोनिवारणाय प्रयत्नं कुर्वाणाः। यद्यपि सूर्यरश्मय एव जगत्प्रकाशनाय प्रभवन्ति तथापि सूर्योदयात्पूर्वं तमोनिवारणस्यापेक्षितत्वात्तासामपि प्रयत्नमविरुद्धम्। रश्मिदेवता अपि प्रकाशिका इत्यर्थः Sy. १३. कानश्च P.
१४. पुनरायन्ति च। परस्परापेक्षयोभयत्र चशब्दः। या एवातीतेषु दिनेषु गतास्ता एव पुनः पुनर्विनान्तरेष्वप्यायन्ति। जगच्चिर्वाहाय प्रतिदिनं गतागतं कुर्वन्तीत्यर्थः Sy.
१५. भद्रं कल्याणं स्तुत्यं वा Sy.
१६. पठितानीमानि P. D. इमानि M. नमनं सर्वजनानुकूल्यम् Sy.
१७. धारयमाणाः Sy.
१८. VM. ignores च। पुनः। च।
१९. सत्यभूतस्यादित्यस्य Sy.
२०. ० बुध्यन्ती P. आनुकूल्येन प्रवर्तमाना Sy. अनुबध्नती is suggested for अनुबध्नन्ती २१. Omitted by P.D. तत्तत्कल्याणं स्तुत्यं वा लौकिकं वैदिकं कर्म, तद्विषयां प्रज्ञां वा Sy. क्रतुं दक्षिकाः कर्म वा प्रज्ञां वा N.2.28.

अस्मासु। धेहि। उष.! अद्य। अस्माकम्। स्वाह्वाना सती। व्युच्छ। हविष्मत्सु। अस्मासु। धनानि। च। सन्तु।

I.124.

उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत्।
देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प चतुष्पदित्यै ॥१॥

उषा उच्छन्ती। उषा.। व्युच्छन्ती। होमार्थं दीप्यमाने। अग्नौ भवति। उद्यंश्च। सूर्यः। विस्तीर्णम्। ज्योति.। श्रयति। देवश्च। सविता। अत्र। क्षिप्रम्। अस्मान्। कार्यं प्रति। प्रसौति। द्विपत्। चतुष्पच्च। गमनाय। प्रसौति।

---

१. देहि P. स्थापय Sy.
२. अस्मदर्थम् Sy.
३. सुष्ठु, आहूता सती Sy.
४. तमो विवासय। प्रकाशं कुर्वित्यर्थः Sy.
५. हविर्लक्षणधनयुक्तेषु Sy. मघमिति धननामधेयम्। मंहतेर्दानकर्मणः N.1.7.
६. यजमानेषु Sy.
७. बहुविधानि धनानि सम्भवन्त्विति पूर्वोक्तेन क्रतुना सह Sy.
८. समुच्चयार्थश्चशब्दः Sy.
९. Ms. D. puts the figure ॥१२३॥ here to indicate the end of one hundred and twentythird hymn. No such number is given by P. and M.
१०. उषो D.
११. तमो विवासयन्ती Sy.
१२. ० र्थं मर्त्यं P.
१३. समिध्यमानेषु सत्सु Sy.
१४. अग्नित्वसामान्येनैकवचनम्। अग्निषु ...कर्मार्थे कर्तृप्रयोगः। उषःकाले ह्याहवनीयादयः प्रज्वाल्यन्ते Sy.
१५. ० श्चा P. उपमाप्रधाननिर्देशः। उदितः सूर्य इव Sy.
१६. सूर्यो यथा प्रकाशयति तथेत्यर्थः Sy.
१७. उरु बहुलम् Sy.
१८. प्रकाशम् Sy.
१९. सेवते, प्रकाशते, प्रकाशयति वा सर्वम् Sy.
२०. सर्वस्य प्रेरकः सूर्यः Sy.
२१. तत्र D. त्वदुदयानन्तरमस्मिन्कर्मणि वा Sy.
२२. अस्मदर्थम् Sy.
२३. अर्थशब्दोऽत्र विशेषणवाची नपुंसकलिङ्गः। ... अरणीयम् Sy.
२४. प्रसूति P. अनुजानातु। ददात्वित्यर्थः Sy.
२५. पादद्वयोपेतं मनुष्यादिकम् धनम् Sy.
२६. पादचतुष्टयोपेतं गवादिकम् धनम् Sy.
२७. द्विपदां चतुष्पदां च गमनाय। यद्वा नः इत्यै इति सम्बन्धः। अस्मद्गमनागमनादिव्यापारायेत्यर्थः Sy.
२८. प्रसूति P.

अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥२॥

अमिनती। अहिंसन्ती। यज्ञान्। प्रहिंसन्ती। मनुष्याणाम्। आयुषो व्यवच्छेदकानि, अहोरात्राणि। गतानामुषसाम्। अन्तिमा। आयतीनाम्। मुख्या। प्रादुरभवत्।

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥३॥

एषा दिवः। एषा। दिव.। दुहिता। प्रतिदृश्यते। पूर्वस्या दिशि। ज्योतिः। आच्छादयन्ती। समनस्का। आदित्यस्य। पन्थानम्। साधु। अनुगच्छति। प्रागेव।

---

१. भानुप्रदानेनानुकूलं कुर्वती Sy.
२. देवसम्बन्धीन्यग्निहोत्रादीनि कर्माणि। व्रतमिति कर्मनाम, 'व्रत कर्बरम्' (Ngh. 2. 1.) इति तन्नामसु पाठात् Sy. ३. प्रकर्षेण हिंसन्ती, आयुः क्षपयन्तीत्यर्थः Sy.
४. ०षो पि व्य० P.D. परस्परसंयोगं ... हिंसन्ती, वियोगं कुर्वतीत्यर्थः। उषःकाले सर्वं यथायथं स्वस्वव्यापाराय गच्छन्तीति प्रसिद्धम् Sy.
५. युगोपलक्षितान्निमेषादिकालावयवान् ... यद्वा युगानि युग्मानि Sy.
६. ०त्रणि ... साम् M. गच्छन्तीनामतीतानां, शश्वतीनां नित्यानाम् Sy.
७. उपमा, ताभिः सदृशीत्यर्थः Sy.
८. आयतिना M. आगामिनीनामुषसाम् Sy.
९. प्रथमभाविनी सती Sy.
१०. ० दुर्भवत् P.D. विशेषेण प्रकाशते Sy.
११. यद्वा। ईयुषीणां गमनशीलानां पश्वादीनां शश्वतीनां सन्ततिप्रवाहरूपेण नित्यानामुपमा। तद्वन्नित्येत्यर्थः। तथाऽऽयतीनां राज्यवसानसमय उत्पद्यमानानां प्रजावागादीनां प्रथमा प्रथमभाविनी। उषस्यागतायां वाचो बुद्धयश्च स्फुरन्तीति प्रसिद्धम्। तादृशी देवी व्यद्यौत् प्राणिनामनुग्रहाय द्योतते Sy. VM. ignores दैव्यानि। शश्वतीनाम्। उषाः
१२. द्योतमानात्मकस्य द्युलोकस्य Sy.
१३. दुहितृस्थानीया। तत उत्पद्यमानत्वाद् दुहितेत्युपचर्यते Sy.
१४. प्रत्येकं ... दृश्यते। सर्वेषामपि प्राणिनामाभिमुख्येन प्रकाशत इत्यर्थः Sy.
१५. तेजोरूपं वस्त्रम् Sy.
१६. आगच्छा० P. आच्छादयन्ती तेजसा प्रकाशयन्ती Sy.
१७. सम्यगानयित्री, वेष्टयित्री। अन्तर्भावितण्यर्थोऽयम्। यद्वा सह युगपदेव मन्यतेऽवबुध्यते प्राणिभिरिति समना। व्युत्पत्त्यनवधारणादनवग्रहः। सा तादृशी Sy. १८. मेरोः प्रान्तप्रदेशम् Sy.
१९. सम्यक् Sy.
२०. ० ती P. अनुक्रमेण ... गच्छति। सूर्यो यत्र यत्र गच्छति तत्र तत्र पुरस्तादुषा अपि गच्छतीत्यर्थः। ... यथा लोके प्रियतमेऽनुरागयुक्ता काचिद् भर्तारं सर्वास्ववस्थासु न विमुञ्चति तथेयमपीत्यर्थः Sy.

अवगच्छन्तीव[1]। दिशश्च[2]। न। हिनस्ति रात्रिरिवेति[3]।

उषो अदर्शि शुन्ध्युवो न वक्षो नोधाइवाविरकृत प्रियाणि।
अश्वसञ्च संसतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥४॥

उषो अदर्शि[4]। उषा उपदृश्यते[5]। शोधयितुरादित्यस्य[6]। वक्षः[7]। इव[8]। सेयमृषि[9]-

---

१. प्रगेवापगच्छन्ती च P.
० न्ती च D.M.
प्रियभूतस्य सूर्यस्य मार्गो मयापि गन्तव्य इति चेतयन्तीव Sy.

२. ०शश्च P. प्रागादिकाः ... । किन्तूषा यत्र गच्छति सा प्राचीत्येवं प्रागादिव्यवहारं करोतीत्यर्थः Sy.

३. ० रेवेति M.

४. उषो, इति निपातद्वयसमुदायात्मक एको निपातः Sy.
उकारः पदपूरणः। उपोपसर्गश्रुतेश्च योग्यक्रियापदाध्याहारः। उपगता, उषिता सतीत्यर्थः SKN.

५. सर्वैः समीप एव ... दृश्यते Sy.
अदर्शि, वर्तमाने कर्मणि लुङ् दृश्यत उषाः SKN.
उपश्लिष्टा दृश्यत इयमुषाः Dur.

६. शुन्ध्युरादित्यः। सर्वेषां शोधकत्वात् ... यद्वा शुन्ध्युरिति जलचरः श्वेतवर्णः पक्षिविशेषः Sy.
उदकेचरो वा पक्षी हंसादिः शुक्लवर्णस्तस्य। ... शुन्ध्युरादित्यो भवति। शोधनात्। स हि तमसा व्याप्तं कृत्स्नं रश्मिभिः शोधयति। तमोऽस्मादपनयतीत्यर्थः। अथवाऽशुद्धमनुचितः शुचीकरोति SKN.
आदित्यो हि यद्यप्यशुचिर्भवति तदपि रश्मिभिः स्पृष्ट्वा शुचीकरोति।... तमांसि वा शोधयतीति शुन्ध्युस्तस्य। शकुनिरपि य एव सदृगुन्नमाऽध्वमपि शुन्ध्युरुच्यते, शोधनादेव। यो हि उदकचरो भवति नित्यशुद्ध एवेति शुन्ध्युः। आपोऽपि शुन्ध्यव उच्यन्ते, ता अपि हि शोधयन्ति Dur.

७. पक्षः D.M. वक्षःस्थानीयो रश्मिसमूहः। स यथा प्रकाशमानो दृश्यते तथेत्यर्थः। यद्वा शुन्ध्युः ... पक्षिविशेषः। स यथा स्वकीयं वक्षः प्रकाशयन् दृश्यते तद्वदित्यर्थः Sy. वक्ष उरः, भास्वरा शुक्लवर्णा वेत्यर्थः SKN.
यथा, तस्य स्वभासः स्वं प्रकाशजालं वक्षोभूतमेतस्मिन्मण्डलेऽभ्यूढम्। एवमियमुषा एतस्मिन्मण्डल उपश्लिष्टा दृश्यते सन्निकर्षात्। प्रासङ्गिकमुच्यते, शब्दसामान्यात्। इदमपीतरत्।... पुरुषवक्षः पशुवक्षो वाङ्नाम्। एतस्मादेव बृहतेर्धातोरिदम्। अभ्यूढमधिप्रवेशितमेव काये शरीरे भवति Dur.

८. अत्र नकार उपमार्थीय उपरिष्टात्प्रयुज्यमानत्वात्। यत्र तु प्रतिषेधो विवक्षितस्तत्र पुरस्तान्नकारः प्रयुज्यते Sy.
पुरस्तादुपचारस्तस्य यत्प्रतिषेधति ... उपरिष्टादुपचारस्तस्य येनोपमिमीते N.1.4.

९. नवनं स्तोत्रं धारयतीति नोधाः। ऋतनामा महर्षिः Sy.
ऋषिः सः SKN.
इयमेवोधा नोधा... ऋषिर्भवति। स हि नवनं स्तोत्रं देवताः प्रति दधाति Dur.

नोधा[1] इव[2] स्तुत्या[3] कामान्[4]। आविष्कृते[5]। रूपाणि[6]। सूदस्त्री[7]। इवान्ने सीदन्ती सिद्धेऽन्ने। स्वामिनः[8] स्वपतः[9]। बोधयन्ती[10]। नित्या[11]। आगता[12]। पुनः पुनः[13]। आगच्छन्तीनामुषसां

---

१. यिव P.

२. देवतास्तुतिव्याजेन नानाविधैर्मन्त्रैः Sy. 'सपर्यामि प्रयसा RV.1.58.7. RV. 3.54.3 नृष्ठितं (नू ष्ठितं) मरुतो वि रुतो (?) वीरवन्तम्' RV.1.64.15. इत्यादिना स्वेनार्चेण SKN.
स्वमुखोद्गीर्णया स्तुत्या Dur.

३. आविष्कृतवान्। तथापि ... आविरकरोत् Sy. आविष्कृतवांस्तद्वत् SKN.
एवमियमुषाः स्वात्मन एवोद्गीर्णेन प्रकाशेन... आविष्कुरुते प्रकाशीकुरुते Dur.

४. प्रियाणि स्वमनीषितानि ... स्वकीयानि सर्वलोकप्रियाणि तेजांसि Sy.
आत्मनः प्रियाणि धनादीनि SKN.
प्रियाण्यात्मनः ... स्वानि कामाख्यानि ... स्वात्मन एवोद्गीर्णेन प्रकाशेन रूपाणि जनानाम् Dur.

५. तवस्त्री M. अद्यत इत्यध्र, अन्नं तस्य पाकाय गृहे सीदतीत्यध्रसत्याधिका योषित्...यद्वाऽध्रेति गृहनाम 'वरूथमध्र' (Ngh. 3.4) इति तन्नामसु पाठात्, तत्र सीदतीत्यध्रसज्जननी Sy. अवनावन्नं तस्मिन्यक्षितृत्वेन सीदति सनोति वा तत्सा, अध्रसत्। सा च सामर्थ्यात्सूचकारी मक्षिका वात्राभिप्रेता SKN. इयमेवोषाः . गृहाधिकारे नियुक्ताऽध्रसाधिका स्त्री। . . अध्र अन्नं तत्प्रतिकर्तव्यतया आवति, तद्वा सनोति सम्भजत इत्यध्रसत् Dur.

६. ० स्त्रीवासे P.D. ७. ० न D.

८. ० नस्यपतः M. सा यथा स्वपतः पुत्रादीन् Sy. जनान् SKN.
स्वपतो जनान्बोधकादीन् Dur.

९. भोजनाय बोधयति तद्वत्...सा यथा ... उषःकाले प्रबोधयति तथा भुवनाख्ये गृहे सीदन्ती तत्रत्यान्प्राणिनः प्रबोधयन्तीयमुषाः Sy. सा यथा प्रातरुत्थाय क्षीरादिसंग्रहार्थं ... प्रबोधयति SKN. सा यथा प्रातरेव क्षीराद्युपादानार्थं ... बोधयत्यन्नं साधयिष्यन्ती, एवमुषा अपि जनान्बोधयन्ती। तत्काले हि त इतिकर्तव्यतार्थे जनाः प्रतिबुध्यन्ते, तेनैतयैव बोधिता भवन्ति Dur.

१०. पुनः पुनः Sy.
शश्वच्छब्दो नित्यवचनः SKN.
शाश्वतिकतमा नित्यतमा Dur.

११. आगच्छति Sy.
आयान्ति ताः SKN.
यदा ... आगच्छति तदैव जनान् बोधयति Dur.

१२. पुनः (पूत पूर्वस्यां दिशि ज्योतिराच्छादयन्ती) पुनः P. पुनरायान्ति ताः पुनरेयुष्यो यथोषसः। उषसो हि गत्वा प्रत्यहमुदेष्यत आदित्यात्पुनरायान्ति। गवादयो हि गव्यूतिप्रभृति गत्वा गत्वा पुनरायान्ति SKN. या एताः काश्चिद् गत्वा पुनरागच्छन्ति ताः पुनरेयुष्यो गावोऽन्या वा Dur.

१३. आगमनशीलानां स्त्रीणां मध्ये। ... प्रातर्नियतमागच्छन्तीनां वारयोषितां मध्ये स्वयमेका सती नियतमागच्छतीत्यभिप्रायः Sy.
निर्धारणे चेयं षष्ठी। अतिशयेन नित्या पुनरेयुषीणां मध्ये आगत्योत्तमं जगद्भ्येति व्याप्नोतीत्यर्थः SKN.
पुनरागामिनीनामित्यर्थः। . . . तासां पुनरेयुषीणामिति निर्धारयति। एवैव ...शाश्वतिकतमा Dur.

मध्ये[1]।

पूर्वे[2] अर्धे[3] रजसो[4] अप्त्यस्य[5] गवां[6] जनित्र्यकृत[7] प्र केतुम्[8]।
व्यु[9] प्रथते वितरं[10] वरीय[11] ओभा[12] पृणन्ती[13] पित्रोरुपस्था[14] ॥५॥

पूर्वे अर्धे। अद्भ्यो[1] जातस्य। पूर्वस्मिन्[2]। भागे। अन्तरिक्षस्योषाः[3]। तेजसाम्[4]। जनयित्री[5]। आदित्यस्य[6] तेजः[7]। प्रकृणोति[8]। उरुत्व[9] च। अतिशयेन[10] तत्र। विप्रथयति[11]। द्यावापृथिव्योः[12]। उभौ[13]। उपस्थौ[14]। आपूरयन्ती[15] तेजसा[16]।

---

१. एतस्मिन्मन्त्रे सामर्थ्यादघसदित्यन्नसाधिका स्त्री उच्यते। सा हि तत्काले जनान्दोहकादीन्बोधयति। उषा अपि च तत्काल एवागच्छतीत्येवमुपमानमुपपद्यत इत्युपपत्तिः। अन्ये तु मक्षिकामघसवं मन्यन्ते। सापि ह्यन्ने सीदति सनोति वाऽन्नं, तत्काले च प्रतिबुध्यमानाऽन्यान्बोधयतीति Dur. उपादृशिं शुन्ध्युवः। शुन्ध्युरादित्योभवति। शोधनात्। तस्यैव वक्षो भासाघ्यूळ्हम्। इदमपीतरद्वक्ष एतस्मादेव। अध्यूळ्ह काये। शकुनिरपि शुन्ध्युरुच्यते। शोधनादेव। उदकचरो भवति। आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव। नोधा ऋषिर्भवति। नवनं दधाति। स यथा स्तुत्या कामानाविष्कुरुत एवमुषा रूपाण्याविष्कुरुते। अघ्नत्। अघ्न्यं भवति। अघ्नसादिनीति वा। अघ्नसानिनीति वा। ससतो बोधयन्ती। शश्वत्समागात्पुनरेयुषीणाम्। [स्वपतो बोधयन्ती] शाश्वतिकतमागात्पुनरेयुषीणाम् N.4.16; SKN. II. 236. VM. ignores उ।

२. व्यापनशीलस्य विस्तृतस्य ... यद्वा, अप्त्यस्य कर्मसु स्थितस्य जन्तोः Sy.

३. उषःकाले Sy.

४. रञ्जकस्यान्तरिक्षलोकस्य। रजःशब्दोऽन्तरिक्षलोकवाची, 'लोका रजांस्युच्यन्ते' (N.4.19.) इति यास्केनोक्तत्वात्।... यद्वा रजसो रञ्जकस्याह्नः। रजःशब्दोऽहर्वाची 'असृगहनी रजसी उच्येते' (N.4.19.) Sy. ५. ० सा सं D. दिशा रश्मीनां वा...गवां वाचाम् Sy.

६. उत्पन्ना सती ... । उत्पादयित्री। उषःकाले सर्वेषा प्राणिनां वाचः स्फुरन्तीति प्रसिद्धम् Sy. ७. प्रज्ञानम्... केतुं गमनागमनादिरूपं कर्म। केतुरिति कर्मनाम। 'केतः केतुः' इति तन्नामसु पाठात् Sy.

८. ०णेति D.M. प्रकरोति is suggested for प्रकृणोति।
प्रकर्षेण करोति Sy.

९. उरुत्व is doubtful. It should be उरुतरं as read by Sy.
उरुतरम्। अतिविस्तीर्णं यथा भवति तथा ... । उशब्दोऽवधारणार्थः पावपूरणो वा। 'मिनाक्षरेष्वनर्थकाः कमीभिद्वितिं'(N.I.9.)इति यास्केनोक्तत्वात् Sy.

१०. ०शयौ M. विशिष्टतरम् Sy.

११. ०ती P. विशेषेणैव प्रख्याता भवति प्रकाशत इत्यर्थः Sy.

१२. पालयित्र्योर्द्यावापृथिव्योः Sy.

१३. उभे द्यावापृथिव्यौ...। यद्वा, उभा उभयोः पित्रोरिति सम्बन्धः Sy.

१४. उपस्थे उत्सङ्गेऽन्तराले प्रदेशे स्थित्वा Sy.

१५. स्वतेजसा पूरयन्ती Sy.

१६. VM. ignores उ

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा३ शाशदाना नाभादीषते न महो विभाती ॥६॥

एवेदेषा । एवम्[1] । एव[2] । एषा[3] । पुरुतमा[4] । दर्शनाय[5] भवति । नच[6] । वर्जयति[7] । बन्धुम्[8] । अबन्धु वा । उज्ज्वलया[9] । तन्वा[10] सर्वम् । अपबाधमाना[11] सेयम् । कुमारात्[12] । न[13] । पलायते[14] । नच । वृद्धात्[15] । व्युच्छन्ती[16] सर्वं जरयतीति[17] ।

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥७॥

अभ्रातेव । यथा । अभ्रातृका कन्यका[18] । पुम पितॄन् । एति[19] । अभिमुखी सन्तानकर्मणे पिण्ड-[20] [21] [22]

---

१. इदानीं भासमानप्रकारेणैव Sy.
२. इच्छब्द एवकारार्थः Sy.
३. उषाः Sy.
४. विपुलतमा, अत्यन्तविस्तृता सती Sy.
५. दृशे कं सुखेन सर्वेषां दर्शनाय । सुखं यथा भवति तथा सर्वान्दर्शयितुं वा Sy.
६. परितः सर्वतो न वर्जयति ... न परिवर्जयति । मनुष्यादिकं देवादिकञ्च तदुपलक्षितं लोकद्वयं वा कात्स्न्येन प्रकाशयतीत्यर्थः Sy.
७. जामिं सजातीयं देवजातिम् Sy.
८. बन्धुं P.D. अजामिं विजातीय मनुष्यादिजातिम् Sy.
९. अपापया निर्मलया Sy.
१०. शरीरेण Sy.
११. शाशाद्यमाना । ... स्पष्टतां गच्छन्तीत्यर्थः Sy. शाशदानः शाशाद्यमानः N.6.16.
१२. अल्पात्पुत्तिकादेः सकाशात् Sy.
१३. M. adds च after न
१४. न गच्छति । तमपि प्रकाशयति Sy.
१५. वृद्धा M. महतो मेवादेः सकाशात् Sy.
१६. व्य० P.D. विभाती विशेषेण प्रकाशयन्ती सा Sy.
१७. पूर्वं लोकद्वयं प्रकाशत इत्युक्तम् । इदानीमस्मिँल्लोके परमाण्वादिपर्वतपर्यन्तं कृत्स्नं प्रकाशयतीत्यर्थः Sy. VM. ignores कम् । न । परि
१८. कन्याका D. भ्रातृरहितेव ... । यथा लोके भ्रातृरहिता योषित् Sy. यथा, अभ्रातृका स्त्री SKN. यथा, अभ्रातृका कन्या Dur.
१९. पुंसः पित्रादीन् प्रति ... स्वोचितवासोऽलङ्कारादिलाभाय पितॄनेति । सति भ्रातरि स एवोचितप्रदानादिना सम्यक् तोषयति । तदभावात्पितरमेव प्राप्नोति Sy. येभ्य उत्पन्ना तानेव पुंसः पितॄन् SKN. दत्तापि सती पित्रा, ऊढा भर्त्रा पुनः ... पुंसः पितॄनेव पितृवंशमेव Dur.
२०. गच्छति Sy., SKN.
२१. आभि० D.M. स्वकीयस्थानात्प्रतिनिवृत्तमुखी सती Sy. प्रत्यग्गामिनी SKN. अभिमुखी Dur.
२२. यद्वा सति स्वभ्रातरि स एव पितुः पिण्डदानादिकं सन्तानकृत्यं करोति । तस्याभावात्स्वयमेव तत्कर्तुं पित्रादीन्नाच्छति Sy. सन्तानकर्मणे पिण्डदानाय च SKN.

दानाय न पतीनेवमुषा अभिमुख्यागच्छति। गर्तारोहिणीव। धनलाभायाक्षिकान्। गर्तो द्यूतास्तारस्तमपतिकपुत्रा च स्त्री भर्तुर्धनहरणायारोहति ता तत्राक्षेण कितवा घ्नन्ति न सा ततोऽन्य-

---

१. वती० M. न पतिवंशमित्यर्थः। सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्धयति न भर्तृवंशमिति।... अभ्रातृका कन्या यस्मिन्नेव वंशे उत्पन्ना भवति तमेव प्रकाशयति वर्धयति, न भर्तृवंशमित्येवमुपमया नासावुद्वोढव्येत्येतदुपदर्शितं भवति। पुत्रार्थत्वाद्विवाहस्य। तस्मादवर्धयितृत्वाद्भर्तृवंशस्य वर्धयितृत्वाच्च पितृवंशस्याभ्रातृका पितृदायाद्यमर्हतीत्युपपद्यते। ... अत्र प्रथमयोपमया अभ्रातेव पुंस इत्यनया अभ्रातृकाया अनिर्वाहो लिङ्ग्यते Dur.

२. ०षो P. आभि० P.D. तद्वदियमुषा अपि स्वोचितप्रकाशादिलाभाय स्वप्रकाशदानाय वा पितृभूतं सूर्यमाभिमुख्येन गच्छति Sy. एवमुषा यत उत्पन्ना तमेवादित्यं गच्छति। तत्रैव प्रलीयत इत्यर्थः SKN. एवमुषा अपरकाले राज्यां नभ आरोहति। यथाऽभ्रातृका पितृनेव प्रत्येति न पतिमेवमुषा आदित्यमेव प्रत्येति Dur.

३. ०ती P.

४. गर्त इति गृहनाम। 'कृदरो गर्तः' (Ngh. 3.4) इति तन्नामसु पाठात्। अत्रौचित्येन राजपुरुषैर्न्यायनिर्णेतृभिश्चाधिष्ठितं स्थानमुच्यते Sy.
सर्वलोकप्रकाशमास्कारम् SKN.
'गर्तः सभास्थाणुः' इति, अक्षनिर्वपणपीठम्।...गृणातेः,... श्मशानसञ्चयोऽपि गर्त उच्यते, गुरतेरुद्यमनार्थस्य। (धा० ६।११६) स हि लोकविनाशायाभ्युद्यत इव भवति। यानि हि तत्र पिशाचादीनि सत्त्वान्याश्रितानि भवन्ति तानि जनमरणमाशासते। म्रियमाणेषु जनेषु तानि प्रमुदितानि भवन्ति।... रथोऽपि गर्त उच्यते, 'गृणातेः' स्तुत्यर्थस्य। तद्धि 'स्तुततमं यानम्' अश्वादिभ्यो यानेभ्यः सुखतरं हि तेन गम्यते Dur.

५. तवारोहतीति गर्तारुक् Sy.
यथा दक्षिणापथे क्वापि प्रदेशे... अपस्मारा रोहिणी स्त्री SKN.
काचित्.. दाक्षिणात्या स्त्री Dur.

६. धनाना स्वकीयरिक्थानां, सनये लाभाय Sy. सनये लाभाय, धनानां भर्तुः स्वभूतानाम् SKN.
लब्धये धनानाम् Dur.

७. ०क्षितान् M.

८. ०मपतीक० P. ०मतिक० M.
०काऽपु० is suggested for ०कपु०
यथा लोके काचिद् गतभर्तृका योषित् Sy.
अपुत्रा, अपतिका वा SKN.
अपुत्रा Dur. ९. चा० P.

१०. ०नंह० D.

११. ०यरो० P. गर्तमागच्छति Sy.
गच्छति तद्वत् SKN.
सा यथा.. तमारोहति। ... उपविशतीत्यर्थः Dur.

१२. तान् P.

१३. तक्षेण M. तां तु सभ्या विचार्य यदीयं रिक्थं लभते चेदक्षैः सन्ताड्य तदीयं धनं वितरन्ति। ... देशविशेषाचारमपेक्ष्यैवं दृष्टान्तितम् Sy.
तत्र गता सती... रिक्थं लभते। कितवा दापयन्ति रिक्थमिति दाक्षिणात्येषु देशरीतिः।... देशसमाचारव्यवस्थयापि क्वचिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति Dur.

१४. M. reads सनातनो for न सा ततो।

माश्रयते नच तामन्यः परिगृह्णाति धनमुपगच्छति दाक्षिणात्येषु[1]। जायेव[2]। पत्ये। कामयमाना। सुवासा[3] ऋतुकालेषु[4]। उषा.। हसनेव स्त्री[5] दन्तान्। आत्मीय रूपम्[6]। विवृणुत इति[7]।

स्वसा[8] स्वस्रे[9] ज्यायस्यै[10] योनिमारै[11]गपैत्यस्याः प्रति[12]चक्ष्येव।
व्युच्छन्ती रश्मिभिः सूर्यस्या[13]ञ्ज्यङ्क्ते समनगाइव व्राः ॥८॥

स्वसा स्वस्रे। रात्रि.। ज्येष्ठायै। स्वस्र उपसे। स्थानम्। अरिचत्। तामुपस

---

१. तथेयमपि धनानां प्रीणनसाधनानां प्रकाशानां सनये लाभाय गर्तमाकाशं सूर्यनिवासस्थानमारोहति Sy.

२. विशेषेण पतिं भोगाय काङ्क्षन्ती तेन सह सङ्क्रीडते Sy. द्वितीयार्थे चतुर्थी। पतिमुशती कामयमाना... निर्विशङ्का परया प्रीत्या युक्ता गच्छति तद्वत् SKN. यथा जाया.. भर्त्रे...आत्मानं दर्शयतिDur.

३. यथा च लोके सुवासा दुकूलादिशोभनवसना स्वलङ्कृता, पूर्वं रजोदर्शनसमये मलिनवस्त्रा सती स्नानानन्तर शोभनवस्त्राभरणादिना शोभमाना Sy. सुवासाः SKN. सुवासा भूत्वा, ऋतुकालेषु Dur.

४. तथेयमुषा अतिनैशेनान्धकारेणावृतत्वान्मलिनवसनापि प्रभाते स्वतेजसावृतत्वात्सुवसना सती पतिस्थानीयेन सूर्येण सार्कं सङ्क्रीडमाना Sy. एवमुषा आत्मानं दर्शयति जनानाम् Dur.

५. हस्रेव हसनेव...दन्तस्थानीयानि Sy. हस्रेव यथा हसनशीला स्वदन्तान् SKN. यथा हसनस्वभावा स्त्री दन्तानात्मनो दर्शयति Dur. ६. रूपाणि नीलपीतादीनि। यद्वा निरूप्यमाणानि पदार्थजातानि Sy. अप्सो रूपं कृत्स्नस्य जगतः SKN. एवमुषा अप्यात्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि Dur.

७. नितरां रिणीते गमयति प्रकाशयतीत्यर्थः। यथा लोके काचिद्रमणीया योषित् स्मितव्याजेन दन्तान्विवृणुते तथेयमपि सर्वाणि रूपाणि प्रकाशयतीत्यर्थः Sy. निरिणीते। रिणातिर्गतिकर्मा। निः प्रकर्षे। अन्तर्णीतण्यर्थश्चायम्। प्रकर्षेण गमयति, प्रकाशयति ज्ञापयतीत्यर्थः। एवमुषा निरिणीते SKN. शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि स्वेन प्रकाशोदकेन धौतानीव करोति Dur.

८. अभ्रातृकेव पुसः पितृनेत्यभिमुखी सन्तानकर्मणे पिण्डदानाय न पतिम्। गर्तारोहिणीव धनलाभाय दाक्षिणाजी। गर्तः सभास्थाणुः। गृणातेः। सत्यसङ्गरो भवति। त तत्र यापुत्रा यापतिका सारोहति। ता तत्राक्षेणाघ्नन्ति। सा रिक्थ लभते। श्मशानसञ्चयोऽपि गर्त उच्यते। गुरतेः। अपगूर्णो भवति। ... रथोऽपि गर्त उच्यते। गृणातेः स्तुतिकर्मणः। स्तुततमं यानम्। ...जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान्विवृणुते रूपाणीति। चतत्र उपमाः। N. 3.5; SKN. II. 130.

९. ०त्रि M. स्वयमेव सरतीति वा स्वसा रात्रिः Sy. १०. ज्यै० D. एकस्मादेवान्तरिक्षाद्युत्पन्नत्वात्परस्परं स्वसृभावः। तथाप्याहुः प्राथम्यात्तेजस्वित्वाच्च ज्यायस्त्वम्...उक्तरीत्या ज्येष्ठायै Sy.

११. Omitted by P. D.

१२. उत्पत्तिस्थानमपरराग्रूपम् Sy.

१३. प्रादात्। प्रश्चयतीत्यर्थः Sy.

दृष्ट्वेव[1] रात्रिः। अपगच्छति[2]। तस्याः सकाशादपि वा[3] यथा श्वसुरं दृष्ट्वा स्नुषापगच्छत्येवमिति सेयम्। सूर्यतेजोभिः[4] सह। प्रादुर्भवन्ती[5]। अञ्जनसाधनं तेज आत्मनि। अङ्क्ते[6]। यथा युद्धे गच्छन्तः[7]। वृता[8] आभरणैः।

आसां पूर्वासामहंसु स्वसॄणामपरा पूर्वामभ्येति पश्चात्।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥९॥

आसां[10] पूर्वासाम्। आसाम्। उषसाम्। पूर्वकालानाम्[11]। उत्तरोषा[12]। पूर्वां गतां[13] गताम्। पश्चात्[14]। अभ्येत्यनुक्रमेण[15] गतेष्वह[16] स्वगमन्[17]। ता[18]। पुराणा[19] इव। इदानी नवतरा[20]। अस्माकम्। धनयुक्तम्[21]। व्युच्छन्तु[22]। शोभनदिवसा[23]। एकस्माज्जननात् सहागमनाद्वा स्वसार उषस इति[24]।

---

१. ज्ञापयित्वेव ... ज्यायस्यामागतायां तस्यै स्वस्थान दत्त्वा स्वयं तत्सन्निधौ स्थातुमनुचितमिति विज्ञायैव Sy.

२. स्वयमपसृत्यैव गच्छति... अपगच्छतीति भावः Sy.

३. वा यथा omitted by P. D.

४. सूर्यस्य रश्मिभिः Sy.

५. तमो विनाशयन्ती Sy.

६. व्यञ्जकं तेजः। यद्वा, अञ्जि व्यक्तं जगत् Sy. ७. अनक्ति प्रकाशयति Sy.

८. P. reads गच्छन्तो युद्धे for युद्धे गच्छन्तः।
सम्यगननहेतव आपः समनाः। ता गच्छन्तीति समनगा विद्युतः... यद्वा सम्यगननाय गच्छन्तीति समनगाः सूर्यरश्मयः Sy.

९. प्रताभ० P. व्रताभ० D.
व्रता आभ० M.
व्रा व्राताः, विद्युत्सङ्घा इव। ...त इव व्रा व्राताः सङ्घीभूताः। ते यथाञ्जते जगत्प्रकाशयन्ति तथेत्यर्थः। व्रात इत्यत्र तकारलोपश्छान्दसः Sy.

१०. स्वसॄणां परस्परं स्वसृभावमापन्नानां स्वयं सरन्तीनां वा... उषसां मध्ये Sy.

११. पुरातनीनाम् Sy.

१२. ०रा उ० P.D.M. अपरा, अन्याऽह्नतन्युषाः Sy.

१३. पूर्वामतीतदिवससम्बन्धिनीमुषसम् Sy.

१४. पश्चाद् अनुसृत्य Sy.

१५. ०त्यानु० P. अभिमुखं गच्छति। अव्यवधानेन गच्छतीत्यर्थः। सर्वेष्वहःस्वेवमेवाभ्येति Sy.

१६. प्रतिदिनम् Sy. १७. गते ... गमः M.

१८. उषसः। ..नूनं निश्चयम् Sy.

१९. पुरातन्य इव Sy.

२०. नवीयस्यो नवतरा आगामिन्यः Sy.

२१. बहुधनविशिष्टं यथा भवति तथा Sy.

२२. प्रकाशयन्तु। पूर्वतन्यो यथौज्ज्वल्यवत्योऽऽगामिन्योऽप्युज्ज्वल्यन्त्वित्यर्थः Sy.

२३. शोभनकर्मानुष्ठानसाधनदिवसाः शोभनदिनयुक्ता वा सत्यः Sy.

२४. VM. ignores नूनम्

प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु ।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयन्ती ॥१०॥

प्र बोधयोषः। प्रयच्छत। उदारान्। धनवति! अबुध्यमानाः। कदर्याः। स्वपन्तु। धनयुक्तम्। व्युच्छ। धनवद्भ्यः। मघोनि! रेवत्। स्तोत्रे मह्यम्। सूनृते! स्तोत्र कारयन्ती जरयति कर्मेति?।

अवेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकम् ।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥११॥

अवेयमश्वैत्। इयम्। अध। द्योतते। युवति। पूर्वस्या दिशि। युङ्क्ते च। अश्वानाम्। अरुणवर्णानाम्। समूह रथे। सैवेय व्युष्टाभवत्। सम्प्रति प्रभवति च।

---

१. प्रयच्छ is suggested for प्रयच्छत प्रज्ञापय । प्रतिबुद्धान्कुरु Sy.
२. ०रां M हविष्प्रदानस्मान्यजमानान् Sy.
३. मघवति! अस्मभ्यं दातव्यैर्बहुभिर्धनैस्तद्वति! Sy. ४. यागादीनकुर्वाणा अदानशीला अस्मच्छत्रवः Sy.
५. पणयो व्यवसहिष्णवो वणिजः 'पणिर्वणिग्भवति' (N.2.17) इति यास्कः। पणय इव लुब्धकाः Sy.
६. ०बुध्य...स्वव (प) न्तु M. स्वपन्तु दीर्घनिद्रा भवन्तु। म्रियन्तामित्यर्थः Sy.
७. धनवत्, समृद्धिमत् Sy.
८. विभाहि Sy.
९. हविर्लक्षणान्नवद्भ्यो यजमानेभ्यः Sy.
१०. धोनि M. अस्मद्दत्तहविर्भिस्तद्वति! Sy.
११. रेवतत् D. धनवत् समृद्धयर्थमुच्छेति शेषः Sy.
१२. स्तुतिकर्त्रे यजमानाय Sy.
१३. स्तनुते M. सुष्ठु मनुष्याणां नेत्रि देवि! Sy.
१४. सर्वप्राणिनः क्षपयन्ती Sy.
१५. VM. ignores उषः।
१६. उषाः Sy.
१७. अत्यर्थमागच्छति वर्धते वा। अत्रावशब्दो विनिग्रहार्थीयः 'न्यवेति विनिग्रहार्थीयो' (N 1.3.) इति यास्केनोक्तत्वात् Sy.
१८. यौवनोपेतयोषित्स्थानीया। यद्वा सर्वेषु भावेषु मिश्रयन्ती Sy.
१९. योजयति Sy.
२०. गवां प्रसिद्धानामेतन्नामकानामश्वानां वा।...यथा लोके वाहनसन्नाहं दृष्ट्वा प्रयाणमनुमीयते तथात्राप्यरुणरश्मीनामश्वानां दर्शनादुषा आगच्छतीत्यध्यवसीयते। यद्वा। अरुणानां रश्मीनां समूहं युङ्क्ते Sy. अरुण्यो गाव उषसाम् Ngh. 1.15.
२१. अरुणरश्मीनाम् Sy.
२२. अरुण...स० M.
२३. सेवयं D.M. सेयम् P. तथा नूनं निश्चयमेषा Sy.
२४. तमो विवर्जयिष्यति। यत इयं गा युनक्ति, अत एव कारणान्नथा लोकेऽश्वसन्नाहं दृष्ट्वोदयोऽनुमीयते तथाऽत्रापीत्यर्थः Sy.
२५. असत्प्राये नीरूपेऽन्तरिक्षे तिरोधायकत्वादशोभने तमसि वा Sy.

प्रज्ञानम्[1]। अथाऽनुगृहम्[2]। अग्निः स्वाहाप्रतिग्रहार्थम्[3]। सङ्गच्छते[4]।

उत्ते[5] वयश्चिद्वसतेरपप्तन्नरश्च[6] ये पितुभाजो[7] व्युष्टौ[8]।
अमा[9] सते[10] वहसि[11] भूरि[12] वामगुषो[13] देवि दाशुषे[14] मर्त्याय[15] ॥१२॥

उत्ते[16] वयश्चित्[17]। तव। व्युष्टौ। पक्षिणः[18]। अपि। वसते[19]। उदपप्तन्[20]। मनुष्याः। च। ये। अन्नस्य[21] भाजकाः[22]। गृहे[23]। वसते[24]। याचितृभ्य[25] प्रयच्छते[26]। मनुष्याय। त्वमुषः[27]? देवि[28]! बहु। धनम्[29]। वहसि[30]।

अस्तोढ्वं[31] स्तोम्या[32] ब्रह्मणा[33] मेऽवीवृधध्वमुशतीरुपासः[34]।
युष्माकं[35] देवीरवसा[36] सनेम[37] सहस्रिणं[38] च शतिनं[39] च वाजम्[40] ॥१३॥

अस्तोढ्वम्[41]। हे स्तोमार्हा उषसः[42]। यूयम्[43]। मम। अनेन स्तोत्रेण[44]। स्तुता भवत[45]। वर्धय-[46]

---

१. केतुस्थानीया ज्ञापयित्री। प्रकर्षेण विविधं भासत इति शेषः। उपसर्गवशाद्योग्यक्रियाध्याहारः। यद्वा, असति तमोरूपेऽन्धकारे प्रकेतुः प्रकर्षेण ज्ञापयित्री सती नूनं व्युच्छादिति पूर्वत्रान्वयः Sy.
२. सर्वयजमानगृहमग्निहोत्राद्यर्थम् Sy.
३. आहवनीयादिरूपः Sy.
४. स्वभागप्र० M.
५. उपतिष्ठते। दीप्यत इत्यर्थः Sy. VM. seems to ignore नूनम्।
६. ०त्त P.
७. गमनवन्तः पक्षिणोऽपि Sy.
८. चिदित्येषोऽपिशब्दार्थः। ... पूर्ववाक्ये 'गृहं गृहमुपतिष्ठातेऽग्निः' इत्युक्तत्वात्तदपेक्षयाऽपिशब्दः Sy.
९. पवतेः P. निवासस्थानान्नीडादेः Sy.
१०. ऊर्ध्वं...पतन्ति Sy.
११. यन्नस्य for ये। अन्नस्य P.
१२. ०कारा P.D. अन्नवन्तोऽर्थिनः कृषिवाणिज्यादिकर्तारः स्वस्वव्यापारार्थमुद्युन्मुखा अपप्तन् गच्छन्ति Sy.
१३. देवयजनाख्ये। ... अनेति गृहनाम। 'अमा वसे' (Ngh. 3.4.) इति तन्नामसु पठितत्वात् Sy.
१४. सते तिष्ठते यजमानाय तदर्थम्। ... यद्वा अमा सह हूयमानेनाग्निना सह निवसते यजमानाय। अमा वसेतामित्यादौ सहार्थे प्रयोगात् Sy.
१५. यापयितृभ्यः P.D.
१६. हविर्दत्तवते यजमानाय Sy.
१७. उषोदेवते! Sy. उषः! is suggested for उष।
१८. देवनशीले! Sy. १९. शोभनं धनम् Sy
२०. प्रापयसि Sy.
२१. ०ढवम् P.D. एवं सूक्तद्वयोक्तरीत्या बहुधा स्तुत्वा तां च स्तुतिमनुमन्य निवेदयित्वा स्वाभीष्टं प्रार्थयते Sy.
२२. स्तोमः स्तोत्रम्। तदर्हन्तीति स्तोम्यस्तुत्यर्हा उषसः Sy.
२३. मत्स्वभूतेन Sy.
२४. ब्रह्मणा सूक्तद्वयगतमन्त्ररूपेण स्तोत्रेण Sy.
२५. Omitted by P. अभ० D.M
२६. प्रवर्धयत Sy.

तास्मान्[1]। कामयमाना[1]। उषसः[1]! युष्माकम्[2]। देव्यः[3]! पालनेन[4]। सम्भजेमहि[5]। सहस्रसङ्ख्याकम्[6]। शतसङ्ख्याकम्[7]। च[8]। अन्नम्[9]।

I.125.

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ।
तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ॥१॥

प्राता[10] रत्नम्। स्वनयस्य[11] दानस्तुतिः। प्रातः[12]। धनम्। प्रातरागन्ता[13] स्वनयः। प्रयच्छति[14]। तम्[15]। प्राज्ञः[16] कक्षीवान्[17]। प्रतिगृह्य[18]। निधत्ते, लिङ्गभेदश्छान्दसः[19]। तेन[20] धनेन। प्रजाम्[21]। आयुश्च[22]। वर्धयमानः[23]। धनस्य[24]। पोषेण[25]। समृष्टो भवति[26]। शोभनवीरः[27]। कक्षीवा-

---

१. स्तोतॄनस्मानस्मत्समृद्धिं वा कामयमानाः Sy.
२. युष्मत्सम्बन्धिना Sy.
३. देवनशीलाः Sy.
४. रक्षणेन Sy.
५ भ० P. लभेमहि Sy.
६. अभीष्टं धनम् Sy.
७. शाकं M. अपरिमितं धनम् Sy.
८. धनम् Sy.
९. युष्मत्कृतेन शतसहस्रपरिमितधनादिरूपरक्षणेन वयमप्यर्थिभ्यः शतसहस्रपरिमितस्य धनस्य सनितारो भवेमेत्यर्थः Sy.
VM. ignores व
M.D. puts the figure ॥ १२४ ॥ here to indicate the end of one hundred and twentyfourth hymn. No such number is given in P. and M.
१०. भावयव्यस्य पुत्रः स्वनयो नाम राजा Sy.
११. प्रभातकाले Sy.
१२. रमणीयं निष्कादिकम् Sy.
१३. प्रातरेवात्मनः सकाशमागतः सन् Sy.
१४. अस्मत्सन्निधौ स्थापयति, ददाति Sy.
१५. स्थापितं सर्वम् Sy.
१६. चेतनावान्। अदुष्टमित्यवगतवान् Sy.
१७. स्वीकृत्य Sy.
१८. विध० P. पितुः समीपे स्थापयति Sy.
१९. ०वं छान्दस D.
२०. दत्तेन निष्कादिना Sy.
२१. पुत्रभृत्यादिरूपाम् Sy.
२२. जीवितञ्च Sy.
२३. वर्धमा० P.D. पोषयन् Sy.
२४. धनानां पुनः पुनर्वर्धनेन Sy.
२५. असौ राजा सङ्गच्छतामिति तव दातुराशिष प्रार्थयते Sy.
२६. वीरः M. शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतः सन् Sy.
२७. कक्ष्या नाम अश्वबन्धनी रज्जुः। तद्वान् कक्षीवान् Sy. कक्षीवान् कक्ष्यावान् N. 6. 10. कक्ष्याः प्रकाशयन्ति कर्माणि N. 3. 9. कक्ष्या रज्जुरश्वस्य। कक्षं सेवते। कक्षो गाहतेः। कस इति नामकरणः। ख्यातेर्वानर्थकोऽभ्यासः। किमस्मिन् स्थानमिति। कषतेर्वा। तत्सामान्यान्मनुष्यकक्षः। बाहुमूलसामान्याद्वाश्वस्य N. 2. 2.

निति।

१. अत्रेतिहासमाचक्षते। दैर्घतमसः कक्षीवान्नाम ऋषिर्ब्रह्मचर्यं चरिष्यन्वेदाभ्यासाय गुरुकुले चिरकालमुषित्वा वेदान्सम्यगधीत्य व्रतानि च चरित्वा तेनानुज्ञातः पुनः स्वगृहं प्रति प्रयास्यन् मध्ये मार्गे (मध्येमार्गं) रात्रौ विश्रान्तः। प्रभाते भावयव्यस्य पुत्रः स्वनयो नाम राजाऽनुचरैः सङ्क्रीडमानोऽकस्मात्कक्षीवतोऽन्तिकमाससाद। स च रभसा प्रतिबुद्धः सहसोत्तस्थौ। तं च राजा पाणिं गृहीत्वा स्वकीय आसन उपवेश्यास्य सौन्दर्यमवगत्य स्वकन्याप्रदानमनाः पप्रच्छ। भगवन्! कस्य पुत्रः किंनामा त्वमिति। स च पृष्टो मातरं पितरं च स्ववृत्तान्तञ्चाचचक्षे। स च राजा सम्भाव्य इत्यवगत्य मुदितमनाः स्वगृह प्राप्यास्मै मधुपर्कमारचय्य वस्त्रमाल्यादिभिः पूजयित्वा सरथा दश कन्याः शतनिष्कानश्वशतं, पुङ्गवाना शतं, गवां षष्ट्युत्तरसहस्रं, पुनरेकादश रथाश्च प्रादात्। स च सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोऽन्तिकमागत्य तस्मै प्रावर्शयत्। ननु कक्षया नामाश्वबन्धनी रज्जुः। तद्वान्कक्षीवान्। अश्वबन्धनञ्च राज्ञ एवोचितम्। अतोऽस्य राजन्यत्वात्प्रतिग्रहो नोपपद्यते। 'याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः' (मनु० १०, ७६) इत्युक्तत्वात्। तस्माद् ब्राह्मणस्यैवाधिकारो न तु क्षत्रियस्येति। नैष दोषः। यद्यप्यसौ कलिङ्गाख्यस्य राज्ञः पुत्रस्तथापि तेन कलिङ्गेन स्वयं वृद्धत्वादपत्योत्पादनाय सामर्थ्यमलभमानेन तदुत्पादनाय याचितो दीर्घतमा ऋषिरुशिग्नामिकाम् अपत्योत्पादनाय प्रेषितया राजमहिष्याऽतिजरठेन महर्षिणा सह रन्तुं लज्जमानया स्ववस्त्राभरणैरलङ्कृत्य स्वप्रतिनिधित्वेन प्रेषितामुशिग्नामिकां योषितं दासीमित्यवगत्य मन्त्रपूतेन जलेनाभिषिच्यर्षिपुत्रीं कृत्वा तया सह रेमे। तदुत्पन्नः कक्षीवान्नामर्षिः... अतोऽस्य क्षत्रियसम्बन्धात्कक्षीवानिति नामोपपन्नम्। दीर्घतमसः परमर्षेरुत्पन्नत्वेन ब्राह्मणत्वात्प्रतिग्रहोऽप्युपपन्न एव। इदमादि सूक्तद्वयं स्वनयस्य राज्ञो दानप्रशंसाख्यानप्रतिपादकम्। नन्वनुक्रमण्यां 'स्वनयस्य दानस्तुतिः' इति 'दानतुष्टो भावयव्य तुष्टाव' इति चोभयत्र स्तोतव्य भिन्नमेवानुगम्यत इत्युच्यते। उत्तरसूक्तस्य प्रथमायामृचि 'अधिक्षियतो भाव्यस्य' (RV. I. 126 1b.) इति दातुर्भावयव्यस्य श्रूयमाणत्वात्तत्प्राथम्यमुपजीव्य पृथगुपात्तम्। वस्तुतस्तु पितुर्नाम्ना पुत्रस्य व्यवहर्तव्यत्वात् तथा 'आ रुद्रासः' (RV. V. 57. 1a.) इत्यादौ बहुशः प्रयोगदर्शनात् 'स्वनयेन दत्ताः' (RV. I. 126. 3a.) इति तत्रैव सूक्ते स्वनयस्यापि श्रूयमाणत्वाच्चोभयत्रापि दातृप्रतिगृहीत्रोरेकत्वेनैकमेव दानप्रशंसारूपमाख्यानमिति प्रसिद्धम्। स च कक्षीवानानीतं सर्वं पितुर्निवेदयन्परोक्षेणैव दानप्रकारं प्रशंसति Sy.

सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥२॥

सुगुरसत्। सुगुः। भवतु। सुहिरण्यः। स्वश्वः। महच्च। अस्मै। वयः। इन्द्रः।
प्रयच्छतु। यः। त्वा। आयन्तम्। वसुना धनेन। प्रातर्गामिन्! अतिथे! कक्षीवन्! मुक्षीजा
जालपाशिका यथा जालपाशिकया कश्चित्। पक्षिण निरुन्ध्यादेवं त्वाम्। निरुणद्धि स्वनय

---

१. गुरुः M. शोभनैर्बहुभिर्गोभिस्तद्वान् Sy. शोभना वृष्टावृष्टप्रयोजनसामर्थ्याद् गावो यस्य स सुगुः SKN.
२. भवति SKN.
३. ०ण्य P.D.M. सुष्ठु हितरमणीयैर्धनैस्तद्वान्भवतु Sy.
४. शोभनैरश्वैस्तद्वान् सन् Sy.
५. प्रभूतम् Sy. बृहच्च Dur.
६ राज्ञे प्रदात्रे Sy.
७. अन्नम् Sy; Dur. अन्ननामैतत्। अन्नम् SKN.
८. परमेश्वरो धर्मदेवता Sy. इन्द्रः SKN.
९. दधातु, ददातु। यतोऽयं राजाऽस्मै गोहिरण्याश्वान्नानि बहुसङ्ख्याकानि दत्तवान् अतस्तेषामभिवृद्धिप्रार्थना उचितैव Sy. ददाति च ... सर्वाः सम्पदः SKN. ददाति Dur.
१०. यो राजा Sy.
११. पदि पथिकं यदृच्छया गन्तारं ... त्वाम् Sy. त्वाम् SKN.
१२. गुरुकुलावागतम् Sy. सायं प्रातश्चाग्निहोत्रम् ... आगच्छन्तम् SKN. आयन्तमध्वानम् Dur.
१३. अन्नसाधनेन गवादिधनेन Sy. हविर्लक्षणेन धनेन SKN. अन्नेन Dur.
१४. प्रातरागामिन्नतिथे पुत्र! Sy. प्रातरेवाग्निहोत्रार्थमागामिन्नित्यर्थः। ... अतिथेरतिथिस्थानीयस्य। वृष्टं चेदमग्नेरतिथित्वं मन्त्रान्तरे 'जुष्टो वसूना अतिथिर्दुरोणे' इति SKN. स हि प्रातः प्रातरन्यानि गृहाण्यभ्येति तेनैवमामन्त्र्यते। ... यथा ह्यतिथिरध्वगो भवति स पतन् क्षुधितोऽन्नसंयोगेन कस्यचिद् गृहिणो गृहेऽवतिष्ठत एवमेतत्स्यात् Dur.
१५. ०वान् P.
१६. मुक्षी० P. मुच्यमाना सती बन्धनं जनयतीति मुक्षीजा मृगपक्ष्यादिबन्धनी रज्जुः Sy. जालपाशिका। ... मुच्यते हि सा बध्यमानेषु पक्षिषु। आमुच्यन्ते वा पक्षिणः। पादे तन्यते वासौ प्रसार्यते पक्षिबन्धनपाशजालरूपा चेति मुक्षीजा SKN.
१७. जालपाशिका यथा omitted by D.
१८. तया पाशको यथा पदि गन्तारं मृगपक्ष्यादिकम् Sy. पदि पक्षिणम् SKN.
१९. तथा मयाननुज्ञातमपि त्वां गमनं प्रतिबध्य गवादीष्टदानादिना यो राजा तोषयति स एवं भवत्विति Sy.
२०. निरुध्यै P. गमनत उत्कृष्टं बध्नाति। गतिं निरुणद्धीत्यर्थः Sy. यथा मुक्षीजया जालपाशिकया कश्चित्कुमारः पक्षिणं सिनुयात्। ... उदित्येष समित्येतस्य स्थाने ... बन्धनं संरोधः। स चापि योऽभ्यर्चनापूर्वः स इहाभिप्रेतः। अनया रज्ज्वा हि बन्धः। सम्यग् बध्नाति। अत्यन्तं संरुणद्धीत्यर्थः SKN. प्राणांस्त्वयि सन्नियच्छतीत्यर्थः Dur.

इति कक्षीवानाशिषमाशास्ते स्वनयाय।[1][2][3][4]

आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥३॥

आयमद्य। गतवानस्मि। अद्य। सुकृतम्। प्रातरेव। धनमिच्छन्। इष्टेः। पुत्रं स्वनयम्। वसुमता। रथेन सहितम्। अंशो सोमलतायाः। सुतम्। मां पायय। मादयित्र्याः। क्षपितवीर माम्। वर्धय। धनप्रदात्रीभिर्वाग्भिरिति वदन्निति शेष।

उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः।
पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥४॥

उप क्षरन्ति। उपेत्य क्षरन्ति। सिन्धव। सुखस्य भावयित्र्य। ईजानम्। च। यक्ष्य-

---

१. The passage beginning with प्रयच्छतु and ending with आशिषम् is omitted by M.
२. प्रशास्ते M. ३. ०याय M.
४. पदिर्गन्तुर्भवति। यत्पद्यते...। सुगुर्भवति। सुहिरण्यः। स्वश्वः। महच्चास्मै वय इन्द्रो दधानि यस्त्वा यन्तमघ्नेन। प्रातरागामिन्नतिथे। मुक्षीजयेव पदिमुत्सिनाति कुमारः। मुक्षीजा मोचनाच्च। शयनाच्च। ततनाच्च N. 5. 18, 19; SKN. II. 362.
५. अय० P. ६. प्राप्तोऽस्मि Sy.
७. यतवास्मद्य M. अस्मिन्दिन इदानीम् Sy
८. शोभनस्य कर्तारम् Sy.
९. पूर्वेद्युः प्रभातकाले, अयं धनं वत्तवान्... अत्र यद्यपि केवलं प्रातरित्येव श्रुतं न पूर्वेद्युरिति तथाप्यद्य आयमित्युक्तत्वादर्थात्पूर्वेद्युः प्रातरिति गम्यते Sy.
१०. त्वामिच्छन् प्राप्तुमिच्छन्। कदा द्रक्ष्यामीति कामयमानोऽहम् Sy.
११. इष्टस्येष्टसाधनस्य यागस्य वा Sy.
१२. पुत्र P. पुरु त्रातारम्... कर्तारमित्यर्थः Sy. पुत्रः पुरु त्रायते N.2.11.
१३. समृद्धधनवता Sy. १४. साधनेन। यद्वा तेन सहित इति सहार्थे तृतीया। किञ्च मदानीतेन समृद्धेन धनेन Sy.
१५ अंशुमतो वल्लीरूपस्य Sy. १६. अभिषुतं रसम् Sy. १७. आत्मानं पाययं। इष्टसाधन सोमयागं कुर्वित्यर्थः Sy.
१८. मदायि० M. ०त्र्याह P. मादनसाधनस्य सोमस्य Sy. मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः N.2.5.
१९. क्षपितं P. क्षयद्वीरं क्षियन्तो निवसन्तो वीराः पुत्रभृत्यादयो यस्य तं तादृशं त्वविष्टसाधनबहुधनप्रदातारम् Sy.
२०. समृद्धं कुरु। पुत्रभृत्यादिवीर्यैर्यथा प्रवृद्धो भवति तथा कामयेत्यर्थः Sy.
२१. वाभि० D. प्रियसत्यात्मिकाभिर्वाग्भिः Sy. २२. Cf. BB. on TS. 1.8.22.4. ०न्ती P. सोमयागं फलप्रदर्शनेन स्तौति Sy. २३. स्रवन्ति। प्रीणयन्तीत्यर्थः Sy. २४. स्यन्दनशीलाः प्रस्नुतपयोधाराः Sy. सिन्धुः स्यन्दनात् N.9.26. २५. सुखभावयित्र्यः। मय इति सुखनाम। 'मयः स्नूमकम्' (Ngh. 3.6.)इति तन्नामसु पाठात् Sy.
२६. सोमयागमनुतिष्ठन्तम् Sy. इष्टवन्तं देवान्। यजेर्लिटः कानज्वेति कानच् BB.

माणम्[१]। च। पयस्वित्यः[२]। याचितृभ्यो धनानि प्रयच्छन्तम्[३]। दत्तवन्तम्[४]। च। तस्यान्नमिच्छ-[५][६]
मानाः। उदकधाराः[७]। सर्वतः[८]। उपक्षरन्ति[९][१०]।

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥५॥

नाकस्य पृष्ठे[११]। स्वर्गस्य[१२]। उपरि[१३]। तिष्ठति[१४]। श्रितः। य। प्रयच्छति[१५]।

---

१. यक्ष्य इति प्रणतिं कुर्वन्तश्च। न केवलमीजानमपि तु यक्ष्य इत्यध्यवसितवन्तमपि Sy. अचिराद्यक्ष्यमाणं यष्टुं कृताध्यवसायमिति BB.

२. प्रीणयित्र्यो गावः।.. नच पूर्वस्यामृचि सोमं पिबेत्युक्तत्वात्सर्वेषां सोमयागानामग्निष्टोमात्मकज्योतिष्टोमस्य प्रकृतस्य ज्योतिष्टोमेन स्वर्गकामो यजेतेति स्वर्ग एव फलत्वेन श्रुतो न गवादिकमिति वाच्यम्। स्वर्गवद् गवादिकामनयापि सोमयागस्य कर्तुं शक्यत्वात्। न केवलं सोमयागमनुतिष्ठतामेव महत्फलम्, अपितु सुकृतसाधनानि कर्मान्तराण्यधितिष्ठतामपि महत्फलमस्त्येवेति दर्शयति Sy. देवान्प्रीणयत्यः (प्रीणयन्त्यः) BB.

३. यापितृ० P.D.

४. पितॄन्प्रीणयन्तम् Sy श्राद्धेन पितॄन्प्रीणयन्तम्। पृ प्रीतौ, इनम् च BB.

५. प्रीणनशीलमिष्टवातारं, प्राणिनः सर्वदा प्रीणयन्तम् Sy. पितॄणां प्रीणनशीलं च न पृणन्तमेव। आदृगमहन इति किन्प्रत्ययः। न केवलमीजानं यक्ष्यमाणमेव, अपितु पृणन्तं च पपुरिं चेति। प्रासङ्गिकी वृत्तप्रशंसा, इष्टापूर्तकारिणां प्रशंसनात्। तदृते कर्मण्यस्य विनियोगो द्रष्टव्यः BB.

६. इच्छन्तः is suggested for इच्छमानाः
अन्नमिच्छन्त्योऽन्नसमृद्धिहेतवः Sy. अन्नयुक्ता इत्यर्थः। 'क्याच्छन्दसि' इत्युप्रत्ययः BB.

७. घृतस्य धाराः। यद्वा घृतकुल्याः Sy. काः पुनस्ता इत्याह... अविच्छिन्नाः प्रवाहा यथोक्तस्वभावाः BB.

८. सर्वाभ्यो दिग्भ्यः BB. ९. प्राप्नुवन्ति प्रीणयन्तीत्यर्थः Sy. यथोक्तलक्षणान्पुरुषानुपक्षरन्ति। अपि चोपयन्ति... सर्वाभ्यो दिग्भ्य उपागच्छन्ति BB.

१०. VM. ignores च

११. The verse is cited by Skandasvāmin in his commentary on (N.1.5) 'अह इति च ह इति च विनिग्रहार्थीयौ।' I. 58. सोमयागप्रसङ्गेन सामान्यतो दानमेतदादिभिस्त्रिभिः प्रशंसति। यद्वा सोमस्यैव स्तुतत्वाद्दक्षिणाशब्दस्य याग एव प्रसिद्धत्वाच्च आ सूक्तपरिसमाप्तेः सोमयाग एव प्रस्तूयते Sy.

१२. कमिति सुखनाम। तद्विरुद्धमकं, न विद्यतेऽकं दुःखं तत्साधनं पापं वेति नाको द्युलोकः ...तस्य Sy. नाको द्यौस्तस्य SKN.

१३. उन्नत उपरिदेशे Sy. स्वर्गाख्ये SKN.

१४. अधि अधिकमाकल्पान्तं तिष्ठति। यद्वा, अधितिष्ठति, अधिष्ठाय प्रमुखो भूत्वा तिष्ठति Sy. अधिशब्दस्तु पादपूरण ऐश्वर्ये वा SKN. १५. हविरादिदानेन देवादीन्प्रीणाति Sy. देवान्(देवेभ्यः) ददाति SKN.

सः[१]। खलु[२]। देवेषु[३]। गच्छति[४]। तस्मै[५] प्रदात्रे। स्यन्दनशीलाः[६]। आपः[७]। स्वसारम्[८]। प्रेरयन्ति[९]। तस्मै[१०]। इयं दीयमाना। दक्षिणा[११]। सदा[१२] कामान्। दोग्धि[१३] [१४]।

दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥६॥

दक्षिणावताम्[१५]। प्रदानवताम्। एवास्मिँल्लोके[१६]। इमानि[१७]। चित्राणि[१८] गृहशय्यासनानि दृश्यन्ते[१९]। दक्षिणावतामेव। अमुष्मिंश्च लोके[२०]। सूर्या[२१] प्रकाश कुर्वन्ति बहुवचने न तात्पर्यम् ....भजन्ते[२२]। दक्षिणावन्त एव। अमृतत्वम्[२३]। भजन्ते[२४]। दक्षिणावन्त एव। आयु[२५]। वर्धयन्ति[२६]।

---

१. सः। खलु। देवेषु। गच्छति omitted by P.

२. ह इति प्रसिद्धौ Sy. एव ... अत्राप्यर्थान्तरस्यासम्भवात्पादपूरणस्य चान्याव्यत्वाद् हशब्दो विनिग्रहार्थीय एवशब्देन समानार्थं इत्युपपन्नम् SKN.

३. देवानां मध्ये SKN.

४. वर्तते, स्वयमेव देवो भवतीत्यर्थः Sy. देवो भवतीत्यर्थः SKN.

५. प्रीणयित्रे पुरुषाय Sy. तदर्थम् SKN

६. स्यन्दनस्वभावाः SKN.

७. आप P. वृष्टिलक्षणाः SKN.

८. घृतं तेजोवत्सारम् Sy. घृतमुदकनामैतत्। तदुदकमात्मैकदेशभूतम् SKN.

९. गच्छन्ति। रसवत्यो भवन्तीत्यर्थः Sy. वर्धन्ति।... पतन्तीत्यर्थः SKN.

१०. भूमिरपि Sy. इदम् SKN.

११. सस्यादिफलसम्पादनदक्षा सती Sy. दानम् SKN.

१२. सर्वकालम् Sy. नित्यमेव SKN.

१३. सेचयति। तोषयतीत्यर्थः। वातुर्जीवनसाधकान्नोदकानि रुचिराणि समृद्धानि भवन्तीत्यर्थः Sy. पिवि सेचने। सिञ्चति प्रभूतान्कामान्वर्षति ददातीत्यर्थः SKN.

१४. VM. ignores अधि. SKN.I.58.

१५. बहुविधगोहिरण्यादिरूपदक्षिणाप्रदातृणाम् Sy. १६. इच्छब्द एवकारार्थः। तेषामेवार्थे Sy.

१७. भूमौ दृश्यमानानि Sy.

१८. चायनीयानि लक्ष्मचन्दनमणिमुक्तादिरूपाणि द्रव्याणि समृद्धानि भवन्तीति शेषः Sy.

१९. The passage beginning with प्रदानवताम् and ending with दक्षिणावताम् is omitted by P.

२०. द्युलोके Sy.

२१. सूर्यसम्बन्धिनो लोकास्तवनुगृहीता भोगा वा समृद्धा भवन्ति Sy.

२२. P. and D do not give any indication that something is missing. भजन्ते also is omitted by P.D.

२३. जरामरणरहितं स्थानम्।... यद्वा दानेनापहतपाप्मान आत्मानं विदित्वाऽमृतमविनाशं मोक्षम् Sy.

२४. सेवन्ते ... भजन्ते प्राप्नुवन्ति Sy.

२५. आयुः। वर्ष missing in M. अतिदीर्घमेवमायुष्यम् Sy.

२६. लभन्ते। प्रपूर्वस्तिरतिर्वर्धनार्थः। इत्, इति सर्वत्र सम्बध्यते Sy.

मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ॥७॥

मा पृणन्तः[1]। दरिद्रेभ्यः प्रयच्छन्तः[2]। दुर्गतिम्[3]। पाप च। मा गमन्[4]। मा च। ते[5] जीर्णा[6] भूवन्। प्राज्ञा.[7]। सुकर्माण.[8]। अन्य[9]। क.[10]। चित्[11]। एषाम्[12]। परिधि.[13]। अस्तु, यो दुरितानि परिदधाति निरुणद्धि पुरुषान्[14] स परिधि.। अप्रयच्छन्तमेव[15]। दुरितादय.[16]। आभिमुख्येन। सङ्गच्छन्तामिति कक्षीवतः प्रतिजिघृक्षो[17]. स्वनयमभिगच्छतो वचनानीति[18]।

I.126.

अमन्दान्स्तोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥१॥

अमन्दान्स्तोमान्[19]। सूक्तेनानेन दत्तानि धनान्यवयवशो निर्दिशति[20] — अनल्पा[21]।

---

१. वृणन्तः P.
२. देवादीन्हविरादिना प्रीणयन्तः Sy.
३. दुष्टं यथा भवति तथा प्राप्तं दुःखम् Sy.
४. ०गम P.
मा प्राप्नुवन् Sy.
५. न केवलं दातार एव Sy.
६. जरया न जीर्णा भवेयुः Sy.
७ अपि तु सूरयो देवानां स्तोतारो विद्वांसः Sy.
८ शोभनकृच्छ्रचान्द्रायणादिनियमवन्तोऽपि मा जारिषु. Sy.
९. तेभ्योऽन्यो यः कोऽपि पुरुषः Sy.
१०. कि M.
११. तेषां दातृणां स्तोतृणां वा Sy.
१२. पापस्य परितो धारकः ... यद्वाऽन्यो यः कश्चन पापदेवस्तेषां परिधिस्थानीयो व्यवधायकोऽस्तु। यथाग्नेः परिधिः स्वयं रक्षःप्रभृतिभिर्बाध्यमानः स्वान्तर्हितमग्निं रक्षति तद्वत्। अथवाऽन्यो धर्मविशेषस्तेषां परिधिः परिधानमस्तु कवचस्थानीयोऽस्तु Sy.
१३. परिधिः। अस्तु यो missing in M.
१४. वृषान् P.
१५. अप्रीणयन्तमदातारम् Sv.
१६. दूरिदया P. चित्तपीडास्तत्साधनाः पाप्मान. Sv.
१७. सम्यक् प्राप्नुवन्तु। वयं सुखिनो भवेमेत्यर्थः Sy. १८. ०क्षो D.
१९. Ms. D. puts the figure ॥१२५॥ here to indicate the end of one hundred and twentyfifth hymn. No such number is given in P. and M.
२०. निशाति P. निदि० D.
२१. अल्पाः D. अनल्पान् Sv. अमन्दानिति स्तोमविशेषणम्। तत्कथमुपपद्यते ? विषयविषयिणोरभेदात्। मन्दो बालिशो मूर्खः। तद्विपरीतोऽमन्दोऽबालिशोऽमूर्खः। तद्विषयाः पण्डिता वेदनीयास्तद्योग्यानेतान्। अल्पो वा मन्दः। अनल्पान्वा SKN.

[१] स्तुती.। [२] अहं [३] प्रज्ञया। [४] प्रभरामि। [५] सिन्धुदेशे। [६] वर्तमानस्य। [७] भाव्यपुत्रस्य स्वनयस्य। [८] यः। मे। [९] सहस्रम्। [१०] निरमिमीत। धनानां [११] प्रसवान्। [१२] शत्रुभिरतीर्णः। राजा। [१३] प्रशंसाम्। [१४ १५] इच्छन्।

शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान्प्रयतान्त्सद्य आदम्।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥२॥

[१६] शतं राज्ञः। शतम्। [१७] राज्ञ। [१८] ईशानस्य। [१९] सौवर्णान्। निष्कान्। [२०] शतञ्च। [२१] अश्वान्।

---

१. स्तोत्राणि तन्निष्ठबहुविधदानादीनां कीर्तनानि Sy. स्तोमान् SKN.

२. Omitted by P. D. प्रज्ञायाः M. मनीषया, प्रियातिशयबुद्धया Sy. तृतीयायाः सहयोगलक्षणाया अत्र लुक्। मनीषया स्तुत्यर्थप्रज्ञया वा। यावत्प्रज्ञमित्यर्थः SKN. स्तुत्या प्रज्ञया वा Dur.

३. प्रकर्षेण सम्पादयामि Sy. प्रापयामि SKN. उच्चारये Dur.

४. सिन्धुदेशे। यद्वा लक्षणया सिन्धुतीरे समुद्रतीरे Sy. सिन्धुर्नदी तत्सम्बन्धो वा देशः। अधिरुपरिभावे। सिन्धोर्नद्यास्तत्सम्बन्धस्य वा देशस्योपरि SKN.

५. अधिनिवसतः Sy. निवसनः SKN.

६. भावयव्यस्य। तत्पुत्रस्य स्वनयस्येत्यर्थः Sy. भावयव्यस्य। भावयव्यशब्दस्यायं छान्दसोऽक्षरद्वयलोपः। पर्यायान्तरं वा भावयव्यस्य राज्ञः SKN.

७. यो राजा Sy.

८. मदर्थम् Sy. मम प्रभूतस्वदानेन SKN.

९. तत्सङ्ख्याकान् Sy.

१०. सम्पूर्णधनप्रदानेन निर्मितवान् Sy. निर्मितवान् SKN. निर्मिनवान्। बहूनां यज्ञानां यागोपकरणं दत्तवान् Dur.

११. सूयन्ते सोमा एष्विति सवाः सोमयागास्तान् Sy. स्तुत्यानित्यर्थः SKN. यज्ञान् Dur.

१२. वाच्छत्रु० M. केनाप्यहिंसितः Sy. तुर्वतिर्हिंसाकर्मा। अत्यन्तशूरत्वादहिंसितपूर्वः केनचित्। त्वरतेर्वा, अत्वरमाणः SKN.

१३. श्रवः। सर्वैः श्रूयमाणां कीर्तिम् Sy. श्रूयत इति श्रवः कीर्तिः प्रशंसा SKN.

१४. आत्मन इच्छमानः कामयमानः Sy. तामात्मन इच्छन् SKN.

१५. यतोऽयमात्विज्याद्युपाधिना विना कीर्त्यर्थमेव बहुधनं प्रादादतस्तं स्तौमीत्यर्थः Sy. अमन्दान्स्तोमानबालिशाननल्पान्वा। ... प्रभरे मनीषया मनस ईषया स्तुत्या प्रज्ञया वा। सिन्धावधि निवसतो भावयव्यस्य राज्ञः। यो मे सहस्रं निरमिमीत सवानतूर्तो राजा तूर्ण इति वा। अत्वरमाण इति वा। प्रशंसामिच्छमान N.9.10; SKN. III. 151. VM. ignores अधि।

१६. शतसङ्ख्याकानि। शतं सहस्रमित्यपरिमितवचनः। अपरिमितान् Sy.

१७. स्वतेजसा दीप्यमानस्य स्वनयस्य Sy.

१८. ईजान० P.D. नाधमानस्य स्वीकर्तव्यमित्युच्चैर्याचमानस्य Sy.

१९. सौपर्ण० P.

२०. आभरणविशेषान्। द्वयसाधिशेषविशिष्टानि वा सुवर्णानि Sy.

२१. अध्वगमनसमर्थान्हृयान् Sy.

शुद्धवर्णान्[१]। सद्य[२] एव। अहमादम्[३], अदि. प्रतिग्रहकर्मा। कक्षीवान्। प्राज्ञस्य[४]। गवाम्[५]। शत चादत् स्वनयश्च[६]। दिवि[७]। कीर्तिम्[८]। जरया वर्जिताम्। विस्तारितवान्देवेषु[९]।

उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः।
पृष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम् ॥३॥

उप मा श्यावाः[१०]। भूयो भूय सञ्चरणाच्छ्यावर्णा.। स्वनयेन[११]। दत्ता[१२]। वधूभिरधिष्ठिता[१३]। दश। रथा। माम्। उपस्थिता। तथा गोषु[१४] भवम्[१५]। पष्ट्यधिक[१६] सहस्र च। मामन्वगात्[१७]। तदेतत् कक्षीवान्[१८]। अभजत्[१९]। अह्नाम्[२०]। अभिप्राप्तौ प्राप्त[२१]।

चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति।
मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः ॥४॥

चत्वारिंशत्[२२]। दश[२३] रथा यस्मिन्[२४] सङ्घे[२५] स दशरथ[२६] प्रत्येक चतस्र[२७] शोणवर्णा अश्वा[२८]

---

१. शुद्धान्। लक्षणोपेतान् Sy.
२. प्रार्थनानन्तरमेव Sy.
३. एवमाद० P. D. आत्तवानस्मि। स्वीकृतवानस्मीत्यर्थः... आत्तवान् Sy.
४. धनाना निरसितुर्दानशीलस्य Sy.
५. पुङ्गवानां बलोवर्दानामित्यर्थः। उत्तरमन्त्रे स्त्रीगवोनामित्यभिधानात् Sy.
६. एवम्प्रदाता राजा Sy.
७. द्युलोके Sy.
८. जरा P. शाश्वतीम् Sy.
९. गवादिप्रतिगृहीताहं स्वर्गे कीर्तिमकरवमित्यर्थः Sy. १०. श्यामव० M. ०र्णा P. तद्वर्णाश्वैर्युक्तत्वाच्छ्यावाः Sy.
११. स्वनयेना ना प्रसवान् शत्रुभिर्वत्ताः P.
१२. अधिष्ठिताः D. आरूढाभिर्वधूभिस्तद्वन्तः Sy. १३. एतत्सङ्ख्याकाः Sy.
१४. ०थ P. १५. गेषु P. गव्यशब्दो गोसमूहवाची... गवां समूहः Sy.
१६. Omitted by P.D.
१७. ०ठ्य० M.
१८. मा स (म) स्व० M. अनु... आगतः Sy. १९. तत्सर्वम् Sy.
२०. आत्मानं परोक्षेण ब्रवीति। तत्सर्वं प्रनिगृह्यायं कक्षीवान्... स्वीकृतं रथवध्वादिक स्वपित्रे समर्पयति स्वयं वा स्वीकरोति Sy.
२१. अभजदहामभिः M. दिवसानां मध्ये Sy.
२२. अभिपित्वे सन्निहितेऽहनि...। अभिपित्वशब्द आसन्नकालवाची प्रपित्वशब्द इतिवत्। स च 'प्रपित्वेऽभीक इत्यासन्नस्य' (N.3.20.) इति यास्केनोक्तत्वादासन्नवचनः। उपसर्गभेदेऽप्यर्थाभेदः Sy.
२३. प्राप्तः M.
२४. VM ignores आ।
२५. दशरथस्य M. २६. संख्ये P.D.
२७. Omitted by P. M.
२८. ०थं D. दशसङ्ख्याकरथवतः Sy.
२९. चत्वारिंशत्, एकैकस्य रथस्य चतुष्टये सति दशरथानां मिलित्वा चत्वारिंशदश्वा भवन्ति... एकैकं रथं चत्वारश्चत्वारः पङ्क्त्याकारेण वहन्तीत्यर्थः Sy.
३०. शोणवर्णोपेता अश्वाः Sy.

भवन्ति[१] ताश्च[२]। अग्रे[३]। गवा[४] सहस्रस्य[५]। श्रेणिम्[६]। नयन्ति[७]। मदस्य[८] च्यावयितुम्[९]। हिरण्मयालङ्कारान्[१०]। अश्वान्[११]। पञ्चकुलजातः[१२]। कक्षीवान्[१३]। प्रतिगृहीतान् पृष्ठे सम्ममर्श[१४]।

पूर्वामनु प्रयतिमा ददे वस्रीन्युक्ताँ अष्टावरिधायसो गाः।
सुबन्धवो ये विश्याइव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ॥५॥

पूर्वामनु[१५]। शत राज्ञ इत्यादिकम्। प्रदान[१६] स्वनयात्[१७]। युष्मदर्थम्। अनुक्रमेण[१८]। प्रतिगृहीतवानहमस्मीति[१९] ज्ञातीन्प्रत्याह। त्रीन्[२०]। युक्तान् रथान्। अष्टौ च। गा। अभिगन्तृणा[२१] मनुष्याणा धारका[२२]।

---

१. तेऽपि Sy.
२. पुरस्तात् Sy.
३. सहस्रसङ्ख्याकानुचरोपेतस्य कक्षीवतो गोयूथसहस्रस्य वा Sy.
४. सहस्रश्रेणीयं P.D. पङ्क्तिमाश्रित्य ... श्रेणीभावम् Sy.
५. रथानभिमतदेशं प्रापयन्ति। यद्वा अश्वनियुक्तान् रथान् ... नयन्ति प्रापयन्ति Sy.
६. मदस्राविणः। उद्वृत्ताञ् शत्रूणां मदस्य च्यावयितृन्वा Sy.
७. सुवर्णमयनानाभरणयुक्तान्। कृशनमिति हिरण्यनाम 'कृशन लोहम्'(Ngh.1 2.) इति तन्नामसु पाठात् Sy.
८. सततगमनशीलानश्वान् Sy.
९. वज्र० M. वज्रकुलजातं P.D. घासाद्यन्नवन्तः सन्तः Sy.
१०. कक्ष्या अश्वसम्बन्धिनी रज्जुः। 'कक्ष्या रज्जुरश्वस्य' (N. 2.2.) इति यास्केनोक्तत्वात्। ताभिस्तद्वन्तः। यद्वा, अङ्गिरसः पुत्राः सर्वेऽपि कक्षीवन्तः। अथवा कक्षीववदनुचराः सर्वेऽपि छत्रिन्यायेन कक्षीवन्तः Sy.
११. उदमृक्षन्त, अध्वश्रमजनितस्वेदापनयनायोत्कृष्टं मार्जयन्ति Sy.
१२. आनीतं धनं बन्धुभ्यो निवेदयन्नाह Sy.
१३. पूर्वां प्रयतिं पूर्वप्रदानम् Sy.
१४. स्वनयात् M.
१५. अनु तमनुसृत्य वक्ष्यमाणानि रथादीनि ... यद्वा पूर्वां प्रयतिं प्रदेयं रथादिकम्, अनु दानक्रमेणैव Sy.
१६. प्रतिगृहीतवानस्मि...स्वीकृतवानस्मि Sy.
१७. हे सुबन्धवः Sy.
१८. त्रीनष्टौ च युक्ताञ् चतुर्भिश्चतुर्भिरश्वैर्धनैर्वा युक्तान् रथानिति शेषः। अत्र सङ्ख्यापृथङ्निर्देशो न विवक्षितः Sy.
१९. अरिभिरीश्वरैः Sy.
२०. ०णान्धकाराः P.
धारणीया बहुमूल्या असङ्ख्याता गाश्चाददे। अत्र वक्ष्यमाणानि पूर्वप्रतिगृहीतादधिकानीति युक्तम्। पूर्वमेव हि पित्रे निवेदितानां पुनर्बन्धुभ्यो निवेदनासम्भवात् 'वधूमन्तो वश रथासो अस्थुः' (ऋ० सं. १.१२६.३) इति दशानां रथानामुक्तत्वादत्र च त्रीनष्टावित्येकादशानां वक्ष्यमाणत्वाद्वधूविशिष्टानामन्येभ्यो दातुमनुचितत्वाच्चान्यानीति युक्तम्। उक्तानामेवानुवदनपक्षे दशवधूयुक्ता रथा एको धनपूर्ण इति विवेकः। उक्तानामेव रथादीनां पुनरभिधानं प्रकृष्टत्वज्ञापनार्थम्। सर्वे ब्राह्मणा आगता वसिष्ठश्चागत इतिवत् Sy.

[1]शोभनज्ञातय.। ये। मनुष्येषु भवा इव। [2]ज्ञाताः। पर्यटन्तो न संयुक्ता.। [3]अन्नम्। [4]ऐच्छन्। [5]पञ्चकुलजाताः।

आगंधिता परिंगधिता या कंशीकेव जङ्घहे।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६॥

[6]आगधिता।

[7]प्रादात् सुता [8]रोमशा नाम [9]नाम्ना
[10]बृहस्पतिर्भावियव्याय राज्ञे ॥ [11]
ततस्तमर्थं हरिवान्विदित्वा
प्रिय सखाय स्वनय दिदृक्षु।
[12]अभ्याजगामाशु शचीसहाय
[13]प्रीत्यार्चयत्त [14]विधिनैव राजा॥ [15]
अभ्याजगामाङ्गिरसी च तत्र
हृष्टा तयो[16] सा चरणौ ववन्दे।
इन्द्र. सखित्वादथ तामुवाच
[17]रोमाणि ते सन्ति न सन्ति राज्ञि॥
[18]सा बालभावादथ [19]त जगाद
[20]उपोप मे शक्र! [21]परामृशेति। [22]

---

१. सुबन्धवः शोभना विद्यायोनिसम्बन्धिनो येषां ते तथोक्ताः। यद्वा शोभनबान्धवोपेताः परस्परमनुरागयुक्ता इत्यर्थः Sy.
२. विशः प्रजास्तत्र भवा विश्याः। त्रियन्त इति त्रा त्राताः। तकारलोपश्छान्दसः। विशां त्राता यथा परस्परमनुरागवन्तस्तथैतेऽपीत्यर्थः Sy.
३. न सायु० P.D. शकटवन्तो हविर्धानशकटोपलक्षितसोमयागवन्तः सन्तः Sy.
४. सर्वत्र श्रूयमाणां कीर्तिम् Sy.
५. इच्छन्ति, इच्छन्तु वा। तदर्थमादव इति शेषः Sy.
६. वज्र० P.D M. अग्रवन्तोऽङ्गिरसः सन्तानप्रभवा ये सन्ति ते सर्वे सुबन्धवः Sy. ७. ग्र० P.
८. प्र० P. ९. ०शं P.
१०. Omitted by P.
११. ०र्भ० P.
१२. BD. III. 156[c d]
१३. सह ... विधि० M.
१४. BD. IV. I. १५. BD. IV. 2.
१६. तत् D.
१७. ०द्योपो० D. ०द्योपप० P.
१८. जगादो ... पो मृशेति M.
१९. BD. IV. 3[a-b.]

आगधिता[1]। आभिमुख्येन शरीरेण मिश्रिता[2]। या। अङ्गैश्च परितो[3] मिश्रिता[4]। कशीकेव[5]। अत्यन्तं पुमांस[6] हस्ताभ्यां परिगृह्णाति[7], नकुलस्त्री कशीका[8]। यादुरी स्त्री यदिरभिक्रमणकर्मा साभिक्रमणवती स्त्री[9]। मह्यम्। यशसाऽऽहर्तृणां[10] पुत्राणाम्। भोगसाधनानि। शतानि। ददातीति यदा[11]

---

१. सम्भोगाय प्रार्थितो भावयव्यः स्वभार्यां रोमशामप्रौढेति बुद्ध्या परिहसन्नाह Sy. स स्वया भार्यया रोमशया सम्भुङ्क्ष्व मामित्युक्तस्तामनयर्चया प्रत्याह। तेनेयमृक् चरूप? जायापत्यौ वै ऋचौ सवादौ SKN.

२. आगधिता आ समन्ताद् गृहीता स्वीकृता ...यद्वा आगधिता आ समन्तान्मिश्रयन्ती। आन्तर प्रजननेन बाह्य भुजादिभिरित्यर्थः...पूर्वस्मिन्पक्षे पुरुषस्य प्राधान्यमुत्तरस्मिंस्तु योषित इति भेदः Sy. आगृहीता आमिश्रिता अवयवैर्गाढ परिष्वक्ता सतीत्यर्थः SKN. मैथुनसम्बन्धाच्छब्दसारूप्याच्च 'गध्यर्तिमिश्रीभावकर्मा' (N. 5. 15.) इत्युपपद्यते Dur. गध्यं गृह्णातेः N. 5.15.

३. तथा परिगधिता परितो गृहीता। आदरातिशयाय पुनर्वचनम् Sy. सर्वतोऽन्तर्बहिश्च मिश्रिता, आलिङ्गनचुम्बनपुरस्सरं प्रक्षिप्तप्रजननना सानुरागं सम्भोगाय परिगृहीता च सतीत्यर्थः SKN. परिमिश्रीकृता। बाहुभ्यां मया परिष्वक्तेत्यर्थः Dur.

४. ०शि० P.D. अत्यागे दृष्टान्तः। कशीकेव। कशीका नाम सूतवत्सा नकुली। सा यथा पत्या सह चिरकालं क्रीडति न कदाचिदपि विमुञ्चति तथैषापि Sy. 'दिवे कशान्' [YV.24.26] इति हि श्रूयते। स हि नकुलप्रकारः। अश्वमेधे मन्त्रेषु प्रयोगदर्शनात्। कशाशब्दः पूतिकेशवचनम्। तस्मात् 'जातेरस्त्रीविषयात्'० [P. 4.1.63.] ङीकारः स्त्रीप्रत्ययः। पूतिकेशी कशीकेव। सा यथा पूतिकेशी सम्भोगकाले गृह्णीयात्तद्वत् SKN. सा हि नकुलजातिः... सा यथा मदकाले प्रतिकशमतितरां परिष्वजति। स हि तस्याः परिष्वजनस्वभावः Dur.

५. Omitted by P.D.

६. ०ह्णति M. या जङ्घहेत्यर्थं गृह्णाति कदाचिदपि न मुञ्चति Sy. तदत्र गमिः सामर्थ्याद् ग्रहणार्थः। गृह्णाति पूतिकेशीव परिष्वज्येत्यर्थः SKN. एवं या मां... परिगृह्णाति बाहुभ्या, परिगृह्य च ददाति Dur.

७. ०शि० P D.

८. क या० D.M. तया० P.
यादुरित्युदकनाम। रेतोलक्षणमुदकं प्रभूतं ददातीति यादुरी। बहुरेतोयुक्तेत्यर्थः। Sy. यादुरित्युदकनाम। रो मत्वर्थे। रेतोलक्षणकेनोदकेन तद्वती। भूम्नि च मत्वर्थीयः। प्रभूतं रेतः क्षरन्ती। आविर्भूतस्नेहरसेत्यर्थः। ईकारश्छान्दसः SKN. आदरवती, अथवा यादसा रेतःसेकेन तद्वती। 'यादः' (Ngh. 1. 12.) इत्युदकनामसु पठितम् Dur.

९. Omitted by P.D.

१०. मह्यं...तॄणां M. याज्ञानां सम्भोगानाम्। यश इति प्रजननानाम। तत्सम्बन्धीनि कर्माणि याज्ञानि भोगाः। तेषां ... शतान्यसङ्ख्यातानि मह्यं ददाति Sy. याज्ञशब्दः सम्भोगे। सम्भोगानां शतानि च। यज्ञशब्दश्रुतेस्तच्छब्दोऽप्याहार्यः SKN. मैथुनाख्यानां शतानि। बहुश इत्यर्थः Dur.

११. यदा seems to be unnecessary.

[1]यदूचो ? भावयव्यरोमशयोर्दम्पत्योरेव सवादस्तदानी प्राप्तयौवना या पुमांसमालिङ्गते सा पुत्र-[2]जननयोग्या।

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥७॥

[3]उपोप मे। [4]त्व ममाङ्गानि। [5]उपपरामृश। मा। मे। [6]अल्पानि रोमाणि। [7]मस्था[8]। [9]सर्वाङ्गा। अहम्। अस्मि। [10]रोमशा। [11]गन्धारयो नाम जनपदास्तत्र [12]भवत्यूर्णा। [13]यथा। [14]गन्धारीणा

---

१. *यदूचो* P. D.
यद्यूचोः is suggested for *यदूचो*

२. स M. किञ्च भोज्या भोगयोग्यैषा Sy. सा भोज्या सा भोगार्हा सम्भोग-योग्या। त्वमत्यन्तबालत्वान्न तावदेवं-रूपेत्यर्थः SKN. यैवंप्रकारा सा मम भोज्या, पत्नीत्यभिप्रायः Dur

३. ०जननयोवन्तथाविधेति P. D. यो... वन्तः तथापि... M.
N. 5.15.; SKN. II. 349.

४. रोमशा नाम बृहस्पतेः पुत्री ब्रह्मवादिनी परिहसन्तं स्वपतिं प्रत्याह Sy.
भावयव्यमेव सा भर्तारं तेनानुपेयमाना ब्रवीति Dur.

५. तं P. D. M.

६. ०मांगनि P. भो पते! मे माम्। द्वितीयार्थे चतुर्थी Sy. राजन्!... मम Dur.

७. उपोप। द्वितीय उपशब्दः पावपूरण.। उपेत्य परामृश सम्यक् स्पृश। भोग-योग्यामवगच्छेत्यर्थः। यद्वा मे मम गोपनीयमङ्गमुपोप परामृश, अत्यन्त-मान्तरं स्पृश Sy. उपगम्योपश्लिष्य च... परामृश, यः प्रदेशः पुरुषेण स्त्रियाः परामर्ष्टव्यः Dur.

८. परामर्शाभावशङ्कां निवारयति।
मे मदङ्गानि रोमाणि Sy.

९. अल्पानि Sy. उत्तरत्र रोमश्रवणाद् रोमाणि SKN.
अल्पकानि लोमानि Dur.
दभ्रमल्पकमित्यल्पस्य। दभ्रं दम्भोतेः। सुदम्भं भवति N. 3. 20.

१०. मा मन्यथा... मा बुध्यस्व Sy.
मंस्था इत्यर्थ. SKN. मा मन्यथाः। जानेऽहमेतद्यथाऽलोमिकाया उपगमः प्रतिषिद्धः Dur.

११. दम० P. यतोऽहमीदृशी, अतः सर्वा सम्पूर्णावयवास्मि Sy.

१२. अदभ्रत्वमेव विशदयति... बहुरोम-युक्ता Sy.
सर्वेष्वेवावयवेषु ममोत्पन्नानि रोमाणि येषु स्त्रीणामुत्पद्यन्ते Dur.
उपस्थकक्षादिषु स्थानेषु रोमवती जाते-त्यर्थः। अतः सम्भोगयोग्यां सतीं किं मामुपेक्षस इत्यर्थः SKN.

१३. ०वस्त० D. गन्धारा देशाः Sy.

१४. The passage beginning with गन्धारयो and ending with यथा is omitted by P.

१५. गा० P. तेषां सम्बन्धिनी Sy. गन्धार-देशजातानाम् Dur.

सम्बन्धिनी। अविकेति ।

I.127.

अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम्।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥१॥

अग्निं होतारम्। परुच्छेपो दैवोदासिः।

तत्र शौनक.—

जागतौ प्रथमौ पादौ पादः षष्ठस्तथैव च।
अष्टकास्वितरे पादाः पारुच्छेपे तु प्रायश ॥ इति

अग्निम्।

---

१. अविके० P. अविजातिरिव। तद्देशस्था अवयो मेषा यथा रोमशास्तथाहमस्मि। यद्वा गन्धारीणां गर्भधारिणीना स्त्रीणामविकाऽत्यर्थं तर्पयन्ती योनिरिव। तासामाप्रसवं रोमादिविकर्तनस्य शास्त्रे निषिद्धत्वाद् योनी रोमशा भवत्यतः सोपमीयते Sy. अविकानां मध्ये या सुष्ठु रोमशा भवेत्तथाहमस्मि Dur.

२. यतोऽहमीदृशी, अतो मामप्रौढां माऽवबुध्यस्वेत्यर्थः Sy. निःशङ्को मामुपगच्छेत्यभिप्रायः Dur. गन्धार इत्युत्तरापथे क्वचिद्देशाभिधानम्। अतो गन्धारीणां सम्बन्धिनीति तत्र जाताऽविका, उरणिका, सा ह्यतिशयसूक्ष्मदीर्घघनमृदुरोमा, सेव। अथवा पुंसः सकाशात् स्त्रियाभिगम्यमानत्वाद् गमिति गर्भ उच्यते, गं धारयतीति गर्भिणी स्त्री। अविका इत्यवतेः प्रीत्यर्थस्य, प्रीतिकरत्वादुपस्थ उच्यते। यथा गर्भिणीनामुपस्थो रोमशस्तद्वदित्यर्थः। स हि तासां समाचारो यद् गर्भिण्यः स्त्रियो रोमाणि नोल्लिखन्तीति SKN.; N. 3.20.; SKN. II. 189.
Ms. D. puts the figure ॥१२६॥ here to indicate the end of one hundred and twentysixth hymn. No such number is given by P. and M.

३. पुरु० P. ४. ०दासीः P. ५. Not found in BD. and RPR.

६. 'पुरीषवत्याः पूर्वामतिच्छन्दसं प्राच्यौ पुरीषसहिते भद्रा रातिर्वृत्रतूर्येऽवस्थिराग्नि ॐ होतारमिति, (का० १७।१२।१६) अग्नेः पुरीषमसीति पुरीषशब्दवता मन्त्रेणोपहिता पञ्चम्यसपत्ना पुरीषवती तस्याः पूर्वामतिच्छन्दसमिष्टकामुपदधाति। भद्रा रात्रिर्वृत्रतूर्येऽवस्थिरेति ककुभां चतुश्चतुरक्षरसहितयाग्नि ॐ होतारमित्यृचा। पुरीषवत्यतिच्छन्द इष्टके प्राग्लक्षणे पुरीषयुक्ते च भवतः। अनयोरन्तः पुरीषावापः कार्य इति सूत्रार्थः। अतिच्छन्दा अवसानत्रिकोपेताः। छन्दांसि गायत्र्यादीनि सप्तातिक्रान्तातिच्छन्दाः। चतुष्षष्टयक्षरत्वादष्टिः। ककुभामक्षरैः सहातिधृतिः। यो देवो दानादिगुणयुक्तोऽग्निः Mah. सर्वासां देवसेनानामग्र्यं यज्ञेष्वग्रं नीयमानं वा Sy. अतिच्छन्दा अष्टिरत्यष्टिर्वा। तमहमग्निम् U.

१ २ ३ ४ ५ ६ ७ ८
होतारम्। स्तौमि। दानवन्तम्। वासयितारम्। सहसः। पुत्रम्। जातप्रज्ञम्। ब्राह्मणम्।
९ १० ११ १२ १३ १४
इव। य.। ऊर्ध्वया। देवानञ्चन्त्या। ज्वालया। सुयज्ञो भवति। देवः सः। घृतस्य।

---

१. देवानामाह्वातारम् Mah. अस्मद्यागं प्रति देवानामाह्वातारम्। यद्वा होमनिष्पादकं होतारम् Sy.
जुहोतेर्होतेत्यौर्णवाभः N.7.15. अग्निमद्य होतारमवृणीत TB. 2.6.15.1.

२. मन्ये जानामि Mah. अग्निं होतारं मन्ये। एवं प्रतिविशेषणं मन्य इति सम्बन्धः। यद्वा यागनिष्पत्तेरेवापेक्षितत्वादेतदेव विधेयविशेषणम्। इतराणि वक्ष्यमाणविशेषणानि स्तुतिपराणि Sy. जानामि U. मन्यतिरर्चतिकर्मा, अर्चामि। स्तौमीत्यर्थः SKN.

३. वासृ दाने, वातारम् Mah. अतिशयेन दानवन्तम् Sy. दानवन्तम् U. प्रशस्यं धनवन्तं वा SKN. वातृतमम् Dur.

४. ०सविता० M वासयितारम् Mah, U. सर्वेषां निवासहेतुम् Sy. वसुमिव SKN. वासयितारं सर्वस्य जगतः Dur.

५. सहस्पुत्रम् M. बलस्य Mah., Sy., U., Dur.

६. पुत्रं बलेन मथ्यमानत्वात् Mah. पुत्रम्। अग्निमंन्थनकाले बलेन मथ्यमान उत्पद्यत इति पुत्रत्वमुपचर्यते Sy. पुत्रम् U., SKN., Dur.

७. उत्पन्नप्रज्ञम् ... जातसर्वशास्त्रज्ञानम् Mah. जातानां वेदितारं, जातप्रज्ञं जातबलं वा Sy. जातप्रज्ञानम् U., Dur. जातधनम् SKN. जातवेदाः कस्मात्। जातानि वेद। जातानि वैनं विदुः। जाते जाते विद्यत इति वा। जातविद्यो वा। जातधनः। जातविद्यो वा जातप्रज्ञानः N .7.19.

८. न इवार्थे। विप्रं ब्राह्मणमिव स्थितम् Mah. जातविद्यं मेधाविनं ब्राह्मणमिव। तं यथा बहु मन्यन्ते तथा त्वामपि मन्ये। स्तौमीत्यर्थः Sy. विप्रमिव जातप्रज्ञानम् U. विप्रं न मेधाविनमिव। कम्? सामर्थ्यात् कञ्चिद् ब्राह्मणं जातवेदसं जातविद्यम् SKN. यथा हि कश्चित् कञ्चन मनुष्यं समानपृष्ठोदरपाणिपादं विप्राप्तज्ञानं यथावज्जानीयादेवमहमग्निं यथावज्जाने Dur.

९. उन्नतया Mah. उन्नतया, उत्कृष्टया Sy. ऊर्ध्वया ज्वालया U. अनावृत्तया वैदवानर्या क्रिया। अभिन्नरूपयेत्यर्थः SKN.

१०. देवान्प्रत्यञ्चति गच्छति देवाची तया देवान्प्रति गतया Mah. देवान् पूजयन्त्या देवान्प्रत्यक्तया वा Sy. देवान्प्रत्यञ्चत्या देवान्प्रति गतया U. उत्कृष्टत्वाद्देवान्प्रत्यञ्चितया सुगत्या SKN. कल्पितया...देवान्प्रत्यञ्चितया गत्या Dur.

११. कृपा कृप्यत इति कृप् तया कृप्तया समर्थया Mah. कृपया सामर्थ्यलक्षणया Sy. कृपा कल्पितया U. वा स्तुत्या, तृतीयाश्रुतेः स्तूयमान इति शेषः SKN. सामर्थ्याख्यया Dur. देवान्प्रत्यक्तया कृपा (कृप् कृपतेर्वा कल्पतेर्वा) N. 6.8.

१२. शोभनयज्ञवान् यज्ञं सम्यग् निर्वहन् Sy. साधुयज्ञः U. वैय्यहोतृत्वे वर्तमानत्वादनुष्ठेयतया शोभनोऽध्वरो यस्य सुयज्ञः SKN. शोभनयज्ञः Dur.

१३. यो देवो दानादिगुणयुक्तः Mah. उक्तगुणविशिष्टो यो देवः Sy. यो देवो दानादिगुणयुक्तः U. दानादिगुणः SKN.

१४. विलापनेन दीप्तस्याज्यस्य Sy. घृतस्य Mah., U. आहुत्यर्थस्य SKN.

[1]विभ्रश्यमानज्वालया। अनुकामयते। [2]हूयमानस्य। [3]सरणशीलस्य। [4]अनुपात्तानि पदानि पूरणानि। यास्कस्त्वाह—'अभ्यासे भूयांसमर्थं मन्यन्ते। यथाऽह्नो दर्शनीयाऽह्नो दर्शनीयेति। तत्परुच्छेषस्य [5]शीलमिति[6]।

यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः।
परिज्मानमिव द्यां होतारं चर्षणीनाम्।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥२॥

[7]यजिष्ठं त्वा। [8]यष्टृतमम्। [9]त्वाम्। [10]यजमाना। [11]हुवेम। [12]प्रशस्यम्। [13]अङ्गिरसाम्। [14]प्राज्ञ[15]!

---

१. ०भ्रन्त्यमा० D. विभ्रश्यमानम्। is suggested for विभ्रश्यमान० शोचिषा ज्वालया...विभ्राष्टि विभ्रंशपातम्...शोचिःशब्दस्य स्त्रीत्वमार्षम् Mah. विभ्राष्टि विशेषेण भ्राजमानम् ...तदाज्यं शोचिषा ज्वालया Sy. विभ्रंशपातम्...दीप्त्या U. विभ्रंशम्... ज्वालालक्षणेन जिह्वासमूहेन लेलिह्यमानमित्यर्थः SKN. विभ्रंसनम् Dur.

२. अनुबष्टि अन्विच्छति Mah. अनु स्वयमपि ... बष्टि कामयते, स्वीकरोतीत्यर्थः Sy. अनुकामयते U. 'वश कान्तौ' विधिक्रमेण कामयते SKN. आहुतिप्रक्षेपम्...अनुकामयते Dur.

३. भू (हू) य० M. समन्ताद्धूयमानस्य Mah. आ समन्ताद्धूयमानस्य Sy. आहूयमानस्य U. यथाविधि अन्वाहूयमानस्य SKN. उपरि हूयमानस्यDur.

४. Omitted by P. सर्पिषः सर्पतीति सर्पिस्तस्याग्न्यङ्गेषु प्रसरणशीलस्य Mah. सरणशीलस्य Sy. घृतस्य U. आज्यविशेषणमेतत्। सर्पणस्वभावस्य विलीनस्याधिश्रयणेन संस्कृतस्येत्यर्थः SKN. सर्पणशीलस्य Dur.

५. तमहमग्निं होतारं मन्य इति सम्बन्धः U. यमग्निमहमेवं जाने यश्चैवं गुणयुक्तः स इदं नामास्माकं करोत्वित्यभिप्रायः Dur.

६. दगीनियोहो० P.

७. N.10.42.

८ VM. explains जातवेदसम् once only. This stanza occurs in YV. 15.47.; N.6.8; SKN. II.420.
A fragment देवो देवाच्या कृपा is quoted by Yāska in N.6.8 Both Skanda and Durga quote and explain the stanza in full, *loc. cit.*

९. अतिशयेन यष्टृतमम् Sy.

१०. त्वा M. ११. वयं यष्टारः Sy.

१२. आह्वयामः। यतो वयं यजमाना यतश्च त्वं यजिष्ठोऽतो हुवेमेत्यभिप्रायः Sy.

१३. ज्येष्ठम् Sy.

१४. ०सोः M. अङ्गिरोगोत्रोत्पन्नानां मध्ये ...। यद्वा, अङ्गिरसां मध्ये ज्येष्ठं ज्वालायुक्तत्वात्...'येऽङ्गिरा आसंस्तेऽङ्गिरसोऽभवन्' (AB. 3.34.) इति श्रुतेः Sy.
अङ्गारेष्वङ्गिराः। अङ्गाराः (अङ्गनाः) अञ्चनाः N. 3. 17.

१५. मेधाविन् Sy.

...भिः। मेधाविभिः। दीप्त! परितो गन्तारमिव। आदित्यम्। होतारम्। यजमानानाम्। ज्वालाकेशम्। वर्धितारम्। यम्। इमा.। सर्वविशः स्तोत्रै प्रगच्छन्ति त मदीयाश्च। प्रगच्छन्तु। कामानामाकर्षणार्थमिति।

स हि पुरू चिदोजसा विरुक्मता दीघानो भवति द्रुहंतरः परशुर्न द्रुहंतरः।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम्।
निष्षहमाणो यमते नायते धन्वासहा नायते ॥३॥

स हि पुरू चित्। स। हि। बहु। अपि। विरोचनवता। बलेन। दीप्यमान। भवति। कुठार। इव। दृढम्। अपि। यस्य। सङ्कृतौ। श्रूयते। जलानीव दह्यमानम्। यत्। स्थिर

---

१. प्राज्ञभेः P. प्राज्ञं भिः D. प्राज्ञभिः M. The reading seems to be प्रज्ञाभिः, which will explain मन्मभिः।
मननसाधनैः ... मन्मभिर्मन्त्रैः Sy.

२. विशेषेण प्रीणयितृभिः ... यद्वा विप्रेभिर्मेधाविभिर्ऋत्विग्भिर्मन्मभिर्मन्त्रैश्च सहिता वयमिति सम्बन्धः Sy.

३. ०प्ति D. ०भिर्वि० P.
दीप्तज्वालाग्ने! Sy.

४. त्वदाह्वानानन्तरं परिज्मानं परितो गच्छन्तम् Sy.

५. त्य० P. त्यामिव सूर्यमिव Sy.

६. देवानामाह्वातारम् Sy.

७. मनुष्यनामैतत्। मनुष्याणां यजमानानामर्थे। यद्वा चर्षणीनां पूर्वं मनुष्याणामेव सतां पश्चाद्यागादिसाधनेन देवत्वमापन्नानां देवानामाह्वातारम् Sy.

८. केशवदत्यन्तायतज्वालोपेतम् Sy.

९. Omitted by P.D. एवंरूपं यं त्वाम् Sy.

१०. विशस्त्वामेव निविशमाना इमा विशो यजमानरूपाः प्रजाः Sy.

११. प्रा० P. प्रावन्तु प्रकर्षेण प्रीणयन्तु Sy.

१२. जूतये स्वर्गाद्यभिमतफलप्राप्तये...तादृशं त्वा हुवेमेति सम्बन्धः Sy. VM. explains मन्मभिः। विशः once only

१३. पुरु P D.

१४. एव। पूर्वं स्तुत एवाग्निः Sy.

१५. अत्यधिकमेव Sy. १६. ०चनता P.D. चनवात M. विशेषेण रोचनवता Sy.

१७. ओजसा ज्वालारूपेण बलेन Sy.

१८. द्रुहन्तरो द्रोग्धृणां तरिता निवारयिता भवति। अस्मासु द्रोहं कुर्वतां शत्रूणां हिंसको भवतीत्यर्थः Sy.

१९. तत्र दृष्टान्तः। द्रुहन्तरो द्रोग्धृणां छेदनाय प्रयुक्तः...परशुरिव। स यथाऽमोघं हिनस्ति तथायमपि Sy.

२०. पाषाणादिकम्...वीड्विति दृढनाम। 'बीळु च्यौत्नम्' (Ngh. 2.9.) इति तन्नामसु पाठात् Sy. २१. संयोगे Sy.

२२. गच्छेत्। शीर्यते Sy. २३. ०नीवD. तत्र दृष्टान्तः। वनेव उदकमिव। उदकं यथाग्निसंयोगे शुष्यति तथेत्यर्थः Sy.

२४. यच्च पर्वतादि स्थिरमचलितं तदपि भवत् ... अत्यन्तदृढं स्थिरमपि हिनस्ति, अस्मद्द्रोग्धारं शत्रुं हिनस्तीति किमु वक्तव्यमित्यभिप्रायः Sy.

भवति। सोऽयमभिभवन्[१] दोग्धून्[२]। नियच्छति[३]। नच[४]। तेभ्यो गच्छति[५]। धनुषाऽभिभवन्[६] शत्रून्[७]। न। पलायते[८]।

दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दधृष्वसेऽग्नये दाधृष्वसे।
प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥४॥

दृढा चिदस्मै[९]। सारवन्ति। अप्यन्नानि[१०]। अस्मै[११]। अनु। दु[१२]। यथा। अतिथये विदुषे[१३]। दीप्ततरै[१४] सह। अस्मा अग्नये। हवि प्रयच्छति। रक्षणाय[१५]। य। पुरूण्यपि बलानि। प्रगाहते[१६]। तनूकरोति[१७] च। वृक्षानिव। तेजसा। स स्थिराणि[१८]। अपि। आत्मनोऽन्नानि[१९] काष्ठादीनि[२०]। विनाशयति[२१]।

---

१. अयमग्निः Sy.
२. निःशेषेणाभिभवन् Sy.
३. यो P. शत्रून् Sy.
४. नियति P. उपरमते शत्रुषु मध्ये क्रीडति तानेव नाशयति Sy.
५. तथा कुर्वन्नायते न गच्छति, शत्रोः सकाशान्न पलायते Sy.
६. तत्र दृष्टान्तः . . . धनुषा शत्रूनभिभवतीति धन्वसहा धानुष्कः। . . . स यथा शत्रोरभिमुखं विध्यति न पलायते तद्वदित्यर्थः। यद्वा दृढधनुर्बंहनक्षमो धन्वसहः। अस्मिन्पक्षे पचाद्यच्। . . . दृढधन्वा सन् Sy. ७. नायते न चलति Sy.
८. VM. ignores बृहंतरः। बृहंतरः।
९. अपि omitted by P. D. दृळ्हान्येव सारवन्ति हवींषि Sy
१०. अग्नये Sy. ११. अनुक्रमेण प्रतिमन्त्रं . . . ददति . . . यजमाना ददति Sy.
१२. अनुर्यथा० P.D.M.
१३. ०दितये M.
१४. दाने दृष्टान्तः। यथा . . . विदुषे परमार्थदर्शिन उत्कृष्टानि धनानि वितरन्ति दानशीलाः। यद्वाऽयमग्निर्यथा विदे विन्दते स्वातिरिक्तं हविर्देवेभ्यो दातुं लभते स्वीकरोति तथा दुरिति Sy.
१५. तेजिष्ठाभिररणिभिरत्यन्ततेजोयुक्तैर्मार्गैर्यज्ञादिरूपैर्दर्शिष्ट पूजितः सन्स्वर्गादिकं . . . यद्वा तेजिष्ठाभिरतिशयेन तेजोवद्भिररणिभिर्गमनैः Sy.
१६. दीप्तस्सेहास्मान् P. दीप्तस्सहास्मान् D. १७. ददाति Sy.
१८. अवसे तद्रक्षणाय इतरदेवानुद्दिश्य यजमानेन दत्तं हविरवसे तेषां स्वीकाराय दाष्टि। अयमग्निर्ददाति नयति। किञ्चाग्नय इतरदेवताप्रदानसमयेऽपि यजमानोऽग्नयेऽग्निप्रीतये दाष्टि प्रथमं ददाति। किमर्थम्। अवसे रक्षणार्थम्। यद्ययमतृप्तः स्यादितरेभ्यो दत्तमपि स्वयं स्वीकुर्यात् तस्मादग्नये प्रयाजादिरूपेण ददातीत्यर्थः Sy. १९. योऽग्निः Sy.
२०. बहूनि सामर्थ्याद्यजमानधनादीनि Sy.
२१. प्रविशति Sy.
२२. प्रविश्य च वाय्वादिरूपया ज्वालया . . . तनूकरोति नाशयतीत्यर्थः Sy.
२३. तत्र दृष्टान्तः. . . वृक्षादिसमूहानि वनानि यथा प्रविश्य तक्षति दहति तथेत्यर्थः Sy.
२४. ओजसा तेजोरूपया ज्वालया Sy.
२५. स्थिराणि कठिनानि Sy.
२६. अन्नानि व्रीह्यादीनि Sy.
२७. नितरां रिणाति गच्छति पचतीत्यर्थः Sy.

बलेन। प्रकारान्तरेणाह—नि। स्थिराणीति।

तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात्।
आदस्यायुर्प्रमोषवद्वीळु शर्म न सूनवे।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥५॥

तमस्य पृक्षम्। तत्। अन्नम्। अस्य। ग्रावसु। निधीमहि। रात्रौ। यः। सुदर्शतरो भवति। अह्नोऽपि। अप्रगच्छतो विरम्याभिधानात्समन्वयश्चतुर्थ्या। अनन्तरम्। अस्य। अन्नम्। स्तोतृभ्यो ग्रहणवद्भवति। दृढम्। इव। गृह पितृस्वभूतम्। सूनवे यथा पित्र्य गृह पुत्रो भजत एवमन्नमग्नेः स्तोतार। भजनीय पुरोडाशादिकम्। अभजनीय काष्ठादिकञ्च। अन्नम्। खादन्त।

---

१. स्वकीयेन तेजसा Sy.
२. स्थिराण्यपरिहरणीयानि पापान्यमित्राणि वा नि रिणाति निःशेषेण गच्छति नाशयतीत्यर्थः Sy.
३. VM. ignores अरणिभिः and explains दाष्टि। अवसे। चित्। once only.
४. वृ० P.D.
५. हविर्लक्षणमन्नम् Sy.
६. अस्मै Sy.
७ उपरमन्तेऽस्मिन्हवींषीत्युपरा वेदिसमीपभूमयस्तासु Sy.
८. धारयामः ... अतोऽस्मै धीमहि Sy.
९. कः P. ... अग्निः Sy.
१०. अत्यर्थं सर्वैर्दर्शनीयो भवति। यतोऽयं रात्रौ सर्वेषु भावेषु तमसावृतत्वाददृश्यमानेष्वपि स्वयमत्यर्थं प्रकाशते Sy.
११. प्रगतमायुर्यस्यासौ प्रायुः, न प्रायुरप्रायुस्तस्मै। "असौ योऽस्तमेति स सर्वेषां भूतानां प्राणानादायास्तमेति" (TA. 1. 14.) इति श्रुतेः। रात्रौ सर्वे भावा निद्रया आवृतत्वात्प्रायुष इव भवन्ति। अयमग्निस्तु सर्वप्राणिप्राणापहर्तुः सूर्यस्य रात्रौ स्वस्मिन्नेव प्रवेशात्प्रकृष्टायुर्भवति, अतोऽपि धीमहि Sy.
१२. आत् अत एव कारणाद्यतोऽयं सुदर्शतरो यतश्चायमप्रायुरतः कारणात् Sy.
१३. अस्मै Sy.
१४. आयुर्हविर्लक्षणमन्नम् Sy.
१५. विरम्य ... स्तो० M.
१६. ग्रहणयुक्तमभूत् Sy.
१७. दृढं सुखसाधनम् Sy.
१८. दृढमिव ... भूतं M. पित्रोः ... शर्म ...गृहं यथा ग्रहणवद्भवति तथेत्यर्थः। शर्मेति गृहनाम, 'शर्म वर्म' (Ngh. 3. 4.) इति तन्नामसु पाठात् Sy.
१९. सूनवे पुत्राय Sy.
२०. इदानीमाहवनीयाविरूपेणाग्नेर्बहुत्वमपेक्ष्याह ... भक्त सेवमानम् Sy.
२१. अभक्तमसेवमानञ्च, व्यन्त एते प्राणिनोऽनुग्राह्या इति बुध्यमाना अवः रक्षन्ति Sy.
२२. यद्यपि विशेषेण प्राणिनो वाहपाकादिद्वारा रक्षन्ति तथाप्यस्ति यजमानेष्वतिशय इत्याह ... तैः प्रस्तं हविः Sy.
२३. च... खादयन्त्यः M. खादयन्त्यः P.D. अश्नन्तः Sy.

अजरा[1] भवन्ति। अग्नयः[2]।

स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः।
आदद्धव्यान्यादित्यज्ञस्य केतुरर्हणा।
अधा स्मास्य हर्षतो हर्षीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् ॥६॥

स हि शर्धो न।[3] स[4]। हि। मारुतम्[5]। इव। शर्ध[6]। बहुशब्द। कर्मवतीषु[7]। यज्ञभूमिषु[8]। अन्वेषणीय[9]। आर्तिष्वपि[10]। भक्षयति[11]। हवींषि। आदानशील[12]। यज्ञस्य[13]। ध्वजभूत[14]। पूजनीय। अथ। अस्य। हृष्यत[15]। हर्षवन्त[16]। सर्व एव मनुष्या[17]। गमनमार्गम्[18]। सेवन्ते[19]। यथा। श्लाघार्थम्[20]। युवान[21]। पन्थानमलङ्कृता सेवन्ते प्रकाशम्[22]।

---

१. स्वयं हविषाऽजराः सन्तो यजमानानप्यजरान्कुर्वन्तीत्यर्थः Sy.

२. VM. does not explain दिवातरात्। व्यन्तः। अजराः। a second time

३. स एव स्तुत्यतया प्रसिद्ध एवाग्निः Sy.

४. मरुत्सम्बन्धि Sy.

५. शब्दे अर्था M. ध्वनने वृष्टान्तः... बलमिव। मरुतां समूहो यथा ध्वनयति तथेत्यर्थः Sy.

६. तुवि इति बहुनाम। 'उरु तुवि' (Ngh. 3. 1.) इति तन्नामसु पाठात्। बहुस्वनिः प्रभूतध्वनियुक्तो वर्तते। अत्यन्तज्वलितेऽग्नौ वायुसम्पर्काद् भुग्भुगिति ध्वनिरुत्पद्यते ज्वलतीत्यर्थः Sy.

७. खननप्रोक्षणादिकर्मोपेतासु। अप्न इति कर्मनाम। 'अप्नः दंसः' (Ngh. 2. 1.) इति तन्नामसु पाठात् Sy.

८. यमिभू० M. उत्तरणयुक्तासु श्रेष्ठासु वेदिभूमिषु Sy.

९. यष्टव्यः Sy.

१०. आर्तान्करोत्यार्तयति। आर्तयन्तीत्यार्तनाः पूतनास्तासु ... । तासां जयाय ... एष्टव्यो यष्टव्यो वा Sy.

११. एवं स्वनयन्नग्निः ... आदत् अत्ति भक्षयति ... यद्वा। आङ्पूर्वाद् ददातेः Sy.

१२. हव्यान्याज्यपुरोडाशादीनि Sy.

१३. ०दन० P. आदत्तिः सर्वत्र हविरादानशीलः Sy.

१४. केतुः प्रज्ञापकः केतुस्थानीयो वा Sy.

१५. हविर्भक्षणावत्यन्तहर्षयुक्तस्य। यद्वाऽभिमतफलदानेन यजमानान्हर्षयतः Sy.

१६. Missing in M. आज्यस्वीकारेण हर्षयुक्तस्याग्नेः Sy.

१७. पन्थानं मार्गम् Sy.

१८. अप्रीणयन्। असेवन्त वा Sy.

१९. शुभाय शोभनाय सुखप्राप्तये Sy.

२०. नरो मनुष्याः Sy.

२१. पन्थानं सर्वैर्गन्तव्यमैहिकामुष्मिकफलस्याग्नेरेव मार्गम् Sy.

२२. सर्वेऽनुगच्छन्ति। अग्निमेव प्रीणयित्वा साधयन्ति ... यथा लोके ... पन्थानं सर्वैर्गन्तव्यं निर्भयं प्रौढमार्गमिव Sy.

२३. VM. ignores स्म and explains इष्टनिः once only.

द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त
उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः ।
अग्निरीशे वसूनां शुचिर्यो धरुणरेषाम् ।
प्रियाँ अपिधौवनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥७॥

द्विता यदीम्। द्विधा। यदा। एनमग्निम्। मेधाविन। अभिगतदीप्तय। पूजयन्त। उपेत्यास्तुवन्। भृगव। अरण्योर्हविर्वहनार्थम्। मथ्नन्तस्तदानी भृगूणाम्। अग्नि। धनानाम्। ईश्वर आसीत्। य.। एषाम्। धारक आसीत्। शुचि स इदानीम्। प्रियात्मनि ?। अपिधीयमानान् पुरोडाशादीन्। आभिमुख्येन। भजनाम्। यज्ञिय।

विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दम्पतिं भुजे सत्यगिर्वाहसं भुजे ।
अतिथिं मानुषाणां पितुर्न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥८॥

विश्वासां त्वा। सर्वेषाम्। मनुष्याणाम्। पतिम्। त्वा। हवामहे। सर्वेषामेव विशाम्।

---

१. द्वित्वमापन्नं द्विप्रकार श्रौतस्मार्तभेदेन द्वित्वमापन्नम्। यद्वोपलक्षणमेतत्। आहवनीयादिरूपेण नानाविधम्। यद्वा द्विता द्विविधायैहिकामुष्मिकफलायोभयाय Sy.
२. यम् Sy. ३. यधेनमग्निः P. मग्निः M. इममग्निम् Sy. ४. कीर्तन कुर्वन्तः स्तोतारः Sy. ५. ०विभिर्गतः P. अभितो द्योतमानाः Sy.
६. नमस्कारोपलक्षितमुपस्थानं कुर्वन्तः Sy.
७. उपेत्य ब्रुवन्ति Sy. ८. ०स्तुवन्... वो M. भृगुगोत्रोत्पन्ना महर्षयः Sy.
९ ०ण्यो P. अरण्याम् Sy. १०. ०वना० P. दानेन निमित्तभूतेन हविर्वानार्थम् Sy. ११. अग्निमन्थनं कुर्वन्तः Sy.
१२. भृगवो भ्रष्टारो हविषां पापानां वा Sy.
१३. वसूनां हविर्लक्षणानाम् Sy.
१४. ईष्टे समर्थो भवति ... । यद्वैषां दृश्यमानानां मणिमुक्तादीनां वसूनामीश ईष्टे समर्थो भवति प्रदातुमिति शेषः Sy. १५. दीयमानानाम् Sy.
१६. धारणकुशलः Sy १७. दीप्तः Sy.
१८. प्रियान् स्वप्रीतिहेतूनाज्यादीन् Sy. प्रियात्मनः is suggested for प्रियात्मनि
१९. अविधी० M. पर्याप्तिपर्यन्तं दत्तान् Sy.
२०. सम्भक्तवान्। सम्भजतां वा Sy.
२१. य....M. मेधो यज्ञस्तद्वान् स्वयं यष्टव्यत्वेन प्रधानभूतः सन्। ...मेधावानसौ ...अन्यदेवताकेष्वपि यज्ञेषु स्वयमाज्यभागप्रयाजादिरूपं हविः सम्भजते Sy.
२२. VM. explains भृगवः। वनिषीष्ट। मेधिरः once only.
२३. त्वां P. २४. सर्वासाम् Sy.
२५. विशां प्रजानां यजमानानाम् Sy.
२६. पतिम्, अभिमतफलप्रदानेन पालकम् Sy.
२७. आह्वयामः Sy. २८. न केवलं यजमानानां किन्तु सर्वासां प्रजानाम् Sy. सर्वासामेव is suggested for सर्वेषामेव as it qualifies विशाम् fem.

साधारणम्[१]। गृहपतिम्[२]। आत्मनो भोजनाय[३]। सत्याः[४] स्तोतृगिरो[५] यस्य[६] वोढव्याः[७]। मनुष्याणाम्[८]। अतिथिम्[९]। पितुः[१०]। इव। सर्वेषां रक्षकस्य यस्य। आस्येन[११]। सर्व एव। मनुष्या भुञ्जते[१२]। देवाः[१३]। च। हव्यानि[१४] हि। देवेषु। अन्नमाभोज्यम्[११]। अन्नानि चाग्नौ हूयन्ते[१६] यथा पितुर्धनं पुत्रा आददते[१७]। एवं यस्यास्येनाददते देवा.। मनुष्याणामन्नमिति[१८]।

त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः।
अधा स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥६॥

त्वमग्ने सहसा। त्वम्। अग्ने! बलेन। अभिभवितृतम.[१९]। शोषयितृतम[२०]। अरण्योर्जायसे[२१]। यज्ञार्थम्[२२]। धनम्[२३]। इव। तव। हि। सोमजनितो मद[२४]। शोषयितृतम[२५]। प्रज्ञा[२६]। च।

---

१. समानमेकरूपं, दहनपचनाद्युपकारस्य सर्वेषां समत्वात् Sy.
२. गार्हपत्याविरूपेण गृहस्य पालकम्। दम इति गृहनाम। 'दमे कृत्तिः' (Ngh.3.4.)इति तन्नामसु पाठात् Sy.
३. भुजे भोगाय हवामह आह्वयाम Sy.
४. यथार्थभूतानामविसंवादिफलानाम् Sy.
५. स्तुतिरूपाणां गिरा वोढारम्। यद्वा गिरो मन्त्ररूपा वहन्तीति गिर्वाहस ऋत्विजः। सत्या अविसंवादिफला गिर्वाहसो यस्य तं तादृशं हवामह इति शेषः Sy.
६. Omitted by D.
७. वोढया P. पाढ्य D.
८. थि० P. अतिथिमतिथिवत्पूज्यं दर्शादितिथिमपेक्ष्यागन्तारं वा Sy.
९. तत्र दृष्टान्तः। ... पितुरन्तिके पुत्रादयो यथाऽन्नाद्यर्थं सेवन्ते तद्वत् Sy.
१०. विश्वासां त्वा ... रिव M.
११. आसया समीपे। आसेत्यन्तिकनाम, 'आसा अम्बरम्' (Ngh. 2. 16.) इति तन्नामसु पाठात् Sy. १२. भञ्जते M.
१३. हविर्भोक्तृत्वेन प्रसिद्धाः सर्वे देवा अपि, आ आगच्छन्ति। उपसर्गवशाद् योग्यक्रियाध्याहारः Sy.
१४. वयो हविर्लक्षणान्नमुद्दिश्य, अग्निमुखादेवेतरेभ्यो दीयमानत्वात्। ... किञ्च वयो नेतार ऋत्विजोऽपि। देवेष्वितरेष्विज्यमानेषु मध्ये हव्या हवींषि, आवदत्यग्नये Sy. १५. ०ज्यन्ना० M.
१६. तथा P.D.M. १७. ०न द० P.
१८. VM. explains भुजे once only.
१९. अतिशयेन शत्रूणामभिभविता Sy.
२०. अतिशयेन तेजस्वी Sy.
२१. यद्वोक्तगुणविशिष्टः स जायसे। अरण्योरुत्पद्यसे Sy.
२२. देवानां विस्तारयुक्ताय यागाय तदर्थम्। यज्ञनामैतत् Sy. २३. यज्ञार्थत्वे दृष्टान्तः... धनं यथा यज्ञार्थमुत्पद्यते। तथा चोक्तं 'यज्ञार्थं द्रव्यमुत्पन्नम्' इति Sy.
२४. ०र्थनमिव M.
२५. हिशब्दः प्रसिद्धौ Sy.
२६. आज्यस्वीकारजनितो हर्षः।... आज्येनाग्नेर्मदो भवतीति प्रसिद्धम् Sy.
२७. अतिशयेन बलवान् Sy.
२८. कर्मविशेषोऽपि Sy.

अतिशयेन दीप्तिमती[1]। तस्मात्[2]। त्वाम्। परिचरन्ति[3]। जरावर्जित[4]! क्षिप्रं व्याप्नुवन्तो दासाः[5]। इव[6]।

प्र वो॑ म॒हे सह॑सा सहस्वत उप॒बुधे॑ पशु॒षे नाग्नये॒ स्तोमो॑ बभूत्व॒ग्नये॑।
प्रति॒ यदीं॑ ह॒विष्मा॒न्विश्वा॑सु॒ क्षासु॑ जो॒गुवे॑।
अग्ने॑ रे॒भो न ज॑रत ऋ॒षूणां॑ जू॒र्णिर्होता॑ ऋ॒षूणा॑म् ॥१०॥

प्र वो महे[7]। प्रभवतु[8]। युष्माकम्[9]। स्तोम[10]। महते[11]। बलेन[12]। तन्वते[13]। अग्निहोत्रार्थ-मुषसि[14] प्रबुध्यमानाय[15]। पशूना दात्रे उदाराय[16]। इव[17]। अग्नये[18]। यदा[19]। एनम्[20]। आसादितहविष्क सन्[21]। दार्शिकीषु[22] पाशुकीषु[23] सौमिकीषु[24] च[25]। वेदिषु[26]। प्रतिगच्छन्ति[27] तदानीम्[28]। पश्यता[29] मनुष्याणाम्[30]। अग्रत[31] एनम्[32]। वन्दी[33]। इव[34]। स्तौति[35]। स्तुतिकुशल[36]। होता[37]।

---

१. यशोयुक्तोऽग्नियुक्तो वा खलु Sy. द्युम्नं द्योततेः। यशो वान्नं वा N. 5.5.
२. अध अतः कारणात् Sy.
३. परिचरन्ति यजमानाः Sy.
४. ०जिता० D. हे जरारहिताग्ने।... अजर भक्तानामजरयितः।... यद्वा। अजर अस्तोतः। जरा स्तुतिः। असौ न कस्यापि स्तोता भवति किन्तु सर्वैः स्वयं स्तूयते Sy. ५. ते यथा वार्ता-विशेषप्रदानेन राजानं सेवन्ते तद्वत् Sy.
६. VM. ignores स्म and explains देवतातये। अजर once only.
७. ०त M. प्रीणयितुं समर्थं भवतु Sy.
८. हे उद्गात्राद्वयः स्तोतारो वो युष्माकं सम्बन्धि Sy. ९. स्तोत्रम् Sy.
१०. पूज्याय Sy.
११. सहसा पराभिभवसामर्थ्येन तद्वते Sy. तद्वते is suggested for तन्वते
१२. उषःकाले Sy.
१३. पशुफलप्रदाय।... यद्वा पशुषे पशुप्रदात्रे प्रभवे यथा स्तुतिः क्रियते तद्वत् Sy.
१४. नशब्दोऽत्रापिशब्दार्थः Sy.
१५. उदारायोग्रवेय P.
१६. यवेन० D. अग्निं प्रति लक्षीकृत्य Sy.
१७. घृतादिहविर्युक्तो यजमानः Sy.
१८. वाशि० P. वाशी० D.
१९. वाकीषु P. पाकीषुD. वाशुकीषु वा M.
२०. सौम० P.D.
२१. Omitted by P D.
२२. सर्वासु निवासभूतासु वेदिभूमिषु ... क्षेति भूनाम। 'क्षा क्षामा' (Ngh. 1.1.) इति तन्नामसु पाठात् Sy.
२३. अत्यर्थं गच्छन्ति Sy.
२४. अप० M. आगन्तृणाम्। देवानां मध्ये श्रेष्ठमग्निम् ... यद्वा ऋषूणामित्यै-तद्धोतृविशेषणम्। ऋषूणां ज्ञानवता मध्ये श्रेष्ठोऽयं होतेत्यर्थः Sy.
२५. देवानां मध्ये Sy.
२६. इतरदेवेभ्यः पूर्वम् Sy.
२७. श्रेष्ठमग्निम् Sy.
२८. ब० D. ऋषूणां महतां धनवतामग्रे वन्दीव Sy.
२९. वन्दी(न्दि)वत् M.
३०. Missing in M.
३१. VM. explains अग्नये। ऋषूणाम् once only.

स नो नेदिष्ठं दृशान आ भराग्ने देवेभिः
सचनाः सुचेतुना महो रायः सुचेतुना ।
महिं शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।
महिं स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा ॥११॥

स नो नेविष्ठम् । स. । अस्मभ्यम् । अन्तिकतमम् । दृश्यमानः । आभर । अग्ने ! देवैः सहाय । त्वं सर्वमनुष्यसाधारणाग्नो भवसि । शोभनप्रज्ञानेन तेजसाऽऽभरेति । महत । धनस्य नेदिष्ठम् । सुचेतुना तेजसाऽऽहृत्य । महत् तद् धनम् । बलवत्तम ! अस्मभ्यम् । कुरु । समाश्रितानां सन्दर्शनाय च । अस्यै । त्वं धनवन् ! स्तोतृभ्य । महत् । शोभनवीर्यम् । पृथक् कर्ता भवस्यात्मीयाद् धनात् । यथा । उग्रो नाम वहननवृत्ति । वर्धस्य शिरो बलेन पृथक् करोति ।

---

१. स त्वम् Sy.
२. ०कम D. अत्यन्तसमीपे Sy.
३. वेद्यां ददृशानो दीप्तत्वेन दृश्यमानः Sy.
४. अस्माकमाहर Sy. ५. ०स्त्वा P. इतरैर्देवैः समानान्नः । अग्निमुखेनैवेतरेषा हविःस्वीकारात् समानान्नत्वम् Sy.
६. ०ष्यासाधारणा नो P. ०णा नो D. ०ण नो नो M. ७. शोभनेन चेतनेन चेतसा वा । पुनस्तदेव विशेष्यते । सुचेतुना शोभनचेतोवता मया । ... त्वदायत्ते मय्यनुग्रहयुक्तेनेत्यर्थः Sy.
८. ०ता P.D. महः पूजनीयानि Sy.
९. सुचे ... हृत्य M. १०. महवन्नं महतीं कीर्तिं वा Sy. ११. तत्तद् M.
१२. कुरु सम्पादय । शविष्ठेति सम्बोधितत्वात्तदेव प्राप्यंत इति गम्यते Sy.
१३. सम्यग्दर्शनीयत्वाय । ... यद्वा सञ्चक्षे भुज इति सामानाधिकरण्यम् । सम्यग्दर्शनीयाय भोगायेत्यर्थः Sy.
१४. अस्मै P.D.M. अस्याः पृथिव्याः सम्बन्धिने भुजे भोगाय Sy.
१५. अन्नवन् ! Sy.
१६. त्वद्धनवंस्तो० D. ०वंस्तो० P. न केवलं यजमानेभ्योऽस्मभ्यमेवापि तु स्तोतृभ्यः स्तोत्रकर्तृभ्योऽपि Sy.
१७. सुवीर्यं शोभनपुत्रभृत्याद्युपेतं धनं, शोभनसामर्थ्यं वा Sy.
१८. शवसा बलेन युक्तः सन् मथीरस्मद्विरोधिनो नाशय । ... यद्वा मथीर्मथनवांस्त्वमस्मदर्थं शवसा बलेन युक्तो भवेति शेषः Sy. १९. भव, अस्या० is suggested for भवस्या०
२०. स्मीया धनाग्रथो P. यथा कश्चित्क्रूरः Sy. २१. अ is elided: वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
२२. ०त्तिवंद्धस्य P. वध्यस्य is suggested for वर्धस्य ।
२३. शिरः । बलेन is missing in M. शवसा बलेन Sy.
२४. मथीर्भवति तद्वत् Sy.
२५. VM. ignores भुजे ।
२६. Ms. D. puts the figure ॥१२७॥ here to indicate the end of one hundred and twentyseventh hymn. No such number is given in P. and M.

I.128.

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनु व्रतम् ।
विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते ।
अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे ॥१॥

अयं जायत । अयम् । अजायत । मनुष्यस्य । धारके यज्ञे । होता । यष्टृतमः । ऋत्विक्कर्म । लक्षीकृत्य । मथनाख्य स्वम् । कर्म यागनिर्वृत्तिरूप च । लक्षीकृत्य । विश्वसुख । सखित्वमिच्छते । धनमिव । अन्नमिच्छते । अहिंसित । होता । निषीदति । इडायाः पद उत्तरवेद्यामुत्तरनाभौ । परिवेष्टित ऋत्विग्भि ।

तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता ।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति ।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥२॥

तं यज्ञसाधम् । तम् । यज्ञस्य साधयितारम् । अपि । सेवामहे । यज्ञस्य ।

---

१. अग्निः Sy.
२. अरणिमन्थनेनोत्पन्नः Sy.
३. अध्वर्योः सकाशात् Sy.
४. सारभूते स्थाने वेदिरूपे । 'वेदिमाहुः परमन्तं पृथिव्याः' (TS.7 4 18.2.) इति श्रुतेः । 'एतावती वै पृथिवी यावती वेदिः' (TS. 2.6.4.1.) इति च Sy.
५. देवानामाह्वाता Sy.
६. ०त M. अतिशयेन यष्टृतमः Sy.
७. कर्म omitted by M. उशिजां फलस्य कामयितृणां यजमानानां व्रत सोमयागादिरूपं कर्म, अनु लक्षीकृत्य Sy.
८. न केवलं परार्थमेवापि स्वयमर्थः । स्वं व्रतं . . . स्वकीयं हविःस्वीकारादिरूपं कर्म Sy. ९. विश्वविषयकर्मवान् Sy.
१०. सुखितमि० M. ०च्छत P. सखित्वमात्मन इच्छते Sy.
११. धनस्थानीयो भवति । धनं यथा सत्यमन्नसमृद्धिं च साधयति तद्वदयमग्निरपि तस्मै द्वयं साधयतीत्यर्थः Sy. १२. अतिप्रसिद्धान्नमात्मन इच्छते यजमानाय Sy.
१३ अदब्धः केनाप्यहिंसितः Sy.
१४. होमनिष्पादकः Sy.
१५ इडाया भूम्याः पदे । . . . पुनस्तदेव विशेष्यते । . . . इडादेवताया मनोः पुत्र्या गोरूपाया इडोपह्वानमन्त्रप्रतिपादितायाः पदे पादन्यासप्रदेशे । 'इडा वै मानवी यज्ञानूकाशिन्यासीत्' (TB. 1.1.4.4.) इति । 'इडायाः पदे घृतवति स्वाहा' (TS. 1.2.5.1.) इति च श्रुतेः Sy.
१६. ऋत्विग्भिः परिधिभिर्वा परितो वेष्टितः Sy. १७. VM. ignores अग्निः and one इळस्पदे ।
१८. अग्निं वेद्यां स्थापितम् Sy.
१९. यज्ञ P. यज्ञस्य साधकम् Sy.
२०. अपिः सम्भावनार्थः Sy.
२१. आ परितोषं सेवामहे । 'वात गतिसुखसेवनयोः' Sy.

मार्गेण[1] तीर्थेन। हविर्युक्तेन[2] च। नमस्कारेण[3]। यज्ञे[4]। सः। अस्माकम्[5]। हविषाम्[6]। उपाहरणे[7]। अनया। दीप्त्या[8]। न[9]। जीर्णो भवत्या यज्ञसमाप्तेः[10] प्रवर्त्तमानदीप्तिर्भवति। यम्। देवम्[12]। मातरिश्वा[13]। मनवे[14] राज्ञे पुरा। दूरात्[15]। उद्भृतवान्[16]।

एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्धयद्रेतः कनिक्रदत्।
शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥३॥

एवेन[18] सद्यः[19]। गमनशीलेन तेजसा। व[19]?। तृणगुल्मादिकम्[20]। परिगच्छति[21]। मुहुरुद्गिरति[22]। उदकम्[23]। वर्षिता[24]। शब्दं कुर्वन्[25]। धारयन्[26]। उदकम्[27]। बहूनपि वृक्षान्। तेजोभिः[28]। पश्यन्[29]।

---

१. यागस्य मार्गेण यागानुष्ठानेन। . . . यज्ञेन देवस्य महती प्रीतिर्भवति। यद्वा ऋतस्य यज्ञस्य पथा। मार्गस्तीर्थाख्यः। . . . तेन मार्गेण गत्वा Sy.

२. आज्यादिप्रदेयद्रव्यवता Sy.

३. नमस्कारोपलक्षितस्तोत्रेणोपस्थानेन वा। तदुभयेनेत्यर्थः Sy.

४. हविष्मता हविष्मति, आज्यपुरोडाशादिबहुहविर्युक्ते . . . देवानां विस्तारयुक्ते यज्ञे Sy.

५. सोमास्मा० P.D.
अस्मत्सम्बन्धिनाम् Sy.

६. हविर्लक्षणानामन्नानाम् Sy.

७. ०पाकर० M. तत्स्वीकारविषये Sy.

८. सामर्थ्यलक्षणया कल्पनया हविःस्वीकरणरूपया Sy.

९. न नश्यति। अजरो वर्तत इत्यर्थः Sy.

१०. यज्ञसमाप्तिपर्यन्तम् Sy.

११. व० P.

१२. देवा P. D. M.
द्योतनशीलम् Sy.

१३. अन्तरिक्षसञ्चारी वायुः Sy.

१४. नमवे P. D. M.
मनोरर्थाय Sy.

१५. परावतः, अतिदूरं गतवत आदित्यात् Sy.

१६. उत् omitted by M. भाः, अभासीत्। औचित्येन भूमौ स्थापितवानित्यर्थः। तद्वत् परावतो दूरादेवमग्निमस्मद्देवयजनं प्रति स्थापयत्वित्यर्थः Sy.

१७. VM. explains हविष्मता and परावतः once only.

१८. एवेन गमनसाधनेन गमनेन वा Sy.

१९. वा P. सद्योऽस्मदाह्वानानन्तरम् Sy.

२०. ०गुल्मादि० P. ०गुन्मा० D. पृथिवीसम्बन्धि स्थानं वेदिलक्षणमेव Sy.

२१. परि परितः। यद्वा। अनर्थक आभिमुख्यार्थो वा परि। एति गच्छति Sy.

२२. मुहुर्गीः सर्वदा गीयमानः Sy.

२३. रेतःशब्देन तत्कार्यं हवीरूपमन्नमुच्यते। तद्वान् Sy.

२४. ०तार P. कामानां वर्षिता Sy.

२५. शब्दयन् पर्येति Sy.

२६. दधानः Sy.

२७. आज्यादिस्वीकारेणात्यधिकं सामर्थ्यम् Sy.

२८. अक्षस्थानीयाभिर्ज्वालाभिः Sy.

२९. सर्वतः प्रकाशमानः। यद्वा ज्वालोत्कर्षेण यजमानेन कृतं शतगुणितं प्रख्यापयन् Sy.

[1]षु। देवः। [2]क्षिप्रं सम्भक्ता। स्वानम्। [3]दधान। शिलासु। [4]समुच्छ्रितासु। अग्निः। पर्वतस्यो-[5]त्[6]भवासु।

सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति।
त्वां वेधा ईषूयते विश्वा जातानि पस्पशे।
तो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥४॥

स सुक्रतुः। स। सुप्रज्ञ। [7]पुरोहित। [8]यज्ञे यज्ञे। [9]अग्नि। [10]यज्ञम्। [11]अहिंसितम्। [12]जानाति। [13]प्रज्ञया। [14]कर्मणा। [15]प्राज्ञ.। [16]अन्नमिच्छते। विश्वान्येव। जानानि। [17]बध्नाति। [18]स्माद् यजमानात्। [19]घृतस्य श्रयिता। [20]अतिथिः। [21]अजायत। [22]हविषा वोढा। [23]कर्मणा कर्ता तस्मै [24]जमानायेति।

---

१. सम्भजनेषु स्तोत्रेषु निमित्तभूतेषु Sy.
२. क्षि P. शीघ्रगन्ता शत्रूणां हिंसको वा Sy. तुर्वणिस्तूर्णवनिः N.6.14.
३. धारयमाणोऽग्निः सन्नः पर्येतीति पूर्वत्रान्वयः Sy.
४ उपरमन्त एव्वग्नय इत्युपरा धिष्ण्या यजमानगृहा वा Sy.
५. सानुषु समुच्छ्रितेषु कर्मसु हविःषु वा निमित्तभूतेषु Sy. सानु समुच्छ्रितं भवति N.2.24.
६ ०रिभासु P. ०रिभावसु M. उत्कृष्टेषु Sy.
७. VM. explains कनिक्रवत्। सानुषु once only.
८. प्र० M. शोभनकर्मा Sy.
९. हितः M. पुरो धार्यमाणः। यद्वा पुरोहितवद्यागनिर्वाहकः सन् Sy.
१०. तत्तद्यजमानगृहे सर्वेषु देवयजनेषु वा Sy.
११. निः M.
१२. अध्वरस्य नाशरहितस्य फलप्रदस्य यज्ञस्य तदर्थम् Sy. १३. प्रबुध्यत इत्यर्थः Sy.
१४. अयं यजमानोऽपि ... शोभनेन कर्मणा यज्ञस्य ... कर्तव्यतामवजानाति Sy.
१५ किञ्चायमग्निरपि ... प्रकृष्टेन कर्मणा Sy.
१६. वेधाः, विविधानां फलानां कर्ता सन् Sy.
१७. ०ज्ञेन० D. प्राज्ञमि० M. इष्यत इतीषुरन्नमागमनं वा, तदिच्छते यजमानार्थम् Sy.
१८. सम्पादितानि हविरादीनि Sy.
१९. अत्यर्थं स्पृशति स्वीकरोति Sy.
२०. यतः कारणात् Sy.
२१. श्रिता P.D. घृतं ... सेवमानः Sy.
२२. अतिथिवत्पूज्यश्च Sy.
२३. उत्पन्नः । यतः कारणाद् घृतमत्यर्थं सेवमानः प्रबुद्धोऽभवदतः पस्पश इत्यर्थः। ... अजायत समर्थोऽभवत् Sy.
२४. एवमग्नौ प्रवृद्धे सति यजमानोऽपि वह्निर्हविषां वोढा Sy.
२५. विविधस्य फलस्य कर्ता उत्पादयिता Sy.
२६. VM. explains यज्ञस्य। चेतति। अजायत once only.

क्रत्वा यदस्य तविषीषु पृञ्चतेऽग्नेरवेण मरुतां न भोज्यैषिराय न भोज्या।
स हि ष्मा दानमिन्वति वसूनां च मज्मनां।
स नक्षासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥५॥

क्रत्वा यदस्य। कर्मणा[1]। यत्[2]। अस्य[3]। प्रवृद्धासु ज्वालासु[4]। हवींषि सम्पर्चयति[5]। अग्नेः[6]। परिरक्षणाम्[7]। इव[8]। भोज्यानि[9]। यथा वा[10]। गच्छते पुरुषाय[11]। अन्नान्याहरति[12]। सोऽग्नि[13]। तस्मै देय धनम्[14]। वर्धयति[15]। वासयितृणा च वीराणाम्[16]। बलेन त सयोजयति। सोऽग्नि.। अस्मान्[17]। दारिद्र्यात्[18]। अभिहन्तु[19]। परिरक्षतात्[20]। तथा निन्दितु[21]। आहन्तु[22] सकाशाच्च[23] पुरुषादिति[24]।

---

१. प्रकृष्टेन कर्मणा हविष्प्रदानादिरूपेण Sy.
२. यस्मात्कारणात् सर्वे यजमानाः Sy.
३. प्रवृत्तासु P.D. तविषीषु प्रबलासु ज्वालासु ... तविषीति बलनाम। 'तविषी शुष्मम्' (Ngh. 2.9.) इति तन्नामसु पाठात् Sy.
४. हविंषि D.
५. मिश्रयन्ति Sy.
६. अन्नेन तृप्तिनिमित्तेन Sy.
७. भक्ष्याणि पुरोडाशादीनि ... मरुता न भोज्या वायूनां सम्बन्धीनि व्रीह्याद्यन्नानीव। वायवो मेघं निर्भिद्य वृष्टिं जनयन्तु सत्सु सस्याविद्वारा व्रीह्यादिभोज्यानि यथा पच्यन्ते तथेत्यर्थः Sy.
८. दाने दृष्टान्तः ... एषणयुक्ताय ... इषिरशब्दो यास्केनैवं निरुक्तः। 'ईषणेन वेषणेन वा' (N.4.7.) इति Sy.
९. याचमानायार्थिने Sy.
१०. भोग्यानि भक्ष्यादीनि Sy.
११. यथा दीयन्ते तद्वत् Sy.
१२. तं खलु यजमानः Sy.
१३. हविष्प्रदानम् Sy.
१४. तस्मै व्याप्नोति। यद्वा स्वयमभिमतं दानमिन्वति। इन्वतिर्व्याप्तिकर्मा। 'इन्वति ननक्ष' (Ngh. 2.18.) इति तत्कर्मसु पाठात् Sy.
१५. निवासयोग्यानां धनानामग्निना सह्धाना बलेनैव। यद्वा सोऽग्निर्वसूनां हविर्निवासयोग्यानां ज्वालारूपाणां धनानां मज्मना बलेन दानमिन्वतीति शेषः Sy.
१६. ता P.
१७. दुरितात्पापात् Sy.
१८ ०न्तु M. अभिमुख्येन पापैर्हिंयमाणान् Sy.
१९. त्रासते त्रायते Sy.
२०. तथाहि M.
२१. ०तिः P. अतिप्रभूतत्वेन शंसनीयात्। यद्वा हिंसकात् Sy.
२२. आहन्तुं(न्तुः) M. अभितो हिंयमाणादघाद् दुःखात्तत्कारणात्पापाद्वा ... त्रायते Sy.
२३. सका(शा)च्च M.
२४. ०वानिति D.M.
२५. VM. ignores मरुताम्। हि। स्म and explains अभिह्रुतः। once only.

विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे
तरणिर्न शिश्रथच्छवस्यया न शिश्रथत् ।
विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे ।
विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥६॥

विश्वो विहायाः । विश्वः । महान् । अभिगन्ता । अग्नेर्धनम् । धारयति । हस्ते । दक्षिणे । धन ग्रथ्नाति । ग्रामान्तरं प्रति गन्ता । इव । यथा वा । अन्नेच्छया । धन वस्त्रादौ बध्नाति । विश्वस्मै । एव । देवान्यष्टुमिच्छते । देवेषु । हव्यम् । वहसि । विश्वस्मै । एव । यजमानाय । वरणीय धनम् । प्रक्षिपति । अग्नि । धनद्वाराणि च । विवृणोति ।

स मानुषे वृजने शंतमो हितोऽग्निर्यज्ञेषु जेन्यो
न विश्पतिः प्रियो यज्ञेषु विश्पतिः ।
स हव्या मानुषाणामिळा कृतानि पत्यते ।
स नो वासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥७॥

स मानुषे । स । मनुष्यकृते । उपद्रवे । सुखतम । हितस्तत्परिहाराय निहितो भवति ।

---

१. सर्वैर्गन्तव्यः । यद्वा विश्वात्मक. Sy.
२. विहाया इति महन्नाम । 'विहाया यह्वः' (Ngh. 3.3.)इति तन्नाममु पाठात् Sy.
३. अरतिरीश्वरोऽरममाणो वाऽप्रीतिः Sy.
४. ऽग्नेः । धनम् । missing in M. यजमानाय दातव्यं धनम् Sy. ५. अभिमत प्रदातुमुत्साहयुक्ते हस्ते वामेतरे Sy.
६ धृतं हस्तं यजमानार्थम् Sy.
७ श्रथयति ददाति . . . न शिश्रथत्, यजमानं न श्रथयति न मुञ्चति Sy.
८. ०न्ते P. तरणिरिव तारकः सूर्य इव । स यथा स्वोपासकायाभिमतं हस्ते धृत्वा वितरति तद्वत् । यद्वा तरणिः सर्वस्य तारकः Sy. ९. हवीरूपान्नेच्छर्यैव न शिश्रथत्, न विमुञ्चति । अयमनुग्रहेणैव पालयते, हविःस्वीकारस्तु व्यपदेशमात्रेणेति भावः Sy.
१०. धन P. वनं M. ११. ०स्मात् P. सर्वस्मै Sy. १२. देवम् P.
१३. इषुध्यते हविरात्मन इच्छत इन्द्रावये Sy.
१४. तत्तद्देवतामुद्दिश्य प्रत्त पुरोडाशादिकम् Sy. १५. सुकृते शोभनयज्ञकर्त्रे यजमानाय Sy. १६. सर्वैर्वरणीयं, क्षुदादिनिवारकं वाऽन्नादिकम् Sy.
१७. गच्छति । करोतीत्यर्थः Sy.
१८. द्वारा स्वर्गाद्यभिमतद्वाराणि Sy.
१९. The passage beginning with वरणीयं and ending with च is missing in M.
२०. विवृणोति । प्रतिबन्धकपापापनयनद्वारा-ऽभिमतानि साधयतीत्यर्थः । ऋण्वतिर्गतिकर्मा । यद्वा रिविर्गत्यर्थः Sy.
२१. मनुष्यस्य यजमानस्य सम्बन्धिनि Sy.
२२. वर्जनीये पापे निमित्तभूते सति Sy.
२३. अत्यन्तं सुखतमः । अरिष्टस्य निवारकत्वात् Sy. २४. अत एव हितः स्वर्गाद्यभिमतसाधकत्वात् Sy.
२५. ०तत्परि० P. अहिस्तत्प० M.

अग्निः। यज्ञेषु[१]। जयशीलो[२] राजा। इव। विशां[३] पतिः[४]। प्रियतमः। सोऽग्निः। हवींषि[५]। भूम्यां वेद्याम्[६]। आसादितानि। मानुषाणा[७] यागार्थम्। अभिपतति[८]। तान्? पालयति। महतः। वरुणस्य[१०]। हिंसाया[११] स ह्युपद्रवैर्मनुष्यान्हिनस्ति[१२]।

अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे।
विश्वायुं विश्ववेदसं होतारं यजतं कविम्।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥८॥

अग्निं होतारम्[१३]। अग्निम्। होतारम्। ईळते[१४]। धनाना दातारम्[१५]। प्रियम्[१६]। ज्ञातृतमम्[१७]। गमनशीलम्[१८]। हविषा वोढारम्। अभिमुख प्राप्नुवन्ति[१९]। सर्वान्नम्[२०]। सर्वधनम्[२१]। होतारम्। यजनीयम्[२२]। कविम्[२३]। देवा.[२४]। रमणीयम्[२५]। रक्षणाय शत्रुभ्यः। धनमिच्छन्तः[२६]।

---

१. यज्ञेषु निमित्तेषु Sy.
२. स यथा परसेनाद्युपद्रवपरिहारेण सम्यक्परिपालनेन च प्रजानां प्रियो भवति Sy.
३. ऋत्विग्रूपाणां प्रजानामतिशयेन पालकः Sy.
४. हविषि P. हवींषि Sy.
५. इळायां वेद्यां कृतानि सम्पादितानि Sy.
६. मनुष्याणां यजमानानां सम्बन्धीनि Sy.
७. पतति। आगच्छति Sy.
८. त् D. यात् M. सोऽस्मान् is suggested for तान्
९. त्रायते Sy १०. वारकस्य Sy.
११. धूर्तेर्हिंसकस्य भयात्...यद्वा धूर्तेरिति पञ्चमी। वरुणस्य पापदेवस्य धूर्तेर्हिंसकात्। किञ्च...महतो देवस्य धूर्तेर्हिंसातस्त्रासते पालयते। अयष्टारमग्निर्हिनस्तीति प्रसिद्धम्। यद्वा। एकमेव वाक्यम्। धूर्तेर्हिंसकस्य महो महतो वरुणस्य देवस्य वरुणाख्यायाः पापदेवताया धूर्तेर्हिंसातो नोऽस्मान्सोऽग्निस्त्रासते त्रायते Sy.
१२. VM. explains यज्ञेषु। विशांपतिः। धूर्तेः। once only, and ignores सः। नः। देवस्य।
१३. आह्वातारं होमनिष्पादकं वा Sy.
१४. ऋत्विजः स्तुवन्ति Sy.
१५. धनस्य धारयितारं दातारं वा Sy.
१६. अत एव प्रियं सर्वेषां प्रियतमम् Sy.
१७. अतिशयेन यजमानानां चेतयितारम्। यद्वा प्रकृष्टचेतनवन्तम् Sy.
१८. ईश्वरं तादृशं देवम् Sy.
१९. नितरां प्राप्ताः। प्राप्तिरेव विशेष्यते... निश्शेषेण प्राप्ताः। इतरदेवेभ्यो हव्यं वोढुं यथा प्रभवति तथा नितरां प्राप्ताः Sy.
२०. कीदृशम्? विश्वायुं सर्वत्र प्राणिजीवनम् Sy.
२१. विश्ववेदसं सर्वप्रज्ञम् Sy.
२२. देवानामाह्वातारम् Sy.
२३. कविं M. सर्वज्ञम् Sy.
२४. Missing in M. देवनशीला ऋत्विजः Sy.
२५. अतिप्रवृद्धधा शब्दयन्तम् Sy.
२६. वसुकामाः सन्तः Sy.

स्तुतिभिः[1]।

I.129.

यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि ।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम् ।
साक्षाकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥१॥

यं त्वं रथम्[2]। यम्[3]। त्वम्। रथम्। इन्द्र[4]! यज्ञभजनाय[5]। अनल्पम्[6]। सन्तम्[7]। गमनशील[8]! प्रणयसि[9]। अनवद्य[10]! सद्य[11]। एव। तम्। अभ्येषणाय[12]। कुरु[13]। कामय[14]। च। हविष्मन्तम्[15]। सः। अस्माकम्। अनवद्य[16]! क्षिप्रकारिन्[17]! परिचरताम्[18]। स्तुतिम्[19]। च। इमां शृणु[20]।

---

१. स्तुतिभिः... रणयन्तं रमणीयं वा... वसु हवीरूपमन्नमग्नये प्रदातुमात्मन इच्छन्तो न्येरिरे। प्रीतो यथा धनं प्रयच्छति तथा हविराद्यिना प्राप्ता इत्यर्थः Sy.

२. VM. explains नि। एरिरे। रण्वम्। वसूयवः। once only. Ms. D. puts the figure ॥१२८॥ here to indicate the end of one hundred and twentyeighth hymn. No such number is given in P. and M.

३. यस्त्वं D.

४. यः D. यं यजमानं प्रति Sy.

५. यज्ञेभ० P. यज्ञस्य दानाय लाभाय वा Sy.

६. ०स्य P. अपाकम्। अनल्पप्रज्ञयाधिकारवन्तम् Sy. पाकः पक्तव्यो भवति N.3.12.

७. सन्त P. D. पण्डितं सन्तम् Sy.

८. यज्ञगमनशील! Sy.

९. प्रापयसि। द्विकर्मकोऽयम्।.. यं यजमानम् धनविद्यादिना... प्रकृष्टं नयसि Sy.

१०. अनिन्दित! Sy.

११. तदानीमेव तदनुग्रहकाल एव Sy.

१२. तद्वेष० M. आभिमुख्येन यागायाभिमतप्राप्तये वा। अभिपूर्वाद् इषेः क्तिन् Sy.

१३. समर्थं करोषि Sy.

१४. कामयसे Sy.

१५. एवं कृत्वा च... हविर्लक्षणमन्नं तद्वन्तं वा...। यजमानेनाहूतः सन् शीघ्रमेवागत्य हविः स्वीकृत्य यागं साधु निर्वर्त्य तं चाभिमतफलेन संयोज्य पुनर्हविः स्वीकरोषीत्यर्थः Sy.

१६. अनिन्दित! सर्वैः स्तूयमान! Sy.

१७. अस्माननुग्रहीतुं त्वरमाण! Sy.

१८. विविधफलकर्तॄणां मध्ये श्रेष्ठतया वेधसां मेधाविनामस्माकं सम्बन्धि हविः स्वीकुर्वित्यर्थः Sy.

१९. अस्मदीयां स्तुतिरूपां वाचमिव। स्तुतिं यथा स्वीकरोषि तथा हविरपीत्यर्थः Sy.

२०. VM. explains प्र। नयसि। वेधसाम् once only.

स शृधि यः स्मा पृतनासु कासु चिद्दक्षाय्यो इन्द्र
भरहूतये नृभिरसि प्रतूर्तये नृभिः ।
यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता ।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥२॥

स शृधि। स.। शृणु। यस्त्वम्। पृतनासु। दुस्तरासु। मनुष्यै। आत्मनो धारणार्थमाह्वातुम्। हविर्भिर्वर्धनीय। भवसि। शत्रूणा प्रतरणाय। यस्त्वम्। शूरैर्मरुद्भिः सह। सर्वम्। सम्भक्ता। यो वा। मेधाविभिरश्वै। सङ्ग्रामम्। तरति। तम्। बलिनम्। हविष ईश्वरा.। अन्नम्। याचन्ते। अश्वम्। इव। बलिनम्।

---

१. वक्ष्यमाणगुणविशिष्टः Sy.
२. अस्मदाह्वानं स्तोत्रं वा शृणु Sy.
३. सङ्ग्रामेषु Sy.
४. प्रौढेष्वपि Sy.
५. मनुष्यैरेव सद्भिः पश्चाद्देवत्वमापन्नैर्मरुद्भिः। पुनस्त एव विशेष्यन्ते। नृभिः सङ्ग्रामनयनशीलैः ... इन्द्रस्य मरुतां साहाय्यम् 'इन्द्रो मरुद्भिः' (TS.6.5.5.1.) 'मरुतो हैनं नाजहुः' (AB. 3.20.) इत्यादिषु प्रसिद्धम्। तैः सहितः सन् Sy.
६. भरणविशिष्टाह्वानयुक्ताय Sy.
७. ० यौ P. प्रवर्धनशीलोऽसि ... दक्षाय्योऽसि समर्थोऽसि Sy.
८. प्रकृष्टंहिसनाय। यद्वा भरहूतये 'शूरो भव प्रहर' इत्येवमादिभरणयुक्ताह्वानाय, प्रतूर्तये च शूराणां प्रकृष्टवधाय च ...। यद्वा नृभिर्नेतृभिर्यजमानैः प्रार्थितः सन् प्रतूर्तये शत्रूणां पापानां वा प्रकृष्टहिंसनाय Sy.
९. शौर्योपेतैर्मरुद्भिरन्यैर्भटैर्वा सहितः Sy.
१०. स्वयमेव Sy.
११. सङ्ग्रामजयस्यान्यस्य वा मनीषितस्य सनिता सम्भक्तासि। सत्यपि तेषां साहित्येऽन्यनैरपेक्ष्येणैव तरुतासीत्यर्थः Sy.
१२. ऋत्विग्भिः स्तुतः सन् Sy.
१३. तेभ्योऽन्नस्य Sy.
१४. तरुता ... दातासि। विप्रैर्मरुद्भिः सहित इति सम्बन्धः Sy.
१५. गमनवन्तम् Sy.
१६. सम्यगभ्यर्थयितुं समर्था ऋत्विजः Sy.
१७. ० राशम् P. D. हविर्लक्षणान्नवन्तमिन्द्रम् Sy.
१८. ० चते P.D. संराधन्ति। सेवन्ते Sy.
१९. ० नः P. D. वेजनवन्तं गमनवन्तं पृक्षं ... घासाद्यन्नवन्तम् ... अश्वमिव। तं यथा समर्थाः स्वादुघासप्रदानादिना पोषयन्ति तद्वत्। अत्य इत्यश्वनाम। 'अत्यो हयः' (Ngh. 1.14.) इति तन्नामसु पठितत्वात् Sy.
२०. VM. ignores स्म। चित्। इन्द्र and explains नृभिः once only.

दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यम्।
इन्द्रोत तुभ्यं तदिदे तदुद्राय स्वयंशसे।
मित्रायं वोचं वरुणाय सप्रथः सुमृळीकायं सप्रथः ॥३॥

दस्मो हि ष्मा[1]। दर्शनीय[2]। हि त्वम्। वर्षितारम्[3]। मेघम्[4]। पिन्वसि। कम्। चन। अदातारमयजमानम्[5]। मर्त्यम्[6]। आत्मना पृथक्करोषि। तम्[7]। वर्जयसि[8] न तत्र गच्छसि। तदिदं स्तुतिवचः[9]। तुभ्यमहम्[10]। इन्द्र[11]! दीप्ताय[12]। वदामि[13]। तदेव त्वदीयम्। अन्येभ्योऽपि देवेभ्य इति[14]। सर्वतः[15] पृथुतमम्। सुष्ठु सुखयित्रे[16] तुभ्यम्[17]।

---

१. ष्म D.
२. शत्रूणामुपक्षपणकर्ता Sy.
३. खलु Sy.
४. स्वतो वर्षणशीलम् Sy.
५. त्वचं संवरणवन्तं, पुटबन्धनवदुदकवेष्टनवन्तम्...जलधारिणं मेघम् Sy.
६. पिबसि P. M. निर्भिद्य सेचयसि Sy.
७. दातारं य० P. ० रं य० M. अरणशीलं गमनस्वभावं कञ्चिन्मेघम् Sy.
८. मर्त्यवत्।...मर्त्यं मरणशील शीर्यमाणस्वभावम् Sy.
९. मिश्रयसि...अवर्षणेन गच्छन्तं बलान्निगृह्य वर्षयसीत्यर्थः। यथा शूरः कश्चिद् बलवन्तं गच्छन्तं वैरिणं निगृह्य स्वीकरोति तद्वदित्यर्थः Sy.
१०. सर्वतो वर्जयसि। औदासीन्यं करोषीत्यर्थः Sy.
११. ० चनं P. तादृशं कर्म वर्षणरूपम् Sy.
१२. स्तुत्यम् M अहम् is omitted by P. and M.
१३. स्वकीययशोयुक्ताय। तथा विवे...त्वदाश्रयभूतायै द्युलोकदेवतायाऽपि तत्तादृशं कर्म Sy.
१४. ब्रवीमि Sy.
१५. ० भ्यो तदेव दे०P. उतशब्दोऽपिशब्दार्थः। वर्षणकर्मणो द्युदेवताया आनुकूल्यात्तस्याऽपि वचनं युक्तम्। तथा रुद्राय जगतां दुःखद्रावयित्रे रोदनशीलाय वाग्नये तद् वोचम्। 'रुद्रो वै क्रूरो यदयमग्निः' (TS. 6.2 3.2.) इति श्रुते रुद्रत्वम्। "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" (TS. 1.5.1.1.) इति श्रुते रोदनस्वभावत्वं प्रसिद्धम्। तस्य चाहुतिद्वारा वृष्टघनुकूलत्वात्तस्यापि कथनं युक्तम्। स्वयशस इत्यस्य रुद्रायेत्यनेन वा सम्बन्धः सन्निहितत्वाद्योग्यत्वाच्च। स्वकीययशोयुक्तायाग्नय इत्यर्थः। तथा मित्राय अहरभिमानिदेवतायै तद् वोचम्। वरुणाय रात्र्यभिमानिदेवतायै तद्वोचम्। 'अहोरात्रे वै मित्रावरुणौ' (TB. 25. 10.10.) 'अहोरात्राभ्यां खलु वै पर्जन्यो वर्षति' (TS. 2.1.7.3.) इति। तथा 'मैत्रं वाऽह्नर्वारुणी रात्रिः' (TS.2.1.7. 3.) इत्यादिश्रुतिभ्यो मित्रावरुणयोरहोरात्राभिमानिदेवत्वम्। अत एव श्रुतेर्वृष्टिप्रदातृत्वात्ताभ्यामपि प्रथनं युक्तम् Sy.
१६. उक्तेभ्यो देवेभ्यः...सर्वतः पृथु, अतिविस्तीर्णं यथा भवति तथा तद्वर्षणकर्म ब्रवीमि Sy.
१७. शोभनसुखयित्रे प्रजानाम्। एतत्सर्वत्र सम्बध्यते Sy.
१८. VM. ignores स्म। शूर। उत। स्वयशसे। and explains सप्रथः। once only.

अस्माकँ व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् ।
अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥४॥

अस्माकम्[1]। अस्माकम्[2]। युष्माक[3] च। इन्द्रम्। अभिमतसिद्ध्यर्थम्[4]। कामयामहे[5]। सखायम्[6]। सर्वान्नम्[7]। अभिभवितारम्[8]। नियोज्यम्[9]। युद्धेषु। अस्माकम्। स्तोत्रम्[10]। रक्षणाय। अभिगच्छ[11]। पृतनासु[12]। दुस्तरासु। नहि। त्वाम्। शत्रुः। युद्धे हिनस्ति[13]। यं त्वम्। व्याप्तम्[14]। स्तृणोषि[15]।

नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ।
नेषि णो यथा पुरानेनाः शूर मन्यसे ।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥५॥

नि षू नमातिमतिम्[16]। सुष्ठु। नि नमय[17]। अतिमानम्[18]। कस्य[19]। चिदपि शत्रो.। तेजिष्ठै[20]।

---

१. Omitted by D. हे ऋत्विजः... अस्मदर्थम् Sy.
२. युष्मदर्थम् Sy.
३. इष्टये यागाय अभिमतसंपादनाय वा ।... यद्वाऽस्माकं सखायमिति सम्बन्धः Sy.
४. अभिमतं कामयामहे। 'वश कान्तौ' Sy.
५. सखिवदत्यन्तहितकारिणं समानख्यानं वा Sy.
६. विश्वेषां यागानां गन्तारम् Sy.
७. सखा... भि० M. प्रकर्षेण शत्रूणा मर्दयितारम् Sy.
८. सर्वदा युक्तं, सहायभूतमित्यर्थः Sy.
९. हवीरूपान्नेषु तद्वत्सु यज्ञेषु वा निमित्तभूतेषु, प्रासहं यज्ञविघातिनः सहमानं, युजमभिमतफलैर्युक्तं मरुद्भिर्वा Sy.
१०. बह्व परिवृढं कर्म Sy.
११. रक्ष Sy.
१२. सङ्ग्रामेषु । 'पृत्सु समत्सु'(Ngh. 2. 17.) इति सङ्ग्रामनामसु पाठात्सङ्ग्रामत्वम् Sy.
१३. न हिनस्ति न विरोधमाचरति Sy.
१४. विश्वम् Sy.
१५. तृ० P.D. स्तृणोषि वारयसि । स कश्चिदपि शत्रुर्न हिनस्ति । तव महत्त्वेन सर्वे भीता विधेया भवन्ति । शत्रुभावं न कोऽप्याचरति । अजातशत्रुत्वादित्यर्थः Sy.
१६. VM. explains प्रासहम् । युजम् । स्तृणोषि । यम् once only and ignores चित् । शत्रुम् ।
१७. तिष्ठनमातिमतिं P.
१८. नितरां सुष्ठु नामय । अस्मत्प्रणतं कुरु । अन्तर्भावितण्यर्थोऽयम् Sy.
१९. अतिक्रान्तमननं विषद्धमनस्कं शत्रुम् Sy.
२०. त्वद्भक्तस्य यजमानस्य Sy.
२१. निनम या(य)ति... शास्त्रोसि० M. अतिशयेन तेजस्विभिः Sy.

आयुधै[1]. । इव । भवदीयै रक्षणै[2]: । उद्गूर्णै[3]: । उद्गूर्ण[4] ! नय च । अस्मान् । यथा । पुरम् । अनुपद्रवस्त्वम्[5] । शूर[6] ! मनुष्यस्योपद्रवाणि[7] तरितुम्[8] । मन्यसे[9] । विश्वानि[10] च तानि[11] । अपपर्षि[12] । बोढा[13] सन् । भवदीयेन निरसनेन[14] । अस्मान् । प्रति गच्छ शत्रुमतः[15] ।

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रद्धोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।
अवं स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥६॥

प्र तद्वोचेयम्[16] । इयमेकैन्दवी, तदहं वच[17] । अनुगुणाय[18] । इन्दवे[19] । प्रब्रवीमि[20] ।

---

१. युद्धादिरूपैर्मार्गैरिव । . . .प्रतिमतिं वृत्रादि यथा नामितवांस्तथाऽस्मद्विरोधिनमपीत्यर्थः । यद्वोत्तरत्रान्वयः । तेजिष्ठाभिररणिभिर्न तेजोयुक्तैर्गमनसाधनैर्यज्ञादिमार्गैर्यथाऽस्मान्योजितवानसि तथोग्राभिः प्रकाशिकाभिरूतिभी रक्षणैर्यागफलभूतैर्नोऽस्मान् Sy. २. रक्षणैः प्रीतिभिर्वा युक्तः सन् Sy. ३. उद्गूर्णबल ! Sy.

४. नय (या) M. नयसि । अभिमतस्वर्गादिफलं प्रापयसीत्यर्थ. Sy.

५ तत्र वृष्टान्तः । पुरा पूर्वस्मिन्काले ऽस्मत्पित्रादीन्यथोतिभिर्नीतवानसि तथा नेषीत्यर्थः Sy. ६. सर्वैरपापत्वेन Sy.

७. विक्रान्त ! Sy.

८. यजमानस्य । पूरुरिति मनुष्यनाम । 'पूरवः जगतः' (Ngh. 2.3.) इति तृप्रामसु पाठात् Sy.

९. एनासि Sy. As उपद्रवः is mas., the reading should be उपद्रवान् ।

१०. अवबुध्यसे स्वर्गाद्यभिमतसाधकत्वादिति भावः । यद्वा । अनेनास्त्वमस्मानप्यनेनसो मन्यसे Sy. ११. सर्वाणि Sy.

१२. ० वर्षि P.M. अपकृत्य पालयसि Sy.

१३. बोधद्धा P. बोर्धद्धा D. वृष्टयादिप्रदानेन जगतां निर्वाहकः सन् Sy.

१४. धन् P. १५. भवदी . . . नेन M. आसा अन्तिके देवयजनदेशे Sy.

१६. ० च्छत P. अभिमुख्येनागत्य वह्निरभिमतानां वोढा सन्नप अनभिमतमपकृत्य पर्षि अभिमतफलं पूरयसि Sy.

१७. VM. explains ऊतिभिः । वह्निः । once only.

१८. ० मेकैकेन्दवे M.

१९. वोचः P. तद्वक्ष्यमाणं कर्म स्तोत्रं वा Sy. प्रवोचेयमिति सम्बन्धः । यच्छब्देस्तदध्याहारः । यदिष्टं स्तुतिरूपं तत् SKN. यद्यविष्ट तस्येन्दोस्तत्तत् Dur.

२०. भव्याय भवनशीलाय प्रतिदिनं कलाभिवृद्धया वर्धनशीलाय Sy. एकैकस्याः कलाया वृद्धया हान्या वा युक्तेन तेन रूपेण भवितव्यम् SKN. किंलक्षणो य इन्दुः ? भव्यो भवनार्हः, आत्मवान् अभिप्रेतानां पात्रभूत इत्यर्थः । तस्मै । भव्यो भावनार्ह इव । यो हविषा भावनमर्हति न च भाव्यतेऽहविर्भक्त्वात् Dur.

२१. अमृतेन सर्वस्य क्लेदयित्रे तदर्थम् Sy. अन्नमसे SKN. अस्मा इन्दवे प्रीत्यर्थम् Dur.

२२. प्रकर्षेण वक्तुं शक्तो भूयासम् । स्तुतेरतिमहत्त्वादिति भावः Sy. प्रब्रवीमि SKN. अहं प्रब्रवीमि Dur.

ह्वातव्यः[१]। आपत्सु मित्रमिव। यः। अन्नवान्[२]। स्तोत्रम्[३]। प्रतिगच्छति[४] 'अन्नवान्वा'[५] इति यास्कः। रक्षसा[६] हन्ता[७]। स्वयमेव। अस्मत्त[८]। निन्दितुः[९]। मतिम्[१०]। आयुधैः[११]। अपनयतु[१२]। सः। पापः[१३]।

---

१. होतव्य आह्वातव्यो वा हव्य इन्द्र इव। प्रायेण 'इन्द्र आगच्छ' इत्याविनेन्द्र एवाहूयते। स इव Sy. हवनमर्हतीति हव्य इन्दुः। नशब्द उपमार्थः। हव्य इव यः। अहविर्भाक्त्वादेवमुच्यते SKN. हवनार्ह इव। यो यज्ञेन च पुनराहूयतेऽहविर्भाक्त्वादेव Dur.

२. य इन्दुः... एषणवान् Sy. छान्दसत्वाद्विषः। इड? स्तुतिं प्रतीच्छन्वा। अन्नं वा, इट् अकारागमश्छान्दसस्तद्वान्। स्तोतृभ्यो देयेनान्नेन स्तुतीच्छया तद्वानित्यर्थः SKN. नित्यमन्नवान् कामवान्वा। कामिनां स्तोतृणां नित्यमभिमतफलसम्प्रदानोन्मुखः Dur.

३. ०वांस्तो० M. मननीयं स्तोत्रं कर्म वोद्दिश्य... तेषामेव कर्म हननादिरूपम् Sy मन्यतेरर्चतिकर्मण एतद्रूपम्। मननं स्तवनमस्मदीयम् SKN. तत्सम्प्रदानोन्मुखतया च नित्यमस्माकं... मननानि .प्रज्ञानानि Dur

४. रेजति गच्छति। रेजतिर्गत्यर्थः। 'रेजति दध्यति' (Ngh.2.14.) इति तन्नामसु पाठात्। ... मन्म तेषामेव कर्म हननादिरूपं रेजति गच्छति चालयति। नाशयतीत्यर्थः Sy. कम्पते चलति। गच्छतीत्यर्थः।... मन्म मननं रक्षसां चेतस्तद्रेजति। अन्तर्णीतण्यर्थोऽत्र रेजतिः। रेजयति कम्पयति SKN. रेजयत्याकम्पयति। आकम्पितहृदयानुपकारितया नित्यमस्मान्करोति। कथं नामैतं नित्यं स्तुयामेति Dur.

५. इववानन्नवान्कामवान्वा N.10.42.

६. Missing in M. यज्ञविघातकानां रक्षसां हन्ता Sy. यश्च... रक्षसां हन्ता ... कथं पुनश्चन्द्रमा रक्षसां हन्ता चेतो वा कम्पयति? उच्यते। रक्षांसि हि तमश्चराणि। चन्द्रमाश्च तमोऽपनयनेन तेषां सञ्चारं निरुन्धन्हन्ता। चेतश्च बलेनोद्यत्कम्पयति। अत उच्यते रक्षोहा मन्मेति रेजतीति SKN.
रक्षांसि बलेन घ्नन्सुतरामस्माकं मन्म रेजति Dur.

७. किञ्च स्वयमात्मनैव SKN. स्वयमाआदरवान्भूत्वा Dur.

८. षष्ठ्यर्थे पञ्चमी। अस्माकमिति SKN. अस्मान्प्रति Dur.

९. ०तु P. अस्मन्निन्दितुर्वैरिणः Sy. निन्देः क्विप्। आकारोऽभिशब्दार्थः। अभिनिन्दोऽभिनिन्दितृनाभिमुख्येन निन्दितॄन् SKN.
अभिनिन्दितारम् Dur.

१०. दुर्मतिं दुर्बुद्धिम् Sy. पापबुद्धिम् SKN. पापमतिम् Dur.

११. वधैर्हननोपायैः Sy. प्रहारैः SKN. वज्रप्रहारैरतिदुःसहैः Dur.

१२. एवन० M. आक्षिपेत्। अवनयेत् Sy. जयेत् SKN. जयेत् क्षिपेद्वा Dur.

१३. अघानां पापानां हिंसादीनां शंसिता स्तेनः ...अघशंसः स्तेनः। 'अघशंसो वृकः' (Ngh. 3.24) इति तन्नामसु पाठात् Sy. अघं पापं तद्योऽस्माकं जनेभ्यः शंसति कथयति स्फीतं करोति सोऽघशंसः SKN. तेन वातिबलवतेन्दुना हन्यमानोऽस्मदघशंसोऽस्माकं यः पापानां शंसिता कथयिता, स्वल्पानामपि स्फीतिकर्ता... जनपदे Dur.

अवतरम्[1]। अवस्रवेदत्यन्तमधो गच्छतु[2]। यथा। क्षोदनीयं मशकादीति[3][4]।

वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम्।
दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि।
आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥७॥

वनेम[5] तत्। वनेम[6]। तद् वयम्[7]। स्तुत्याऽभिलषितम्[8]। चेतयन्त्या[9]। किमित्याह—वनेम[10]। धनम्[11]। धनवन्[12]! शोभनवीर्यम्[13]। रमणीयम्[14]। भवत्[15]। शोभनज्ञानैरपि[16]। दुर्ज्ञानम्[17]। एनमिन्द्रम्[18]।

---

१. अत्यन्तनिकृष्टम् Sy. यावच्च प्रथमं स्रुतोऽधो गतस्ततोऽवतरं ततोप्यवतरमिति Dur.

२. ०स्रवद० D. अव स्वस्थानादवाङ्मुखो भूत्वा स्रवेद् गच्छतु। अधः पतत्वित्यर्थः Sy. किञ्च त्वत्प्रसादाच्चाव स्रवेदधो गच्छेत् क्षीयेतेत्यर्थः।...स चापसृतोऽपि...अवतरां स्रवेत्। पुनरपि सुतरामवस्रवेत् SKN. तावत्स्रवेत्...यावदामूलतो नष्टमित्येतदाशास्महे।... अधोगतिः स्यात् Dur.

३. ०विति P. ०नीय मश(मुद)कादीति M. अवस्रवणमेव प्रार्थ्यते...क्षेप्तुं शक्यमुदकादिकमिव। उदकं यथा तिष्ठति स्रवन्नश्यति तथाऽसावपीत्यर्थः Sy. किमिव?...द्रव्यमुदकादि तद्वदवस्रवेत् SKN. क्षुद्रमिव द्रव्यं किञ्चित् Dur.

४. इन्दुरिन्धेः। उनत्तेर्वा। तस्यैषा भवति... प्रब्रवीमि तव् भव्यायेन्दवे। हवनार्ह इव। य इषवानन्नवान् कामवान् वा। मननानि च नो रेजयति। रक्षोहा च। बलेन रेजयति। स्वयं सोऽस्मदभिनिन्दितारम्। वधैरजेत दुर्मतिम्। अवस्रवेदधशंसः। ततश्चावतरं क्षुद्रमिवावस्रवेत्। अभ्यासे भूयांसमर्थं मन्यन्ते। यथा—अहो दर्शनीय। अहो दर्शनीयेति N. 10. 41-42.; SKN. IV. 46. VM. ignores वुर् and explains मन्म। रेजति। अव। स्रवेत्। once only.

५. सम्भजेम। यद्वा शब्दयेम। स्तुतिं करवामेत्यर्थः Sy.

६ तादृश स्तुत्यं तव रूपम्। यद्वा तस्ते Sy.

७. व M. वयं यजमानाः Sy.

८. होमसाधनभूतया स्तुतिरूपया वाचा। ... होत्रेति वाङ्नाम। 'होत्रा गीः' (Ngh. 1.11.) इति तन्नामसु पाठात् Sy.

९. तव गुणान् ज्ञापयन्त्या। 'चिती संज्ञाने' Sy.

१०. सम्भजेम यद्वा शब्दयेम स्तुतिं करवामेत्यर्थः Sy.

११. धन M.

१२. धनं M. विशिष्टधनवन्निन्द्र! Sy.

१३. शोभनसामर्थ्योपेतम्। ... पुनस्तदेव विशेष्यते। ... शोभनपुत्रभृत्याद्युपेतम्। धनेन तेषां सम्पादयितुं शक्यत्वात् Sy.

१४. रमणीयं गन्तव्यं वार्थिभिः Sy.

१५. सर्वदा वर्तमानं यज्ञादिद्वारा बहुशो दीयमानमपि प्रवर्धमानम् Sy.

१६. शोभनैर्मननैस्तत्साधनैः स्तोत्रैर्वा Sy.

१७. ज्ञानं P. दुःखेन मन्तुं शक्यं त्वाम्। तव महिम्नोऽतिमहत्त्वात् Sy.

१८. एनं omitted by M.

अन्नेन[1]। सम्पृचाम[2]। इन्द्रम्। सत्याभिः[3]। अन्नार्वाभिः[4] स्तुतिभिः। यजनीयम्[5]। अन्नहेतुभिः[6]। आपृचीमहि[7][8]।

प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम्।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः।
हतेमसत्रा वंक्षति द्विषा जूर्णिर्न वंक्षति ॥८॥

प्र प्रा वः[9]। अस्माकम्[10]। अयमिन्द्रः। युष्माकम्[11]। दुर्मतीनाम्[12]। स्वभूतयशोभिः[13]। परिरक्षणे[14]। छेदने[15]।

---

१. अन्नेन M. हवीरूपेणान्नेन। .. यद्वा। इषा अन्नेन निमित्तेन। पूर्वं धनस्य प्रार्थितत्वादिदानीमन्नं प्राप्यते Sy.

२. संप्रवृचाम P.D.सर्वतः सम्पृक्ता भूयास्म ...'पृची सम्पर्के' Sy.

३. अविसंवादिनीभिर्यथाभिलाषमुपजायमानफलाभिः Sy.

४. 'हरिव आगच्छ मेधातिथेर्मेषे' इत्याह्वानैरित्यर्थः Sy.

५. यजनीयम्। अन्नहेतुभिः omitted by D. यागनिष्पादकम् Sy.

६. द्युम्नहूतिभिः, 'हरिव आगच्छ मेधातिथेर्मेषे' इत्याह्वानैरित्यर्थः। पुनस्ता एव विशेष्यन्ते ... हविर्लक्षणान्ननिमित्तैराह्वानैः। आ पृचीमहीति शेषः Sy. द्युम्नं द्योततेः। यशो वान्नं वा N.5.5.

७. आवृची० P.

८. V.M. explains सुवीर्यम् once only and ignores आ

९. प्रजान्वः P.

१०. अस्मदर्थं चायम् Sy. अस्माकम् SKN.

११. युष्मदर्थम् Sy. ऋत्विजामयं प्रतिनिर्देशः। अत्र पौत्रादीनां वो युष्माकमृत्विजां पुत्रपौत्रादीनां वा मदीयानाम् SKN.

१२. दुर्मननयुक्तानां विरोधिनाम् ... पुनः स एव विशेष्यते।... दुष्टबहुमानवतां हननबुद्धीनाम् Sy. पापबुद्धीनां चास्मच्छत्रूणां नेत्यर्थः।... दुस्स्तुतीनां च SKN. पापमतीनामस्मच्छत्रूणां हन्ता भविष्यति Dur.

१३. स्वकीययशोयुक्तैः Sy. निमित्ते चैषा तृतीया। प्रयोजनस्य च निमित्तत्वेन विवक्षा। स्वयशोभिर्निमित्तभूतैरात्मनः SKN. हे स्तोतारः! प्रब्रूतास्मै... आत्मीयैर्यशोभिः संयुक्ताः स्तुतीः Dur.

१४. ऊतिभी रक्षणैः Sy. अवतेः कर्तर्यूतिः प्रकर्षेणावितारक्षितेत्यर्थः SKN. यस्मादेष इन्द्रः स्तुतः... अविता रक्षिता Dur.

१५. परितो वर्जने निमित्तभूते सति Sy. क्व पुना रक्षिता? उच्यते। परिवर्गे परिवर्ज्यन्ते प्राणैर्यत्र योद्धारः स परिवर्गः सङ्ग्रामस्तस्मिन् SKN. परिवर्गे सङ्ग्रामे, यत्र हि प्राणाः परिवृज्यन्ते वियुज्यन्ते तत्रायमस्माकं रक्षिता भविष्यति Dur.

१ २ ३ ४ ५ ६
प्र प्र भवति। दक्षणे च। स्वयमेव। सा। विनाशाय भवतु। सेना। या। अस्मान्।
७ ८ ९ १० ११ १२ १३ १४
उपगच्छति। अदनशीलै राक्षसै। सा हता। भवतु। नच। वहतु। त्वया क्षिप्तेति।

---

१. Omitted by P.

२. भव M. प्र प्र प्रकृष्टो भवति। समर्थो भवतीत्यर्थः। द्विर्भावः पादपूरण। यद्वा हे ऋत्विजो वो युष्मदर्थम् ... अस्माक सम्बन्धिभिः स्वयशोभिः स्वयमेवान्यनैरपेक्ष्येण स्तोतुं समर्थः स्तोत्रैस्तुष्टः सन् ... ऊतौ रक्षणे प्र प्र प्रकृष्टो भवति। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। कुत्रेति तदुच्यते। दुर्मतीना दुष्टाना परिवर्गे परितो वर्जनवति सङ्ग्रामे यागे वा Sy.
'प्रसमुपोदः' (P.8.1 6) इति पदपूरणे द्विर्वचनम्। उपसर्गत्वाच्चास्योतीत्यनेन क्रियाशब्देन सम्बन्ध SKN.
पुनः पुनस्तुत Dur.

३. दरीमणि, अतिशयेन दारयितरि Sy. तमेवंगुणविशिष्टमिन्द्र दारयितृतम दुर्मतीनाम् Dur.

४ स्वयमेव स्वयमेव P.
केन पुनः प्रकारेण रक्षिता? उच्यते। स्वयमात्मनैव SKN.
कथं पुनरसावस्माकं रक्षिता भविष्यतीत्युच्यते। स्वयम् Dur.

५ ० या P. हिंसितुम् Sy. तृतीयार्थचतुर्थेनासदित्यनेन सम्बन्धो रिषयध्या असदवेषणाय हिंसनाय भवति। इन्द्रप्रसादात्स्वयमेव वासौ विनश्यतीत्यर्थः SKN
... रेषणाय भविष्यति। किञ्चिदप्यकृत्वाऽस्माकमिन्द्रप्रभावात्स्वयमेव विनङ्क्ष्यतीत्यभिप्रायः Dur.

६. एवमिन्द्रे सम्यक् पालयति सति ... या जूर्णिर्जववती सेना Sy.
शक्तिका सेना वा SKN.
जवसम्पन्नापि सती शक्तिः। अत्र क्षेपणसम्बन्धाज्जूर्णि शक्तिरित्युपपद्यते Dur. 'जूर्णिर्जवतेर्वा द्रवतेर्वा दूनोतेर्वा' N. 6.4.

७ अस्मान्प्रति Sy., SKN., Dur.

८. उपगन्तुमस्मान्प्राप्तुम्। 'ईङ् गतौ' Sy. उपेत्येष प्र इत्येतस्य स्थाने प्रेष्यते Skn. उपागच्छति Dur.

९ उद० M. भक्षकैरस्मद्विरोधिभि. Sy. अदनशीलैरस्मच्छत्रुभिः SKN
अदनं रक्षोभिः Dur.

१०. स P. सा सेना Sy.

११. हिंसितैवासीत् Sy. हता च विनष्टा सती ईमिति पदपूरणः SKN.
ईमित्यनर्थक. हता सतीन्द्रेण Dur

१२ अस्माभ्य वहेत्। न प्राप्नोति। तथास्मद्विसकाञ् शत्रूनपि पुनर्न वक्षति न वहति। ... इन्द्रसामर्थ्येन तत्रैव नष्टाभूदित्यर्थ Sy. लडर्थेऽत्र लेट्। न वहति न प्राप्नोति। . लृडर्थे लेट्। न वक्ष्यति न प्राप्स्यति। आगामिन्यपि काल इत्यर्थः SKN. न वक्षति। ... क्षिप्तापि च तैः पुनरादरेणापि रक्षोभिः .. न वक्षति ... न प्राप्स्यतीत्यर्थः Dur.

१३. प्रेरिता Sy. प्रेरितापि सती SKN. प्रहिता Dur.

१४. VM. ignores ईम्। and explains दुर्मतीनाम्। न। वक्षति। once only. N. 6. 4; SKN. II. 403.

त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याव्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥९॥

त्वं[१] न इन्द्र राया[२]। त्वम्। अस्माकम्[३]। इन्द्र[४]। महता[५]। धनेन[६]। पुरः[७]। याहि। अनुपद्वेण[८]। मार्गेण[९]। रक्षोवर्जितेन[१०]। सेवस्व[११]। अस्मान्[१२]। दूरे[१३]। अन्तिके च। रक्ष[१४]। अस्मान्। दूरात्[१५]। अन्तिकाच्च[१६]। अभ्येषणैः[१७]। सदैव[१८]।

त्वं न इन्द्र राया तरूषसोग्रं चित्ता महिमा सच्चदवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।
अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥१०॥

त्वं[१९] न इन्द्र राया[२०]। त्वम्। अस्माकम्[२१]। इन्द्र[२२]। धनेन[२३]। तरणकुशलेन रक्ष[२४]। उग्रम्[२५]।

---

१. तत्र P.
२ अस्मत्सम्बन्धिना Sy.
३. परीणसा परितो नद्धेन Sy.
४. अस्मभ्यं दातव्येन बहुविधधनेन युक्तः सन् Sy.
५. आगच्छ। ... यद्वा नोऽस्मानुद्दिश्य याहि Sy.
६. अपापेन। यज्ञगमनमार्गस्य स्तुतिचोदितत्वादनेहस्त्वम् Sy.
७. मार्गेण
८. ० ते P. रक्षावर्जिते D.
९. आ सचस्व समवेतो भव Sy
१०. अत्यन्तदूरदेशात्स्वर्गलक्षणात्। .. पराक इति दूरनाम। 'पराके परावैः' (Ngh. 3.26) इति तन्नामसु पाठात् Sy.
११. अत्यन्तान्तिके देवयजनदेशे सचस्व अस्मत्प्रत्तं हविः सेवस्व, सङ्गच्छस्व वा Sy.
१२. पाहि रक्ष। ... पालय Sy.
१३. मस्मान् P.
१४ दूरदेशात्स्वर्गादेः सकाशात्। ... यद्वा दूरादयागकाले स्वर्ग एवोषित्वा Sy.
१५ आरात्सन्निहितादिह लोकात्। ... यागकाले सन्निहिते देवयजनदेशे Sy.
१६ ० णे ० P.
अभिमुखैर्यागैस्तन्निर्वाहैः। यद्वा। अभ्यागमनैः Sy.
१७ सर्वकाल यागकालेऽयागकाले दूरेऽन्तिके च ... अभित एषणैः ... सम्यक् परिपालय Sy.
१८ VM explains याहि। सचस्व। पाहि। अभिष्टिभिः। once only, and ignores आ। आ
१९. रायाः P.
२०. अस्मान् Sy.
२१. Omitted by P.
२२. धने P. धनेनोद्वर्ता भवेति शेषः Sy.
२३. अस्मानापद्भ्य उत्तरीतुं शक्तेन Sy.
२४. रक्षा D. P.
२५. उद्गूर्णबलम् Sy.

चित्[१]। त्वाम्[२]। महिमा[३]। सेवते[४]। महते। रक्षणाय[५]। सखा[६]। इव। बलिष्ठ[७]! पालक[८]! रक्षक[९]! कम्। चन। अमर्त्य[१०]! रथमातिष्ठ[११]। अस्मत्त[१२]। अन्यम्। कम्। चित्। हिंस्या[१३]। हिंसितुमिच्छन्तम्[१४]। वज्रिन्[१५]!

पाहि नं इन्द्र सुष्टुत स्तिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनाम्।
हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः।
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥११॥

पाहि न इन्द्र। पाहि[१६]। अस्मान्। इन्द्र[१७]! सुष्ठु स्तुत[२०]! शोपयितु[२१]। अभिगन्ता[२२]। सदा[२३]। एव। दुर्मतीनाम्[२४]। देवनशील[२५]। हन्ता[२६]। कुत्सितस्य[२७]। रक्षस[२८]। त्राता च। मेधाविन[२९]।

---

१ सन्तम् Sv २. उपाञ्चित्वा P जित्वा D. ३. महत्त्वम्। अस्मत्स्तोत्रजनित· कश्चिदतिशय. Sy.
४ सम्भजते। उत्कर्वयतीत्यर्थ· Sy.
५ त्वत्प्रीतये। ... अवसे रक्षणाय प्रकाशारोग्यादिरूपाय Sy.
६. सखे P.D.M. सर्वजनमित्रं सूर्यमिव। तं यथा महत्त्वेन संयोजयन्ति तथेत्यर्थ·। यद्वा मित्रं न प्रियहितरूपं सखायमिव। तं यथा महत्यै प्रीतये सम्भजन्ते तद्वत् Sy.
७ ओजस्वितम! अतिशयेन बलवन्! Sy.
८. रक्षितः! अस्मान्पालयितर्वा Sy
९. अवितः! अस्मान्धनेन तर्पयितः Sv.
१०. अमत्य P. अमस्त M. अमरणधर्मन्निन्द्र!
११ रथति० D. रथं ति० P. रथं वेगवन्समारुह्यास्मद्देवयजनं शीघ्रमागच्छेति शेषः Sy.
१२ अल्पं महान्तं वा। शत्रुमिति शेषः Sy
१३. चिदित्यवकुत्सिते। 'कुत्साचांश्चिदवाहरेत्यवकुत्सिते' (N. 1.4.) इति यास्केनोक्तत्वात्। यद्वा समुच्चयार्थः। कञ्चिदित्यनेन सह समुच्चीयते Sy.
१४. हि ... स्या M. हिंस्या P. हिंस्यात् D. बाधस्व। 'रिष हिंसायाम्' Sy.
१५ अत्यन्तं कुत्सित हिंसन्तमपि शत्रुम् Sy
१६. शत्रूणामतिशयेन भक्षक! ... अद्रेरादर्तर्भक्षक वा शत्रूणाम् Sy. अद्रिवन्। अद्रिरादृणात्येनेन। अपि वात्ते स्यात् N. 4.4
१७. VM explains अवसे। चित्। अद्रिव once only.
१८ रक्ष Sy.
१९. M Adds न after अस्मान्
२० शोभनस्तुत! Sv.
२१. शोचयि० P D दुःखात्तदुत्पादकात्पापाद्वा Sv २२. अवयाता, अधो यापयिता प्रापयितासि। अतः पाहि Sy.
२३. सर्वदा Sv. २४. दुर्मनस्काना रक्षःप्रभृतीनाम्। ... दुष्टमननवता यागविघातकानाम् Sy. २५. अस्मत्स्तुत्या हृष्टः सन् Sv. २६. घातकोऽसि Sy.
२७. रक्षणनिमित्तभूतस्य ... तादृशस्य पापस्य फलप्रतिबन्धरूपस्य। ... यद्वा पापस्य पापिनो रक्षसो राक्षसादेः Sy. रक्षो रक्षितव्यमस्मात् N. 4.18.
२८. रक्षितासि Sy.
२९. मेधाविनो यजमानस्य Sy.

मत्सदृशस्य। एतस्मात्कारणात्। प्रशस्त त्वाम्। तव पिता। जनयति स्म। रक्षसां हन्तारम्।

I.130.

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः।
हवामहे त्वा वयं प्रयस्वन्तः सुते सचा।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥१॥

एन्द्र याह्युप नः। इन्द्र! उपागच्छ। अस्मान्। दूरात्। न। अय सोम। अभिगच्छति हविराहवनीयम्। गृहानिव। राजा। तदेवाह--अस्तमिति। हवामहे। त्वा। वयम्। अन्नवन्तः।

१. अध, अतो हेतोः। 'तमिन्द्रो देवतान्वसृज्यत' (TS. 7. 1. 1. 4.) इत्यादिप्रसिद्ध? (द्वि)द्योतनार्थो हिशब्दः Sy.
२. वसो सर्वेषां निवासभूत! Sy.
३. ० स्तत्वास्तव M.
४. सर्वस्य जनयिताऽऽदिकर्ता परमेश्वरः Sy.
५. अजनयत्। उत्पादितवान् Sy.
६. तथा हे वसो वासयितः ... त्वा ... रक्षोहननायोत्पादितवान्। ... यज्ञादिविघातिनां रक्षःप्रभृतीनां विघाताय हीन्द्रस्यावतारः Sy.
७. VM. ignores सन्। हि। वसो and explains दुर्मतीनाम्। त्वा। जीजनत् once only.
Ms. D. puts the figure ॥१२६॥ here to indicate the end of one hundred and twentyninth hymn. No such number is given in P. and M.
८. प्रत्यागच्छ Sy.
९. अस्मत्समीपम् Sy.
१०. परावतो दूरदेशात्स्वर्गलक्षणात् Sy.
११. स इव। यद्यपि पुरस्तादुपाचाराग्निवेद्यार्थीयो नकारः सर्वत्र तथाप्यत्रौचित्येनोपमार्थीयो गृह्यते। यद्वा परावतो न दूरदेशादिव, यद्यपि यज्ञे सर्वदा सन्निहितस्तथापि स्वर्गाख्यादूरदेशादिवास्मिन्यज्ञे Sy.
१२. पुरोवर्त्यग्निरभिषुतः सोमो वा प्रस्तुतत्वान्निर्दिश्यते। ... अयमिति विभक्तिव्यत्ययः। अमुं देवयजनदेशम् Sy.
१३ अच्छ, अभिप्राप्तुमायाहीति शेषः Sy.
१४. ० विवाह० D.
१५. विदथानि देवनानि, अनुष्ठेयज्ञानानि Sy.
१६. तत्र दृष्टान्त। सत्पतिः सतां सर्वदा वर्तमानानामृत्विजां पालको यजमान इव। ... यद्वा सतां विद्यमानानां फलानां पालकोऽग्नि., स यथा विदथानि यज्ञगृहाण्यागच्छति तद्वत्त्वमपि यज्ञगृहाण्यागच्छ। यद्वा। सतां नक्षत्राणां पती राजा चन्द्रमाः। स यथा ... आगच्छति तद्वत् Sy.
१७. स्वधामस्थानम् Sy.
१८. आह्वयामः Sy.
१९. त्वाम् Sy.
२०. यजमानाः Sy.
२१. ०महे ... मन्नवन्तं M. हविर्लक्षणान्नवन्तः Sy.

सुते। सह विप्रैः। पुत्राः। इव। पितरम्। अन्नभजनाय। दातृतमम्।

पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः।
मदाय हर्यताय ते तुविष्टमाय धायसे।
आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ॥२॥

पिबा सोममिन्द्र। पिब। सोमम्। इन्द्र। अभिपूयमाणम्। ग्रावभिः। भस्त्रया। सिक्तजलम्। आहावम्। इव। तृषित। ऋषभ। मदार्थम्। तुभ्यम्। वृद्धतमाय। पानाय। आयच्छन्त्वश्वा। त्वाम्। हरित। इव। सूर्यम्। अहानि। सर्वाणीव। सूर्यम्।

---

१ अभिषुते सोमे निमित्तभूते सति Sy.

२. ऋत्विग्भिः सहिता. Sy सचा सहेत्यर्थः N 5.5

३ आह्वाने दृष्टान्तः। .पालकं जनकमिव। तं यथा आह्वयन्ति तथा वयमपि त्वां तदर्थमाह्वयामः Sy.

४. अन्न भ० P M. अन्नस्य सम्भजनाय सङ्ग्रामप्राप्तये तज्जयाय हविःस्वीकाराय वा Sy

५. मंहिष्ठं मंहनीय त्वाम्.. आह्वयाम Sy.

६ VM ignores राजेव and explains सत्पतिः। वाजसातये once only

७. इन्द्र is omitted by P. D.

८ पिबा P D. वंसगो वननीयगमनस्त्व.. पिब Sy. ९. पिब। सोमम्। इन्द्र ! omitted by M.

१०. सुवानं सूयमानम्। कर्मणि कर्तृप्रत्ययः Sy.

११. अभिषवसाधनैर्ग्रावभिः Sy.

१२. ० भिस्त्रया P. ० भि ?... सूया M कोशस्थानीयेन दशापवित्रेण Sy.

१३. क्षोधितम्। यद्वा अवतमित्यनेन सह सम्बन्धः। कोशेनेति लक्षणेन (?) सिक्तं, स्वोचितजलेन पूरितम् Sy.

१४. आहावलक्षणमवतमिव। तं यथा ... पिबति तद्वत् Sy.

१५. तृषा शीघ्रगामी ... यथाऽत्यन्तं तृषितो वंसगो वननीयगमनः शीघ्रगामी पुरुष आहावादिकमागत्य पिबति तद्वत् Sy.

१६ वृषभः Sy.

१७. मदाय तृप्तये। हर्यताय विक्रान्तिहेतवे कान्त्यर्थं वा। 'हर्य गतिकान्त्योः' Sy.

१८. तव Sy.

१९ महत्त्वाय प्रवृद्धत्वाय Sy.

२०. यदर्थं मद उपजायते तदर्थाय। ... यद्वा ते तव तुविष्टमाय धायसे अतिप्रभूताय पानाय Sy २१. आ is omitted by D. आभिमुख्येन गमयन्तु। अश्वा इति शेषः Sy. २२. ० न्त्वस्माः P.

२३. The passage beginning with वृद्धतमाय and ending with त्वाम् is missing in M.

२४. तत्र दृष्टान्तः। . . . हरिद्वर्णविशिष्टा एतन्नामका अश्वाः सूर्यमिव। तं यथाऽतित्वरयाऽभिमतदेशमभिप्रेरिता वहन्ति तद्वत् Sy.

२५. M. adds च after अहानि

२६. ० नीव M. २७. तं यथा त एव प्रतिदिनं वहन्ति तथाऽस्मद्यागदिवसेषु प्रतिदिनमावहन्तु Sy.

२८. VM. ignores हर्यताय and explains न। वंसगः once only.

अविन्ददिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतुमश्मन्यन्तरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः ।
अपावृणोदिषु इन्द्रः परीवृता द्वार इषः परीवृताः ॥३॥

अविन्दद् विवः । असुरैर्गुहायाम् । निहितम् । दिव । निधि सोमम् । इन्द्रोऽविन्दत् । पक्षिण । इव । गर्भम् । जरायुषा परिवेष्टितम् । पर्वते । महति । अन्त । गोव्रजम् । आयुधवान् । सम्भक्तुम् । बृहस्पतिरिव । अपावृणोत् । अन्नानि सोमलक्षणानि । इन्द्र । पर्वते परिवृतानि । द्वाराणि । अन्नान्यपावृणोदिति द्विकर्मक ।

दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षयेव तिग्ममसनाय
सं श्यदहिहत्याय सं श्यत् ।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना ।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥४॥

दावृहाणः । दृहयन् धारयन् । इन्द्र । वज्रम् ।

---

१. अतिगोप्ये प्रदेशे पर्वतादौ Sy.
२. स्थापितम् Sy.
३. द्युलोकादानीतं सोमम् Sv. ४. अत एव निधिं निधिस्थानीयमनाशमित्यर्थः Sy.
५. अलभत, लब्धवान् । द्युलोकाद् गायत्र्या पक्षिरूपयाऽपहृतं भूमावानीतं स्वीकृतवानित्यर्थः । द्युलोकादानयनं तैत्तिरीये । 'तृतीयस्यामितो दिवि सोम आसीत्त गायत्र्याहरत्' (TB. 3.2.1.1.) इत्यादिषु प्रसिद्धम् Sy.
६. आनयने दृष्टान्तः । . . .यथा कपोतादिस्त्री पक्षिणी स्वशिशुं व्याधादिभयात्कस्मिंश्चिद्दुर्गमे स्थापयित्वा तत्स्थानमजानती परिभ्रम्य विन्दते तद्वदित्यर्थः Sy.
७. शिशुम् Sy.
८. लताकण्टकादिना परितो वेष्टितम् Sy. जरायुणा is suggested for जरायुषा
९. पाषाणे । . . . अनन्तेऽश्मनि, अपरिमितपाषाणे पर्वतादौ Sy. १०. अतिमहति विस्तृते Sy ११. गवां व्रजमिव Sy.
१२. ० वा D. सत्स्वपीतरेषु देवेषु कोऽस्यातिशय इति तत्राह । अयमिन्द्रः. . .वज्रवान् । . . . पणिनाऽसुरेणापहृतं भूमौ खनित्वा पाषाणेन पिहितद्वारं गवां व्रजं यथा तमसुरं जित्वा द्वारमुद्घाटय लब्धवांस्तद्वत् Sy.
१३ ०क्तु D. ० व्रज. . .वान् . . .संभक्त M. सोमं सिषासन् सम्भक्तुमिच्छन् Sy.
१४. अपावृतान्यकरोत् । उद्घाटितवानित्यर्थः Sy. १५. अन्नहेतुभूतस्योदकस्य . . . इष्यमाणानि व्रीह्याद्यन्नानि Sy.
१६. ०णान् M. १७. पूर्वत P. भूमौ Sy.
१८. परितो मेघेनावृताः . . . परितो व्याप्तान्यकरोत् । वज्रेण मेघं भित्त्वा जलवर्षणेन सस्यादिसमृद्धिं कृत्वा व्रीह्यादिकं भूमौ व्याप्तमकरोदित्यर्थः । यतोऽयमेवं कृतवानतः सोमस्वीकारो युक्तः Sy.
१९. VM. explains अश्मनि । परीवृताः once only. २०. वृद्धं गृह्णन् Sy.

बाह्वोः[1]। परशुमिव[2] शकलीभावसाधनम्। तीक्ष्णम्[3]। निरसनाय[4]। तीक्ष्णीकरोति। अहिं[5] हन्तुम्[6]। परियमाण[7]·?। बलेन[8]। मज्जकेन?। परसेनाभि[9]। त्वमिन्द्र! तष्टेव[10]। वृक्षम्[11]। परशुना[12]। भजवत.? शत्रून्[13]। निवृश्चसि[14]।

त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँइव वाजयतो रथाँइव।
इत ऊतीरयुञ्जत समानमर्थमश्वितम्।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥५॥

त्वं वृथा[16]। त्वम्। अनायासेन। नदी। इन्द्र[18]! सरणाय[19]। उदधिम्। प्रत्यञ्जसा[20]। विसृजसि[21]। रथानिव[22] सारथय। अन्नमिच्छमाना[23] शत्रुभ्य[24]। अस्मादिन्द्रान्मरुत.[25]। साधारणम्[26]।

---

१. गभस्तीति बाहुनाम, 'गभस्ती बाहू' (Ngh. 2.4.) इति तन्नामसु पाठात् Sy २. तत्र दृष्टान्तः। क्षप्येव उदकमिव। उदकं यथा शत्रूणां निरसनायाभिमन्त्रणादिसंस्कारेण तीक्ष्णीक्रियते तद्वत्। क्षप्येत्युदकनाम,'क्षप्या नभ' (Ngh. 1.12) इति तन्नामसु पाठात् Sy. ३. अत्यन्ततीक्ष्णं वज्रम् Sy.
४. तीक्ष्ण...रसनाय M. शत्रोरुपरि क्षेपणाय Sy
५. अहिं M. पुनरपि तदेव विशेष्यते.. अहेर्वृत्रस्य मेघस्य वा Sy
६ हन्तु P. हननाय। ... पूर्वमेव तीक्ष्ण सत्पुनरपि वधाय तीक्ष्णयति Sy.
७. सम्यग्युक्तः सन् Sy. परीयमाण· is suggested for परियमाणः
८ पराभिभवनसामर्थ्येन Sy.
९. मज्जकेन P.D. शारीरेण च बलेन Sy
१०. ० पित्स्वम् P. सेनालक्षणैर्बलैः Sy.
११. तक्षेव M यथा कश्चित्तष्टा वृक्षाणां तक्षणस्य साधु कर्ता Sy.
१२. वनसम्बन्धिनो वृक्षान् निवृश्चति, स्वोपयोगाय नितरां छिनत्ति तक्षणेन तनूकरोति तथा त्वमपि ... शत्रुं निवृश्चसि Sy.
१३. भजतवः P अस्मासु वक्रमाचरन्तम् Sy.
१४. अस्मद्द्वेषिणम् Sy.
१५. निवृश्चसि D. यथा परशुना कश्चिच्छिनत्ति वृक्षं तथा त्वमप्युक्तैस्त्रिविधैर्बलैर्नितराम्... वृश्चसि Sy.
१६ VM. explains सम्। श्यत्। नि। वृश्चसि once only.
१७. वृथा मना० M. अप्रयत्नेनैव Sy.
१८ P. reads नरिन्द्र for नदीः and इन्द्र।
१९. सर्तवे प्राप्तुम् Sy. २०. प्रत्यञ्जरा (सृजः) M. अच्छ .. आभिमुख्येन Sy.
२१ मेघ निर्भिद्योत्पादितवानसि Sy.
२२. तत्र दृष्टान्तः। ...यथा त्वं रथानस्मद्यागं प्रति... आभिमुख्येन प्राप्तुमसृजः सृष्टवानसि तद्वत् Sy.
२३. सङ्ग्राममग्नं वेच्छन्तो राजादयो रथानिव। ते यथा सङ्ग्रामं प्रत्योधव्यादिकं वाऽतिसर्तुं रथान् सृजन्ति तद्वत् Sy.
२४. ० नान् P. D.
२५. इतोऽस्मत्सन्निधिदेशम्। द्वितीयार्थे तसिल् अस्मान्प्रति Sy.
२६. ० विन्द्रा P. विन्द्र D.
२७. समानप्रयोजनवत्। ... अर्थशब्द उदकविशेषणः सप्तपुंसकलिङ्गः Sy.

वृष्टिलक्षणम्। [१] उदकम्। [२] गमनशीलम्। [३] प्राप्ता। [४] धेनव। [५] सर्वस्य दोग्धारः। [६] जाताय। [७]

इमां ते वाचं वसूयन्त आयवो रथं न धीरः
स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम्।
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥६॥

इमां [८] ते वाचम्। इमाम्। [९] ते। [१०] वाचम्। [११] धनकामा.। [१२] मनुष्या। [१३] रथम्। [१४] इव। प्राज्ञ। [१५] शोभनकर्मा। [१६] संस्कृतवन्त। [१७] सुखाय। [१८] त्वा च। [१९] शोभयन्त। [२०] जयशीलम्। [२१] यथा। सङ्ग्रामेषु। प्राज्ञ। [२२] अश्व [२३] संस्कुर्वन्ति। [२४] अतनशीलम्। [२५] बलकराय। [२६] विश्वान्येव।

---

१. अक्षितमित्युदकनाम। 'अक्षित बर्हिः' (Ngh. 1.12.) इति तन्नामसु पाठात् Sy.

२. ऊर्त्यो गमनवत्यो रक्षणवत्यो वा नद्य Sy.

३. योजितवत्यः। त्वत्प्रसादादिति भावः Sy.

४. तत्र दृष्टान्तः। मनवे मनोरर्थाय. धेनवो यथा Sy. ५. सर्वार्थदोग्ध्र्योऽभवन् Sy. दोग्ध्र्यः is suggested for दोग्धार

६. ०ग्धा यो जताय P. यथा वा जनाय यस्मै कस्मैचित्समर्थाय तदर्थं विश्ववदोहसो भवन्ति सर्वक्षीरप्रदा भवन्ति। यद्वा जनाय सर्वजनार्थं सस्यादीनभिलक्ष्य नद्यो विश्ववदोहसः सम्पूर्णदोग्ध्र्यो भवन्ति। सर्वत्र प्रवहन्ति। अत्र नद्यः प्रीणनाद्दोहस इत्युपचर्यते Sy. ७. ईदृग्जगदुपकारिवृष्टिप्रद इतीन्द्रस्यैव स्तुतिः Sy. VM. ignores इव। मनवे and explains रथानिव। विश्ववदोहसः once only.

८. इमां क्रियमाणाम् Sy. ९. मे M. त्व दर्थम् Sy. १०. स्तुतिरूपां वाचम् Sy.

११. धनकामाः M. धनमात्मन इच्छन्तः Sy.

१२. दातव्यहवीरूपान्नवन्त ऋत्विजः। आयव इति मनुष्यनाम। 'आयवोऽवः' (Ngh. 2.3.) इति तन्नामसु पाठात् Sy. The order of the Ngh. is however not followed by Sy. in these quotations

१३. रथमिव। तं यथा प्रयत्नेन साधु करोति तद्वत् Sy. १४. प्राज्ञाः P धीरो धीमान् Sy. १५. शोभनकर्मवान्कुशली Sy.

१६. संस्तुतवन्तः P. अतक्षिषुः सम्पादितवन्तः ... अनुकूलमुत्पादयन्ति Sy.

१७. सुम्नमिति सुखनाम। 'सुम्नं सुम्यम्' (Ngh. 3.6.) इति तन्नामसु पाठात् Sy. The order of the Ngh. is however not followed by Sy in these quotations.

१८. गुणैर्दीपयन्तःSy. १९. जयशीलं शूरम्Sy.

२०. मेधाविन्निन्द्र! Sy. २१. प्राज्ञाश्च P.

२२. कुर्वन्ति P. D. ०न्तु M. त्वाम्... स्तुत्या प्रीणयन्ति। तत्र दृष्टान्तः। ... यथा ... भटाः स्तुवन्ति तद्वत् Sy.

२३. यद्वा ... वाजिनं वेगवन्तम् ... यथोत्साहयन्ति तद्वत् Sy. २४. ०कर M. बलाय। धना धनानां सातये लाभाय च स्तुम इति शेषः Sy. २५. न केवलं धनमात्रम्। किन्तु ... कृतस्नानि Sy.

धनानि। त्वत्तत्? । सम्भक्तुम्।

भिनत्पुरो नवतिमिन्द्र पूर्वे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो।
अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत्।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥७॥

भिनत् पुरः। भिन्नवानसि। नवतिम्। पुरी। पुरवे। दिवोदासाय। महद्धवि॰। प्रयच्छते। नेत.! वज्रेण। अतिथीन् प्रति गच्छते दिवोदासाय। शम्बरम्। उग्र इन्द्र। शिलोच्चयादुर्गात्। अधो हृतवान्। महान् शम्बरस्य। सर्वाण्येव। प्रयच्छन्। बलेन।

इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु।
मनवे शासदव्रतान्त्वचं कृष्णामरन्धयत्।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥८॥

इन्द्रः समत्सु। इन्द्र.। सङ्ग्रामेषु। यजमानम्। त्रैवर्णिकम्। प्ररक्षति। सर्वेषु। अनेक-

---

१. प्रीणनसाधनानि गवादिधनानि। षष्ठ्यर्थे द्वितीया। तेषां लाभाय Sy. २. सभ० D. तत्र दृष्टान्तः। धना धने सङ्ग्रामे शवसे वैरिजयसाधनबलाय मातये तेषामेव धनाना प्राप्तये च...सततगामिनमश्वमिव। तं यथा स्तुवन्ति तद्वत् Sy.
३. VM. ignores इव। धना and explains अतक्षिषुः। सातये once only.
४. एतत्सङ्ख्याकानि Sy. ५. शत्रूणां पुराणि Sy. ६. अभिमतपूरकाय Sy.
७. मनुष्यनामैतत्। महि महते दिवोदासायैतन्नामकाय राज्ञे Sy.
८. नतेः D. नृतो रणे नर्तनशील!...तथा हे नृतो गात्रविक्षेपणकुशल! हस्तपादादिप्रक्षेपेण शत्रूणां हिंसक! Sy.
९. क्षेपणसमर्थेनायुधेन।...दिवोदासायान्यस्मै वा भिनत्। तमपि शत्रुं भिन्नवानसि Sy.
१०. इदानीं परोक्षेणाह। पूजार्थमतिथिं गच्छते दिवोदासाय तदर्थम् Sy.
११. पूर्वं पुरभेदनसमये विद्युमप्यक्रियमाणं गिरिमारूढं शम्बरमेतन्नामानमसुरम् Sy.
१२. उद्गूर्णबलः Sy.
१३. गिरेर्दुर्गमात्पर्वतादेः सकाशात् Sy.
१४. ओजसा स्वकीयेन बलेन Sy.
१५. अवाङ्मुखमवकृष्य प्राणं हृतवान् Sy.
१६. महन् P. किं कुर्वन्।...महान्ति धनानि तदीयगवाश्वादीनि Sy. १७. ०ष्ये D. न केवलमल्पं धनं, किन्तु...धनानि सर्वाण्यपि तेषां मणिमुक्तादीनि Sy.
१८. दयमानो दिवोदासाय राज्ञे साधयन् Sy.
१९. VM. ignores इन्द्र। धनानि and explains दाशुषे। नृतो। ओजसा once only.
२०. रणेषु प्रहारनिमित्तेषु। समत्स्विति सङ्ग्रामनाम। 'समत्सु...समरणे' (Ngh.2.17)इति तन्नामसु पाठात्Sy.
२१. यष्टारम् Sy. २२. ०र्यव० D. आर्यमरणीयं सर्वैर्गन्तव्यम् Sy.

रक्षणः। युद्धेषु। सर्वकामानां सेक्तृषु। आजिषु सोऽयम्। अयजमानान्। मनवे राज्ञे। शासत्। मेधम्। वशमनयत्। सर्वं जनम्। न। दहति। हिनस्ति। परस्वेषु तृष्यन्तम्। बाधमानम्।

सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति।
उशना यत्परावतोऽजगन्नूतये कवे।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥९॥

सूरश्चक्रम्। सूर्यात्। रथस्य चक्रम्। ओजसा। जनित इन्द्र। असुरवधाय प्र वृहत्।

---

१. स्वभक्तेष्वपरिमितरक्षणः।... लिङ्ग-व्यत्ययः Sy.

२. आजिषु सर्वेषु स्पर्धानिमित्तेषु सङ्ग्रामेषु यजमानं प्रावत् Sy.

३. स्वर्गदेशेषु सुखस्य सेचयत्सु वा Sy.

४. महासङ्ग्रामेषु प्रावत् स्वर्गप्रदानेन रक्षति। रण आभिमुख्येन हतानां वीराणां स्वर्गः पराशरेण स्मर्यते—
द्वाविमौ पुरुषौ लोके
सूर्यमण्डलभेदिनौ।
परिव्राड् योगयुक्तश्च
रणे योऽभिमुखो हतः॥
(पराशरस्मृतौ ३. २५.) इति Sy.

५. अत्रेतिहासमाचक्षते। अशुमती नाम नदी। तस्यास्तीरे कृष्णनामाऽसुरो वर्णतश्च कृष्णो दशसहस्रैरनुचरैरुपेतस्तद्देशवर्तिनः पीडयन्नास्ते। तत्रेन्द्रो बृहस्पतिना प्रेरितः सन्मरुद्भिः सहितः कृष्णां तदीयत्वचमुत्कृत्य सानुचरमवधीत्। अयमर्थः 'अव द्रप्सो अशुमतीमतिष्ठत्' (RV. VIII. 96.13) इत्यादिनोपरिष्टाद् वक्ष्यते। तदत्रोच्यते। ...अव्रतान् व्रतमिति कर्मनाम। अव्रहितान्यागविद्वेषिणः Sy.

६. मनुष्याय। विभक्तिव्यत्ययः। मनुष्याणामर्थाय Sy.

७. शंसन् D. शासन् P. शिक्षितवान्। हिंसितवान् Sy.

८. कृष्णां त्वच कृष्णनाम्नोऽसुरस्य कृष्णवर्णां त्वचम् Sy.

९. उत्कृत्य ...हिंसितवान् Sy.

१०. ० नयत्सोऽय सर्व M.

११. दहति M.P. M. Adds न after दहति। भस्मीकरोति Sy.

१२. ह० P. दहति। यत्किञ्चिदवशिष्टमिति नेत्याह ... हतावशिष्टं सर्वमपि नि ओषति निःशेषेण दहति Sy.

१३. तृप्य० P.D. हिंसकं तदनुचरसङ्घम् Sy.

१४. अशंसानं हिंसारुचिम् Sy.

१५. VM. explains ओषति once only and ignores नि।

१६. अत्रापीतिहासमाचक्षते। केचनासुराः पूर्वमिन्द्रवज्रेण वधो मा भूदिति ब्रह्मणो वरं लब्ध्वा, इन्द्रमगणयित्वोद्भूता आसन्। तान्हन्तुमिन्द्रः सूर्यरथस्य चक्रमादायावधीदिति। तदिदमुच्यते ... सूर्यस्य। षष्ठ्यर्थे प्रथमा Sy.

१७. सूर्यं P.

१८. चक्रमादाय Sy.

१९. शारीरेण बलेन Sy.

२०. समृद्धः सन् Sy.

२१. प्रा M. प्रक्षिप्तवान् Sy.

अथासुरेषु [1] प्राप्तावेव। असुरैरपहृतां [2] तां वाचम्। आरोचमानः [3]। मुषायति [4] स्म। ईश्वरः [5]। यदा। काव्य [6] उशना [7]। दूरात् [8] त्वा प्रति। कवे [9]! तत्परिरक्षणार्थम्। जगाम [10] तदानीम्। साधनानि [11]। विश्वानि [12]। यथा। क्षिप्रकारी [13] मनुष्य [14]। अतितरति [15]। यथा वा। अहानि [16]। सर्वाण्यादित्य एव दुरितानि सर्वाण्यतितरन्ति [17] स्म [18]।

स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शुग्मैः।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥१०॥

स नो नव्येभिः [20]। स [21]। अस्मान्। नवतरैः। वर्षणशीलकर्मन् [22]! उक्थैः [23]। पालनैः [24]।

---

१. प्रपित्वे तेषां समीपे तत्समीपमागत्य। . प्रपित्व इत्यासन्ननाम Sy.

२. ०हृतता D. ३. वागुपलक्षितं प्राणम् Sy. ४. अरुणवर्णोऽत्यन्ततेजोयुक्तः सन्। यद्वा गमनशीलः सन् Sy.

५. ०दि D. मुमोष मुष्णाति वा। ... यद्वा वाचं तेषां प्रहारध्वनिं मुषायति। तेषु हतेषु ध्वनिः स्वयमेव विश्रान्तो भवति। अवधीदित्यर्थः Sy.

६. ० रेण P. अथवा। इन्द्र एव द्युस्थानः सन्नादित्यात्मना स्तूयते। सूरः सूर्यो जात उदितः सन्नोजसा स्वकीयेन तेजसा युक्तश्चक्र प्र वृहत् तमोनिवारणार्थमसुरजयाय वा चक्रोपलक्षितं रथं प्रकर्षेणोद्यतं करोति। ततः पूर्वमरुणस्तद्रथयन्ता प्रपित्वे मन्वेहाद्यसुराणां प्रपित्वे समीपे वाचं तेषां 'जहि भिन्धि' इत्यादिध्वनिं मुषायति मुष्णाति। ... तदनन्तरं सूर्य ईशानः सर्वाणि तमांस्यसुरान्वा निराकर्तुं समर्थः सन्ना मुषायति समन्तान्मुष्णाति Sy. ७. यः P.

८. अथ प्रत्यक्षकृतः। ... उशनस एतन्नाम्नो महर्षेः Sy. ९. दूरात्स्वर्गस्थानात् Sy.

१०. हे कवे क्रान्तदर्शिन्! Sy.

११. गतवानसि। प्राप्तवानसि ... यद्वोशना उशनसा युक्तः सन् ... आगच्छ Sy.

१२. सुखसाधनानि धनान्यादाय Sy.

१३. साधनानि। विश्वानि missing in M.

१४. अस्माकं...तूर्णवनिः क्षिप्रं सम्भक्ता भवेति शेषः Sy. तुर्वणिस्तूर्णवनिः N. 6. 14.

१५. तत्र दृष्टान्तः। ... मनुष्येणेव। यथा त्वोतेन परिवृढाय देशान्तरादभिमतं धनमानीयते तद्वत्। यद्वा मनुषेव मनुष्याणामिवेतरेषामृत्विजां, विश्वा सुम्नानि सर्वाणि धनान्यादाय Sy.

१६. ०तिरति P.D. तुर्वणिर्भवसि तद्वदस्माकमपि Sy.

१७ न केवलमेकस्मिन्नेव यागदिने किन्तु ... विश्वान्यप्यहानि, सर्वेष्वप्यहस्सु तुर्वणिर्भव। यद्वा तुर्वणिस्त्वम् ... विश्वान्यहानि, अतिदीर्घमायुष्यं यथा ददासि तथा सुम्नान्यपि, उभयमपि देहीत्यर्थः Sy.

१८. ० तिर० P. D.

१९. VM. ignores आ and explains मुषायति। तुर्वणिः once only.

२०. स तादृशो महानुभावस्त्वम् Sy.

२१. अस्मत्सम्बन्धिभिः Sy.

२२. अभिमतवर्षणव्यापारवन्! पुरां दर्तः, असुरपुराणां दारयितः! Sy.

२३. इदानीं प्रतिपादितप्रकारैस्स्तोत्रैस्तुष्टः सन् Sy. २४. नवतीरर्वर्षणशील क... पा० M. पालनप्रकारैः Sy.

पाहि[1]। शक्ते[2]। दिवोदासपुत्रैरस्माभिः[3]। इन्द्र! त्वम्। स्तूयमानः। वर्धस्व[4]। अहोभिरिव[5]। देवनशील आदित्य[6]।

I.131.

इन्द्रा॑य॒ हि द्यौरसु॑रो॒ अनम्न॒तेन्द्रा॑य म॒ही पृ॑थि॒वी व॑रीमभि॒र्भूम्ना॑सा॒ता व॑रीमभिः।
इन्द्रं॒ विश्वे॑ स॒जोष॑सो दे॒वासो॑ दधिरे पु॒रः।
इन्द्रा॑य॒ विश्वा॒ सव॑नानि॒ मानु॑षा रा॒तानि॑ सन्तु॒ मानु॑षा ॥१॥

इन्द्राय हि। इन्द्राय। हि[7]। द्यौ[8]। बलवान्[9]। अभवत्प्रह्व[10]। इन्द्राय। महती। पृथिवी[11]। उरुत्वं[12]। दत्तान्न[13]?। इन्द्रम्। विश्वे[14]। देवा। सङ्घना[15]। पुरस्कुर्वन्ति[16]। इन्द्राय। सर्वाणि। मनुष्यै[17]. कृतानि। दत्तानि[18]। सन्तु[19]। सवनानि[20]।

---

१. पालय Sy.

२. शग्मैः सुखैरैहिकामुष्मिकरूपैः Sy.

३. दिवोदासगोत्रोत्पन्नैः Sy.

४. परुच्छेपैः। यद्वा पूजार्थं बहुवचनम् Sy.

५. वर्धस्व P.

६. आदित्योऽहोभिः प्रसिद्धैर्यथा प्रवृद्धो भवति तथाऽस्मत्स्तुत्याऽत्यन्तं प्रवृद्धो भवेत्यर्थः Sy.

७. द्योतनशीलः Sy.

८. VM. ignores पुराम्। दर्तः

९. एव।...हिशब्दः प्रसिद्ध्यर्थो वा Sy.

१०. द्योतनशीलो द्युलोकस्तन्निवासी देवसङ्घो वा

११. स चासुरो निरसनशीलः। शत्रूणां पुण्यकृतामेव तन्निवासात् Sy.

१२. स्वयमेव प्रह्वो भवति Sy.

१३. भूमिः। तत्रत्यः सर्वो जनो वा...। उभयत्राश्रयवाचिशब्देनाश्रयी लक्ष्यते। ग्राम आगत इतिवत् Sy.

१४. केन साधनेनेति तदुच्यते...वरणीयैः स्तोत्रैर्हविर्भिर्वा Sy.

१५. उरुत्तान्न M. अन्नस्य यशसो वा लाभे निमित्ते सति। वरीमभिर्वरणीयैर्हविर्भिर्युक्ता यजमानाः प्रह्वा भवन्ति Sy. दत्तान्ना is suggested for दत्तान्न

१६. विश्व P D

१७. समानप्रीतियुक्ता ऐकमत्यभाजः Sy.

१८. पूर्वमसुरजयार्थं पुरो दधिरे पुरतः स्थापितवन्तः। इन्द्रमुखेनैवासुराञ्जितवन्त इत्यर्थः Sy.

१९. मनुष्याणां सम्बन्धीनि...मनुष्याणामृत्विजां सम्बन्धीनि Sy.

२०. दातव्यानि पुरोडाशादीनि Sy.

२१. भवन्तु...इन्द्रार्थमेव सन्तु। इन्द्रं प्रीणयितुं समर्थानि भवन्त्वित्यर्थः Sy.

२२. वसनानि P.
अभिषवयुक्तानि प्रातराद्यसवनानि Sy.

२३. VM. explains वरीमभिः and मानुषा once only.

विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः
पृथक् स्वः सनिष्यवः पृथक्।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि।
इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ॥२॥

विश्वेषु हि त्वा। त्रिष्वपि। हि। त्वा। सवनेषु। प्रेरयन्ति। साधारणम्। एकम्। निर्गच्छस्तोत्रा ?। पृथक्। पृथक्। सर्वम्। सम्भक्तुमिच्छन्त। तम्। त्वा। नावम्। इव। तारयित्री नदीतरणाय। सुखस्य। धुरि। निदध्म। इन्द्रम्। एव। यज्ञैः। मनुष्या। बोधयन्ति। स्तोत्रैश्च।

---

१. विश्वेषु सर्वेषु Sy.

२. त्वाम् Sy.

३ तद्वत्सु, एकाहाहीनसत्ररूपेषु सर्वेषु सोमयागेषु Sy.

४. यजमानाः ... त्वरयन्ति। हविरादीनि ददते Sy.

५ कीदृशं त्वाम्? समानं सर्वेषामेकरूपम् Sy.

६. कीदृशा यजमानाः? ... अभिमतवर्षणाय त्वामेव मन्यमानाः Sy.

७ विविच्य स्वस्वयागे Sy.

८. स्वः स्वर्गं सुखविशेषं वा Sy.

९. सम्भक्तुकामाः ... पृथगेव त्वरयन्ति। तुञ्जतिर्वानार्थः। 'शिक्षति तुञ्जते' (Ngh. 3. 20.) इति तन्नामसु पाठात् Sy.

१०. तादृशम् Sy.

११. तत्वा M. सुत्वा P.
० च्छन्तसुत्वा D.
त्वाम् Sy.

१२. ० श्री M. तत्र दृष्टान्तः। ... पारस्य सम्भक्त्रीं पूरयित्रीं वा फलस्य नावमिव। तां यथा भारवहने स्थापयन्ति Sy.

१३. बलस्य सेनारूपस्य। ... यद्वा शूषस्यास्मदीयशारीरबलस्य धुरि धीमहि। शूषमिति बलनाम। 'शूषं सहः' (Ngh. 2. 9.) इति तन्नामसु पाठात् Sy.

१४. वहने Sy.

१५. निदधुः P. तज्जयाय धीमहि स्थापयामः Sy.

१६. साधनैः Sy.

१७. म(नु)ष्याः M.
कीदृशा वयम्? आयवो मनुष्या यजमानाः Sy.

१८. चितयन्तः परमेश्वरमिव त्वां चेतयन्तः। परमेश्वरबुद्ध्या भावयन्त इत्यर्थः। यद्वा नशब्द एवकारार्थः। इन्द्रमेव त्वां जानन्तः Sy.

१९. स्तोत्रैः ... इन्द्रमेवायवो गच्छन्तो वयं धीमहि Sy.
VM. explains इन्द्रम्। आयवः once only.

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता
गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः ।
यद्गव्यन्ता द्वा जना स्वर्यन्ता समूहसि ।
आविष्करिक्रद्वृषणं सचाभुव वज्रमिन्द्र सचाभुवम् ॥३॥

वि त्वा ततस्रे[1] । रक्षणेच्छव[2] । उभयविधा[3] । त्वाम्[4] । उपभक्षयन्ति[5] । गव्यस्य[6] । व्रजस्य[7] । सातये[8] । हविषा स्तुतीना च निस्रष्टारस्त्वाम्[9] । इन्द्र[10] भजमाना[11] । यत्त्वम्[12] । गा इच्छन्ती[13] । स्वर्गं गच्छन्ती च[14] । द्वौ[15] । इमौ । सवहयस्यभिलषित[16] प्रापयसि । आविष्कुर्वन्[17] । कामाना

---

१. इन्द्रायात्मने वा तृप्तिमिच्छन्तः Sy.

२. पत्नीसहिता यजमानाः । नच सर्वत्राग्निहोत्रादिनित्यवाक्येषु, कारीरीचित्रादिकाम्यवाक्येषु, यस्योदयं यस्य गृहानित्यादिनैमित्तिकवाक्येषु पुरुषस्यैवार्थित्वादेः सद्भावात्तस्यैवाधिकारः स्त्रियास्तु सत्यप्यर्थित्वेऽध्ययनाभावेन विद्वत्ताया अभावादत एव सामर्थ्याभावाच्च नास्त्यधिकार इति वाच्यम् । यद्यपि स्त्रिया नास्ति पृथगधिकारस्तथापि पूर्वमीमांसायां षष्ठेऽधिकाराध्याये तृतीयचतुर्थाभ्यामधिकरणाभ्यामस्त्येव स्त्रिया अधिकारः । स च पत्या सहेति प्रपञ्चितत्वाज् जायापती अग्निमादधीयातामित्याधानविधानात्, स्मृतिषु च 'नास्ति स्त्रीणां पृथग्यज्ञो न व्रतम्' (Manu 5. 155.) इति पृथगधिकारस्यैव निवारितत्वादस्त्येव स्त्रियाः पत्या सहाधिकारः । अध्ययनाभावेऽपि 'वेदं पत्न्यै प्रदाय याचयेत्' (ASS. 1.11.) इति सूत्रकारवचनात् । 'पत्न्यन्वास्ते' इत्यादिविधिषु 'सुप्रजसस्त्वा वयम्' (TS. 1.1.10.1.) इत्यादिमन्त्रविधानाच्चत्र वचनमस्ति तत्रास्त्येव मन्त्रेऽधिकारः । 'किं हि वचनेन कुर्याद्यास्ति वचनस्यातिभारः' इति न्यायात् । तस्मान्मिथुना यज्ञं ततस्र इत्येतदुक्तम् Sy. ३. त्वामुद्दिश्य Sy.

४. यज्ञं वितन्वते । यद्वा यज्ञे पयोव्रतादिनाऽऽत्मानमुपक्षयन्ति । ततु उपक्षये Sy.

५. किमर्थम् । . . . गवा सम्बन्धिनः Sy.

६. यूयस्य Sv.

७. लाभे निमित्तभूते सति Sy.

८. ० षा P D.

९. स्रष्टारस्त्वाम् P. स्रष्टारं त्वां D. निस्रष्टार त्वां M. निश्शेषेण हविस्त्यजन्तः . . . पुनस्त एव विशेष्यन्ते . . . फलप्रतिबन्धकं पापं निर्गमयन्तः Sy.

१०. सक्षतिर्गत्यर्थः । त्वां सम्भजमानाः Sy.

११. य P. D. M. कस्तव विशेष इति तदुच्यते यद् यस्मात्कारणात् Sy.

१२. ० न्तं P D.M.

१३. ० न्तं P.D.M. स्वर्गं यन्ती, गन्तुमुद्युक्ती Sy.

१४. द्वौ जायापतिरूपौ जनौ Sy.

१५. समूहसि संयुक्तयोरेवाभिमतं स्वर्गादिकं प्रापयसि । यद्वा सम्यगनुष्ठितवन्तावित्यूहसि निश्चिनोषि । अतः पत्नीसहिता अनुतिष्ठन्तीत्यर्थः Sy.
संवहस्य० is suggested for संवहयस्य०

१६. आविः M. आविष्कुर्वन् प्रकटयन्वर्तस इति शेषः Sy. १७. कामान् P.D.

वर्षितारम्[1]। त्वयाऽविनाभूतम्[2]। वज्रम्[3]।

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र
शारदीरवातिरः सासहानो अवातिरः।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥४॥

विदुष्टे[4] अस्य[5]। जानन्ति[6]। तव[7]। वीर्यम्[8]। इदम्। जनाः[9]। पुरः[10]। यत्। इन्द्र! हिंसकासुरसम्बन्धिनीः[11]। अवाभिनः[12]। अभिभवन्[13]। शासितवानसि[14]। तम्। मारकं[15] शरनामासुरम्[16]। अयजमानम्[17]। बलस्य। पते![18] शासित्वा च तमसुरम्। महत्[19]। अन्तरिक्षम्[20]। इमा वृष्टिलक्षणा। अपः[21]। अमुष्णास्तत आहृतवानसि। सोमेन मन्दमानः[22]।

---

१. वर्षकं कामानाम् Sy.

२. सहोत्पन्नं त्वयाऽविनाभूतं तथा सचाभुवं शत्रुवधादिव्यापारसामर्थ्येन सहोत्पन्नम् Sy.

३. VM. explains नि.सूज । इन्द्र । सचाभुवम् once only.

४ विदुषे D.

५. विदुः Sy.

६. तव सम्बन्धिनः Sy.

७. अस्य वीर्यस्य । कर्मणि षष्ठी । वक्ष्यमाणमेतद्वीर्यं विदुः Sy.

८ ये पूरवो मनुष्या यजमानास्तव महत्त्वं जानानास्त्वामेव यजन्ति ते विदुः। यद्वा, अस्य वीर्यस्य माहात्म्यमिति शेषः Sy.

९. शत्रूणां पुरीः Sy.

१०. यस्मात्कारणात् Sy.

११ संवत्सरसम्बन्धिनीः संवत्सरपर्यन्तं प्राकारपरिखादिभिर्वृद्धीकृताः Sy.

१२. अवाभिमनः P.D. अवातिरोऽन्नाशयः। अवपूर्वस्तिरतिर्नाशनार्थः Sy.

१३. वन् P भवन् D. तत्रत्यानभिभवन्। धनाद्यपहारेण पीडयन् Sy.

१४. निगृहीतवानसि Sy.

१५. मातरं D मर्त्यं मरणधर्माणम् Sy.

१६. शरआ० P.D.

१७. अयष्टार यज्ञविघातिनं राक्षसादिम् Sy.

१८. पालकेन्द्र ! Sy.

१९. महतीम् Sy.

२०. पृथिवीम् Sy.

२१. इवा M.

२२. आपः P. समुद्रनद्यात्मकान्युदकानि Sy.

२३. बलादपहृतवानसि । असुरैरन्यैर्वा यज्ञविद्वेषिभिराक्रान्ता भूमिं तत्सम्बन्धिनीरपश्च तेषां पुराणि भित्त्वाऽपहृतवानसीत्यर्थः Sy.

२४. मन्दसानः P. किं दुःखेन, नेत्याह... हृष्यन्नेवेमा अप इमान्यप्कार्याणि व्रीह्याद्यन्नान्यमुष्णाः, लब्धवानसि Sy.

२५. VM. explains अवातिरः। इन्द्र । इमाः। अपः once only.

आदित्ते अस्य वीर्यस्य चकिरन्मदेषु वृषभुशिजो यदाविथ सखीयतो यदाविथ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे।
ते अन्यामन्यां नद्यं सनिष्यत श्रवस्यन्तः सनिष्यत ॥५॥

आदित्ते अस्य। अनन्तरम्[1]। एव[2]। तव[3]। वीर्यम्[4]। इदम्। तेजनेषु[5]। विकिरन्ति सोमेन। वर्षितः[6]। यत्[7] त्वम्। कामयमानान्[8]। रक्षसि[9]। सख्यमिच्छतस्तथा[10]। एभ्यः[11]। प्रकर्षेण भजनाय[12]। पृतनासु[13]। कर्म[14]। चकर्थ[15]। ते[16]। अन्यामन्याम्[17]। नदीम्[18]। अन्नमिच्छन्त[19]। सम्भजन्ते[20]।

उतो नो अस्या उषसो जुषेत ह्यर्कस्य
बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः।
यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि।
आ मे अस्य वेधसो नवीयसो मन्मं श्रुधि नवीयसः ॥६॥

उतो नः। अपिच[21]। अस्मान्[22]। अस्या.। उषस[23] सकाशात्। यदीन्द्र सेवेत[24]। तत.

---

१. अत एव हेतोः Sy.
२. तव सम्बन्धिने Sy.
३. वीर्याय, तदभिवृद्धये Sy.
४. सोमजनितमदेषु सत्सु Sy.
५. पुनः पुनः सोमं विकिरन्ति ।...सर्वेषु सवनेषु वितरन्ति यजमानाः Sy.
६. वर्षयितः M.
कामानां वर्षितः Sy.
७. य P.D. यतः कारणात् Sy.
८. त्वां कामयमानान्यजमानान् Sy.
९. ० माना रक्ष० M.
१०. तव सखित्वमात्मन इच्छतोऽस्मान् यद्यस्मादाविथ तर्पयसि, अभिमतेन प्रीणयसि, अतश्चकिरन् Sy.
११ अयमानेभ्यः Sy.
१२. ० ना M. प्रकर्षेण वनितुं सम्भक्तुम्। युद्धाय हि धीराः सम्भजन्ते Sy.
१३. सङ्ग्रामेषु Sy.
१४. कारं शब्दं सिंहनादलक्षणम् Sy.
१५. ० त्थ M. करोषि Sy.
१६. तव सङ्ग्रामवासिनः Sy.
१७. त्वय्यन्यामन्यामन्यांश्चान्यांश्चान्यमन्यं प्रति Sy.
१८. नवं सन्तोषं समृद्धिम् Sy.
१९. अन्नमिच्छमाना इच्छन्तः P. D. M. जयात्लब्धमन्नं काङ्क्षन्तः Sy.
२०. VM. explains यत्। आविथ। सनिष्यत once only.
२१. अपि नाम Sy.
२२. अस्माकं सम्बन्धिनीम् Sy.
२३. अस्योष० M. कर्मणि षष्ठी। एतामुषसं सुस्याहःसम्बन्धिनमुषःकालम् Sy.
२४. सेवते D. उषस्येवास्माकमयमिन्द्रो यज्ञं गच्छेदित्यर्थः। हिः पूरणार्थः Sy

स्तोत्रम्[1]। बुध्यते[2]। हविषः[3]। होमैः[4] सह। यज्ञे सर्वैः[5] सम्भक्ते[6]। यदि[7]। त्वमिन्द्र[8]! वज्रिन्[9]! कामानां वर्षितः[10]! शत्रून्[11]। हन्तुम्[12]। बुध्यसे[13]। तदर्थं मम। नवतरस्य[14]। अस्य। होतुः। स्तोत्रम्[15]। आभिमुख्येन[16]। शृणु[17]।

त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम्।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ॥७॥

त्वं तमिन्द्र वावृधानः[18]। त्वम्। तम्। इन्द्र[19]! वर्धमान[20]। अस्मत्काम[21]। अमित्रत्वमिच्छन्तम्। वृद्धजनन[22]! बहुजनन[23]! मनुष्यम्[24]। वज्रेण। जहि[25]। शूर[26]! य। अस्माकम्। पापमिच्छति[27]। शृणुष्वास्माकमभिलषितम्[28]। अतिशयेन शोभनश्रवणस्त्वम्[29]। तवागमने[30]। रिष्ट काष्ठम्[31]।

---

१ अपि नाम जानीहि Sy.
२. गत्वा चार्कस्य हविषः। पूर्ववत्कर्मणि षष्ठी। अर्चनसाधन हवि· Sy.
३. हवनप्रकारविशेषैर्वर्तं हविः Sy.
४ यज्ञ सर्वस्मभक्त P D. स्वर्गस्यान्यस्य सुखविशेषस्य वा सम्भजनस्थाने यज्ञे हवीमभिराह्वानैराहूतो भवेति शेषः। अस्माभिराहूतः सन्नुषस्येवागत्य हविः स्वीकरोषीत्यर्थः Sy
५. यस्मात्कारणात् Sv
६ वज्रयुक्तेन्द्र!
७ वर्षिता सत्कामानाम् Sy.
८. हिंसकान् शत्रून् Sv.
९. अवबुध्यसे Sy
१०. ० र्धमनव M. कीदृशस्य मे? मेधसो मेधाविनो नवीयसो नवतरस्य, दीक्षित-संस्कारैः संस्कृतत्वान्नवीयस्त्वम्। पुनर्विशेष्यते।...अतिशयेन नवनवतोऽसाधारणस्तुतिमतः। अत्र यजमानविशेषणैस्तत्कर्तृकं स्तोत्रमेव विशिष्टं भवति Sy.
११. मम्म मननीयं स्तोत्रम् Sy.
१२. सर्वतः शृणु Sy.
१३ VM ignores हि and explains हवीमभि·। नवीयसः once only
१४ अत्यर्थं वर्धमानः Sy
१५ अस्मांस्त्वदुक्तान्कामयमान· Sv.
१६. ०त्रमि० M अस्मासु शत्रुत्वमाचरन्तम् Sy.
१७ अस्मत्स्तुत्या बहुभावमापन्न! Sv.
१८ मरणस्वभावम् Sy.
१९. भर M. विक्रान्त! Sy.
२०. अघ पापं दुःखं वेच्छति त जहि Sv.
२१. ० ष्व चास्मा० M. श्रावयास्मद्वाक्यम् Sy.
२२ ०वण (त्व तवागमनीयानि दानानि सर्वाणि सह सन्तु तत्तु प्रायः तत्सवाग्न होतस्तव भवति) स्त्वं M.
२३. ०नं P.M. यामन्यध्वनि Sy.
२४. तत्र दृष्टान्तः।...अध्वनः श्रमेण हिंसित परिश्रान्तं यथा दुर्मतिश्चौरादिविषया बाधते तद्वदस्मान्बाधमाना दुर्मतिरपगच्छतु। यद्वा यामनि मार्गे यज्ञादिरूपे रिष्टमसुरकृतहिंसादिरूपं विघ्नं परिहरसि तद्वत् Sy.

इव। अस्माकं दारिद्र्यसङ्कावाद्वर्तमाना सर्वा। दुर्मतिः। क्रमेण नश्यतु।

I. 132.

त्वया॑ व॒यं म॑घवन्पूर्व्ये धन॒ इन्द्र॑त्वोताः सासह्याम पृतन्य॒तो व॑नुयाम वनुष्य॒तः।
नेदि॑ष्ठे अ॒स्मिन्न॑हन्य॒धि वो॑चा॒ नु सु॑न्व॒ते।
अ॒स्मिन्य॒ज्ञे वि च॑येमा॒ भरे॑ कृ॒तं वा॑ज॒यन्तो॒ भरे॑ कृ॒तम् ॥१॥

त्वया वयम्। त्वया। वयम्। मघवन्। प्रत्ने। धने तन्निमित्तम्। इन्द्र! त्वया रक्षिता। अभिभवेम। शत्रून्। हन्याम च। घ्नन्त। अन्तिकतमे। अस्मिन्। अहनि। क्षिप्रम्। सुन्वते मह्यम्। अधिब्रूहि। वयमिम यज्ञ कृत्वा। सङ्ग्रामे। अन्नमिच्छन्त। इन्द्रस्य करणम्। विचयेम, अन्वेषण विचय.।

---

१. सत्भा० D
२. सर्वाद D.
३. त्वत्प्रसादाद् दुर्मतिरस्मज्जिघांसाविषया दुष्टा बुद्धिः।... न केवल हिंसारूपा, अपि तु... सर्वापि क्रोधपरिवादादिरूपाऽप भूतु Sy.
४. अपगता भवतु Sy.
५. VM. explains मर्त्यम्। अप। भूतु। दुर्मतिः once only.
६. त्वया साधनेन युक्ताः Sy
७. मघं सौख्यं तद्वन्निन्द्र! Sy.
८. अस्मिन्यज्ञे Sy.
९. अतिप्रबलेनेन्द्रेण त्वया रक्षिताः सन्तः Sy.
१०. The passage beginning with तन्निमित्तम् and ending with अभिभवेम is missing in M.
११. पृतनामात्मन इच्छतः प्रबलसेनायुक्ताञ् शत्रून् Sy.
१२. हन्यमान P. वनुयाम। तेषामागमनात्पूर्वमेव वयं सम्भजेम Sy.
१३. Omitted by M.
१४. अस्मत्प्रहारायागच्छतः शत्रून् Sy. वनुष्यतिर्हन्तिकर्मा। अनवगतसंस्कारो भवति N 5. 2.
१५. अत्यन्तसन्निहिते Sy.
१६ अभिषवयुक्तेऽह्यतने Sv.
१७. अह M.
१८. नु क्षिप्रम् Sy.
१९. सुन्वते यजमानाय तदर्थम्। .. तं हविष्प्रद यजमानं यज्ञं वा Sy.
२०. अधिकं ब्रूहि Sy.
२१. यजमानाः Sy.
२२. देवानां सङ्ग्रामेऽसुरजये देवानां सम्यग्भरणे वा Sy. भर इति सङ्ग्रामनाम। भरतेर्वा। हरतेर्वा N. 4. 24.
२३. हविर्लक्षणान्नमुपाहरन्तः Sy.
२४. जयस्य कर्तारं त्वामुद्दिश्य त्वज्जयार्थम् Sy. २५. स्तोत्रादिकं हविरादिकं वा विचिनुयाम Sy.
२६. VM. explains भरे। कृतम् once only.
A fragment वनुयाम वनुष्यतः is quoted in N. 5.2. Both Skanda and Durga quote and explain RV. VIII. 40.7.

स्वर्जेषे भरे आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नञ्जसि क्राणस्य स्वस्मिन्नञ्जसि ।
अहन्निन्द्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः ।
अस्मत्रा ते सध्र्यक्सन्तु रातयो मद्रा भद्रस्य रातयः ॥२॥

स्वर्जेषे[1] भरे[2]। सर्वजयोपाये। सङ्ग्रामे। हविर्भिरापूरयितु[3]। वचने[4]। उषसि[5] प्रबुध्यमानस्य[6]। स्वभूते[7]। ऋजुतमे[8]। कर्म कुर्वाणस्य[9]। यथा तेनोक्तम्। इन्द्र। अवगच्छति[10]। तेनैव प्रकारेण तस्य शत्रून् हन्ति। नमस्कारभूतै[12] शिरोभि[13]। स्तोतव्य[14]। अस्मासु[15]। भजनीयस्य[16]। ते[17]। भजनीयानि[18]। दानानि सर्वाणि[19]। सह[20]। सन्तु[21]।

तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्षयमृतस्य वारंसि क्षयम्।
वि तद्वोचेरध द्वितान्तः पश्यन्ति रश्मिभिः ।
स घा विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ॥३॥

तत्तु प्रयः[22]। तत्[23]। तव[24]। अन्नम्[25]। कुमूलादिस्थमिवान्नम्[26]। होतस्तव

---

१. Omitted by P.D.
२. सर्वजनयो० P.D. ०पायः अ M स्वर्गगमनसाधने । . . . युद्ध आभिमुख्येन हतस्य स्वर्गः 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ' (Parāśara 3 25) इत्यादिस्मृतिषु प्रसिद्धः Sy.
३. आपनशीलस्य शत्रुवधायेतस्ततो व्याप्तस्य । . . . कस्य सङ्ग्राम इति तदुच्यते । आप्रस्यापनशीलस्य, आ समन्तादिन्द्रस्य प्रीणयितुर्वा Sy. ४. वक्मनि मार्गभूते Sy. ५. उषःकाले Sy.
६. ०ध्यस्व P.D.M. अनुष्ठानाय प्रबुध्यमानस्य Sy ७. अभिव्यक्तिमति कपटादिरहिते । पुनः स एव विशेष्यते । स्वस्मिन्नञ्जसि स्वकीयेऽञ्जसि मुख्ये महति सङ्ग्रामे । यद्वा । स्वस्मिन्नञ्जसि शत्रौ स्वयमेवाप्रच्छन्नत्वेनागते सति Sy
८. क P.D. कुरु M. यागं कुर्वाणस्य Sy.
९. तत्र दृष्टान्तः । यथा विदे सर्वज्ञाय शिरसा प्रणतिः क्रियते स्तूयते च तथैनमित्यर्थः । यद्वा यथा . . . येन प्रकारेण Sy.
१०. हन्तव्य शत्रुं जानासि तं त प्रहंसि । . अथवा . . . यं यं विन्दसे लभसे शत्रु त तं मारयसि । अतःकारणात्स्तुत्य इत्यर्थः Sy
११ अस्य यजमानस्य शत्रून् . हिनस्ति Sy.
१२. मनस्तारभूतैः P. ०कारसावनभूतैः M.
१३. अतः कारणादयमिन्द्रः शीर्ष्णाशीर्ष्णोपवाच्यः । सर्वैर्वा शिरसा प्रणम्यः स्तुत्यः Sy. १४. ०सुर M.
१५. भद्रस्य स्तुत्यस्य Sy. १६. तव सम्बन्धीनि Sy. १७ अतिस्थिराणि Sy.
१८. रातयोऽस्मासु दत्तानि दानानि Sy.
१९. सहकोद्योगेन Sy. २०. भवन्तु Sy.
२१. VM. explains स्वस्मिन् । अञ्जसि । रातयः once only.
२२. पयः M. प्रियः D.
२३. तत् तु खलु प्रसिद्धम् Sy. २४. तव स्वभूतम् Sy. २५. हविर्लक्षणमन्नम् । शुशुक्वनम्, आज्यादिसंयोगेन भृश दीप्तम् । शुचेर्दीप्तिकर्मण एतद्रूपम् Sy.
२६. कुस्तूलादिस्थमेवा० M.

भवति[१]। यन्निमित्तमृत्विजः[२]। यज्ञे। वरणीयं वेद्याख्यम्[३]। आसादस्थानम्[४]। अकुर्वस्त्वं च[५]। यज्ञस्य[६]। क्षयम्[७]। सम्भक्ता[८]। भवसि। आसन्ने हविषि। तत्। देवेभ्योऽनुवाक्यया याज्यया च द्विविधम्[९]। विवोचे[१०]। तच्चान्तःस्थित हवि[११]। देवा अग्निषु प्रविश्य तत्तेजोभि[१२]। पश्यन्ति[१३]। स[१४]। हि। इन्द्र[१५]। अनुजायते। पशूनामेषणशील[१६]। बन्धुभ्य[१७] प्रजाभ्य[१८]।

नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरपं व्रजमिन्द्र शिक्षन्नपं व्रजम्।
ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च।
सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥४॥

नू इत्था ते[१९]। क्षिप्रम्। इत्थमिव[२०]। पूर्वस्मिन्नपि काले[२१]। ते[२२]। प्रवाच्य तत्कर्म[२३]। यत्[२४]।

---

१ प्रत्नथा पूर्वमितः पूर्वं यथा यागकाले हविस्ते तव स्व भवति तथाऽद्यतनमपि। सर्वदा त्वामेव यजन्त इति भाव. Sy.

२. ०त्त ऋ० M. यस्मिन्हविषि दातव्ये सति Sy.

३. स्थानं वेदिलक्षणम् Sy

४. कुर्वन्त्यृत्विजः Sy

५. ०स्थान ..य० M.

६ कस्तव विशेष इति चेदुच्यते, ऋतस्य सत्यफलस्य यज्ञस्य। ..यद्वा। ऋतमित्युदकनाम तस्य।... अथवा। ऋतस्यादित्यस्य Sy.

७. क्षयं निवासस्थानम्।... (यद्वा) क्षयं स्थानम्।... (अथवा)... क्षयं स्थान द्युलोकाख्यम् Sy.

८. सम्भक्तोऽसि ... प्राप्तोऽसि। वृष्टिप्रदोऽसीत्यर्थः। . वाः, असि यजमानं गमयितासि Sy.

९. ०चस्त० M. ०वाचेस्त० P. विब्रूहि Sy.

१०. तादृशं वक्ष्यमाणं कर्म Sy.

११, अथ, अतः कारणात्... द्वित्वोपेतयोर्द्यावापृथिव्योर्मध्येऽन्तरिक्षे Sy.

१२. रश्मिभिरादित्यकिरणैः Sy.

१३. मेघं निर्भिद्य रश्मिद्वारा प्रवर्षणरूपं कर्म सर्वे जनाः प्रत्यक्षतः पश्यन्ति। अस्मद्दत्तं हविरादित्यं प्रापयित्वा तद्रश्मिद्वारा वृष्टिं जनयसीत्येतत्सर्वैर्दृश्यत इत्यर्थः Sy.

१४ इदानीं परोक्षतया स्तौति। स खलु Sy.

१५. उक्तक्रमेणैव कर्ता सन् विदे विन्दते। उदकप्राप्तिप्रकारं जानाति Sy.

१६. ०ल P.D. उदकस्यान्वेषणशीलः।... गवेषणो गवां प्रसिद्धानामेषणकर्ता।... यद्वा 'गवेष मार्गणे'. .यजमानफलस्य मृगयितेत्यर्थः Sy.

१७. P. adds किञ्चिदप्यजमानं before प्रजाभ्यः।
हविष्प्रदानाविना बन्धुभावं प्राप्तवद्भ्यो यजमानेभ्यः Sy.

१८. VM. ignores तु। शुश्रुवनम् and explains गवेषणः once only.

१९. इतामिव P.D.M. उक्तप्रकारं वक्ष्यमाणरूपं वा Sy.

२०. पूर्वमिव। पूर्वं यथा Sy.

२१. तव सम्बन्धि Sy.

२२. सर्वैः स्तोतव्यम् Sy.

२३. तद्विदानीन्तनमपि स्तुत्यम् Sy.

२४. य P.

त्वमिन्द्र ! अङ्गिरसामर्थाय[1] । गोव्रजम्[2] । अपावृणो[3] । प्रयच्छस्तेभ्य[4] पशून्[5] । एभ्य[6] । समानम्[8] । प्रार्थितोऽतिसृष्ट शत्रुभ्य । अस्मदर्थम् । अभिलषित धनमाजय[10] । युध्यस्व । च । सुन्वद्भ्यो[11] यजमानेभ्य । कम् । चिदपि । अयजमानम्[12] । क्रुध्यन्तम्[13] । वश नय[14] ।

सं यज्जनान् क्रतुभिः शूर ईत्यया युद्धने हिते तरुषन्त श्रवस्यवः प्र यच्छन्त श्रवस्यवः ।
तस्मा आयुः प्रजावदिद्धाये अर्चन्त्योजसा ।
इन्द्रं ओकयं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥५॥

स यज्जनान्[15] । यदा । मनुष्यान्[16] । इन्द्र । प्रज्ञाभि[17] । मयोजयति[18] । तदानी तेऽन्नमिच्छ-मानाः[20] । शत्रुषु निहितम्[21] । धनमुद्दिश्य[22] । शत्रून्[23] घ्नन्ति । प्रकर्षेण[24] च यजन्ते । इन्द्राय[25] । अन्नम्[26] ।

---

१. एतद्गोत्रोत्पन्नेभ्यो महर्षिभ्यस्तेषामर्थाय Sv. २. व्रजमन्तरिक्षे गच्छन्त मेघम् । ...व्रज इति मेघनाम, 'व्रजः . वराहः' (Ngh. 1 10) इति तन्नामसु पाठात् Sy. ३. अपवृतवानसि । मेघमुत्पाटय वृष्टिमुत्पादितवानसि Sv ४. वितरन् । रक्षितवानसि Sy.
५ ०च्छेभ्यः D. अप अयष्टृभ्योऽपहृत्य तेभ्य एवाङ्गिरोभ्यः Sy.
६ व्रजं गवा समूहम् । ...यद्वा पणिभिरपहृत बिले स्थित गवा व्रजमपहर्तुमपावृणो., अपवृतद्वारमकरोः Sy.
७. ०भ्यः P. भ्यः ... शुनेभ्यः M. एभ्य उक्तेभ्य ऋषिभ्य. Sy.
८. समान्या दिशा समानया रीत्या तेभ्यो यथा ववासि तद्वत् Sy.
९. धनं सङ्ग्रामं वा Sy.
१०. धनमाजयन्धनमाज P.D. जय Sy
११. सुन्वभ्यः M. त्वदर्थमभिषवं कुर्वद्भ्यो-ऽस्मभ्यम् Sy.
१२. सर्वमप्ययज्वानं यागविरोधिनम् Sy.
१३. न केवलमयज्वानं किन्तु, हूणायन्तं चिद-व्रतम्, चिदित्यवकुत्सिते । अस्मासु रोषं कुर्वन्तं तमेवायष्टारं स्वयं रोषवन्तं वा । यद्वा ... रोष कुर्वन्तमपि, अव्रतमकर्माण पुनर्हननासमर्थं कुर्वन् Sy.
१४. रन्धय बाधय । मदधीनं कुर्वित्यर्थः Sy.
१५. VM explains अप । व्रजम् । चित् । अव्रतम् once only
१६ य इन्द्रः शूरो विक्रान्तः सन् Sy.
१७ सर्वान्प्राणिन Sy.
१८ Omitted by P.D.
१९. सम्यगीक्षयति तत्तद्विषयान् । अन्तर्यामि-रूपेण सर्वेषां बुद्धिषु स्थित्वा तौबिषया-नुल्लेखयतीत्यर्थः । यद्वा क्रतुभिः कर्मभिः सुकृतदुष्कृतरूपैर्निमित्तभूतैस्तत्तत्फलैर्योज-यति Sy.
२०. ०नः P.D.M. एव प्रेरयति सति . . अन्नमिच्छन्तो यजमानाः Sy.
२१. अभिमते सति । यद्वा हिते धनेऽभिप्रेते सति Sy. २२. धने गवादिरूपे Sy.
२३. हिंसन्ति शत्रून् । तरुष्यतिर्वधकर्मा । ... तरतेर्वा ... तरन्तीत्यर्थः Sy.
२४. अतः कारणाच्छत्रूस्यवोऽन्नं हविर्लक्षण-मिन्द्रायात्मने वेच्छन्तः सन्तः ... प्रकर्षेण यजन्ते Sy.
२५. तस्मा इत्, तस्मै प्रसिद्धायेन्द्रायैव Sy.
२६. हविर्लक्षणमन्नम् Sy.

पुत्रादिभि[1] सहैव[2] यजमाना शत्रूणाम्। आत्मबलेन[3]। बाधित्रे[4]। प्रयच्छन्ति[5]। तस्मिन्निन्द्रे[6]। निवासम्[7]। धारयन्ति[8]। कर्माणि प्रत्येकम्[9]। अन्येषु देवेषु? यानि कर्माणि भवन्ति[10]।

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम्।
दूरे चत्तायं च्छंत्सद्गहनं यदिनक्षत्।
अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥६॥

युवं तमिन्द्रा०[11]। युवाम्[12]। तम्[13]। इन्द्रापर्वतौ[14]। पुरा युध्यमानौ[15]। यः[16]। नः[17]। सङ्ग्राम कर्तुमिच्छति[18]।

---

१. ०हैं P. प्रजावत् पुत्रादिसहितं भवति। तैः सहितैर्वीयत इत्यर्थः Sy.

२. ०ना P.

३. स्वकीयेन बलेन युक्ताः Sy.

४. शत्रूणां बाधने निमित्तभूते सति, बाधितु वा। बाध इति बलनाम। 'बाध तविषी' (Ngh. 2.9.) इति तन्नाममु पाठात् Sy.

५. अर्चन्ति पूजयन्ति। यद्वा तस्मा इद् यजमानायैव बाधे बले निमित्तभूते सति, ... प्रजावत्पुत्राद्युपेतम्, आयुरन्नं लब्धुम् ओजसा बलेन युक्ता:, अर्चन्तीन्द्र पूजयन्ति। ऋत्विज इति शेषः Sy.

६. धीतयः कर्मवन्तो यजमानाः... इन्द्रसमीपे। गङ्गायां घोष इति वत्पामीप्यं लक्ष्यते। इन्द्रलोक इत्यर्थः Sy

७. ओको निवासस्थानम्। स्वार्थे यत् Sy.

८. धारयन्ति। 'धिष शब्दे'। अत्र धारणार्थ. Sy.

९. धीतयः स्वर्गसाधनकर्मवन्तः सन्तः Sy.

१०. ०स्येम० P. देवानाभिमुख्येन प्राप्तुमिच्छेयं विधिवन्तेत्यन्वयः Sy.

११. VM. ignores इत् and explains श्रवस्यवः once only.

१२. The complete word is इन्द्रापर्वता
प्राचोऽर्वाचं इन्द्रपर्वतदेवत्यः Mah.
प्रथमोऽर्धर्च ऐन्द्रापर्वतः U.

१३. युवं P. D
युवं तं यत्नमनुतिष्ठतम् U.

१४. तं शत्रुम्। आदरे वीप्सा तं तम्। इदेवार्थे। त तमेव शत्रुम् ... तत्तत्समानमेव सर्वमपि शत्रुम् Mah.
तंतमित् सर्वमपि शत्रुम् Sy.
तंतमित्, ... इच्छब्दोऽनर्थकः U.

१५. इन्द्रपर्वतौ Mah. इन्द्रः प्रसिद्धः, पर्वत पर्ववान्मेघः, तदभिमानी देवस्तौ Sy.

१६. युमानौ M. हे पुरोयुधा पुरोयुधौ पुरोऽग्रे युध्येते तौ पुरोयुधौ ... शत्रूणा पुरतो युद्धस्य कर्तारौ Mah. सङ्ग्रामे पुरतो योद्धारौ Sy. येन यत्नेन पुरोयुधा पुरोऽग्रे युद् युध्यति पुरोयुत्तेन पुरोयुधा बलेन U.

१७. तवो वीप्साश्रवणाद्यवोऽपि वीप्सा। यो यः शत्रुः Mah. यः शत्रुः Sy. तवो वीप्साश्रवणाद्यवोऽपि वीप्सा क्रियते, यो यः शत्रुः U.

१८. ... यो नः M.
नोऽस्मान् Mah., U.
नोऽस्माकम् Sy.

१९. ०मिच्छतव P. ०मिच्छ D. M.
पृतनां सेनां कुर्यात्। योधयेदित्यर्थः Mah. अस्मान्हन्तुं पृतनामात्मन इच्छति Sy. सङ्ग्रामयेद्योधयेत् U.

१ २ ३ ४ ५ ६ ७
वज्रेण। अपहतम्। ताभ्या दूरे। निवसन्तम्। कामयताम्।? गहनं विपिनमरण्यम्। यदसौ।
८ ९ १० ११ १२ १३ १४ १५
प्राप्तवानिन्द्रमेव। अस्माकं शत्रूणाम्। दरणकुशलस्तव वज्र । शत्रून्। परित । दारयतु।

---

१. तत्रापि विशेष्यते । ... वज्राख्येनायुधेन Mah. केन साधनेनेति तदुच्यते। तं तमित्सर्वमपि शत्रुं हन्तुं वज्रेण साधनेन प्राप्नुतम् Sy. वज्रेणेत्यायुधनियमः शत्रूणामुन्मूलनाय U

२. ०हूतं M. विनाशयतम् Mah. नाशयतम् Sy विनाशयतं शत्रुम् U.

३ ईदृक् सामर्थ्यमस्तीति दर्शयति .. अत्यन्तदूरदेशे Sy.

४ चत्ताय। चततिर्गतिकर्मा। वनेऽतिदूरगताय शत्रवे Mah. गताय। चातयतेर्वा नाशकर्मणः। नष्टायादर्शनमापन्नायेत्यर्थः Sy. दूरे गताय नष्टाय शत्रवे U.

५. क्षयतां P.D. छन्दतिः कामनार्थः। शत्रु प्राप्तुं कामयते Mah. तादृशं शत्रुम् . छन्दयति कामयते हन्तुम्। छन्दतेः कान्तिकर्मण इवं रूपम् Sy. कामयताम्। हे इन्द्र त्वदीयो वज्रः शत्रवे विनाशं कामयताम्। कथ परवशो वर्ततामिति चेत्, कथं वज्रस्य शत्रुविनाशकामनेति चेत्। 'आत्मैवैषा रथो भवत्यात्माश्व आत्मायुधम्' (N. 7. 5.) इत्यदोषः U.

६. इदानीमिन्द्रः प्रत्यक्षो वज्रस्य कर्तृत्वं चोच्यते। हे शूर इन्द्र त्वदीयो वज्रो ...गहनमत्यन्तगम्भीरं वनं जलं वा प्रति Mah. गहनं दुरवगाहं स्थानमतिकठिनं हृदयं शत्रुसमीपं वा Sy. इत उत्तरमिन्द्रः प्रत्यक्षो वज्रस्य तु कर्तृत्वं विवक्षितं परोक्षस्य सतः गहन वनमुच्यते उदकं वा U.

७. यद्वा Mah. यद्यो वज्रः। लिङ्गव्यत्ययः Sy.

८. तदा तमपि दूरगतम् ... प्राप्नुयात्। इनक्षतिर्व्याप्तिकर्मा। वने दूरगतमपीच्छन्गृह्णात्येवेत्यर्थः Mah. व्याप्नोति। 'नक्ष गतौ' ... इनक्षतिर्वा प्रकृत्यन्तरम् Sy. रूपसादृश्यादुदकं वनं वा यद् व्याप्नोति पलाय्य गच्छति तथापि विनाशयति शत्रुंग्रहरूपेण तस्यापि विनाशं कामयतां त्वदीयो वज्रः U.

९ ०मेवाहास्मा० P. अस्मदीयान् Mah. इदानीमिन्द्र एव स्तूयते। हे शूर शौर्योपेत इन्द्र! अस्माकं विरोधिनः Sy

१० दारयतीति दर्मा... विदारणशीलो वज्रः Mah. दर्मा शत्रूणां दारकः...तव पूर्वोक्तो वज्रः Sy. कथम्भूतो वज्रः। दर्मा विदारणशीलः U. ११. ०लस्त M.

१२. सर्वाञ्छत्रून् Mah. शत्रून् विश्वतो विश्वान्। सार्वविभक्तिकस्तसिल्। ... विश्वतः सर्वाञ्शत्रून् Sy. अस्माकं ये शत्रवस्तान् U.

१३ सर्वतः स्थितान् Mah. परि परितो विश्वतो विश्वंरुपायैः... सर्वैरुपायैर्वा Sy. विश्वतः सर्वतः U.

१४. परितो विदारयतु Mah. दारयति। यद्वा। दर्मा शत्रूणां दारक इन्द्रो वर्धीष्ट कात्स्न्येन दारयति शत्रून् Sy. परिविदारयतु U

१५ VM ignores तंतम्। इत् and शूर and explains हतम्। विश्वतः once only.

This stanza occurs in YV. 8 53 where the following words are added to the text of the RV. भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः।

Ms. D. puts the figure ॥१३२॥ here to indicate the end of one hundred and thirty-second hymn. No such number is given in p. and M.

I.133.

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळहा अशेरन् ॥१॥

उभे[1] पुनामि[1] । समूहन्या[2] खलमिव यज्ञेन[3] । द्यावापृथिवी[4] । इन्द्रमयजमाना[5] । द्रोग्ध्रीः[6] । प्रजा[7] । सन्दहामि[8] । अभिप्लुत्य[8] । यस्मिन्[9] सन्दहने । हताः[10] । अमित्राः[11] । वैरनिलय[12] युद्धस्थानम् । परित[13] । छिन्नाः[14] । शेरते[15] दृढाः[16] ।

अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम् ।
छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥२॥

अभिव्लग्या[17] चित्[18] । अभिप्लुत्य[19] । इव[20] । वज्रिन्[21] । शिरासि[22] । हिंसायुक्तानां राक्षसीनां

---

१. लोकद्वयं हिंसकाना तवायष्टृणां वाऽप्यगमनेन पावयामि Sy.
२. ०न्या M.
३. स्वदुद्देश्येन यज्ञेन बलेन (वा) Sy.
४. ०पृथिवीन्तिरवीन्द्र० P. ०पृथि न्तिरपीन्द्र० D. ०पृथिवीं तीरवीन्द्र० M
५. भूलोके ... इन्द्रविरहितानामाश्रयभूता महीरुर्वीः Sy.
६ द्रो० M. अत एव द्रुहो द्रोहिणामाधारभूतत्वात्स्वयमपि द्रोग्ध्रीः Sy
७. सम्भूयैकहेलया वहामि Sy
८. अभितो गत्वा Sy.
९. यत्र यासु भूमिषु Sy.
१०. सर्वतः प्राप्ताः, अस्माभिर्घातिता वा Sy.
११. शत्रवः Sy.
१२. रैनि० M. वैलस्थानम् । बिलशब्दो गर्तसमानार्थः । स च गर्तः श्मशानवचनः । अतोऽयमपि श्मशानवाची । अथवा बिलसम्बन्धिस्थानं नागलोकः । तत्र वाऽशेरन् । यद्वा 'बिल क्षेपे' इति धातुः । ... तत्र शवाः क्षिप्यन्त इति वैलस्थानं श्मशानम् । तत्र त्वया हता भूमिं श्मशानवत्कृत्वा सर्वत्र शेरते । तान्दहामीत्यर्थः Sy.
१३ परि M.
१४. ते सर्वे परितृळहा हिंसिताः । तृह हिंसार्थः Sy.
१५. हिंसिता. सन्तोऽशेरञ् शयनं प्राप्ता' । शेतेर्व्यत्ययेन परस्मैपदम् Sy.
१६. Missing in M.
१७ VM ignores उभे । पुनामि
१८ ०प्ल० P.D.
१९. Missing in M.
२०. अभितः प्राप्य Sy.
२१. एव Sy.
२२. व्रजान् P. वैरिणां भञ्जक ! यद्वाऽद्रेर्मेघस्यावर्त' ! Sy.
२३. ०सी M.
२४. हिंसो युक्ता० M. हिंसावतीनां सेनानाम् । यद्वा यातनसाधनान्यायुधानि यातूनि तद्वतीनाम् । अथवा यातवो रक्षांसि तद्वतीनां सेनानाम् । कर्मणि षष्ठी । शत्रूणां सेनाः Sy.

प्रजानाम्[१]। छिन्धि[२]। पादेन[३]। आवेष्टनवता[४]। पादस्याधोभागो वटूरो[५] महता[६] तेन युक्तेन[७]।

अवासां मघवञ्जहि शर्धो यातुमतीनाम्।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥३॥

अवासां मघवन्[८]। अवजहि[९]। यातुमतीनाम्। बलम्। वैलस्थानके[१०], स्वार्थे क। हिंसके[११]। महति[१२]।[१३]

यासां तिस्रः पञ्चाशतोऽभिप्लवङ्गैरपावपः।
तत्सु ते मनायति तुकत्सु ते मनायति ॥४॥

यासां तिस्रः[१४]। यामा यातुमतीनाम्। अध्यर्द्ध[१५] शतम्। अभिप्लवने[१६]। दिव, अधो नीतवानसि। तत्कर्म[१७]। त्वाम्[१८]। सुष्ठु[१९]। पूजयति[२०]। तदल्पमप्युपकारातिशयात्[२१]।[२२]

---

१. The passage beginning with शिरांसि and ending with प्रजानाम् is omitted by P

२. चूर्णय। यद्वा तासां सम्बन्धीनि रथादीनि छिन्धि Sy. ३ केन साधनेनेति तदुच्यते। .. त्वदीयपादेन Sy.

४ वेष्टनशीलेन सर्वव्याप्तेन .. अतिविस्तृतेनेत्यर्थः। यद्वा वटूरिणा पदा वेष्टनशीलेन हस्तिनः सम्बन्धिना पादेन, ऐरावतपादेनेत्यर्थः Sy.

५ वधूरो P D M

६ न केवलेन येन केन पादेनेत्याह। महावटूरिणा पदा महावेष्टनवता स्वीयेन, ऐरावतसम्बन्धिना वा पादेन छिन्धि चूर्णय Sy.

७. VM. explains पदा once only. हे इन्द्र ... धनवन्! Sy.

८. चूर्णय Sy.

९ यातनासाधनान्यायुधानि यातूनि तद्वतीनाम्। यातुधानवतां वा सेनानाम् Sy.

१०. Missing in M. कुत्सिते पूर्वोक्तलक्षणे श्मशाने क्षपयेति शेषः। यद्वा ... बिलसम्बन्धिनि कुत्सिते स्थानेऽन्धकारावृतेऽधोलोके स्थापयेति शेषः Sy.

११ अर्मके कुत्सिते शर्वररणीये .. कुत्सिते गतासुभिररणीये Sy.

१२ सर्वगन्तव्ये महाश्मशाने नागलोके वा Sy

१३ VM. ignores आसाम् and मघवन् and explains अर्मके once only.

१४ पूर्वमन्त्रोक्तलक्षणाना सेनानाम् Sy.

१५ ०द्ध P तिस्रः पञ्चाशत्त्रिगुणितपञ्चाशत्सङ्ख्यां सार्धशतम् Sy.

१६. अभिगमनैः। प्लङ्गतिर्गतिकर्मेत्युक्तम् Sy.

१७. अभिगम्य ... नाशितवानसि Sy.

१८. तत्तादृशं सेनावधादिरूपं कर्म Sy.

१९. त्वा P.

२०. सुमनायति सुष्ठु सम्भावयतीत्यर्थः Sy.

२१. किञ्च हे इन्द्र! ते तवाभ्यर्धशतशत्रुसेनाजयरूप महत्वपि तकद् इति सुमनायति। अत्यल्पमिदमिति सुष्ठु मन्यते Sy.

२२. VM. explains सु। ते। मनायति once only.

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो नि बर्हय ॥५॥

पिशङ्गभृष्टिम्[1]। त्रीनिमान्[2] राक्षसान्। एतेषामनुचरं[3] सर्वं च। रक्षः। निनाशय[4]। पिशङ्गदीप्तिरुदकहरो मांसाञ्चन इति निर्वचनम्।

अवर्महं इन्द्र दाद्हि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृष्णाक्ष भीषाँ अद्रिवः । शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे । अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥६॥

अवर्महं[5] इन्द्र। रक्ष[6]। महतोऽस्मान्[7]। दारय[8] च शत्रून्। शृणु[9] च। अस्मान्[10]। शुशोच[11]। हि। द्यौरसुरैः[12]। पृथिवी[13]। च। भयेन[14]। वज्रिन्[15]। दीप्तादसुरात्[16]।

---

१. त्रीणि मां M. पिशङ्गभृष्टिमीषद्रक्तवर्णम्। अम्भृणमतिभयङ्करं शब्दायमानम्।... यद्वा महान्तमतिप्रवृद्धमित्यर्थः। अम्भृण इति महन्नाम। 'अम्भृणो माहिन-' (Ngh. 3. 3.) इति तत्र पाठात्। उक्तविधं पिशाचिं पिशाचविशेषं, जरामित्येके Sy. २. ०मनुचरं M

३. न केवलं तमेकं किन्तु सर्वं रक्षो रक्षणनिमित्तभूतं राक्षसादिकम् Sy.

४ सम्मृण सम्यग्हिंसय ... निबर्हय निबूदय। 'बर्ह हिंसायाम्'। चौरादिकः। नामय। वधकर्मैतत् 'नितोशयति निबर्हयति' (Ngh. 2.19.) इति तत्रोक्तत्वात् Sy. The reading of the Ngh. is नितोशते and there is no variant.

५. मंसा० P.VM. ignores इन्द्र

६. अवस्तावद्बाहुभ्यम् Sy.

७. हे इन्द्र! महो महतो मेघस्य। कर्मणि षष्ठी। महान्तं जलधारिणं मेघं महान्तं वृत्रं वा Sy. ८. विदारय Sy.

९. नोऽस्मद्वाक्यम् Sy. १०. यस्मात्कारणात् Sy. ११. द्युलोको देवानामाश्रयभूतः शुशोच शोचति। वृष्ट्यभावेन हविराद्यभावादिति भावः Sy.

१२ तत्र वृष्टान्तः। ... क्षेति भूनाम। क्षायन्ति निवसन्त्यस्यामिति क्षाः,... सर्वनिवासाश्रयभूमिरिव। सा यथा... शोचति तद्वत्। लोकद्वयमपि वृष्ट्यभावेन शोचतीत्यर्थ। असुरपक्षे लोकद्वयमावृत्य प्रवर्धमान धर्तुमसहमाने द्यावापृथिव्यौ शोचत इत्यर्थः। तस्माच्छृधीति पूर्वेणान्वयः Sy.

१३ Omitted by P.D.

१४ भीषा वृष्ट्यभावात्तस्याविशोषभीत्या Sy

१५ अद्रिमेघः। तद्वन्निन्द्र!...शत्रूणां भक्षक! यद्वा, अद्रिर्वज्रस्तेन तद्वन् हे इन्द्र! Sy.

१६. भीतौ वृष्टान्तः।...अग्नेर्मूर्त्यन्तरात्त्वष्टुर्भीत्येव। त्वष्टुर्भीत्या पूर्वं यथा द्यावापृथिव्यौ शोचतस्तद्वत्। अत्रेतिहासमाहुः। पूर्वं जगति महान्धकारेणावृते सति देवा विचिन्त्याग्निं प्रार्थितवन्तः। स च त्वष्टृरूपेण द्यावापृथिवीभ्यां सकाशात्तमो व्युदस्यन्नुदपद्यत। त दृष्ट्वा द्यावापृथिव्यौ बिभ्यतुरिति।... यद्वा घृणः केवलोऽग्निः, तस्माद्यथा बिभीतस्तद्वत्.. तावृजाभीति वृष्टिप्रदानेन परिहरेत्यर्थः Sy.

शोषयितृतम[1]। हि[2] त्वम्। शोषयितृभिः[3]। प्रहारैः[4]। उर्वै[5]। गच्छसि[6]। पुरुषानबाधमानः[7] शत्रुभिर-
प्रतिगत[8]! शूर! मरुद्भिः[9]। एकविंशत्सङ्ख्याकैः[10]. 'त्रिषप्तासो[11] मरुतः[12] स्वादुसमुदः[13]' इति[14]
मन्त्रः[15]।

वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो
देवानामव द्विषः। सुन्वान इत्सिषासति सहस्रा वाज्यर्वृतः।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥७॥

वनोति[16] हि सुन्वन्[17]। भजते[18]। हि[19]। यजमानः[20]। महतोऽप्ययजमानस्य[21]। गृहम्[22]।
सुन्वानः[23]। अध[24] करोति[25]। हि[26]। शत्रून्[27]। देवानयजमानान्[28]। सुन्वानः[29]। एव[30] च[31]। बहूनि
धनानि[32]। सम्भक्तुमिच्छति[33]। बलवान्[34]। शत्रुभिरपरिवृतः[35]। सुन्वानायैव[36]। इन्द्रः[37]। धनम्[38]।

---

१. अतिशयेन बलवान् Sy.
२. खलु Sy.
३. बलैः।... यद्वा शुष्मिभिर्बधैरिति सम्बन्धः Sy.
४. अतः कारणात्... वधैस्तदुपायैः सहितस्त्वम् Sv.
५. उद्गूर्णैरतिशूरैः Sy.
६. शत्रून्मेघान्वा गच्छसि Sy.
७. पौरुषोपेतानां यजनसमर्थानामहननस्त्वम् Sy.
८. अवसन्नैः रक्षःप्रभृतिभिरप्रतिगत! युद्धे शत्रुभिरनाक्रान्त! यद्वा सत्वभिः प्राणिभिरसंस्कृतमनस्कैरनधिगत! Sy.
९. विक्रान्त! Sy.
१०. अनुचरैरुपेतैः सन्नीयस इत्यन्वयः Sy.
११. त्रिभिः सप्तभिर्वा सत्वभिः Sy.
१२. त्रिसप्ता० P. D. M. and also TB. 2.5.2.3. AV. reads त्रिषप्ता
१३. ०समु० P.
१४. AV. 13.1.3.
१५. VM. ignores इन्द्र। न and explains भीषा। अद्रिवः। शूर। सत्वभिः once only
१६. त्वत्प्रसादात्सम्भजते . . साधयितुं सम्भक्तुं वेच्छति Sy.
१७ हि. प्रसिद्धयर्थः Sv.
१८ त्वामुद्दिश्याभिषवं कुर्वन्यजमानः Sy.
१९. परीणसः परितो नद्धान्सम्बद्धान् Sy.
२० सर्वैर्वस्तव्यं गन्तव्यं वा गृहम् Sy.
२१ सोमयाग कुर्वाणः ... अभिषवोपलक्षित यागं कुर्वाणः Sy.
२२. अवयजति नाशयति Sy.
२३. एव Sv.
२४. द्विषो द्वेष्टॄन् Sy.
२५ न केवलं यागद्वेषिणो देवाना द्विषोऽप्यवयजति Sy.
२६. सहस्राण्यपरिमितानि गवादिधनानि Sy.
२७. त्वत्प्रसादात् ... वाजवाननन्नवान् Sv.
२८. परैरनाक्रान्तः सन् Sy.
२९. केनेदं लभ्यत इति तत्राह ... इन्द्रमुद्दिश्य सोमयागं कुर्वाणाय यजमानाय वा Sy.
३०. अतिसमृद्धं रयिं गवादिरूपं धनम् Sy.

ददाति[1]। परितो[2] भवत्[3]।

I.134.

आ त्वा जुवो ररहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये
सोमस्य पूर्वपीतये। ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥१॥

आ त्वा जुवः। वायो[4] त्वाम्। गमनशीला। वेगवत्यो[5] नियुत[6]। अध्वरम्[7]। प्रति। इह[8]। आवहन्तु[9]। सोमस्य। यज्ञमुखे पानाय[10]। पुरुषस्य कामुकं[11] मन। जानती[12]। तव। वाक्[13]। ऊर्ध्वा[14]। अनुतिष्ठतु[15] शत गृहाण सहस्र गृहाणेति[16] निर्गच्छतु, त्व वा। नियुत्वता[17]। रथेन। धनस्य। दानाय[18]। आयाहि[19][20]।

---

१. प्रयच्छति। तस्मात्सुन्वानः सिषासतीत्यर्थः Sy.

२. ०तोऽभ० M. आभुवं समन्ताद् भवनशीलं तथाऽऽभुव पुनर्भवनशीलम् Sy.

३. VM. explains अव। द्विष०। ददाति। आभुवम् once only and ignores स्म।
Ms. D. puts the figure ॥१३३॥ here to indicate the end of one hundred and thirtythird hymn No such number is given in P. and M.

४. शीघ्रगामिनो बलवन्तो वा Sy.

५. सामर्थ्यान्नियुतसञ्ज्ञका अश्वा. Sy.
नियुतो वायोः Ngh. 1.15

६. चरुपुरोडाशादिहविर्लक्षणमन्नम् Sy

७. अस्मिन्यज्ञे Sy.

८. प्रापयन्तु Sy.

९. पूर्ववत्पानाय। पुनः। किमर्थम्। ... इतरदेवेभ्यः पुरा पानाय Sy.

१०. ०कर्मनः P.

११ जानाति P. तव गुणान्विशेषेणावगच्छन्ती Sy.

१२. तव सम्बन्धि Sy.

१३. जाना ..वाक् M. सूनृता प्रियसत्यात्मिका स्तुतिरूपाऽस्मदीया वाक्।... सूनृतेति वाङ्नाम। 'सूनृता ब्रह्म' इति (Ngh. 2.7.) तन्नामसूक्तत्वात् Sy.

१४. उन्नता Sy.

१५ तिष्ठत M. आश्रित्य सर्वदा वर्तताम्। हर्षयत्वित्यर्थः Sv.

१६. ०णो M.

१७. नियुद्भिर्युक्तेन रथेन Sy

१८ सोमपानार्थं स्तुत्यर्थञ्च हे वायो! मखस्य यज्ञस्य दावने दातव्याय हविषे तत्स्वीकाराय। पुनः किमर्थम्। ... अस्मभ्यमभिमतदानाय Sy.

१९. याहि D. आगच्छ Sy.
The passage beginning with शतं and ending with आयाहि is omitted by M.

२०. VM. explains पूर्वपीतये। वायो। दावने once only.

मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो
गोभिः क्राणा अभिद्यवः ।
यद्ध क्राणा हरिष्यै दक्षं सचन्त ऊतयः ।
सध्रीचीना नियुतो दावने धिय उप ब्रुवत हरिं धियः ॥२॥

मन्दन्तु त्वा । मन्दन्तु[१] । त्वा[२] । मदयितार[३] । वायो[४] । सोमा । अस्माकमभिलषितानि[५] । पशुभि[६] । कुर्वाणा[७] । सुसस्कृता[८] । अभिगतदीप्तय[९] । यदि । खलु[१०] । परिचरणार्थम्[११] । यजमानेषु कुर्वाणा[१२] । नियुत[१३] । वायुम्[१४] । सेवन्ते[१५] । तत सहाञ्चन्तीति[१६] । नियुत[१७] । कामाना[१८] धातार[१९] । तेषा

---

१ मादयन्तु । व्यत्ययेन परस्मैपदम् Sy.

२. त्वाम् Sy.

३. कीदृशाः सोमाः । मन्दिनो मादयितारः Sy.

४ क्लेदयितारः सोमा. Sy.

५. ०मास्मा० P.
अस्माकं सम्बन्धिनः Sv.

६. गोभिर्वाग्भिर्मन्त्ररूपाभि. । क्राणाः क्रियमाणा हूयमाना. । यद्वा गोभिर्गन्तृभिराहवनीयम्प्रत्यानेतृभि क्राणा हूयमाना Sy. गौरिति वाङ्नाम । वाग्भिः ... क्राणाः कुर्वाणाः । किम् ? ता एव स्तुतिलक्षणा वाचः सोमप्रदान वा SKN वाग्भि स्तुतिलक्षणाभिः ... आभिमुख्येन कुर्वाणाः । .. तस्मात् 'क्राणाः' इत्येष शब्दः 'कुर्वाणा.' इत्येवमुपपद्यते Dur

७. कुर्वाणाः स्वकार्यं हर्षादिकम् Sy.

८ The passage beginning with शतं (I.134 1.) and ending with सुसंस्कृताः is omitted by M. अभिषवदशापवित्रशोधनग्रहणादिभिः सुष्ठु कृताः Sy.

९. M. begins गृहाणेति (I.134.1.) अभिगतदीप्तयः and writes above it with red ink मन्दन्तु त्वा । अभितो द्योतयन्तः ... अभिस्रवोऽभिगन्तारः Sy

१०. यस्मात्कारणात् Sy.

११. हशब्दः प्रसिद्धौ । दक्षम्, अस्मद्भागदेशम्प्रति गन्तुमुत्साहवन्त समर्थयितारम् Sy.

१२ हरिष्यै प्रापयितुं परिचरितु वा । . हरिष्यतिः परिचरणकर्मा । 'हरिष्यति विधेम' (Ngh 3 5.) इति तन्नामसूक्तत्वात् Sy.

१३. कीदृशास्ताः । ... स्वव्यापारं रथवाहनादिक कुर्वाणाः Sy. क्राणाः कुर्वाणाः, N. 4 19.

१४. M. adds गन्त्यो before नियुतः । एतत्सञ्ज्ञकास्तवाश्वा. Sy.

१५ इं त्वाम् Sy.

१६. धिय कर्माण्युद्दिश्य सचन्ते त्वां सङ्गच्छन्ते यागदेशं वा Sy.

१७. सहाञ्चन् M ऊतयो रक्षणवत्यः प्रीतियुक्ता वा Sy. .सध्रीचीनास्त्वया सहाञ्चन्त्यो गच्छन्त्यः ।

१८ कामान् P.D.

१९. धार० P.
धियः कर्मवन्तो बुद्धिमन्तो वा ऋत्विजो यजमाना वा Sy.

दानाय[१]। स्तुवन्ति[२]। एना[३]।

वायुर्युङ्क्ते[४] रोहिता[५] वायुररुणा[६] वायू[७] रथे[८] अजिरा[९] धुरि[१०] वोळ्हवे[११] वहिष्ठा[१२]
धुरि[१३] वोळ्हवे[१४]। प्र[१५] बोधया[१६] पुरंधिं[१७] जार[१८] आ[१९] ससतीमिव[२०]।
प्र[२१] चक्षय[२२] रोदसी[२३] वासयोषसः[२४] श्रवसे[२५] वासयोषसः ॥३॥

वायुर्युङ्क्ते[१]। वायु[२]। युङ्क्ते[३]। रोहितवर्णे कदाचित्[४]। अरुणे[५]। वायु[६]। रथे[७]। गमनशीलौ[८]। धुरि[९]। वहनाय[१०]। वोढारौ[११]। प्रबोधय[१२]। बहुप्रज्ञम्[१३]। जार[१४]। स्वपतीमसतीं यथा बोधयति[१५]। प्रदर्शय चास्मै प्रबोधेन[१६]। द्यावापृथिवी[१७]। विवासय च[१८]। उषस[१९]। अस्मा अन्नाय वायो[२०]।

---

१. दावने दानाय हविःस्वीकारनिमित्तम् Sy.
२. उपेत्य ब्रुवन्ति स्वाभिमत विज्ञापयन्ति वा Sy. ३. एनाम् M.
४. VM. explains क्राणाः। अभिद्यव.। धिय·। once only A fragment गोभि क्राणाः is explained in N. 4. 19; SKN II 254. The stanza of the RV., quoted in N 4 19, is however a different one
५. वायुः। युङ्क्ते is omitted by P D क्वचिद्योजयति Sy
६ रोहतवर्णावश्वौ Sy.
७ तथा क्वचित् . . अरुणवर्णौ धुरि युङ्क्ते Sy ८ वायु P D पुन पुनर्वायुग्रहणमश्वयोजनवचन चानिशीघ्रमागच्छतीति ज्ञापनार्थम् Sy
९. रथस्याग्रभागे यद्वा भारवहने Sy.
१०. गमनशीले is suggested for गमनशीलौ।
अजिरौ गमनशीलौ वर्णविशेषयुक्तौ कदाचिद्युङ्क्ते। यद्वैतदुभयत्र सम्बध्यते Sy.
११. धारणप्रदेशे Sy.
१२. किमर्थं युङ्क्त इति तदाह।... धुर वोढु भारवहनाय Sy.
१३. वोढ्रौ is suggested for वोढारौ।
अतिशयेन वोढारावश्वौ।...धुरि वोळ्हवे महद्भार वोढु, महति भारे वोढव्ये सति Sy
१४. रथेन शीघ्रमागत्य प्रज्ञापय हविः स्वीकारायेति भावः Sy.
१५ इदानीं प्रत्यक्षेणाह। हे वायो पुरन्धिं बहुप्रज्ञ सामर्थ्याद्यजमानमिति गम्यते Sy पुरन्धिर्बहुधीः N.6.13.
१६ तत्र दृष्टान्तः। जारः पारदारिकः Sy.
१७. प्रजार स्व० P उपपत्यागमनध्यानेनेवत्स्वपतीम् Sy.
१८ पुरन्धिमिव प्रकृष्टशरीरधारिणी योषितमिव Sy
१९ ता यया स्वसङ्कल्पेन स प्रबोधयति तद्वत्त्वमपि कर्मव्यग्रेणेवत्स्वपन्त यजमान प्रबोधय Sy.
२० ०धने P. प्रचक्षय प्रकर्षेण प्रख्यापय। प्रकाशयेत्यर्थः Sy.
२१ वासय... यथावत्स्थापय। प्रभातं कुर्वित्यर्थः Sy.
२२ सत्प्रकाशार्थम्... उषःकालानपि Sy.
२३. श्रव इत्यन्ननाम। तव हवीरूपान्नस्वीकारायोषसो वासय Sy.
२४. वयोः P.
२५. VM. explains धुरि। वोळ्हवे। वासय। उषसः once only.

तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा
नव्येषु रश्मिषु । तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥४॥

तुभ्यमुषासः । तुभ्यम् । उषसम । निर्मला । पूर्वस्या दिशि । भजनीयानि । तेजांसि । तन्वते ।
कल्याणानि । दर्शनीयेषु । नवतरेषु । रश्मिषु । तुभ्यम् । धेनु । अमृतस्य द्रोग्ध्री । विश्वानि ।
धनानि । दोग्ध्री घृत पयो दधि स त्वम् । दिव । नदीभ्य । सकाशात् । इमान् मरुत । अजनय ।

तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्युपामिषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥५॥

तुभ्यं शुक्रासः । तुभ्यम् । सोमा । शुचय । त्वरमाणा । मदेषु च सन्सु । उग्रा मरुत ।

---

१. उषासः P
२ शुचयः शुद्धा दीप्ता वा Sy
३. पश्या P D M परावति, अत्यन्तदूरदेशेऽन्तरिक्षे Sy.
४ भन्वनीयानि कल्याणानि Sy.
५. आच्छादनयोग्यानि वस्त्राणि Sy.
६. विस्तारयन्ति । यद्वा । उषसो दंसु यागगृहेषु देवयजनेषु रश्मिषु होमाय प्रदीप्ताग्निज्वालावत्स्वागताय तुभ्य भद्रा वस्त्रा तन्वते । अग्निज्वाला एव वस्त्राणि विस्तारयन्तीत्यर्थः । उषःकालेऽग्नीनां प्रज्वाल्यमानत्वात्ता एव वस्त्राणीत्युपचर्यते Sy.
७ चित्राणि नानावर्णयुक्तानि, आश्चर्यभूतानि तन्वते । उषःकाले रश्मीना नानावर्णत्वादिति भावः । अग्निद्वारेति पक्षे ज्वालानां कालीकरालीत्यादिरूपेण नानावर्णत्वाच्चित्रत्वम् Sy.
८. दंसेषु कर्मवत्सु । यद्वा । गृहनामैतत् । ... गृहवदाच्छादकेषु Sy.
९. ननु केवलं साधारणानि वस्त्राणि नेत्याह नव्येषु नूतनेषु स्तूयमानेषु Sy.
१०. स्वदर्थं स्वद्यागार्थमेव Sy.
११. घृतादिना प्रीणयित्री गौः । जातावेकवचनम् Sy
१२ तुभ्य .. मृतस्य M सबर्दुघा । सबरित्यमृतनाम । तस्य द्रोग्ध्री Sy.
१३. Missing in M
१४ धनानि, आज्यादिरूपाणि Sy.
१५ स्वयमेव दुग्धे प्रीणयतीत्यर्थः Sy. दोग्धि is suggested for दोग्ध्री
१६ निव· P दीप्तादन्तरिक्षात् Sy.
१७ नदीत्यै· M प्रवहणशीलाभ्योऽद्भ्यो वृष्टिलक्षणाभ्यः । ... नदीनामैतत् । 'रुजाना वक्षणा' (Ngh. 1.13.) इति तन्नामसु पाठात् Sy.
१८. एतन्नामकान् मेघं विशीर्य वृष्टयुत्पादकांस्त्वदशभूतान्देवान् Sy.
१९ पूजनयः P. D. M. अजनयस्युत्पादयसि Sy. २० VM. explains रश्मिषु । वक्षणाभ्यः once only.
२१. ०क्रः P. दीप्ताः Sy. २२. सोमस्य पानारोऽत्यन्तं शुद्धा भवन्ति । किमु वक्तव्यं तेषा शुद्धत्वे Sy. २३. शुचः P. शुद्धाः Sy. २४. त्वमरणाः P. त्वरणयुक्ताः Sy. २५. तव मदेषु निमित्तभूतेषु Sy. २६. निस० M.
२७. त्वां प्राप्तुमुग्रा उद्गूर्णतेजसः Sy.

अपा वृष्टिलक्षणानाम्। [1]भरणे। [2]व्याप्रियन्ते। त्वाम्। चौरभयाद् [3]गच्छन्। [4]चौरैर्हिंस्यमानः। भजनीयम्। स्तेनैः [5]परिगन्तव्ये देशे। स्तौति। त्वञ्च। असुरपक्षीयात्। [6]सर्वस्मात्। भूत-[8]जातात्। [9]कर्मणा। त [10]रक्षसि। [11]

त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि।
उतो विहुत्मतीनां विशां ववर्जुषीणाम्।
विश्वा इत्ते धेनवो दुह आशिरं घृतं दुहत आशिरम् ॥६॥

त्व नो वायो। [12]यज्ञियानामग्रिम। त्वम्। वायो। [14]एषाम्। [15]सुतानाम्। अस्मदीयानाम्। सोमानाम्। [16]प्रथममेव। पानम्। [17]अर्हसि। किञ्च। [18]विविधहोमयुक्तानाम्। याश्च विश [19]कदर्यतया [20]वर्जयन्ति होम तासामुभयीनाम्। अपि। धेनव। तुभ्य भूतेरीश्वराय। [22]पय।

---

१. भरेण D. भरणवति यागे Sy.

२. आहवनीयं प्रति गच्छन्तीच्छन्ति वा। व्यत्ययेनात्मनेपदम्। ... किञ्चापा भुर्वणि मेघे, इषन्त उदकमिच्छन्त्युत्पादयितुम्। अग्नौ हूयमानस्याहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात्। यद्वा यजमानास्त्वामुद्दिश्याऽऽजुह्वाना अपा वर्षणम् ... इच्छन्ति Sy.

३ ०क्षणा... गच्छन् M. त्वरणवानत्यन्तभीतः Sy.

४. यज्ञविघातकै. पयोव्रतादिनियमैर्वा Sy.

५. उपक्षीणः ... यजमान Sy.

६. तस्कराणां यज्ञविघातिनामन्यत्र गमनाय Sy.

७. सुर० P.D ०यान् M असुरसम्बन्धिनो भयाद्विशेषेण पासि Sy.

८. लोकाद् भूतजाताद्वा लोकत्रयसम्बन्धिनो भयात् Sy.

९. धर्मणा अस्मदीयहविषां धारणेन ... अस्मद्धारणेन पोषणेन वा युक्तः सन् Sy

१०. क्षरसि M. पासि पालयसि। . यत एवं करोषि, अतः स्तौमीत्यर्थः Sy.

११. VM. ignores इषन्त and explains भुर्वणि। पासि। धर्मणा once only.

१२. वयो P

१३ न विद्यते पूर्वं यस्मात्तत्पानमपूर्वम्। तवहंतीत्यपूर्व्यः।

१४. Missing in M

१५ अभिषवकृतानां सोमानाम् Sy.

१६ तादृशोऽत एव प्रथम इतरदेवेभ्यः पूर्वभूतः स्न् Sy.

१७ प्राप्नोषि। . .यत्र यत्राभिषवोऽस्ति तत्र सर्वत्र नियमेन पिबसीत्यर्थः। पूर्वं प्राथम्याभिप्रायेणेदानीन्तु सर्वत्र सोमवति यागेऽस्य पानमस्तीति ज्ञापयितुं पृथगभिधानम् Sy.

१८. न केवल सोमपानमात्रम्। उतो, अपितु ... विशेषेण होमवतीनामाहुतिवतीनां वा Sy.

१९. ०र्यया P.D.

२०. अनभिमतपापं वर्जयन्तीनाम् Sy.

२१ ऋत्विग्यजमानरूपाणां प्रजानां सम्बन्धि हविः स्वीकरोषीति शेषः। यद्वा तेषां यष्टॄणाम् Sy.

२२. आश्वयणव्रव्यं क्षीरम् Sy.

घृतश्च्युतश्च[1] । वृहते[2] कदयश्च[3] त्वां भजन्ते धनेप्सया[4] ।

I.135.

स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते
शतिनीभिर्नियुत्वते । तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।
प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥१॥

स्तीर्णं बर्हिः[5]। स्तीर्णम्[6]। बर्हि[7]। उपगच्छ[8]। अस्मान्[9]। पानाय[10]। सहस्रसङ्ख्याभि[11]। शतसङ्ख्याभिश्च[12]। नियुद्भिः[13]। तद्वते तुभ्य स्तीर्णम्। अनामन्त्रितेऽपि सर्वनिघातो दृष्ट । तुभ्यम्। हि[14]। देवाय[15]। देवा[16]। पूर्वपानार्थम्[17]। नियमितवन्त, 'मदया एव वो ग्रहा गृह्यन्ते' इति त्वया प्रपानार्थम्[18]। मधुररसा[19]। सोमा हविर्घनात्[20]। तव[21]। मदम्[22]। प्रज्ञा च कर्तुम्[23]। प्रतिष्ठन्ते[24]।

---

१. .. उपस्तरणाभिघारणाद्याश्रयणयोग्यं करणं (क्षरण) द्रव्यम् Sy.
२. वृहन्ति स्वयमेव Sy.
३. ०ते ... क० M
४. VM. ignores वृहते। विश्वा and explains पीतिम्। अर्हसि। आशिरम् once only
Ms. D. puts the figure ॥१३४॥ here to indicate the end of one hundred and thirtyfourth hymn. No such number is given in P. and M.
५. आस्तृतम् Sy.
६. बर्हिरभिलक्ष्य Sy.
७. उपयाहि, आगच्छ Sy.
८. अस्मत्सकाशार्थम् Sy.
९. वीतये हविषां भक्षणाय Sy.
१०. केन साधनेनेति तदुच्यते। ... सहस्रसङ्ख्याकेन Sy.
११. शतसङ्ख्योपेताभिः Sy.
१२. जातावेकवचनम्। नियुत इति वायोरश्वानां नामधेयम्। 'नियुतो वायोः' (Ngh. 1.15.) इति निरुक्तत्वात्। ... आगच्छेति शेषः। यद्वा। सहस्रेण नियुता शतनीभिश्च नियुद्भिः Sy.
१३ ... देवाय हविर्वीयत इति शेषः। यद्वा। तुभ्यमित्यनेन सम्बन्धः। उक्तसङ्ख्याकाभिर्नियुद्भिस्तद्वते देवाय तुभ्यम् Sy.
१४ मन्त्रान्तरप्रसिद्ध्योतनार्थो हिशब्दः Sy.
१५. द्योतमानाय Sy.
१६. इतरदेवेभ्यः पूर्वं पानाय Sy.
१७ ० यत० D. यमितवन्तः। यद्वा स्तोतार ऋत्विजो देवाय तुभ्यं येमिरे। आहवनीयं प्रति सोमं नियमितवन्तः Sy.
१८. प्रवा P.
१९. ० ह्वा० D.
२०. प्रा० M.
२१. ० घुरसाः P. माधुर्योपेताः Sy.
२२. एते ... अभिषुताः ... सोमाः Sy.
२३. मदाय तव सोमाय Sy.
२४. कर्मणे तत्सिद्ध्यर्थम् Sy.
२५. ० ष्ठते P.D.M. ऋत्विग्भिर्धृतास्तिष्ठन्ति। अतस्त्वं पिबेति शेषः Sy.
२६. VM. explains नियुत्वते। अस्थिरन् once only.

तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति । तवायं भाग आयुषु सोमो देवेषु हूयते ।
वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥२॥

तुभ्यायं सोमः। तुभ्य। अयम्। सोम । अभिषुतो ग्रावभिर्ऋंजीषाद् विविक्तः। स्पृहणीयानि। कल्याणान्युदकानि। वसान । अंशु विसृज्य । रसात्मकोऽभिषूयमाणो निर्गच्छत्यशूनपहाय निर्गच्छति। तव। अयम्। भाग । मनुष्येषु स्थित । सोम । देवानां मध्ये। हूयते। तथा सति, आगच्छ। वायो। नियुतश्च। गमनार्थमभिगच्छ। अस्मत्काम। प्रीयमाण ।

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये । तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ।
अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ॥३॥

आ नो नियुद्भिः। वायो। अस्मद्यजम्। शतसहस्रमङ्ख्याभि । अश्वाभि । हवींषि।

---

१. तुभ्यम् । स्वदर्थम् Sy
२. ० मो द्रुतः P. हूयमान. । कोशं कोशस्थानीय ग्रहमर्षति गच्छति प्राप्नोति Sy
३. अभिषवसाधनैः Sy.
४ विविक्त P विविक्त M. कीदृशः सोमः। . . अपगतजीषत्वेन शोधितः। यद्वा । अद्रिभिरभिषुतो दशापवित्रशोधनेन ग्रहणेन वा शोधितः Sy
५ M. adds च after उदकानि । तेजांसि Sy. ६ ० नांशुं D पिधानः। किञ्च शुक्रा निर्मलानि दीप्तानि वा तेजांसि वसानः Sy.
७. ० नपहानाय P. निर्गत्यांशून ० M
८. ० नि० D. त्वां प्राप्नोति Sy
९. भोगः P. भजनीय सोमः Sy
१०. मनुष्येषु यष्टव्यत्वेन स्थितः Sy
११. सोमे P १२ देवेषु मध्ये Sy.
१३. सत्स्वपीतरेषु देवेषु यतः सोमस्तव भागोऽतः प्रथमं तुभ्यं हूयत इत्यर्थः Sy
१४. ० च्छति P.
१५. P. and D. add नियुतः before वायो । किञ्च हे वायो एवं तं सोमम्, अस्मयुरस्माभिस्तद्वान् Sy.
१६ नियुत्सञ्ज्ञकानश्वान्वाहनाय प्रापय Sy.
१७ ततः पर याहि दिवं प्रति गच्छ Sy.
१८ तथा कुर्वन्. . . . अस्माभिर्युक्तः सन्नस्माननुगृह्णन्नस्मान्कामयमानो वा Sy.
१९ जुषाणः प्रीयमाणो याहि गच्छ Sy.
२० VM ignores परि। वह and explains कोशम्। वसानः । अस्मयु. once only.
२१. Omitted by P.D.
२२. नोऽस्माकमध्वरं यज्ञम् Mah., U. अस्मत्सम्बन्धिनं यज्ञम् Sy.
२३ कीदृशीभि. । शतिनीभिः सहस्रिणीभिः शत सहस्र च सङ्ख्या यासां ताभिः, वयं बहुवाहनतर्पणे शक्ता इति भावः Mah. शतिनीभिः. . . . सहस्रिणीभिश्च ताभिः Sy. शतानि विद्यन्ते यासु ताः शतिन्यस्ताभिः शतिनीभिः सहस्रिणीभिश्च । एतदुक्तं भवति । बहूनामपि वाहनानां वयं तर्पयितुं (तर्पणे) क्षमाः U.
२४. त्वदीयैरश्वैः Sy. अश्वैः U.
२५. सोमादिहविः Sy.

खादितुम्[१]। उपागच्छ[२]। तव। अयम्। भाग[३]। प्राप्तकालः[४]। सूर्यरश्मिभि[५] सहितः। उदिते सूर्ये। तेन सहितस्तस्मिन्नुदिते गृह्यमाणस्तस्मिन्काले[६]। तवाध्वर्युभिरिमे[७] सोमास्त्वदर्थं हविर्धानात्[८]। प्रक्रियमाणा[९]। होमार्थं गृहीता[१०]।[११]

आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये। पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम्। वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम् ॥४॥

आ वां रथः[१२]। इन्द्रवायू[१३]। युवाम्। नियुत्वान्[१४]। आवहतु[१५]। रथ[१६]। सोमलक्षणानि[१७]। सुनिहितानि[१८]। हवीषि। खादितुम्[१९]। अभिभवन्तौ च[२०]। मधुसदृशम्[२१]। सोमम्[२२]। पिबतम्[२३]। युवयो[२४]।

---

१. वीतये त्वदभिमतकामाय तत्पूर्तये भक्षणाय Sy

२. उपया० P उपयाहि Mah अध्वर हव्यानि चोपलक्ष्य तेषामेव भक्षणाय शतसहस्रैरश्वैरतिशीघ्रमागच्छेत्यर्थः Sy आ उपयाहि U

३. भजनीयः सोम· Sy

४ ऋत्वियः प्राप्तकालः प्रदानावसरं प्राप्त। ऋतुशब्देन प्रदानकालो लक्ष्यते Sy

५ सूर्य उदिते सति तस्य रश्मिभि· सचा सह सरश्मिर्भवति, समानदीप्तिर्भवति। यद्वा तैः सहितो भवति। यतः सूर्य उदिते सति रश्मिर्भवत्यतः प्राप्तकाल इत्यर्थः Sy

६. ० णं त० D.

७ अस्मिन्सवने तृतीये Mah अस्मिन्सवने तृतीयसवने U.

८. चमसाध्वर्युभिः। तेषां वशत्वाद् बहुवचनम् Sy.

९. तैर्भरमाणा ध्रियमाणाः Sy.

१०. अयंसत नियता अभवन्। किञ्च हे वायो ते सोमाः शुक्रा अयंसत, अत्यन्तदीप्ता उद्यताः। अतस्तेषां भक्षणायाऽऽहीत्यर्थः Sy.

११. VM. explains वीतये। अयंसत once only and ignores शुक्राः।

The stanza in the YV. 27.28 is identical with the RV. VII 92.5 The YV. has the following words only in common with the RV. I 135 3 आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि।

१२ केवलं वायुं स्तुत्वा व्यासक्ततयेन्द्रवायू स्तौति Sy.

१३ युवयोः सम्बन्धी Sy.

१४ नियुद्भिरश्वैस्तद्वान्। . यद्यपि नियुतो वायोरेव रथस्योचितास्तथापि व्यासक्तदेवतात्वात्सहैवागमनाविन्द्रार्थमपि वहन्ति Sy. १५. देवयजनं प्रति युष्मानावहतु। . किमर्थम्। अवसे गमनाय रक्षणाय वा Sy.

१६ आवहत्यर्थं P.D. ० त्वान्... अवहत्यर्थं M. १७. अन्नानि सोमलक्षणानि Sy.

१८ सुहि० D. सुष्ठु गृहीतानि Sy.

१९ इतरेषां सवनीयपुरोडाशादीनाम् Sy.

२० वीतये तेषां भक्षणाय ... खादनाय Sy.

२१. ० वन्त M. २२. मधुररसस्य ... कर्मणि षष्ठी। मधुरम् Sy.

२३. अन्धसोऽन्नस्य सोमरूपस्य ... सोमम् Sy. २४. युवं यो M.

हि[१]। पूर्वपानम्[२]। देवैर्निहितं[३] तथा सति। वायो[४] त्वम्। इन्द्रः। च। हर्षकेण[५]। अस्मभ्यं प्रदित्सितेन धनेन[६] सह। आगच्छतम्[७]।

आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्य न वाजिनम्। तेषां पिबतमस्मयू आ नो गन्तमिहोत्या। इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ॥५॥

आ वां धियः[८]। वाम्[९]। अस्मत्परिचरणकर्माणि[१०]। यज्ञान्[११]। प्रत्यावर्तयेयु[१२]। त्वदर्थमिमम्[१३]। इन्दुम्[१४]। अध्वर्यवो दशापवित्रेण परिमृष्टवन्त[१५]। शीघ्रम्[१६]। व्यापिनम्[१७]। अश्वानाम्[१८]। इव[१९]। बलवन्तमारोहणाय[२०]। तानिमान्[२१]। ग्रावभि[२२]। सुतान्सोमान्[२३]। अस्मत्कामौ[२४]। युवाम्[२५]। मदाय[२६]। पिबतम्[२७]। आगच्छ-

---

१. यतः Sy.
२. इतरदेवेभ्यः पूर्वपानम् Sy.
३. हितम्...अभिमतम्। अतः प्रथमं पिबतमित्यर्थः। यद्यपीन्द्रादपि वायोः पूर्वपानं 'त्वं हि पूर्वपा असि' (RV. 4.46.1.) 'देव दधिषे पूर्वपेयम्' (RV. 7.92.1.) इत्यादिषु सर्वत्र प्रसिद्धं तथापीन्द्रस्येतरदेवेभ्यः पूर्वं वायुना सह पानं चेन्द्रतुरीयार्थवादब्राह्मणे 'देवा वै सोमस्य राज्ञोऽग्रपेये न समपावयन्' (AB. 2.25.) इत्यत्र प्रतिपादितम् Sy.
४. आगमनसमये हे वायो! Sy
५. चन्द्रेण, अस्मदाह्लादकेन हिरण्येन Sy.
६. राधसा गवादिरूपेण धनेन...रत्नेन धनेन Sy.
७. VM. ignores अवसे and explains वीतये। राधसा। आ। गतम् once only.
८. हे इन्द्रवायू...युवाम् Sy.
९. कर्माणि स्तोत्रादिलक्षणानि Sy.
१०. यज्ञात् P.D. उप, अस्मदीयान्यज्ञात्लक्षीकृत्य Sy.
११. अतिशयेन वर्तयन्ति प्रवर्तयन्ति Sy.
१२. युष्मदर्थम् Sy.
१३. पुरतो वर्तमानम् Sy.
१४. सोमम् Sy.
१५. ० मन्तः P.D सम्मार्जयन्ति Sy.
१६. मार्जने दृष्टान्तः....। अतिशीघ्रगामिनम् Sy.
१७. ० घ्रव्या ० D. सततं गन्तारम् Sy.
१८. ० वा P. वाजिनं ग्रहणाय द्रोणकलशाद् ग्रहान्प्रति गमनवन्तमाभिक्षावन्तं वा... वेजनवन्तमश्वमिव। तं यथा स्वेदाद्यपनयनेन सम्मार्जयन्ति तद्वत् Sy.
अश्वम् is suggested for अश्वानाम्
१९. शीघ्रव्यापिन...बल ० M.
२०. तेषामध्वर्यूणां सम्बन्धिनः Sy.
२१. शोधितान्सोमान्...ग्रावभिः सुतानामभिषुतानाम्। पूर्वसत्कर्मणि षष्ठी। तान् पिबतमिति शेषः Sy.
२२. अस्मद्यज्ञमिच्छन्तौ Sy.
२३. मादयि P. D. मादय M. तृप्तये मोदाय वा Sy. २४. पिबन्तं P. D. पानं कुरुतम् Sy.
२५. तदर्थं नोऽस्माकं यज्ञं प्रति, इह इदानीम्,...आगच्छतम् Sy.

तञ्च[1]। रक्षणार्थम्[2]। इन्द्रवायू। अन्नस्य दातारौ—तेषामिन्दुमित्येकवचनबहुवचनयो. पादभदात्समन्वयः[3]।

इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो
शुक्रा अयंसत[4]।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥६॥

इमे वां सोमाः। इमे। युवयोः[5]। वसतीवरीषु[6]। सुता। यज्ञे[7]। अध्वर्युभि। हविर्धानात्[8] प्रह्रियमाणा[9]। दीप्ता[10]। गृहीता[11]। एते चाभिषवानन्तरम्[12]। युवयोरर्थम्। तिरः[13] पवित्रम्[14]। विसृष्टा आसन्। यथा मध्ये पवित्र भवत्येवमाशु व्यापिन[15]। अतिसृष्टाश्चामी सोमा[16]। युष्मत्कामा[17]। अविमयानि[18] दशापवित्रस्थानि रोमाणि[19]। अतीत्य[20] गच्छन्ति[21]।

---

१. वा P.D.M.

२. रक्षमाणार्थम् P. क्षणार्थम् M. अस्मद्रक्षणेन सह Sy.

३. वाजस्यान्नस्य दातारावतः पिबतमित्यन्वयः Sy.

४. ० न्नुरित्ये P.D.M.

५. VM. ignores नः। इह। and explains युवम् once only.

६. तव चेन्द्रस्य च स्वभूताः Sy.

७. ० वरिषु D.
अस्मदीयेषु कर्मसु Sy

८. अस्मिन्नभिषवस्थाने Sy.

९. ०भिर्विधा० M.

१०. तैर्ह्रियमाणा गृहीता होतुं वा ह्रियमाणाः। कर्मणि कर्तृप्रत्यय Sy.

११. किञ्च त एव सोमाः . . . शुभ्रा दीप्ताः Sy.

१२. आ अयंसत, आगच्छन्त युवयोर्नियता भवन्ति Sy.

१३. यो रथं M. वां युवां प्रीणयितुमिति शेषः Sy.

१४. तिर्यग्भूतं सोमान्तर्वायकं वा Sy.

१५. ऊर्णामयं पवित्रम् Sy.

१६. व्यापकाः सोमाः Sy.

१७. अभिलक्ष्यासृज्यन्त सृष्टा भवन्ति Sy.

१८. ० ष्मान् का० P.
युवां कामयमानाः Sy.

१९. अपि (व्ययाव्य) मयानि M अव्ययान्यच्छिद्राणि . . . यद्वा . . . अविमयानि। मकारो लुप्यते। तादृशानि रोमाणि Sy.

२०. पवित्रसम्बन्धीन्यविरोमाणि Sy.

२१. अतिक्रम्य पात्राद् गच्छन्तीति शेषः। पुनस्त एव विशेष्यन्ते। अति अतिशयेन, अव्यया व्ययरहिताः सोमासः सोमा असृक्षतेति शेषः Sy.

२२. VM. ignores सोमाः। आ। वायो and explains अयंसत। अव्यया once only.

अति॑ वायो सस॒तो या॑हि शश्वतो॒ यत्र॒ ग्रावा॒ वद॑ति॒ तत्र॑ गच्छतं
गृ॒हमिन्द्र॑श्च गच्छतम् । वि सू॒नृता॒ दद॑शे रीयते घृ॒तमा पू॒र्णया॑
नि॒युता॑ याथो अध्व॒रमिन्द्र॑श्च याथो अध्व॒रम् ॥७॥

अति वायो। अकर्मपरान् स्वपत । सर्वान्। वायो ! त्वम्। अतीत्य। आगच्छ। यत्र। अभिषवग्रावा। शब्द करोति तत्र। इन्द्रवायू। गच्छतम्। अस्मिन् गृहे। स्तुतिवाक्। विविध दृश्यते। घृत च होमार्थम। गच्छति। तथा सति इन्द्रवायू। यज्ञमिमम्। पूर्णया। नियुता। याथ ।

अत्राह॒ तद्व॑हेथे मध्व॒ आहु॑तिं॒ यमश्व॒त्थमु॑प॒तिष्ठ॑न्त जा॒यवोऽस्मे ते
स॑न्तु जा॒यवः॑ । सा॒कं गावः॒ सुव॑ते॒ पच्य॑ते॒ यवो॒ न तेषु॑ वाय॒
उप॑ दस्यन्ति धे॒नवो॒ नाप॑ दस्यन्ति धे॒नवः॑ ॥८॥

अत्राह तत्। यद्। हविर्भिर्देवान्व्याप्नुवन्तम्। अभ्युदयजन्मानि शत्रुजायव । उपतिष्ठन्तेऽध.स्थितानि भवन्ति। तस्मिन्। एव। युवा तदिदम्। सोमस्य। आहुतिम्। आत्मान प्रापयेथे।

---

१ आलस्याविना निद्रा कुर्वतः Sy.
२. बहून्यजमानान् । शश्वदिति बहुनाम । 'शश्वद् विश्वम्' (Ngh. 3 1) इति तन्नामसु पाठात् Sy
३ ०त्य ग० P अतिक्रम्योपेक्ष्यास्मद्यज्ञ याहि गच्छ। इन्द्रश्च तथा करोतु Sy.
४. वदति। . . . अभिषवार्थः पाषाणध्वनि. श्रूयते Sy. ५. आगच्छतम् Sy
६. यज्ञगृहं गच्छतम् Sy.
७ पुनः स्थानमेव विशेष्यते । सूनृता प्रियतथ्यात्मिका स्तुतिरूपा वाक् Sy
८. यत्र. . .विशेषेण दृश्यते श्रूयत इत्यर्थः Sy.
९. घृतं च omitted by M. तत्र गच्छत यत्र च घृतमत्यन्तदीप्तमाज्य होमार्थं गृहीतम् Sy. १०. आहवनीयं प्रति नीयते Sy. ११. गमनप्रकार एव विशेष्यते। पूर्णया सम्पूर्णया पुष्टाङ्ग्या Sy.
१२. जातावेकवचनम् । नियुज्जात्या Sy.
१३. याथ M. आभिमुख्येन प्रयाथ.। किञ्च हे वायो त्वमिन्द्रश्च युवामध्वरमस्मदीयं यागमायाथ· सहैवागच्छतम् । तथाऽस्माभिरपि सहैव गच्छतमित्यर्थः Sy
१४ VM explains गच्छतम्। याथः। अध्वरम् once only
१५ हे इन्द्रवायू अत्र अह अस्मिन्नेव यज्ञे। अहेति विनियहार्थीयः Sy
१६ यम् is suggested for यत्
१७ भविभिर्दे० P
१८ ०जयावां (जायवः) अति० M. जयावापेति०D य सोममश्वत्थं पर्वतादिव्याप्तिप्रदेशे स्थितं जायवो जेतारो यजमाना उपतिष्ठन्त उपेत्य तिष्ठन्ति क्रयार्थम् Sy.
१९ अस्मिन् is suggested for तस्मिन्
२० तामिमाम् is suggested for तदिदम्। २१. सोमस्या इति मात्मा० D. मधुरस्य मधुसदृशस्य वा तत् तस्य Sy. २२. प्रदेयद्रव्यम् Sy.
२३. वहेथे धारयतम् Sy.

अथाभ्युदयजन्मानि । अस्मासु । सन्तु । वायो तव प्रसादात् । मदीया गावश्च । सह । प्रसूयन्ते । यवश्च । पक्वो भवति । न । त्वदीया । धेनव । नोपदस्यन्ति । नापि । अपदस्यन्तीत्यल्पो भेद. । 'वायुर्वै पयस प्रदाता' इति ब्राह्मणम् ।

इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः ।
धन्वञ्चिद्ये अनाशवो जीराश्चिदगिरौकसः ।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ॥९॥

इमे ये ते । वायो । ये । इमे । त्वदीया प्रत्यक्षपोता । बाहुबला । नद्याम् । अन्त । सुष्ठु । पतन्त्युदकसमीपे हि शीघ्र पतन्ति वाता । सेक्तार उदकबिन्दुभि । महत् । वर्धमाना महान्तो

---

१ ०न्मनि P जायवो जेतारः कर्मनिर्वहितारस्त ऋत्विजः Sy
२. अस्माकं सम्बन्धिनः Sy
३. समर्था भवन्तु । यज्ञं निर्वहन्त्वित्यर्थः । यद्वा । ते प्रसिद्धाः प्रयोगकुशला जायवो जेतार ऋत्विजोऽस्मे सन्तु नान्यस्य Sy.
४ अत्र वहेथे, इत्युक्तम् । कोऽत्रविशेष इति तत्राह । हे इन्द्रवायू अस्मिन्यज्ञे गावो धेनवः Sy.
५. सहैव Sy.
६ युष्मदर्थमेव क्षीरमुत्पादयन्ति । वोऽर्थो भवन्तीत्यर्थः । यद्वा गाव साकं सहैव सुवतेऽपत्यमुत्पादयन्ति त्वद्दोहनार्थम् Sy
७. यवः । जातावेकवचनम् । उपलक्षणमेतद् यवादिभिः Sy.
८ ०न्ते वशको P पुरोडाशादिक पच्यत इत्यर्थः Sy.
९. यतो गाव एवं सुवतेऽतस्ते त्वदर्थाः Sy
१०. Omitted by P. धेनवो युष्मत्प्रीणयित्र्यो गावः Sy
११. पद० P. न seems to be unnecessary. नोपक्षीणा भवन्ति रोगादिना कृशा न भवन्ति Sy.
१२. M. adds शुष्यन्ति before नापि
१३ न केवलमनुपक्षीणाः किन्तु . . . चौराद्युपहारैरुपक्षीणा नष्टा न भवन्ति Sy
१४. स. P
१५ ०वापयतीति P ०वापयितेति D. VM ignores ते ।
१६ शोभनफलप्रद वायुदेव ! Sy.
१७. अश्वा सन्ति Sy.
१८ पुरतो दृश्यमाना. Sy.
१९ तव स्वभूता Sv.
२०. ०पा० M.
२१ बहु० P. ०बाहु . बलानस्याम् M. बाहुषु प्रकृष्टबलवन्तः । उपलक्षणमेतत् । सर्वाङ्गबला इत्यर्थ Sy
२२ नद्याम् P. नदने द्यावापृथिव्यो Sy.
२३. तयोरन्तराले Sy.
२४. तं त्वां पतयन्ति पातयन्ति गमयन्ति । यद्वा । ते तव सम्बन्धिनोऽश्वाः पतयन्ति पतन्ति यज्ञदेशं गच्छन्ति Sv.
२५. शीं P.
२६. पाताः M
२७. युवान इत्यर्थः Sy.
२८. महवतिप्रभूतम् Sy.
२९. वर्धमानास्तथा . . . उक्षाणस्तत्सदृशा इत्यर्थः Sy.

भवन्तः[1]। पुनस्त इति पूरणार्थम्[2]। ये। च[3]। अन्तरिक्षेऽपि निरालम्बे[4]। न नश्यन्ति न पतन्ति[5]। क्षिप्राः[6]। अगिरौकसो[7] ये पदार्थाश्चिगिरन्ति तैः सेव्यमाना गिरौकसोऽप्तादृशा[8] न ह्यपवरकादेन[9] प्रविष्टा वाता-स्तत्र तिष्ठन्ति त इमे[10]। सूर्यरश्मय इव[11]। हस्ताभ्याम्[12]। नियन्तुमशक्ता[13] भवन्ति[14]।

I. 136.

प्र सु ज्येष्ठं निचिराभ्यां बृहन्मो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्याम्। ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता। अर्थेनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥१॥

प्र सु ज्येष्ठम्[15]। सुष्ठु प्रभरत। प्रशस्यम्। नितरा[16] प्रत्नाभ्याम्[17]। महान्तम्[18]। नमस्कारम्[19]।

---

१. पुनन्त M
२. ०र्थः M.
३. धन्वनि, उदकनिर्गमनापादानभूतेऽन्तरिक्षेऽपि Sy.
४. अनाशवो नाशरहिता अव्याप्ता वा। आकाशे विलम्बमकुर्वाणा इत्यर्थः Sy.
५. अतएव जीराश्चित्। चिच्छब्दः पूजायाम्। अत्यन्तं क्षिप्रगतयः। यद्वा। अनाशव इत्यनेन सह समुच्चयार्थश्चिच्छब्दः। आकाशमार्गेऽक्षीणाः शीघ्रगतयश्चेत्यर्थः Sy.
६ गिरा श्लोकः स्थानं येषां नास्ति ते तादृशाः। भर्त्सनादिना स्थितिमलभमाना इत्यर्थः Sy.
७. वार्थं P.
८. सव्य० P.
९ नह्येववर० P.
नव्यपवरकावौ M.
१०. ०ता त० D.
११. सूर्यस्य रश्मय इव दुर्नियन्तवो दुःखेन नियन्तव्याः। ते यथा क्षणेन दश दिशो व्याप्नुवन्ति बहवश्च तद्वदेतेऽपीत्यर्थः Sy.
१२. पूर्वं गिराऽनिर्ग्राह्यत्वमुक्तमिदानीं हस्तेनाप्यनिर्ग्राह्यत्वमाह ... उभाभ्यामपि हस्ताभ्याम् Sy. १३. दुःखेन नियन्तव्या देवयजनगमनाय शीघ्रगामिन इत्यर्थः Sy. ०मशक्या is suggested for ०मशक्ता।
१४. भवन्तु M.
१५. VM explains उक्षणः। दुर्नियन्तवः once only and ignores चित् Ms. D. puts the figure ॥१३५॥ here to indicate the end of one hundred and thirtyfifth hymn. No such number is given in P. and M.
१६. भ० P. सम्भावयत Sy.
१७. कीदृशाभ्यां ताभ्याम्। . . . नितरां चिरकालाभ्याम्। नित्याभ्यामित्यर्थः। प्रवाहरूपेणेति भावः Sy.
१८. महतिप्रवृद्धम् Sy.
१९. नमस्कारोपलक्षितं स्तोत्रम्। तदुपलक्षितं हविर्लक्षणमन्नं वा। . . . नम इत्यन्ननाम। 'नम आयुः' (Ngh. 2.7.) इति तन्नामसु पाठात् Sy.

हव्यम्[१]। स्तोत्रं[२] चान्नप्रदानेन[३] मनुष्यान्[४]। स्वादुतमम्[५]। सुक्षयद्भ्यां[६] मित्रावरुणाभ्याम्[७]। तौ हि[८]। सर्वेषामीश्वरौ[९]। घृतदानौ वर्षणात्[१०]। सर्वेष्वेव यज्ञेषु[११]। उपस्तुतौ भवतः[१२]। तत[१३]। एनयोः[१४]। बलम्[१५]। न[१६]। कुत[१७]। चिदपि, बलयुक्तात्[१८]। आधर्षणाय[१९] भवति[२०]। न[२१] देवत्वम्[२२]। एव[२३]। क्षिप्रम्[२४]। अन्येषामाधर्षणाय[२५] भवति[२६]।

अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः। द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च।
अथा दधाते बृहदुक्थ्यं१ वय उपस्तुत्यं बृहद्वयः ॥२॥

अदर्शि गातुः[१७]। विस्तीर्णायादित्याय[१८] गन्तुम्[१९]। विस्तीर्णा[२०]। गातु[२१]। प्रथममदर्शि[२२]। पन्था[२३]।

---

१ ०व्य P. पूर्वत्र पुरोडाशाद्यवनीयमन्नमिदानीं तु सोमाज्यादिरूपं निपेयं हविरिति विवेकः Sy

२. मतिं तत्प्रदानविषया बुद्धिं भरत। यद्वा मतिं पूज्यं हव्यं हविर्भरत Sy

३. ज्ञानप्रदा० P.

४. ०प्रदा ... मनुष्यान् M
स्वादुतरम् Sy.

५. ०भ्यः P. स्तुत्या हविःस्वीकारेण स्वयं मृडित्वा यजमानमपि सुक्षयद्भ्यां ... हविः सुक्षयद्भ्यां भक्षयद्भ्यामित्यर्थः Sy.

६. मित्रावरुणौ Sy.

७. सम्यग्राजमानौ Sy.

८. ०तदोहौ M. घृतमासूयत आदीयते याभ्यां तौ तादृशौ। यद्वा घृतमुदकं वृष्टिलक्षणं प्रसूयते सर्वत्रानुज्ञायते याभ्यां तौ। एतयोरहोरात्राभिमानिदेवत्वादहोरात्रद्वारा वृष्ट्युत्पादकत्वात्। 'अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति' (TS. 2.1.7.3) इति श्रुतेर्वृष्ट्यनुज्ञाप्रदत्वं प्रसिद्धम् Sy

९. सर्वेष्वपि यज्ञेषु Sy.

१०. सर्वैर्ऋत्विग्भिः स्तूयमानौ Sy.

११. अपि च Sy.

१२ कस्मादपि च शत्रो राक्षसादेः सकाशात्कस्मादप्युपायाद्वा Sy.

१३. आधर्षितुं शक्यं न भवति Sy.

१४. Omitted by P.D.M.

१५ ०मे P. अपि। ... यद्वा पूर्वमिवेदानीमपि Sy. नू चिदिति निपातः पुराणनवयोः N 4.17.

१६. The passage beginning with भवति and ending with आधर्षणाय is missing in M. आधर्षणायोग्यः ... न केनाप्याधर्षणीयो भवति। एतयोर्बलं नाधृष्यं किमु तद्देवत्वमिति भावः Sy.

१७. VM. explains मृळद्भ्याम् once only.

१८. यागाय गमनादिव्यापाराय Sy.

१९. ०त्या P.

२०. अवि० P. D.
उरुतरा Sy.

२१. गान्तुः D. गन्तुः P.
गमनशीला Sy.

२२. अ(व)शि M.
सर्वैर्दृष्टाऽभूत् Sy.

२३. मार्ग आकाशलक्षणः Sy.

आदित्यस्य[1]। रश्मिभि.[2]। भगस्य[3] देवस्य। तेजः[4]। जग्राह[5] भगतेजसा प्रकाशत इत्यर्थः। मित्रस्य। आवासस्थानम्[6]। दीप्त[7] भवति। अर्यम्णस्तदनन्तरम्[8]। वरुणस्येति क्रम[9]। इत्थमस्मिन्[10] प्रादुर्भूते। मित्रावरुणौ धारयेते[11]। महत्[12]। उक्थार्हम्[13]। हविर्लक्षणमन्नम्[14]। उपेत्य स्तोतव्यम्[15]।

ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे। ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती। मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥३॥

ज्योतिष्मतीम्[16]। अग्निसहिताम्। वेदिलक्षणा भूमिम्[17]। धृतत्विड्मनुष्याम्[18]। सर्वैर्हविर्भिर्युक्ताम्[19]। जागरणशीलौ[20] मित्रावरुणौ[21]। अन्वहम्[22]। आभिमुख्येन[23]। सेवेते[24]। तावित्थमावदितेः

---

१. गमनशीलस्यादित्यस्य Sy
२. प्रकाशैः सङ्गतोऽभूत् Sy
३. सर्वैर्भजनीयस्यैतन्नामकस्य देवस्य Sy
४. चक्षुः सर्वप्राणिनां लोचनम् Sy
५. समयंस्त सङ्गतमभूत्। सर्वे स्वस्वव्रव्यवर्जनाय समर्था अभवन्नित्यर्थः Sy
६. तवैव स्पष्टीक्रियते। मित्रस्य प्रकाशकारित्वात्सर्वजनमित्रस्य Sy.
७ वा० P. सदनं गृहमन्तरिक्षम् Sy.
८. दीप्तानां निवासस्थानं रश्मिभि समयंस्त सङ्गतमभूत् Sy
९. आर्य० P. तथार्य्यम्ण एतन्नामकस्य देवस्य...शुक्रं सदनं रश्मिभिः समयंस्त Sy
१०. किञ्च वरुणस्य तमोनिवारकस्यैतन्नामकस्य देवस्य सदनं तथाऽभूत्। यद्यपि सूर्यस्यैकत्वेप्युपाधिभेदेन भेदात्पृथक् स्तुतिस्तथा यद्यपि त्रिभिरपि प्रकाश्यमप्यन्तरिक्षमेकं तथापि प्रकाशकानां भेदात्त्रिधा स्तूयते। उदयानन्तरं कर्मानुष्ठानाय प्रकाशोऽभवदित्यर्थः Sy.
११. अग्नि P.
१२. ०न्नतः P. दधाते धारयतः Sy.
१३. अथ, अतः कारणादुदितत्वादेव... बृहत्प्रभूतम् Sy. १४. स्तुत्यम् Sy.
१५. इत्थं... M. The passage beginning with मित्रस्य and ending स्तोतव्यम् is missing in M स्तोमादिना महत्स्तोत्रं वयो हविर्लक्षणमन्नं च दधाते Sy.
१६ VM ignores च and explains रश्मिभिः। बृहत्। वयः once only.
१७ अयं यजमानः... आहवनीयाग्नेस्तेजोयुक्ताम् Sy. १८. ० मीं D.M. अदितिम्, अदीनां सम्पूर्णलक्षणां क्षितिमग्नेर्निवासयोग्यां भूमिमुत्तरवेदिलक्षणाम् Sy.
१९ ० तत्वङ्म० P.D. धारयति स्वयं कृतवानित्यर्थः। 'एतावती वै पृथिवी यावती वेदिः' (TS. 2.6.4.1) इति श्रुतेः Sy.
२०. यज्ञनिष्पत्तिद्वारा स्वर्गवतीम् Sy.
२१ ० क्तात् P. २२. प्रबोधं कुर्वाणौ। यज्ञं गन्तुमनलसावित्यर्थः Sy.
२३. ज्योतिष्मतीमदितिम्... भवत्यर्थस्तदनन्तरं वरुणस्येति क्रमः इत्थमपि प्रादुर्भूते मित्रावरुणौ M.
२४. ०णान्य० P. न केवलमेतस्मिन्नेवाहनि किन्तु दिवे दिवे सर्वेष्वप्यहस्सु... दिवे दिवे प्रतिदिनम् Sy. २५. ईदृशौ तावा सचेते मित्रावरुणौ सङ्गतौ भवतः Sy.

पुत्रौ। दानस्य[1] स्वामिनौ। युद्धेषु दीप्तियुक्तम्[2]। बलम्। प्राप्नुत[3]। तयोः[4]। मित्र। हतशत्रुजो[5] भवति। वरुणश्चैवम्। अर्यमा[6] च तत्सहित[7]।

अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः।
तं देवासो जुषेरत विश्वे अद्य सजोषसः।
तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥४॥

अयं मित्राय[8]। अयम्। मित्रावरुणाभ्याम्[9]। सुखतम[10]। सोम। भवतु। देवाना[11] मध्ये। अवपानेषु[12]। आभजनीय[13]। देव[14]। तमिमम्[15]। अद्य[16]। सङ्गता[17]। सर्वे। देवा। सेवन्ताम्[18]। तथा। राजानौ[19]। करुथ[20]। सत्यवन्तौ[21]। यत्[22]। वय याचामह इति[23][24][25]।

---

१. दास्य P. दानवस्य M. आज्यादिप्रदानस्य स्वामिनावभिमतदानस्य पालयितारौ वा Sy. २. वेदिमागत्य...आज्यादिस्वीकारेणातिशयेन तेजोयुक्तम् Sy.

३. ०प्नुवतः P. अश्नुवाते प्राप्नुतः Sy.

४. मित्रावरुणयोः Sy.

५. यातयज्जनो यातयन्ति लोकं यवीया जनाः प्रेष्याः स तादृशः। यद्वा यात्यमाना नरके निपात्यमाना जनाः प्राणिनोऽप्यष्टारो येन स तादृशः Sy.
०जनो is suggested for ०जो

६. मित्रश्च वरुणश्च तावुभौ देवौ। अर्यमास्यस्तु देवस्तयोः ... यातयज्जनः। तयोरेव सम्बन्धादुभयोर्मध्ये स्थितो यातयज्जनः स्वस्वव्यापारनियोजितसर्वजनः। मित्रावरुणावहोरात्रदेवौ। अर्यमा तु तयोरेव सामर्थ्यात्सर्वप्राणिनः प्रेरयतीत्यर्थः... कर्मसाक्षित्वात्स्वस्वकर्मानुरोधेन प्राणिनः सुकृते यातयतीत्यर्थः। तादृशोऽर्यमा मित्रावरुणयोरधीनो वर्तत इति शेषः Sy.

७. VM. explains विवे विवे once only.

८. Omitted by M. P. अस्माभिर्हूयमानः Sy.

९ वरुणाभ्याम् P. M. मित्राय वरुणाय च Sy. १०. पीयमानः सन्सुखतमः Sy.

११ मित्रावरुणानुचरेष्वितरदेवेषु Sy.

१२ अवाङ्मुखचमसपानेषु विषयेषु Sy.

१३ ०य P. आ सर्वतो भगो भजनीयस्ताभ्याम्। ..आभग आभजनीयः। यद्वा देवेषु स्तोतृषु यजमानेषु मध्ये देवो दीप्यमानस्तथाऽऽभगस्तैरेव, आ सर्वतो भजनीय. Sy १४. दीप्यमानः Sy.

१५ सोमम् Sv १६. अस्मिन्नहनि Sy.

१७. संगवता P. सजोषसः समानप्रीतियुक्ताः Sy. १८ सेवन्ते Sy.

१९ राजमानौ मित्रावरुणौ युवाम् Sy.

२० कुरुतम्। सेवेथे इत्यर्थः Sy.

२१. ऋतवन्तौ सत्यवन्तौ यज्ञवन्तौ वा मित्रावरुणौ Sy. २२. यस्मात्कारणात् Sy.

२३. वयो चामहे P. ईमहे यत्प्राप्नुमस्तद्देवान्याचामहे ... अभिमतफलं तयोः पानं वा याचामहे Sy.

२४. The passage beginning with इमम् and ending with इति is omitted by M.

२५. VM. explains आभगः। यत्। ईमहे once only.

यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं
मर्तमंहसः । तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम् ।
उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥५॥

यो मित्राय । य[1] । मित्राय[2] । वरुणाय[3] च । परिचरति । जन[4] । हवीषि दत्तवन्तम्[5] । मर्त्यम्[6] । अप्रत्यृतमस्खलितमिमौ देवावावहत[7] । पापात्[8] । रक्षत[9] । तम्[10] । अर्यमा[11] च देव[12] । अभिरक्षति । ऋजुमिच्छन्तम्[13] । तस्य कर्म । लक्षीकृत्य । शस्त्रै । य[14] । एनयो[15] । स्तोत्रैश्च[16] । कर्म । परितो[17] भवति । आभिमुख्येन[18] च भवति[19] ।

नमो दिवे बृहते रोदसीभ्यां मित्रायं वोचं वरुणाय मीळ्हुषे
सुमृळीकायं मीळ्हुषे । इन्द्रंमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।
ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥६॥

नमो दिवे । यथालिङ्गदेवतामन्त्र[20] । नम[21] । महते[22] । दीप्तायान्तरिक्षाय । द्यावापृथिवीभ्यां[23]

---

१. जनो यजमानः Sy.
२. यः । मित्राय omitted by D
३. कर्मणः सम्प्रदानत्वाच्चतुर्थी । मित्रं वरुणं च Sy.
४. The passage beginning with यो मित्राय and ending with दत्तवन्तम् is omitted by M.
५. मरणधर्माणम् Sy.
६. त्यृतमस्खलित० D. ०त्यृतममस्खलित०M. अनर्वाणमद्वेषिणम् । 'भ्रातृव्यो वाऽर्वा' (TS. 6.3.8.4.) इति श्रुतेः । अनल्पं वाऽनन्यसेविनम् Sy.
७. ०हतु M.
८. कस्मादिति तदुच्यते । . . . . न्यूनातिरेकजनितात्पापात् Sy.
९. परितो रक्षताम् Sy.
१०. तं जनं युष्मत्परिचारकम् Sy.
११. न केवलं भवन्तावेवापितु . . . सर्वेषां नियन्ता देवः Sy.
१२ ०तु D M. अभितो रक्षति Sy.
१३ ०न्तः M. देवेष्वार्जवमाचरन्तं यजमानम् Sy.
१४ कोऽस्य जनस्य विशेष इति तत्राह । यो यजमानः Sy.
१५. मित्रावरुणयोः Sv.
१६. स्तोत्रैर्गानयुक्तमन्त्रसाध्यैः Sy.
१७. परिगृह्णाति Sy.
१८. ० ल्यो M. सर्वतोऽलङ्करोति । . . तमभिरक्षतीत्यन्वयः Sy.
१९. VM. explains तम् । अंहसः । व्रतम् once only and ignores तम् । परि
२०. नमस्कारोपलक्षितं स्तोत्रम् Sy.
२१. स्तुत्याय Sy.
२२. द्योतमानाय सूर्याय Sy.
२३. तदभिमानिदेवाभ्याम् Sy.

च। अहं ब्रवीमि। मित्रावरुणाभ्यां च। सेक्तृभ्याम्। सुखयितृभ्याम्। अथ स्तोतः! इन्द्रम्। अग्निं च। उपस्तुहि। दीप्तम्। अर्यमणम्। भग च। चिरम्। जीवन्त। प्रजया। संसृष्टा भवाम। सोमस्य। रक्षणेन।

ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः।
अग्निर्मित्रो वरुणः शर्म यंसन्तदश्याम मघवानो वयं च ॥७॥

ऊती देवानाम्। रक्षणेन। देवानाम्। वयम्। इन्द्रयुक्ता। स्वभूतानाम् . ?। मरुद्भिः सहितमिन्द्रम्। शर्मास्मभ्यम्। अग्न्यादयश्च। सुखम्। प्रयच्छन्तु। वयम्। च। अग्न्यादिभिर्दत्तम्। धनवन्त। प्राप्नुयाम।

द्वितीयस्याष्टकस्याद्यमध्याय व्याकरोदिति।
वर्ण्यस्य कुले जातो माधव सुन्दरीसुत ॥

---

१. स्तौमीत्यर्थः Sy.
२. मित्राय सर्वजनहितायाहरभिमानिदेवाय ... तथा वरुणायावरकाय रात्र्यभिमानिदेवाय Sy.
३. अभिमतफलस्य सेक्त्रे रुद्राय Sy
४. कीदृशाय तस्मै .. शोभनसुखयित्रे। पुनः स एव विशेष्यते। मीळ्हुषे सुमृळीकायेति द्वे प्रत्येकविशेषणभूते Sy.
५. इदानीं यजमान ऋत्विजं स्वात्मानं वा प्रति ब्रवीति Sy.
६. स्तोतारम् M. हे होतः, हे आत्मन्वा Sy.
७. इमम् P. ८. अर्हि M.
९. उपेत्य बुद्धया प्राप्य स्तुहि स्तुतिं कुरु Sy.
१०. अर्यमाणं D. अर्यमाणां P.
११. ०स्तं D. १२. पुत्रभृत्यादिना Sy
१३. सङ्गता भूयास्म Sy. १४. इन्वोः Sy.
१५. ऊत्या सचेमहि तमपि स्तुत्वा तत्कारितेन रक्षणेन सहिता भूयास्मेत्यर्थः Sy.
१६. VM. explains मीळ्हुषे। सचेमहि once only.
१७. ऊत्या तर्पणेन हविरादिना मंसीमहि मन्येमहि Sy.
१८. रक्षणेन। देवानाम् omitted by M देवान्। कर्मणि षष्ठी Sy.
१९ प्रीतेनेन्द्रेण तद्वन्तः Sy.
२० ०ना M. कीदृशा वयम्। स्वयशसः स्वायत्तकीर्तयः Sy.
२१ स्तुत्या हृष्टैर्मरुद्देवैरनुगृहीताः। यद्वा। देवानामूत्या रक्षणेन रक्षिता मंसीमहि ज्ञातारो भवेम सामर्थ्यात्तेषामेव महत्त्वस्य Sy. २२. सुखम् Sy.
२३. शर्मास्मभ्य० M अस्माकम् Sy.
२४. अग्निमित्रवरुणा देवाः Sy.
२५ प्रायच्छत्तं तं वरम् Sy.
२६ चादिभि० M. तैः Sy.
२७. दत्ताश्ववन्तः सन्तः Sy.
२८ तत्सुखम् ... व्याप्नुयाम Sy.
२९. VM. ignores मंसीमहि Ms. D. puts the figure ॥१३६॥ here to indicate the end of one hundred and thirtysixth hymn. No such number is given in P. and M.
३०. वयय० D.

[अथ द्वितीयाष्टके द्वितीयोऽध्यायः]

"सुषुमा यातमद्रिभिः"[1] व्याचिख्यासति माधवः ।
प्रदर्शयँल्लिटो वृत्तिं परोक्षे तत्र लिट् स्मृतः ॥१॥

भूतेऽनद्यतने चैव "ये अग्नेः[2] परि[3] जज्ञिरे"[4]
"इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्"[5] ॥२॥

"उवासोषा उच्छाच्च नु"[6] "ततञ्जुर्मनसा हरी"[7] ।
दृश्यतेऽद्यतने चापि भूते तत्र निदर्शनम् ॥३॥

रश्मिरस्या[8] ततानेति दिवादृष्टमपश्यतः ।
रश्मिं च रात्रौ विततमेष[9] चाद्यतनो मतः ॥४॥

अपरोक्षेऽपि[10] लिड् दृष्टो "जुहुरे[11] वि चितयन्त[12]" ।
"आ[13] दृळ्हां पुरं[14] विविशुः[15]" "सहसानं ववन्दिम[16]" ॥५॥

कर्माणि यौवने चक्रे यानि वक्रिर्ऋषिः[17] पुरा ।
तानि जीर्णः[18] कथयति स्फुटाञ्चात्रापरोक्षता[19] ॥६॥

---

१. RV. I. 137
२. अग्निः P. अग्नि D.
३. ० ङ्गिने M. RV. X 62 6 [a]
४. RV. I. 22.17.[ab]
५. Omitted by P
६. RV. I. 48.3.[a] The passage beginning with त्रेधा and ending with नु is missing in M.
७. RV. I. 20.2.[b]
८. A fragment of RV. I 35.7.[d]
९. रश्मिं रात्रौ वितमेष P. D. M. रश्मिञ्च रात्रावपि तमेष R.
१०. ० क्षे च M R.
११. धृष्टो M
१२. RV. V. 19.2.[a]
१३. अ D. M.
१४. पुरां P.
१५. RV. V. 19.2.[c]
१६. ० मः M. RV. V. 25.9.[b]
१७. ०त्रि ऋ० M. यास्त्रिवृत्तिः ऋ० P.
१८. तनानि P. M.
१९. ०यात्राप० M. स्फुटा is suggested for स्फुटाम्

यद्वा परोक्षमात्मानं प्रथमेनात्र निर्दिशन् ।
पुरुषेण परोक्षां च क्रियामप्यपदिष्टवान् ॥७॥
"यत्रा नश्चक्रा जरसं" दृश्यतेऽत्र भविष्यति ।
यद्वा लिण् न्याय एवायं देवै. क्लृप्तं ह्यनूद्यते ॥८॥
सृजन्तो हि जगद् देवा मनुष्यस्य शतायुषः ।
जरामकल्पयंस्तस्मादर्थो भूतोऽत्र क्ष्यते ॥९॥
यदा न शक्नुयाद्येषु लिटं स्थापयितुं तदा ।
वाक्यार्थानुगुणांस्तांस्तान् पण्डितोऽर्थान्प्रदर्शयेत् ॥ इति ॥१०॥

I 137

सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥१॥

सुषुमा । परुच्छेप । सुनवन्त सोमम् । ग्रावभि । आगच्छतम् । पयसा श्रिता । इमे ।
सोमा । मदकरा । राजानौ । द्युलोकस्य स्प्रष्टारौ । अमुरेभ्यस्त्रातारौ । उपागच्छतम । अस्मान् ।

---

१. ०मे चात्र P. D M
२. ०क्षेत् P. ३. ०क्ष M
४. RV. I 89.9 b
५. वि P. ६. एवाव P.
७. ०वैरप्तं M.
८. देवैराप्तस्त्वनूद्यते R.
९. संसृ० P.
१०. ०क्नुया...र्यां M. ०क्नुयान्न्यायात् R.
११. सुषुमायातम् M.
१२. आगमनाय किमस्तीति चेत्तत्राह...सोमं सुतवन्तो वयम् Sy.
१३. अभिषवसाधनैर्ग्रावभिः Sy.
१४. अस्मत्सकाशं प्रत्यागच्छतम् Sy.
१५. विकारे प्रकृतिशब्दः । पयोभिर्मिश्रिताः । 'तस्मान्मैत्रावरुण पयसा श्रीणाति' (T'S 6.4.8 1.) इति हि ब्राह्मणम् Sy.
१६ इमे पुरतो गृहीता वर्तन्ते । अत आयातम् Sy.
१७. मत्सरास्तृप्तिहेतवः । ... पुनस्त एव विशेष्यन्ते... मत्सरा मदहेतवो मादने मात्सर्यवन्तो वेतरयज्ञगतसोमेभ्यः सोमाः Sy. मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः N. 2. 5.
१८. कीदृशौ युवाम् । ... राजनशीलौ Sy.
१९. स्पृ० P. D. द्युलोकवासिनौ Sy.
२०. अस्मासु मध्येऽस्मत्पालकौ वा युवाम् Sy.
२१. ०ज्ञम् M.
२२. अस्मत्सम्बन्धिनं यज्ञम् Sy.

इमे हि। सोमा। युवयोरर्थाय। पयोमिश्रणा। ज्वलन्तीति।

इम आ या॒तमिन्द॑वः सोमासो॒ दध्या॑शिरः सु॒तासो॒ दध्या॑शिरः।
उ॒त वा॑मु॒षसो॑ बु॒धि सा॒कं सूर्य॑स्य र॒श्मिभिः॑।
सु॒तो मि॒त्राय॒ वरु॑णाय पी॒तये॒ चारु॑र्ऋ॒ताय॑ पी॒तये॑ ॥२॥

इम आ। आदित्यग्रहो दधिमिश्रणा। इमे वा मित्रावरुणौ। दीप्ता। सुता। सोमा। दधिमिश्रणास्तथा सति। आगच्छतम्। अपिच। वाम्। उषस। बोधकाले। सूर्यरश्मिषु प्रादुर्भूतेषु। सुत सोमोऽस्माभि.। मित्राय। वरुणाय। सत्यभूताय। पानाय। शोभनः।

---

१. हे मित्रावरुणा एतन्नामानौ देवौ वां युवयोरर्थाय Sy.

२ ०णात् D. M पूर्ववद्विकारे प्रकृतिशब्दः। गोभिः क्षीरैराशिरो मिश्रिताः सञ्जाताः। किञ्च गवाशिरो गोभिरुदकैर्मिश्रिताः सञ्जाता। यद्वा गोभि. स्तुतिलक्षणैर्मन्त्रैर्मिश्रिता. Sy

३. ०तीति D. M. अत एव शुक्रा दीप्ताः सञ्जाताः। 'आशिरमवनयति सशुक्रत्वाय' (TS 6 1.6 5) इति श्रुतेः Sy.

४ VM ignores मित्रावरुणा and explains मत्सरा। इमे। गवाशिरः once only.

५. ०ण इ P.D.M. पुरतो ग्रहेण गृहीता वर्तन्ते। अत आयातम् Sy

६. युष्मदर्थम् Sy.

७. इन्दवः क्लेदनसमर्थाः Sy.

८. मन्त्रेण ग्रावभिरभिषुताः सम्पन्ना अत आयातमिति शेषः Sy.

९. दध्ना श्रयणवन्तः सन्तः ... धीयमानाशिरः सोमाः। आदित्यग्रहे दध्यवनयसद्भावात्तदपेक्षया दध्याशिर इत्युक्तम् Sy.

१०. युवयोः प्रीतये पालनाय Sy.

११. उषसः सम्बन्धिनि बोधे सति ... प्रकाशे सञ्जाते सति Sy.

१२ M. adds च after सूर्यरश्मिषु। न केवलमुषस एव बोधे, अपि तु सूर्यस्य रश्मिभिः साकं सूर्यकिरणैः सह प्रकाशे हविष्प्रदानाय सञ्जाते सति Sy

१३ सतः M.
अभिषुतः Sy

१४. मित्रा M. इदानीं वियुज्योच्यते। मित्राय सर्वहितायैतन्नामकायाहरभिमानिदेवाय Sy.

१५ तथा वरुणायावरकाय रात्र्यभिमानिदेवाय च तदर्थं सोमः सुत इति शेषः Sy.

१६. ऋताय यज्ञाय तन्निर्वाहकाय तदर्थम् Sy.

१७. यज्ञसिद्ध्यर्थं हि देवानां सोमपानम्। यद्वा। कर्तरि क्तिच्। पीतये पात्र ऋत्विगादय ऋताय यज्ञाय तन्निर्वाहकाय Sy.

१८. चारुश्चरणीयो भक्षणीयः सोमः सुतोऽभिषुतः Sy.

१९. VM. explains पीतये once only.

तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥३॥

तां[1] वां[2] धेनुम्[3]। ताम्[4]। धेनुम्[5]। इव। वासयित्रीम्[6]। वाम्[7]। सोमलताम्[8]। ग्रावभिः[9]। दुहन्ति[10]। सोमरसम्[11]। अस्मत्रा[12]। गन्तम्। उप न.=अस्मान्[13], उपागच्छतम्[14]। अभिमुखौ। सोमपानाय। अयम्। मित्रावरुणौ! युवाभ्याम्[15]। आभिमुख्येन[16]। पानाय। सोम[17]। सुत[18]। ऋत्विग्भि[19]।

I.138.

प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते । अचीमि सुम्नयन्नहमन्त्यूतिं मयोभुवम् ।
विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥१॥

प्रप्र पूष्णः[20]। अन्वहमुदयाद्[21] बहुजननस्य। पूष्ण। अस्माभि प्रशसा क्रियते। महत्त्वम्।

---

१ ता P.
२. तां प्रसिद्धामग्निहोत्राद्यर्थाम् Sy.
३. प्रीणयित्रीं गामिव Sy.
४. सर्वाङ्गाच्छादितपयस्कां बहुक्षीरामित्यर्थः। यद्वा पय आदिनाऽऽच्छादयित्रीम् Sy.
५. युवयोः सम्बन्धिनम् Sy
६ वल्लीरूपं सोमम् Sy.
७. केन साधनेनेति तदाह ... अभिषवसाधनैर्ग्रावभिः, किञ्चाद्रिभिस्तैरेव साधनैः Sy.
८. सम्पादयन्त्यध्वर्यवः। ... सोमं युष्मदर्थमेव दुहन्ति। वल्लीरूपं सोमं युष्मदर्थमेवोदकेनाप्लाव्य रसं दुहन्ति Sy.
९. ०रम् P.
१०. अस्मत्त्रातारौ युवाम् Sy.
११. अस्मदीयं यज्ञम् Sy.
१२. उपागन्ताभि० P.
१३ युष्मदर्थम् Sy.
१४ आपीतये सम्पूर्णपानाय Sy.
१५. सोमस्नुतः M. अभिषुतः ... अत आगच्छतमित्यर्थः Sy.
१६. नेतृभिर्यज्ञनिर्वाहकैर्ऋत्विग्भिः Sy.
१७ VM. explains दुहन्ति। अद्रिभिः। सुतः once only.
Ms. D. puts the figure ॥१३७॥ here to indicate the end of one hundred and thirtyseventh hymn. No such number is given in P. and M.
१८. ०यान् P.
१९. बहुयजमानार्थमुत्पन्नस्य Sy.
२०. पोषकस्यैतन्नामकस्य देवस्य Sy.
२१. प्रस्तूयते सर्वैः। वीप्सा पादपूरणे Sy.

अस्य[1]। वृद्धस्य[2]। न। क्षीण[3] भवति। स्तोत्रञ्च[4]। सुखमिच्छन्[5]। अहम्[6]। अन्तिके यस्य रक्षा भवति तम्[7]। सुखस्य[8] भावयितारम्[9]। स्तौमि। विश्वस्य मनुष्यस्य[10]। य[11]। मन.। आत्मनोऽभिमुखमन्येभ्यो देवेभ्य[12] पृथक् करोति। महनीय[13]। देव[14]।

प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः। हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः। अस्माकमाङ्गूषान्द्युम्निनंस्कृधि वाजेषु द्युम्निनंस्कृधि ॥२॥

प्र हि त्वा पूषन्[15]। पूषन्[16] त्वम्। मृध[17] शत्रूनारया[18] तुदसि एवमहम्[19]। त्वा[20]। स्तोत्रै[21]। अस्मत्कार्येऽधिकृत[22] करोमि। यथा। गमनशीलमश्वम्[23]। गमने योजयन्त्येव तथा सति। यथा। उष्ट्र[24]। शीघ्रं गच्छत्येवम्[25]। शत्रून्[26]। पारयाधिगच्छेति[27]। यस्मात्[28]। त्वाम्[29]। हुवे[30]। सुखस्य भावयितारम्।

---

१. अस्य Sy.
२. न हिनस्ति कश्चिदपि Sy.
३. अस्य पूष्णः स्तोत्रं न तन्वते न हिनस्ति न विरमति। सर्वोऽपि जन एन स्तौतीत्यर्थः। जगत्पोषकत्वादिति भावः Sy.
४. अतः कारणात् ... अहमपि यजमानः Sy.
५. आसन्नरक्षणम्। ... स्तुत्यनन्तरमेव वरप्रदमित्यर्थः Sy.
६. सुखस्योत्पादकं भावयितार वा Sy
७. सर्वस्य स्तोतुर्ऋत्विजः Sy
८. पूषा Sy. ९. ० ख ... भ्यो D
१०. आयुयुवे समन्तान्मिश्रयति शीघ्रवरप्रदानादिति भावः। . . मखं यज्ञमायुयुवे सम्पूर्तिपर्यन्तं मिश्रयति। यद्वा विश्वस्य मनोमिश्रणे यजमाने किमायातमिति चेदुच्यते, मखो यज्ञनिर्वाहकोऽयं पूषा देवो यजमानस्य मन आयुयुवे समन्तान्मिश्रयति। सामर्थ्याद् यजमानस्य मन इति लभ्यते Sy.
११. मखो यज्ञवान्। मत्वर्थो लुप्यते Sy.
१२. The passage beginning with यः। मनः and ending with देवः is omitted by P. P. reads आत्मनोऽभिमुखः only. दीप्यमानः Sy.
१३ VM explains प्र। अस्य। न। तन्वते। आयुयुवे। मखः once only.
१४ मृधः सङ्ग्रामानुद्दिश्य, ऋणवो गच्छेस्तथा प्रकृण्वे। यद्वा। यथा ऋणवोऽस्मद्भयं प्रति गच्छेः। ऋणु गतौ ... तथा त्वां कृण्वे Sy. १५. प्र हि त्वा...शत्रून् M.
१६ त्वां M. अजिरं यज्ञदेशं प्रति गमनवन्तं .. त्वाम् Sy.
१७ यामनि गमने निमित्तभूते सति ... स्तोमै. Sy. १८. प्रकृष्टं करोमि Sy.
१९ तत्र दृष्टान्तः। ... शीघ्रगामिनमश्वमिव। स यथा प्रस्तूयते तद्वत् Sy.
२०. शीघ्रगमने Sy.
२१. तत्र दृष्टान्तः। ... उष्ट्रो यथा भारं वोढा Sy. २२. पारयति तद्वत् Sy.
२३. मृधो हिंसकान्योद्धून् सङ्ग्रामे Sy.
२४. पारं नयसि Sy.
२५. अतः कारणात् Sy.
२६. The passage beginning with गच्छत्येवं and ending with हुवे is missing in M. आह्वयामि Sy.

१ २ ३ ४ ५ ६
देवं सन्तम्। मर्त्यः सन्। सख्यसिद्ध्यर्थम्। ततोऽस्माकम्। स्तोमान्। सङ्ग्रामेषु। अन्नयुक्तान्।
७ ८
कुरु।

यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे। तामनु त्वा नवीयसीं नियुतं राय ईमहे। अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥३॥

९ १० ११ १२ १३ १४ १५ १६
यस्य ते पूषन्। यस्य। ते। पूषन्। सख्ये। स्तोतार। कर्मणा। च। भवन्त। त्वदीयेन
१७ १८ १९ २०
रक्षणेनाभिमतान्भोगान्। आत्मीयेन कर्मणा स्तुत्या च। भुञ्जते। तादृशीम्। त्वदीयाम्। नवतरा
२१ २२ २३ २४ २५ २६
स्तुतिम्। लक्षीकृत्य त्वा वयम्। धनस्य। नियुतसङ्ख्याम्। याचामहे। तथासति बहुस्तुते!
२७ २८ २९ ३०
अकुप्यन्। अस्माकं। सङ्ग्रामे सङ्ग्रामे। सर्ता। भव रक्षणाय।

---

१. देवनशीलं पूषणम् Sy.

२. The passage beginning with प्र हि त्वा and ending with मर्त्यः is omitted by P. सन्त . . स्सन् P. मरणधर्मा मनुष्योऽहम् Sy

३. समानख्यानाय प्रियकरणाय Sv.

४. एवमाहूतः सन् Sy.

५. स्तोन् P. आघोषान्स्तोमान्। 'आङ्पूर्व स्तोम आघोषः' (N. 5. 11.) इति यास्कः Sy.

६. द्योतनवतःकुरु। यद्वा। स्तोमान्यशोवतोऽन्नवतो वा कृधि। अस्मत्स्तुत्या प्रीतस्त्वमेवं कुर्वित्यर्थः। किञ्च...द्युम्निनोऽन्नवतःSv

७. कृधि, अस्मद्वैरिणो जित्वा तेषामन्नं मयि कुर्वित्यर्थः Sy. ८. VM. ignores हि। न and explains द्युम्ननः। कृधि once only.

९. रक्षकत्वेन प्रसिद्धस्य Sy.

१०. यस्य। ते। पूषन्। omitted by M.

११. सख्यित्वे हितकरणे सति Sy.

१२. विपन्यवो विशेषेण स्तोत्रशीलाः। यद्वा। मेधाविनामैतत्। मेधाविनो यजमानाः Sy. १३. क्रतुना प्रहृष्टेन कर्मणा Sy.

१४ एव Sv.

१५ भवन्तं प्रीणयितारः सन्तः Sy.

१६ ०न्तं त्व० D. भवन्तस्त्वदीयेन missing in M. त्वत्कृतेन Sy.

१७ रक्षणेन रक्षिताः सन्तः Sy.

१८ ०नाभिमनात् D ०नाभिमंहनात् P

१९ M adds इत्थम् after भोगान्।

२०. भुञ्जते भोगान्। इति एवमेव सर्वदा कृत्वा कर्मणा . भुञ्जते सर्वे पाल्यन्त इति वा Sy.

२१ स्तुत्यां वा रक्षाम् Sy.

२२ अनु-अनुसृत्य रक्षाया अनन्तरम् Sy.

२३. धनानि Sy.

२४. ०सख्यां P. एतत्सङ्ख्याकान् Sy.

२५. Omitted by P. and D.

२६. उरुशंस बहुधा स्तुत्य! Sy.

२७. अस्मासु सुमनाः सन् Sy.

२८. Omitted by P. M. सर्वेष्वपि सङ्ग्रामेषु Sy. २९. सर्ता M. सरी भव, अस्माभिर्गन्तव्यो भव. . .गमनशीलो भव, पुरतो गन्ता भवेत्यर्थः Sy.

३०. VM. explains सरी। भव once only and ignores इति।

अस्या ऊ षु णः सातये भुवोऽहेळमानो रिरिवाँ अजाश्व
श्रवस्यतामजाश्व । ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥४॥

अस्या ऊ षु णः[1][2]। पूषन्[3]! अस्या[4] स्तुते[5]। भजनाय। सुष्ठु[6]। अस्मान्[7]। समीपे[8]। भव। अक्रुध्यन्[9]। दानवान्[10]। यस्याश्वा अजा। धनमिच्छतामस्माक[11] स्तुतेरिति[12]। शत्रूणामुपक्षपयित[13]! त्वा वयम्।

---

१. ऊ इति पादपूरणः Sy. ऊषू पदपूरणौ SKN. 'उ' इति 'सु' इति 'न' इति पदानि Dur.

२. ण M. ऊष्मणः D.

३. अस्यै। चतुर्थ्यर्थे षष्ठी Sy. अस्यै Dur.

४. ०ते P.

५. सातये लाभाय Sy. षष्ठ्यर्थे एषा चतुर्थी, सातेः 'षणु दाने' दानस्य SKN. लब्धये Dur.

६. नोऽस्माकम् Sy. नोऽस्माक लिप्सिकाया इत्यर्थः SKN. अस्माकम् Dur.

७. उपभुवः समीपस्थो भव Sy. समीपे भव। तेन चात्र तवाभिमुख्यं लक्ष्यते यदेतल्लिप्सितमस्माकं दानम्। एतस्या. (सातेः) अभिमुखो भव चिकीर्षेस्तदित्यर्थः SKN. कथं नाम वयमर्थमभिप्रेत लभेमहीत्येतमर्थमुद्दिश्य हे पूषन् ... उप समीपे भव। त्वयि सन्निकृष्टे त्वदनुग्रहादेतमर्थं लभेमहीत्यभिप्रायः Dur.

८. अनादरमकुर्वन् Sy. क्रुध्यतिकर्मायं याच्ञायाः क्रोधहेतुत्वेन लोके दृष्टत्वादेवमुच्यतेऽहेडमान इति SKN. सर्वो ह्याभ्यर्थ्यमानः क्रुध्यतीत्यभिप्रायः Dur.

९. दाता च सन् Sy. छान्दसत्वाद्वर्तमाने लटि क्सावेतद्रूपम्। नेदर्दिरित्यर्थः SKN. दानाभिप्रायसंयुक्तेन चेतसोपभव Dur.

१०. हे अजाश्व पूषन्। 'अजाश्वेति पूषणमाह' (N. 4 25) इति यास्कः ... हे अजाश्व, अजा एवाश्वस्थानीया यस्य तादृशस्त्वम्। पूषनामेदम्। ... 'अजाः पूषणः' (Ngh. 1. 15.) इति यास्कः Sy. अजजातीया अजाकारा वाऽश्वा यस्यासावजाश्वस्तस्य सम्बोधनं हे अजाश्व! ..हे अजाश्व! पूर्वेण पौनरुक्त्यप्रसङ्गात् 'अज गतिक्षेपणयोः' इत्येवं व्युत्पाद्यते। अजाश्च गमनस्वभावकाश्चाश्वा वा यस्येत्यर्थः SKN. अजाश्व, अजनाश्व गमनाश्व छागाश्व वा। ... भवाजनाश्व। छागाश्वेत्यर्थः Dur.

११. अन्नमिच्छतामस्माकम् Sy. अथो धनं तदिच्छतां धनकामानामस्माकम् SKN. अस्माकं धनमिच्छताम् Dur.

१२. ०च्छतास्मा० P. ०च्छता अ० M.

१३. शत्रूणामुपक्षपयितः पूषन् Sy. उपक्षपयितस्तमसां तस्कराणां वा SKN. हे दस्म दर्शनीय अथवा दान्त Dur.

साधुभिः[1]। स्तोमैः[2]। सुष्ठु। आवर्तयामः[3]। नहि[4]। त्वामहम्। पूषन्! अतिमन्येऽति[5]-मननमुपेक्षा। आघृणि = आगतदीप्तिः[6]। न[7] ते सख्यमित्यत्रापि हीत्यनुषङ्गादनिघातः[8]। त्वया[9]। सख्यम्[10]। स्तोत्रैरनुपालयामि[11][12]।

---

१. केन साधनेनेति तदुच्यते साधुभिः ...त्वां प्रीणयितुं समर्थैः Sy. शोभनैर्मधुरस्वरसौष्ठवादियुक्तैः SKN. शोभनैरित्यर्थः Dur.

२. स्तोत्रैः Sy. स्तोमैस्तीव्रस्तुतिभिः SKN स्तोत्रैः Dur

३. ओ इति निपातत्रयसमुदायात्मक एको निपातः। . . ओ षु ववृतीमहि सर्वत एव सुतरां वर्तयेमहि ... यज्ञान्तरगमनान्निवर्तयाम इत्यर्थः Sy. आ ऊ ओ इति पदपूरणाः सुष्ठु आवर्तयामो वयम् SKN. 'आ' 'उ' 'सु' इति पदानि। .. आभिमुख्येनात्मनो वर्तयामहे Dur.

४. नैव Sy. नहीत्ययमेको निपातो नशब्दस्यार्थे न त्वाम् SKN

५. अवमतिम् ... करोमि Sy अतीत्ययमवेत्यस्य स्थाने। अवमन्ये कदाचिदप्यहम् SKN. त्वामतीत्य साधुतरां काञ्चिदप्यन्यामहं देवतां मन्ये।... त्वदुक्त एवाहमस्मीत्यभिप्रायः Dur.

६. ०प्त P. आघृणे सर्वतो वृष्टेः क्षारयितः। यद्वा ... हविषामाहर्तः स्वीकर्तः Sy. हे अतिघृणे 'घृ क्षरणदीप्त्योः' इत्यस्य घृणिर्दीप्तिरागतदीप्तिक SKN. आगतदीप्ते Dur.

७. Omitted by P. D. नैव Sy. नच SKN.

८. ०ङ्गविघातः M.

९. तव Sy., SKN., Dur.

१० सखित्व हितकर्तृत्वम् Sy. ...स्तुत्यस्तोतृलक्षणम् SKN. सखिभावम् Dur.

११. यावि (मि) M. नहि, अपह्नुवे, नैवापनयामि न त्यजामि। सर्वतः प्रख्यापयामीत्यर्थः Sy. अपलपामि, अपनयामीत्यर्थः। यथैव पुरा, एवमिदानीमपि स्तौम्येवेत्यर्थः SKN. कदाचिदप्यपह्नुवे। कृतज्ञोऽहमित्यभिप्रायः Dur.

१२. VM. ignores उ and explains अजाश्व once only. A fragment अहेळमानो ररिवाँ अजाश्व is quoted by Skanda in N 1 1. p. 1.6. with the remark: अश्वशब्दोऽजेषु पठ्यते। The first two *pādas* are quoted by Yāska in N. 4 25 and are explained in the following manner: अस्यै नः सातय उपभव। अहेळमानोऽकुप्यन्। ररिवान्—रातिरभ्यस्तः। अजाश्वेति पूषणमाह। अजाश्वा अजा अजनाः। The stanza is quoted and explained in full by both Skanda. II. 276. and Durga. Ms. D. puts the figure ॥१३८॥ here to indicate the end of one hundred and thirtyeighth hymn. No such number is given in P. and M.

I.139.

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह
इन्द्रवायू वृणीमहे । यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥१॥

अस्तु श्रौषट्। वैश्वदेवी स्तुति[1]। श्रवणम्[2]। अस्तु[3]। कर्मणाह[4] यज्ञार्थम्। अग्निम्[5]। पुरा[6]। दधाम्याहवनीयम्[7]। आवृणीमहे[8] च[9]। दिव्यम्[10]। तत्[11]। शर्धो मारुतम्[12]। क्षिप्रम्[13]। इन्द्रवायू[14] च। यदा[15]। मया क्रियमाणा[16]। नवतरेय स्तुति[17]। यजमाने[18]। स्तुतीना धर्तरि[19]। सम्बद्धा[20] भवति[21]। अथ[22]। अस्मान्[23]। सुष्ठु[24]। लौकिकानि दासादिकृतानि परिचरणादीनि[25]। प्रकर्षेण[26]। उपगच्छन्तु[27]। यथा[28]। देवान्[29]। प्रति[30]। ऋत्विजा कर्मण्युपगच्छन्ति।

यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन
मन्युना । युवोरित्थाधि सद्मस्वपश्याम हिरण्ययम् ।
धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥२॥

यद्ध त्यत्। 'ऋतमहरनृत रात्रि । न वा, इद दिवा न नक्तमासीत्। अव्यावृत्त ते

---

१. ०ति P.D.M.
२. यस्मात्स्तुतिः क्रियते तस्मात् अस्याः स्तुतेः श्रवणम्। Sy
३. भवतु। श्रोता भवतु वा मरुतां गणोऽग्निर्वा। इन्द्रवायुपक्षे प्रत्येकापेक्षयैकवचनम् Sy ४. प्रणयनादिकर्मणा Sy.
५. आहवनीयाख्यम् Sy. ६ पुरत उत्तरवेद्याम् Sy. पुरः is suggested for पुरा ७. धारितवानस्मि Sy.
८. आभिमुख्येन सम्भजामहे Sy
९. Omitted by M.
१०. दिवि भवम् Sy. ११ तादृशम् Sy.
१२. बलवन्तं वाऽग्निम् Sy.
१३. मां तं M. यद्वा तच्छर्धस्तादृशं मरुतां स्वरूपं बलम् Sy. १४. इन्द्रवायू वृणीमहे Sy. १५. यस्मात्कारणात् Sy.
१६. कुर्वाणः स्वार्थप्रकाशनम् Sy.
१७ स्तुतिरूपा वाक् Sy. १८. विवस्वति दीप्तिमति Sy १९. नाभौ भूम्या नाभिस्थाने देवयजने वेदिरूपे। यद्वा। नाभौ सर्वफलस्य सम्बन्धके यज्ञे। 'यज्ञमाहुर्भुवनस्य नाभिम्' (TS.7.4.18.2.) इति श्रुतेः Sy. २०. संबन्धो D. सम्बध्यते। अस्माभिः प्रयुज्यत इत्यर्थः Sy.
२१. अनन्तरम् Sy. २२. अस्मदीयानि Sy.
२३ कर्माणि स्तुत्यादिरूपाणि Sy.
२४. ०न्त M. युष्मानुपगच्छन्तु Sy.
२५. Omitted by P. D.
२६. अग्न्यादिदेवान् Sy.
२७. आभिमुख्येन प्राप्तुमिव Sy.
२८. कर्मणि P. अस्मदीयानि कर्माणि Sy.
२९. उपयन्तु तेषां समीपं प्राप्नुवन्तु Sy.
३० VM. ignores ह and explains वृणीमहे once only.

देवा[१] मित्रावरुणावब्रुवन्' इत्याद्यध्वर्युब्राह्मणम्। 'मन्युर्मन्यतेर्दीप्तिकर्मण.'*। मित्रावरुणौ! यत्[२]। एतद् युवाम्। सत्यभूतादह्न[३]। अनृतभूतान्धकार?। आदित्यस्य। स्वभूतेन। तेजसा। आददौ। अथ व्युष्टायां रजन्या यज्ञगृहेषु। अधि। युवयो। हिरण्मयम्। इत्थम्। अपश्याम। कर्मभि. श्रद्धानेन। च। मनसा सोमयागपरै। सोमस्य। स्वभूतै। इन्द्रियैश्चापश्याम।

युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्तइव श्लोकमायवो युवां हव्याभ्याय्यवः। युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा। प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥३॥

युवां स्तोमेभि.। यथा। श्लोकम्। आश्रावयन्त स्तोतारो मनुष्या राजानमभ्याह्वयन्ति, एवमश्विनौ! युवाम्। आयव। स्तोमै। हवीषि। अभ्याह्वयन्ते। देवौ भवन्ता-

---

१. देवयो D. देवयोः P. * N. 10.29
२. यस्मात्कारणात् Sy. ३. त्यत् तदुदकम् Sy. ४. दह्नः M आदित्यात् Sy.
५. अनृतभूतान्धकार is suggested कीदृशमुदकम्। अनृतं नश्वर शोषणस्वभावम् Sy. ६. दक्षस्य समर्थस्य Sy
७. केन साधनेन। ... स्वकीयेन। . आत्मभूतेन Sy.
८. तेजसा।...मन्युर्विशेष्यते.. मननीयेन सामर्थ्येन Sy.
९. आददाथे सर्वतो ददयः। . अहोरात्राभिमानिदेवौ मित्रावरुणौ खलु वृष्टि मोचयतः। 'अहोरात्रे वा' (TS 2.1 7.3.) इत्यादिश्रुतिः पूर्वमेवोदाहृता Sy आददथुः is suggested for आददौ
१०. यज्ञसदनेषु Sy. ११. अधिकम् Sy.
१२. The passage beginning with मित्रावरुणावब्रुवन् and ending with युवयोः is omitted by P. and D. युवयोः सम्बन्धि Sy.
१३. हिरण्मयेम् P.D. हिरण्मयं रूपम् Sy.
१४. वक्ष्यमाणप्रकारेण Sy.
१५. अपश्याम P. पश्येम Sy.
१६. कर्मणि M. केन साधनेनेति तदुच्यते। ...त्वदुद्देश्यैः कर्मभिर्यज्ञादिरूपैः Sy.
१७. Omitted by P. and D.
१८ त्वदासक्तेन चेतसा च Sy. १९. सोमम् Sy. २०. आत्मीयैः... अस्मदीयैः Sy.
२१. अनन्यैश्चक्षुरादीन्द्रियैः।...नासाद्यपेक्षया बहुवचनम् Sy
२२. ०श्या P. ०श्याम· M.
२३. VM. ignores ह। अधि and explains स्वेन। मन्युना। स्वेभिः। अक्षभिः once only
२४. श्लोकाकम् P. युष्मदीयस्तुतिरूपा वाचम्। ...श्लोक इति वानङ्नाम। 'श्लोको धारा' (Ngh. 1.11.) इति तन्नामसूक्तत्वात् Sy.
२५. सर्वतः श्रवणविषयां कुर्वन्त इव Sy.
२६. ०व्य P.D.M. २७. स्तुवन्ति Sy.
२८. अश्विनौ देवौ Sy.
२९. मनुष्यनामैतत्। यजमानाः Sy.
३०. स्तोत्रैः Sy. ३१. हविषाऽऽज्यादिना Sy. ३२. आभिमुख्येन गन्तारः। प्रीणयितुमिति शेषः। हवींष्याभिमुख्येन प्रापयन्तो वा Sy.

विच्छन्तोऽथवा[१] यजमाना.। किञ्च युवयो.[२]। अधि[३]। सर्वधनौ[४]। विश्वा.[५]। श्रिय.[६]। सर्वमन्नम्[७]। च स्तोतृणा वर्तन्ते[८]। तथा हिरण्मये[९]। रथे स्थितौ भवन्तौ। वाम्[१०]। दस्रौ[११]। चक्र पवय.[१२]। गमयन्ति— मधुभाजनानि पवय[१३] इत्यपर तानि मधु क्षरन्ति[१४]।

अर्चेति दस्रा व्युनाकमृण्वथो युञ्जते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु। अधि वां स्थाम वन्धुरे रथे दस्रा हिरण्यये। पथेव यन्तावनुशासता रजोऽञ्जसा शासता रज.॥४॥

अर्चेति दस्रा[१५]। ज्ञायते[१६]। दर्शनीयौ[१७]। युवाम्[१८]। द्युलोकम्[१९]। स्वरथेन व्यृण्वथ[२०] पृथक्कुरुथो[२१] मध्येनागमनात्। अस्माक दिवोऽन्वेषणेषु[२२] सत्सु[२३] भवन्तौ सर्वस्य योक्तारौ[२४]। ध्वसनरहिता[२५]। अश्वा। युञ्जतेऽस्मत्समीपमानेतुमिति[२६]। दर्शनीयौ[२७]। हिरण्मये। रथे। बन्धुरस्थाने[२८]। अधि तत्र। युवयो-

---

१ देवयन्तो युवामात्मन इच्छन्तः Sy
२. ०न्तौथवा P.
३. युवयोः सम्बन्धिनीः Sy.
४. अधिकम्। भजन्त इति शेषः Sy.
५. विश्वा P D M. सर्वाः Sy.
६. सेवनीयाः.. लक्ष्मीर्धनकनकादिरूपा Sy
७. अन्नमपि युष्मत्प्रसादादधि, अधिक लभन्ते Sy ८. वन्तन्ते M
९. हिरण्मये मधुपूर्णे Sy.
१०. शत्रूणामुपक्षपयितारौ Sy.
११. चक्र...या D चक्रया P. तन्नेमयः Sy 'पवी रथनेमिर्भवति यद्विपुनाति भूमिम् N.5.5.
१२. वयः P. Missing in M.
१३. स्रवन्ति।.... मधुपूर्णपात्रोपेतत्वाच्छीघ्रगमनेन चक्रेषु मधूनि स्रवन्तीति भाव.। ...किञ्च तादृशे हिरण्यये हिरण्यरमणे रथे मधुरं हविर्यहृतमिति शेषः Sy.
१४. VM. explains युवाम्। हिरण्यये once only.
१५. वक्ष्यमाणं युष्मत्स्वेष्टितम् Sy.
१६. ज्ञायते सर्वैः Sy.
१७. वज्रायश्विनौ Sy. १८. वां D.
१९. किं तदिति तदुच्यते। नाकं स्वर्गम् Sy.
२०. व्यृण्वथः P. ०थ D विशेषेण गच्छथः... यज्ञसम्पूर्त्यनन्तरमिति यावत्। उशब्दोऽवधारणे। यद्वा नाकम्। अकं दुःखं तद्रहित यज्ञम् ... विशेषेण गच्छथ एव Sy. २१. कुरुतः M.
२२. स्वर्गस्यैषणेषु द्योतनात्मकस्य यज्ञस्यैषणेषु गमनेषु वा निमित्तभूतेषु ... दिविष्टिषु दिवो गमनेषु निरालम्बाकाशगमनेषु Sy.
२३. ०मनात् अस्मान्दि पोषणेषु सत्सु P.
२४. तवर्थम् ... युष्मत्सम्बन्धिनो रथस्य योजयितारः सारथय. Sy.
२५. रथस्य तदाश्रितस्य च ध्वंसमकुर्वाणाः Sy.
२६. अश्वान्योजयन्ति रथे। युक्ते रथे वा युष्मान् Sy. २७. Missing in D. and P. अश्विनौ Sy.
२८. बन्धुरत्रययुक्ते। युगबन्धनाधारः काष्ठविशेषो बन्धुरम्। तादृशत्रययुक्तत्वं 'रथो यो वां त्रिबन्धुरः' (RV.VIII.22.5a.) इत्यादिषु प्रसिद्धम् Sy.
२९. हिरण्यरथबन्धुरस्थानेषि P. D. हिरण्मयौ रथबन्धुरस्थानेऽपि M. तादृशस्य रथस्योपरि Sy.

रथ। स्थानम्। यथा। पथा। यन्तौ सूर्याचन्द्रमसौ। दिग्विभागज्ञापनेन मार्गम्। शास्त। एवमेतौ च सर्वेषा मार्गानुशासनम्। ऋज्जसा। कुरुत, यद्वा यथा मार्गेण गच्छन् क्षेत्रविदक्षेत्रविदो मार्गमनुशास्ति तद्वत्, इमावित्येतयोर्द्वित्वकृत द्विवचनम्।

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम्।
मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥५॥

शचीभिर्न। कर्मधनौ। अस्मभ्यम्। कर्मभि। दिवा। नक्त च। धनानि प्रयच्छतम्। मा। युवयो। दानम्। कदा। चिदपि। अस्मत्त। उप। दसद् भवतु।

वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास उद्भिदः। ते त्वा मन्दन्तु दावने महे चित्राय राधसे।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ गहि ॥६॥

वृषन्निन्द्र। वृषन्। इन्द्र। वर्षित्रा पेया। दीप्ता। इमे। सोमा वृत्रवधादिषु त्वा

---

१. अस्थापयाम Sy.
२ सुपथेन मार्गेण Sy.
३. निरालम्ब आकाशे, रजो रञ्जनात्मक स्वर्गं प्रति यन्तौ गच्छन्तौ Sy.
४. दिविभा० M. ५ शासतो M
६. ०र्गमनु० P D
७. मुख्यत्वेन Sy.
८. रज उदकं वृष्टिलक्षणं शासता शासतो बलाद्विधेयीकुर्वन्तौ Sy.
९. यद्यवि० M. अननुकूलाञ्छत्रूननुशासतौ विधेयीकुर्वन्तौ Sy.
१०. ०कृतन्तु P. ० योः द्वित्वन्वि... D
११. VM. ignores उ and explains रजः। विविष्टिसु once only.
१२. शचीति कर्मनाम। अस्मदनुष्ठित-ज्योतिष्टोमादिकर्मधनौ युवाम् Sy.
१३. अस्मदीयैः Sy.
१४. कर्मभिर्यागादिभिर्निमित्तभूतैः Sy.
१५. अह्नि Sy. १६. रात्रौ च Sy.
१७. Omitted by P. and D. अभिमतम् Sy.
१८. ददेथाम् Sy. १९. मा P. D.
२०. सर्वदा यागकालेऽयागकालेऽपि Sy.
२१. न केवलं युष्मदीयमपि त्वस्माकमपि रातिर्दानं हविरादिप्रदानं सर्वविषयदानं वाऽर्थिभ्यः कदाचन सर्वावस्थायामपि Sy.
२२. सत् P. उपक्षीणं मा भूत् Sy.
२३. उपदस्तम्भतु M. सर्वदा वर्तताम्। अह-मपि सर्वदा युष्मानुद्दिश्य दद्यां युवा-मपि मदभिमतं सर्वदा दत्तमित्यर्थः Sy.
२४. VM. explains रातिः। कदा। चन once only.
२५. वर्षितः कामानाम् Sy.
२६. वृषन्। इन्द्र! omitted by P. and D.
२७. ०त्रापाय P. अभिमतवर्षकेण त्वया पातव्याः Sy. २८. पुरतो दृश्यमानाः Sy. २९. इन्दवः सोमाः Sy.

प्रेरयन्तु। तुभ्यम्। अद्रिभि सुता.। इमे। त्वाम्। मादयन्तु। महतः। चित्रस्य। धनस्य। दानार्थम्। गीर्भिरुह्यमान। अस्मान्। सुष्ठु सुखयिता भवन्। आगच्छ।

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः। यद्धु त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन। वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥७॥

ओ षू णः। अग्ने। अस्माक स्तोत्रम्। स्तुत। त्वम्। सुष्ठु। आशृणुहि श्रुत्वा चास्मान्। यज्ञार्हेभ्य आदित्येभ्य। राजभ्य। देवेभ्य। ब्रूहि। यदा। हे देवा यूयम्। अङ्गिरोभ्य प्रार्थिताभ्य। सर्वकामदुघा धेनुम्। अदत्त। ताम्। अस्मिन् प्रयोजककर्तरि सति। अर्यमा। अग्निना सह।

---

१. त्वदर्थम् Sy.
२. वृढं पाषाणैरभिषवसाधनैः Sy
३. अभिषुताः Sy.
४. उद्भिद उद्भेदका वर्षस्य। त एव पुनर्विशेष्यन्ते। उद्भिदो बलस्योद्भेदका उद्भिन्ना वा पर्वतादौ तादृशाः सोमाः Sy
५. त्वा D. ६. तर्पयन्तु Sy.
७. महते Sy. ८. चायमानाय विचित्राय नानाविधाय वा Sy.
९. धनाय Sy.
१०. दानवति यागे। अभिमतदानाय वा Sy.
११. गिरां स्तुतीनामस्मदीयानां धोढ गीर्भिरस्मत्स्तुतिभिः Sy.
१२. स्तवमानः सन्, आ गहि-आगच्छ Sy
१३. ०त P. मृडयिता सन् Sy.
१४. Missing in D. and P
१५. गच्छ P. D.
१६. VM. ignores. उद्भिदः। सुतास.। गीर्भिः। स्तवमानः and explains आ। गहि once only. १७. षु P
१८. अस्मदीयम् Sy. १९. Omitted by P. आवाहनं स्तुतिं वा Sy.
२०. सुत० D. सुतस्त्वां P. स्तोतात्मन् सुतस्त्वं M. अस्माभिः स्तुतः सन् Sy.
२१. ओ इति निपातद्वयसमुदायात्मक एको निपातः। आभिमुख्येनैव सुष्ठु शृणु Sy.
२२ यज्ञार्हेभ्यो हविर्भागभ्यः स्तुतिभागभ्यश्चेत्यर्थः। ... तेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्यो यजमानेभ्यः सम्बन्धि कर्म Sy.
२३. Omitted by M. कीदृशेभ्यः। . राजमानेभ्यः Sy.
२४. देवनशीलेभ्यः Sy.
२५ इदानीं देवाः प्रत्यक्षेणोच्यन्ते। अत्रेतिहासमाहुः—अङ्गिरसो नाम महर्षयः पूर्वं यज्ञार्थं देवान्स्तुत्या प्रीणयित्वा गा अयाचन्त। ते प्रीताः कामदुघा प्रादुः। लब्धां च तां धेनुं क्षीरं दोग्धुमशक्नुवाना अर्यमणं देवं प्रार्थयन्। स च प्रार्थितोऽग्निहोत्राद्यर्थं क्षीर दुदोहेति। तदिदमत्रोच्यते। यद् याम् Sy.
२६ Omitted by M.
२७ अङ्गिरोभ्यस्तदर्थम् Sy.
२८ त्यां तां प्रसिद्धां धेनुं क्षीरादिना प्रीणयित्रीं गाम् Sy.
२९. दत्तवन्तः Sy. ३०. धेनुम् Sy.
३१. ०जकर्त० D. कर्तरि सर्वस्योत्पादके त्वय्यग्नौ Sy.
३२. सर्वस्य नियमिता देवः Sy.
३३. अमाग्निना P. D. अमाग्निनौ M.
३४. इतरदेवेभ्यः साकम् Sy.

१ २ ३
कामान्विविधान्। दुग्धवान्। ताम्। यो मदीयोऽग्नि । ४ स ५ एव। ता धेनुम्। अर्यम्णा ७ सह ८ दोग्धुम्।
९ १०
ज्ञातवाञ्ज्ञान्य कश्चित्।

मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः। यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम्।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥८॥

११ १२ १३ १४ १५ १६
मो षु वः। सेय मारुती। ऐन्द्राग्न्युत्तरा। मरुत । मा। युष्माकम्। बलानि। अस्मान्।
१७ १८ १९ २० २१
अभिभवन्तु। सु पूरण । किन्तु भवता सनातनानि। अस्माकमन्नानि सन्तु। अपि च। मा। अस्माक
२२ २३ २४ २५ २६
शरीराणि भवद्भिरधिष्ठितानि। जीर्णानि भवन्तु। यच्च। व । पूज्यम्। अहन्यहनि। घोषादु-
२७ २८ २९ ३० ३१ ३२ ३३
च्चैर्मुक्तकण्ठकम्। स्तोतव्यम्। अमर्त्यम्। यत्। च। दुष्टर शर्धमुभयम्। अमस्मासु। धारयन्त ।

---

१. ०माद् D M २. ०धा M
३. विविधं दुग्धवान् Sy. ४. एष एवार्यमा Sv. ५ देव P ६. धेनु P
अर्यम्णा omitted by P and D
७. मत्समवायेन Sy ८ दोग्धृ P
९. जानात्यर्यमा। अहमपि जानामीत्यर्थः Sy १०. ईदृशी धेनुस्त्वदर्थमेव दुह्यात इत्यग्नेः स्तुतिः Sy.
VM. ignores ह and explains यज्ञियेभ्यः once only.
११. सय P. १२. न्द्रश्यु० P. ०न्द्रान्यु० M
१३. मो इति निपातद्वयसमुदाय उशब्दोऽवधारणे ... मेव Sy
१४. युष्मत्सम्बन्धीनि तानि प्रसिद्धानि Sy.
१५. पौंस्यानि बलानि Sy. १६. M. adds अस्माक बलानि before अस्मान्।
१७. अभिभवन्। यद्वाऽस्मत्तोऽपगतानि मा भूवन् Sy. १८ सः M. सुष्ठु Sy.
१९. भवता सेनातरान्य० M. सदातनानि नित्यानि Sy. २०. द्युम्नानि प्रकाशयुक्तानि। यद्वा सना सम्भजनीयानि द्युम्नानि धनवन्ति यज्ञोवन्ति वा। मत्वर्थीयो लुप्यते।... यद्वा। द्युम्नानीत्येतदुत्तरत्र सम्बध्यते। द्युम्नानि धनानि यशांसि वा .. मा जारिषुः क्षीणानि मा भूवन् Sy. २१. अस्मदीयानि Sy
२२ पुराणि, लक्षणया तत्रस्थाः प्राणिनः Sy.
२३ मा जारिषुः, जीर्णा नष्टा मा भूवन् Sy.
२४ युष्मत्सम्बन्धि Sy २५. चायनीयं नानाविधम् Sy. २६. अहन्यहनि M. युगशब्दोपलक्षिते तत्तत्काले Sy.
२७. ०च्चै मु० D ०ष्ठ M. घोषाः। व्यत्ययेन पञ्चमी। शब्दोपेता गवादयो घोषोपलक्षिता ग्रामनगरादयो वा ये सन्ति तत्सर्वम् Sy. २८. नूतनं स्तोतव्यं वा Sy.
२९ ०तव्यमर्वं P. ०तव्यं म० M. ०तव्यम... D. अमरणधर्मकं, मर्त्येषु दुर्लभं वा Sy.
३०. दुष्कर D. दुःखेन तरणीयं सम्पादनीयं धनम् Sy. ३१. अस्मास्वेव भवत्विति शेषः। नान्यस्य Sy.
३२. व्यतः M. धारयत तदस्मासु। किं च दुस्तरं शत्रुभिरर्हिंसितं तत्सर्वमपि विशेषेणास्मासु स्थापयत Sy.
३३. VM. ignores उ। तानि। पुरा। तत् and explains उत। जारिषुः। यत्। च। दुष्टरम् once only.

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः । तेषां देवेष्वायतिरस्माकं तेषु नाभयः । तेषां पदेन महा नमे गिरेन्द्राग्नी आ नमे गिरा ॥९॥

दध्यङ् ह मे । दिवोदासान् मम । जन्म । पुरातन आथर्वण । दध्यङ् । वेद, एवम् । अङ्गिरःप्रभृतयश्च । ते पञ्च । पूर्वे । जानन्ति । तेषा दध्यङ्प्रभृतीनाम् । आगमनमुत्पत्ति । देवेषु भवति । अस्माकम् । तेषु । नाभयो ज्ञातेयानि । तैर्मयि । निहितेन पदेनाहम् । महत् । इन्द्राग्नी । स्तोत्रेण । नमयाम्यभिमुख करोमि—तेभ्य स्तोत्रकुशलेभ्य उत्पन्नोऽहमिन्द्राग्नी स्तौमि ।

---

१. दङ् P.

२. P. adds जनुषं after मे ।

३. युवोदासं P. दिवोदासपुत्रस्य परुच्छेपस्य Sy.

४. ०तनं P.
पूरकः सर्वस्य पुरातनो वा Sy.

५. अथर्वगोत्रोत्पन्न एतन्नामको महर्षिः Sy.

६. अङ्गिरा अङ्गारस्तद्वत्तेजस्वीत्यर्थः । यद्वा । अङ्गारा एवाङ्गिरसोऽभवन् । 'योऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्' (AB. 3.34.) इति श्रुतेः ... एतन्नामा महर्षिश्च । प्रियमेधो मेधाप्रियः । ... स च कण्वो मेधावी स च । अत्रिर्बुःखत्रयरहितः । ... मनुर्मननवानेतन्नामा महर्षिः । ... मनुर्मनवो ज्ञानवन्तो यतस्ते पूर्वे मनवश्चातो विदुरिति भावः Sy. अङ्गिरा अङ्गारा अङ्गना अञ्चनाः ... प्रियमेधः प्रिया अस्य मेधाः ... अत्रिर्नत्रयः N. 3. 17.

७. एते सर्वे महात्मानो महर्षयः । .. ते पूर्वोक्ताः Sy.

८. आथर्व ... पूर्वे M.
पूर्वकालीना मे अस्मत्पित्रादीन् जानन्त इत्यर्थः Sy.

९. तेषां ज्ञान उपपत्तिमाह । ... आयतिर्दीर्घकालसम्बन्धोऽस्ति । अतो विदुरित्यर्थः Sy.

१०. इतरेषु देवनशीलेषु महर्षिषु मध्ये Sy.

११. भवन्ति P १२. तेष्वेव वर्तन्ते Sy.

१३. जीवेन सह बन्धवन्तः प्राणाः फलेन सम्बद्धा यागा वा । ... असौ विशिष्टजन्माऽतो यज्ञयोग्य इति तैर्वक्तव्यत्वेन तदधीनत्वम् Sy.

१४ तेषां दध्यङ्डादीनाम् Sy.

१५. आस्पदेन महत्त्वेन निमित्तेन Sy.

१६. महदत्यधिकम् Sy.

१७ अहमंहदिन्द्राग्नाद्यन्तेजस्तोः P. महदिन्द्रा ... न्तेजस्तो० D. गिरा स्तुतिरूपया वाचा ... नमे नमति सर्वो जन । किञ्च तेषामनुग्रहाद्यज्ञयोग्यः सन्निन्द्राग्नी गिरा स्तुतिरूपया वाचा युक्तः सन् Sy.

१८ The passage beginning with महत् and ending with नमयाम्यभिमुखं is omitted by M. आनमे, आभिमुख्येन नमामि स्तौमि नमामि चेत्यर्थः । ... स्वयमेव नतोऽस्मि Sy.

१९. VM. ignores ह and explains मे । मनुः । विदुः । आ । नमे । गिरा once only.

होता यक्षद्बृहस्पतिर्वेन्तु वार्यं बृहस्पतिर्यजति वेन उक्षभिः
पुरुवारेभिरुक्षभिः। जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥१०॥

होता[1] यक्षत्[2]। बृहस्पतिर्देवता। होता[3]। यजतु[4] बृहस्पतिम्[5]। सम्भजनशीला[6] स्तोतारश्च[7]। बृहस्पतेर्वरणीय[8] धनम्[9]। भजन्ताम्[10]। बृहस्पति[11]। आत्मान तर्पयति[12]। कामयमान[13]। बहुभिर्देवैर्वरणीयै[14]। उक्षपशुभि[15]। यस्य निरवद्यत्वाद् दूर आदेशन[16] भवति। तादृश श्लोकम्[17]। आदरण[18] कुर्वतो बृहस्पते[19]। गृहीतवन्तो[20] वयमीज्यमाने[21] बृहस्पतौ। आत्मनेव सोऽयम्[22]। उदकानि[23]। बहूनि[24]। सदनसाधनानि[25]। धारयति[26]। सुकर्मा[27]।

---

१. दैव्योऽग्निर्मानुषो वा देवानामाह्वाता Sy.
२. याज्यां पठतु Sy.
३ ०लं P. D. ०लां M. वननवन्तो हविः कामयमाना वा देवाः Sy.
४ ०रम् M. ५. सोमम् Sy
६. सम्भजन्ताम् Sy.
७. बृहस्पति .. बृहस्पति० M. तदर्थं बृहस्पतिर्बृहतो मन्त्रस्य हविषो वा पालकोऽध्वर्युर्वैव्यो बृहस्पतिर्वा Sy
८ स्वयमेव Sy. ९. यागं करोति Sy.
१०. बहुभिर्वरणीयैः Sy.
११. सेचकैः सोमैः ... सेचनसमर्थैरुक्थकैस्तन्निमित्तभूतैर्हूयमानैराहुतिभिरादित्यद्वारा वृष्ट्युत्पन्नैः Sy. १२. ०त्वा P
१३. दूरआदिशं दूरदेश आदिग् आदेशो यस्य तादृशम् Sy.
१४. अग्नेः। जातावेकवचनम्। अभिषवसाधनस्य ग्राव्णः श्लोकं वाचं ध्वनिम् Sy
१५. शोकमाभरणं P.
१६. गृह्णीमः श्रोत्राभ्याम्। पूजार्थं बहुवचनम् Sy. १७. यजमानाः Sy.
१८. ०नो P. ०मिज्यमाने is suggested for ० मीज्यमाने
१९. इदानीं परोक्षकृतः। ... अयं यजमानः, अथ अथ यागसम्पूर्त्यनन्तरम् Sy.
२०. अररिन्दानि, उदकनामैतत्। 'अररिन्दानि ध्वस्मन्वत्' (Ngh.1.12.) इति तन्नामसु पाठात्। वृष्टिलक्षणान्युदकानि ... ररिर्दाता। नास्त्यन्यो ररिरस्य पिपासोपशमनस्य तादृशं पिपासोपशमनं ददातीत्यररिन्दानि। यद्वा। अररिरितश्चेतश्चगमनम् ... तद्वतीत्यररिन्दान्युदकानि। चेष्टाप्रदानीत्यर्थः। 'आपोमयः प्राणः (Cha. U.6.5 4) इति श्रुतेः। यद्वा ररिर्दानम्। न विद्यते तादृशं दानमितरभूतेषु तदररि। तद्वतीत्यररिन्दानि। अन्यैरदेयं लोकोपकारिभोगं ददतीत्यर्थः। तादृशान्युदकानि यागेनोत्पावितवानित्यर्थः Sy.
२१. पुरूणि बहूनि Sy.
२२. सदनानि सुखनिवासयोग्यानि गृहाण्यधारयत्। यद्वा बृहस्पतिः सुकृतुश्चायमध्वर्युररिन्दान्युक्तलक्षणान्यभिषवसाधनान्युदकान्यधारयत्। ... तथा ... सद्मानि सदनानि हविरासादनस्थानान्यधारयत् Sy. २३. धारितवान् Sy.
२४. शोभनकर्माऽयम् . . . शोभनप्रज्ञः Sy.
२५. VM. ignores अथ and explains उक्षभिः। सुक्रतुः। once only.

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥११॥

ये देवासः[1]। वैश्वदेवी। आप इत्यन्तरिक्षनाम, अन्तरिक्षायतना रुद्राः[2]। माहात्म्येन[3]। अष्टौ वसव प्रजापतिर्वषट्कार[4] पूषा चेति। पृथिव्यायतना एकादश रुद्रा द्वादशादित्याः[5]।

---

१. हे ... देवाः Mah , U हे ... देवा द्योतनशीलाः Sy.

२. ये यूयं दिवि द्युलोक एकादश स्थ एकादशसङ्ख्याका भवथ Mah. ये यूय दिवि द्युलोक एकादश स्थ एक च दश चेत्येतत्सङ्ख्याका भवथ Sy. ये यूयम् ... दिवि द्युलोक एकादशसङ्ख्यया भवथ U.

३. महिम्ना स्वस्वमहिम्ना स्वस्वमाहात्म्येन। महिनेति पदं त्रिष्वपि स्थानेषु सम्बध्यते। सर्वत्र महाभाग्याविशेषात् Mah महत्त्वेन स्वस्वविभूत्या। .महिना देवास इत्येते सर्वत्र सम्बध्येते Sy महिना महाभाग्येनैकादश स्थ। महिनेति त्रिष्वपि स्थानेषु सम्बध्यते। सर्वत्र हि महाभाग्याविशेषात् U

४ ०ङ्का० P

५. तथा पृथिव्यामधि पृथिव्युपर्येकादश स्थ। तथा ये यूयमप्सुक्षितोऽन्तरिक्षनिवासिन एकादश स्थ भवथ। अप्स्वित्यन्तरिक्षनामसु पठितम्। क्षियतिर्निवासार्थः। अप्स्वन्तरिक्षे क्षियन्ति निवसन्तीत्यर्थः। . .ते त्रिविधा यूयमिमं यज्ञ यजनीयमाप्रयणग्रह जुषध्वं सेवध्वम् Mah. पृथिव्यामधि, उपर्येकादश स्थ, एतत्सङ्ख्याका भवथ। किंच, ... तद्धेतुत्वात्सान्निध्यम्। अप्स्वन्तरिक्षे क्षियन्ति निवसन्तीत्यप्सुक्षितः। ... अन्तरिक्षवासिनो देवा एकादश स्थ तत्सङ्ख्याका भवथ। यद्वाऽन्तरिक्षस्थेयं सञ्ज्ञा। 'आपः पृथिवी' (Ngh 1. 3.) इत्यन्तरिक्षनामसु पाठात्। यद्यपि 'तिस्र एव देवता.' (N. 7.5.) इत्युक्तत्वात्क्षित्यादयभिमानिन्यो देवतास्तिस्र एव तथापि . . त्रयस्त्रिंशत्सङ्ख्याका भवन्ति। तत्तत्स्थाना अन्यास्तद्विभूतय इत्युक्तत्वात्। .. ते यूय हे देवासः! मिलित्वोक्तसङ्ख्याका देवा इममस्मदीयं यज्ञ जुषध्व सम्भजध्वम्। तत्सम्बन्धि हविर्वा सेवित्वा प्रीणयध्वम् Sy. पृथिव्याम् .उपर्येकादश स्थ। ये च यूयम् ... अप्स्वित्यन्तरिक्षनामसु पठितम्। क्षियतिर्निवासार्थः। अन्तरिक्षनिवासिनः ... ते यूय हे देवा यज्ञमिममाप्रयणलक्षणम् ... सेवध्वम् U.

६. RV. I.139.11=YV. 7. 19. Ms D. puts the figure ॥१३९॥ here to indicate the end of one hundred and thirtyninth hymn. No such number is given in P. and M.

I.140.

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥१॥

वेदिषदे[1] । दीर्घतमा औचत्थ्य[2] । वेद्या सीदते[3] । प्रियस्थानाय[4] । अग्नये[5] । सुष्ठु द्योतमानाय[6] । हविरिव[7] । निवासस्थानम्[8] । उपकल्पय तत्र चैनं स्थापयित्वा[9] । वस्त्रेणेव[10] । आच्छादय[11] । स्तोत्रेण[12] । शुद्धम्[13] । ज्योतीषि[14] यस्य रथास्तैरुह्यमानस्य[15] । श्वेतवर्णम्[16] । तमसो हन्तारम्[17] ।

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो मृष्ट वारणः ॥२॥

अभि द्विजन्मा[18] । अभिविसृज्यते[19] । द्वयोर्लोकयोरग्न्योर्वा जायमान[20] । त्रिवृत्[21] । अन्न-

---

१. ष्यः M.
२. सीवेद्यं M. हे अध्वर्यो Sy.
३. सो० P सीवते नित्यम् Sy.
४ प्रियधाम्ने प्रियस्थानायोत्तरवेदिलक्षण-प्रियाय Sy
५ अग्ने P.
अग्रनयनादिगुणविशिष्टाय Sy.
६. शोभनद्योतनाय Sy.
७. ०रिह् M हवीरूपमन्नमिव Sy
८. स्थानं वेद्याख्यम् Sy.
९ प्रहर। प्रकर्षेण सम्पादयेत्यर्थः। Sy.
१०. ०णव M. तच्च स्थानं वस्त्रेणेव, तेन यथा मार्दवायास्तृणाति तद्वत् Sy.
११. मननीयेन सम्भारेण बर्हिषा वा वेदिस्थानं वासय Sy.
१२. कीदृशं तत्स्थानमिति तदुच्यते। .. उत्पवनप्रोक्षणादिनाऽमेध्यासुरादीनामपगतत्वाच्छुद्धम् Sy.
१३. शुद्धज्योतिषि P. D.
ज्योतिष आज्यादेरग्नेर्वा रथस्थानीयमाधारभूतत्वात् Sy.
१४. Omitted by M.
१५ ०रू० P D. ०रुह्यमानं is suggested for ०रुह्यमानस्य
१६. अग्न्युपेतत्वाद्दीप्तवर्णम् Sy.
१७ अत एव ... तमसोऽन्धकारस्य हन्तारमज्ञानस्य वा। अग्निसाध्ययज्ञाविद्वारा ज्ञानविचारकत्वादिति भावः। Sy.
१८ यद्वा तस्या योनौ स्थाने वस्त्रेण यथा गोपनीयं वस्तु गोपायन्ति तद्वत्तमग्निं वासय निवासय स्थापय। मन्मना मननीयेन हृद्येन वस्त्रसदृशेन मृदुकाष्ठादिनाऽऽच्छादय वा। कीदृशम्? ज्योतीरथं दिव्यरथोपेतम्। शेषं पूर्ववत् Sy.
१९. अभि ऋज्यते प्राप्नोति। अभित आभिमुख्येन नयति भक्षयति ... यद्वा भृज्यते 'भ्रस्जो पाके' पक्वं करोति वा Sy.
२०. द्वाभ्यामरणीभ्यां जायमानः। यद्वा। मथनेनाधानसंस्कारेण चोत्पन्नत्वाद् द्विजन्मत्वम् Sy.
२१. आज्यपुरोडाशसोमरूपेण त्रिप्रकारम् Sy.
२२. अदनीयम् Sy.

माज्यौषधसोमरूपम्। अग्निना भक्षितम्। एतज्जगत्। पुन.। संवत्सरे। परिणमति सोऽयं जेताऽग्नि'। एकस्य यजमानेषु वर्तमानस्याग्ने'। आस्येन। जिह्वया च कामानां वर्षिता भवति। अथान्येन दवाग्निना। वनिनो वृक्षान्। न्यङ् दहति। वारणशील।

कृष्णप्रुतौ वेविजे अस्य सक्षितौ उभा तरेते अभि मातरा शिशुम्।
प्राचाजिह्मं ध्वसयन्तं तृषुच्युतमा साच्यं कुर्पयं वर्धनं पितुः ॥३॥

कृष्णप्रुतौ। कृष्णमार्गे। दाहभयादत्यन्त कम्पमाने। अग्नेरस्य। सह निवसन्त्यौ। द्यावापृथिवी। उभे अपि। एन पुत्रभूतम्। अभिगच्छतस्त्वष्टुर्जायमानम्। प्राङ्मुखज्वालाजिह्वम्। तृणगुल्मादिक विनाशयन्तम्। शीघ्र दाह्य प्रति गच्छन्तम्। सेव्य यजमानानाम्। अयजमानाना कोपनम्। पालयितुर्यजमानस्य। वर्धन शिशुम्।

---

१. अग्निमादक्षितमेत्तज्जगत् P. ०तमे ... त्तज्ज० D. ई इदम्। ईमित्यत्र सांहितिको मलोपश्छान्दसः Sy
२. संवत्सरे पूर्णे Sy.
३. अग्निर्वर्धयति। जीर्णस्य पुनर्वृद्धयभावाद्यजमानं हविर्वृद्धया प्रतिसंवत्सरं यागसमर्थं करोतीत्यर्थः। यद्वा। एकवारं भक्षितं हविः पुनः संवत्सरे पूर्णे संवत्सर उदरस्थं वर्धते वर्धयति वा भक्षितारम् Sy. ४. सोय M.
५. जाताग्निः P.D. जेन्यः प्रभूतो भवतीति शेषः। यद्वा वर्षिता सन्नेकेन रूपेणान्यस्य यज्ञे होत्रादेर्जिह्वया तदुपलक्षितया स्रुचा जेन्यः प्रवृद्धो भवति Sy.
६. एतस्य P. अन्यस्य हविषः Sy.
७. आस्ये P. D
८. वर्धकः सन् Sy.
९. अन्येनेवदा (न दावा) ग्निना P D.। दावाग्निरूपेण Sy.
१०. वनसम्बन्धिनो वृक्षान् Sy.
११. यङ् P.D. यर्व M.
१२. निनष्टि। दहतीत्यर्थः Sy.
१३. वर० P. सर्वेषां वारकः सन् Sy.
१४. मथनोपक्रमे कृष्णप्रुतौ, अग्निसम्पर्कात्कृष्णवर्णतां प्राप्नुवत्यौ प्रापयन्त्यौ वा भूमिम् Sy. १५. वेविजे चलतः Sy.
१६. समानकार्यमग्न्युत्पादनं गच्छन्त्यावेवंभूते मातरौ Sy.
१७. मातृस्थानीये उत्पादयित्र्यौ Sy.
१८ उभेद M उभे अरण्याख्ये मातरौ Sy.
१९ शिशुवदुत्पत्तिसमयेऽल्पमग्निम् Sy.
२० अभि तरेते, आभिमुख्येन प्राप्नुतश्च Sy.
२१ ०मुखच्छायाज्वाला० P. कीदृशं शिशुम्। . . प्राग्देशस्थितजिह्वास्थानीयज्वालम् Sy. २२. ०गुन्मा० P. D.
२३. तमो नाशयन्तम् Sy.
२४. अरणीभ्यां क्षिप्रं निर्गच्छन्तमक्लेशेन योनेः सकाशाच्छीघ्रमुत्पद्यमानम् Sy.
२५ आ ईषत् ... समवेतव्यं मृदुकाष्ठचूर्णादिना Sy.
२६. ०नः M. गोपनीयम् Sy.
२७. पालकस्य यजमानस्य Sy.
२८. प्रवर्धनं प्रवर्धयितारम्। उक्तप्रकारैर्लौकिकशिशुसाधारणैरुपेतं शिशुमग्निं मातरावुत्पादयत इत्यर्थः Sy.
२९. VM. ignores आ

मुमुक्ष्वो॑३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ॒ जुवः ।
अस॒मना॑ अ॒जिरासो॑ रघु॒ष्यदो॒ वातजूता॒ उप॑ युज्यन्त आ॒शवः ॥४॥

मुमुक्ष्वः[1]। कामान्मोक्तुमिच्छन्त[2]। मनवे[3]। मनुष्यानक्षुधितानिच्छते[4]। लघु[5] शीघ्र गच्छन्त[6]। आकृष्टहला[7]। वेगवन्त[8]। नानाविधरूपा[9]। क्षिप्रा[10]। लघु च स्यन्दन्तोऽरण्य दहन्त[11]। वातेनाकृष्टा[12]। सर्वेमानवैरुपयुज्यन्ते[13]। तव रश्मय[14]।

आद॑स्य॒ ते ध्व॒सय॑न्तो वृ॒थेरते॒ कृष्ण॑मभ्वं॒ महि॒ वर्पः॑ करिक्रतः ।
यत्सी॑ म॒हीम॒वनिं॒ प्राभि॒ मर्मृ॑शदभिश्व॒सन्त्स्त॒नय॒न्नेति॒ नान॑दत् ॥५॥

आदस्य ते[15]। अनन्तरमेव[16]। अस्याग्ने[17]। वृक्षादीन् ध्वसयन्त[18]। रश्मय[19]। अनायासेनैव[20]।

---

१. कामं P
२. कीदृश्यस्ताः। .. मुमुक्षव आहुतिद्वारा यजमानं मोक्तुमिच्छन्त्यो ब्रह्मलोकं प्रापयन्त्यः। ... ज्वालानामाहुतिद्वारा ब्रह्मलोकप्राप्तिसाधनत्वं 'काली कराली' इत्युपक्रम्य श्रूयते। 'एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन्। तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः' (Mundak. U.1 2.4–5) इति Sy.
३. मननवते Sy.
४ मनुष्याः० P D ०धिता M. मानवानृत्विजः कर्मार्थमिच्छते यजमानाय तदर्थमध्वर्यादिभिरग्नेर्ज्वाला उपयुज्यन्ते यज्ञेषु। सूक्तस्याग्नेयत्वादौचित्याज्ज्वाला इति गम्यते Sy.
५. निगच्छते P. M.
६. ०च्छतः M.
क्षिप्रं गच्छन्त्यः Sy.
७. ०कलाः D.
कृष्णसीतासः कृष्णमार्गाः। उकारः समुच्चयार्थः Sy.
८. जवनशीलाः शीघ्रकारिण्यः स्वव्यापारेषु Sy.
९. असमना असमानमनस्काः। काश्चन प्राङ्मुख्यो गच्छन्ति काश्चन प्रत्यङ्मुख्य इति विविधमनस्काः। व्यत्ययेनैकवचनम्। यद्वा। असमना भिन्नवर्णाः। भिन्नवर्णत्वं च तत्रैव श्रूयते—'काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः' इति Sy
१०. अजिरासो गमनशीलाः Sy.
११. शीघ्रं स्यन्दमानाः Sy.
१२. वातप्रेरिताः Sy.
१३. उपरिषु० P. D
१४. तव। रश्मयः is missing in M
आशवो व्यापनशीला Sy.
१५. VM. ignores उ।
१६. अनन्तरम् Sy.
१७. ०स्याने (ग्ने) वं० M. ०वि P. स्तूयमानस्याग्नेः Sy.
१८. ०न्तयो M. कीदृशास्ते। ... तमांसि ध्वंसयन्तः Sy.
१९. ते प्रसिद्धा विस्फुलिङ्गाः Sy.
२०. सहैव Sy.

उत्तिष्ठन्ति[1]। कृष्णम्[2]। अतिमानम्[3]। महत्। रूपम्[4]। कुर्वन्त[5]। यदा मन्वर्थम्। सर्वतः परिगृह्य। महतीम्[6]। भूमिम्। पुन पुनरामृशन्[7]। नासिकाश्वासशब्दसदृशं शब्दं[8] कुर्वन्। गर्जितसदृशं[9]। निर्घातसदृश शब्द च[10] कुर्वन्। प्रकर्षेणाभिगच्छति[11]।

भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत्।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥६॥

भूषन्न यः। सम्भवितुमिच्छन्[12]। इव। य[13]। ओषधीषु[14]। नमते[15]। सोऽय पुमानिव शब्दे। पत्नी[16]। अभिगच्छत्योषधी[17]। शब्द कुर्वन्। बलमाचरन्[20]। अङ्गानि[21]। च। शोभयति[22]। भीम ऋषभ[23]। इव। शृङ्गाणि[24]। दोधवीति[25]। दुर्ग्रहो ज्वाला[26]।

---

१. सर्वतो गच्छन्ति Sy.
२. कृष्णवर्णम् Sy.
३. अनिमा० P. D. अव (नि) मा० M
महान्तमभिभवद्गमनमार्गम् Sy
४. रूपं प्रकाशम् Sy.
५. अत्यर्थं कुर्वन्तः Sy
६. ०गृहमवति P.
७. पुनः पुनरामृशन् Sy.
८. अभिश्वसन्मर्वतश्चेष्टमानः Sy.
९. ०श M.
स्तनयञ्छब्दं कुर्वन् Sy.
१०. ०श M.
अत्यर्थं शब्दयन् Sy.
११. अभितः प्रकर्षेणेति गच्छति। यदा इतस्ततो जिह्वाभिर्लेलिहानो भुगुभुगुध्वनिं कुर्वञ्ज्वलति तदैव विस्फुलिङ्गा उद्भवन्तीत्यर्थः Sy.
१२. भूतान्येव स्वतेजसा भूषयन्निव Sy.
१३. अग्निः Sy.
१४. बभ्रुवर्णास्वोषधीषु भरणकुशलासु वा जगताम् Sy.
१५. नम्नते M.
अयं अधिकं नम्नते नमति काष्ठानि प्रविशति Sy.
१६. किंचायं प्रविशन्वृषेव सेक्ता वृषभ इव Sy.
१७. तमेव पालयित्रीः समर्थयित्रीरोषधीः Sy.
१८. अधिग० M.
अभितो गच्छति। प्रथममोषधीः प्रविश्य पश्चात्प्रबुद्धः संस्ता एव वहतीत्यर्थः Sy.
१९. अत्यर्थं शब्दयन् Sy.
२०. किं चैवं कृत्वा ... ओज इति बलनाम। स्वयं बलमिवाचरन्। ... धूमादिभिर्विना केवलं तेजोरूप एव सन् Sy.
२१. अगानि M. स्वशरीरभूता ज्वाला अपि Sy.
२२. दीपयति। पोषयतीत्यर्थः। Sy.
२३. भयङ्करो मृग इव Sy.
२४. स यथा दुर्ग्रहः सन् शृङ्गं चालयति तद्वदयमपि शृङ्गाणि शृङ्गवदुन्नता ज्वालाः Sy.
२५. अत्यर्थं चालयति Sy.
२६. प्रवृद्धज्वालः ... केनचिदपि ग्रहीतुमशक्यः सन् Sy.
२७. VM. ignores अपि।

स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा॥७॥

स संस्तिरः । दोहनात्मा । अन्योषधीः सङ्गृह्णन् । विस्तारयंश्चोषधीः । ज्वालाभिः सङ्गृह्णाति । जानन् । एव । जानतीरोषधीः । अनवरतम् । आशेते । पुनः । वर्धन्ते । वृद्धाश्चापि । गच्छन्त्यग्निम् । देवहितं ता दह्यमाना । द्यावापृथिव्यो । अन्यत् । रूप कृष्णम् । कुर्वन्ति । सह ।

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मरुधीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम् ॥८॥

तमग्रुवः । अग्निम् । चलनस्वभावा । पुत्रयुक्ता ? । सम् । हि । रेभिरे मरुद्भाश्च । सर्वमनुष्यार्थम् । मृता अपि पृथिव्या निलीना । पुन । ऊर्ध्वा । प्रतस्थुः । तासामोषधीना जीर्णा-

---

१. ० नात्मन्योषधीः D. M.
२. संस्तिर आच्छन्नः Sy.
३. कदाचिद्विस्तीर्णः सन् Sy.
४. सङ्गृह्णात्योषधीः Sy.
५ जानन्नेव यजमानार्थं प्रवृद्धेन भवितव्यमतो ज्वालाभिः संयोज्य इत्यधिगच्छन्नेव Sy.
६. ०नति ओष० M. यजमानार्थं प्रवृद्धाभिर्भवितव्यमित्यवगच्छन्तीज्वालाः Sy.
७. नित्योऽविच्छिन्नः सन् Sy.
८. आशेरते M. आश्रयतीत्यर्थः Sy.
९. पुनरपि Sy.
१०. यागयोग्या यथा भवन्ति तथा वर्धन्ते Sy
११. एवम्भूतज्वालाः ... पूर्वं प्रवृद्धा एव Sy.
१२. प्राप्नुवन्ति । यद्यप्यग्निज्वालयोरेकत्वं तथापि 'राहोः शिरः' इति यद्वौपचारिको गन्तृगन्तव्यभावः Sy.
१३. यागादिव्यवहारयोग्यं स्तुत्यं वाग्निम् Sy.
१४. एवं प्रवृद्धा ज्वाला ओषधयो वा Sy.
१५. पित्रोर्जगत्पालयित्रोस्ताभ्यां सम्भूय द्यावापृथिव्योः Sy.
१६. अन्य P. पूर्वमविद्यमानं तेजोमयम् Sy
१७. लोकद्वयं स्पृशन्तीत्यर्थः Sy.
१८. सहः M. Omitted by P. and M. अग्निना सह Sy.
१९. तमग्रूपः D.
२० ०वः P. अग्रतः स्थिताः । यद्वा । अङ्गुलिनामैतत् । अङ्गुलय इवाकुटिलाः Sy.
२१. यत्रयु० M. केशिनीः केशस्थानीयोर्ध्वंभाविकाल्यॉपेता ज्वालाः Sy.
२२. खलु Sy.
२३ परिरम्भं कुर्वन्ति । ... आलिङ्गन्ति Sy.
२४. आगच्छतेऽग्नये भर्त्रे Sy.
२५. किंचैवं कुर्वत्यः ... मृता अङ्गारभावमापन्ना अपि Sy.
२६. . स्वोपद्रवमजानत्यः Sy.
२७. ऊर्ध्वमुखा उन्नताः Sy.
२८. प्रतस्थिरे । मृतप्राया अपि प्रत्युत्थानं कृतवत्य इत्यर्थः । Sy.
२९. प्रतस्तसा० M. ज्वालानाम् Sy.

नाम्। जराम्। प्रमुञ्चन्। अयमुपरि गच्छति। शब्दं कुर्वन्। प्राणम्। प्रकृष्टम्। जीवितं च तासाम्। जनयन्। अहिंसितम्।

अधीवासं परि मातू रिहन्महे तुविग्रेभिः सत्वभिर्याति वि ज्रयः।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरहा ॥९॥

अधीवासम्। पृथिव्याम्। अधिवसन्तमोषधीसङ्घम्। परित। आस्वादयन्। एव। बहुशब्दं कुर्वद्भिः। दह्यमाने सत्त्वभि। वेगम्। वियाति जरदोषधिदाहात्। द्विपदे चतुष्पदे च। अन्नम्। प्रयच्छन्। सदैव। ओषधीश्चास्वादयन्। कृष्ण। मार्गं। अनुसचते। अहशब्द आश्चर्ये।

---

१. वयोहानिम् Sy.
२. प्रकर्षेण मोचयन् Sy.
३ एवं कृतवतीषु सतीषु स भर्त्ताऽग्निः Sy.
४. तासां ज्वालानां सन्निधिं प्राप्नोति। यथा लोके काश्चन रमण्यो रमणेन सह निर्भरं क्रीडित्वा पश्चात्प्रोषिते तस्मिन्विरहेण जीर्णा म्रियमाणाः पश्चात्तस्मिन्नागते सति स्वदौर्बल्यमगणयित्वा सन्तोषेण परिष्वङ्गाय चेष्टन्ते। स भर्ता मन्त्रोच्चारणेन जरामपनीयोचितप्रदानेन प्राणयन्नृक्षतोत्थं भावोऽत्रानुसन्धेयः Sy.
५. कुर्व P जरापरिहाराय मन्त्रयन्निवात्यर्थं शब्दयन् Sy.
६. न केवलं जराहानिरेवापि तु . अमु प्राणम् Sy.
७. निरतिशयम् Sy.
८. ०वतं M.
प्राणधारणसामर्थ्यम् Sy.
९. उत्पादयन् Sy.
१०. काष्ठोदकादिप्रक्षेपेणाप्यहिंसितम् Sy.
११. M. adds परि after अधीवासम्।
अग्निना० P.
दावाग्निः स्तूयते Sy.
१२. अयमग्निर्मातुर्भूतानां निर्मातुर्भूमेः...उपर्याच्छादनस्थानीयम् Sy.
१३. तृणगुल्मौषध्यादिकम् Sy.
१४. लिहन्... यद्वा मातुर्भूमेरधीवासमुपरि धार्यमाणं वस्त्रं परि परितो रिहन्सम्पादयन् Sy.
१५. प्रभूतं शब्दयद्भिः प्रभूतगमनैर्वा Sy.
१६. प्राणिभिः सहितः Sy.
१७. अयसा जवेन Sy.
१८ विविधं गच्छति Sy.
१९. पादवते द्विपदे चतुष्पदे च Sy.
२०. अन्नं तत्तदुचितम् Sy.
२१. ददत्। विवने दावानले भीत्या पलायमानान्प्राणिनो व्याघ्रादयो भक्षयन्तीति प्रसिद्धम् Sy.
२२. किं कुर्वन्। सदा सर्वदा Sy.
२३. तृणादिकम् Sy.
२४. ०यन्त P. D. ०यन्तं M.
वहन् Sy.
२५. श्यामवर्णः Sy.
२६. तो P.
वियान्तम् ... अनुक्रमेण सचते सेवते। यत्र यत्राग्निर्गच्छति तत्र तत्र मार्गोऽपि कृष्णो भवति Sy.
२७. अहेति प्रसिद्धौ Sy.

अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥१०॥

अस्माकमग्ने । अस्माकम् । अग्ने । धनवत्सूष्टिषु । दीप्यस्व । श्वास कुर्वन् । वृषभ । दममना । स त्व त्वदीया शिशुमतीर्बडवा । गमनार्थं विमुच्य । दीप्यस्व । वर्मेव । युद्धेषु अस्मानत्यन्तं परिचरन् ।

इदमग्ने सुधितं दुधितादधि प्रियाद्चिन्मन्मनः प्रेयो अस्तु ते ।
यत्ते शुक्रं तन्वो रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥११॥

इदमग्ने । इद स्तोत्रम् । अनायासेन सहितम् । प्रयत्नेन सहिनात् । प्रियतमात् । स्तोत्रात् । अपि । अग्ने । तव । प्रियतमम् । भवतु । यत् । तव । दीप्त रूपम् । शरीरस्य । रोचते । शुद्धम् । तेन । अस्मभ्यम् । आ प्रयच्छसि । रत्नम् ।

---

१. अस्मत्सम्बन्धिषु Sy.
२. अस्माकम् । अग्ने । omitted by P
३ अन्नवत्सु यागेषु गृहेषु वा Sy.
४. श्वासंस्कुर्वन् M अथ अथानन्तरम् . श्वसनवाञ् ज्वालाभिश्चेष्टावानस्मत्प्राणनवान्वा Sy.
५ वर्धिताऽभिमतानाम् Sy.
६. ०मवा: M. दानमना दममना दान्तमना वा सर्वत्र भवेति शेषः Sy.
७. उक्तलक्षणस्त्वम् Sy.
८. ०या P. D. ०यां M.
९. शिशुशब्देन तदवस्था लक्ष्यते । शीशववतीर्ज्वालाः Sy. १०. ०ती ब० M.
११. अपक्षिप्य, विहाय Sy.
१२. भृशं दीप्यस्व Sy.
१३. कवचमिव Sy.
१४. सङ्ग्रामेषु Sy.
१५. अस्मद्वृद्धेष्टून् Sy.
१६. पुनः पुनः परिहरन् । यद्वा । युत्सु सङ्ग्रामेषु वर्मेव परिजर्भुराणो भव ... उक्तगुणको भव मघवत्सु यज्ञेषु दीप्यस्व Sy.
१७. VM. ignores अध ।
१८. अस्मदीयं सोमादिरूपं हविः Sy.
१९. सुधितं सुहित सुष्ठु दत्तम् Sy. सुहितम् or हितम् is suggested for सहितम् ।
२०. दुष्ट स्थापितात्कठिनात्काष्ठादेः, अधि उपरि Sy.
२१. ०तान् P. D. M. हितात् is suggested for सहितात् ।
२२. ०मान् P.D.M. तव हृद्यादपि Sy.
२३. मननीयात् Sy.
२४. उशब्दोऽवधारणे । चिच्छब्दोऽपिशब्दार्थः Sy. २५. अतिप्रियतमम् Sy
२६. अस्तु Sy.
२७. शुक्रं दीप्तम् Sy. २८. तेजः Sy.
२९. तन्वः शरीरस्य घृतेनोज्ज्वलिताया ज्वालायाः Sy. ३०. निर्मलम् Sy.
३१. तेन सह Sy. ३२. अस्मान् Sy.
३३. सम्भजस्व Sy.
३४. रमणीयं मणिमुक्तादिकं वितरन् Sy.
३५. VM. ignores अधि । उ । त्वम् ।

रथाय॒ नाव॑मुत नो॑ गृहा॒य॒ नित्यारि॒त्रां प॒द्वतीं॑ रास्यग्ने ।
अ॒स्माकं॑ वी॒राँ उ॒त नो॑ म॒घोनो॒ जनाँ॑श्च॒ या पा॒रया॒च्छर्म॒ या च॑ ॥१२॥

रथाय नावम्[1]। सगृह[2]. सरथो[3] गच्छक्षुत्तितीर्षुर्नदीमाह[4]—रथाय[5]। गृहाय[6] चरणार्थम्। दृढमेक्षणाम्[7]। तरणदण्डयुक्ताम्[8]। नावम्[9]। अस्मभ्यम्[10]। देहि[11]। अस्माकम्[12]। वीरान्[13]। अपि[14]। धनवत.[15]। दासान्[16]। च। या नदी[17]। पारयति[18]। सुखम्[19]। च। या करोति[20]।

अ॒भी नो॑ अग्न उ॒क्थमि॑ज्जुगु॒र्या द्यावा॒क्षामा॒ सिन्ध॑वश्च॒ स्वर्गू॑र्ताः ।
गव्यं॑ यव्यं॒ यन्तो॑ दी॒र्घहि॑षं॒ वर॑मरु॒ण्यो॑ वरन्त ॥१३॥

अभी नो अग्ने। अस्माकम्। अग्ने[21]। उक्थम्। एव। सर्वदा त्वम् 'ओ थामो दैव' इत्य-

---

१ Omitted by M.
२. रथाय ... हः D. सह P.
३. रथो P.
४. ०तीर्षन् न० P.
५. उत अपि च ... रंहणाय Sy.
६. सर्वस्यायतनभूताय Sy.
७. कीदृशीं ताम्। नित्यारित्रा नियतत्वित्वरूपोदकाकर्षणकाष्ठसाधनोपेताम् Sy.
८. ०नं द० M. पद्वतीम्...द्रव्यदेवतामन्त्राविरूपपादोपेताम् Sy.
९. संसारोत्तारिकां सोमयागात्मिकां नावम्। 'यज्ञो वै सुतर्मा नौः' (AB. 1.13.) इत्यादिषु श्रुतिषु नौरूपत्वेन स्तुतत्वात् Sy.
१०. नावस्म० M. नवामस्म० P. अस्माकं यजमानाय Sy.
११. ईदृशीं यज्ञात्मिकां नावम् ... देहि सम्पा- दय। रातिर्दानकर्मा। 'दासति राति' (Ngh. 3. 20) इति तन्नामसु पाठात् Sy.
१२. अस्मत्सम्बन्धिनः पुत्रादीन् Sy.
१३. हविर्लक्षणान्नवतः करोति Sy.
१४. यजमानानस्मानपि Sy.
१५. नौः Sy.
१६. The passage beginning with वीरान् and ending with पारयति is missing in M. पारयेत्, उत्तारयेत्।... जननमरणादिबहुदुःखात्मकस्य पारं निरतिशयसुखात्मकं ब्रह्मलोकं प्रापयेत्। 'एष वः पुण्यः सुकृतो ब्रह्मलोकः' (Mundak. U. 1 2 .6) इति यागाद्यनुष्ठानवतां श्रूयमाणत्वात् Sy.
१७. एवं प्रापय्य च या नौः शर्म सुखं निरतिशयं ब्रह्म Sy.
१८. प्रापयेत्। 'परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदम्' इत्युक्तत्वात्। चित्तशुद्धपुरुषार्थद्वारा 'विविदिषन्ति यज्ञेन दानेन' (Bṛh U. 4. 4. 22.) इति श्रुतेः Sy.
१९. VM. ignores उत। अग्ने। नः
२०. इत्थम् M.
शस्त्रम् Sy.
२१. तामो D. थामः M.

भिजुगुर्याः[1]। द्यावापृथिवी[2]। सिन्धवः[3]। च। स्वभूताम्ना[4] अभिगृणन्तु[5]। गोहितम्[6]। यवहितं[7] च देशम्। दीर्घेष्वहस्सु[8]। गच्छन्त[9]। वरणीयम्[10]। अन्नम्[11]। गाव[12]। अवृण्वन्नस्मदर्थम्[13]।

I.141.

बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥१॥

बळित्था[14]। तत्। सत्यमेव। इत्थम्। तदानीमेव हविषो निवपनाय[15]। निधीयते[16]। दर्शनीयम्[17]। अग्नेरस्य[18]। तेज। यदेव[19]। सहस[20]। जायते। यदि[21]। एनम्। प्रति गच्छति[22]। साधयति[23]।

---

१. ०गूर्याः M. आभिमुख्येन स्तुहि, प्रोत्साहय, सम्यक् शस्तमित्यङ्गीकुरु Sy.

२. द्यावापृथिव्यावपि यज्ञसाधनसम्पादनेन प्रोत्साहयताम् Sy.

३. स्यन्दनशीला नद्यः Sy.

४. स्वयमेव गामिन्यः Sy.

५. स्वभूता अभि० P. स्वभूत...अभि० D

६. गोसम्भवं क्षीरादिकं गवां तृणाद्युत्पादनद्वारा Sy.

७. यव्यम्। उपलक्षणमेतत्। यवव्रीह्यादिजन्यं पुरोडाशादिकम्।

८. सर्वाणि Sy.

९. अहानि। सर्वकालम् Sy.

१०. प्रापयन्तः प्रोत्साहयन्तु Sy.

११. वरणीयं श्रेष्ठमन्यदपि यागसाधनम् Sy

१२. इष्यमाणमन्नरसादिकम् Sy.

१३. गवः P. गो...गावः M. अरुण्योऽरुणवर्णगोयुक्ताः। मत्वर्थीयो लुप्यते। आरुण्यसाधनभूता उषसः। तद्धेतुत्वात्तच्छब्दम् Sy.

१४. ०नस्म० M. प्रापयन्तु।...साधयन्तु। एतत्सर्वमग्नेः प्रसादादित्यग्नेरेव स्तुतित्वादाग्नेयत्वमविरुद्धम् Sy.

१५. Ms. D. puts the figure ॥१४०॥ here to indicate the end of one hundred and fortieth hymn. No such number is given in P. and M.

१६. प्रसिद्धम् Sy.

१७ बट् इत्था इत्युभे अपि सत्यनामनी। 'बट् श्रत् सत्रा...इत्था' (Ngh. 3. 10.) इति तन्नामसु पाठात् Sy.

१८ सर्वैर्दृश्यमानप्रकारेण Sy.

१९. वपुषे शरीरव्यवहाराय दार्ढ्याय।...जाठराग्निना भुक्तानां जरणेन शरीरधारणं प्रसिद्धम् Sy.

२०. धार्यते सर्वैः Sy.

२१. सर्वैर्दर्शनीयम् Sy.

२२. देवस्य द्योतनशीलस्यादित्यस्य Sy.

२३. यं वैव M. तत्रोपपत्तिमाह।...यतः कारणात् Sy.

२४. ०सा M. मथनकाले बलेनोत्पन्नोऽतो बलाय धार्यत इत्यर्थः Sy.

२५. यदेतत्प्रसिद्धं लोकोपकारि, अग्नेस्तेजः Sy.

२६. प्रतिप्रतिगः P.D. मतिर्मदीया बुद्धिः ... उपगच्छति। उपगम्य वर्तते वा Sy.

२७ तेनैव तेजसा साधयति Sy.

स्तोताऽभिलषितम्[1]। अग्नेः[2]। स्तुतीः[3]। अनयन्त[4] यजमानाः। समानं[5] गच्छन्त[6]।

पृक्षो वपुः[7] पितुमाँ[8] इत्य आ शये द्वितीयमा सप्तशिवासु मातृषु[9]।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त[10] योषणः ॥२॥

पृक्षो[11] वपुः[12]। अन्नस्य। आवपनस्थान भूमिम्[13]। अन्नवानग्नि[14]। अनवरतम्[15]। आशेते। अथ द्वितीयम्। अन्तरिक्षे[16]। सप्तनदीके, माताऽन्तरिक्ष[17] तस्य शिवा सप्त नद्य सन्ति। तृतीयम्। अस्याग्ने[18] रूपम्। आदित्यस्य[19]। दोहाय निहित तमिमम्[20]। दश प्रमतयो मातरो यस्य[21] तम्[22]। दिशः। अजनयन्त[23]।

---

१. स्वाभीष्टम् Sy.
२. यज्ञसाधकस्याग्नेस्तेजसा Sy.
३. सर्वप्राणिनां वाचः। धेनेति वाङ्नाम। 'धेना रना' (Ngh. 1. 11.) इति तन्नामसु पाठात् Sy.
४. ०षितम ... यन्त D. षितमसाधरेण यन्त P. नयन्ति। निर्वहन्ति जगद्व्यवहारम्। व्यत्ययेनात्मनेपदम्। यद्वा। ऋतस्य धेना यज्ञस्य सम्बन्धिन्यो मन्त्ररूपा वाचः सत्वतो होत्रादिमुखेन सहैव प्रवर्तमाना अनयन्त नयन्ति, अग्नेः स्तोत्रं निर्वहन्ति। अग्नेस्तेजसा वा यज्ञं निर्वहन्ति। 'तेजोमयी वाक्' (Ch. U 6.5.4.) इति श्रुतेः। अतः कारणात् मतिरुपपद्यत इत्यर्थः Sy.
५. समान गच्छन्त्यः। सहैव प्रवर्तमानाः Sy.
६. वृ० P. D
७. वयुः P.
८. अयमग्निः पृक्षोऽन्नसाधकः पाकादिना Sy.
९. आपवन० D. वपुष्माञ्छरीराभिवृद्धिहेतुः Sy.
१०. हविर्लक्षणान्नयुक्तः Sy.
११. ०रतः M. शाश्वतः Sy.
१२. ईदृशः सन्प्रथमं पृथिवीस्थानः सन्... आशेते। दाहपाकादिलौकिकं कर्म यज्ञादि वैदिकं कर्म च निर्वर्तयन्द्युवो भूमौ वर्तत इत्यर्थः Sy.
१३. सप्तलोकशिवकरीषु मातृस्थानीयासु हितकरीषु वृष्टिषु द्वितीयमाशेते। मध्यमस्थानो विद्युद्रूपो वा वर्तते Sy.
१४. D. adds माता before तस्य।
१५. अस्य वृषभस्य वर्षितुरस्यैव बन्धुताग्नेः सहायत्वेन सम्बन्धिने Sy.
१६. दोग्ध्र आदित्यस्योदकस्य वर्षयित्र आदित्यरश्मये .. तत्प्रवृत्तये तृतीयमाशेते। द्युस्थानो वर्तते। यद्वाऽस्य वृषभस्य वर्षितुः प्रसिद्धस्यादित्यस्य सम्बन्धिने दोग्ध्रे रश्मये तत्प्रवृत्त्यर्थम्। आदित्यरश्मयो घर्मकाले भूमिस्थमुदकमाकृष्य सूर्यं प्रापय्य तत्र चिरकालं धृत्वा पुनरन्तरिक्षं प्राप्य मेघेषु स्थित्वा वर्षकाले प्रवर्षन्तीति प्रसिद्धम्। अतो रश्मेर्दोग्धृत्वम् Sy.
१७ ०मित० M.
१८. कीदृशं तम्।... दशसु दिक्षु प्रकृष्टमननवन्तं पूज्यत्वाय। यद्वा मथनकाले दशभिरङ्गुलीभिरुत्पन्नं लोकत्रये दश दिक्षु च व्याप्तमित्यर्थः Sy.
१९. ईदृशं त्रिस्थानमग्निं महाभागं योषणो मिथुनशीलाः सर्वा दिशः Sy.
२०. उत्पादयन्ति। सर्वासु दिक्षु प्रसूत इत्यर्थः Sy.
२१. VM. ignores आ।

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥३॥

निर्यदीम्[1]। महत[2]। तेजस आच्छादयितु[3]। बुध्नात्[4] स्वर्गात्[5]। यदा[6]। एनम्[7]। देवा[8]। प्रज्ञाबलेन तिष्ठन्त[9]। पृथिव्यामकुर्वन्[10]। यदा वा[11]। एनम्[12]। तदनु[13]। पुराण[14]। मातरिश्वा[15]। मधुन उदकस्य[16]। आधवे[17], अन्तरिक्षे[18]। गुहायाम्[19]। सन्तम्[20]। बलादाहृतवान्[21]।

प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति।
उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥४॥

प्र यत् पितु[22]। यदायमग्नि। उत्तमात्[23]। स्वर्गात्[24]। परि देवैर्मातरिश्वना च पृथिव्याम्। प्रणीयते[25]

---

१. ०यंती० D.
२. महिषस्य, महन्नामैतत्। 'महिषोऽभ्व ऋभुक्षाः' (Ngh. 3.3) इति तन्नामसु पाठात्। महतो यज्ञस्य Sy.
३. ०सा M.
वर्पस०। रूपनामैतत्। रूपस्योपक्रमोपसहारात्मकस्य सिद्धये Sy.
४. महस्तेज.. पितु D.
महस्तेजताच्छा० P.
५. बुध्नन् P.
मूलाधानादारभ्य Sy
६. स्वगाद् P
७. यस्मात्कारणात् Sy
८. यनैम् P. ईम्, एनमग्निम् Sy.
९. ईशानासः स्वकीयव्यापारसमर्थाः सूरयो मेधाविन ऋत्विजः Sy.
१०. बलेन मन्त्रादिरूपेण शारीरेण वा Sy.
११. निष्कुर्वन्ति साधयन्ति, उत्पादयन्ति काष्ठात्। यद्वा। एनमग्नि बुध्नादादितो मथनादारभ्य महिषस्य वर्पसो महतो रूपस्याहुतिस्वीकारसमर्थस्य सिद्धये निष्कुर्वन्ति Sy.
१२. एनमेवाग्निम् Sy.
१३. अनुक्रमेण Sy.
१४. पुराणात्। अनादिकालमारभ्य न केवलमिदानीमेवेत्यर्थः Sy.
१५. अन्तरिक्षे चेष्टमानो वायुः Sy.
१६ पूर्ववदिदानीम्...मधुनो मधुसदृशस्य Sy.
१७ आधवने प्रक्षेपे निमित्ते सति Sy.
१८ गुहाया वेद्यां काष्ठेषु Sy.
१९ निगूढं सन्तम् Sy.
२०. मथायति चालयति। उद्बोधयतीत्यर्थः। यद्वा मातरि, फलस्य मातरि यागे इवसिति चेष्टत इति मातरिश्वा यजमानो गुहा सन्तमरण्योर्निगूढं सन्तं प्रादुर्भावायानुक्रमेण मथायति मथ्नाति। उत्पादयतीत्यर्थः। यस्मादेवंरूपस्तस्मात् स्तोतव्य इत्यर्थः Sy.
२१ VM. ignores निः। सूरयः
२२. यस्मात् पितुः—अन्नस्य पशुलक्षणस्य। षष्ठीस्थाने प्रथमा। तस्य Sy.
२३. परमत्वाद्धेतोः। उत्कृष्टत्वायेत्यर्थः Sy.
२४. परि, अनर्थकः Sy.
२५. तदर्थं प्र परि नीयते प्रकर्षेण परितो नीयते। पर्यग्निक्रियत इत्यर्थः। यद्वा। पितुरुत्पादकात्परमावुत्कृष्टाद् गार्हपत्यलक्षणस्याग्नेः सकाशादाहवनीयं प्रति प्र परि नीयते प्रकर्षेण नीयते Sy.

तदानीम्[1]। अयमग्नेषु[2] निधीयमान[3]। वीरुध[4]। दन्तेषु[5]। आरोहयति[6]। द्यावापृथिवी[7]। यदा[8]। अस्य[9]। जन्म[10]। व्याप्नुवन्त[11]। अनन्तरम्[12]। एव[13]। अय युवतम[14]। दीप्त्या[15]। शोचयिता[16]। भवति[17]।

आदिन्मातृराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥५॥

आदिन्मातृः[18]। अनन्तरम्[19]। एव[20]। ओषधी[21]। अयमाविशत्[22]। यासु पूर्वं दाहादाविवेश तासु च। अहिंस्यमान[23]। उरुत्वेन[24]। विविधम्[25]। वर्धते[26]। यदा चायम्[27]। पूर्वा[28]। दीर्घकालयोगिनीश्चिरप्ररूढा[29]। अन्वारुहत्[30]। अथासु जीर्णासु। नवतरासु[31]। अवरकालजातासु[32]। निधावते नवतरमोषधीषु वर्तत इति[33]।

---

१. पशुपुरोडाशादिषु दाहमध्ये धीयमानाः। यद्वा। ... प्रक्षोध्याः प्रकर्षेण बुभुक्षिता भोक्तुमिष्यमाणाः Sy.
२. दन्तेषु मध्ये Sy.
३. आ ... D. दन्तेष्वथा P. आरोहन्ति प्रविशन्तीत्यर्थः Sy.
४. उभावध्वर्युयजमानावुभे अरणी वा Sy.
५. यस्मात् Sy. ६. अग्नेः Sy.
७. जन्म, उत्पत्तिम् Sy.
८. व्याप्नुतः स्वीकुरुत इत्यर्थः Sy. व्याप्नुत is suggested for व्याप्नुवन्तः
९. अत एव कारणात् Sy.
१०. यजमानेष्वनुग्रहेण। यद्वा। घृणा घृणो दीप्तिमान्। मत्वर्थो लुप्यते। दीप्त्या वा Sy.
११. शो० P. शुद्धोऽयमग्निः Sy.
१२. सम्पन्नः। स्वीकारसमर्थोऽभवदित्यर्थः Sy.
१३. VM. ignores यत्
१४. अयमग्निराशुविर्दीप्तः सन् ... पूर्वमन्त्रे यविष्ठोऽभवदित्युक्तत्वात्तदनन्तरमेव Sy.
१५. उत्पादयित्रीर्मातृस्थानीया दश दिशः Sy.
१६ -विश्यन् P. सर्वतः प्रविशति। ... विश्नु प्रकाशेन व्याप्त इत्यर्थः Sy.
१७ मातरो विशेष्यन्ते। यासु मातृषु Sy
१८ परंरपीड्यमानः Sy.
१९. ०त्वन D. उरु, अतिप्रभूतम् Sy.
२० विविधं प्रवृद्धोऽभवत्तास्वाविशत्। यथा लोके कश्चित्तेजस्वी जनन्याः स्तनपानपरिपीडादिभिः सम्यक्पोषितो लोके प्रकाश्य पुनरागत्य मातरमालिङ्गति तद्वदिति भावः Sy.
२१. प्रथमभाविनीरोषधीः Sy.
२२ दीर्घकालवियोगिन्यः स्थापनकाल एव प्रक्षिप्ताः Sy.
२३. ०लयोरग्निरीश्वरप्र० P.
२४ अनुक्रमेण ... आरोहति। ... उपरि प्रज्वलति Sy
२५. अपर० D. अवरजाका० P. अत एव पूर्वापेक्षया निकृष्टासु पश्चाद्भाविनीष्वोषधीषु Sy.
२६. न धा० P. नितरां नीचैर्वा गच्छति। अन्तः प्रविशतीत्यर्थः। यद्वा काष्ठानामधस्तादुपरिष्टाच्च प्रविश्य ज्वलति तदा विश्नु प्रकाशितोऽभवदित्यर्थः Sy.
२७. नवकर० M.
२८. VM. ignores आ। शुचिः

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पप्रिचानासं ऋञ्जते ।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥६॥

आदिद्धोतारम्[1]। अनन्तरम्। एव। अग्निम्। वृणुते[2]। अह्नामागमनेषु[3]। भाग्यमिवामुम्[4]। सम्पृचन्त[5]। प्रसाधयन्ति[6]। यस्मादयम्। हविर्भाजो देवान्[7]। कर्मणा[8]। बलेन[9] च। बहुभि[10]. स्तुत[11]। मर्तं[12] च। स्तुवन्तम्[13]। बहुधा[14]। अभिगच्छति[15]। धारणाय[16]।

वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन्दुच्छुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥७॥

वि यदस्थात्[17]। व्यस्थात्। यदा। यजनीय[18]। वातप्रेरित[19]। कुटिल[20]। इव। स्तेन[21]। जीर्णा ओषधी[22]। अपराङ्मुख[23]। तस्य[24]। दहत[25]। कृष्णमार्गस्य[26]। शुद्धजन्मन[27]। विविधमार्गस्य[28]। मार्गे। दग्धानामोषधीना[29] रज एव[30]। अवतिष्ठति सर्व भस्मीभवति।

---

१. होतारं होमनिष्पादकमाह्वातारं वा देवानामीदृशमग्निम् Sy.

२. सम्भजते Sy. वृणते is in the pl. but is paraphrased by VM in the sing ऋञ्जते on the other hand is in the sing. and is explained in the pl.

३. दिवसंघणेषु निमित्तभूतेषु Sy

४. किमिव। भगमिव। त यथा जना: प्रसाधयन्ति तद्वत्। यद्वा। महान्त राजानमिव सूर्यदीप्तिवत्पूज्यमित्यर्थः Sv.

५. ० वमुं P ६. ० वृच० P.D हविषा स्तुत्या च सम्पृचाना ऋत्विजो यजमाना Sy. ७. 'ऋञ्जतिः प्रसाधनकर्मा' (N. 6.21.) इति यास्कः Sy.

८. व्यवहर्तृन्त्विजो यज्ञभुजो देवान्वा ऋत्वा मज्मना च योजयितुम् Sy ९. ० मंम्म M. क्रतुना कर्मणा यागादिरूपेण Sy.

१०. शारीरेण बलेन च युक्तान् Sy.

११. बहुभिर्बहुधा वा स्तूयमानः Sy.

१२. मर्तं M. यजमानम् Sy.

१३. शंसं स्तुतिं च स्तुत्यं वा तम् Sy.

१४. विश्वधनो यद्वा विश्वात्मकोऽयम् Sy.

१५. वेति पूर्वोक्तान्कामयते Sy.

१६. हविर्भक्षणाय। तस्माद्धोतारमग्निं वृणत ऋञ्जते च Sv. १७. वितिष्ठते सर्वतो व्याप्तो भवति Sy. १८. सर्वैर्यष्टव्यः। यष्टु योग्यः सन् Sy. १९. वायुना प्रेरितः Sv. २०. तत्र दृष्टान्तः।... विदूषकादिरिव Sy. २१. बहुवक्ता Sy.

२२ स यथा जरणाः स्तुतीर्वितिष्ठते विविधं कुर्वन्वर्तते Sy २३. अनिवारितोऽप्रतिहतप्रसरः...तद्वदयमप्यनाकृतोऽप्रतिबद्धप्रसरो व्यवस्थित. Sy. २४. अग्नेः Sy.

२५ पुनः पुनर्गम्यत इति जहा मार्ग Sy.

२६ मन्त्रसहितारण्योरुत्पन्नत्वात् Sy.

२७. द्विवि० M ०मार्गस्य मार्गस्य P. D. विविधज्वालस्यानियतमार्गस्य Sy.

२८. पतने मार्गे यज्ञरूपे Sy

२९. रञ्जनात्मको लोकः Sy.

३०. आतिष्ठति। सर्वत आश्रयत्यग्नौ बहुधा यजतीत्यर्थः Sy. There is no verb in the second hemistich of the Vedic stanza. अवतिष्ठति seems to be the explanation of the preposition आ, used in the original. As स्था with अव is in the *ātmanepada*, आतिष्ठति or अवतिष्ठते is suggested for अवतिष्ठति।

रथो न यातः शिक्वभिः कृतो द्यामङ्गेभिररुषेभिरीयते ।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ॥८॥

रथो न । शक्वभिः । कृत । दृढाङ्गो रथ । इव । कृत. । द्याम् । अङ्गैरात्मीयै । आरोचमानै । गच्छति । अनन्तरम् । अस्य । ते । कृष्णा । सरणमार्गा । दह्यन्ते । शूरस्येवाग्ने· । दीप्तान्मार्गाद् भीता । पलायन्ते । पक्षिण ।

त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।
यत्सीमनु क्रतुना विश्वथा विभुररात्र नेमिः परिभूरजायथाः ॥९॥

त्वया ह्यग्ने । त्वया । हि । अग्ने ! वरुण । धृतकर्मा । मित्रश्च । तेजसा आच्छादयति । अर्यमा च । त्वयैव शोभनदान । यस्मात् त्वम् । सर्वम् । प्रति । कर्मणा । सर्वप्रकारम् ।

---

१. अयमग्नि·...रज्जुभिः Sy. २ बद्ध. Sy.
३. स यथा स्वीयैश्चक्रादिभिरङ्गैरीयते तद्वत् Sy. ४. यातः स्थापित· सन् Sy
५. अन्तरिक्षम् Sy. ६. अगे०P D ज्वाला विरूपैरवयवैः Sy. ७. गमनशीले· Sy.
८ आज्येन हृष्टः सन् ... गच्छति Sy
९. प्रवृद्धघनन्तरम् Sy. १०. अग्नेः Sy.
११. कृष्णवर्णा भवन्ति Sy.
१२. सरणयो मार्गाः Sy.
१३. यत एवं भवन्ति तदर्थं दक्षि दहति काष्ठान्। पुरुषव्यत्यय· Sy दह्यन्ते as an explanation of दक्षि is obviously incorrect Padapāṭha reads धक्षि for दक्षि। धक्षि is of course 2nd per. sing. sub. of √ दह् 'to burn' and should mean 'do thou burn.'
१४. ०स्यै० M. तत्र दृष्टान्तः। ...कस्यचिद् विक्रान्तस्य दीप्तात्तेजसः सकाशाद् भीत्या पलायमाना इव Sy.
१५. ज्वलितस्याग्नेः... दीप्तात्तेजसः सकाशात् Sy. १६. ०र्गान् M
१७ ईषते गच्छन्ति Sy
१८ गमनवन्तः पक्षिमृगादयः Sy
१९. एवमन्तरिक्षं स्पृशन्सर्वतो दहतीति सर्वदा दावाग्निरूपेण स्तूयते Sy.
२०. खलु ... हिशब्दो मन्त्रान्तरप्रसिद्धिद्योतनार्थः। 'त्वमग्ने वरुणो जायसे' (RV. V 3 1ª.) इति हि मन्त्रान्तरम् Sy.
२१. हि । अग्ने ! वरुण. । is missing in M. रात्र्यभिमानी देवः Sy.
२२. स्वीकृतवर्षणादिकर्मा भवति Sy.
२३ तथा मित्रोऽहरभिमानी देव· Sy.
२४. शातयति तमः Sy
२५. उभयोर्मध्यवर्ती देवः Sy.
२६. शोभनदानो भवति। व्यत्ययेन बहुवचनम्। यद्वा । एते वरुणादयः सुदानवः शोभनदानाः स्वस्वकार्यकर्तारस्त्वया हि शाशद्रे तीक्ष्णीक्रियन्ते Sy.
२७. वरुणादीनामन्यायत्तत्व उपपत्तिमाह । ...यस्मात्कारणात् Sy.
२८. सर्वतः Sy. २९. य...प्र० M.
३०. विश्व इव विश्वात्मक इव Sy.

[1]विभवसि वरुणादीनधितिष्ठसि ततस्त्वम्। [2]अरान्। इव। [3]नेमि.। [4]परिभू। [5]अभवो देवान्।

त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि।
तं त्वा नु नव्यं सहसो युवन्वयं भगं न कारे महिरत्न धीमहि ॥१०॥

[6]त्वमग्ने। त्वम्। [7]अग्ने। [8]भजते। [9]सुन्वते च। धनम्। [10]युवतम। देवैस्तनम्। [11]प्रेरयसि। [12]तम्। त्वाम्। [13]क्षिप्रम्। [14]स्तुत्यम्। वयम्। [15]सहस। [16]पुत्र। [17]भगम्। इव। स्तोत्रलक्षणे शब्दे कार्ये वा। [18]महाधन। [19]निधीमहि।

अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम्।
रश्मींरिव यो यमति जन्मनी उभे देवानां शंसमृत आ चं सुक्रतुः ॥११॥

[20]अस्मे रयिम्। अस्मासु। धनम्। [21]इव। [22]सुप्रयोजनम्। [23]दमसनम्। [24]भाग्यम्। [25]बलम्।

---

१. विभूमित्रार्यमात्मना सर्वव्यापी Sy
२. तत्र दृष्टान्तः। अरान् रथस्य शङ्कून् Sy
३ बाह्यवलय इव। स यथा व्याप्य तिष्ठति तद्वदयमग्निर्वरुणादीन्व्याप्य तिष्ठति Sy.
४. स्वतेजसा सर्वत. परिभविता सन् Sy
५. अनुक्रमेण. जायसे। प्रादुर्भवसि Sy
६. त्वम्। अग्ने। omitted by M
७. त्वां स्तुवते Sy. शशमान शसमान. N 6 8
८. त्वदर्थमभिषवं कुर्वते यजमानाय Sy
९. तद्यागार्थं रत्नं रमणीयं हविः Sy.
१०. युवमेवैस्त० P देवेषु तायमानं विस्तार्यमाणम् Sy.
११. व्याप्नोषि। अस्मत्प्रत्तं हविर्देवान्प्रापयसीत्यर्थः। इन्वतिर्व्याप्तिकर्मा। 'इन्वति ननक्ष' (Ngh. 2.18.) इति तन्नामसु पाठात् Sy.
१२. तादृशं हविर्भुजम् Sy.
१३. ०प्र P. D.
१४. ०त्य P.
नवतरं स्तुत्यं वा Sy.
१५. याय P
यजमाना. Sy
१६ युवशब्देनोत्पत्तिर्लक्ष्यते। मथनकाले बलेनोत्पन्न बलस्य मिश्रयितर्वा। यद्वा। सहस्पुत्र Sy
१७ सहस। पुत्र। missing in M.
युवन्। नित्यतरुण। Sy.
१८ तत्र दृष्टान्त.।....आदित्यमिव। यद्वा। महान्त राजानमिव तं यथा स्तुवन्ति तद्वत् Sy.
१९ कारे शब्दे स्तोत्रलक्षणे Sy.
२०. महधन P ०न M अस्मत्प्रदेयमहद्रमणीयधन! Sy
२१. स्थापयामः। हविष्प्रदानसमये क्षिप्रमेव स्तुम इत्यर्थः Sy.
२२ यथा Sy.
२३. सुष्ठु भरणीयम् Sy.
२४. ०सं सं M
दमनीयम्। उपाज्यंम् Sy.
२५. सर्वैर्भजनीयम् Sy.
२६. उत्साहवन्तं प्रबुद्धं वा Sy.

इव[1]। सम्पृणक्षि[2]। धारकम्[3]। यो[4] भाग सारथिरिवाश्वप्रग्रहार्थान्[5] रश्मीन्[6]। अस्माकमिदं[7] जन्म पारलौकिक च। सर्वम्[8]। नियच्छति[9]। देवानाम्[10]। स्तोत्रम्[11]। च। अनुयच्छति[12]। यज्ञे[13]। सुकर्मा।

उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ ॥१२॥

उत नः[15]। अपि[16] च। अस्मान्[17]। सुदीप्ति[18]। क्षिप्राश्व[19]। ह्वाता[20]। मदयिता[21]। शृणोतु[22]। आह्लादक[23]। स[24]। अस्मान्[25]। नयतु[26]। नेतृतमै[27]। अमूढ[28]। अग्नि[29]। धनम्[30]। सुष्ठु प्राप्यम्[31]। श्रेष्ठम्[32]। प्रति[33]।

अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥१३॥

अस्तावि[34]। स्तुत[35]। अग्नि[36]। कर्मवद्भिरस्माभि[37]। मन्त्रै[38]। साम्राज्यार्थं धनानि[39]।

---

१. ०वृण० P. D २. ०रयं D विद्यादिधारणकुशल पुत्र यथा ... सम्पृणक्षि। उभयमपि ददासीत्यर्थ. Sv
३. इदानीं परोक्षेणाह। योऽग्नि. Sy अग्नि is suggested for भाग.
४. अश्वीन् M. स्वकीयान् रश्मीन्यथा यमति नियमयति विस्तारयति तद्वत्स. Sv.
५. Omitted by P. जननाधारभूतावुभौ लोकाविहलोकपरलोकौ Sy.
६. यमति नियच्छति Sv
७. देवसम्बन्धिनम् Sy. ८. स्तवम् Sv.
९. अनु omitted by P. आयच्छति। सर्वदा ददाति। यद्वा पूर्वार्धे पपृचासीत्यपि परोक्षत्वाय प्रथमपुरुषतया योज्यम् Sy.
१०. अस्मदीययज्ञे Sy.
११. शोभनकर्माण्यम् Sy. १२. उतशब्दोऽप्यर्थः। स च सम्भावनायाम् Sy.
१३. अस्मदीयमाह्वानम् Sy.
१४. ०क्ति P.D. कीदृशोऽयम्।... सुद्योतमाः Sy. १५. शीघ्रगमनाश्वः Sy.
१६. देवानामाह्वाता Sy. १७. मा० M. मदनशीलः Sy. १८. अपि नाम शृणुयात्। यद्वा। नोऽस्माञ् श्रावयेद् देवेषु मध्ये प्रख्यापयेत् Sy. १९. सुवर्णमयरथोपेतः Sv. २०. स प्रसिद्धोऽग्निः Sy.
२१ अपि नाम नयेत्। यज्ञस्य पारं प्रापयेत् Sy.
२२. अत्यर्थं नेतृभिः कर्मभिः स्तोत्रैर्वा Sy.
२३ अमूढबल. Sv. २४. वस्यो वसनीयः Sy. २५ किमर्थम्। वामं वननीयम् Sy.
२६. प्रोह्य P प्राह्य D ०प्य M. सुष्ठु प्राप्य सर्वैः काङ्क्षणीय स्वर्गम् Sy.
२७ भवति M. आभिमुख्येन प्राप्तुम् Sy.
२८ M. adds अग्निः after अस्तावि।
२९. स्तुतोऽस्माभिर्यजमानैः Sy.
३० हविष्प्रदानादिकर्मवद्भिः। शिमीति कर्मनाम। 'शिमी शक्तिः' (Ngh. 2.1.) इति तन्नामसु पाठात् Sy.
३१. ०मेभिरस्माभिः P.
३२. अर्चनसाधनैर्मन्त्रैः Sy.
३३. ०र्थं M. कीदृशोऽयम्। साम्राज्याय साम्राज्यस्येति कर्मणि षष्ठीस्थाने चतुर्थी। सम्यग् राजमानत्वम् Sy.

अत्यन्तम्[१]। प्रयच्छन्[२]। अमी[३]। धनवन्तः[४]। ये ते। च। वयम्[५]। च तव स्तोत्राणि। यथा। सूर्यः[६]। अत्यन्तम्[७]। वृष्टिं विस्तारयति[८]। एव निस्ततवन्त[९]।[१०]

I.142.

समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे ।
तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥१॥

समिद्धः[११]। समिद्ध[१२]। अग्ने[१३]! आवह[१४]। देवान्[१५]। यजमानाय[१६]। पूर्वं[१७] सम्बद्धम्[१८]। अपत्यम्[१९]। कुरु[२०]। सुतसोमाय। यजमानाय[२१]।

घृतवन्तमुप मासि मधुमन्तं तनूनपात् ।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥२॥

घृतवन्तम्[२१]। घृतवन्तम्[२२]। समीपे[२३]। करोषि[२४]। सोमवन्तं च। अग्ने[२५]! यज्ञम्।

---

१. अ(त्य)न्तं M. प्रकृष्टतरमत्यर्थम् Sy.
२. दधानः Sy ३. प्रयच्छामि M इममग्निम्, अमी च पुरो वर्तमानाः Sv.
४. ऋत्विजः पुत्रादयो वा Sy.
५. पूर्वं स्तोतृत्वेन प्रसिद्धा वयमपि Sy
६. तत्र वृष्टान्तः । ... मिह मेहनशील मेघ यथा सूरः सूर्यः Sy. ७. अत्यर्थम् Sy
८. वृष्ट्यर्थं शब्दयति तद्वत् Sy.
९. ०स्ततत० P D. शब्दयन्तु । निष्पूर्वस्तनतिः शब्दकर्मा । इतः परमप्यस्मत्पुत्रपौत्रादयो वयं चाग्नि स्तुम इत्यर्थः Sy.
१०. Ms. D puts the figure ॥१४१॥ here to indicate the end of one hundred and fortyfirst hymn. No such number is given in P. and M.
११. सम्यग्दीपित एतन्नामकस्त्वम् Sy.
१२. अद्यास्मिन्यागदिने ... अस्मद्यज्ञं प्रति प्रापय Sy.
१३. हविषां भोक्तृनग्न्यादीन् Sy.
१४. यागायोद्यतस्रुचे यजमानाय तदर्थम् Sy.
१५. संबन्धम् M. पूर्वेभ्यो देवेभ्यो हितं पूर्वकालीनं वा Sy. १६. यज्ञम् Sy.
१७ विस्तारय Sy. १८. आवाह्य च सुतसोमाय यागार्थमभिषुतसोमाय Sy.
१९. दाशुषे हविर्दत्तवते । यद्यपीदानीमेवाहूयन्ते देवास्तथापि पूर्वानुष्ठानापेक्षया भाव्यपेक्षया वा दाशुष इत्युच्यते । हविर्दात्रे वा यजमानाय तदर्थम् Sv.
२० VM ignores अद्य। A fragment समिद्धो अग्न आ वह is quoted by Skandasvāmin in his commentary on N 8 22; P. III 142.
२१. Omitted by P क्षरदाज्योपेतम् Sy.
२२. उप उपेत्य मासि निर्मिमीषे। मितो भवसि वा। सम्पूर्त्तिपर्यन्तं तिष्ठसीत्यर्थः Sy.
२३. माधुर्योपेतं सोमादिमधुरद्रव्येण तद्वन्तम् Sy.
२४. 'तनूनपावाज्यम्' इति कात्थक्यपक्षे तन्वो गावो भोगाना तासु जायमानत्वात् । ताभ्य उत्पन्नं क्षीरं क्षीरात्सर्पिरित्याज्यस्य नप्तृत्वम् । तद्वान्यज्ञः । अग्निपक्ष आपस्तम्ब उच्यन्ते । ताभ्य ओषधिवनस्पतयः । तेभ्योऽग्निरिति नप्तृत्वम् । अरणीभ्यामिति भावः । एतन्नामक हे अग्ने ! Sy.

मेषाविनः। मत्सदृशस्य। यजमानस्य। प्रयच्छत ।

शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति ।
नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥३॥

शुचिः पावकः। शुचि । पावक । महान्। आज्येन। यज्ञम्। सिञ्चति। स नराशस । स्वर्गादिह्व । त्रि । आगच्छतु। देव । देवमध्ये। यज्ञार्ह ।

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥४॥

ईळितः। स्तुतस्त्वम्। अग्ने। आवह। अस्मिन्कर्मणि। पूज्यम्। प्रियम्। इन्द्रम्। इयम्। हि। मम। स्तुति । सुजिह्व। त्वाम्। अच्छ। उच्यते।

---

१. मत्सदृशस्य यजमानस्य Sy
२. शस्यमानस्य त्वा स्तुवत Sy
३. हविर्दत्तवत. Sy.
४. शुद्धो दीप्तो वा Sy.
५. अन्नस्यापूतस्य शोधयिता Sy.
६. अभूत इवाद्यक्षणे भविता । आश्चर्यभूत इत्यर्थः Sy.
७ मध्वा मधुरेण रसेन Sy
८. यज्ञमस्मदीयम् Sy.
९. समन्तात् मिञ्चति स्वदयतीत्यर्थं । यद्वा मधुरेण फलेन त्रिरामिमिक्षति योजयतीत्यर्थः. Sy.
१०. ०स P D नरोशसे M नरैः कर्मनेतृभिर्ऋत्विग्भि शमनीयोऽग्निः । 'नराशंसो यज्ञः' इति कात्यक्यपक्षे यज्ञाभिमानी देवो द्योतमानो द्युलोकादागत्यानुष्ठीयमानं यज्ञं त्रिरामिमिक्षति। अयं नराशसो देवः Sy.
११. ०वहः M. द्युलोकादागत्य Sy.
१२. त्रिरा, उपसर्गवशाद्योग्यक्रियाध्याहारः । त्रिवारम् Sy.
१३ आगच्छति । त्रिराहरति वा फलम् । अवशिष्टं पूर्ववन्नेयम् Sy.
१४ द्योतनशील. Sy.
१५. देवेषु मध्ये Sy.
१६. यज्ञसम्पादनार्हं ईदृश Sy
१७ सर्वैः स्तुत्य इत्नामकस्त्वम् Sy.
१८ आह्वय Sy
१९ अस्मिन्यज्ञे Sy
२० नायनीयम् Sy
२१ प्रीणयितारमस्मान् हविः स्वीकर्तुं वा प्रीतियुक्तम् Sy
२२ हिः पूरणार्थः Sy.
२३ मननसाधना स्तुतिरूपा वाक् Sy.
२४ घृतपानेन शोभनज्वाल ! Sy.
२५ ताम् M मा P
२६. आभिमुख्येन प्राप्तुम् Sy.
२७. मतिरेवास्मदीयोच्यते Sy.
२८ अत्र पुरोडाशादीडभिमानियज्ञपरतया वा व्याख्येयम् । एवमुत्तरत्र यज्ञार्हंयज्ञसम्बन्धिदेवताभिश्च यज्ञ एवोच्यत इति तत्परत्वेन व्याख्येयम् Sy.

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे ।
व्रुञ्जे देवव्यचस्तमिन्द्राय शर्म सप्रथः ॥५॥

स्तृणानासः। स्तृणन्तः। ऋत्विजः। बर्हि। यज्ञे। सुष्ठ्वर्हिस्यमाने। छिनधि। देवैर्व्याप्तम्। इन्द्राय च। आवासस्थानम्। सर्वत पृथुतम बर्हिः।

वि श्रयन्तामृताव्रुधः प्रयै देवेभ्यो महीः ।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥६॥

वि श्रयन्ताम्। विवृतद्वारा भवन्तु। यज्ञस्य वर्धयित्र्य। देवेभ्य। प्रयातुम्। मह्य। शोधयित्र्य। बहुभि स्पृहणीया। द्वार। देव्य। असज्यमाना।

आ भन्दमाने उषासे नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥७॥

आ भन्दमाने। स्तूयमाने। परस्परासक्ते। नक्तोषासा। सुरूपे। महत्यौ। यज्ञस्य। निर्मात्र्यौ। सुष्ठु। इद बर्हि। आसीदताम्।

---

१. आस्तरन्तः Sy
२. नियमितजुह्वादिपात्राः... Sy.
३. ०र्हि P.D. बर्भान् Sy.
४. सोमयागे Sy.
५. ०र्हि च P D M शोभनप्रायणीयाद्यवान्तरयागवति Sy.
६. विवर्जयन्ति । सम्पादयन्तीत्यर्थः Sy.
७. अतिशयेन देवगामिनम् Sy.
८. सुखसाधनं गृहम् Sy.
९. सर्वतो विस्तीर्णम् Sy. १०. बर्हिः P.
११. विविधं श्रयन्तु । विवृता भवन्तु Sy.
१२. कीदृश्यस्ताः? ... यज्ञस्य वर्धयित्र्यः पूज्याः Sy. १३. देवानाम् Sy.
१४. ०तु M. प्रापणाय Sy.
१५. मह्यां M. महत्यः Sy.
१६. ०भि स्पृ० D. बहुस्पृहणीयाः Sy.
१७. यज्ञस्य द्वाराभिमानिन्यः Sy.
१८. देवः P.D.M. देवताः Sy.
१९ ... परस्परविप्रकृष्टा इत्यर्थः Sy.
२० आ D. २१. सर्वं. स्तूयमाने Sy.
२२. परस्परं सन्निहिते Sy.
२३. उक्तगुणविशिष्टे अहोरात्रदेवते Sy.
२४. शोभनरूपे । पेश इति रूपनाम Sy.
२५. ..अपत्यरूपे वा प्रतिदिनं जायमानत्वात्। यहुरित्यपत्यनाम। 'यहुः सूनुः' (Ngh. 2.2.) इति तन्नामसु पाठात् Sy.
२६. ताभ्यामागमनाद्यज्ञस्य सम्पूर्तेर्यज्ञमातृत्वमुपचर्यते । यद्वा । अतिरात्रादीनामहोरात्रसाध्यत्वात् Sy.
२७. सुमत् स्वमेव । अस्माभिरप्रार्थिते इत्यर्थः Sy.
२८. यद्वा सुमद् बर्हिः, आस्तृतं बर्भम् Sy.
२९. आ समन्तात्... उपविशताम्। यद्वा। ऋतस्येति कर्मणि षष्ठी। यज्ञमासीदताम्। आसाद्य च बर्हिरास्तृतं बर्भं स्वयमेवासीदताम् Sy.

मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम् ॥८॥

मन्द्रजिह्वा[1]। मादयितृजिह्वौ। सम्भक्तारौ[2] स्तुवताम्[3]। दैव्यौ[4]। होतारौ[5]। कवी[6]। यज्ञम्[7]। अस्माकम्[8]। इमम्[9]। यजताम्[10]। साधकम्[11]। अद्य[12]। द्युलोकस्प्रष्टारम्[13]।

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।
इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥९॥

शुचिर्देवेषु[14]। शुद्धा। मरुत्सु[15]। देवेषु[16]। अर्पिता तदधिष्ठाना[17]। आदित्यस्य भार्या वाक्[18]। इडा[19]। सरस्वती च[20]। महती तिस्र इमा[21]। यज्ञार्हा[22]। बर्हि[23]। सीदन्तु[24]।

तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना ।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥१०॥

तन्नस्तुरीपम्[25]। तत्[26]। न[27]। तारक रेत[28]।

---

१. देवानां मादनज्वालौ Sy.
२. भृशं गृणतां स्तुवतां यजमानानां सम्भक्तारौ Sy. ३. ०ता P
४. दे० M. देवसम्बन्धिनौ Sy.
५. अयञ्च मध्यमस्थानश्चेत्युभौ Sy.
६. ०वीर P. मेधाविनौ क्रान्तदर्शिनौ Sv.
७. ईदृशं नोऽस्मदीयम् Sy.
८. अनुतिष्ठतां पूजयतां वा सम्यग् निर्वाहयतामित्यर्थः Sy. ९. फलसाधनभूतम् Sy. १०. अन्य D M. इन्द्र P
११. ० स्पृ० P. द्युलोकवासिदेवान्स्पृशन्तम्। तेर्हविषः स्वीक्रियमाणत्वादिति भावः Sy.
१२. विरुद्धलक्षणयाऽमरणेषु Sy.
१३. द्योतनशीलेषु स्तोतृषु मरुत्सु, ऋत्विक्षु वा Sy.
१४. नियता। होत्रा होमनिष्पादिका Sy.
१५. भरतस्यादित्यस्य सम्बन्धिनी द्युस्थाना वाक् Sy.
१६. पार्थिवी प्रैषादिरूपा Sy.
१७. इळ इत्युदकनाम। तद्वती स्तनितादिरूपा माध्यमिका च वाक् Sy.
१८ महती Sy १९. एतास्तिस्त्रस्त्रिस्थानवागभिमानिदेवताः Sy.
२०. यज्ञार्हाः सत्यः Sy.
२१. बर्हिः स्तीर्णम् Sy.
२२. उपविशन्तु Sy. The passage beginning with महती and ending with सीदन्तु is missing in M
२३. VM. ignores होत्रा
२४. तं प्रसिद्धम् Mah. तत् तादृशम् Sy.
२५. अस्माकम् Mah. अस्मदर्थम् Sy. अस्मभ्यमस्मदर्थम् U. अस्मदर्थम् SKN. II. 464. अस्माकम् Dur.
२६. तन्नस्तुरीपम्। तत्। नः missing in M. तुरा वेगेनाप्नोति तुरीपं शीघ्रप्रापकम् Mah. तूर्णं व्यापि Sy. तूर्णमश्नुते तूर्णं चाप्नोति U. तूर्णापि तूर्णव्यापि SKN. उदकम्। ...एवमत्र माध्यमिकस्त्वष्टेति विष्यस्त्वित्यनेन सम्बन्धात् तुरीपमुदकमित्युपपद्यते Dur.
२७. रेते P. D.

महत्। बहु। च। पर्याप्तम्। आत्मना च बहु। त्वष्टा। सन्तानपोषायान्त· प्रविष्ट।
नाभाववस्थितं बन्धम्। अस्मत्काम.। अस्माकम्। राये। विमुञ्चतु।

१. महान्तम् Mah. सद्य आविर्भवद्भूतमिव सत्। यद्वा। महत्रामैतत्। सारतो महत् Sy. महत्, अभूतपूर्वम् U. महत्रामेदम्। सारतश्च महद् महत्त्वं तद्विहाभिप्रेतं, मा भूत् पौनरुक्त्य परेणेति तेन सारतो महदित्यर्थः। महत्सम्भूतमित्यद्भुतशब्दनिर्वचनं द्रष्टव्यमिति SKN. महदित्यर्थः। 'अद्भुतो बर्हिष्ठः' (Ngh. 3.3) इति तन्नामसु पठितम् Dur.

२. बहुषु P.D. बहूनां प्राणिनामर्थायैव यद्वा पुरु वारं बहु प्रभूत च। वाशब्दश्चार्थे Sy. वाशब्दश्चार्थे बहु च वृष्टयुदकं परिमाणतः SKN. बहुवार च बहु वेशान्तरमावृणोत्युदकम् Dur.

३. अलं समर्थम् Sy. पर्याप्त च सर्वकामेभ्यः SKN

४. बहु। क्रियाविशेषणमेतत् Sy. पुरु विश्वम्। एतत्क्रियाविशेषणम्। कथम्। विश्वं पुरु सुष्ठु भृशमित्यर्थः SKN. बहु Dur.

५. त्वष्टा देवः Mah, U ईदृशमुदक त्वष्टा वृष्टयादेः कर्ता। ... तन्नामको वैद्युतोऽग्निः Sy. त्वष्टा मध्यमस्थान· SKN. त्वष्टा तूर्णमश्नुत इति नैरुक्तास्त्विषेर्वा स्याद् वृद्धिकर्मणस्त्वक्षतेर्वा स्यात्करोतिकर्मणः N. 8. 13.

६. नः पोषायास्मत्पुष्टये Sy. पुष्टयर्थम् SKN. धनपोषायेत्यर्थः। वर्षे हि सति पशवः पुष्यन्ति Dur.

७. सन्तानबोष्टायान्तः प्रविष्टौ M.

८. ०तः M. नाभि प्रति Mah. वृष्टेर्बन्धके मेघस्य नाभिस्थानेऽवस्थितमुक्तलक्षणमुदकम् Sy. राष्ट्रमध्यं प्रति U. नाभौ जगतोऽभिभूतायां वेद्यां वा नोऽस्माकं स्वभूतायाम् SKN.
अस्माकं नाभौ मध्ये, अथवा नाभा न इत्येतत्त्वष्टुरेव विशेषणं स्यात् 'नाभानः' न अदीप्यमानः। किं तर्हि? दीप्यमान एव Dur. ९. बद्धम् M.

१०. अस्मान्कामयमानो देवः Sy. त्वष्टृविशेषणमेतत्। अस्मान्कामयमानस्त्वष्टा SKN अस्माननुग्रहीतुं कामयमानः Dur

११ समृद्धये च Sy. षष्ठ्यर्थ एषा चतुर्थी। कस्य पुष्टयर्थम्? रायो धनस्य गवादेः क्वचिन्मुञ्चतु SKN.

१२. विमुञ्चतु। स्यतिरुपसृष्टो विमोचन इति यास्क. Mah. विविध गमयतु। ... यद्वा नो नाभा अस्मत्सम्बन्धियज्ञनाभावुत्तरवेद्यां राये। षष्ठ्यर्थे चतुर्थी। रायो गवादिधनस्य पोषाय पुष्टये स्यतिरुपसृष्टो विमोचनार्थः। उक्तलक्षणां वृष्टिं मुञ्चतु Sy. विमुञ्चतु U. विमुञ्चति SKN. विमुञ्चतु वर्षभावेन Dur.

१३ The stanza is quoted and explained by Yāska:—
तन्न.। तूर्णापि। महत्। सम्भूतम्। आत्मना। त्वष्टा धनस्य पोषाय विष्यतु। इत्यस्मयुः। अस्मान्कामयमानः N.6.21.
A fragment तन्नस्तुरीपमद्भुतं, is common to the RV. and the YV 27.20. The rest of the stanza in the YV. reads as follows:—
पुरुक्षु त्वष्टा सुवीर्यम्।
रायस्पोषं विष्यतु नाभिमस्मे॥

अवसृजन्नुप त्मना देवान्यक्षि वनस्पते ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥११॥

अवसृजन्। वनस्पते त्वम्। आत्मनैव। हविर्देवेष्ववसृजन्। देवान्। उपयज। अग्निरयम्। हव्यानि। प्रेरयति। देवाना मध्ये। यज्ञिय.।

पूषण्वते मरुत्वते विश्वदेवाय वायवे ।
स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥१२॥

पूषण्वते। पूष्णा। मरुद्भिस्तद्वते। सर्वदेवाय। वायवे। स्वाहा। कुरुत। गायत्र साम यस्योत्थापकम्। हव्यम्। इन्द्राय च।

स्वाहाकृतान्या गह्युप हव्यानि वीतये ।
इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥१३॥

उत्तरा वैकल्पिकी निगदव्याख्याता।

---

१. वनस्य ते M. वनानां पालक यूपाभिमानिदेवाग्ने ! Sy.
२. त्वाम् P. ३. स्वैरं वर्तयन्नृत्विजः स्वस्वकर्मसु व्यापारयन् Sy.
४. हविर्भुजः Sy. ५. उपेत्य यज Sy.
६. आहवनीयः Sy. ७. हवींषि Sy
८. प्रेरयति स्वीकरोति Sy.
९. देवेषु, उभयेषां मध्ये Sy.
१०. देवो द्योतमानः। मेधिरो मेधावान् Sy.
११. VM. ignores देवः
१२. पूष्णा तद्वते Sy.
१३. सर्वदेवसङ्घाय Sy.
१४. गमनशीलाय वायुदेवाय च Sy.
१५. स्वाहाकारम् Sy.
१६. कुरुत ऋत्विजः ! Sy.
१७. वेप इति रूपनाम। गायत्रशब्द इतरसामोपलक्षणः। गायत्रं वेपो रूपं यस्य तदृक्षाय Sy.
१८. मम P. १९. ०पयकं P.
२०. हविः प्रदातुम् Sy.
२१ हव्यावित्राय M.
हे इन्द्र स्वाहाकृतानि। स्वाहा इत्येवंपूर्वा कृतिः करणमुच्चारणं यस्यमाणदेवतानां ताः स्वाहाकृतयः। तद्वन्ति हव्यानि हवींषि। अत्र प्रयाजेषु वषट्कारप्रदानात्स्वाहाकृतं हविरित्यर्थः। तद्धविरुपेत्य, वीतसे भक्षणाय। आगहि आगच्छ।... तथा हे इन्द्र आगहि स्तोत्राण्यभिलक्ष्यागच्छ। आगत्य हवमस्मदीयाह्वानं, श्रुधि शृणु। यतस्त्वाम्। अध्वरेऽहिंसात्मके यागे हवन्त आह्वयन्ति, ऋत्विजोऽतः श्रुधि Sy
Ms. D. puts the figure ॥१४२॥ here to indicate the end of one hundred and fortysecond hymn. No such number is given in P. and M.

I. 143.

प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः ॥१॥

प्र तव्यसीम्[१]। वृद्धिमतीम्[२]। नवतराम्[३]। धियं कर्म[४]। वाचः। स्तुतिम्[५]। सहसः[६]। पुत्राय। अग्नये[७]। प्रभरे[८]। अपाम्[९]। नपात्[१०]। यः[११]। वसुभिः[१२]। सह[१३]। सम्प्रियः[१४]। होता[१५]। वेद्याम्[१६]। निषीदति[१७]। प्राप्तयागकालः[१८]।

स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥२॥

स जायमानः[१९] सः[१९]। प्रादुर्भवन्[२०]। उत्तमे[२०]। अन्तरिक्षे[२१]। अग्निः प्रथमम्[२२]। वायवे[२२]। आविरभवत्[२३]

---

१. ०सिं D. P. adds (यं हव्यानि प्रेरयति) after तव्यसीम्।
२. तवीयसीम्। अतिशयेन वर्धयित्रीम्। तवतिर्वृद्ध्यर्थः सौत्रो धातुः Sy.
३. अपूर्वाम् Sy
४. यागलक्षणामुक्तगुणकं कर्म Sy.
५. उक्तलक्षणा वाचो मतिं स्तुतिरूपं कर्म Sy.
६. सहः D. कीदृशायाग्नये ? सहसो बलस्य Sy.
७. प्रकर्षेण करोमि Sy.
८. तासाम् Sy.
९. रे वाग्नवात् M. नप्ता। 'अद्भ्य ओषधय ओषधीभ्योऽग्निः' इत्यग्नेर्नप्तृत्वम्। अथवा। अपां न पातयिता वैद्युताग्निरूपेण प्रवर्षकत्वादिति भावः Sy.
१०. अग्निः Sy.
११. निवासयोग्यैर्गंधादिधर्मैः Sy.
१२. सहितः Sy.
१३. संप्रारोचयन् M. See I.143.2. यजमानस्य प्रीणयिता प्रियतमो वा तस्य Sy.
१४. होमनिष्पादकः सोऽग्निः Sy.
१५. पृथिव्यां वेदिलक्षणायाम् Sy.
१६. नितरां सीदति Sy.
१७. The passage beginning with होता and ending with प्राप्तयागकालः is omitted by M प्राप्तप्रदानसमयः सन् Sy.
१८. पूर्वोक्तोऽग्निः Sy.
१९. अरणीभ्यामुत्पद्यमानः काष्ठेषु वा प्रादुर्भूतः सन् Sy.
२०. तदानीमेव... उत्कृष्टे Sy.
२१. विविधरक्षणवति वेदिदेशे Sy.
२२. अन्तरिक्षसञ्चारिणे वायवे ... अथवा मातरि फलस्य निर्मातरि यज्ञे श्वसिति चेष्टत इति मातरिश्वा यजमानस्तदर्थम् Sy.
२३. प्रत्यक्षोऽभूत्। 'स्वमग्ने प्रथमो मातरिश्वन आविर्भव' (RV.I.31.3) इत्याविर्भुत्यन्तरप्रसिद्धेः। वायुसंयोगात्प्रज्वलित इत्यर्थः Sy.

तथा। अस्य। कर्मणा[१]। दीप्यमानस्य[२]। बलेन[३]। द्यावापृथिवी[४]। तेज। प्रारोचयत्[५][६]।

अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः।
भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्रे रेजन्ते असंसन्तो अजराः ॥३॥

अस्य त्वेषा[७]। अस्याग्ने[८]। भानव[९]। दीप्ता[१०]। अजराश्च[११]। अस्य रश्मय। शोभनदर्शनस्य[१२]। शोभनावयवस्य[१३]। सुष्ठु द्योतमानस्य[१४]। दीप्तबलस्य[१५]। सेक्तु पर्जन्यस्य। आप[१६]। इव। अग्ने। अत्यन्तमितस्ततश्चरन्त। कम्पन्ते[१७]। अस्वपन्त[१८]। जरावर्जिता[१९][२०]।

यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥४॥

यमेरिरे। यम्[२१]। आभिमुख्येनानीतवन्त[२२]। भृगव[२३]। विश्वधनम्[२४]।

---

१. क्रतुना कर्मणा ज्वलनादिव्यापारेण Sy.
२. इन्धनैः सम्यग्वर्धमानस्याग्नेः। मज्मना कृत्वा समिधानस्येति वा योज्यम्। प्रबलेन समिन्धनादिव्यापारेण समिध्यमानस्येत्यर्थः Sy.
३. बलनामैतत्। बलवता Sy.
४. द्यां च पृथिवीं च Sy.
५. ०यन् P. D. प्रकर्षेणादीपयत्। मध्ये शोचिश्शब्दश्छान्दसः Sy
६. This stanza is missing in M.
७. ०वा M. ८. अस्य स्तूयमानस्याग्नेः Sy. ९. रश्मयः। दीप्तेरुक्तत्वादत्र विस्फुलिङ्गा अवगन्तव्याः Sy.
१०. दीप्तयः Sy. ११ ०श्च M. जरारहिता अजीर्णा अविरता इत्यर्थः Sy.
१२. ०ना अस्य M. सुष्ठु सम्यग् द्रष्टार.। सर्वतो व्याप्ता इत्यर्थः Sy.
१३. शोभनमुखस्य Sy.
१४. सुष्ठु सर्वतो द्योतमानाः Sy.
१५. त्वक्ष इति बलनाम। 'त्वक्षः शर्ध, (Ngh. 2.9.) इति बलनामसु पाठात्। भासमानबलाः Sy.
१६. अक्तुरिति रात्रिनामैतत्। 'अक्तुरूर्म्याः' (Ngh. 1.7.) इति तन्नामसूक्तत्वात्। द्वितीयार्थे प्रथमा। अक्तुं जगदञ्जक नैश तमः ... अतिक्रम्य Sy.
१७ स्यन्दमानाः सर्वत्र व्याप्नुवन्तः Sy.
१८. न रेजन्ते न कम्पन्ते। वाहपाकादिषु न चलन्ति। न चाल्यन्ते वाऽन्यैः। यद्वा नशब्दो दृष्टान्तवचनः। भात्वक्षसो भा इव त्वक्षो बलं यस्य तादृशस्यादित्यस्य सिन्धवो न रश्मय इव। ते यथा स्यन्दनशीला व्याप्तिमन्तः, अक्तुरिति अञ्जकं तमोऽतिक्रम्यासंसन्तो रेजन्ते तद्वद् भात्वक्षसोऽस्याग्नेरुक्तलक्षणा दीप्तयोऽपि सर्वत्र रेजन्ते कम्पन्ते व्याप्नुवन्तीत्यर्थः Sy.
१९ स्वव्यापारेष्वस्वपन्तोऽविरताः Sy.
२० अत एवाजराः Sy.
२१. अग्निम् Sy.
२२. ०ख्योनीवन्तः P. D. आभिमुख्येन ... ईरितवन्तः स्थापितवन्तः Sy. अभिलषितार्थसिद्धये प्रेरितवन्तः SKN. आत्माभिप्रेतार्थसिद्धये प्रेरितवन्तः Dur. एरिर इतीतिरूपसृष्टोऽभ्यस्तः N.4.23.
२३. भृगुगोत्रोत्पन्नाः पापस्य भर्जकाः Sy.
२४. सर्वधनम्। वेद इति धननाम। 'वेदो वसुः' (Ngh. 2.10.) इति तन्नामसु पाठात् Sy. सर्वस्य वेदितारं सर्वधनं वा SKN. सर्वस्य वेत्तारम् Dur.

पृथिव्या[१] । नाभौ[२] । भूतजातस्य[३] । बलार्थम्[४] । अग्निम्[५] । तम्[६] । गीर्भि[७] । स्वे[८] । आयतने[९] । प्रेरय[१०] । स्वयमेव[११] । वरुण[१२] । इव[१३] । धनस्य[१४] । ईश्वरो[१५] भवति[१६] ।

न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जम्भैस्तिगितैरत्ति भर्वति योधो न शत्रून्त्स वना न्यृञ्जते ॥५॥

न यो वराय[१७] । य[१८] । वारयितुम्[१९] । न शक्यते[२०] । मरुतामिव[२१] । स्वन[२२] । सेनेव[२३] च[२४] । उद्युक्ता[२५] ।

---

१. वेद्याः । एकदेशे कृत्स्नशब्दः । यद्वा 'एतावती वै पृथिवी' (TS. 2 6.4 3.) इत्यादिश्रुतेर्वेद्याः पृथिवीत्वम् । तस्या नाभावुत्तरवेद्याम् Sy. नाभिभूतायां पृथिव्यामुत्तरवेद्याम् SKN उत्तरवेदिमध्यगतायाम् Dur.

२. नो P.

३. जातस्य D. भूतजातस्य Sy., SKN. उदकस्य Dur.

४. बलेन निमित्तेन Sy. बलनामैतत् । तद्धेतौ चात्र वर्तते । बलहेतुनाऽनेन हविराख्येन SKN मननीयेन वीर्येणान्नेन हविर्लक्षणेन Dur.

५. स्तुतिभिः Sy. स्तुतिलक्षणाभिर्वाग्भिः Dur.

६. स्वकीये Sy.

७. गृहे, उत्तरवेद्याम् Sy यज्ञगृहे SKN गृहे । मा कस्यचिदात्विज्येऽवस्थित इत्यभिप्रायः Dur.

८. प्राप्नुहि Sy. नुवस्व । . . हिनोतिर्वृद्ध्यर्थः । अभि नुभि मर्यादायाम् । आङ् मर्यादायाम् । वर्धयस्व SKN प्रेरय तस्मिंस्तस्मिन्कर्मणि वर्तमानम् Dur.

९. Omitted by P. M. अग्निः Sy.

१०. एको मुख्यः सन्नेक एव वा Sy. कीदृशः सोऽग्निः ? उच्यते, य एक एव SKN.

११. तत्र दृष्टान्तः । ... वारक आदित्य इव । स यथा सर्वस्येष्टे तद्वत् Sy. वरुण इव यथाऽपां पतिर्न राजेः SKN. यथा वरुणः समुद्रान्तर्गतानां धनानामीष्ट एवं यः . . . ईष्ट इत्यर्थः Dur.

१२ वसुनो गवादिधनस्य Sy. वसुनो धनस्य SKN सर्वस्य धनस्य Dur.

१३ प्रदातुमिति शेषः । राजतीत्यैश्वर्यकर्मा । 'क्षियति राजति' (Ngh. 2.21.) इति तन्नामसु पाठात् Sy. राजति ईष्टे SKN. राजतिरैश्वर्यकर्मसु पठितः Dur.

१४ VM ignores आ
A fragment यमेरिरे भृगवः is quoted and partly explained by Yāska in N. 4.23. The stanza *in toto* is quoted and explained by both Skandasvāmin II 264 and Durgācārya, *loc. cit.*

१५ अग्निः Sy.

१६. वरणाय निग्रहाय Sy.

१७. शक्तो न भवति Sy.

१८. तत्र दृष्टान्तत्रयमुच्यते । मरुतां स्वन इव । स यथाऽग्राह्यस्तद्वत् Sy.

१९. सा यथाऽन्यैरनिरोध्या तद्वत् Sy.

२०. उद्युक्ता P. वैरिक्षयार्थं प्रबलेनातिसृष्टा Sy.

दिवि भवा[१]। यथा[२]। अशनि[३]। अग्निः[४]। दंष्ट्राभि[५]। तीक्ष्णाभि[६]। वृक्षानत्ति[७] खादति[८]। भक्षयति[९] च। सोऽयम्। भग[१०]। इव। शत्रून्। वृक्षान्[११]। नितरा प्रसाधयति[१२]।

कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः कामंमावरत्[१३]।
चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥६॥

कुविन्नः[१४]। बहु। अस्माकम्। उच्यमानस्य[१५] स्तोत्रस्य। अग्नि। कामयिता। भवतु। वासयिता[१६]। बहु। अस्माक। धनै[१७]। कामान्[१८]। आवृणोतु[१९]। कामानां चोदयिता[२०]। बहु। प्रेरयतु[२१]। भजनाय[२२]। कर्माणि। निर्मलाङ्गम्[२३]। तम्[२४]। अनया[२५]। वाचा[२६]। स्तौमि[२७]।

घृतप्रतीकं व ऋतस्य धर्षदमग्निं मित्रं न समिधान ऋञ्जते[२८]।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम् ॥७॥

घृतप्रतीकम्[२९]। घृतलिङ्गम्। युष्माकम्[२९]। यज्ञस्य। धुरि[३०] सीदन्तम्। अग्निम्। मित्रम्।

---

१. भवा वा M.
२. यथा पतत्येव न निवार्यते तद्वत् Sy.
३. अग्निं M
४. ईदृग्सामर्थ्यमस्तीति दर्शयति। ... दन्तैर्वन्तस्थानीयाभिर्ज्वालाभिः Sy.
५. निशितैस्तीक्ष्णीभूतैः Sy.
६. अस्मद्विरोधिनः Sy. ७. भक्षयति Sy
८. हिनस्ति। 'भर्व हिंसायाम्'। ... यद्यप्यत्तिभर्वत्योरवनमेवार्थस्तथापि तदवान्तरभेदोऽवगन्तव्यः Sy. भर्वतिरत्तिकर्मा N. 9.23.
९. मसो० M. ०ति सचोयं P. अग्नि Sy.
१०. तत्र दृष्टान्तः। सम्प्रहर्ता शूर इव। स यथा शत्रून्भवति भक्षयति तद्वत् Sy.
११. वनानि वृक्षादिसमूहान् Sy.
१२. नितरां प्रसाधयति। बहतीत्यर्थ.। 'ऋञ्जतिः प्रसाधनकर्मा' (N. 6.21) इति यास्कः Sy.
१३. कुंवद् बहुवारम् Sy.
१४. उच्चस्य स्तोत्रस्य। ... यद्वा। उच्चस्यैतन्नामकस्य महर्षेर्गोत्रप्रभवस्य न इति सम्बन्धः Sy.
१५. वासयिता। सर्वेषां वसुस्थानीयो वा Sy.
१६. अतिप्रभूतम् Sy.
१७ वासयितृभिर्धनैः Sy.
१८ कामयमान् M. अत्यर्थमभिमतं वा Sy.
१९ अभिमतप्रदानेन कामं निर्वर्तयत्विति्यर्थः Sy.
२० अस्माकं कर्मसु प्रेरकः सन् Sy.
२१. त्वरयतु प्रेरयत्विति्यर्थः। तुजिः प्रेरणार्थः Sy.
२२. जना P. लाभाय Sy.
२३. शोभनावयवं शोभनज्वालम् Sy.
२४. अग्निम् Sy. २५. तमहमानय M.
२६. स्तुतिरूपया प्रज्ञया Sy.
२७. उच्चारयामि स्तौमीत्यर्थः Sy.
२८. घृतोपकरं प्रयाजादिष्वाज्यैर्हूयमानत्वात्। यद्वा प्रतीकमङ्गम्। दीप्तज्वालमित्यर्थः Sy. २९. युष्मत्सम्बन्धिनः Sy.
३०. धुरि निर्वहणे सीदन्तं यज्ञनिर्वाहकम् Sy.

इव। धनैः[1] समेधयन्। काष्ठं प्रसाधयति। स समिध्यमान[2]। रक्षोभिरनाक्रान्त[3]। यज्ञेषु[4]। दीप्यमान[5]। निर्मलामुपद्रवाभावात्[6]। अस्माकम्[7]। बुद्धिम्[8]। उद्यच्छति[9]।

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः।
अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥८॥

अप्रयुच्छन्[10]। अप्रमाद्यन्[11]। अप्रमाद्यद्भिः[12]। अग्ने[13]। कल्याण[14]। अस्मान्। पाहि[15]। तेजोभि[16]। शर्मभिः[17]। अहिंसितैः[18]। जागरूकैः[19]। अन्वेषणीय[20]। निमेषमकुर्वद्भिः[21]। परि। अस्मान्। रक्ष[22]। जायमान[23]।

---

१ इध्मैर्दीप्यमान Sy

२. एवमिन्धानः सम्यग्दीप्यमानः Sy.

३. भिः M

४. ०न्तो P.
ज्वालासमिदादिभिराक्रान्तः। अन्यैरनाक्रान्तो वा Sy.

५ यज्ञेषु वेदयत्सु स्तोत्रेषु निमित्तभूतेषु Sy.

६. स्वय दीप्यमानः Sy.

७. शुभ्रवर्णां निर्मला ज्योतिष्टोमादिकर्मं वा Sy.

८. ०द्रभावात् P

९. अस्मदीयाम् Sy.

१० प्रज्ञा यागादिविषयाम्। धीरिति कर्मनाम। 'धीः ... शमी' (Ngh. 2 1.) इति तन्नामसु पाठात् Sy.

११. उद्योजयत्येव। ... उशब्दोऽवधारणे Sy.

१२. VM. ingores उ

१३. अस्मास्वप्रमाद्यन् ... अविच्छिन्नप्रवृत्तिः सन् Sy.

१४. अप्रा ... भिः M. ... अनवधानरहितैः Sy.

१५. मन्त्रकल्याणं. Sy.

१६. रक्ष Sy.

१७. पायुभी रक्षणप्रकारैः Sy

१८. सुखकरैः Sy.

१९. केनचिदप्यपरिभूतैः Sy.

२०. ०सितं .. रन्वे० M. अन्वषणी P सर्वैरेषणीयाग्ने! Sy

२१ निमेषरहितैः। अनलसस्वभावैरोदृशै रक्षणैः Sy

२२ पालय। ... न केवलमस्मान्किन्त्वस्मत्पुत्रपौत्रादीनपि रक्ष Sy.

२३ जायमानोऽस्माभिर्दीप्यमान. सन्। .. यद्वा। उपर्युपरि जायन्त इति जाः। नो जा अस्मत्सम्बन्धिनीः पुत्रपौत्रादिरूपा प्रजा परि पाहि परितो रक्ष Sy.

२४. Ms. D. puts the figure ॥१४३॥ here to indicate the end of one hundred and fortythird hymn. No such number is given in P. and M.

I. 144.

एति प्र होता व्रतमस्य मायया ऊर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥१॥

एति प्र होता। अस्याग्ने। कर्म यागाख्यम्। होता। प्रज्ञया। उपगच्छति। उच्छ्रिताम्। धारयन्। शुद्धरूपाम्। स्तुतिम्। अध्वर्युभिर्दक्षिणा ह्रियमाणा। स्रुचश्च। अभिक्रमते। या स्रुच। अग्ने। स्थानमाज्यभागाद्यर्थम्। प्रथमम्। एव। अभिनमन्ति ता स्रुच आदापयितुमभिक्रमते।

अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥२॥

अभीमृतस्य। अभि। एनम्। अस्तुवन्। सत्यस्याग्ने। दोहना स्तुतय। योनौ यज्ञ-

---

१. हविष्प्रदानादिरूपं कर्म कर्तुम् Sy
२. होमनिष्पादकोऽध्वर्युः Sy
३. कर्तव्यविशेषप्रज्ञया युक्तः सन्। मायेति प्रज्ञानाम। 'माया वयुनम्' (Ngh 3.9.) इति तन्नामसु पाठात् Sy.
४. प्रकर्षेण गच्छति होतुम् Sy
५. ०तान् P. D. उपर्यारूढाम् Sy.
६. धकारयत् P. दधानः। 'आचतुर्यात्कर्मणोऽभिसमीक्षेतेवं करिष्यति' इत्युक्तत्वात् Sy. ७. शोभनरूपोपेनाम्। पेश इति रूपनाम Sy.
८. प्रज्ञाम् Sy.
९. ०णा P.D. दक्षिणा...M. आगत्य च दक्षिणावृतः प्रादक्षिण्येन वर्तमाना. Sy.
१०. जुह्वादीः Sy.
११. गृह्णाति Sy.
१२. या P.D.M.
१३. अग्ने P.
१४. धाम स्थानम् Sy.
१५. कीदृश्यः स्रुचः?...पात्रासादनकाले Sy.
१६. हशब्दः प्रसिद्धौ Sy.
१७. 'निंस चुम्बने' इति धातुः। चुम्बन्ति भजन्त इत्यर्थः। प्रथममनुष्ठेयकर्म बुद्ध्या प्रैति पश्चात् स्रुचः क्रमत इत्यर्थः। ... यद्वा होता देवानामाह्वाताऽयमग्निरस्य यजमानस्य व्रतं कर्म ज्योतिष्टोमादि प्रज्ञाविशेषेण युक्तः सन्नेति, यज्ञदेश प्रत्यागच्छति। कीदृशोऽयम्? ऊर्ध्वामूर्ध्ववर्ति शुचि-पेशस शोभनरूपोपेतं धियं ज्वालाचलनादिरूपं कर्म दधानो धारयमाणः। आगत्य च दक्षिणावृत उक्तलक्षणाः स्रुचो घृतपूर्णा जुहूपभृदादिका अभिक्रमत आक्रमते। घृतं स्वीकर्तुं ज्वालाः प्रसर्पन्तीत्यर्थः। या स्रुचः प्रथमं पूर्वं हविरासादनकालेऽस्याग्नेर्धाम स्थानं वेदिलक्षणं निंसते चुम्बन्ति प्राप्ताः Sy.
१८. ता P. D.
१९. अभिमृतस्य P.
२०. ०वत् P.M. अभिनवा भवन्ति। आविर्भवन्त्याभिमुख्येन स्तूयन्ते वा Sy.
२१. उदकस्य Sy. २२. धाराः Sy.
२३. उत्पत्तिस्थाने Sy.

गृहे[1]। देवस्य। सदनस्थाने। सर्वतो[2] वृता. सोऽयम्। अपाम्[3]। उपस्थानेऽन्तरिक्षे[4]। विभृतो बहु-धाभूय[5] ता। यदा। आवसत्[6]। अथ[7]। जलानि। पिबति[8]। याभि सह। सङ्गच्छते[9]।

युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः।
आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः ॥३॥

युयूषतः[11]। अहोरात्रे समानप्रमाणे[12]। तत्[13]। एव। आग्नेयमुच्यमान हवि[14]। मिश्रयत[15]। समानम्[16]। सस्योत्पादनार्थं कार्यम्। हवि शेषेण कुर्वाणे[17]। अनन्तरम्[18]। एव तदुत्पन्न हवि। भग[19]। इव। सर्वैराह्वातव्योऽग्नि[20]। अस्मत्त[21]। समादत्ते[22]। यथा। वोढुरश्वस्य[23]। रश्मीन्[24]। सारथि[25]। सङ्गच्छते तद्वद्धवि समादत्ते[26]।

---

१. द्योतमानस्यादित्यस्य Sy.
२. तद्रश्मिभिः परितो व्याप्ताः सत्य· Sy.
३. उदकानाम् Sy.
४. उत्सङ्गे। अन्तः Sy.
५. विशेषेण ताभिर्धार्यमाण. सन् Sy
६. आक्रम्य निवसत्ययमग्निस्तदानीमित्यर्थ. Sy. ७. अधुना Sy
८. अमृतोपमा अप· Sy
९. बति P. पिबति सर्वो लोकः Sy.
१०. अयमग्निः सङ्गच्छते वा भूमिं ता अधयत्। विद्युदात्मनोदकानि जगत् पाययत इत्यग्नेः स्तुतिः Sy.
११. यूयू० D.
१२. सवयसा समानवयस्कौ। वयःशब्देन सामर्थ्यं लक्ष्यते। समानसामर्थ्यौ Sy.
१३. यदा प्रवृद्धो भवति तदानीमेव Sy.
१४. वपुरग्नेः शरीरम् Sy.
१५. स्वस्वव्यापारेण मिश्रयितुमिच्छतः। प्रैषानन्तरं याज्यादिपाठो होतुर्व्यापारो वषट्कारानन्तरं होमोऽध्वर्योरिति विभागः। अत्रेदमनुसन्धेयम्। सवयसा समानवयस्कौ मिथः प्रत्येकं समानप्रयोजनं सुखप्राप्तिं वितरित्रता विशेषेण तरितुमिच्छन्तौ ... द्विवचनस्याकार·। जायापती तद्वपुस्तदेव परस्परं शरीरं युयूषतो मिश्रयितुमिच्छत. परस्परमालिङ्गतः। तद्वदग्नि साक होत्रध्वर्यू युयूषतः Sy.
१६ समानमर्थं समानप्रयोजनं निष्पत्तिम् Sy.
१७ सत्योत्पा० M. ०त्या० P.
१८ मिथः प्रत्येकम् ... भृशं तरन्तौ होत्रध्वर्यू Sy.
१९ भागः D सर्वैः सेवनीय आदित्यः। स यथा सर्वतः पूजामादत्ते तद्वत् Sy.
२०. आहवनीय. Sy.
२१ अस्माक सम्बन्धिनः Sy.
२२. आ सर्वतः ... सम्यक् स्वीकरोति Sy.
२३. वाहकस्याश्ववादे रश्मीन्प्रग्रहानिव Sy.
२४. रश्मिवदायता घृतधाराः Sy.
२५. सरणशीलः सारथिवद्यज्ञात्मकस्य रथस्य निर्वाहको वा सन् ... रथस्य यन्ता Sy.
२६. ग is corrected to य with red ink in M. तान्यथा M. स्वीकरोति, तद्वदयमग्निरपि हवींषि समयंस्त Sy.
२७. VM. ignores मिथः

यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥४॥

यमी द्वा। यम्। एनम्। द्वौ। समानाम्नौ। पूजयतोऽहश्च रात्रिश्चाहवनीयाख्ये। एकस्मिन्। आयतने स्थित स्वय च। समानगृहावेकस्मिन्काले परिवर्तमानत्वात्सोऽयम्। यथा। अह्नि प्रातरादित्यात्मना जायत एवम्। श्वेतवर्णोऽग्नौ। रात्रौ च। दीप्तो जायते। पुरूणि बह्ववर्तनानि। मनुष्यहितानि। युगानि। सञ्चरन्। जरावर्जित।

तमीं हिन्वन्ति धीतयो दश त्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥५॥

तमीं हिन्वन्ति। तम्। एनम्। प्रेरयन्ति। अङ्गुलय। दश। असङ्ख्याता। त देवम्। वय मर्तास। रक्षणाय। हवामहे। सोऽग्नि। प्रकर्षवत। उच्छ्रितादन्तरिक्षात्। उदकानि

---

१. यमि P.
२. ०न D. अग्निम् Sy.
३. समानवयस्कौ समानसामर्थ्यौ वा Sy
४ स्तुत्या हविष्प्रदानेन च प्रीणयतः Sy.
५. वनी० P.
६ योनो फलस्योत्पत्तिस्थाने यज्ञे वर्तमानौ Sy.
७. मिथुना दम्पती इवैककार्योद्युक्तौ। समोकसा समाननिवासौ देवयजनस्थानावेवंभूतौ होत्रध्वर्यू Sv.
८. कदेत्याह . . अहनीव Sv.
९. पलितः पूर्वमङ्गारावस्थाया जीर्णोऽपि Sy
१०. एव पूज्यमानोऽग्नि Sy.
११. रात्रावपि। सर्वदेत्यर्थः Sy.
१२. समिन्धनानन्तरं युवा तरुणस्तेजसा सर्वस्य मिश्रयिता च Sy.
१३. बह्ववं M.
बह्वाज्यादिकम् Sy
१४. ०व्याहि० P. एवं जातोऽयम् . . . मनोः सम्बन्धीनि Sy.
१५. जायापतिरूपाणि होत्रध्वर्युरूपाणि वोद्दिश्य Sy.
१६. भक्षयन् Sy.
१७. अजीर्णो जरारहितो वर्तते Sy.
१८. VM ignores मिथुना
१९ अग्निम् Sv.
२०. प्र० D
प्रीणयन्ति मन्थनकाले Sv.
२१. दशसङ्ख्याकाः Sy
२२ विश परस्परविश्लिष्टाः Sy.
२३ द्योतमानम् Sv
२४. मर्तासः M.
मनुष्या वय यजमानाः Sy.
२५ आह्वयामः Sy.
२६. कोऽस्य विशेष इत्युच्यते। अयमग्नि Sy.
२७ धनोः धनुषः सकाशात् प्रवत आ प्रकर्षेण गच्छतो बाणानिव। तान्यथा शत्रोरुपरि मुञ्चन्ति। आ इत्युपमार्थे। तद्वत्सोऽग्निः Sy.
२८. धनुस्थानीयाग्निजशरीरसकाशात् Sy.
२९. प्रकृष्टवेगवतो रथान् Sy.

भूम्यां[1] प्रवेशयति तथा। उपरि[2] व्रजद्भिरुदकं[3]। प्रज्ञानानि मनुष्याणाम्। नवानि[4]। धत्ते[5]।

त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपाइव त्मना।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥६॥

त्वं ह्यग्ने। त्वम्। हि। अग्ने! दिवि भवस्य[6] देवगणस्य। ईश्वरो[7] भवसि। त्वम्। पार्थिवस्य[8]। गोपाल[9]। इव पशूनाम्[10]। आत्मनेव[11]। एवविधस्य तव[12]। एते[13]। बृहत्यौ[14]। अभिगमनस्वभावे[15]। हिरण्मयालङ्कारे[16]। गमनशीले जङ्घे[17]। बर्हि[18]। आशाते[19]।

अग्ने जुषस्व प्रति हर्य तद्वचो मन्द्र स्वधाव ऋतजात सुक्रतो।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँइव क्षयः ॥७॥

अग्ने जुषस्व। अग्ने! तदिदम्[21]। वचनम्[22]। सेवस्व[23]। कामय च[24]। मादयित[25]। अग्नवन्[26]!

---

१. निये० P. ऋण्वति गमयति। रिविर्गत्यर्थः। अत्रान्तर्भावितण्यर्थोऽयम्। . अधिशब्दोऽनर्थको धात्वर्थमात्रानुवादी Sy. २ एव प्रवृद्धोऽग्नि. . अनुष्ठानार्थमभित· सञ्चरद्भिर्ज्ञेयमर्थमभिगच्छद्भिर्वा तदर्थम् Sy

३. वयुनानि प्रज्ञानान्यनुष्ठानविषयाणि Sy.

४ नूतनानि Sy

५. धारयति ज्ञापयतीत्यर्थः। यद्वा, अभिव्रजद्भिराभिमुख्येन गच्छद्भिर्होत्रादिभिः क्रियमाणानि नवानि वयुनानि प्रज्ञाविशिष्टानि स्तोत्रादीनि ... धने Sy

६. VM. ignores अधि

७. देवादेर्विशुद्धात्मना वृष्ट्यादेर्वा Sy

८. ईशिषे। ऐश्वर्यनामैतत् Sy.

९. पृथिवीसम्बन्धिनो मनुष्यादेः राजसीश्वरो भवसि Sy.

१०. तत्र दृष्टान्तः। ... पशुपालको यथा स्वसामर्थ्येनैव पशूनां निरोधनिर्गमनादिव्यापारेषु समर्थो भवति तद्वत्। एतद्दृष्टान्तेनात्यन्तस्वातन्त्र्यमुक्तं भवति Sy. ११. पशून् M.

१२ ०नेवं० D आत्मनैवैव वयं मर्तासो रक्षणाय हवामहे विधस्य P. किमन्यतन्त्रत्वेन नेत्याह। .. आत्मनैव स्वसामर्थ्येनैव Sy.

१३ यस्मादेव तस्मात् .. तव Sy.

१४ एते प्रसिद्धे एनी, एतवर्णे शुभ्रे द्यावापृथिव्यौ Sy.

१५. कीदृश्यौ ते ?... महत्यावतिविस्तृते Sy.

१६ ०मस्यभा० P. अभिश्रिया प्राप्तैश्वर्ये अभित. सेव्ये वा Sy.

१७ हितरमणीये Sy

१८. वक्वरी अतिकुशल शब्दयन्त्यौ Sy.

१९ जघं P. २०. यज्ञम् Sy.

२१ अश्नुवाते व्याप्नुत। . ईदृश्यौ द्यावापृथिव्यौ बर्हिरश्नुवाते Sy.

२२. VM. ignores एते

२३. तादृशम् Sy.

२४. प्रियकर वचो वाग्रूपं स्तोत्रम् Sy.

२५. सेवस्व हविः। प्रीतो भव वा स्तुत्या Sy.

२६. पुनः कामयस्व Sy.

२७. मादनशील स्तुत्य वा Sy.

२८. हविर्लक्षणान्नवन् Sy.

[1] यज्ञजात ! [2] सुप्रज्ञ ! [3] भूयस्त्व प्रज्वलन्। [4] सर्वत एव। [5] अभिमुख । भवसि। [6] दर्शनीय । रमयिता। [7] [8] सन्दर्शने मनुष्यस्य। [9] अन्नवानिव। [10] निवास ।

I.145.

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन्त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥१॥

तं पृच्छत। [11] अग्निम्। [12] पृच्छत। स। [13] देवेषु गच्छति। [14] वेद चावगन्तव्यम्। [15] स। [16] ज्ञातैव। [17] गच्छति। [18] क्षिप्रम्। [19] तस्मिन्। सन्ति। प्रशसनानि। [20] अभिलषितानि च। [21] स। [22] बलस्य। [23] अन्नस्य

---

१. ०जे जा० P. ०ज्ञाज्जा० M. यज्ञार्थमुत्पन्न Sy.
२. शोभनकर्मञ् शोभनप्रज्ञ वा Sy
३. यस्त्वं is suggested for भूयस्त्व
४. य ईदृशस्त्वं विश्वतः सर्वस्य स्थावरजङ्गमस्य जगतः Sy.
५. अभिमतोऽनुकूलोऽसि न पराङ्मुख इत्यर्थः Sy.
६. दर्शनीयः सर्वैः Sy.
७. रमयित्वा पार्थिवस्य वा P. रमणशीलो रमयिता वा भवसि सर्वस्य Sy.
८. सम्यग्दर्शने। यद्वा तव संदृष्टौ सत्या सर्वो जन. Sy.
९. तत्र दृष्टान्त । पितुमानिव। अतिप्रभूतान्नस्वामी यथा सर्वैर्वस्तव्यो गन्तव्यश्च भवति तद्वत् Sy.
१०. निवासवान्भवति Sy.
Ms. D. puts the figure ॥१४४॥ here to indicate the end of one hundred and fortyfourth hymn. No such number is given in P. and M.
११. गच्छति M. हे यजमानाः...यत्स्वर्गादिविषयं प्रष्टव्यमस्ति तत् Sy.
१२. तस्यैव प्रष्टव्यत्वेऽतिशयमाह...सर्वत्र गच्छति Sy.
१३ स देवेषु। गच्छति is missing in M.
१४. अत एव स वेद स च.. जानाति Sy.
१५. प्रष्टव्यम् Sy.
१६. संज्ञात्वैव M. स एव चेतनावान्। स विशेषज्ञ इत्यर्थः Sy.
१७ स एवेयते ज्ञेयसकाश गच्छति। पुनर्गतिरेव विशेष्यते. .सोऽग्निरेव नु क्षिप्रमीयते। यद्यजमानस्य ज्ञेयमस्ति तमर्थं ज्ञातु शीघ्रमेव गच्छतीत्यर्थः। यद्वा ज्ञानार्थमीयते सेव्यते तथा शीघ्रमनुसेव्यते। यस्मादयमुक्तरूपस्तस्मात्तमेव पृच्छतेत्यर्थः Sy
१८. तस्मिन् तस्मिन् D. तत्रापेक्षिता. कामाः सन्तीत्याह। तस्मिन्नग्नौ Sy.
१९. ०शास० M. प्रशासनानि नियमनसामर्थ्यानि सन्ति। असाध्यं नियम्यापि साधयितुं शक्त इत्यर्थः Sy
२०. तस्मिन्नेवाग्नौ...एष्टव्या भोगाः सर्वफलसाधका यागा वा सन्ति Sy.
२१. अग्निः Sy.
२२. बलस्य Sy.
२३. वाजस्यान्नस्य Sy.

च। शोषयितुः। स्वामी।

तमित्पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रमीत्।
न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदर्पितः ॥२॥

तमित्पृच्छन्ति। अग्निम्। एव। सर्वे पृच्छन्ति। स तु बन्धकोऽग्नि। न कञ्चन। पृच्छति। यथा मनुष्य। आत्मना ज्ञेयसमीपगतेनार्थं जानात्येवमग्निरेकत्रावस्थित एव। मनसा दूरस्थमपि। गृह्णाति। प्रज्ञावान्। यस्मादमावग्नि। स्ववचनात् पूर्वम्। उत्तर वा। परकीय वचनम्। न। सहते स्वयमेवासन्दिग्ध कथयतीत्यर्थ। दर्परहितश्चेत्। अग्ने। ज्ञानेन। सङ्गतो भवति मनुष्य।

तमिद्गच्छन्ति जुह्वस्तमर्वतीर्विश्वान्येकः शृणवद्वचांसि मे।
पुरुप्रैषस्तनूरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ॥३॥

तमिद् गच्छन्ति। तम्। एव। होतारं। गच्छन्ति। तमेव। शत्रुमत्य प्रजा। स

---

१. शोषयतु M. ०तु P. बलवतो राजादेरपि Sy. २ पतिः पालयिता दाता ...स्वामी। यस्मादयं महानुभावस्तस्मात्तमेव पृष्ट्वा पुरुषार्थं साधयतेति Sy.
३. VM. ignores स। सः। ईयते। तस्मिन्
४. पूर्वमन्त्रेऽग्नि पृच्छतेत्युक्तम्। अत्र तु सोऽनुनयेन प्रष्टव्य इत्याह—तमित् तमेवाग्निम् Sy. ५ सर्वजन Sy
६. ०ग्नि D. ७. स तु नान्य पृच्छति प्रश्नसमयेऽपि।...न विपृच्छति विपरीतं न पृच्छति Sy. ८. स्वेनेव मनसा। इवशब्द एवार्थे। स्वकीययैव बुद्धया Sy
९ यत्कार्यमग्नभीद् ववामीत्यादत्ते तवेव प्रतिब्रूते न तु प्रश्नानुकूलम्। स्वतन्त्रेश्वर इत्युक्तं भवति। यद्वा प्रष्टा धीमान्स्वेन मनसा वाचा वाच्यं विचार्य...यद्वाक्यं वक्तव्यत्वेन स्वीकुर्यात्तदेवाग्नि पृच्छति। न तु बहु भाषत इत्यर्थः Sy.
१०. पृष्टोऽपि धीरो धीमानयम् Sy.
११. परवाक्यासहात्वमाह। अयमग्निः...स्ववाक्यात्पूर्वभावि Sy. १२. तथा...स्वोक्त्यनन्तरभावि प्रतिवचनम् Sy.
१३. अथर० M. यस्मादयमेवंविधस्तस्मात्...अप्रदृप्तो यद्वा तेन शिक्षितोऽनुद्दण्डः सर्वो लोक Sy. १४. ०ग्ने P. अस्य महानुभावस्याग्ने Sy. १५. क्रतुना रक्षणादिकर्मणा Sy. १६. सङ्गच्छते। जीवतीत्यर्थः Sy. १७. ०च्याः P.
१८. VM. ignores वि। न
१९ पृच्छन्ति P
२०. अस्मदीया जुहूपभृदादयस्तमित् तमेवोद्दिश्याज्यपूर्णाः सत्यः ... यद्वा हूयन्त इति जुह्व आहुतयः सोमादिरूपाः। अथवा जुह्वादिषु स्थितान्याज्यान्यप्याश्रयाश्रयिणोरभेदेन जुह्व इत्युच्यन्ते 'मञ्चाः क्रोशन्ति' इतिवत्। ता अपि तमेव गच्छन्ति, अस्य सर्वदेवतात्मकत्वादत्रैवेतरदेवतार्थमपि हूयमानं चेति भावः... अग्नेः सर्वदेवतात्मकत्वं तैत्तिरीया आहुः। 'ते देवा बिभ्यतोऽग्नि प्राविशंस्तस्माद्बाहुरग्निः सर्वा देवताः' (TS. 6. 2. 2. 6.) इति Sy.
२१. प्रीणयितुम् Sy.
२२. प्राप्तिमत्यः स्तुतयः। ... तमेवाग्नि गच्छन्ति सर्वदेवतात्मकत्वादेव Sy.

एक[1] । सर्वाणि[2] । सूक्तानि[3] । शृणोतु[4] । मे[5] । बहुप्रैष[6] प्रैषाः स्तुतिविशेषा । तरणकुशलः[7] । साधयिता[8] यज्ञस्य । अविच्छिन्नरक्षण । शिशु[9] सन् । उद्युक्ताञ्छत्रून् । वधार्थं समादत्ते[10] ।

उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः ।
अभि श्वान्तं मृशते नान्द्यै मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ॥४॥

उपस्थायम्[11] । यद्यसौ[12] । केनचित्[13] सङ्गच्छते स तत । उपस्थायोपस्थाय[14] । चरति[15] काले काल उपतिष्ठते । तदानीमेव । जात[16] । तेजोभी[17] राक्षसान्योद्धुम् । छद्मना[18] चरति । अभि[19] अभि-पर्याय[20] । नन्दनसाधने यज्ञे । प्रजाना[21] मुदे[22] । तासा[23] श्रान्तिम्[24] । अभिमार्ष्टि[25] । यदि[26] । एनम्[27] । गच्छन्ति[28] । कामयमाना प्रजा समीप[29] । एकभूत[30] स्थितम्[31] ।

---

१ अयमग्निः Sy.
२. वचांसि स्तोत्ररूपाणि Sy
३. शृणोति Sy.
४. मदीयानि Sy.
५. कोऽस्य विशेष इत्युच्यते .. बहुप्रैषभाक् । यद्वा बहुप्रेषणः सर्वस्याज्ञापयितेत्यर्थः Sy
६. ०लाः P तारयिता Sy
७ यज्ञसाधकोऽन्यधीनत्वाद्यज्ञस्य Sy.
८ शिशुवत्प्रियकारी शोचयिता वा शत्रूणाम् Sy.
९. ०क्त P एवम्भूतोऽग्नि . यज्ञाविसरम्भवान्सन् Sy.
१०. आदत्ते हविरादिकं स्वीकरोति Sv.
११. यदाऽध्वर्युः Sy.
१२. समागच्छन मथनेनाविरभवत् Sv.
१३. Omitted by M
१४. उत्पत्त्यनुकूलव्यापारं करोति Sy
१५. अनुतिष्ठति Sy.
१६. उत्पन्नः सन् Sy.
१७. यौर्तुं सम्बद्धुं समर्थैः फलैमिश्रयितुम् । अर्हैस्तेजोभिर्वा युक्तः सन् Sy.
१८ छद्मना D अरण्योर्गूढः सञ्चचार । यद्वा युज्येभिरश्वैर्जातमात्र एव सर्वत्र सञ्चचार Sy
१९ त्वमि P. D. एवं प्रवृद्धोऽयम् . . . श्रान्तं शान्त वा यजमानम् Sy.
२०. ०वर्यमया P D
२१. नन्दनीये कर्मणि निमित्तभूते सति Sy
२२ ०ना P.
२३. तस्य सन्तोषाय Sy.
२४. तास P
२५. अभिमर्शन करोति । फलप्रदानेनेति भावः । यथा लोके गुर्वादि श्रान्त शिष्यादिक स्पृशति तद्वत् Sv.
२६ यदा Sy.
२७ अग्निम् Sy.
२८. प्राप्नुवन्ति तदाऽभिमृशते Sy.
२९. का(म)य० M. कामयमाना आज्यधारास्तुतयो वा Sy.
३०. ०पं M.
३१. ०तास्थि० M. व्याप्य वर्तमानम् Sy.

स ईं॑ मृ॒गो अप्यो॑ वन॒र्गुरु॑प॒ त्वच्यु॑पम॒स्यां॑ नि धा॑यि ।
व्य॑ग्रवीद्व॒युना॒ मर्त्ये॑भ्यो॒ऽग्निर्विद्वाँ ऋ॑त॒चिद्धि स॒त्यः ॥५॥

स ईं॑[1] मृ॒गः[2] । अ॒ग्नि[3] । य॒ज॒मा॒न॒म्[4] । मृ॒ग॒य॒ते[5] । उ॒द॒क॒हि॒न[6] । का॒ष्ठा॒नि[7] ग॒च्छ॒न्[8] । स॒मी॒प॒स्थाया[9] भूम्या[10] ब॒र्हि॒षि[11] । उ॒प॒धी॒य॒ते[12] च । वि[13] ब्र॒वी॒ति[14] च । ज्ञा॒ना॒नि[15] । म॒नु॒ष्ये॒भ्य॒[16] । अ॒ग्नि॒[17] । हि[18] । विद्वा॑न्[19] । ऋ॒त॒ज्ञ[20] । स॒त्य॒क॒र्मा[21] ।

I. 146.

त्रि॒मू॒र्धा॑नं स॒प्तर॑श्मिं गृणी॒षेऽन्नू॑नम॒ग्निं पि॒त्रोरु॒पस्थे॑ ।
नि॒षत्त॑मस्य॒ चर॑तो ध्रु॒वस्य॒ विश्वा॑ दि॒वो रो॑च॒नाप॑प्रि॒वांस॑म् ॥१॥

त्रि॒मू॒र्धा॑न॒म्[22] । अग्निवायुसूर्यात्मकत्वाद् गार्हपत्यादिभेदाद्वा त्रिमूर्धानमाथर्वणिकं[23]

---

१. ई P D M
२. स एवाग्नि॰ Sy.
३. मृगो मार्जयिताऽन्वेषणशीलो वा Sy. मृगो माष्टेर्गतिकर्मण. N. I 20
४. उभक॰ M आप्यो गन्तव्यः । अप. कर्म तत्र साधुर्वा Sy.
५. वनगामी । ऋच्छतेर्गमेश्चैव रूपम् । यद्वा गमेरेव Sy.
६. ओषध्यादिभिराच्छादिताया वेद्याम् Sy. VM. seems to explain उपमस्यां as समीपस्थायाम् । भूम्यां बर्हिषि may be taken either an explanation of त्वचि (lit. on the skin, or seat) or in apposition to समीपस्थायाम्. In the latter case, त्वचि will be left unexplained.
७. उपमायामुपमास्पदायाम् Sy.
८. विशेषेण ब्रवीत्युपदिशति Sy.
९. ज्ञाति P. प्रज्ञानान्यनुष्ठेयज्ञानानि । वयुनमिति प्रज्ञानाम । 'वयुनमभिख्या' (Ngh. 3.9.) इति तन्नामसु पाठात् Sy.
१०. मरणधर्मभ्यो यजमानादिरूपेभ्यः Sy.
११. ईदृक्सामर्थ्यमस्तीति दर्शयति । अयमग्निः Sy.
१२. हिशब्दः प्रसिद्धौ Sy.
१३. सर्वज्ञ॰ Sy.
१४. यज्ञस्योदकस्य वा चेतिता ज्ञाता Sy.
१५. सत् क्रियमाणं कर्म । तत्र साधु । सत्सु भवो वा । सत्फलं तदर्हतीति वा । सम्यक्फलप्रद इत्यर्थः । यस्मादयमुक्तसामर्थ्योपेतस्तस्मात् प्रज्ञोपदेशो युक्तः Sy.
१६. VM ignores नि Ms D. puts the figure ॥१४५॥ here to indicate the end of one hundred and fortyfifth hymn. No such number is given in P. and M.
१७. अनयाऽग्निर्यज्ञरूपेण स्तूयते । त्रिमूर्धानं सवनत्रयरूपमूर्धत्रयोपेतम् Sy.
१८. ०कं D.

काली कराली च करालजिह्वत्यधीतै । सप्तभी[1] रश्मिभिर्युक्तम्[2] । स्तुहि[3] । द्यावापृथिव्योः । उत्सङ्गे वर्तमानम् । परिपूर्णम्[4] । अग्ने[5] । निषदनम्[6] । स्थावरजङ्गमयोरभ्युदयाय भवति तम्[7] । विश्वानि[8] । दिव[9] । नक्षत्राणि[10] । स्वतेजसा पूरयन्त[11] स्तुहि[12,13] ।

उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥२॥

उक्षा[14] महान्[15] । सेक्ता । महान् । द्यावापृथिव्यौ । अभिवहसि[16] । जरारहित[17] । तिष्ठति[18] । अभिमुखरक्षण[19] । दर्शनीय[20] । भूम्या[21] उत्थित[22] । उत्तरवेद्याम्[23] । पादम्[24] । निधत्ते । लिहन्ति च ।

---

१ सप्तभी P. नियामकसप्तच्छन्दोयुक्तम् Sy. २. ०क्ता P ३. गृणीहि स्तुहि Sy. ४. अविकल सम्पूर्णफलम् Sy. ५. अग्निसाध्यमङ्गनादिगुणयुक्तं वा Sy. अग्निम् is suggested for अग्ने ६. निषण्णम् । मध्ये वर्तमानमित्यर्थः । भूमिस्थद्रव्येण द्युलोकस्थदेवताभिश्च साध्यत्वादिति यावत् Sy. ७. ध्रुवस्य निश्चलस्य । चरतो हविर्भक्षयतोऽस्याग्ने. सम्बन्धिनं यज्ञम् Sy. ८. सर्वाणि Sy. ९. देवः M. द्युलोकादागतानि Sy. १० देवविमानानि Sy. ११. सर्वतः पूरयितारम् Sy. १२. यद्वाऽयमग्निरेवोच्यते । त्रिमूर्धवदत्र क्षित्यन्तरिक्षद्युलोकाख्यस्थानत्रयोपेतं, लोकत्रयव्याप्तमित्यर्थः । गार्हपत्यादिस्थानत्रयवर्तिनं वा। सप्तरश्मिं सप्तज्वालम् । अनूनमन्यूनम् । पित्रोर्द्यावापृथिव्योरुपस्थ उत्सङ्गे निषत्तम् . . . निषण्णम् । आप्रिवांसं सर्वतः पूरयन्तं कामानामुक्तलक्षणविशिष्टमग्निं गृणीषे गृणीहि स्तुहि। किञ्च चरतः सर्वत्र ज्वालाभिर्गच्छतो ध्रुवस्य धृतत्वादविचलितस्य विवो द्योतमानस्यास्याग्नेर्विश्वा सर्वाणि रोचना रोचमानानि तेजांसि सर्वत्र व्याप्नुवन्तीति शेषः। ईदृशमग्निं स्तुहीत्यन्तरात्मनः प्रेषः Sy. १३. VM. ignores अस्य १४. सक्ता P. सेक्ता फलप्रदानसमर्थ इत्यर्थः Sy १५. महा P. अत एव महान् महिम्ना स्वरूपेणोद्वृत्तवृषभसदृशोऽयमग्निः Sy. १६. ०थिव्या भविष्टति P. अभि, अभिकम्य व्याप्य ववक्षे वहति व्याप्नोतीत्यर्थः । . . . वृष्टयादिप्रदानेन हविर्वहनेन च लोकद्वयस्य वासिनो देवान्मनुष्यांश्च रक्षतीत्यर्थः Sy. VM. explains ववक्षे by अभिवहसि but ववक्षे can be either 3rd pers. sing. or 1st pers sing. Ā red. perf. of √ वक्ष् 'to increase'. Sy. derives it from √ वह् but he also construes it as 3rd. pers. sing. १७. स्थितो वर्तते । यद्वोक्तगुणो ज्यमित ऊतिरित एव गमनवानस्मद्देवयजनाभिमुखगमनवांस्तस्थौ वर्तते Sy. १८. ० खे र ० D. प्राप्तरक्षणः सन् Sy. १९. महान्पूज्यः । महन्नामैतत् । 'ऋष्व उक्षः' (Ngh. 3.3.)इति तन्नामसु पाठात् Sy. २०. विस्तृताया भूम्याः Sy. २१. भूम्या. . .उच्छ्रितः M. २२. सानौ समुच्छ्रिते प्रदेशे वेदिलक्षणे Sy. २३. पदानि Sy. २४. स्थापयति । करोति Sy.

अस्य[1]। आरोचमाना[2] रश्मयः। उदकायतन[3] दिवम्।

समानं वत्सम्भि संचरन्ती विष्वग्धेनू वि चरतः सुमेके[4]।
अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने ॥३॥

समानं[5] वत्सम्[6]। समानम्[7]। वत्सम्[8]। अभि[9]। सञ्चरन्ती[10]। अहोरात्रे[11]। शोभमाने[12]। विष्वक्[13]। विचरत[14]। अपवर्जितुमशक्यान्[15]। दीर्घान्[16] मार्गान्[17]। गमनेन[18] परिच्छिन्दती[19]। विश्वान्[20]। आवासान्[21]। प्रति[22]। तेज[23]। दधाने[24]।

धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम्[25]।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत्सूर्यो नॄन् ॥४॥

धीरासः[26]। धीरा अग्निम्[27]। स्थानम्[28]। नयन्ति[29]। कवय[30]। त्रिषु स्थानेषु[31]। हृदयेनैव[32]।

---

१. अग्नेः Sy.
२. अरुषा आरोचनाः Sy.
३. ऊधःस्थानीयमन्तरिक्षं रिहन्ति लिहन्ति। यद्वाऽस्योध ऊधःस्थानीय यज्ञमरुषास आरोचना ब्रह्मवर्चसेन यजमाना रिहन्ति, अभिमतस्वर्गादीनि लिहन्ति Sy.
४. ०नP.
५. एकमेव Sy.
६. वत्सस्थानीयं पुत्रवद्धर्षहेतुमग्निम् Sy
७. समानम्। वत्सम्। अभि। is missing in M. अभिमुखम् Sy.
८. सञ्चरन्त्यौ Sy.
९. द्वे धेनू अग्निहितकरणेन प्रीणयित्र्यौ पत्नीयजमानलक्षणे धेनू Sy.
१०. कीदृश्यौ ते?... शोभनकर्माणौ शोभनमेहने वा परिचरणकुशले इत्यर्थः Sy.
११. सञ्चरतः। स्तनपानाविसदृशेन्धनप्रक्षेपसम्मार्जनाविना सम्यग्वर्धयत इत्यर्थः Sy.
१२. अपवर्जनीयरहितान् Sy.
१३. ०र्गा P. अग्नेः प्रान्तप्रदेशान्केशाश्रमेध्यरहितान् Sy.
१४. निचरतोऽप. . .गमनेन M.
१५. ०न्वति P सम्पादयित्र्यौ Sy.
१६. सर्वाणि Sy.
१७. आवासा D प्रज्ञानानि प्रवर्धनविषयाणि Sy.
१८. अधि, अधिकम् Sy.
१९. महान्ति Sy.
२०. धारयन्त्यौ। ईदृश्यावध्वर्युयजमानरूपे जायापतिरूपे वा धेनू विष्वगिवचरतः Sy.
२१. धीमन्तः प्रयोगज्ञा अध्वर्व्वादयः Sy.
२२. ०गिन P.
२३. स्थानं वेदिलक्षणम् Sy.
२४. प्रापयन्ति मथनदेशाद् गार्हपत्याद्वा। अथवा वक्ष्यमाणलक्षणा यजमानादयः पदमास्पदं सर्वकामानामास्पदमेनं गमयन्ति Sy.
२५. कीदृशास्ते?...क्रान्तदर्शिनो मेधाविनोऽनूचाना वा। 'ये वाऽनूचानास्ते कवयः' (AB. 2. 2.) इति श्रुतेः Sy.
२६. बहुप्रकारया Sy.
२७. बुद्धया Sy.

जरावर्जितमग्निम्[1]। रक्षमाणा[2]। सम्भक्तुमिच्छन्तश्चाग्नेर्धनस्य[3]। स्यन्दनम्[4]। परितः पश्यन्ति[5]। अग्निं परिचरद्भ्य[6]। सूर्योऽपि[7]। नेतॄन्[8] रश्मीन्। आविर्भवियति[9]।

दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे।
पुरुत्रा यदभवत्सूरहभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥५॥

विदृक्षेण्यः[10]। दर्शनीय[11]। दिक्षु। परित[12]। जनयितव्य[13]। स्तोतव्य[14]। महत[15] पितु[16]। बालजीवनार्थम्[17]। यस्मादयम्। पुरूणि[18] धनानि। धनवान्[19]। विश्वस्य दर्शनीय[20]। एभ्य। गर्भेभ्य। जीवनाय सू[21][22][23][24]। एव। भवति।

I 147

कथा ते अग्ने शुचयन्त आयोर्दाशुर्वाजेभिराशुषाणाः।
उभे यत्तोके तनये दधाना ऋतस्य सामन्त्रणयन्त देवाः ॥१॥

कथा ते अग्ने। कथम्[25]। ते[26]। अग्ने। दीप्यमाना[27]। गन्तु[28]। प्रयच्छन्ति[29]। अन्नं[30] सह।

---

१. अजर्यमजीर्णमेनमग्निम् Sy.
२. धारयमाणाः Sy.
३. एवंरूपास्ते...स्यन्दमान यज्ञद्वारा फलानि स्रवन्तम् Sy.
४. ०ग्ने...प० M शुश्रूषन्त इत्यर्थः Sv.
५ एभ्य एवं कुर्वद्भ्य. Sy.
६. सर्वस्य प्रसवित्राऽयमग्निः Sy.
७. ० वि P ८. नृभ्यो नेतृभ्यः।.. नृनित्यत्र वचनव्यत्ययः। नृन्प्राणिनोऽनुग्रहीतुमिति वा योज्यम् Sy.
९. ०श्मीन वि० P. ०श्मोनां वि० M तेषामनुग्रहेण प्रत्यक्षोऽभवत् Sy.
१०. अनुग्रहयुक्त्या दर्शनयुक्तो भवति। यद्वा द्रष्टुमेष्टव्यो दर्शनेच्छाविषयभूत Sy.
११. परस्परं क्रान्त्वा वर्तमानासु दशसु दिक्षु Sy. १२ अत एव...सर्वत्र प्रादुर्भवनशीलो भवति जयशीलो वा Sy.
१३. प्रधानसमये...स्तुत्यो भवति Sy.
१४. किमर्थमेवम्।...महतो देवादेः Sy.
१५. अर्भकस्याल्पस्य यजमानादेर्वा जीवसे जीवनाय। हविर्वहनेन धनप्रदानेनेति विवेकः Sy.
१६. यस्मात्खलु Sv. १७. बहुषु देशेषु Sy.
१८. हविर्लक्षणान्नवान् Sv.
१९ सर्वविषयद्रष्टव्यवानयमग्निः Sy.
२०. षष्ठ्यर्थे चतुर्थी। एषामुत्त्विजां गर्भवच्छिशुवदत्यन्तरक्षणीयानाम् Sy.
२१ प्रसविता, उत्पादयिता Sy.
२२ P reads आरे and D.M. सूरे for सूः। एव।
२३ भवति। तस्मात्स्नाना हुवा रक्षमाणाः कवय. पद नयन्तीति पूर्वत्र सम्बन्धः Sy.
२४. Ms D. puts the figure ॥१४६॥ here to indicate the end of one hundred and fortysixth hymn. No such number is given in P. and M.
२५. केनोपायेन Sy.
२६. तव सम्बन्धिनो रश्मयः Sy.
२७. दीप्ति सर्वत्र चक्षाणाः प्रकटयन्तः Sy.
२८. आयुरायुष्यम्। कर्मणि षष्ठी Sy.
२९. ददति। दाभृ दाने। छान्दसो लिट्। तमुपायमनुगृह्णाज्येत्यर्थः Sy.
३०. ईदृशा रश्मयः...अन्नैः सहितम् Sy.

अश्नुवानाः। देवा॑। यदा। पुत्रे स्वयि। तोकमूते। द्यावापृथिवी। निदधानाः। सत्यस्य तव। स्तोत्रे। रमन्तः।

बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः।
पीपर्ति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥२॥

बोधा मे। बुध्यस्व। अग्ने। मम। इदम्। स्तोत्रम्। युवतम। पूज्यतमम्। सम्भृतम्। अग्नवन्। त्वामयजमान कश्चित्। हिनस्ति। यजमान। त्वाम-

---

१ आशु शीघ्रं सम्भक्तार आशून्सम्भक्तारो वा। वाय्वादेरपि शीघ्र सम्भक्तार इत्यर्थः। यद्वा समन्ताच्छोषयितारः। यद्वा सर्वं व्याप्नुवन्तः Sy. २. व्यवहर्तारो यजमानाः Sy. ३. यस्मात् Sy

४. अनवच्छेदेन कुटुम्बस्य विस्तारके। यद्वा तोके पुत्रे तनये तत्पुत्रादौ च Sy.

५. पुत्रे Sy. ६. उक्ते अन्नायुषी Sy.

७. धारयन्तः Sy.

८. यज्ञस्य सम्बन्धिनि Sy ९. त P D.

१०. स्तोत्रो P. D साम्नि रथन्तरादौ Sy.

११. रमन्ते रमयन्ति शब्दयन्त्येव वा। यस्माद्यज्ञायुष्पुत्रादिसहिताः सोमेनेष्ट्वा साम्नि रमन्ते तस्माद् रश्मयो ददतीत्यवगम्यत इत्यर्थ.। तादृशांस्त्वदीयान्रश्मीन्मामप्यनुगृह्णातेत्यर्थः Sy. VM. explains रणयन्त as रमन्तः which is not correct. रणयन्त is imf. inj. Ā. 3rd per. pl of the caus. of √ रण् 'to rejoice.' Sy. construes it in the present tense. १२. तडागादागत्यानामिकया गृहीतं भस्म तूष्णीमुखायां प्रास्य बोधा म इति द्वयृचेनोख्याग्निमुपतिष्ठते... बुध्यस्वाभिप्रायमिति शेषः। यद्वा कर्मणि षष्ठी। मद्वचनं जानीहीत्यर्थः Mah. स्तुतो भवेत्यर्थः Sy. प्रास्योखायामुपतिष्ठते बोधा म इति द्वाभ्यां त्रिष्टुब्गायत्रीभ्याम्। .. बुध्यस्व U.

१३ मम Mah. मदीयस्य Sy. मम U

१४ इदानीं क्रियमाणस्य Sy.

१५. स्तुतिरूपस्य वचनस्य। कर्मणि षष्ठी। उक्तलक्षणं वचः Sy.

१६. मिश्रयितृतम, अथवा युवतम U.

१७. ०तम D. M किम्भूतस्य। भूयिष्ठस्य वचसो मंहिष्ठस्य भूयिष्ठस्यातिशयेन बहु महिष्ठं तस्य Mah. अतिशयेन पूजनीयस्य Sv. भूयिष्ठस्य U.

१८. प्रहृतस्य श्रोत्रपथं प्रापितस्य। आदरोक्तस्येत्यर्थ Mah. प्रकर्षेण सम्पादितस्य Sv. श्रोत्रपथं प्रापितस्य U.

१९. स्वधाऽन्नमस्यास्तीति स्वधावांस्तत्सम्बोधने स्वधावः Mah. हविर्लक्षणान्नेन तद्वन्नग्ने Sy. हे स्वधावोऽग्नवन् U

२० ०ना: P. २१. त्वशब्द एकशब्दार्थः सर्वादिः.. त्व एकः पुरुषः Mah अत्र यास्कः 'त्वो नेम इत्यर्थस्य' (N. 3.20.) इत्युक्त्वैतदेवोदाजहार। एको जनः Sy. एकः पुरुषः U.

२२. पीयतिराक्रोशतिकर्मा।... पीयति, आक्रोशति निन्दति Mah. वधकर्मैतत्। हिनस्ति। यज्ञादिना न पूजयतीत्यर्थः Sy. आक्रोशतिकर्मा। आक्रोशति ...त्वाम् U. २३. एकस्त्वाम् Mah. एकः Sy. एकः पुरुषः U.

नुस्तौति। तत्राह त्वा वन्दनकुशल.। तव। तनूम्। स्तौमि।

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन्।
ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥३॥

ये पायवः। ये। रक्षमय। ते। ममताया पुत्रम्। बृहस्पतिशापादन्धीभूत मामू। पश्यन्त। उपद्रवात्। चक्षु प्रदानेन पुराऽरक्षन्। अथ परोक्ष —तानधुनापि। शोभनस्य कर्तृन्। विश्ववधनो-

---

१. त्वां स्तौति। कश्चित् स्तौति कश्चिन्निन्दतीति लोकस्वभावः Mah. अनुकूलमुच्चारयति Sy. स्तौति।...एष लोकस्य स्वभावः कश्चिद्वाक्रोशति कश्चित् स्तौतीति U.

२. एवं सति Mah. तयोर्मध्ये Sy. एवं च सति U.

३. कीदृशोऽहम्। वन्दारुर्वन्दनशील। 'शृवन्द्योरारुः' (P. 3 2 173.) इत्यारु प्रत्ययः शीलार्थं Mah. वन्दनशीलोऽहम् Sy. वन्दनशीलः सन् U

४. तनुं P M. शरीरम् Mah तनु तव मूर्तिम् Sy. शरीरम् U.

५ स्तौमि नमामि च 'वदि अभिवादनस्तुत्यो' (I. 11) Mah स्तौमि Sy वन्दे U

६. This stanza is borrowed by YV. 12.42.

७. वायवः P

८. अत्रेतिहासमाचक्षते। उचथ्यबृहस्पतिनामानौ द्वौ ऋषी आस्ताम्। तत्रोचथ्यस्य ममता नाम भार्या, सा च गर्भिणी। तां बृहस्पतिर्गृहीत्वाऽरमयत्। शुक्रनिर्गमनावसरे प्राप्ते गर्भस्थं रेतः प्रावादीद्धे मुने रेतो मा त्याक्षीः पूर्वमहं वसामि, रेतःसङ्कुरं मा कार्षीरिति। एवमुक्तो बृहस्पतिर्बलात् प्रतिरुद्धरेतस्कः सञ्छशाप। हे गर्भ त्व यतो रेतोनिरोधमकरोरतस्त्वं दीर्घं तमः प्राप्नुहि। जात्यन्धो भवेति। एवं शप्तो ममताया दीर्घतमा अजायत। स चोत्पन्नस्तमोव्यथयाऽग्निमस्तौषीत्। स च स्तुत्या प्रीत आन्ध्यं पर्यहरदिति। तदिदमत्रोच्यते Sy.

९ प्रसिद्धाः पालयितारो रश्मयः Sy.

१०. तव सम्बन्धिन. Sy.

११. पुत्रा P. ममतायाः पुत्रं दीर्घतमसम् Sy. ममता नाम काचिद्वृषिपत्नी तस्या अपत्यम् BB

१२. चक्षुर्हीनम् BB

१३ अन्धोऽयमतोऽस्माभी रक्षणीय इत्यवगच्छन्त. सन्तः Sy.

१४ दुष्ट प्राप्नाद् दु.खात् Sy. इवभ्रपतनलक्षणात्। दुरितशब्दः प्रबुद्धाविर्द्रष्टव्यः BB १५. ०प्रसादनेन P.

१६ प्रकाशप्रदानेन दुरितहीनमकुर्वन् BB.

१७. यान० M रश्मीन् BB.

१८. सुखकर्तॄन् Sy. तथा शोभनं कर्म कृतवत. BB.

१९. विश्वप्रज्ञः Sy. त्वं विश्वस्य वेदयिता। 'गतिकारकयोरपि' (Cf. गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च Unādi 676) इत्यसुन्। विश्वानि वेदांसि वा यस्य तादृशो भवान् BB.

ऽग्नि.। रक्षति[1] ततश्च मामिदानीम्[2]। दम्भितुमिच्छन्त[3]। एव[4]। शत्रव[5]। न[6]। एव[7]। देभु[8]।

यो नो अग्ने।

शौनक :—

द्वावुचथ्यबृहस्पती ऋषिपुत्रौ बभूवतु ।
आसीदुचथ्यभार्या तु ममता नाम भार्गवी ॥
तां यवीयान् बृहस्पतिर्मैथुनायोपचक्रमे ।
शुक्रस्योत्सर्गकाले[9] तु गर्भस्तं[10] प्रत्यभाषत ॥
इहास्मिन्[11] पूर्वसम्भूते न कार्यं शुक्रसङ्कर[12] ।
न शुक्रप्रतिषेधं[13] तु न ममर्ष बृहस्पति ॥
स व्याजहार त गर्भं तमस्ते दीर्घमस्त्विति ।
स च दीर्घतमा नाम बभूवौरुचथ्यज[14] ॥ इति ॥

यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥४॥

यो नो अग्ने[15]। य[16]। अस्मान्[17]। अग्ने[18]। अदाना[19]। अघमिच्छन्[20]। अरातित्ववाञ्छत्रु[21]। अदा-

---

१. ०तु M रक्षति। अस्मत्पालनायेति भाव.। तैरस्मानपि रक्षिष्यतीत्यर्थं Sy. रक्षतेः परोक्षे लिट्। आदरेण परिगृह्य पालयेति। 'छन्दसि लुङ्लङ्लिटः' (Pa 3.4.6.) इति लिट्। परोक्ष एव ररक्ष विशेषेण परिजग्राहेत्यर्थः BB

२. एवं रक्षितानस्मान् Sy.

३ परिभवितुमिच्छन्तः। दम्भेस्सनि 'सनीवन्तर्ध०' (Pa. 7.2.49.) इतीडागमः। 'दम्भ इच्च' (Pa. 7.4.56.) इतीकारः। भषभावश्छान्दसः। दम्भेर्हलग्रहणस्य जातिवाचकत्वात् 'हलन्ताच्च' (Pa. 1.2.10.) इति सनः किस्वम् BB.

४. ०स्तं P.

५. कामादयः Sy. राक्षसादयः BB.

६. अहेति विनिग्रहार्थीयः। न खलु Sy.

७. दम्भितुं शक्नुवन्ति ... यद्वा सूक्तद्रष्टा दीर्घतमा स्वयमेवात्मान परोक्षतया ब्रवीति Sy. न परिबभूवुः। ततः प्रभृति तथा ररक्षेति। 'दम्भेश्च' (Vār) इति वक्तव्यम् इति लिटः कित्त्वादुपधालोपः। दभिः प्रकृत्यन्तरं वा BB.

८. VM. ignores अग्ने।
This Stanza is borrowed by TS. 1 2.14.5.

९ ०क्ल० P. D. M. १० ०स्तां D.

११. इहास्मि पूर्वसंभूतो BD.

१२. ०क्ल० P.D.M

१३. तच्छक० BD. ०क्ल० P D. M.

१४. BD. IV. 11-14. १५. शत्रुः Sy.

१६. ०स्माद् P.D.M. युष्मद्रक्षितान् Sy.

१७. अस्मद्दानप्रतिबन्धक इत्यर्थः Sy.

१८. ०तारमि० P. मारणादिरूपपापेच्छावान् Sy.

१९. स्वयमदानवान् ... शत्रुत्वमाचरन् Sy.

नेनाघेच्छया च। बाधते। अस्मै। मदीय सोऽयम्। मन्त्र। पुन.। गुरु.। भवतु। स मदीयैर्दुरुक्तैः। शरीरम्। अनुलिम्पतु गरिमा गुरुरिति।

उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरितायं धायीः ॥५॥

उत वा यः। अपि। च। सहसि भव। य। प्रकर्षेण जानन्। मर्त। मर्तम्। बाधते। पूर्वोक्तेन द्वयेन। अस्मात्। रक्ष। स्तूयमान। स्तुवन्तम्। अग्ने। मा। अस्मान्। दुरिताय। स्थापय।

---

१. ०द्य० P. मानसवाचिकभेदेन द्विविधेन मन्त्रेण। न ददामीति मानसो मन्त्र., निन्दाद्यारोपेण दाननिवारणं वाचिको मन्त्र.। यद्वा मायाहेतुकेन विरुद्धरूपेण द्विविधेन मन्त्रेण। यो विरुद्धमाचरति तन्न सङ्कीर्तयति यच्च प्रियं ब्रूते तन्न करोति, अन्यत्करोत्यन्यद्ब्रवतीत्येवं मन्त्रस्वरूपद्वैविध्यम्। पूर्वं मानसवाचिकभेदेनेदानीं वाचिककायिकभेदेनेति विवेकः Sy.

२. ईदृशेन मन्त्रेण यः शत्रुमर्चयति भर्त्सयति विधेयीकरोति वाऽस्मान् Sy.

३. तस्मै D.

४. ०यं M

५. ०यमन्तः P.D

६. मन्त्रैकदेशो मानसरूपः Sy.

७. पुनः पुनः M.

८. षष्ठ्यर्थे चतुर्थी। प्रयोक्तुरेव पुनर्गरितास्तु Sy.

९. ०यैरुक्तैःP.D. दुर्वाक्यैर्निन्दारूपैर्वाचिकै. Sy.

१०. स्वकीयां तनुम् Sy.

११. अलि० P. अनुमार्ष्टु, अनुक्रमेण लुम्पतु। यद्वा स द्विविधो मन्त्रोऽस्मै प्रयोक्त्र एव गुरुर्गरितास्तु। अन्यान्यप्यस्मन्यक्काराय प्रयुक्तानि निष्ठुरभाषणानि सन्ति। तैर्दुरुक्तैः सोऽराति. स्वतनुमेवावलुम्पतु। स्वात्मानमेवावृत्य वहत्वित्यर्थः Sy.

१२. गायिता गु (रु)रिति M.

१३ पूर्वमन्त्रे द्विविधकुटिलमन्त्रेण कर्तारं तन्मन्त्रणं प्राप्नोतु मा, अस्मानित्युक्तम्। अत्र तु तन्मन्त्रणात्पाहीत्यग्निः प्रार्थ्यते Sy.

१४ ०सी P. सह इति बलनाम। तत्र भवाग्ने! Sy.

१५ मायामन्त्रण प्रकर्षेण जानन् Sy.

१६ मर्त M मरणधर्मा मनुष्यः Sy.

१७ मर्त M. मनुष्यम् Sy.

१८. विधेयीकरोति भर्त्सयति वा Sy.

१९ पूर्वोक्तरीत्या Sy.

२० द्विविधमन्त्रेण Sy.

२१ अस्मान् M तादृशाद् भर्त्सनात् तत्कर्तुः सकाशाद्वा Sy.

२२. स्तुतिं कुर्वन्तम् Sy.

२३. तत्कृताय दुर्मन्त्रणप्रयुक्तदुःखाय समर्थम् Sy.

२४. मा स्थापय। दुरितभाजनं मा कार्षीरित्यर्थः Sy.

२५. Ms. D. puts the figure ॥१४७॥ here to indicate the end of one hundred and fortyseventh hymn. No such number is given in P. and M.

I.148.

मथीद॑दी॒ विष्टो मा॑त॒रिश्वा॒ होता॑रं वि॒श्वाप्सुं॑ वि॒श्वदे॑व्यम् ।
नि यं द॒धुर्म॑नु॒ष्यासु॒ विक्षु॒ स्व१॒॑र्णं चि॒त्रं व॑पु॒षे वि॒भाव॑म् ॥१॥

मथीद्यदीम् । बलादाजहार । यदा । एनम् । एनस्यावाममनुप्रविष्ट । वायुः । होतारम् । विश्वरूपम् । विश्वदेवहितम् । य च मातरिश्वनाहृत तदा । मनोरपत्यभूतासु । प्रजासु । भृगवो निदधु । आदित्यम् । इव । चित्ररूपम् । सर्वरूपस्य प्रकाशार्थम् । दीप्तमुत्तरत्र सम्बन्ध ।

द॒दा॒नमि॑त्ते॒ ददभन्त॒ मन्मा॒ग्निर्वरू॑थं॒ मम॒ तस्य॑ चाकन् ।
जु॒षन्त॒ विश्वा॒न्यस्य॒ कर्मो॑पस्तु॒तिं भर॑माणस्य॒ का॒रोः ॥२॥

ददानमित् । हवि प्रयच्छन्तम् । एव । शत्रूणा मननानि । न । हिंसन्ति । ममापि ।

---

१. मथिष्यती P
२. बा० P.
३. भ्रमयन्तात् प्रावधंयदित्यर्थः Sy
४. यम् Sy.
५. अग्निम् Sy.
६. ० मस्यावा० P
७ काष्ठेष्वन्तःप्रविष्टः सन् Sy
८. वृष्टयादिनिर्मात्रन्तरिक्षवसनो वायुः Sy
९. देवानामाह्वातारम् Sy
१० अप्स्विति रूपनाम । नानारूप पार्थिववैद्युतजाठरादिभेदेनाहवनीयादिभेदेन वा । यद्वा कालीकरालयादिरूपेण ज्वालाना वैरूप्यादिदवरूपत्वम् Sy.
११. सर्वदेवयोग्यक्रियासाधुम् Sy
१२. ०वृतं M. ०हुतवन् P.
१३. तदानीं M.
१४. पुनः स एव विशेष्यते . . . मत्वा कर्म कुर्वतीषु । . . . मनुष्यशब्दो निरुक्ते बहुधा निरुक्तः Sy. मनुष्याः कस्मात् ? मत्वा कर्माणि सीव्यन्ति मनस्यमानेन सृष्टाः । . . . मनोरपत्यं मनुवो वा N.3.7.
१५. ऋत्विग्रूपासु प्रजासु Sy.
१६ भगव· P यजमाना. Sy.
१७ धारयन्ति । . . यद्वा पूर्वं देवा मनुष्यासु मनोरपत्यभूतासु विक्षु प्रजासु प्राणिषु वपुषे स्वरूपाय यागादिस्वरूपप्रकाशाय शरीरधारणाय वा जाठराग्निरूपेण निदधु. स्थापितवन्तः Sy.
१८. तत्र दृष्टान्त । स्वर्णं स्वरणं स्वीरणं वाऽऽदित्यमिव Sy स्वरादित्यो भवति । सु अरणः । सु ईरणः । स्वृतो रसान्त्स्वृतो भास ज्योतिषां स्वृतो भासेति वा N.2 14
१९. चायनीयम् Sy
२०. वपुषे यज्ञशरीरसिद्धये Sy.
२१. विविधप्रकाशनवन्तं यथा प्रकाशादिसाधनाय धारयन्ति तद्वत् Sy.
२२. ईदृशं यं निदधुस्तं मथीदिति पूर्वत्रान्वयः Sy.
२३. मननीयं स्तोत्रं हविरादिकं वा Sy.
२४. अग्नये कुर्वाणमेव माम् Sy.
२५. दम्भितारो वैरिणः Sy.
२६. हिनस्ति D. M. दम्भितुं हिंसितुं न प्रभवन्ति Sy.

तस्मै[1] प्रयच्छत । सोऽग्नि । कवचम्[2] । कामयतु[3] । अमेवन्त[4] । विश्वानि भूतानि । अस्य[5] । स्तुतिकर्म । अग्नेरुपस्तवम्[6] । कुर्वत[7] । स्तोतु. ।

नित्यं चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः ।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥३॥

नित्यं[8] चिन्नु । गार्हपत्ये[9] । यम्[10] । कृण्वन्ति[11] य च । यज्ञसम्पादिन. । स्तुतिभि[12] । धार-यन्ति[13] । त सुष्ठु । आहवनीयायतने[14] । प्रणयन्ति[15] । यज्ञार्थम् । परिगृह्णन्त[16] । अश्वा. । इव । रथसम्बन्धिन[17] । वेग कुर्वन्त[18] प्रणयनार्थम्[19] ।

पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥४॥

पुरूणि[20] दस्म. । बहूनि काष्ठानि[21] । दर्शनीय[22] । जम्भै[23] । विनाशयति[24] । अनन्तर[25] च ।

---

१. ०त P. D. मम कोऽतिशय इत्युच्यते । तस्य तादृशस्य प्रदातुर्मम Sv.
२. वरणीयं स्तोत्रादिकम् Sy.
३. कम० P. D अत्यर्थं कामयते । कनति कान्तिकर्मा । . . यस्मादेव तस्माच्च दभ्नुवन्तीत्यर्थ· Sy
४. जुवन्त सर्वे देवाः । अतो न दवभन्तेत्यर्थ· Sy.
५. M. adds च after विश्वानि । सर्वाणि हविष्प्रदानादिरूपाणि Sy
६. अस्य यजमानस्य मम Sy.
७. न केवलमग्निरेव कामयते किन्तु सर्वे देवाः कामयन्त इत्याह . . भरमाणस्य कुर्वाणस्य Sy.
८. नित्य एव गार्हपत्यलक्षणेऽग्न्यासादनस्थाने । . . . 'नित्यं गतश्रियो ध्रियते नित्यं गार्हपत्यम्' । इति सूत्राद् गार्हपत्यो नित्यः । तदाश्रयत्वात्मदनमपि नित्यमुच्यते Sy.
९. मथनेनोत्पन्नमग्निम् Sy.
१०. नु क्षिप्रं जगृभ्रे गृह्णन्ति Sy.
११ सवा० P M. यज्ञयोग्या यजमाना ऋत्विजो वा Sy.
१२. गृहीत्वा प्रशस्तिभिः प्रशंसाभिः स्तुतिभि. Sv.
१३ धारयन्त्याहवनीयार्थम् Sy.
१४ ०यतेन D. धृत्वा च, इष्टावेषणसाधने यज्ञे निमित्तभूते सति Sy.
१५. सुष्ठु प्रणयन्ति Sy.
१६ ऋत्विजः Sy.
१७. रथवन्तस्तत्र नियुक्ताः । . . .ते यथा धृत्वा रथस्वामिनमभिमतदेशं नयन्ति तद्वत् Sy.
१८ रंहसा गच्छन्तः Sy.
१९. VM. ignores चित् । नु
२०. ०स्म M. अत्र दावाग्निरूपेणायं स्तूयते Sy.
२१. वृक्षादीनि Sy.
२२. उपक्षपयिताऽग्न्यग्निः Sy.
२३. दम्भैः M. केन साधनेनेति तदुच्यते । जम्भैर्दन्तस्थानीयाभिर्ज्वालाभिः Sy.
२४. नितरां हिनस्ति Sy.
२५. दाहानन्तरम् Sy.

रोचते। अरण्ये। दीप्तिमान्। अनन्तरम्। अस्य देवस्याग्नेः। शोचिः। वातः। अनुगच्छति। क्षेप्तुः। इव। शरविषयम्। निरसनं वायुः। दिवसान्। लक्षीकृत्य।

न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति।
अन्धा अपश्या न दभन्नभिख्या नित्यास इं प्रेतारो अरक्षन् ॥५॥

न यं रिपवः। नः। यम्। शत्रवः। न्यूनीकुर्वन्ति। न च। रिषण्यवः। व्याधादयः। गर्भे। सन्त तम्। अन्धाः। अदर्शना इत्यात्मनो निर्देशः, ते। नः। हिंसन्ति। प्रज्ञानेन किं तर्हि, अनवरतोद्युक्ताः। एनम्। तर्पयितारः। हविर्भी रक्षन्ति।

---

१. वोप्तो भवति Sy.
२. वृक्षादिसमूहात्मके Sy.
३. विविधप्रकाशयुक्तः सन् Sy.
४. दवाग्नेः M. ५. ज्वालानुकूलम् Sy.
६ अग्निसखिभूतो वायुः Sy
७. अन्विति वोप्सार्थे ... अनुकूलं वाति। ज्वाला आदाय गच्छति Sy.
८. तत्र दृष्टान्तः। ..क्षेप्तुः सकाशात् Sy
९ शरो नाम हिंसासाधनलोहमयमिषुमुखं तत्प्रचुरम्। यद्वा शरो नाम वंशाद्यन्तरजातीयः काष्ठविशेषः। तद्विकारामिषुमिव। ... यद्वा शर एव शर्या। अथवा शरो हिंसा तत्करोतीति शर्या, इषुस्तां यथा वायुर्नोदकजन्यो वेगो वाऽनुकूलं प्रेरयति तद्वत् Sy शर्या इषवः शरमय्य. N.5 4.
१०. असनां गच्छन्तीम् Sy.
११. प्रतिदिनम् Sy.
१२. VM. ignores आ
१३. अग्निम् Sy. १४. नराः Sy.
१५. न दुःखयन्ति Sy.
१६. न वर्धीय्यवः M. अन्ये हिंसकाः। ... न हिंसन्ति Sy.
१७. व्याधा० M. कीदृशास्ते ? रेषणा हिंसनस्वभावाः। यद्वा तैः क्रियमाणा हिंसनप्रकारा न हिंसन्ति Sy.
१८. गर्भवद्रक्षकेऽरणिमध्ये Sy.
१९ वर्तमानम् Sy. २०. ०दयोन्तम् P. ०दयोन्त D २१. अस्याभिख्या, अभितः ख्याति माहात्म्यम्। अन्धा ज्ञानशक्तिरहिता अविद्वांसः Sy.
२२. अन्धराकाव० P. अत एवापश्या अद्रष्टारः। यद्वा विद्वासोऽप्यभावयितारोऽनुपासका इत्यर्थः Sy.
२३ ईदृग्रूपा उभयेऽपि Sy
२४. न दभ्नुवन्ति न हिंसन्ति। लौकिकोपकारेणापि प्रयोजकत्वादिति भावः Sy.
२५ तर्ह्यस्य पारमार्थिक रूपं के जानन्तीति चेदुच्यते . नित्या अविचलितभक्तयोऽग्निहोत्रादिनित्यकर्मरता वा। अन्यनुग्रहात्स्वयमपि नित्या भविष्यन्तीति भाविनित्यत्वमाश्रित्य नित्या उपचर्यन्ते। तादृशा यजमानाः Sy. २६. एवम् M.
२७. यज्ञादिना तमेव तर्पयितारः सन्तः Sy.
२८ यज्ञादिरूपेण भजन्त इत्यर्थः Sy.
२९. VM. ignores अभिख्या

Ms D. puts the figure ॥१४८॥ here to indicate the end of one hundred and fortyeighth hymn. No such number is given in P. and M.

I.149.

महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ ।
उप ध्रजन्तमद्रयो विधन्नित् ॥१॥

महः स रायः[१] । महत् । स । धनम् । स्वामी । प्रयच्छन् । आगच्छति । ईश्वर । ईश्वरस्य । वासयितुर्यजमानस्य । गृहे । तमागच्छन्तम् । ग्रावाण । परिचरन्ति ।

स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः ।
प्र यः ससाणः शिश्रीत योनौ ॥२॥

स यो वृषा । स । य । वृषा । यजमानानाम् । च । द्यावापृथिव्योः । अग्ने सह । भवति । प्राणिभिरुपयुक्तधनविसर्गोऽपवृक्ते कर्मणि । गार्हपत्ये । सस्राण ।

---

१. Omitted by P and D
२. महतः पूज्यस्य Sy.
३. अग्निः Sy.
४. गवादिरूपस्य धनस्य Sy
५. पालकः स्वामी Sy.
६. ददद्भिमतं प्रयच्छन् Sy.
७. आभिमुख्येनास्मद्देवयजन प्रति Sy.
८ गच्छति Sy.
९. स्वामी, सर्वस्य पतिरित्यर्थः Sy
१० स्वामिनोऽपि Sy
११ ईदृशोऽयं वसुनो धनस्य Sy
१२ आस्पदभूते वेदिस्थाने, आ आश्रयति । उपसर्गवशाद्योग्यक्रियाध्याहारः । यद्वा वसुनो निवासयोग्यस्य धनस्यापि, इन इति सम्बन्धः । यद्वा वसुप्राप्ति प्रसिद्धा Sy.
१३. उपगच्छन्तमेनमभिषवार्थम् Sy
१४. ०णं P.D ग्रावन्तो यजमानाः Sy
१५. परिचरन्त्येव । 'विध विधाने' तौदादिकः । ... निघाताभावश्छान्दसः । यद्वा पूर्वत्र तच्छब्दश्रुतेरत्र यच्छब्दाध्याहारेणास्य सम्बन्धादनिघातः । यद्वाऽग्रयोऽभिषवग्रावाणः स्वशब्दैरुप, उपेत्य विधन्नित्पूजयन्त्येव । आह्वाव जनयन्तीत्यर्थः Sy.
१६. V.M. ignores आ । इत्
१७. तादृशः Sy.
१८ अग्नि. Sy.
१९. सेक्ता । उत्पादक इत्यर्थः Sy.
२० मनुष्याणाम् Sy.
२१ इव Sy.
२२. एव सर्वोत्पादकः श्रवोभिः सर्वत्र श्रूयमाणैर्यशोभिर्युक्तः सन् Sy.
२३ वर्तते Sy.
२४. सर्वोत्पादक इत्युक्तं तत्रोपपत्तिमाह । यतोऽय जीवपीतसर्गः । जीवैर्नानाविधैः पीत आस्वादितः सर्गः सृष्टिक्रमो यस्य स तथोक्त । ... अत्रायं सृष्टिक्रमः । अयमग्निः स्वदत्त हविरादित्यं प्रापय्य तद्रश्मिभिः सह वैद्युतरूपेण मेघद्वारोदकेन प्रवर्ष्य सर्वान्प्राणिनः प्रापयति, इत्यतो वृष्टयुत्पादनद्वारोत्पादयिता Sy
२५. ०त्ते M.D.
२६. इदानीं साक्षादुत्पादकत्वमाह । योऽग्निः ... गर्भाशये Sy.
२६. सहस्राणः M. प्रविष्टः सन् Sy.

प्रश्रितो भवति[१]।

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो[२] नावा[३]।
सूरो न रुरुक्वाञ्छतात्मा[४] ॥३॥

आ यः पुरम्[५]। यश्च। नर्मणोऽसुरस्य। पुरम्। अज्वलयत्। अतनशील[६]। कवि[७]। नभसि[८] भवो वायु[९]। इव। गमनशील[१०]। सूर्य। इव। रोचमान[११]। अनेकशरीर[१२]।

अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात्।
होता यजिष्ठो अपां सधस्थे[१३] ॥४॥

अभि द्विजन्मा। अभितिष्ठतु[१४]।

---

१. प्रा० M. निषिक्त रेतः पारयति। नृपश्वादिदेहाकारेण परिणमयतीत्यर्थः। यद्यग्निर्न पचेत् पूरयेदेव नोत्पद्यते। तस्मादय साक्षादेवोत्पादकः। स तादृशोऽग्निर्यशस्वी वर्तत इत्यर्थ। यद्वा योऽग्निर्नरां न नराणा कर्मसूत्साहयुक्तानां यजमानानामिव. तेषां यथा स्वर्गाद्यभिमतवर्षकस्तद्वदोषस्योरपि। आश्रयवाचिना शब्देनाश्रयिणो लक्ष्यन्ते। भूलोकवर्तिनां वृष्टिप्रदानेन द्युलोकवर्तिनां हविष्प्रापणेनेति भाव। स तादृशोऽग्निः श्रवोभिर्हविर्लक्षणं. सोमाज्यादिभिरन्नैर्निमित्तभूतैर्जीवपीतसर्गो जीवविशेषैर्यजमानैरविशेषेण सर्वैर्वाऽऽस्वादितस्वभावः सन्नस्ति प्रकृष्टो वर्तते। अमुमग्नि हविर्भिः प्रीणयित्वा स्वाभिमतान्भोगान् भुञ्जत इत्यर्थः। किञ्च योऽग्निर्योनौ स्वकीयस्थाने वेदिलक्षणे सन्नाणः प्रविष्टः सञ्छ्रीत स्वस्मिन्प्राप्तं पुरोडाशादिकं पचति सोऽयमग्निरस्ति महानुभावो वर्तते Sy. नरा मनुष्या नृत्यन्ति कर्मसु N.5.1.

२. VM. ignores यः

३. अग्निः Sy.

४ नर्मवती यजमानानां सम्बन्धिनीम् ... यद्वा नृणा मनसि स्थितां यजमानानां यज्ञार्थं या भूमिं प्रत्यन्यागमनमनीषा विद्यते ताम् Sy.

५. उत्तरवेदिम् .. पुरं तत्स्थानम् Sy.

६ दीपयति Sy.

७ कीदृशोऽयम्? अत्योऽपेक्षितदेशं प्रत्यतनशील Sy. ८ क्रान्तदर्शी Sy

९ न भवसि P M. नभस्याकाशे भवो नभस्वान्वायुरिव Sy.

१० अरणकुशल. Sy. ११. दीप्यमानः Sy.

१२ शतात्मा। शतं सहस्रमित्यपरिमितवचन। तत्तद्यजमानगृहापेक्षयाऽऽहवनीयगार्हपत्याद्यपेक्षया वा नानारूपत्वम्। अथवा मित्रवरुणभेदेनाग्नेर्मित्रादिरूप 'त्वमग्ने वरुणो जायसे यत्' (RV. V.3.1) 'इन्द्रं मित्र वरुणमग्निमाहुः' (RV. I 164 46) इत्याविश्रुतिषु प्रसिद्धम्। अग्नेरेवेन्द्रादिरूपात्मकत्वमाहुरिति द्वितीयमन्त्रस्यार्थः Sy.

१३. अतः स तादृशोऽग्निरस्त्युत्कृष्टं वर्तत इति पूर्वमन्त्रान्वयः Sy.
VM. ignores आ

१४. अभितः ... तिष्ठति Sy.

अरण्योर्जात[1] । त्रीणि[2] । तेजांसि[3] । त्रींश्च[4] । लोकान्[5] । दीप्यमान[6] । होता[7] । यष्टृतम[8] । अन्तरिक्षे[9] । वर्तमान[10] ।

अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ॥५॥

अय सः[11] । अयम् । स । होता[12] । य । अरण्योर्जात[13] । विश्वानि । दधे[14] । वरणीयानि । अन्ननिमित्तानि[15] । मनुष्य[16] । य । अग्नये[17] । शोभनापत्य[18] । प्रयच्छति[19] ।

I. 150.

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा । तोदस्येव शरण आ महस्य ॥१॥

पुरु त्वा[20] । बहु । त्वा । हवि प्रयच्छन्[21] । स्तौमि[22] ।

---

१. अयमग्निर्द्विजन्मा द्वाभ्यामरणीभ्या जायमानः। यद्वा मथनात्प्रथम जन्म, उत्पत्त्यनन्तर पवमानेष्टयादिसस्काररूप द्वितीयं जन्म। एव द्विजन्मत्वम्। अथवा द्यावापृथिवीभ्यामुत्पन्नत्वात् Sy.

२. तादृशोऽग्निः ... त्रीणि रोचनानि क्षित्यादिस्थानानि गार्हपत्यादीनि वा Sy.

३. न केवलं त्रीण्येव किन्तु विश्वा . . सर्वाण्यपि Sy. ४. २ञ्जनात्मकानि क्षित्यादिलोकान् Sy. ५. प्रकाशयन् दीपयन् Sy दीपयमानः is suggested for दीप्यमानः ६. देवानामाह्वाता Sy. ७. यष्टृतमः सन् Sy

८. अपां प्रोक्षण्याद्युदकाना सधस्थे सहस्थाने यागदेशे Sy

९. ० ना P अस्यात् तिष्ठति Sy

१०. हो P. होमनिष्पादक । अरणीभ्यामुत्पन्नस्यैव गार्हपत्यद्वाराऽऽहवनीयत्वाद्वाह्वाता वा देवानां सः Sy.

११. यो द्विजन्मा स एव Sy.

१२. ०ता P. १३. धारयति Sy.

१४. अवरण्या । अवोऽन्नं हविर्लक्षणं तदिच्छया Sy. १५. मर्त्यः Sy.

१६. अग्नेये P. अस्मा उक्तस्वरूपायाग्नये Sy

१७. शोभनपुत्रो भवति Sy

१८ ददाति सः Sy.

१९ Ms D. puts the figure ॥१४९॥ here to indicate the end of one hundred and fortyninth hymn. No such number is given in P. and M

२० यद्वा बहु दाश्वानिति सम्बन्धः। पुत्रं देहि वित्त देहीत्याद्याशासनानि ब्रवीमीत्यर्थः Sy बहु। किम्? सामर्थ्याद्धविः। यत्त्वदेवत्यं यच्चान्यदेवत्य तत्सर्वम् SKN

२१. त्वाम् Sy; Dur. त्वामेव SKN.

२२. ०त् M. किं तूष्णी नेत्याह। यतो दाश्वानभिमत हविर्दत्तवानस्मि, अतो बोचे Sy. तुभ्यं ददहम् SKN. दानवानहम् Dur.

२३ यस्मादेव तस्मादभिमतं बहु बोचे त्वमपि तत्सर्वं देहीत्यर्थः Sy. ब्रवीमि। किम्? सामर्थ्यादागच्छेति। आह्वयामीत्यर्थः। अत्रैकवाक्यतायै यस्मात्तस्मादित्यध्याहार्यम्। तस्मादत्र त्वामेव बोचे यस्मात् SKN. आह्वयामीत्यर्थः Dur.

अभिगन्ता[1]। अग्ने[2]! तवाभवति[3]? प्रेरकस्य[4] धनानाम्। उदारस्य[5]। गृहे[6]। अभिगन्ता यथा भवति[7]।

---

१. आ आभिमुख्येनारिः, अर्ता हविरादिप्रापणेन सेवकोऽहम् Sy.
ईश्वरस्त्वं सर्वहविषाम्... अन्यदेवतानामपि त्वय्येव हव्यस्य होमात्... अरिरमित्रः प्रसिद्धस्योपादानं यथाऽरिर्ऋच्छतेर्गत्यर्थस्य शत्रून्प्रति गच्छत्यसौ तैर्वार्ह्यते। एवमीश्वरोऽपि तेन तेन भूतानुग्रहेण सर्वप्रवृत्तिर्गति.। अर्यतेर्वार्ह्यो भृत्यजनेन। यद्यस्मादन्यदेवत्या अप्यग्नावाहुतयो हूयन्ते सवनीयादिदेवेभ्यो विभजन्ते भृत्यजनेभ्य इत्येवमेतद्वृष्ट्वोपलभ्य पतित्वं सर्वहविषामित्येवमवक्ष्यन्मन्त्रवृक्।...आकारः पादपूरणः SKN
सुचिरमपि विचार्यं तवाहमरिरेव स्तोमानामुच्चारणेऽर्य ईश्वर एव। समर्थोऽहमाह्वयामि त्वां स्तोतु बहु च दातुमित्यभिप्रायः Dur.

२. तमाभ० P. इतरसाधारण्येन ब्रुवत. (ते) कथं दातव्यमिति न मन्तव्य, यतोऽहं हे अग्ने तव स्वित् तवैव Sy.
स्विदेवार्थे तवैवाह स्वभूत इति शेष. SKN. ३. तत्र दृष्टान्तः..
तोदस्येव शिक्षकस्य स्वामिन Sy.
कथमिव स्वभूत इति, उच्यते। तोदस्येव तुदति भृत्यजनांस्तैर्वा तोदमात्मन इच्छतीति गृहस्थोऽत्र तोदोऽभिप्रेतः। यथा तोदस्य गृहस्थस्य SKN.
विदीर्णस्य कस्यचिच्छ्वभ्रस्य कूपस्योपरि... एवमत्र शब्दसारूप्यादुपमार्थोपपत्तेश्च तोदश्शब्दस्तुभ्रस्य भूप्रदेशस्याभिधायक उपपद्यते। स्त्रिया अपि चासत्प्रदेशस्तोद उच्यते Dur.

४. महतः Sy., SKN., Dur.

५ शरणेऽस्य गृहे यथा गर्भवासादिः, आ समन्ताग्नियतो वर्तते तद्वदहमपि Sy.
गृहनामैतत्। गृह आत्मीये च किञ्चित्सर्वं स्वभूत भवति तद्वदहमित्यर्थः। प्रसिद्धस्त्वमेव नान्यद्देवतान्तरम् SKN.
आडध्यर्थे। ... बिले 'शृ हिंसायाम्' तस्य शरणं बिलम्। तद्विदारितं भवति। यथा हि श्वभ्रे बिले कस्मिंश्चिद्गह्वरे आपो गच्छन्ति न च तस्य श्वभ्रस्य महतो ग्रहणशक्तिपरिहाण भवत्येवं तवानेकाश्चानेकदेवताश्चाहुतीरस्माभि. प्रत्ताः प्रतीच्छतो न सामर्थ्यपरिहाणमस्ति। अतो देवतानामस्माक त्वमेवातिविशिष्टोपकारप्रवृत्तोऽतस्त्वामेवाह्वयामि Dur.

५ तोदस्तुवते[1] . . बहु दाश्वांस्त्वामेवाभिह्वयामि। अरिरमित्र ऋच्छतेः। ईश्वरोऽप्यरिरेतस्मादेव। यदन्यदेवत्या अग्नावाहुतयो हूयन्त इत्येतद् दृष्ट्वैवमवक्ष्यत। तोदस्येव शरण आ सुहस्य। तुदस्येव शरणेऽधि महतः N. 5.7; SKN. II. 322.

७. VM. ignores. स्वित्। आ। आ

व्यनिनस्य धनिनः प्रहोषे चिदरुषः । कदा चन प्रजिगतो अदेवयोः ॥२॥

व्यनिनस्य[1]। ईश्वरवर्जितस्य[2]। धनिनोऽथापि[3]। प्रहोषे=प्रकृष्टे यज्ञशब्दे[4]। अपि[5]। तद् धनमप्रयच्छत[6]। कदा[7]। चिदपि[8]। स्वैर गृहादन्यत्र प्रयच्छतो यदा गन्तुमिच्छति तदानीमेवानवेक्ष्याप्यतिथीन्निर्गच्छत[9]। देवाश्चानिर्गच्छत[10] कदर्यस्यारिरभिगन्ता[11] वृद्धो[12] भवति।

स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि । प्रप्रेत्ते अग्ने वनुषः स्याम ॥३॥

स चन्द्रः[13]। स[14]। ह्लादयिता देवमनुष्याणाम्। मेधाविन्[15]! मनुष्य[16]। वर्धमानतमो भवति।

---

१. पूर्वमन्त्रे स्वाभीष्ट बहु विज्ञापयामीत्युक्तम्। अत्र तु स्वविलक्षणेभ्यो दानादिरहितेभ्यो दानं न दातव्यमिति प्रार्थयते। हे अग्ने त्वां विशेषेण ब्रवीमि। उपसर्गश्रुतेर्योग्यक्रियाध्याहार। अथवा सन्निहितत्वाद् वोच इत्यनुषज्यते। अस्मदर्थं यद् व्यजिज्ञपस्तद्विरुद्धं वोचे। वक्ष्यमाणस्वरूपस्य न दातव्यमिति ब्रवीमीत्यर्थ. Sy.

२. तेषां स्वरूपमाह ... अस्वामिनः। त्वामस्वामिन कुर्वाणस्य Sy

३. तथा धनिनः समग्रधनवतः। पूर्वमेव धनवतः। दानस्य निरर्थकत्वात्तन्निवार्यते। यद्वा यागाद्यनुपयोगिधनवत इत्यर्थ Sy

४. याज्ञा D.P. प्रकर्षेण होतुम्। ... यद्वा प्रहोषेऽनिनस्येति सम्बन्ध। प्रकर्षेण होतुमसमर्थस्येत्यर्थ.। अत्रेनशब्देन तत्स्थ सामर्थ्यं लक्ष्यते Sy

५. वि P. चिच्छब्द· समुच्चयार्थः Sy

६. तं P. ७. अददतो दक्षिणारूपेण Sy

८. अत्र चनेति निपातद्वयसमुदायः। तत्र चशब्द· समुच्चये नशब्दो निषेधे Sy

९. ०धिः P.

१०. ०मेव . . नि० M. कदाचिदपि प्रकर्षेण देवानस्तुवत. ... यद्वा चनेति चिच्छब्दपर्यायः। उक्तप्रकारेण दुष्टस्यापि कदाचित्प्रजिगतो यदा कदाचित् त्वां स्तुवतो विवोचे। तादृशस्य दातव्यमिति विशेषेण ब्रवीमि। किमु वक्तव्यमस्मदर्थमिति भावः Sy.

११ इच निच्छत· P देवानात्मनोऽनिच्छतः। एतेषा न दातव्यमिति विवोच इत्यर्थः। निन्दिताना स्वरूपनिरूपणेन स्वस्यातादृशत्वाद् बहु वोच इत्येतदुक्तमेवेत्युक्त भवति Sy.

१२. कदस्यरि रभिगन्तद्वृद्धो P. व्यृद्धो M. VM. ignores वि

१३. यो मर्त्यस्त्वा यजते सः Sy.

१४. सर्वेषामाह्लादकश्चन्द्रसदृशो भवति। यद्वा चन्द्र एव भवति। यजमानानां चन्द्रत्वप्राप्ति छन्दोगा आमनन्ति 'पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा' (Chā.U.5.10.4.) इति। 'सोमलोके विभूतिमनुभूय' (Praśna. U. 5 4.) इति च। तथा मुण्डकेऽपि द्युलोकप्राप्तिराम्नायते 'एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति, तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास.' इति, 'एष वः पुण्यः सुकृतो ब्रह्मलोकः' (Mu.U. 1.2.5-6) इति च Sy.

१५. यजमानः Sy. १६. मे ... व० M. प्रवृद्धतमः। इतरदेवानामपि श्रेष्ठः Sy.

महान्। स्वर्गलोके वयं च। त्वत्प्रीत्यर्थम्। प्रयच्छन्तः। प्र स्याम।

I. 151.

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन्।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः ॥१॥

मित्रं न यम्। सखायम्। इव। यम्। कर्माभिलषितासु। गोषु। गा इच्छन्तः। प्रादुर्भावयन्ति। यज्ञे। उदकार्थम्। सुकर्मणि। तस्योद्यतो बलेन। वाचा च। द्यावापृथिव्यौ। अरेजेताम्

---

१. महतोऽपि Sy. २. द्युलोके Sy.
३. अतः, अग्ने ते तव प्रप्रेत्प्रकर्षेणैव ... यद्वा प्रीणयित्वा प्रप्रेत् स्याम Sy.
४ सम्भक्तारः स्याम Sy.
५ प्रव P D.
६ The passage beginning with प्रयच्छन्तः and ending with स्याम is omitted by M प्रकृष्टा एव भवेम Sy.
७ VM. ignores इत्। अग्ने Ms. D puts the figure ॥१५०॥ here to indicate the end of one hundred and fiftieth hymn. No such number is given in P. and M
८. मित्रमिव स्थितम् Sy.
९. अग्निम् Sy.
१०. कर्मनामैतत्, 'शिमी शक्ति' (Ngh. 2.1) इति तन्नामसूक्तत्वात्। प्रकाशवृष्टयुत्पादनादिकर्मणा। .... यद्वा शिम्या, इत्येतत्क्रियया सह सम्बध्यते Sy.
११. बह्वीषु निमित्तभूतासु Sy.
१२. गा आत्मन इच्छन्तः। अत्र यद्यपि गव्यव इत्येवासं न गोष्विति। तथापि गव्यव इत्यत्र गोस्वामित्वं प्रतिपाद्यते। तच्चैकया द्वित्राभिरपि स्यात्। अतः स्पृहणीया बह्वीष्व इत्यवगमयितुं गोष्विति पदम्। यथा 'गवामसि गोपतिः' (RV. VII 98.6c) Sy.
१३. शिम्या मथनादिकर्मणा ... जनयन्ति यजमानाः। यद्वा, अप्सु निमित्तभूतासु जीजनन्त्सर्वप्राणिनामुपकाराय वृष्टयर्थं चेत्यर्थः Sy. १४. यागे Sy.
१५ अप्सु, अन्तरिक्षे वैद्युतरूपेण वर्तमानम्। आप इत्यन्तरिक्षनाम। 'आपः पृथिवी' (Ngh.1 3)इति तन्नामसूक्तत्वात् Sy.
१६. सुष्ठु, आध्यातारः फलस्योत्पादयितारः शोभनध्याना वा Sy.
१७ बालेन P. एवमुत्पन्नस्याग्नेः पाजसा बलेन Sy.
१८. भयङ्करशब्देन च Sy.
१९. अकम्पेताम्। अग्नेः सकाशात्कम्पनम् 'अरेजेतां रोदसी होतृवूर्ये' (RV.I.31. 3c) इत्यादिश्रुतिषु प्रसिद्धम्। नच सर्वरक्षणार्थमुत्पादितोऽग्निर्लोकद्वयस्य भीतिमजनयत्, किमेतदिति वाच्यम्, निन्दास्तुतित्वात्। यथा लोकौ बिभीतस्तथा प्रवृद्धोऽभवदिति स्तुतौ पर्यवसानात्। यद्यप्यत्राग्निरेव प्रतिपाद्यते मित्रस्तु परं दृष्टान्तित एव तथापि द्युस्थानस्याग्नेरेव मित्रत्वान्मन्त्रस्य मैत्रत्वमविरुद्धम्। यद्वा मित्रं न सखायमिव स्थितं मित्रनामकं देवं यज्ञेऽन्तरिक्षे चर्त्विजः प्रादुर्भावयन्ति Sy.

तं प्रियम्[१]। यजनीय मित्रम्[२]। प्रति[३]। जन्मवता[४] मनुष्याणाम्[५]। रक्षणमास्ते, इयं मैत्री[६]।

यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥२॥

यद्ध[७] त्यत्[८]। यद्वा। खलु[७]। वाम्[८]। इदम्[९]। यजमानस्य[१०]। पुरुमीळ्हस्यर्षेर्ऋत्विज[११]। मित्राणि[१२]। इव मित्रम्[१३]। अग्रतोऽकुर्वन्[१४]। अनन्तरम्[१५]। युवयोरागमनम्[१६]। श्रद्दधानाय तस्मै प्रीत्यर्थम्[१७]। तत् कर्म। विदतम्[१८]। अपि च। अशृणुत स्तुतिम्[१९]। वर्षितारौ[२०]। गृहवतस्तस्य[२१] पुरुमीळ्हगृहस्थस्य[२२]।

आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे।
यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरम् ॥३॥

आ वा भूषन्[२३]। युवयो[२४]। द्यावापृथिव्यो[२५]। अहोरात्रात्मना[२६] जन्म। सर्वा प्रजा[२७]।

---

१. प्रियं सर्वेषा प्रियतमं प्रीणयितार वा Sy
२. यष्टव्यमग्निम् Sy.
३. निमित्तीकृत्य Sy.
४. प्रति। जन्मवता is missing in M
५. प्राणिनाम् Sy.
६. हे मित्रावरुणौ यद् यस्मात्कारणात् Sy
७. ह इति पूरणः Sy.
८. युवाम् Sy.
९. त्यदुक्तलक्षण कर्म Sy.
१०. जन्नमा० P. सोमिन स्वाभुवः सोमवत. स्वाभवनशीलस्य। कर्मणि षष्ठी Sy
११. बहुलाभीष्टसेचनस्य Sy.
१२. मित्राणीव मित्रभूता ऋत्विज Sy
१३. ०णीति व M.
१४. प्रकर्षेण धारयन्ति Sy
१५. अतः कारणात् Sy.
१६. युष्मद्गमनम् Sy.
१७. अर्चते। षष्ठ्यर्थे चतुर्थी। अर्चत पूजयतो यजमानस्य Sy.
१८. अवि० P. जानीतम् Sy.
१९. शृणुतम् Sy.
२०. आह्वानं स्तोत्रं वा Sy.
२१. कामानां वर्षितारौ युवाम् Sy.
२२. पस्त्या, इति गृहनाम। 'पस्त्यं दुरोणे' (Ngh 3 4.) इति तन्नामसूक्तत्वात्। सद प्राचीनवंशाविगृहवतो यजमानस्य Sy.
२३ यद्वा यद्यस्मात्सोमिनः सोमवतः पुरुमीळ्हस्यैतन्नामकस्य राज्ञो मित्रासो न मित्राणीव स्थिताः स्वाभुवः स्वाभवनशीलाः स्वस्वव्यापारसमर्था दधिरे, अधात कारणात्तस्यार्चतेऽर्चतः कर्तु विदतमित्यादि पूर्ववत् Sy.
२४. VM ignores स्वाभुवः
२५ हे वृषणा कामानां वर्षितारौ हे मित्रावरुणौ वां युवयोः सम्बन्धि Sy.
२६. द्यावापृथिव्योः सकाशात्। द्यावापृथिवीभ्यामेव सर्वेषामुत्पत्तेः। यद्वा मित्र इति सर्वोपकारी, अग्निरुच्यते वरुण इति तमोनिवारक आदित्य उभयोः पृथिवीद्युस्थानत्वात्। ततः पूर्वमन्त्रे मित्रवृष्टान्तत्वेनाग्निः स्तुतः। अत इदमधिगम्यतेऽग्निरेव मित्र इति। तथाऽन्यत्रापि Sy.
२७. जननम्, उत्पत्तिम् Sy.
२८. क्षितयो मनुष्या यजमानाः Sy.

अलङ्कुर्वन्ति[1]। स्तोत्रे[2] प्रकर्षेण वाच्यम्। महते। वर्धमानाय[3] तत्। यत्[4]। यजमानम्[5]। अन्नम्[6]। अश्वं[7] प्रति। वाहयथस्तदानीम्[8]। तस्य यज्ञम्। स्तुत्या[9]। होमादिकर्मणा[10] च हेतुभ्याम्[11]। प्रगच्छत[12]।

प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत्।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः ॥४॥

प्र सा क्षितिः[13]। प्रकृष्टा। सा भवति। पृथिवी[14]। हे बलवन्तौ[15]! या। अत्यन्तम्[16]। युवयो[17] प्रिया। सत्यवन्तौ[18]! सत्यमन्धकारापनोदनेन। अत्यन्तम्[19]। आघोषथ[20] प्रकाशयथस्तेजसा[21]। युवाम्[22]। दिव[23]। महत। बलकरम्[24]। आभवनशीलमश्वम्[25]। गामनड्वाहम्[26]। इव। धुरि[27]।

---

१. सर्वतोऽलङ्कुर्वन्ति श्लाघन्त इत्यर्थं Sy
२. स्तुत्यं तादृग्युवयोर्जन्म Sy.
३. सर्वविषयबलाय Sy
४. जन्मनः प्रवाच्यत्वमाह। यवौ यस्मादेव कारणात्। अथवा। ईमित्यनर्थकः। 'मिताक्षरेष्वनर्थका कर्मीमिद्विति' (N 1.9.) इत्युक्तत्वात् Sy
५. यद् यस्माच्च कारणादवते युष्मान्प्राप्तवते यजमानाय च Sy.
६. ऋताय यज्ञाय भरथ सामर्थ्यम् Sy
७ ०श्व D
८ वाहरथ० P. वाहरथ० D M भरथोऽभिमत फलम्। अथवोभयत्र कर्मणः सम्प्रदानत्वाच्चतुर्थी, यज्ञं यजमानं च भरथ इत्यर्थः Sy.
९ यस्माच्च होत्रया स्तुतिरूपया वाचा ... होत्रेति वाङ्नाम। 'होत्रा गौ' (Ngh. 1.11.) इति तन्नामसु पाठात् Sy.
१० शिष्या हविष्प्रदानादिकर्मणा च Sy.
११. ०भ्यः P.
१२. ०तं P.D. प्रकर्षेण प्राप्नुथः। तस्मात्प्रवाच्यं जन्म भूषयन्तीत्यर्थः Sy.
१३. VM. ignores वृषणा। यत्
१४. प्रकर्षेण सम्पादिता। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। तामासीदतमिति शेषः Sy
१५ या क्षितिर्देवयजनरूपा Sy.
१६. ०न्तौ P D अमुरौ बलवन्तौ मित्रावरुणौ .. युवाम् Sy.
१७. महदत्यधिकम् Sy.
१८ प्रियतरा प्रीणयित्री वा सा क्षितिः। .. यागभूमिर्देवानां प्रियेति प्रसिद्धम् Sy.
१९. प्राप्ताद्य च ... ऋतवन्तौ युवाम् Sy.
२० ऋतमस्मदीय यज्ञम् Sy.
२१ अमत्यन्त P बृहत्प्रवृद्धम् Sy.
२२. अघो० P आघोषयः M.
२३ अवंकल्येन सम्पादित इति स्तुतमित्यर्थः Sy.
२४. द्युलोकस्य Sy
२५. ते P. D.
२६. बलतरम् M. धुरि दक्षं तर्पणवहनसमर्थम्। अथवा बृहतो दिवो महतो द्युलोकस्यदेवान्दक्षं प्रीणयितुमिति शेषः। यद्वा कर्मणि षष्ठी। दिवो द्योतनात्मकं बृहतः प्रभूतं दक्षमभिमतसाधनसमर्थम् Sy.
२७. सर्वतो भवनशीलम् Sy.
२८. उपयोगे दृष्टान्तः ... धेनुमिव तां यथोपयुञ्जते तद्वत्। यद्वा विकारे प्रकृतिशब्दः। क्षीरादिकमिव। तस्मादृतमाघोषयः Sy.
२९. शारीरबलस्य निर्वाहे तदर्थम् Sy.

उपयुञ्जाथे[1]। जलायेति[2]।

मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सङ्गन्धेनवः।
स्वरन्ति ता उपरतातिं सूर्यमा निम्रुचं उषसस्तक्ववीरिव ॥५॥

मही[3] अत्र। महान्तौ। अस्मिन्[4]। वरणीय[5] धनम्। माहात्म्येन[6]। प्रक्षिपथः[7]। अक्षया[8]। पयस. क्षेप्त्र्य[9]। धेनव[10]। मदीये[11]। गृहे[12]। आगच्छन्ति[13]। ताश्च धेनव[14]। उपरमूल[15] ऊधसि ततम्। सुवीर्यं[16] पय। प्रेरयन्ति[17] भवद्भ्यां प्रेर्यमाणा[18]। रात्रय[19]। दिवसाश्चान्योन्यसक्तम्[20]। आगच्छन्ति[21]। यथा। स्तेनमनुधावन्तेन[22] सङ्गच्छति[23] (ते) तद्वत्[24]।

---

१. सेवेथे तत्रत्य हविः स्वीकुरुथ इत्यर्थः Sy.
२. जलोयेति M. अपः कर्म सोमयागरूपम् Sy.
३. हे मित्रावरुणौ युवां मही महत्याम् Sy
४. अस्यां पृथिव्याम् Sy.
५. धर० P. D. वरणीयं प्रदेशम् Sy
६. महत्त्वेन या धेनूः Sy.
७. गमयथः। अन्तर्भावितण्यर्थोऽयम्। गमनाविव्यवहारस्य तयोरधीनत्वाद् द्यावापृथिव्योरभिमानिदेवत्वाच्च मित्रावरुणयोः Sy.
८. सायङ्काले युष्मन्महत्त्वेनारेणवोऽनवद्यास्तस्कराद्यनपहारेणानष्टा या Sy
९. क्षीराणा प्रदात्र्य.। तुञ्जतिर्दानकर्मा Sy.
१०. ता एता धेनवो गावः Sy.
११. सद्मनि गोष्ठे Sy.
१२. आ आश्रिता आगच्छन्ति वा। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः Sy.
१३. ता एवङ्कारिता धेनवः Sy.
१४. उपतिरमूल M. उपरिमूल is suggested for उपरमूल
१५. स्थितं M. उपरतातौ। सप्तम्या लुक्, मयानां विस्तारवत्यन्तरिक्षे मेघाच्छन्ने सति Sy.
१६. सर्वस्य प्रसवितारं सुवीर्यं शोभनसामर्थ्यं वा। 'सुवीर्यो मर्या यथा गोपायत इति तत्सूर्यस्य सूर्यत्वम्' (TB. 2 2 10) इति श्रुत्यन्तरात्। आदित्यमभिलक्ष्य Sy
१७. स्वरन्ति शब्दयन्ति सुखसञ्चाराय। 'स्वृ शब्दोपतापयो' भौवादिकः Sy.
१८. ०ण P.
१९. कस्मिन्काल इति तदुच्यते ..सर्वेष्वपि सायङ्कालेषु Sy.
२०. उषःकालेषु च Sy.
२१. ०श्चान्योम् P. ०संसक्त० M.
२२ आगच्छन्ति seems to be the explanation of आ of the original.
२३. तत्र दृष्टान्तः। तक्ववीरिव। तक्वा स्तेन.। तस्य वेता गन्ता मनुष्यः। स यथा क्रोशति तद्वत्। एवं निरुद्धानां गवा सुखचारो युष्मदायत्त इति तयोः स्तुतिः Sy.
२४. ससक्तं ग० M.
२५. The passage beginning with सक्तमागच्छन्ति and ending with तद्वत् is omitted by P. Ms. D. adds (भरन्ति च युवाभ्यामभिलषि) after तद्वत्।

आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥६॥

आ वामृताय। मित्रावरुणो[1] वाम्। यज्ञायं दीर्घसत्रेषु। केशिन[2] प्रजा। आभिमुख्येन। अस्तुवन्। मित्रावरुणो[4] यत्र[5]। गमनम्[6]। पूजयथस्तदा[7]। आत्मनैव। तेभ्य[8] कामानवासृजतम्[9]। अपिन्वनञ्च[10]। तत्कान्[12]? । युवाम्। मेधाविन[13]। अभिलषितानाम्[14]। ईश्वरौ[15] भवथ[16]।

यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्यू ॥७॥

यो वा यज्ञैः। य[17] वाम्[18]। यजै[19]। भजमान। हविः प्रयच्छति[20]। कवि[21]। होता[22]। यजति[23]

---

१ युवाम् Sy
२. केशवत्योऽग्नेर्ज्वालाः Sy केशिन्य is suggested for केशिनः
३ हविःसमर्पणेनाभिपूजयन्तीत्यर्थ Sy
४ हे मित्र हे वरुण युवामुभौ Sy
५. यागे Sy
६ गमनं देवयजनदेश वा। गातुरिति पृथिवीनाम, 'गातु. पूषा' (Ngh 1 1) इत्युक्तत्वात् Sy ७. स्वीकुरुथ इत्यर्थः Sy तत्र is suggested for तदा ८ वृष्टिम् Sy
९ अवाङ्मुख विसृजतम् Sy.
१०. अपि M. वर्धयतमित्यर्थ. Sy.
११. Omitted by M.
१२. धियोऽस्मदीयानि कर्माणि Sy कामान् is suggested for कान्
१३. एव कृत्वा विप्रस्य मेधाविनो यजमानस्य Sy.
१४ मननवतीनां स्तुतीनाम् Sy.
१५. ईश्वरौ स्वामिनौ भवथः। इरज्यतिरैश्वर्यकर्मा। 'इरज्यति पत्यते' (Ngh. 2.21.) इति तन्नामसूक्तत्वात् Sy.
१६. This hymn is omitted by P. P reads ईश्वरौ भवथः only.
१७ यो ह य खलु यजमान. Sy. अयं यजमानः Dur
१८ वा P युवामुद्दिश्य युवाभ्या वा Sy. युष्मद. सम्प्रदाने चतुर्थी भवति द्विवचनमेतत्, युवाभ्या मित्रावरुणाभ्याम् SKN मित्रावरुणौ Dur
१९ य । वाम्। यजै. is omitted by M. यागनिमित्तभूतं Sy. सप्तम्यर्थ एषा तृतीया, यज्ञेषु SKN
२० शसमान Sy शंसन्स्तुवन् SKN. शसमान. शसमान. N 6 8
२१ हविरादिकम् Sy किम्? सामर्थ्याद्धवींषि SKN.
२२ स्वस्वत्व निवर्त्य युष्मत्स्वत्वापादन करोति Sy ददाति SKN.
२३ य एव कविरनूचान.। 'येऽनूचानास्ते कवय.' (AB.2 2) इति श्रुतेः। अथवा कविर्मेधावी Sy. मेधावी SKN क्रान्तदर्शनः Dur.
२४ सम्यग्घोमनिष्पादको यजमानः Sy. आह्वाता देवानाम् SKN. आह्वाता Dur.
२५. सोमयागादिकं करोति Sy. यागं च करोति SKN.

च। मननीयानां साधयिता। तम्। उप। एव। युवा गच्छथ.। यज्ञं च तस्य। कामयेथे।
तथा सत्यस्माक स्तुती । प्रति। अस्मत्कामौ। आगच्छतम्।

युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥८॥

युवा यज्ञैः। युवाम्। यज्ञै । प्रथमौ। गोविकारैश्च। समञ्जन्ति। यज्ञवन्तौ। मनस ।

---

१. मननीयद्रव्यदक्षिणादिसाधनोपेतः सन् Sy. मननमनुष्ठेयपदार्थविषयज्ञान तत्साधनभूतं यस्यास्ति स मन्मसाधनोऽधिकृत इत्यर्थः SKN. विज्ञानसाधन इत्यर्थः Dur.

२. तमेव यजमानं सुमतिं शोभनप्रज्ञम् Sy. तमेव SKN तं प्रति Dur

३. उपलक्ष्य Sy. उपेत्येतद् गच्छथ इत्येतेन सम्बध्यते SKN

४. इव P.D. अहशब्द एवार्थे पदपूरणो वा SKN.

५. प्राप्नुथः खलु Sy. उपगच्छथो नान्यम् SKN. उपगच्छथः Dur.

६. अध्वरशब्देनात्र सम्बन्धाद्धविरुच्यते। अध्वरसम्बन्धि हविरित्यर्थः। यत एवमतोऽहमपि तथाभूत एवेति ब्रवीमि SKN. अध्वराश्रितानि हवींषि। वयमपि चैवंगुणविशिष्टा एव यतो ब्रूम· Dur.

७. तवीयम् Sy.

८. वीथः कामयेथे Sy.
उपगम्य च वीथो भक्षयथस्तस्यैव नान्यस्य SKN.

९. ०तिः P. गिरः स्तुतीः Sy. मदीयां स्तुतिं शोभनां प्रज्ञां वा SKN. एता अस्मद्गिरः Dur.

१०. अभिलक्ष्य Sy.
आभिमुख्येन Dur.

११ अस्मान्कामयमानौ युवाम् Sy. अस्मत्कामौ मामनुग्रहीतुमित्यर्थः SKN. अस्मान्कामयमानाविति Dur.

१२. गच्छतम्। तादृश मां प्राप्य स्तुतीः स्वीकुरुतमित्यर्थः। अत्र यद्यपि तमिति सामान्यनिर्देश· प्रतिभाति तथाप्यस्मयू इत्युक्तत्वाद् वीर्घतमाः स्वात्मानमेव परोक्षतयोक्तवानिति गम्यते। यद्वा यो दाशति यश्च यजते तमुपेत्य तवीय यज्ञ कामयेथे। अतोऽस्मयू युवा सुमतिं मां मदीया गिर. स्तुतीरच्छ, अभिलक्ष्य गच्छतम् Sy. गच्छतम् SKN. आगन्तुमिच्छथः Dur

१३ VM. ignores ह। सुमतिम् N 6 8; SKN. II. 419.

१४ यजनसाधनै. Sy.

१५ पयआदिभि. Sy.

१६. व्यञ्जयन्ति यजमाना देवभागं यागेषु क्षीरादिभिर्यजन्त इत्यर्थः। यद्वा गोभिरञ्जते स्तुवन्ति Sy.

१७. ०न्तो P. D.
यज्ञवन्तो वृष्टपुदकवन्तो वा। मित्रावरुणौ युवाम् Sy.

१८. तत्र दृष्टान्तः। ... कर्मणि षष्ठी। मन इव। तद्यथा प्रथमं व्यञ्जयन्ति मुख्यं कुर्वन्ति तत्पूर्वकत्वात्सर्वव्यवहारस्य Sy.

इव। प्रेरणेषु[1] यथा तत् तच्छीघ्रं[2] कुर्वन्ति कर्म तद्वत्। भरन्ति[3] च। युवाभ्याम्[4]। अभिलषितेन[5]। सयतेन[6] हविषा सह। स्तुती[7]। युवां च गर्वरहितेन[8]। मनसा[9]। धनयुक्तम्[10]। आगच्छथ[11]।

रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम्।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ॥९॥

रेवद्वयः[12]। धनयुक्तम्[13]। अन्नम्। दधाथे[14]। धनयुक्तञ्च[15]। आगच्छथ[16]। नेतारौ[17] कर्मभि[18]। इत आगमन युवयोर्धनं भवतु। युवयो[19]। ऐश्वर्यम्[20]। धन च[21]। द्यावः[22]। दिवसा[23]। नद्य[24]। देवाश्च[25]। न[26]। आनशु[27]। न। अपि[28]। असुरा[29]।

---

१. प्रयोगेषु Sy
२. Omitted by M
३. सम्पादयन्ति Sy
४. युवाम् Sy.
५. मननवता Sy
६ युवामेव सम्यग् गच्छता चित्तेन Sy.
७ तिः युः M.
८. यस्मादेव तस्मात् .. अनभिभवतता Sy.
९. प्रकृष्टेन चेतसा युक्तौ सन्तौ Sy.
१०. धनवत्कर्मास्मदीयम् Sy.
११ अश्नुवाथे व्याप्नुथो ददाथे इत्यर्थ. Sy
१२. धनवत् Sy.
१३ ०धाते P.
उभयं च धारयथः Sy.
१४. सनयु० P. यस्मादेवं तस्माद् ... धनवत्। सहवृष्टत्वाद्वय इति गम्यते। धनविशिष्टमन्नम् Sy.
१५. ०तः P. D. अश्नुवाथे अस्मभ्यं ददाथे इत्यर्थः Sy.
१६. ०रो M.
नेतारौ युवाम् Sy.
१७. माथाभिर्युवयोः प्रज्ञाभिः Sy.
१८. इतोऽस्मदभिमुखं गमनवत्, इतो रक्षणवद्वा Sy
१९ महन्नामैतत्। अतिमहत् Sy.
२० मघं धन च नानशिरे Sy.
२१ द्यावा P. D. द्वावा M ताभिः सहिता द्यावो दिवसा Sy.
२२ अहोभी रात्रिभिः। अत्राहश्शब्देन रात्रिरभिधीयते, द्योशब्देनाह्नः पृथगभिधानात् . . अहश्च रात्रिश्चोभे न तरत इत्यर्थ. Sy.
२३ स्यन्दनशीला नद्यो नचैवानशुः Sy.
२४ युवयोर्देवत्वम् Sy.
२५. न प्राप्नुवन्ति ... लोकत्रये युवयोः पराभवितारो न केऽपि सन्तीत्यर्थः Sy.
२६. पणयोऽसुरा अपि नानशुः Sy.
२७. VM. seems to explain माहिनम् as ऐश्वर्यं and मघम् as धनम् and ignores न। न Ms. D. puts the figure ॥१५१॥ here to indicate the end of one hundred and fiftyfirst hymn. No such number is given in P. and M.

I. 152.

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥१॥

युवं[१] वस्त्राणि। युवम्। तेजांसि। पीनौ। वसाथे। युवयो। सन्तता। पूज्या। च। धनविसर्गा। सर्वाणि च। अनृतानि वृत्रस्य। तेजसा विनाशयथ। सत्येन प्रकाश्यमानौ। मित्रावरुणौ! सङ्गच्छेथे।

एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥२॥

एतच्चन। एषां मनुष्याणां मध्ये। कः। चिदेव। एतद्। विजानाति किं तत्। सत्य। पूजनीय। कविभिश्शस्त। हिंसावान्। असुरेषूद्गुर्ण। चतुरश्र सन्। त्रिरश्रिम्। हन्ति। त्रियामा रात्रिस्त्रिरश्रिरुच्यते न गमयत्यहस्तस्या वर्तमानायाम्। राक्षसा। प्रथमा। एवाहभुख

---

१. युवाम् Sv.
२ आच्छादनयोग्यानि वासांसि Sv
३. पीवसा पीनौ . . यद्वा पीनान्यच्छिन्नानि Sv.
४. आच्छादयथः। यद्वा पीवसा स्थूलेन प्रभूतेन तेजसा वस्त्राणि दधाथे अविच्छिन्नानि वस्त्रस्थानीयानि तेजांसि धारयथ इत्यर्थः Sv
५ अच्छिद्रा अच्छिन्ना Sv
६. मननीया· Sy
७. धवि० D. सर्वि०। धवि० M सर्गा सृष्टय Sy
८. असत्यान्यप्रियाणि पापानि Sy
९. नाशयतम् Sy
१०. ऋतेन फलेन तत्साधनेन यज्ञेन वा Sv
११. ० मानेन M.
१२. अस्मभ्यं योजयथ इत्यर्थ· Sy.
१३. एतयोर्मध्ये। बहुवचनं पूजार्थम्। यद्वा तवानुचरापेक्षया बहुवचनम् Sy.
१४. एकः Sy.
१५. एत M. वक्ष्यमाण सामर्थ्यरूप कर्म Sy
१६. विशेषेण चेतत्यनुतिष्ठतीत्यर्थ· Sy.
१७. स विशेष्यते। स एक सत्योऽबाध्यः सत्सु भवो वा Sv १८ मन्त्रो मननवान् Sv.
१९ कविभिर्मेधाविभिः शसनीय· Sy.
२० हिंस० D हिंसमान P. अनेन वक्ष्यमाणस्य सामर्थ्यस्य सम्भाविता (सम्भावना) प्रतिपादिताऽभवदित्युक्तम् Sy.
२१ न केवलमायुधसामर्थ्यं किन्तूग्र· स्वयमुद्गूर्णबल Sy
२२ ततोऽप्यधिकायुधवान् Sy
२३ अश्रित्रयोपेतमायुधं त्रिरश्रि, तद्वन्तम्। मत्वर्थो लुप्यते। उपलक्षणमेतत्। सर्वायुधसम्पन्नमित्यर्थः। एतन्नामानं वा Sy.
२४ हिनस्त्यतिबलं शत्रुम् Sy.
२५ त्रियारामात्रि० P.
२६ ० मां P युवयोरेकस्यैव सामर्थ्येन देवनिन्दो ह देवनिन्दकास्तु Sy.
२७. समर्थाः सन्तोऽपि Sy.
२८. ० हन्मु० P.

एव। [1]जीर्णा आसन्त्सोऽयमहोरात्रविभागो मित्रावरुणकृत ।

[2]अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥३॥

[2]अपादेति। पादयुक्तानां प्रजानाम्। [3]अग्रे। [4]पादवर्जिता। [5]आगच्छति। युवयो। [6]क। [7]तदिद [8]कर्म। [9]जानाति। यस्तथा जानाति [10]तस्य। [11]पुत्र। [12]कुटुम्बभारम्। [13]वहति। [14]सत्य च। [15]पूरयति। [16]अनृतम्। [17]चरति।

प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धामं ॥४॥

[18]प्रयन्तमित्। [19]प्रगच्छन्तम्। एवादित्यम्। [20]कन्यकानामुपसाम्। जरयितार वयम्

---

१. स्वयमेव जीर्णा भवन्ति। .. युवयोर्मध्य एकोऽपि महाबल', मिलितयोस्तु सामर्थ्यं किमु वक्तव्यमिति भाव'। अथवैषा युवयोरेतदुत्तरत्र वक्ष्यमाण सामर्थ्यमेकः सत्यादिलक्षणो विचिकेतद् विशेषेण जानाति। शेष पूर्ववत् Sy.

२ पादवतीनां मनुष्यादीना प्रजानाम् Sy

३. प्रथमभाविनी Sy.

४. पादयुक्तोषा P.D.
पादरहितोषाः Sv

५. प्रतिदिनं सूर्यचन्द्रादिवत्स्वस्याः परिभ्रमणाभावात्सूर्यगमनेनैव स्वगमनादपादिति च, एतीति चोपचर्यते Sy.

६. Omitted by P. D.

७. तत् तादृशम् Sy.

८. युवयोः प्रसिद्धं कर्म ... मित्रावरुणयोरहोरात्रदेवत्वादहोरात्रयोरन्तरालस्थैवोषस्त्वादेतत्कर्मत्वम् Sy.

९. क आचिकेत क आभिमुख्येन जानाति। 'कित ज्ञाने'। तत्स्तुत्यमित्यर्थः Sy.

१०. अस्य लोकस्य Sy.

११. ०भं P. गर्भो युवयोर्गर्भस्थानीयः शिशुरादित्य'। अहोरात्रयोर्मध्यकाल उत्पत्तेस्ताभ्यामेव मित्रावरुणत्वात्, 'अहोरात्रे वै मित्रावरुणौ' (TS.2.4.10.1) इति श्रुते Sy.

१२. कुडुबतारं P कुडुंबभा० D. भारं निर्वाहम् Sy

१३. स आहरति चित्समन्ताग्निर्वहत्येव। हरति वाऽस्य भारं जाड्यम्। चिदित्यवधारणे Sv.

१४. तत्कथमिति तदुच्यते। ऋतं सत्यं जगतः प्रकाशगमनादिरूपम् Sy.

१५. उक्तविलक्षणमन्धकारं गमनादिनिरोधं च Sv.

१६. तरति is suggested for चरति। नितरति निमज्जयति नाशयतीत्यर्थः। शिशोर्जंगद्भारवहनरूपं कर्म युष्मत्सामर्थ्यादिति Sv.

१७. VM. ignores मित्रावरुणा। आ। आ। चित्। नि

१८. प्रयच्छ० P.D.

१९. कमनीयानां दीप्तानां कन्यकास्थानीयानामुषसाम् Sy.

परित । पश्याम[१] । न कदाचिदपि[२] । उपनिषीदन्तं[३] पृथिव्याम् । अनवपृक्तान्यपतितानि[४] तेजांसि । वितितानि । आच्छादयन्तम् । मित्रावरुणयो[५] । प्रियम्[६] । आवासस्थानम्[७] ।

अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयद्ध्वसानुः ।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥५॥

अनश्वो जात[८] । अश्ववर्जित । अभीशुर्वर्जितश्चानयो[९] रथ[१०] । गमनशील[११] । प्रादुर्भूत[१२] । शब्दं कुर्वन्[१३] । पतति[१४] । विस्तृतोर्ध्वभागस्त्वस्मिंश्च प्रादुर्भूते[१५] । चित्तवर्जितम्[१६] । स्तोत्रम्[१७] । जुजुषु[१८] । युवान[१९] । मित्रे[२०] । वरुणे[२१] स्थितम्[२२] । तेज[२३] । प्रगृणन्त[२४] ।

आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन् ।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥६॥

आ धेनवः[२५] । मामतेय[२६] माम् । रक्षन्त्य[२७] । धेनवो युवयो । स्तोत्रप्रिय[२८] माम् । सर्व-

---

१. वयं परिपश्यामः Sy
२. क्षणमात्रमपि Sv.
३. निषीदन्तं न पश्यामः । एतदपि तयोः सामर्थ्यम् Sy. ४. ०क्तानि D अनवपृण्णान्यत एव वितितानि तेजांसि Sy
५. मित्रस्य वरुणस्य च Sy.
६. सर्वेषां प्रियभूतम् Sy
७. धाम तेज.स्थानभूतम् । यद्वा प्रियं धामेति सम्बध्यते । तयोः प्रेमस्थानमीदृशमादित्य युष्मदनुज्ञया सञ्चरन्त पश्यामसि Sy.
८. स एवादित्योऽनश्वो यद्यपि शीघ्रगाम्यश्ववरहितः Sy.
९. तथा ... आलम्बनाधारप्रग्रहस्थानीयरश्मिरहितः Sy.
१०. ०जितोऽश्वान० P.D
११. ०ल P. तथाप्यर्वा ... शीघ्रगमनवान् Sy. १२. ०ल P.D. सम्पन्नः Sy.
१३. Omitted by P. तथाविधोऽयमादित्यः ... अत्यर्थं क्रन्वयन् Sy.
१४ गच्छति Sy
१५. विस्तृ० D ऊर्ध्वसानुरुपर्युपरि समुच्छ्रयण. सन् Sy
१६ ०स्तमिव P
१७ अचित्तं चित्ताविषयम् Sv.
१८ ब्रह्म परिवृढमुक्तरूपं कर्म Sy.
१९ जुजु० P M. सेवन्ते । मनुष्याः सूर्यस्य निरालम्बान्तरिक्षसञ्चारात्मकं कर्म वरुणमित्रयोरधीनमिति स्तुवन्तीत्यर्थः Sy. २०. युवानो मिश्रयन्तस्तयोर्धाम्यारोपयन्तः Sy.
२१. मित्रे वरुणे चोभयोः Sy.
२२. तेजःस्थानम् Sy.
२३. प्रगृहन्तः P. ०न्ता M. युवयोस्तेजःप्रभवमिति प्रकर्षेण स्तुवन्तः Sy.
२४. ममतायाः पुत्रं दीर्घतमसं माम् Sy.
२५. अवन्त्यः प्रीणयन्त्यः Sy.
२६. धेनवो गावः Sy.
२७. परिवृढस्य कर्मणः प्रियतमं, परिवृढस्याग्नेः प्रीणयितारं वा Sy.

स्मिन्[१]। ऊधनि[२] यत्र[३] यत्र याचका याचन्ते तत्र सर्वत्र वर्तमाना[४]। अपीपयंस्तत[५]। अन्नम्[६]। भिक्षेत[७]। भिक्षामार्गम्[८]। जानन्नथ[९]। वाचा याचक प्रयच्छामीति[१०]। परिचरन्[११] याच्य[१२]। दीन महान्[१३]। रक्षेत्[१४]।

आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम्।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥७॥

आ वां मित्रावरुणा। मित्रावरुणौ[१५]! देवौ[१६]! यज्ञ प्रत्यहम्[१७]। वाम्[१८]। अन्नायम्[१९]। रक्षणार्थं च[२०]। आवर्तयामि[२१] तथा सति। अस्माकम्[२२]। स्तोत्रम्[२३]। युद्धेषु[२४]। शत्रूनभिभवतु[२५]। अस्माकमेव। वृष्टि[२६]। सुष्ठु[२७]। पारयित्री भवतु[२८]। दिवि भवेति[२९]।

---

१. स्वकीये Sy.
२. ऊधसि Sy.
३ Omitted by M.
४. अपिवयं P. Missing in M. आपीपयन्तसर्वत्र आप्याययन्तु। . . ऊधोगतेन क्षीरेण युवाभ्यां प्रदेयेन नोऽस्मान्रक्षन्तीत्यर्थः। 'मित्रावरुणाभ्यां पन्थास्' (TS. 7 5. 22 1) इति श्रुतेः Sy.
५ पितोर्हुतशिष्टस्यान्नस्य तावृगन्नम् Sy.
६. याचेत युष्मान् Sy.
७. एव प्रवत्तहविर्वयुनान्यनुष्ठानविषयज्ञानानि Sy.
८. हुतशेषो भक्षणीय इत्यवगच्छन्दीर्घतमाः Sv.
९. आस्येन भक्षयितुम् Sv.
१०. पुरि D.
युवां परिचरन् Sv.
११. अदितिमक्षण्डितमन्यूनमेतत्कर्म Sy.
१२. महन् P.
१३. यथा शिष्टं भिक्षेत यथा च कर्म समापनेन रक्षेत्तथाऽपीपयन्नित्यर्थः Sy.
१४. VM. ignores आ
१५. देवनशीलौ Sy.
१६. हव्यजुष्टिं हविःसेवाम् Sy.
१७. युवाम् Sy.
१८. नमस्कारोपलक्षितेन स्तोत्रेण Sy
१९. रक्षणेन निमित्तभूतेन Sy.
२०. आवर्तयेयम्। यद्वा नमस्कारेणावसाऽन्नेन चा ववृत्याम् Sy.
२१. ०र्तय . . . स्माक M. अस्माकं सम्बन्धि Sy.
२२ इदानीं क्रियमाण परिवृढ कर्म Sy.
२३ सङ्ग्रामेषु Sy.
२४. सह्याच्छत्रूनभिभूयात्। अनेन कर्मणा शत्रूनभिभवेयमित्यर्थः Sy.
२५. धार० M.
सुष्ठु पारयित्री भवत्विति शेषः। वृष्टौ सत्या व्रीह्यादिद्वारा कर्मसमाप्तेरिति भावः Sy.
२६ ०त M.
२७ Ms. D. puts the figure ॥१५२॥ here to indicate the end of one hundred and fiftysecond hymn. No such number is given in P. and M.

I. 153.

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥१॥

यजामहे[1]। यजामहे। वाम्। महान्तौ[2]। सङ्गतौ[3]। हविर्भि[4]। मित्रावरुणौ[5]! नमस्कारैश्च[6]। घृतैश्च[7]। घृत प्रति गन्तारौ[8]। अध। यत्[9]। युवयो[10]। अस्माकम्[11]। अध्वर्यव[12]। कर्मभिः[13]। न[14]। सम्भरन्ति[15] तैश्च यजामहे।

प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥२॥

प्रस्तुति[17]। त्यक्तु[16] स्तुति[16]। युवयो[18]। तेज[19]। नागमयति[20]? । अभिगच्छामि[21]। मित्रावरुणौ[22]! शोभनस्तुतिकौ[23]! यदा। वाम्[24]। यज्ञेषु[25]। होम कुर्वन्नध्वर्यु[26]। हविर्भिरनक्ति[26]। सुखकर[27] हवि[28]। युवाभ्याम्[28]। प्रेरयन्[29]। वर्षितारौ[30]! यष्टुमिच्छन्[31]। वाम्।

---

१. Missing in M. पूजयामो यजमाना ऋत्विजश्च Sy.
२. महन्तौ P D
३. संप्रीतौ M कीदृशा. ? सजोषाः समानप्रीतियुक्ता Sy.
४. पुरोडाशादिभि. Sy.
५. नमस्कारोपलक्षितैः Sv.
६. Omitted by P
७. घृतस्य स्रावयितारौ Sy.
८. घृतै ... ध M. अपि च Sy
९. यस्मात्कारणात् Sy.
१०. युवाम् Sy.
११. अस्मदीयाः Sy.
१२. अध्वर्यवोऽपि Sy.
१३. कर्मभिः स्वकीयैः Sy.
१४. ०भिश्च D. अत्र नशब्दोऽप्यर्थे। तेऽपि Sy.
१५. गोचयन्ति तस्माद्यजामहे Sy.
१६. त्य P. Omitted by D.
१७. प्रस्तुतिः प्रस्तावना, करोमीति (क्रियत इति) सङ्कल्प एव Sy.
१८ युवयो. सम्बन्धिनो यागस्य Sy.
१९ तावतैव युवयोर्धाम तेज स्थानम् Sy.
२० न प्रयुक्ति कृत्स्नप्रयोगो न सम्पन्नः Sy.
२१ प्राप्नोमि Sy.
२२. ०को P.D सुवृक्तिर्युवयोः शोभनावर्जकश्च युष्मत्परिग्रहादस्मि Sy.
२३ यदपा D
युवाम् Sy
२४. विदथेषु यज्ञेषु Sy.
२५. होमनिष्पादकोऽयमध्वर्युः Sy.
२६. ०भिनरनक्ति P होम ... भीरनक्ति M. हविषाऽऽगच्छति। होम करोतीत्यर्थः। यद्वा होता देवानामाह्वाता, एतन्नामक ऋत्विक् शस्त्रादिना वामनक्ति व्यञ्जयति Sy.
२७. सुख देवत्वलक्षणमयामीति शेषः Sy.
२८. युवयोः। ... युष्मत्सम्बन्धि Sy.
२९. सूरिर्युष्मन्माहात्म्यवित् Sy.
३०. कामानां वर्षितारौ Sy.
३१. यागं कर्तुमिच्छन् Sy.

पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥३॥

पीपाय[1]। वृद्धा[2] पयसा। गौः[3]। यज्ञार्थम्[4]। जनाय[5]। मित्रावरुणौ[6]। हविषां दात्रे[7]। युवाभ्याम्। यदा। हवि प्रेरयति[8]। यज्ञे। परिचरन्[9]। स[10]। दत्तहविष्को धेनु[11]? मानुष[12]। इव। होता[13] हविष प्रेरणाद्धोतृणा[14] सामानाधिकरण्यात्लिङ्गभेद[15]।

उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥४॥

उत वाम्। अपि च। युवयो[16]। प्रजासु[17]। मादयित्नीषु[18]। पयोलक्षणमन्नम्[19]। गाव। ओषधीना वर्धयित्र्य[20] आप[21]। च। आप्याययन्ति[22]। देव्य[23]। अपि च। अस्माकम्[24]।

---

१. M. adds धेनुः after पीपाय।
२. अदिति॰, अदीना बहुक्षीरा सती पीपाय क्षीरेण पुन. पुनराप्यायताम्... पयस्यादिहविष्कं यज्ञं पयोव्रतादिषु यजमानं चेत्यर्थ Sy.
३. प्रीणयित्री गौः Sy.
४. युष्मत्सम्बन्धियज्ञाय Sy.
५. यजमानाय Sy
६ ०णो P.
७. हविषो दात्रे Sy.
८. हिनोति हविरादिना प्रीणयति। तदा पीपायेत्याह Sy.
९. स्तुत्या पूजयन् Sy.
१०. स प्रसिद्धः Sy.
११. रातहव्य एतन्नामा राजा Sy.
१२. ०विष्के ... धे० M.
१३. मनुष्यस्य यजमानस्य सम्बन्धी Sy.
१४. एतन्नामक ऋत्विगिव Sy.
१५. ०तृस० M.
१६. ०ण्यालि० D.
१७. VM. ignores अदितिः
१८. युवाम् Sy. मित्रावरुणावुच्येते ... युवयोरर्थाय SKN.
१९. यजमानलक्षणासु Sy. स्त्रीलिङ्गनिर्देशान्मनुष्यजातिषु SKN. मनुष्येषु Dur.
२०. M. adds च after मादयित्नीषु। युष्माभिर्मदनीयासु Sy. मदयित्नीषु देवानाम्। सप्तमीश्रुतेः स्थितमिति शेषः SKN मदयितृषु वर्तमानम् Dur.
२१. अदनीयमन्न पयोरूपं पुरोडाशादिरूपं वा Sy. अन्धोऽन्नपेयस्याख्या SKN. हविर्लक्षण यदेतदस्मिन्नहन्येभिर्मंनुष्यैर्भवद्भ्या देयं पयस्याख्यमाज्याख्यं च Dur.
२२. वर्द्ध० D. व्रीह्यादिप्रवर्धकानि Sy.
२३. उदकानि Sy.
२४. तासामभिवृद्ध्यर्थं पीपयन्त आप्याययन्तु Sy. प्यायतेर्वृद्ध्यर्थस्येदं रूपम्। वर्धयन्त्य. SKN. आसा गवामुपकारं कुर्वत्यो वर्धयन्तीत्यर्थः। यदेतदशनपानयोग्यमाज्यसाक्षाज्यलक्षणमाभिरद्भिर्गो-भिश्च युवयोरन्धो वर्ध्यते Dur.
२५. द्योतनशीलाः Sy. देव्यः SKN. दानादिगुणयुक्ताः Dur.
२६. अस्मत्सम्बन्धिनः Sy. अस्माकमृत्विजाम् SKN.

प्रत्न[१]। सर्वस्यास्य[२] जगत[२]। पति[३]। दमयितेन्द्रश्चाप्याययति[४]। कामयतम्[५]। पिबत[६] च। उस्रियायाः[७]। पय[८]।[९]

---

१. पूर्व्यः पूर्वकालीनः Sy. पुराणः ... चिरन्तन एव याज्य इत्यर्थः SKN. अस्मत्पूर्वो यजमानः Dur.

२. यज्ञस्य Sy. अन्नस्य SKN. हविष Dur.

३. पालकोऽग्निः Sy. स्वामी SKN पतिः। पूर्वं हि द्रव्यस्य यजमानः पतिर्भवति तत. स तदृत्विग्भ्यः समर्पयति देवतायै संस्कुरुतेतदिति। ततस्ते तस्य हविषः पतयो भवन्ति। तानपेक्ष्य यजमान. पूर्व्यः पतिः। तदपेक्षयैवर्त्विज आहुः Dur.

४. मम० M.
दाता भवत्विति शेष.। अग्नौ हूयमानत्वात्सर्वेषामपि हविषाम् Sy.
युवाभ्यां दन् ददद् दाता दास्यते तदित्यर्थ. SKN. तेनाप्येतद्भवन्तावेवोद्दिश्यास्मान्प्रत्युत्सृष्टम्। एवमपि स दन्भवति। अपि वय यथाव्यादिष्टमेव तेन पूर्व्येण हविष्पतिना भवद्भ्यामेतद् दद्म. Dur.

५. यस्मादेवं तस्माद्धे मित्रावरुणौ वीत भक्षयत पुरोडाशादिकम् Sy. एतद् द्वय ज्ञात्वा वीतमश्नीतम् .. यदस्य नातिद्रव नातिकठिनं तदश्नीतम् SKN नातिकठिनस्याशनयोग्यस्य स्वं भागमस्माभिर्दीयमानमश्नीतं युवामित्यर्थ.। ... पारिशेष्याद् वीतमित्यस्य शब्दस्य पयस्यया सह सम्बन्ध.। सा च नातिकठिना नातिद्रवाऽशनयोग्या। तस्माद् वीतमित्येष शब्दोऽशनार्थ इत्युपपद्यते। लोकेऽपि हि नातिकठिने नातिद्रवेऽशनशब्दः प्रसिद्धोऽश्नाति पायसमिति Dur.

६. अपिबन्तं P. यवमपिबं M. पातम्। यद्वा घनीभूतं पयस्याया वीतं स्रवद्रूपं पातम् Sy. पिबतं च। ... यद् द्रवञ्च तच्च पिबतम् SKN. पिबतं च यदेतदाज्यस्य स्व भागमुपस्तरणाभिघारणमम्बद्धम्। ... एवमस्मिन्मन्त्र उस्रियायाः पयसा निष्पन्नस्येति श्रूयमाणे पयस्याज्ये प्रतीयेते। तयोराज्यं पेय, तत्पातमित्यनेन सम्बध्यते Dur.

७ क्षीराद्युत्स्राविण्या गोः Sy. गो. सम्बन्धिन इति शेषः। उस्रियेत्यादिपठमानस्यैव निर्विविक्षयोपन्यास·। उत्स्राविणो येऽस्या भोगास्त ऊर्ध्वं स्रवन्ति गच्छन्ति क्षीरदधिनवनीतक्रमेण SKN अश्नीतं पिबतं पयस उस्रियायाः। उस्रियेति गोनाम। उत्स्राविणोऽस्या भोगाः (उस्रेति च) N 4.19.

८. पयोविकारभूतस्य पायसाख्यस्य हविषः SKN पयस्याख्यस्योस्रियायाः पयसा निष्पन्नस्य Dur.
N. 4. 19; SKN. II 254

९. Ms. D. puts the figure ॥१५३॥ here to indicate the end of one hundred and fiftythird hymn. No such number is given in P. and M.

I. 154.

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥१॥

विष्णोर्नु[1] कम्। विष्णो। कर्माण्यहम्[2]। क्षिप्रमेव[3]। ब्रवीमि[4]।
य[5]। पृथिव्या[6] भवान्। लोकान्[7]। विममे[8]। यश्च। द्याम्[9]।

---

१. विष्णोरेव Mah., U. हे नरा विष्णोर्व्यापनशीलस्य देवस्य Sy.

२. कर्माणि Mah.
वीरकर्माणि Sy, BB

३. नु कमित्यव्ययमवधारणार्थम् Mah. नु कमतिशीघ्रम् ..अत्र यद्यपि 'नु कम्' इति पदद्वयं तथापि यास्केन 'नवोत्तराणि पदानि' (Ngh. 3.13) इत्युक्तत्वाच्छाखान्तर एकत्वेन पाठाच्च 'नु' इत्येतस्मिन्नेवार्थे 'नु कम्' इति पदद्वयम् Sy. 'नु कम्' इति निपातसमुदायोऽवधारणार्थः U नु कमिति क्षिप्रनाम BB

४. प्रब्रवीमि Mah, Sy, U प्रकर्षेण (प्रकर्षेण) ब्रवीमि। छान्दसो लुड्। 'बहुलं छन्दस्यमाड्योगेऽपि' (Pa. 6.4.75.) इत्यडभाव BB.

५. विष्णु Mah., Sy, U

६. भवा M. पृथिवीसम्बन्धीनि Sy. विष्णुविशेष्यते। यः पार्थिवानि पृथिव्यन्तरिक्षद्युलोकभवानि ... 'पृथिव्या ष्ठाञौ' (Vār. 4.1.85.) इत्यञ्प्रत्यय BB.

७. ०वाल्लोकं P. पृथिव्यन्तरिक्षद्युलोकस्थानानि ... 'लोका रजांस्युच्यन्ते' (N.4.19.) इति यास्कोक्तेरजःशब्दो लोकवाचकः। यद्वा यः पार्थिवानि रजांसि पार्थिवपरमाणून् विममे परिगणितवान् Mah. रजांसि रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीन्यग्निवाय्वादित्यरूपाणि ...अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः। तथा च मन्त्रान्तरम्, 'यदिन्द्राग्नी अवमस्यां पृथिव्या मध्यमस्यां परमस्यामुत स्थः' (RV.I.108.9.) इति। तैत्तिरीयेऽपि 'योऽस्या पृथिव्यामस्यायुषा' इत्युपक्रम्य 'यो द्वितीयस्यां तृतीयस्यां पृथिव्याम्' (TS.1.2.12.1.) इति। तस्मात्लोकत्रयस्य पृथिवीशब्दवाच्यत्वम् Sy पृथिव्यन्तरिक्षद्युलोकानि...रजांसि, 'लोका रजास्युच्यन्ते' (N 4.19.) इति रजश्शब्दो लोकवचन. U. पृथिवीशब्देन त्रयो लोका उच्यन्ते। ... यः पार्थिवानि रजांसि ज्योतींषि, अग्निविद्युत्सूर्यात्मकानि। यद्वा पृथुषु भवानि रजांसि वसूनि BB.

८. निममे Mah. विशेषेण निममे Sy. निर्मितवान् U. विनिर्मितवान् BB.

९. देवानां सहवासस्थानं द्युलोकरूपम्। ... सह देवास्तिष्ठन्ति यस्मिंस्तत्सधस्थम् Mah.
सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षम् Sy. सहस्थानं देवानाम् U. सहस्थानं सर्वेषामन्तरिक्षम्। 'सुपि स्थः' (Pa. 3.2.4.) इति कः। 'सध मादस्थयोः०' (Pa. 6.3.96.) इति सधादेशः BB.

उत्तभ्नाति[1]। विक्रममाण[2]। त्रेधा[3]। उरुगमन[4] उरुभिर्वा स्तोतव्य.[5][6]।

---

१. आदक्तभ्नाति M.
यश्च विष्णुरुत्तरमुपरितनम् Mah.
उद्गततरमतिविस्तीर्णम् Sy.
उत्तरं द्युलोकाख्यम् U.

२. यथाऽश्वो न पतति तथा स्तम्भितवान् ... 'स्कम्भ रोधने' Mah. तेषामाधारत्वेन स्तम्भितवान्निर्मितवानित्यर्थः। अनेनान्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्त भवति। यद्वा यो विष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजासि पृथिव्या अधस्तनसप्तलोकान्विममे विविधं निर्मितवान्। रजश्शब्दो लोकवाची 'लोका रजास्युच्यन्ते'(N. 4 19) इति यास्केनोक्तत्वात्। किंच यश्चोत्तरमुद्गततरमुत्तरभाविन, सधस्थ सहस्थानं पुण्यकृता सहनिवासयोग्यं भूरादिलोकसप्तकमस्कभायत् स्कम्भितवान्त्सृष्टवानित्यर्थः।... अथवा पार्थिवानि पृथिवीनिमित्तकानि रजासि लोकान्विममे। भूरादिलोकत्रयमित्यर्थः। भूम्यामुपार्जितकर्मभोगार्थत्वादितरलोकानां तत्कारणत्वम्। किंच यश्चोत्तरमुत्कृष्टतर सर्वेषां लोकानामुपरिभूतम्। अपुनरावृत्तेस्तस्योत्कृष्टत्वम्। सधस्थमुपासकाना सहस्थानं सत्यलोकमस्कभायत् स्कम्भितवान् ध्रुवं स्थापितवानित्यर्थ. Sy. स्तम्भितवान् U. अस्तम्भयदधारयत्। अस्कभ्नादिति वक्तव्ये 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भ्यः श्नुश्च' (Pa. 3.1.82.) इति श्नाप्रत्ययः। छन्दसि शायजपि(Pa.3.1.84.)इति व्यत्ययेन हेरभावेऽपि श्नश्शायजादेशः BB.

३. अग्निवायुसूर्यरूपेण पदत्रयं निदधानः। विपूर्वस्य क्रमतेः 'लिटः कानज्वा' (Pā. 3.2.106.) इति कानचि रूपम् Mah. विविधं क्रममाणः। विष्णोस्त्रेधा क्रमणम् 'इदं विष्णुर्वि चक्रमे' (RV. I. 22 17.) इत्यादिश्रुतिषु प्रसिद्धम् Sy. विभज्य क्रममाणः पदत्रयं कुर्वन्, लिट. कानजादेशः BB.

४ त्रि० P D.M. त्रिषु लोकेषु Mah.
त्रिप्रकारं स्वसृष्टाँल्लोकान् Sy.
त्रिषु लोकेषु BB.

५. उरुर्गायो गमनं यस्य, उरुभिर्महात्मभिर्गीयत इति वा Mah
उरुभिर्महद्भिर्गीयमानोऽतिप्रभूतं गीयमानो वा। य एवं कृतवांस्तादृशस्य विष्णोर्वीर्याणि प्रवोचम् Sy
उरुगमनः U.
उरुभिर्महात्मभिर्गायत इत्युरुगायः। 'कै गै शब्दे' यद्वा उरुभिर्गन्तव्यः। 'गाङ् गतौ'। .. य इत्थमित्थमकरोत्तस्य विष्णोर्वीर्याणि प्रवोचम्, स मे धीवाढर्धं करोत्विति BB.

६. oव्या P

७. VM. ignores कम्। प्र
The YV. adds the words विष्णवे त्वा to the stanza of the RV.
विष्णवे हविर्धानशकटाभिमानिविष्णुप्रीत्यर्थं त्वां निहन्मि निखनामीति शेषः Mah.
This stanza is borrowed by YV. 5.18 ; TS. 1.2.13.3.

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥

प्र तद्विष्णुः । प्र । स । विष्णुः । स्तूयते । वीर्येण । मृग । इव । भयानक । कुत्सित-कर्मचारी । पर्वते वर्तमान । यस्य । विस्तीर्णेषु । त्रिषु । पदनिधानस्थानेषु । सर्वाणि । भूतानि ।

---

१. स प्रसिद्धो विष्णुः ... तदिति लिङ्गव्यत्ययः Mah. यस्येति वक्ष्यमाणत्वात्स इत्यवगम्यते । स महानुभावः Sy.

२. प्रस्तूयते सर्वैरिति शेषः । ... प्र स्तवत इत्यत्र व्यत्ययेन यकः स्थाने शप्प्रत्ययः Mah.
स्तूयते सर्वैः । कर्मणि व्यत्ययेन शप् Sy
स्तूयते । यकः स्थाने शप् छान्दसः U.

३. असाधारणवीरकर्मणा Mah. स्वकीयेन वीरकर्मण। पूर्वोक्तरूपेण Sy. वीरकर्मणा U.

४. किम्भूतो विष्णुः ? 'मृजूष् शुद्धौ' मार्ष्टि शोधयतीति मृगः । नोऽनर्थकः पादपूरणः Mah.
वीर्येण स्तूयमानत्वे दृष्टान्तः । ... सिंहादिरिव । यथा स्वविरोधिनो मृगयिता सिंहः Sy. यथा मृग. सिंहः स्तूयते U.

५. बिभेत्यस्मादसौ भीमः Mah. भीमो भीतिजनकः ... तद्वयमपि मृगोऽन्वेष्टा शत्रूणां भीमो भयानकः सर्वेषा भीत्यपादानभूतः । परमेश्वराद् भीतिः 'भीषास्माद्वातः पवते' (TA. 8.8.1.) इत्यादिश्रुतिषु प्रसिद्धा Sy. बिभेत्यस्मादिति भीमः U.

६. कौ पृथिव्यां मत्स्यादिरूपेण चरतीति कुचरः M. कुत्सितहिंसादिकर्ता, दुर्गमप्रदेशगन्ता वा ... कुचरश्शत्रुवधादिकुत्सितकर्मकर्ता कुषु सर्वासु भूमिषु लोकत्रये सञ्चारी वा Sy. कुत्सितचारी प्राणिवधजीवनः U.

७. गिरि वेदवाक्ये गिरौ वेहे वाऽन्तर्यामिरूपेण तिष्ठतीति गिरिष्ठाः । अथवा न इवार्थः । गिरिष्ठाः पर्वतस्थितः कुचरः कुत्सितचारी प्राणिवधजीवनो भीमो भयङ्करो मृगो न सिंह इव स यथा वीर्येण स्तूयते तद्वत् Mah. पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते ... तथा गिरिष्ठा गिरिवदुच्छ्रितलोकस्थायी । यद्वा गिरि मन्त्राविरूपाया वाचि सर्वदा वर्तमान ईदृशोऽयं स्वमहिम्ना स्तूयते Sy.
गिरिष्ठाः पर्वतस्थानः । यद्वा हीनोपमानत्वादन्यथा व्याख्यायते । सर्वैरेतैर्मृगादिभिः पर्वतैरिन्द्रो विशिष्यते । स हि विष्णोरुपमानं भवितुमर्हति । मृगो न ... यथा शुद्धोऽपहतपाप्मा इन्द्रः । भीमो भीषणः, कुचरः क्वायं चरतीति कुचर । कुशब्दस्य सम्प्रसारणं छान्दसम् । गिरिष्ठा गिरिर्मेघस्तत्रेन्द्रो वृष्टयर्थं तिष्ठति । अथ कौ पृथिव्यां चरतीति कुचरो मत्स्यकूर्मादिरूपेण । अथ गिरि वेदवाक्ये तिष्ठति गिरिष्ठाः । अथ वेहोऽपि गिरिरुच्यते तस्मिन्नात्मत्वेन तिष्ठतीति गिरिष्ठाः U.

८. विष्णोः Mah, Sy., U.

९. उरुषु प्रभूतेषु Mah. विस्तीर्णेषु Sy. महत्सु U.

१०. त्रिसङ्ख्याकेषु Sy.

११. पादप्रक्षेपणस्थानेषु लोकेषु Mah.
पादप्रक्षेपेषु Sy.
विक्रमणेषु लोकेषु U.

१२. भूतजातानि Mah., Sy., U.

अधिवसन्ति[1][2]।

प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥३॥

प्र विष्णवे[3]। प्रगच्छतु[4]। विष्णवे[5]। बलकरम्। स्तोत्रम्[6]। पर्वते वर्तमानाय[7]। महागमनाय[8]। वर्षित्रे[9]। यत्[10]। इदम्[11]। दीर्घम्[12]। प्रकर्षेण सम्बद्धम्[13]। त्रैलोक्यम्[14]। एक[15]। त्रिभि। एव। पदै[16]। परिचिच्छेद[17]।

यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥४॥

यस्य त्री[18]। यस्य। त्रीणि। पदानि[19]। ओषध्यादिभि[20] स्वरसै। पूर्णानि। अक्षीयमाणान्नेन[21][22]।

---

१. अधिनिवसन्ति स स्तूयत इत्यर्थः Mah. आधित्य निवसन्ति स विष्णुः स्तूयते Sv. उपरि निवसन्ति U.

२. मृगो न भीमः कुचरो गिरिष्ठाः। मृग इव भीमः कुचरो गिरिष्ठाः। मृगो मार्ष्टेर्गतिकर्मणः। भीमो बिभ्यत्यस्माद्, भीष्मोऽप्येतस्मादेव। कुचर इति चरति कर्म कुत्सितम्। अथ चेद् देवताभिधानं क्वाय न चरतीति। गिरिष्ठा गिरिस्थायी। गिरिः पर्वतः। समुद्गीर्णो भवति। पर्ववान्पर्वतः। पर्व पुनः पृणातेः प्रीणातेर्वा। N. 1 20. This stanza is borrowed by YV. 5.20.

३. विष्णुमेतु प्राप्नोतु। कर्मणः सम्प्रदानत्वाच्चतुर्थी Sy.

४. सर्वव्यापकाय Sy.

५. अस्मत्तुल्यादिजन्यं बलं महत्त्वम् Sy.

६. मननं स्तोत्रं मननीयं शूषं बलं वा Sy.

७. कीदृशाय ? गिरिक्षिते वाचि गिरिवद्बृहत्प्रदेशे वा तिष्ठते Sy.

८. बहुभिर्गीयमानाय Sv.

९. वर्षित्रे कामानाम्। एवं महानुभावं शूषं प्राप्नोतु Sy.

१०. कोऽस्य विशेष इत्युच्यते, यो विष्णुः Sy.

११. इव प्रसिद्धं दृश्यमानम् Sy.

१२. अतिविस्तृतम् Sy.

१३ नियतम् Sy.

१४. सहस्थानं लोकत्रयम् Sy.

१५. एक एवाद्वितीयः सन् Sy.

१६. पादैः Sy.

१७. विशेषेण निर्मितवान् Sy.

१८. विष्णोः Sy.

१९. पादप्रक्षेपणानि Sy.

२०. ०भि P. मधुना मधुरेण दिव्येनामृतेन Sy.

२१. अक्षीयमाणानि Sy.

२२. स्वधयाऽन्नेन Sy.

मादयन्ति[1]। यः[2]। च। पृथिवीम्[3]। च[4]। द्याम् चान्तरिक्षसम्बन्धत्वात्[5]। त्रिसन्धानम्[6]। दाधारेत्येतदेवोक्तम्। एको दाधार[7]। भुवनानि[8]। सर्वाणीति।

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥५॥

तदस्य[9]। तत्। अस्य[10] विष्णो[11]। प्रियम्[12]। स्थानम्[13]। अभिप्राप्नुयात्[14]। नर[15]। यत्र[16]। देवकामा[17]। मदन्ति[18]। विस्तीर्णं क्रममाणस्य[19]। स्तोत्रैर्वन्धनकृत्[20]। इत्थ तत्स्थानमभिप्राप्नोति। विष्णो[21]। पदे[22]। परमे दिवि[23]। उदकस्य[24]। उत्पत्तिस्थानम्[25]।

---

१. मादयन्ति तदाश्रितजनान् Sy.
२. यं P.D.M ३. एव Sy.
४. प्रख्यातां भूमिम् Sy.
५. द्योतनात्मकमन्तरिक्षं च Sy.
६. त्रयाणा धातूनां समाहारस्त्रिधातु। पृथिव्यप्तेजोरूपधातुत्रयविशिष्ट यथा भवति तथा Sy.
७. धृतवान्...उत्पादितवानित्यर्थः। छन्दोगारण्यके 'तत्तेजोऽसृजत तदभ्यमसृजत ता आप ऐक्षन्त' इति भूतत्रयसृष्टिमुक्त्वा 'हन्ताहमिमास्तिस्रो देवतास्तासां त्रिवृत त्रिवृतमेकैका करवाणि' (Chā U 6.3.2-3) इत्यादिना त्रिवृत्करणमुक्तिरुपपादिता। यद्वा त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः Sy.
८ भूतजातानि चतुर्दशलोकांश्च। यद्वा पृथिवीशब्देनाधोवर्तीन्यतलवितलादिसप्तभुवनान्युपात्तानि। द्युशब्देन तदवान्तररूपाणि भूरादिसप्तभुवनानि। एवं चतुर्दशलोकान्विश्वा भुवनानि सर्वाण्यपि तत्रस्थानि भूतजातानि Sy.
९. सर्वैः सेव्यत्वेन प्रसिद्धम् Sy.
१०. महतो विष्णोः Sy. ११. प्रियभूतम् Sy.
१२. अन्तरिक्षनामैतत्।...अविनश्वरं ब्रह्मलोकमित्यर्थः Sy. पाथोऽन्तरिक्षम्। यथा व्याख्यातम् N.6.7.
१३ व्याप्नुयाम् Sy.
१४ तदेव विशेष्यते—यत्र स्थाने Sy.
१५. देव द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तः Sy.
१६. तृप्तिमनुभवन्ति, तदश्यामित्यन्वयः Sy.
१७. ०र्णं M. पुनरपि तदेव विशेष्यते...अत्यधिकम् Sy १८. सर्वं जगदाक्रममाणस्य तत्तदात्मना Sy. १९. ततोऽधिकं नास्तीत्याह...स हि बन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरो वा, तस्य एव प्राप्तवतां न पुनरावृत्तेः। 'नच पुनरावर्तते' (Chā. U. 8 15.1.) इति श्रुतेस्तस्य बन्धुत्वम्। हिशब्दः सर्वभुस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः Sy.
२० इत्थमुक्तप्रकारेण Sy. २१. अत एव विष्णोर्व्यापकस्य परमेश्वरस्य Sy.
२२ स्थाने Sy. २३. उत्कृष्टे निरतिशये केवलसुखात्मके Sy. २४. मधुरस्य Sy.
२५. The passage beginning with अस्य and ending with उत्पत्तिस्थानम् is omitted by P. उत्सो, निष्यन्दो वर्तते। तदश्याम्। यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति। सङ्कल्पमात्रेणामृतकुल्यादिभोगाः प्राप्यन्ते तादृशमित्यर्थः Sy.
२६. VM. ignores सः। हि

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥६॥

ता वाम् । तानि । इन्द्राविष्णवो । स्थानानि । कामयामहे । गमनाय । यत्र । रुशमय. । बहु-
शिरस्का । गच्छन्त । अत्र । एत । तत् । महागते । वर्षिनुर्विष्णो । परार्धस्थम् । पदम् । भासते ।

---

१. तान् M.
गन्तव्यत्वेन प्रसिद्धानि Sy.

२. हे पत्नीयजमानौ वां युष्मदर्थम् Sy
वां व्यत्ययेन द्वितीयाद्विवचनमेकवचनस्य स्थाने, त्वां विष्णुं स्तुवन् SKN.

३. सुखनिवासयोग्यानि स्थानानि Sy.
गृहाणि निवासस्थानानीत्यर्थः SKN
निवासस्थानानि Dur

४. कामयामहे । तदर्थं विष्णु प्रार्थयाम इत्यर्थः Sy.
कामयामहे SKN.

५. युवयोर्गमनाय Sy. गमनायात्मन. । अथवा वामिति षष्ठीद्विवचनम् । दम्पती पतिपत्नी यजमानावुच्येते । युवयोर्गमनाय कामयामहे वयमृत्विजः SKN.

६ येषु वास्तुषु Sy.

७. अत्यन्तोन्नत्युपेता बहुभिराश्रयणीया वा Sy. अयणादिक्रियायोगाच्छृङ्गस्थानीयत्वाद्वा दीप्तिरत्र शृङ्गमुच्यते, बहुदीप्तयः SKN.
बहुदीप्ताः Dur.

८. अयना गन्तारोऽतिविस्तृताः । यद्वा । यागो गन्तारः । अतादृशाः, अत्यन्तप्रकाशयुक्ता इत्यर्थः Sy. अयना गमनशीलाः, क्रियाभेदादुत्तरोऽर्धर्चो भिन्नं वाक्यमत एवमुच्यते SKN. अयना मुहूर्तमप्यनवस्थायिनः Dur.

९. वास्त्वाधारभूते द्युलोके Sy. एष्वेव स्थानेषु SKN.
तेषु स्थानेषु Dur

१०. खलु Sy. अहशब्दो विनिग्रहार्थीयः SKN

११. तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धम् Sy.

१२. बहुभिर्महात्मभिर्गतिव्यस्य, स्तुत्यस्य Sy. रसादानादिक्रियाद्वारेण बहुगतेः SKN.
उरुगमनस्य Dur.

१३. कामानां वर्षितुर्विष्णोः Sy. वर्षितुः, विषेर्वैतद्रूपम्, ऋकारोपजनेन । व्याप्तुरित्यर्थ. SKN.

१४. निरतिशयम् Sy.
प्रकृष्टम् SKN.

१५ स्थानम् Sy. विष्णोः स्वभूतम् ... पदम् ... स्थानमादित्यमण्डलाख्यम् SKN. आदित्यमण्डलस्थानम् । स्थाने हि पदसञ्ज्ञा, पदस्य इति लोकेऽपि वक्तारो भवन्ति Dur.

१६. स्वमहिम्ना स्फुरति Sy. अग्रे भाति, अग्रे दीप्यते, अर्वागिदं सर्वं कृत्वा भातीत्यर्थः Dur.

बिस्तीर्णम्।

I. 155.

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुर्वरुतेव साधुना ॥१॥

प्र वः पान्तम्। यूयम्। सोमाख्यस्याऽन्नस्य। पानीयम्। सत्कर्म कर्तुमिच्छते। महते। शूरायेन्द्राय। विष्णवे। च। प्रयच्छत। यौ। पर्वतानाम्। उच्छिते देशे। शत्रुभिरहिंस्यौ।

---

१. अतिप्रभूतम् Sy.

भूरि प्रभूतम्। अथवा परमं पद दिव एकदेशः पराध्यंशब्दवाच्यः, तेन च तात्स्थ्यान्मण्डलं लक्ष्यते। कुत एतत्। 'दिव आहुः परे अर्धे पुरीषिणम्' (RV. I. 164 12b) इति मन्त्रान्तरे दर्शनात्। तथा च भाष्यकारः—'परमं पदं पराध्यंस्थम्' (N.2.7.) इत्याह। अवभाति, अवभासते ज्ञापयत इत्यर्थः। 'भूरीति बहुनामधेयम्' इति पठितस्यापि निर्विवक्षया पुनर्वाव 'प्रभवतीति सतः' इति कारकपरिग्रहार्थम्। प्रभवति हि तत्सर्वस्यानुग्रहाय SKN.

२. अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः Sy. तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गाः। भूरिति बहुनो नामधेयम्। प्रभवतीति सतः। शृङ्गं श्रयतेर्वा। शृणातेर्वा। शम्नातेर्वा। शरणायोद्गतमिति वा। शिरसो निर्गतमिति वा। अयासोऽयनाः। तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं पराध्यंस्थमवभाति भूरि। पादः पद्यतेः। तन्निधानात्पदम्। पशुपादप्रकृतिः प्रभागपादः। प्रभागपादसामान्यादितराणि पदानि N. 2.7; SKN. II. 54.

३. VM. ignores अव

Ms. D. puts the figure ॥१५४॥ here to indicate the end of one hundred and fiftyfourth hymn. No such number is given in P. and M.

४. हे अध्वर्यवादयो वो युष्माकं सम्बन्धि Sy.

५ अन्धः. सोमरूपमन्नम् Sy.

६ वनीयं P. पनीयं D. पालनस्वभावं पातव्यं वा Sy

७ संक० M.

८. धियायते स्तुतीरिच्छते Sy.

९. विक्रान्ताय Sy.

१०. व्यापकार्यतन्नामकाय देवाय च Sy.

११. प्रकर्षेण सम्पादयत Sy.

१२. कस्तयोरतिशय इत्युच्यते।... याविन्द्राविष्णू Sy.

१३. प्रीणनवतां पूरणवतां वा... उक्तलक्षणाना लोकानाम् Sy. पर्ववान्पर्वतः। पर्व पुनः पृणातेः प्रीणातेर्वा N. 1.20.

१४. सानुनि समुच्छ्रितप्रदेशे। सर्वलोक इत्यर्थः। अथवा मेघानां समुच्छ्रितप्रदेशे। 'पर्वतो गिरिः' (Ngh. I.10.) इति मेघनामसूक्तत्वात्, तत्र Sy.

१५. Omitted by M.

१६. ०स्था M. अवम्भनीयौ परैरनभिभाव्यौ Sy.

महान्तौ। तस्थतुः। यथा। अश्वेन। कल्याणेन कश्चित् तिष्ठति।

त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥२॥

त्वेषमित्था। दीप्तम्। इत्थम्। सङ्गतम्। कर्मवतः। इन्द्राविष्णू। सोमस्य पाता। युवयो। वर्धयति। यो। मर्त्यहिसार्थम्। प्रतिधीयमानम्। एव। वैद्युतस्याऽग्नेरशनेः। निरसितु। तेज। यजमानाद् रक्षथो यथा स न विद्युद्धतो भवति।

ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥३॥

ता ईम्। ता। एनत्। सोमपाव्ना। महत्। पौंस्यम्। वर्धयन्तीन्द्राविष्णुभ्या वृष्टा

---

१. अत एव महो महान्तौ। यद्वा। महो महसि स्वतेजसि सानुनीत्यनेन सम्बन्धः Sy. २. तिष्ठतः Sy.
३. तत्र दृष्टान्तः। अश्वता वेगवताऽश्वेनेव। तेन यथाऽत्युच्छ्रित प्रदेशमारोहति तद्वदुच्च पदमारूढौ। तस्मात्ताभ्यामर्चत Sy.
४ अभिमतदेशप्रापणसमर्थेन Sy.
५. ०मित्था P. इति सा निगदव्याख्याता N. 11.8
६. प्रदीप्तम् Sy.
७. समरणं सम्यग्यागदेशगमनम् Sy
८. इष्टप्रदानादिकर्मवतो. Sy.
९. हुतशिष्टसोमपीतयजमानः Sy.
१०. रक्षति यागेन पूजयति। यद्वा शिमीवतोः प्रहरणादिकर्मवतोर्वा युवयोस्त्वेषं दीप्तं शौर्योपेतं, समरणं सम्यक्परस्परगमनोपेत वृष्टिप्रदानाय मेघविदारणरूपं यजमान उरुष्यति रक्षति स्तौतीत्यर्थः Sy.
११. इन्द्राविष्णू Sy
१२. मध्यांह्न० P. मर्त्याय मनुष्याय हविर्वात्रे यजमानाय Sy.
१३ प्रतिधातव्य फलरूपम् Sy
१४. अग्नेः सकाशात् Sy.
१५ ०शनेः D
१६ अभिमतक्षेप्तुर्निरसितुर्वा शत्रूणाम् Sy.
१७. अस्त्र चलनशील प्रदानशीलमश्वादिकम् Sy.
१८. अविच्छेदेन प्रवर्तयथः। वन्हौ हुतं हविः स्वीकृत्य तन्मुखादेव फलमपि दास्यथ इत्यर्थः Sy.
१९. ०सन्नवि० P.
२०. सोमरूपाः प्रसिद्धा आहुतयो यजमानेन हुताः Sy.
२१ ईमित्यनर्थको वा Sy.
२२ अस्येन्द्रस्य Sy.
२३. पास्यं M.
पुंसः कर्म वक्ष्यमाणरूपं बलम् Sy.
पौंस्नम् is suggested.
२४. वर्धयन्ति Sy.
२५. ०भ्या D.
२६. पृष्ठा P.

आप.[1] स[2] द्यावापृथिवी।[3] भोगाय।[4] उदकाय च।[5] निनयति।[6] स पुत्र सन्।[7] गुह्यम्।[8] प्रसिद्धं[9] च ह्रे नामनी।[10] पितु सकाशात्।[11] अथ बौधायनोक्त 'सोमयाजी' इति तृतीयम्।[12] नाम।[13] दिवः।[14] रोचने यज्ञे।[15] धारयति।[16]

तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥४॥

तत्तवित्।[17] तत्।[18] तत्।[19] विष्णो।[20] वीर्यम्।[21] स्तुम.।[22] ईश्वरस्य।[23] पालयितु।[24] वृकवर्जितस्य[25] रक्षोवर्जितो हि यज्ञात्मा विष्णु।[26] कामाना सेक्तु।[27] यो देव।[28] पार्थिवानि रजामि।[29] त्रिभि।[30] एव।[31] विविधगमनै पदै।[32] विस्तीर्णम्।[33] क्रान्तवान्।[34] रक्षसा हननेनोरुगमनाय[35] भूतजाताय।[36] जीवितुमिति।[37]

---

१. स चेन्द्रः सोमपानजनित सामर्थ्यम् Sy
२. द्यावापृथिव्यौ Sy.
३ तेषां भोगाय रक्षणाय च Sy
४. रेतसे प्राणिना पुत्राद्युत्पादनसामर्थ्याय Sy
५. नितरां प्रापयति Sy.
६. पुत्रत्राता सर्वो जनः Sy
७. अवर निकृष्ट नाम पौत्रसञ्ज्ञम् Sy.
८. पर तदुत्कृष्ट पुत्र इति नाम Sy.
९. प्रसिञ्चद्यो M.
१०. पालकाद्विष्णोरनुग्रहात्। यद्वा। पितुस्त्वोत्पादकात्स्वयमुत्पन्नं सत् Sy.
११. ०दधो P. १२. ०जी D.P.
१३. तदुभयापेक्षया तृतीय पितेति नाम... 'त्रीणि वाव रेतांसि पिता पुत्रः पौत्रः' (TS 5.6.8.4.) इति श्रुतेः। अस्यायमर्थः। अग्नौ हुताः सोमाहुतय आदित्यमण्डलं प्राप्य द्यावशात्मनः सवितुर्मूर्त्यन्तराणि(रे इ)न्द्राविष्णू पोषयन्ति तुष्टौ तौ मेघद्वारा वर्षतः। तया वृष्टया सस्यादिद्वारा प्रजाः पुत्रपौत्रादिरूपेण वर्धयत इत्येवं महानुभावाविन्द्राविष्णू इति Sy.
१४. नमनं द्यावापृथिव्योः स्थापितं सामर्थ्यम् Sy. १५. द्योतमानस्यादित्यस्य Sy.
१६. अधि, अधिक रोचने रोचमाने मण्डले Sy.
१७. VM. ignores अधि
१८. अस्य महानुभावस्य Sy.
१९ पुंस्त्वं पराक्रमातिशयम् Sy.
२०. सर्वस्य स्वामिन. Sy.
२१. पालकस्य Sy.
२२ वृको हिंसकश्शत्रवादिस्तद्रहितस्य Sy.
२३. हविः D. २४. नित्यतरुणस्य Sy.
२५ स्तुत्येषु पराक्रमेषु मध्य एकमुदाहरति। यो विष्णु. Sy.
२६. पृथिव्यादीनि प्रथनवन्ति वा सामर्थ्याद्विजांसीति गम्यते। लोकत्रयस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुदाहृतम् Sy.
२७. ०वं M.
२८. विध० M. विवृतग० D.
२९. विस्तीर्णं यथा भवति तथा Sy.
३०. विचक्रम इत्यर्थः Sy.
३१. उरुगातव्याय ... यद्वा, उरुगायाय। षष्ठ्यर्थे चतुर्थी। उरुगायस्य विष्णोरीदृशं पराक्रमं गृणीमसि Sy.
३२. लोकत्रयरक्षणाय ... जीवसे जीवनाय रक्षणाय Sy.
३३. VM. ignores इत्

द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥५॥

द्वे इत्। सर्वं द्रष्टु[1]। अस्य। द्वे। एव। क्रमणे[2] पृथिवीमन्तरिक्षं च। आभिमुख्येन[3] दृष्ट्वा। मर्त्य[4]। तयोश्चरति[5]। तृतीयम्। अस्य[6] पदम्[7]। न[8] कश्चिदपि। आधर्षयति[9]। तथा पक्षयुक्ताः श्येनादय[10]। व[11]। पतयन्तो नाधर्षयन्ति[12]।

चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्भिर्युवाकुमारः प्रत्येत्याहवम् ॥६॥

चतुर्भिः। चतुर्भि[13] पुरत्रै[14]? सह[15]। शत्रूणा[16] नवतिम्। च पुराणि। नमनसाधनै-र्वीर्यै[17]। यथा। रथचक्रम्। प्रवृत्तम्[18]। तिर्यग्गच्छतो मनुष्यान् कम्पयत्येवम्[19]। अवीविपत्[20]=अक-

---

१. स्वर्गस्य सर्वस्य वा द्रष्टुर्विष्णोः Sy
२. क्रमेण P. D. M. पदे Sy
३. सर्वभूत्याविना प्रख्याय Sy.
४. मनुष्यः Sy.
५. ०स्तयोः P.
६. ०न्ति P.D. गच्छति, भजते। भुरण्यतिः कण्ड्वादिर्गतिकर्मा। 'भुरण्यति शवति' (Ngh.2.14.) इति तत्कर्मसु पाठात्। प्रसिद्धत्वाद् भूलोक वृष्ट्यागमनादन्तरिक्ष चेत्युभे क्रमणे जानाति Sy
७. विष्णोः Sy.
८. क्रमणं द्युलोकाख्यम् Sy.
९. कोऽपि मर्त्यो नकिर्नैव Sy
१०. बुद्ध्या नाभिभवति। ज्ञातुं न शक्नोतीत्यर्थः Sy.
११. न केवलं मनुष्य एवापितु ... वेतारो मरुतोऽपि Sy.
१२. तथा पतत्रिणः पतनशीला गरुडादयो वायवो वा Sy.
१३. Omitted by P.D.
१४. पतयन्तः सर्वत्र गमनसमर्थाः Sy.
१५. नैव शक्नुवन्ति। ... सत्यलोकस्यात्यन्तविप्रकृष्टत्वेन सर्वेषामविषयत्वादिति भावः Sy.
१६. VM. ignores वयः
१७ अयमादित्यात्मा विष्णुश्चतुर्भिः Sy.
१८. ० भिपुरतः M. ० भिपुर० P. पुत्रैः is suggested.
१९. सहिताम् Sy.
२०. चतुर्नवतिमित्यर्थः Sy.
२१. गमनसा०P.D. मननसा० M. एतत्सङ्ख्याकान्कालावयवान् नामभिः स्वकीयनमनप्रकारैः प्रेरणविशेषैः Sy.
२२. बह्वरोपेतं चक्रमिव Sy.
२३. वृत्तं यथा भवति तथा Sy.
२४. विविधातनस्वभावान् Sy.
२५. ०यन्त्ये० P.D. तं यथा शत्रोरुपरि प्रक्षेपणाय प्रामयति Sy.
२६. अपि विपत् M.

[1]म्पयत् "[2]इन्द्राविष्णू [3]दृंहिताः [4]शम्बरस्य' इति मन्त्र', "[5]शतं [6]मेषान् [7]वृक्ष्ये [8]चक्षदानम्" इत्येको मन्त्र., "[9]ऋज्राश्वः शतमेकं [10]च मेषान्" इत्यपर एवमत्रापिच्छन्दोऽनुविधानेन पञ्चानामनुपादानमथवा चकारात्पञ्च चेत्यर्थो लभ्यत इति। [11]महाशरीर। रसाहरणपरैस्तेजोभि। [12]लोकान् [13]विमिमान। [14]युवा। न कश्चित्कुमारः। [15]प्रतिगच्छति। [16]आह्वमिति। [17]

I. 156.

भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥१॥

[18]भवा मित्रः। मित्रशब्दश्छन्दसि पुंल्लिङ्गश्च[19]। दर्शनान्मित्रम्। इव। त्व सुखनिमित्तम्। [20]

---

१. तद्वदुक्तसङ्ख्याकान्कालावयवानवीविपत् कम्पयति भ्रमयति। ...के पुनस्ते? उच्यन्ते। संवत्सर एकः। अयने द्वे। पञ्चर्तवः। द्वादश मासाः। चतुर्विंशत्य(तिर)र्धमासाः। त्रिंशदहोरात्राः। अष्टौ यामाः। एकस्मिन्विने पर्यावर्तमानानि मेषादीनि द्वादशलग्नानीति मिलित्वा चतुरधिकनवतिसङ्ख्याकानवीविपत्। नन्वादित्यस्वयमपीतरवत्परिभ्रमति कथं भ्रमयतीत्युच्यते, नैष दोषः। एतेषां भ्रामकस्य ध्रुवस्य विष्णोर्मूर्त्यन्तरत्वात्। अथवा स्वभ्रमणाधीनत्वादितरेषा परिभ्रमणस्यातः स्वयं भ्रमयतीत्युच्यते Sy

२. इन्द्रो विष्णु M.

३. RV. VII 99 5[a]

४. शतमेषं P.

५. वृक्षेक्य M.

६. RV. I.116.16[a].

७. मेन् P. मोषान् D. RV.I 117.18[d].

८. ०रम् P.D.

९. छन्नो० M.

१०. ० त्यत्रो P.

११. एवं कालात्मको विष्णुः ... विराडात्मना सर्वदेवमनुष्यादिशरीराणां स्वशरीरत्वात् Sy.

१२. यद्वा.. स्तुतिमद्भिर्मन्त्रविद्भिर्वा विमिमानः। यद्यपि विभुस्तथापि भक्त्यधीनत्वात्स्तुत्या मीयते Sy.

१३. विमान. P. विममानः D. M. विविधमात्मान मिमानो देवतिर्यगात्मना विभज्य स्थापयन् Sy

१४. सर्वत्र मिश्रणशीलो नित्यतरुणो वा Sy.

१५ अत एवाकुमारोऽनल्प. Sy.

१६. एवम्भूतो महाविष्णुः ... गच्छति Sy.

१७ आह्वानं प्रति ... यज्ञदेशम् Sy.

१८. Ms. D. puts the figure ॥१५५॥ here to indicate the end of one hundred and fiftyfifth hymn. No such number is given in P. and M.

१९. मितेर्वुःखात्त्राता सखा आदित्यो वा मित्रः ... तद्वत् Sy.
मित्रः प्रमीतेः। त्रायते N. 10.21.

२०. पुंल्लिगस्य P.

२१. सुखे साधुः सुखकर्ता Sy.

भव[1]। घृतेना[2]क्ष्यमाण[3]। व्याप्तयशा[4]। एव गच्छन्[5]। सर्वत[6] पृथुतमस्तत्र तत्र प्रयोजनम्। अनन्तरम्[7]। एव[8]। ते हि। विष्णो[9]! त्वत्कृतं[10] जानतः। वर्धनीय इत्येतद् विशदमाह स्तोम इति। स्तोम[11]। यज्ञ[12]। च। समाधनीय[13]। हविष्मतेति[14]।

यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥२॥

यः[15] पूर्व्याय। य[16]। पूर्वस्मिन्काले भवाय। विधात्रे[17]। सर्वदा नवतराय[18]। सुमच्छब्द सुशब्दपर्याय[19] इत्युक्त शोभना जाया भवत्यस्य तस्मै[20]। यो हवीषि प्रयच्छति[21]। यो वा[22]। अस्य[23]। महत[24]। सज्जातम्[25]। महत्त्वम्[26]। ब्रवीति[27]। स[28]। एव[29]। अग्नै[30]। आत्मीय शत्रुम्[31]। अभिभवति[32][33]।

---

१. प्रतिविशेषणं नो भवेति सम्बन्ध. Sy
२. घृतमुदकमासूयते येन स तादृश.। यद्वा। घृतमाज्यमाभिमुख्येन नीयते यस्मै स तादृशः Sy.
३. प्रभूतयशाः प्रभूतान्नो वा Sy.
४. एवया रक्षणस्य मिश्रयिता प्रापयिता Sy.
५. सर्वतः पृथुः Sy. ६. उ इति पादपूरण·। हे विष्णो त्वं यस्मादीदृशो भवसि, अथाऽस्मात् Sy. ७ तव Sy.
८. The passage beginning with ते and ending with त्वत्कृतम् is missing in M
९. विदुषा त्वन्माहात्म्यवेदित्रा यजमानेन Sy.
१०. ०यम् M. पुनः पुनः प्रवर्धनार्हं । एकवारकरणे न सम्पूर्यत इत्यर्थः Sy.
११. स्तोत्रविशेष· Sy. १२. ०शंसा P समाराधनीयः। यद्वा विदुषा होत्रा स्तोमो राध्यो हविष्मता यजमानेन च राध्यः Sy.
१३. VM. ignores उ
१४ The passage beginning with यः and ending with यः is omitted by M. यो मर्त्यः Sy.
१५. पूर्वकालीनाय, नित्यायेत्यर्थः Sy.
१६ विविधजगत्कर्त्रे Sy
१७. नित्यनूतनायात्यन्तरमणीयायेत्यर्थ·। स्तुत्याय वा Sy.
१८ सुशब्द. M १९. ०नजा० M
२० स्वयमेवोत्पन्नाय।... यद्वा सुतरां मादयतीति सुमत्, तादृशी जाया यस्य स तथोक्त·, तस्मै सर्वजगन्माबनशीलश्रीपतय इत्यर्थं Sy. सुमत्स्वयमित्यर्थः N.6.22.
२१ हविरादिकम् Sy.
२२. उक्तगुणकाय विष्णवे व्यापकाय ददाशति. . ददाति Sy.
२३. अस्य विष्णोः Sy.
२४. महानुभावस्य Sy.
२५. ०त M. जातं जन्मोत्पत्ति हिरण्यगर्भादिरूपं जन्म Sy.
२६. महत् पूज्यम् Sy.
२७. ब्रूयात्... सङ्कीर्तयेत् Sy.
२८. सोऽपि दाता स्तोता च Sy.
२९. उशब्दोऽपिशब्दार्थः Sy.
३०. अग्नैः कीर्तिभिर्वा युक्तः सन् Sy.
३१. युज्यं चित्सर्वैर्गन्तव्यमेव तत्पदम् Sy.
३२. अभि, आभिमुख्येनासद् गच्छति प्राप्नोति Sy.
३३. VM. ignores विष्णवे। उ। चित्

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।
आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥३॥

तमु स्तोतारः । तम् । एव । प्रत्नम् । हे स्तोतार ! यथा । पूजयितु जानीथ । तथा यज्ञस्य । मध्ये वर्तमानम् । जन्मवतोपध्यादिना हविषा । पूरयत । तथा अस्य च । नाम । विविध ब्रूत विष्णुर्विष्णुर्विष्णुरिति । प्रत्यक्ष शेष —महत । तव । शोभना मतिम् । भजामह इति ।

तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।
दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥४॥

तमस्य । मरुद्भिरानीयमानस्य । विधातु । अस्य । तन् । यज्ञाख्य कर्म । राजा । वरुण ।

---

१. तमेव विष्णुम् Sy.
२. पूर्वाहंमनादिसंसिद्धम् Sy.
३. The passage beginning with जानीथ and ending with यज्ञस्य is missing in M.
४. यज्ञस्य गर्भभूत यज्ञात्मनोत्पन्नमित्यर्थ । 'यज्ञो वै विष्णुः' (ŚB. 1.1.2.13) इति श्रुतेः । यद्वा । ऋतस्योदकस्य गर्भं गर्भकारणमुदकोत्पादकमित्यर्थः । 'अप एव ससर्जादौ' (Manu. 1.8) इति स्मृतेः Sy.
५. एवम्भूतं विष्णु यथा विद जानीथ तथा जनुषा जन्मना स्वत एव न केनचिद् वरलाभादिना Sy.
६. ०रय M.
स्तोत्रादिना प्रीणयत यावदस्य माहात्म्य जानीथ तावदित्यर्थः Sy.
७. महानुभावस्य विष्णोः Sy.
८. अस्य । नाम । च । M. सर्वैर्नमनीयमभिधानं सार्वात्म्यप्रतिपादकं विष्णुरित्येतन्नाम Sy.
९. जानन्तः पुरुषार्थप्रदमित्यधिगच्छन्त आ समन्ताद् ... वदत, सङ्कीर्तयत । यद्वा नाम यज्ञात्मना नमन विष्णोरेव सर्वेषां स्वर्गापवर्गसाधनायेष्टयाद्यात्मना द्रव्यदेवतात्मना वा परिणामभा जानन्तो यूयं विविक्तन ब्रूत स्तुत Sy.
१० विष्णुर्विष्णुरिति M
११ इदानीं साक्षात्कृत्याह । हे विष्णो सर्वात्मक देव . महतः Sy.
१२ सुमतिं सुष्ठुतिं शोभनात्मिकां बुद्धिं वा Sy.
१३. सेवामहे वयं यजमानाः Sy.
१४. VM ignores आ । जानन्तः । चित् । विष्णो
१५ मरुतामृत्विजा सङ्घातो मारुतम् । तद्वतः । मत्वर्थो लुप्यते । मरुतां देवानां सम्बन्धिनो वा Sy.
१६ मेधाविनः Sy. १७. यजमानस्य Sy.
१८. सत् P.
तं प्रसिद्धम् Sy.
१९. याग यज्ञात्मक विष्णुम् । 'यज्ञो वै विष्णुः' (SB. 1.1 2.13.) इति श्रुतेः Sy.
२०. राजमानः Sy.
२१. ०ण P.

सेवते[1]। अश्विनौ[2] च। धारयति[3]। फलम्[4]। उत्तमम्[5]। अन्हो[6] लम्भयितारम्। गोव्रजम[7]। च[8]। अयं विष्णु[9]। गवा प्रदानार्थं सहाययुक्त[10]। विवृतद्वार करोति[11]।[12]

आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥५॥

आ यो विवाय[13]। य[14]। आगच्छति। सेव्याय[15]। दिवि भव। इन्द्राय[16]। शोभनकर्मकृते[17]। तथाविध[18]। विष्णु। स[19] विधाता[20]। प्रीणयति[21]। त्रिस्थान[22]। आर्यमित्येतदेवाह[23]। ऋतस्येति यज्ञस्य। फले[24]। यजमानम्। भाजयति[25]।[26]

---

१. तमेव ऋतुं यागमश्विना, अश्विनौ सचेते। अन्येऽपि देवाः सचन्ते सेवन्ते Sy.

२. धृतवान् Sy.

३. बलं फलप्रदानसामर्थ्यरूपम् Sy. बलम् is suggested for फलम्

४. उत्कृष्टतमम् Sy

५. अर्हयेत्तारम्। स्वर्गोत्पादकमित्यर्थः Sy

६. व्रजं च मेघ च। व्रज इति मेघनाम। 'व्रजश्चरुः' (Ngh. 1 10) इति तन्नामसु पाठात् Sy.

७ ०जंश्चा० M.

८. सवनत्रयात्मना व्याप्तो विष्णुः Sy

९. ०र्थ M. १०. ०क्तोऽपि M यजमानादिसखिभिर्युक्तः सन् Sy

११. त वृष्टचुदकाय ..अपगतावरण करोति। आहुतिद्वारा यज्ञस्यैव वृष्टचुत्पादकत्वात्। यद्वा मारुतस्य मरुत्सङ्घातस्य देवगणस्य, वेधसो विधातुः स्रष्टुर्विष्णोः, ऋतुं कर्म पालनादिरूपं, वरुणादयः सचन्ते। तदधीनत्वात्पालनस्य। स च सखिवानिन्द्रमरुदादिसहायोपेतः सप्रयुक्तलक्षण दक्षं वृष्टचुत्पादनादिसामर्थ्यरूपं बलं दाधार। तथा व्रजं चापोर्णुते Sy.

१२. VM. ignores तम्

१३. The passage beginning with आ and ending with विवाय is omitted by P. D.

१४ विष्णु. Sy. १५. सचथाय यागसाहाय्यकरणाय Sy.

१६ इरा हविर्लक्षणान्नं द्रावयतीतीन्द्रो यजमानः।...तस्मा उक्तरूपाय यजमानाय Sy. इन्द्र इरां वृणातीति, इवंकरणादित्याग्रायणः N.10.8.

१७ शोभनस्तुतिकर्त्रे Sy.

१८ सुकृत्तरः शोभनफलप्रदाना मध्ये श्रेष्ठः Sy. १९. सं P. D.

२० अभिमतफलविधाता Sy.

२१ प्रीणयति। जिवि प्रीणनार्थः Sy.

२२. त्रिसङ्ख्योपेतसहस्थानवान्। सवनत्रयस्थान. क्षित्यादिस्थानत्रयो वा विष्णुः Sy २३. आगन्तव्यं यजमानम् Sy.

२४. भागे हुतशेषरूपे Sy.

२५ भाययति P. आभजद् भजति समीपयतीत्यर्थ.। यद्वा। ऋतस्य यज्ञस्य भागे फले यजमानमाभजत् स्वामित्वेन स्थापयति Sy.

२६. VM. ignores आ Ms. D. puts the figure ॥१५६॥ here to indicate the end of one hundred and fiftysixth hymn. No such number is given in P. and M.

I. 157.

अबोध्यग्निर्ज्म उदेति सूर्यो व्यु१षाश्चन्द्रा मह्यावो अर्चिषा ।
आयुक्षाताम्श्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥१॥

अबोधि । होमार्थं प्रबुद्ध आसीत् । अग्नि । पृथिव्या पर्यन्तात् । सूर्य । उद्गच्छति । ह्लादयित्री । महती । उषा । तेजसा । अन्धकार विवृणोति । अश्विनौ च । गमनाय । आत्मीयं रथम् । युक्तवन्तौ । सविता च । देव । जङ्गमम् । स्वे स्व कार्ये । प्रासावीत्, आश्विन सूक्तम् ।

यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥२॥

यद्युञ्जाथे । यदि । युञ्जाथे । वर्षितारम् । अश्विनौ । रथम् । अथ क्षरता । उदकेन । अस्माकम् । धनम् । सिञ्चतम् । अस्माकमेव । स्तोत्रम् । सङ्ग्रामेषु । कामप्रदानेन प्रीणयतम् ।

---

१. ०बृ० M. प्रतिबोधितः Sv.
२. अयमग्निर्विहितः सन् Sy.
३. ज्मायाः पृथिव्या वेदिलक्षणाया सम्बन्धी सन् । ज्मेति पृथिवीनाम । 'ग्मा ज्मा' (Ngh.1.1) इति तन्नामसूक्तत्वात् Sv.
४ प्राणिनामाह्लादिनी सती Sy
५. अर्चिषा प्रकृष्टेन तेजसा Sy.
६. तमांसि Sy. ७. विवासयति Sv
८. यत इयमुषा उदेति यतश्च सूर्यो यतश्चायमग्निः प्रबुद्धो भवति, अतः कारणाद्वे अश्विनौ Sy.
९ देवयजनगमनाय Sy.
१०. युष्मत्सम्बन्धिनम् Sy.
११. रासभाभ्याम् ... आभिमुख्येन युञ्जाथाम् Sy.
१२. तथा सविता सर्वकर्मणोऽनुज्ञाता देवः Sy.
१३. देवे M. १४. जङ्गमं प्राणिजातम् Sy.
१५. स्वस्वकर्मानुरोधेन Sy.
१६. प्रसौतु । अनुजानातु Sy.
१७. यदा Sy. १८. यदि । युञ्जाथे omitted by P.D. योजयथः Sy.
१९ ०षि० D. वृष्टयादिवर्षकम् Sy.
२०. तदा Sv. २१. ०रथा P. घृतेनोदकेन Sv. २२. मधुना मधुरेण Sy.
२३ अस्मदीयम् Sy
२४ बलं क्षत्रियजातं वा Sy.
२५ प्रवर्धयतमित्यर्थः । यद्वा घृतेन क्षरणरूपेण मधुना मधुरेणामृतेनोक्षत युष्मद्रथस्थेन मधुनाऽस्मदीयं बल प्रवर्धयतमित्यर्थः । अश्विनो रथस्य मधुपूर्णत्वं 'मधुवाहनो रथो' (RV. I. 157.3ab) इत्यादिषु प्रसिद्धम् Sy
२६. अस्मदीयासु प्रजासु Sy.
२७. ब्राह्मं तेजः Sv.
२८. पुत्रभृत्यादिमनुष्यरूपासु प्रजासु । ... पृतनेति मनुष्यनाम । 'विवस्वन्तः पृतनाः' (Ngh. 2.3.) इति तन्नामसूक्तत्वात् । यद्वा । पृतनासु परकीयासु प्रजासु ब्रह्म तासां परिवृढमन्नमस्माकं जिन्वतं प्रीणयतम् । ब्रह्मेत्यन्ननाम । 'ब्रह्म वर्चः' (Ngh.2.7.)इति तन्नामसूक्तत्वात् Sy.

वयम्[1]। धनानि[1]। सङ्ग्रामे[2]। शत्रुभ्य[3] भजेमहि।

अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः।
त्रिबन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्विपदे चतुष्पदे ॥३॥

अर्वाङ्[4]। अस्मान्[5]। आयातु[5]। त्रिचक्र[6]। रथ। मधु येनोह्यते[7]। क्षिप्राश्व[8]। अश्विनो। ऋषिभि सुष्ठु स्तुत[9]। त्रिसन्धान[10]। धनवान्। विश्वानि सौभाग्यानि यस्य[11]। सुखम्। अस्माकम्। द्विपदे[12]। चतुष्पदे[13] च। आवहतु।

आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतम्।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥४॥

आ न ऊर्जम्[14]। आवहतम्[14]। अस्मभ्यम्[15]। अन्नम्[15]। अश्विनौ[16]। युवाम्[17]। मधुमत्या[18] च। भवतो-रश्वाजन्या[19]। अस्मान्[20]। सिञ्चतम्[21]। आयुश्चास्माकम्[22]। वर्धयतम्[23]। पापानि[24] च। शोधयतम्[25]।

---

१. तदीयानि धनानि बहुविधानि Sy
२. शूरसातौ शूराणा प्रहारादिना युक्ते सङ्ग्रामे Sy
३. लभेमहि Sy
४. अर्वाड् M. अस्माद् P D अस्मदभिमुखः Sy.
५. गच्छतु Sy.
६. ०क्रे M. चक्रत्रययुक्त. Sy
७. ०नोच्यते M. मधुवोढा Sv.
८. शीघ्रगाम्यश्वोपेतः Sy.
९. अत एवास्माभिस्तूयमान. Sy.
१०. निम्नोन्नतकाष्ठत्रयोपेतः। सारथ्याश्रयस्थान बन्धुरम् Sy.
११. सर्वसौभाग्योपेतः Sy.
१२. ईदृशोऽश्विनो रथो नोऽस्माकम् .. पुत्राविप्रजायै Sy.
१३. पशवे च Sy.
१४. प्रापयतम् Sy.
१५. अस्माकम् Sy.
१६. ऊर्जं बलं प्राणनसमर्थमन्नं वा Sy.
१७. युवा P
१८ माधुर्योपेतया Sy
१९ कशया वाचा, इष्टप्रदानरूपया। ... कशेति वाङ्नाम। 'कशा धिषणा' (Ngh 1 11.) इति तन्नाममूक्तत्वात्। यद्वा मधुमत्या मधुरवृष्टिमत्या माधुर्योपेतया कशयाऽश्वताडन्या नोऽस्मान् मिमिक्षतम्। मध्विति, उदकनाम। 'मधु पुरीषम्' (Ngh. 1.12.) इति तन्नाममूक्तत्वात्। कशयाऽश्वताडनेन शीघ्रमागत्य वृष्टिरूपं फलं दास्यत इति कशाया मधुमत्त्वम् Sy.
२०. अस्मत् P.
२१. प्रीणयतम् Sy.
२२. आयुष्यम् Sy.
२३. प्रवर्धयतम्। प्रपूर्वस्तिरतिर्वर्धनार्थः Sy.
२४. रपांसि ... पापानि Sy. रपो रिप्रमिति पापनामनी भवतः N. 4.21.
२५. ०धयति तद् M. निःशेषेण शोधयतम् Sy.

द्वेष्टृश्च[1]। निवारयतम्[2]। भवत[3] च। अस्माकं[4] सहभुवौ[5]।

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः।
युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथाम् ॥५॥

युवं ह[6]। युवाम्। खलु। ओषधीषु[7]। गर्भम्। धत्थ[8]। युवाम्। सर्वेषु[9] च। भुवनेषु[10]। अन्तर्गर्भं[11] धत्थ[12]। युवामेव। अग्निम्। वृषणौ[13]। स्वकार्ये प्रेरयथ[14]। उदकानि। च। वनस्पतीश्च। अश्विनौ[15]।

युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः।
अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥६॥

युवं ह[16]। युवाम्। खलु। भवथ[17]। भिषजेभ्योऽपि[18]। भिषजौ। भवथ। अपिच[19]। रथेनेतृभ्योऽपि[20]। अतिशयेन रथे नेतारौ। अपिच युवाम्[21]। उग्रौ[22]। बलम्। तस्मिन्नधि[23]निधत्थ[24]।

---

१. द्वेष्यममित्रादिकम् Sy.
२. नाशयतम् Sy
३ अभ० M. भवन्तौ। ऐकमत्यं भजत-(तम्) इत्यर्थं। वाक्यभेदादनिघात. Sy
४. भवतं चास्माकम् is omitted by P
५. ०भ्रु० M The passage beginning with युवाम् and ending with सहभुवौ is omitted by D. सहभुवावस्मत्कार्येषु सहभवनवन्तौ Sy
६. गमनशीलासु गोषु मध्ये Sy. ७. धत्त· M. धारयथः Sy. ८. युवं M. न केवलं गोष्वेवापितु ... युवाम् Sy
९. भूतजातेषु Sy. १०. मध्ये Sy.
११. वृष्टिद्वाराऽऽमिष (भिषग्) रूपत्वेन गर्भ-स्थरेतसः पोषकत्वात् Sy.
१२. कामानां वर्षितारौ ! Sy.
१३. प्रवर्तयेथाम्। आहुतिभोगायाग्निं स्वीकृत्य च वृष्टयुदकान्युदकैरोषधिवनस्पत्यादि-कमेतान्यस्मदर्थं प्रेरयेथाम् Sy.
१४. This Stanza is omitted by P D. VM. ignores च
१५ हशब्दो 'अश्विनौ हि देवानां भिषजौ' (AB 1 18) इत्यादिप्रसिद्धिद्योतनार्थः Sy १६ भेषजैरोषधैः 'भेषजौषध-भैषज्यान्यगदो जायुः'(Amara. 2.6. 50) 'अगद तत्रौ— (तन्त्रमौ) वधम्' (Cf Vaj. IV. 4.141:—'जायुः पुंस्यगदस्तन्त्र भैषज्योषधभेषजम्' इति चाभिधानात् Sy. १७. भे० D.
१८ वि० M. १९. रथवोढृभिरश्वैः Sy.
२०. रथवन्तौ स्थः। 'आ वां रथो अश्विना' (RV. I.118.1.) इत्यादिप्रसिद्धि-द्योतनार्थो हशब्दः Sy. २१. युवायम् M. युवयोः Sy. २२. यस्मादेवं तस्माद् हे उग्रा उद्गूर्णसामर्थ्यावश्विनौ ! Sy.
२३. अधिकम् Sy.
२४. धारयथोऽत्यधिकमनुगृह्णीथ इत्यर्थः। प्रभूतबलौ युवां रथमारुह्यास्मद्देवयज-नमागत्य हविष्मन्तं मां धृत्वाऽस्मद्यज्ञेऽस्मा-न्विधिचिकित्सितमिति तात्पर्यार्थः Sy.

य.। युवाभ्याम्। यजमान[1]। मनसैव। हवि[2] प्रयच्छति[3]।

द्वितीयस्याष्टकस्यायमध्याय व्याकरोदिति।

द्वितीय माधवार्यस्य पौत्र श्रीवेङ्कटात्मज ॥[4]

॥ अथ द्वितीयेऽष्टके तृतीयोऽध्यायः[5] ॥

"वसू[6] रुद्रा पुरुमन्तू[7]" व्याचिख्यासति माधवः।

प्रदर्शयँल्लङो वृत्तिं लुङश्च तदनन्तरम् ॥१॥

भूतेऽनद्यतने लङ् स्याल् लुङ् स्मृतोऽद्यतनेऽपि च।

लिटः परोक्षे स्मरणाल्लृङ्[8] प्रत्यक्षेऽवशिष्यते ॥२॥

लङ् "इन्द्रो[9] अस्मां[10] अरदत्[11]" "अपाहन्[12] वृत्रं परिधिम्[13]।"

"स्यावो[14] मरुतः स्वधामीद्यन्मामेकं[15] समर्धत्त[16]" ॥३॥

"किं यविष्ठो न[17] आजगन्[18]" "तद्वो[19] देवा अब्रुवन्[20]" च।

"प्रत्यायं[21] सिन्धुमावदन्। उपातिष्ठन्त गिर्वणः[22]" ॥४॥

---

१. आज्यपुरोडाशादिहविर्युक्तो यजमान Sy. २. युष्मदायत्तेन चेतसा Sy ३. हविरादिकम् Sy. ४ ददाति Sy. ५. VM ignores ह। ह ६. ०व० D. ७. Ms. D. puts the figure ॥१५७॥ here to indicate the end of one hundred and fiftyseventh hymn. No such number is given in P. and M. ८. Omitted by P.D. ९ ०मन्नू P. ०मन्तु M. RV.I.158.1ᵃ. १०. लट् M. ११. ०न्द्रोस्मा P.D. ०न्द्रोऽस्मा M. १२ RV III. 33. 6ᵃ. १३. अवा० M. १४. RV. III. 33. 6ᵇ. १५. वे P. १६. ०त्त P. १७. समवत्त R. RV. I. 165.6ᵃ⁻ᵇ. १८. RV. I. 161. 1ᵃ. १९. वे P. २०. अब्रव० M. RV. I.161.2ᵇ. २१. व्रत्या० P. २२. गीर्व० P. RV. I. 11.6ᵇ⁻ᶜ.

प्रत्यक्षाणयेव सर्वाणि परोक्षे चापि दृश्यते ।

इन्द्रस्य नु वीर्याणीति[1] सूक्तं तत्र निदर्शनम् ॥५॥

कर्मणामत्र पारोक्ष्यं चकारेति[2] प्रदर्शितम् ।

एवं च सर्वे सूक्तस्थाः[3] परोक्षाः[4] स्युरमी लङः ॥६॥

परोक्षे लोकविज्ञाते प्रयोक्तुर्दृष्टिगोचरे ।

लङं कात्यायनो ब्रूते "जिहीत[5] पर्वतो गिरिः" ॥७॥

परोक्षे लोकविज्ञातं वहवो वैदिका लङः ।

प्रयोक्तुर्दर्शनायोग्ये विषयेऽपि स्थिता इति ॥८॥

"अधारयन्त[6] वह्नयोऽभजन्त सुकृत्यया"

"घनो वृत्राणामभवः" "सद्यो वृद्धो अजायथाः" ॥९॥

शक्नुवन्त्यृषयो द्रष्टुमतोऽदर्शनगोचराः ।

लङोऽपि च समीचीना इति केचिदवस्थिताः ॥१०॥

दृश्यतेऽद्यतने चापि लङ् "आर्यमद्य सुकृतम्[10]"

"अवाचक्षं पदमस्य[11]" "उग्रं निधातुरन्वायम्[12]" ॥११॥

प्रत्यक्षे वा परोक्षे वा लुङ् भूतेऽद्यतने भवेत् ।

"अभि स्तोमा अनूषत[13]" "सनिं मेधामयासिषम्[14]"

---

१. RV. I. 32 1ª.
२. च करोति M.
३. ०स्था P. D.
४. ०क्षा P. D.
५. RV. I. 37.7ᵈ.
६. RV. I. 20.8ª ᵇ.
७. RV. I. 4.8ᵇ.
८. RV. I. 5.6ᵇ.
९. ०ष्टुं नयो० M.
१०. RV. I 125. 3ª.
११ RV. V. 30.2ª.
१२. निधतु० D. निदधा० M.
RV. V. 30.2ᵇ.
१३ ० नेऽभवत् M.
१४. RV. I. 11. 8ᵇ.
१५. ०निर्मे० D.
सन्निमे P.
१६. RV. I. 18.6ᵈ.

"आपो[1] अद्यान्वचारिषं[2] रसेन[3] समगस्महि[4]" ।

"उदगादयमादित्यः[5]" "एषायुक्त परावतः[6]" ॥ १३॥

"वि सुपर्णो[7] अन्तरिक्षाणि[8]" "अयुक्त सप्त शुन्ध्युवः[9]"

"अच्छा सिन्धुं मातृतमाम्[10]" अद्यतन्य इमा इति ॥ १४॥

अद्यापि भूतसामान्ये पश्यामोऽद्यतनीमिमाम्[11] ।

"सं वो मदासो अग्मत[12]" "वधीर्हि दस्युं धनिनम्[13]" ॥ १५॥

"अकारि रत्नधातमः[14]" सूक्तादौ लुङ् प्रदृश्यते[15] ।

मनसा निर्मितः स्तोमस्तस्य वक्तुमुपक्रमः ॥ १६॥

ननु भूतलकारेषु सङ्कीर्णेषु ततस्ततः ।

परोक्षादिविभागोऽस्मिन् निर्बन्धः केन पाणिनेः[16] ॥ १७॥

विहितेषु लकारेषु भूतमात्रे ततो वयम् ।

तत्तद्वाक्यानुरूपेण[17] वक्ष्यामोऽर्थांस्तया[18] तथा ॥ १८॥

नैव युक्तं रूपभेदादर्थभेदश्च युज्यते ।

पश्यामोऽपि च वाक्येषु भेदं पाणिनिदर्शनम्[19] ॥ १९॥

---

१. म्र० M.
२. ०गन्म० M. RV. I 23. 23[a b].
३. RV. I. 50.13[a].
४. ०तम् M. RV. I. 48 7[a].
५. सुव० P.
६. RV. I. 35.7[a].
७. ०क्षान्य यु० M.
८. RV. I. 50.9[a]
९. RV. III. 33.3[a].
१०. ०मात्त० P. ०अद्यतनी० is suggested for ०अद्यतनी०
११. RV. I. 20.5[a].
१२. ०धीहि P. M. विधिहि D.
१३. RV. I. 33. 4[a].
१४. ० धामतः M. इति is added by P. D. M. after रत्नधातमः। RV. I. 20.1[c].
१५. लङ् M. R.
१६. निब० P.
१७. यत्तद्वाक्यानुसारेण M. ०नुसारेण R.
१८. ० मोऽर्तास्तथा M.
१९. ० र्दर्शितम् R.

स्पष्टमेव लकारार्थान्[1]पश्यामो ब्राह्मणेषु च ।
हरिश्चन्द्रो ह[2] वैधस[3]: शौन[4]:शेपं निरीक्ष्यताम्[5] ॥२०॥

तस्माद्यथा[6] तथा[7] भूते परोक्षाद्यतनादिकम् ।
प्रदर्शयेत्प्रयत्नेन मन्त्रेष्वपि च पण्डितः ॥२१॥

स्पष्टः संवादसूक्तेषु परोक्षाद्यतनादिक[8]: ।
तथान्येषु च सूक्तेषु न तं भेदं परित्यजेत् ॥२२॥

न पश्यति यदा मन्त्रे तं विशेषं प्रयत्नतः ।
अपि वैकाङ्गविकलं भवति[9]च्छान्दसं[10] तदा ॥२३॥ ॥ इति[11] ॥

I. 158

वसू रुद्रा पुरुमन्तू वृधन्ता दशस्यतं नो वृषणाविभिष्टौ ।
दस्रा ह यद्रेक्ण औच्यो वां प्र यत्सस्राथे अकवाभिरूती ॥१॥

वसू रुद्रा । दीर्घतमा ——

वासयितारौ[12] । घोरौ[13] । बहूना ज्ञानारौ[14] । वर्धमानौ[15] । प्रयच्छतम्[16] । अस्मभ्यम् । वृषणौ[17] ।
अभ्येषणे[18] । दर्शनीयौ[19] । यत्[20] । धनम्[21] । औचथ्य[22] । वा याचते[23] । यच्च युवाम्[24] । अकुत्सितनाभि[25] । ऊतिभि[26]

---

१. स्पष्ट...प० M. २. Omitted by M. ३. वैधनः P D Cf.AB.7.13.
४. ०शेफ D. ५. विशेषणम् M.
६. निरीक्षयताम् M. ७. यथा P.
८. ०कम् M. R ९. भवन्ति M. R.
१०. ०स. P. ०साः M. R.
११ Omitted by R.
१२. वासयितारौ प्रजानाम्। वसुना धनेन तद्वन्तौ वा मत्वर्थो लुप्यते Sy.
१३. रुद्रौ । रुद् दुःखं तद्धेतुभूतं पापं वा, तस्य द्रावयितारौ। सङ्ग्रामे भयङ्करं शब्दयन्तौ वा Sy. रुद्रो रौतीति सतः N.10.5.
१४. मनेरौणादिकस्तुन्प्रत्ययः Sy.
१५. स्तोत्रादिना Sy.
१६. दत्तं विस्तितं फलम् Sy.
१७ कामाना वर्षितारौ ! Sy.
१८. आभिमुख्येन पूजितौ, अभीष्टसाधकौ वा हशब्द उक्तगुणप्रसिद्धिद्योतनार्थः Sy.
१९. अस्मद्विरोध्युपक्षपयितारौ Sy.
२०. किमर्थं दीयत इति चेत् ? यद् यस्मात् Sy.
२१ रेक्णो धनम् Sy.
२२ ०त्थ्ये P. उचथ्यस्य पुत्रो दीर्घतमाः Sy.
२३. युवाम् Sy.
२४. स्तुतिव्याजेन प्रार्थयते तदर्थम् । यद्वाऽयं यजमानो यद्यस्माद्रेक्णो हविर्लक्षणमन्नं वा युवाभ्यां दास्यति ददातीति शेषः Sy.
२५. यस्मात् Sy. २६. अकुत्सितैः Sy.
२७. ऊतिभी रक्षणैः Sy.

सह । दाशुषे प्रसारयथस्तद् दशस्यतम् ।

को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः ।
जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरन्ता ॥२॥

को वां दाशत् । क. । युवयो । सुमतये । अस्यै महत्यै । निष्कृत्यर्थं प्रयच्छति । यदिदम् । युवां वासयितारौ । पशो । स्थाने । अन्नेन सह । यजमानान् दधाथे । तौ युवा युवयो पशुमती । प्रज्ञाः । अस्मभ्यम् । उज्जिगृतम् । कस्य क काम पूरयामीत्येव कामप्रेणेव । मनसा । इतस्ततश्चरन्तौ ।

युक्तो ह यद्वां तौग्र्याय पेरुविं मध्ये अर्णसो धायि पज्रः ।
उप वामवः शरणं गमेयं शूरो नाज्मं पतयद्भिरेवैः ॥३॥

युक्तो ह । अश्वैर्युक्त । युवयो । तुग्रपुत्र परिरक्षणार्थम् । पारयिता । गमनशील । यद्वथ. ।

---

१. वाशुके P.
२. प्रकर्षेण दत्थस्तस्माद्दशस्यतम् Sy.
३. दर्शनस्यतम् M. यस्मादभिमतप्रदौ यस्माच्चायं प्रार्थयते ददाति वा हविस्तस्माद् दशस्यतमित्यर्थः Sy.
४. VM. ignores ह
५. युवयोः सम्बन्धिन्यै Sy.
६. शोभनबुद्धयै । चित्पूजायामप्यर्थे वा स्वल्पेनैव हविषा महत्फलप्रदानरूपायै ईदृश्या अपि बुद्धयै प्रीणनाय Sy.
७. ०तयोस्यै P.D वक्ष्यमाणरूपायै Sy
८. को ददात्, दातुं शक्नुयात् । युवयोः प्रभावस्यातिमहत्त्वादिति भावः Sy.
९. कथं मतेः सोष्ठवमिति तदुच्यते, यद् यस्मात्कारणात् Sy.
१०. वासयितारावश्विनौ ! Sy.
११. भूम्याः सर्वेगन्तव्यायाः स्तुत्याया वा वेदिरूपायाः स्थाने । 'एतावती वै पृथिवी यावती वेदिः' (TS. 2.6.4.3.) इति श्रुतेः । गौरिति भूमिनाम । . . . तादृशे स्थाने Sy. गौरिति पृथिव्या नामधेयम् । यद् दूरं गता भवति । यच्चास्यां भूतानि गच्छन्ति । गातेर्वौकारो नामकरणः N. 2.5.
१२. हविर्लक्षणेन यवमात्रप्रकारेणान्नेन Sy.
१३. बाधा० P. अस्माभि. प्रार्थितौ सन्तौ. . . धारयथो बहुप्रदानविषयां बुद्धिम् Sy.
१४. क्षीराधिधनवती. Sy.
१५. शरीरधारिकाश्शरीराभिवृद्धिहेतूर्गाः Sy.
१६. ०गत M. ०गूहं P. शब्दयतं दत्तमित्यर्थ. । 'गृ शब्दे' Sy.
१७. ०प्रेरणेव M. इवशब्द एवकारार्थः । कामपूरकेणैव । . . . 'प्रा पूरणे' कामं प्रातीति कामप्र Sy. १८. मनसा सह Sy.
१९ चरन्तौ यजमानस्य कामाः पूरणीया इति कृतसङ्कल्पावित्यर्थः Sy.
२०. VM. ignores चित्
२१. अत्रेतिहासमाहु. । तौग्र्यनामकं राजानं युद्धे शत्रवः पराभाव्य पाशैर्बद्ध्वा समुद्रमध्ये प्रक्षिक्षिपुः । स चोत्तरीतुमशक्तः सन्नश्विनौ तुष्टाव । तौ च तुष्टौ शीघ्रमेव रथमश्वैर्योजयित्वा समुद्रमागत्य तमुत्तार्यापालयतामिति . . . सोऽत्रोच्यते Sy.
२२. अश्वैर्युक्तः खलु Sy. २३. युवयोः सम्बन्धी Sy. २४. तू० P.
एतन्नाम्ने राज्ञे तद्बन्धमोचनार्थम् Sy.
तुग्रपुत्रस्य is suggested for तुग्रपुत्रं
२५. पारणकुशलो रथः Sy.
२६. स च पज्रः पाजसा बलेन तीर्थः सन् Sy.

विहितः[१]। उदकमध्ये[२]। ततोऽहम्[३]। युवयोः पालनम्[४]। शरणम्। उपगच्छेयम्[५]। यथा। कश्चन शूरः[६]। पतयद्भिः[७]। अश्वैः[८]। युद्धगृहं शीघ्रमभिगच्छति[९]।[१०]

उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धाम्।
मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्तन्वि खादति क्षाम् ॥४॥

उपस्तुतिः[११]। उपेत्य क्रियमाणा स्तुतिः[१२]। दीर्घतमसम्[१३]। रक्षतु[१४]। मा। माम्। इमे[१५]। अहोरात्रे[१६]। विदुग्धाम्=शरणं विदोह[१७]। गा च। माम्। दशभिः[१८] काष्ठैर्निर्मितः[१९]। अतोऽयं प्लावार्थं एधः[२०] काष्ठसङ्घाटः[२१]। अधाक्षीत्। यत्=यस्मात्[२२]। युवयोः[२३]। भूमिम्। आत्मनि[२४]। बद्धोऽयं[२५] दीर्घतमाः[२६]। प्रख्या-

---

१. धारितः स्थापितः Sy.
२. मध्ये D. अम्भसो मध्ये समुद्रस्य मध्ये Sy.
३. यस्मादेवं तस्मात् Sy.
४. प० M. रक्षणम् Sy
५. सम्प्राप्नुयाम्। ऐहिकदुःखाद्विमुक्तो युष्मत्स्थान सम्भजेयम् Sy.
६. गतौ वृष्टान्तः। शूर इव Sy.
७ तपय० P
८ स यथा, अज्म जित्वा निर्भय स्वगृहम् Sy.
९ प्राप्नोति तद्वत् Sy.
१०. VM. ignores ह
११. ०स्तुति P. अत्राख्यानमाहुः। जराभर्भ-(जर्ज)रितगात्रं जात्यन्धं दीर्घतमसं मामतेयं वरिवसितुमशक्नुवानाः स्वगर्भदासा अग्नौ प्रवाहाय प्रचिक्षिपुः। तत्र क्षिप्तोऽश्विनावस्तावीत्। तौ चैनमरक्षताम्। ततोऽप्यक्रियमाणमुदकेष्वपातयन्। तत्र निमग्नः पुनरश्विनौ तुष्टाव। तुष्टौ सन्तौ तौ जलादुदहार्ष्टाम्। एतमबध्यं तं त्रैतननामा कश्चिद्दासोऽस्य शिरो वक्षश्च व्यतक्षत्, ततोऽप्यपालयतामिति तद्विदमृग्द्वयाभ्यां (ऋग्वेनो) मुच्यते Sy.
१२. बुद्धयोपेत्य क्रियमाणा स्तुतिः Sy.
१३. ०तम M. उचथस्य पुत्र दीर्घतमसं माम् Sy.
१४. ०त M. रक्षेदाहाद्युपद्रवात् Sy. उरुष्यती रक्षाकर्मा N 5.23.
१५. एवं सामान्येनोक्त्वा विशेषेण प्रत्युपद्रवपरिहार प्रार्थयते। इमे प्रसिद्धे Sy.
१६ ०मेहोरात्रे P.D. ०रात्रे M. पतनशीले पुनरावर्तनशीले अहोरात्रे Sy.
१७ ०ग्धान् P.D. ०दग्धान् M. विशेषेण बोहगतसार मा काष्टाम्। प्राणनिर्गमनानुकूल्य मा कुरुतामित्यर्थः Sy.
१८. ०हा M.
१९. म P.
२०. दशवारः Sy.
२१. ०ष्ठं P.
२२. चित. सञ्चितः सम्पादितः .प्रज्वालितेन्धनसङ्घः Sy.
२३. Omitted by P. M. दुःसहदुःखप्राप्ति दर्शयति। यद् यस्मात् Sy.
२४. युवयोः सम्बन्ध्ययं जनः Sy.
२५. आत्मना Sy.
२६. पाशैर्गाढं वेष्टितः सन् Sy.
२७. बोधयन् M.
२८. ०मा P.

[1]दति, अभिगच्छति। [2]अङ्गदेशे, [3]अस्त्यश्विनो. [4]सम्बन्ध·।

न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः।
शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध ॥५॥

शौनक —

जीर्णं तु दीर्घतमस खिन्नास्तत्परिचारिण[5]।
दासा बद्ध्वा[6] नदीतोये दृष्टिहीनमवादधु ॥
तत्रैकस्त्रैतनो नाम शस्त्रेणैनमपाहनत्[7]।
शिरश्चासावुरश्चैव स्वयमेव न्यकृन्तत ॥
अङ्गदेशसमीपे तु नद्य[8] सर्वा समुद्वहन्।
जनयामास चोत्थाय कक्षीवन्प्रमुखानृषीन्[9] ॥

[10]न मा [11]गरन्। इमा [12]आप। सर्वेषा मातृस्थानीया.। [13]दासा। [14]यम्। [15]एनम्। सु सम्यग्
[16]बद्धम्। [17]अप्स्ववादधु =प्राक्षिपन्। तथा [18]यदा। [19]अस्य। शिर। [20]त्रैतनो नाम। [21]छेत्तु विप्रक्रान्त।
[22]स्वयमेव। [23]दास। [24]आत्मीयमुर। [25]अमौ च तेन शस्त्रेण। [26]अपि। [27]हन्तु।

---

१. भक्षयति। गन्तुमशक्तः सन् भूमौ परिलुठतीत्यर्थ·। तस्मादुपस्तुतिरौचत्यमुरुव्येदिति Sy.
२. ०त्यङ्गे देशः M.
३. अस्त्यश्विनो P. D.
४. सर्वं बन्ध M. VM. ignores चित.
५. ०चारणः P. ६. बध्वा P.D.M.
७. ०मवाहनन M.
८. तं नद्यः समुदक्षिपन् BD.
९. BD. IV. 21-22, 24ab, 25cd.
१०. मा मां दीर्घतमसं गरन् न गिरेयुः, निमग्नं मा कुर्युः। 'गृ निगरणे' Sy.
११. नवनशीलाः Sy.
१२. मातृवज्जगतां हितकारिण्य आपः Sy.
१३. अस्मदुपक्षपयितारो मदीयगर्भवासाः Sy.
१४. यस्मात् Sy.
१५. दीर्घतमसं माम् Sy.
१६. सुष्ठु सङ्कुचितसर्वाङ्गम् Sy.
१७. अवाधुः M.
१८. अवाङ्मुखमपातयन् Sy.
१९. यस्मात् Sy.
२०. अस्य मम Sy. २१. ०राः M.
२२. एतन्नामको दासोऽत्यन्तनिर्घृणः सन् Sy.
२३. विविधं तष्टवान् Sy.
२४. तस्मात्स दासः Sy.
२५. स्वकीयमेव शिरस्तक्षतु Sy.
२६ न केवलं शिर एवापितु मदीयमुरो वक्षःस्थलम् Sy.
२७. तौ P.D. स्वशस्त्रेणैव Sy.
२८. ०न्तु: M. हतवान्विदारितवानित्यर्थः। हन्तेर्लुङ्छान्दसमेतद्रूपम्। ततः स्वकीयमुरोऽप्यावपि ... तथा कृतवान्। तद्वयोर्माहात्म्यमिति भावः Sy.
२९. VM. ignores न। मा। गरन्

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥६॥

दीर्घतमाः[1]। दीर्घतमा[2]। मामतेय[3]। जीर्णः[4]। दशमे। युगे[5] वार्धक्ये वर्तमानः[6]। अपाम्[7]। प्रवणम्[8]। गच्छन्तीनाम्[9]। ब्राह्मण[10]। भवति[11]। सारथिः[12]।

I 159.

प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवमियें देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥१॥

प्र द्यावा[13]। द्यावापृथिवी[14]। यज्ञैः सह। उदकस्य वर्धयित्र्यौ[15]। महत्यौ। सुमती[16]। यज्ञेषु[17]। स्तोतुमुपक्रमे[18]। देवा[19] पुत्रा[20] ययोर्भवन्ति ते[21]। देवै=देवपुत्रै[22]। सुकर्माणौ ते[23]। इत्थम्[24]। कर्मणा[25]।

---

१. एतन्नामा महर्षिः Sy.
२. मामतेयः M. स च मामतेयो ममतायाः पुत्रः Sy.
३. ०र्णा P. दशमे युगेऽतीते सति ... जीर्णो वलीपलितगात्रो बभूव Sy.
४. दशयुगपर्यन्तं महानुभावयोरश्विनोः प्रभावात्पूर्वोक्ताद् दुःखाद्विमुक्तोऽत्यन्तसुखी स्वस्वपुत्रभार्यादिभिः सहितो जीवितवान् Sy.
५. वर्धमानः P.
६. ०नो वा M. अपामप्कार्याणां प्रजानाम्। यद्वा। अपामपसां कर्मणामर्थं प्रयोजनं यतीनां तासां प्रजानाम् Sy.
७. पुरुषैरभ्यर्थ्यमान कर्मफलं स्वर्गादिकम् Sy
८. प्राप्नुवतीनाम् Sy.
९. ब्रह्मणः P.D. ब्रह्मा ब्रह्मसदृशः परिवृढो भवति Sy.
१०. देवो भवतीत्यर्थः Sy.
११. सारथिवन्निर्वाहको भवति Sy.
१२. एवमस्य वृत्तान्तं मन्त्रोऽनुवदति । स्वयं वा स्वात्मानं पारोक्ष्येणाश्विनोर्महानुभावत्वं प्रकटयितुं ब्रवीति Sy.
Ms. D. puts the figure ॥१५८॥ here to indicate the end of one hundred and fiftyeighth hymn. No such number is given in P and M.
१३. द्यावापृथिव्यौ Sy.
१४. अह यजमानो यज्ञैर्यागैस्तत्प्रदानैर्निमित्तभूतैर्हविष्प्रदानार्थम् Sy.
१५. कीदृश्यौ ते ? यज्ञस्य वर्धयित्र्यौ Sy.
१६. प्रकर्षेणास्मांश्चेतयित्र्यावस्माभिश्चेतयितव्ये वा। ईदृश्यौ स्तुषे Sy.
१७. यागेषु Sy.
१८. प्रकर्षेण स्तौमि। पुरुषव्यत्ययः Sy.
१९. ये द्यावापृथिव्यौ ... देवा यजमानाः पुत्रस्थानीयाश्शुश्रूषका ययोस्ते तादृश्यौ। यद्वा। देवैर्भिविशिष्टे Sy.
२०. ०यो भ० P. D. ०ति M.
२१. यजमानैः Sy. २२. ०त्रै P. M.
२३. वंस इति कर्मनाम। शोभनकर्मोपेते Sy.
२४. सत्यम्। इत्येति सत्यनाम। 'सत्रा ... इत्था' (Ngh. 3.10.) इति तन्नामसु पाठात् Sy.
२५. अस्मदनुग्रहबुद्धया Sy.

धनानि[1]। भावयन्त[2]।[3]

उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्वसीमभिः।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥२॥

उत मन्ये[4]। उत[5]। ब्रवीमि[6]। दिव[7]। अद्रोग्धु[8]। स्तोत्रम्[9]। पृथिव्याश्च[10]। स्ववर्धनम्[11]। तत्[12]। महत्त्वम्[13]। आह्वानं[14] स्तौमि[15]। शोभनरेतस्के[16]। द्यावापृथिवी[17]। बहुतरम्[18]। विस्तीर्णम्[19]। अमरणसाधनमन्नम्[20]। आत्मीयैरुरुत्वै[21]। प्रजाया देवमनुष्यादिकाया[22]। चक्रतु[23]।

ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥३॥

ते सूनवः[24]। ते[25]। पुत्रा[26]। सुकर्माण[27]। शोभनज्ञाना[28]। महत्यौ[29]। द्यावापृथिव्यौ[30]। वृष्टयर्थम्[31]।

---

१. वरणीयानि धनानि Sy.

२. अस्मभ्यं प्रभूषतोऽलङ्कुरुतो वत्त इत्यर्थः। यद्वा वार्याणि हवींषि धिया कर्मणा निमित्तेन कर्मसमाप्त्यर्थं प्रभूषतः प्रकर्षेण स्वीकुरुतः Sy.

३. VM. ignores प्र। ये

४. अपिच Sy.

५. मन्ये जानामि प्रसादयामीत्यर्थः। यद्वा तत्तादृशमुक्तलक्षणं मनो हवीमभिर्हवनैर्महि मन्येऽतिमहत्प्रबुद्ध मन्ये Sy

६. वः M. पितृस्थानीयायाः पाठ्याः Sy.

७. नहि कदाचित्पिता स्वपुत्रादये द्रुह्यति Sy. दिवः being in the fem. gen अद्रोग्ध्वाः as qualifying दिव. is suggested for अद्रोग्धुः

८. चित्तम् Sy.

९. सर्वस्योत्पादयितुरन्तरिक्षस्य द्युलोकस्य ...यद्वा पितुर्द्युलोकस्य मातुर्भूम्या.। 'द्यौर्': पिता पृथिवी माता' (RV.I. 164.6.) इति श्रुतेः Sy. माताऽन्तरिक्षं निर्मीयन्तेऽस्मिन्भूतानि N.2.8.

१०. तादृश्याः पृथिव्याः... स्वायत्तं बलं स्वयमेवास्मदनुग्रहाय त्वरमाणम् Sy.

११. तादृशमनुग्रहयुक्तम् Sy.

१२. अत एव ... महत् Sy.

१३ हवनैराह्वानं Sy.

१४. द्यावापृथिव्योर्मनोऽस्मदाह्वानैः प्रीणयामीत्यर्थः Sy.

१५. शोभनसामर्थ्येन Sy.

१६ माता च पिता च पितरौ द्यावापृथिव्यौ Sy. As द्यावापृथिवी is not a Vedic word, but a classical Sanskrit word, used by VM himself, the correct form should be द्यावापृथिव्यौ

१७. अमरणभूतमभिलषितम् Sy.

१८. त्वं P. वरिष्ठं रक्षणविशेषैः Sy.

१९. ०यां P. यजमानादिरूपायाः Sy.

२०. कुरुतः Sy. २१. प्रसिद्धाः Sy.

२२. युवाभ्यामुत्पन्नाः पुत्रस्थानीयाः प्रजाः Sy.

२३. ०ण P. शोभनकर्माणः Sy.

२४. ०नां P. ०नान् D. शोभनवर्शनाः Sy.

२५. मातृवद्धितकारिण्यौ Sy.

२६. पूर्वचित्तये प्रथमबुद्धयेऽनुग्रहकृपायै Sy.

जानन्ति[1]। स्थावरस्य। जङ्गमस्य। च। धारणार्थम्[2]। आदित्यस्य भवत्यो[3] पुत्रस्य[4]। स्थानम्[5]। रक्षथो युवाम्[6]। जरामरणरहितस्य[7][8]।

ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा।
नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥४॥

ते मायिनः[9]। ते। कर्मवन्त[10]। चक्रु[11]। शोभनप्रज्ञाना[12]। सबन्धू[13]। समानोत्पत्तिस्थाने[14]। समाननिचये[15] द्यावापृथिवी[16]। मिथुनभूते। यज्ञैस्तनश्च ते नवतर[17] नवतरम्[18]। तन्तुम्[19]। विस्तारयन्ति। अन्तरिक्षस्य[20]। दीप्तस्य[21]। अन्त[22]। क्रान्तदर्शना[23]। शोभनद्योतनास्तेजसस्तन्तून्[24] विस्तारयन्ति[25][26]।

---

१. महानुभावतामवगच्छन्ति Sy.
२. ईदृशस्य धर्मणि धारणे रक्षणे निमित्तभूते सति Sy.
३. पुत्रस्थानीयस्योभयविधस्य जगत Sy
४. पदं स्थानं, सत्यमबाध्यम् Sy
५. रक्षथो वत्य इत्यर्थ. Sy.
६. न विद्यते द्वयं यस्य तादृशस्य। स्वजीवनाय युष्मद्व्यतिरिक्तमजानत इत्यर्थः Sy
७. यद्वा ते प्रसिद्धाः सूनव उत्पद्यमानाः, स्वपसः शोभनप्रकाशाविकर्माणः, सुदससः शोभनदर्शनाः सुष्ठूपक्ष(प)यन्तो वाऽऽत्मानं, स्वव्यापारायेदृशा रश्मयो, मही महत्यौ द्यावापृथिव्यौ पूर्वचित्तये प्राणिनां पूर्वज्ञानाय जगुर्ज्ञातवन्तो द्यावापृथिव्योरन्तराले व्याप्ता इत्यर्थः। किंच स्थातुर्जगतश्च धर्मणि धारणे तदर्थमद्वयाविनो मार्गद्वयरहितस्य ... पुत्रस्य युष्मत्पुत्रस्थानीयस्यादित्यस्य पदं मार्गं सत्यं पाथोऽवश्यं रक्षथः Sy.
८. VM. ignores च। सत्यम्
९. प्रसिद्धे द्यावापृथिव्यौ Sy.
१०. माया प्रज्ञा। स्वविषयप्रज्ञावन्तः प्रज्ञोपलक्षितकर्मवन्तो वा Sy.
११. मिमते, प्रमाणेन परिच्छिन्दन्ति Sy.
१२. ना P. सुष्ठु प्रकर्षेण चेतितुं शक्ता रश्मयः Sy.
१३ स० M. कीदृश्यौ ते? जामी परस्परं भगिनी (न्यौ) Sy. १४. ०नोत्प० P.
१५ समानस्थाने। द्युपृथिव्योरेकस्मिन्नेवावकाशरूप आकाशेऽवस्थानात्, समीचीनस्थाने वा Sy. ० निलये is suggested for ० निचये। द्यावापृथिव्यौ should be the correct form See note १६ on stanza 2 of this hymn.
१६ प्राण्युत्पत्तये मिथुनभूते, परस्परमवियुक्ते इत्यर्थ. Sy
१७ नवतरते: M Omitted by P.
१८ ०न्तु P. तननीय विस्तारणीयम्। जात्येकवचनम्। रश्मीन् Sy.
१९. समन्ताद्विस्तारयन्ति Sy.
२० समुद्रेऽन्तरिक्षे। समुद्रशब्दोऽन्तरिक्षनामसु पाठात्तद्वचनः Sy. समुद्रः कस्मात् समुद्द्रवन्त्यस्मादापः, समभिद्रवन्त्येनमापः। सम्मोदन्तेऽस्मिन्भूतानि। समुदको भवति। समुनत्तीति वा N.2.10.
२१. M. adds अन्तरिक्षस्य after दीप्तस्य। दिवि द्योतमाने Sy. २२. अन्तर्मध्ये Sy.
२३. मेधाविनः स्वव्यापारविषयज्ञानवन्तः Sy.
२४. सुष्ठु द्योतना रश्मयः Sy.
२५. ०स्तन्तून् P.
२६. VM. ignores ग्रा

तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥५॥

तद्राधः[1]। तत्[1]। धनम्[2]। अद्य। सवितु[3]। वरणीयम्[4]। वयम्[5]। देवस्य सवितु[6]। प्रसवे। स्तुमो भवतीभ्या दत्तम्[7]। अस्मभ्यम्। द्यावापृथिवी[8]। सुमत्या[9]। नानाविधमर्थजातम्[10]। दत्तम्[11]। धनवन्तम्[12]। गोशतयुक्तम्[13]।

I 160.

ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनो धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥१॥

ते हि[14]। ते[14]। हि[15]। द्यावापृथिव्यौ। सर्वस्य सुखस्य भावयित्र्यौ[16]। उदकवत्यौ[17]। लोकार्थम्[18]। ध्रियमाणस्तोत्रे। शोभनजन्मानौ[19]। धृष्टे[20]। देवी[21]। मध्येन[22]। सर्वस्य

---

१. तादृशम् Sy. २. पुरुषार्थसाधनसमर्थं गवादिधनम् Sy. ३. पितु. P सर्वस्य प्रसवितुः Sy. ४. यजमाना. Sy.
५. आदित्यस्यान्तर्यामिरूपिण. Sy.
६. अनुज्ञायां सत्याम् Sy.
७. स्तुवो M. याचामहे। मन्यतिर्याच्ञाकर्मा। छान्दसः शप्। यद्वा पुनः पुनरभ्यस्यामः। लप्सी(लभे)महीति यावत्। 'म्ना अभ्यासे' व्यत्ययेनात्मनेपदम् Sy
८. द्यावापृथिव्यौ Sy.
९. शोभनचेतनेनास्मदनुग्रहबुद्धया Sy.
१०. अर्थं जायतं P. धनम् Sy.
११. दत्त P. १२. निवासयोग्यगृहादिविशिष्टम् Sy. १३. शोश० M. शतसङ्ख्याकगवादिविशिष्टम् Sy
१४. Ms. D. puts the figure ॥१५६॥ here to indicate the end of one hundred and fiftyninth hymn. No such number is given in P. and M.
१५ प्रसिद्धे Sy. १६ खलु Sy.
१७. विश्व सुखभावयितृ ययोस्ते विश्वशम्भुवा, विश्वस्य सुखयित्र्यावित्यर्थः Sy.
१८. ऋतवत्यौ Sy.
१९. रजस उदकस्य, उदकोत्पत्तौ Sy. उदकं रज उच्यते N.4.19.
२०. ०ण स्तो० P. अकृच्छ्रेण धारकः कविर्ययोस्ते तादृश्यौ। उदकोत्पादनायाप्रयत्नवत्यावित्यर्थः। यद्वा धारयत्कविर्मनीषी, आदित्यो ययोस्ते तादृश्यौ। वृष्टयुदकधारयत्सूर्योपेते इत्यर्थः Sy.
२१. शोभनजन्मवत्यौ Sy.
२२. धर्वणोपेते स्वव्यापारेषु प्रगल्भे इत्यर्थः। ...अत्र यद्यपि धिषणे इत्येतत्, 'धिषणे रोदसी' (Ngh. 3. 30.) इति तन्नामसूक्तत्वाद् द्यावापृथिवीनाम, तथापि 'द्यावापृथिवी' इत्यस्य विद्यमानत्वाद् यौगिकं द्रष्टव्यम् Sy.
२३. द्योतमाने Sy. देव्यौ is suggested for देवी
२४. तयोरन्तराले Sy.

धारणार्थम्[1]। निर्मल[2]। सूर्य[3]। देवः। गच्छति[4]।

उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः।
सुधृष्टमे वपुष्ये न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥२॥

उरुव्यचसा[5]। बह्ववकाशे। महत्यौ[6]। असक्ते[7] द्यावापृथिव्यौ। पितृमातृभूते[8]। भूतानि[9]। रक्षत[10]। सुधृष्टमे[11]। वपुषे[12] हिते च भवत। यस्मात्[13]। एते। सर्वत्र[14]। सूर्यं परिगृह्य। नक्षत्रैरोषधीभिश्च[15]। अभिवासयति[16]।

स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥३॥

स वह्निः। स। वोढा[17]। द्यावापृथिव्योः[18]। पुत्र[19]। पवित्ररश्मियुक्त[20]। शोधयति[21]। भुवनानि[22]। प्राज्ञ[23]। कर्मणा[24]। पृथिवीम्[25]। च। सस्यानामुत्पादयित्रीम्[26]। उदकस्य सेक्तारम्[27]। शोभनरेतस्कम्[28]।

---

१. प्रकाशोदकवानादिधारणेन युक्तः सन् Sy.
२ ०ल P D.M. शुद्धो विश्वस्य शोचयिता वा Sy.
३. दीप्यमानः Sy.
४. सर्वदा गच्छति। 'ईङ् गतौ' दैवादिकः। तादृशं कर्म युवयोरनुग्रहादिति स्तुति. Sy.
५. ०वता P. D. ०वताशे M. प्रभूतव्यचनवत्यावतिविस्तीर्णे Sy.
६. अत एव महत्यौ Sy.
७. असज्जमाने परस्परवियुक्ते इत्यर्थ. Sy.
८. पिता पालयित्री द्यौर्माता निर्मात्री पृथिवी चेत्युभे Sy.
९. भुवनजातानि Sy.
१०. पालयतः Sy.
११. अतिशयेन धृष्टे। छान्दसस्तकारलोपः। प्रगल्भे Sy.
१२. वपुरुचे M. ०ष P.D. वपुषो हिते इव। प्राणिनां पितराविव शरीररक्षके इत्यर्थः Sv.
१३. ०दते P.D.
१४. पितृस्थानीया द्यौः Sy.
१५ निरूपणसाधनैः प्रशस्तैः प्रकाशैर्निरूप्यमाणैर्वृष्टयादिभिर्वा Sy
१६ ०सति P. . . .अधितिष्ठति। तस्मात्पिता माता च भुवनानि रक्षतः Sy. VM. ignores न
१७ फलस्य वोढा धारकः सन् Sy.
१८ मातापित्रोर्द्यावापृथिव्योः Sy.
१९ पुरुभ्राता पुत्रस्थानीय आदित्यः Sy.
२०. पावनरश्मियुक्तः Sy.
२१. ०यितु P पावयति प्रकाशयतीत्यर्थ. Sy.
२२. भूतजातानि Sy.
२३. धीमान् Sy.
२४. प्रज्ञया स्वकीयया Sy.
२५. स एव पुत्रः. . . .धेनुं प्रीणयित्रीं भूमिम् Sy.
२६. ०मुत्पा० P. शुक्लवर्णाम् Sy.
२७. सेक्तारं द्युलोकञ्च मायया पुनाति प्रकाशयतीत्यर्थः Sy.
२८. शोभनसामर्थ्यं शोभनोदकं वा Sy.

दिवसैः। सर्वदा दीप्तम्। उदकस्य स्वभूतम्। कवयो वुहन्ति। सारमिति।

अयं देवानामुपसामुपस्तमो यो जजान रोदसी विश्वशंभुवा।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभिः समानृचे ॥४॥

अय देवानाम्। अयम्। देवानाम्। व्याप्तानाम्। व्याप्ततम। य। जजान। द्यावा-पृथिवी। सर्वस्य सुखस्य भावयित्र्यौ। विममे च। य। ते। शोभनकर्मेच्छया। स देव, एते अजरै.। उत्तम्भनसाधनै रश्मिभि। इतरेतरावष्टब्धे करोति।

ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत्।
येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥५॥

ते नो गृणाने। ते। अस्मभ्यम्। स्तूयमाने। महती। महत्। अन्नम्। बलञ्च।

---

१. सर्वाण्यहानि सर्वकालमित्यर्थः Sy.
२ ०सै स० P. ०सै वंदा D ०वसे-वंदा M. ३. दीप्तम् Sy.
४. अस्य द्युलोकस्य। यद्वा। कर्मणि षष्ठी। इम द्युलोकम् Sy
५. दोग्धि।... ईदृशो महानुभाव आदित्य-स्तयोः पुत्र इति द्यावापृथिव्योः स्तुति· Sy. ६ पय·सदृशमुदकम् Sy
७. पूर्वं पुत्रमाहात्म्येनैते प्रशस्येदानीं स्वोत्पा-दकस्तुत्या प्रशंसति, अयम् Sy.
८. अयम्। देवानाम्। is omitted by M. देवानां मध्ये देवतम Sy.
९. अप इति कर्मनाम, तेन तदुल्लिक्ष्यते। कर्मवता मध्ये Sy.
१०. प्रकृष्टकर्मा Sy. ११ अयमित्युक्त क इत्याह। यो देवः Sy. १२. उत्पादित-वान् Sy. १३. रोदसी द्यावापृथिव्यौ महानुभावे Sy. द्यावापृथिव्यौ is suggested for द्यावापृथिवी
१४. सर्वप्रकारेण भूतानां सुखस्य भावयित्र्यौ Sy. १५. व P. न केवलमुत्पादन-मात्रमपितु यो देवः ... विममे विशेषेण परिच्छिनत्ति Sy. १६. तस्ते P. रजसी रञ्जनात्मिके द्यावापृथिव्यौ। रजसी इति द्यावापृथिव्योर्नाम। 'रजसी सवसी' (Ngh 3.30) इति तन्नामसु पाठात्। उक्तरूपे Sy.
ते refers to heaven and earth.
१७. किं स्वोपभोगाय? नेत्याह...शोभनकर्मे-च्छया। येन कर्मणा प्राणिनां सुखं सम्भ-वति तादृक्कर्मेच्छया। अथवैतदुत्तरत्र सम्बध्यते। सुक्रतूयया, उक्तेन निमित्तेन Sy. १८. इमे द्यावापृथिव्यौ Sy.
१९. ०जनं· P. अजीर्णैर्बृहत्तरैः Sy.
२०. गतिप्रतिबन्धसाधनैरङ्गाङ्गकुभिः Sy.
२१. ०ब्धः M. सम्यक् सर्वतः पूजितवान् स्थापितवानित्यर्थः... यस्मादेवं तस्मा-दयमेव देवोऽयमेवापस्तम इत्येवं महानु-भावेन परमेश्वरेणोत्पन्ने इति स्तुतिः Sy.
२२. प्रसिद्धे Sy. २३. अस्माभिः स्तूयमाने सत्यौ। कर्मणि कर्तृप्रत्ययः Sy.
२४. महत्यौ is suggested for महती
२५. अतिप्रभूतम् Sy.
२६. सर्वत्र प्रसिद्धमन्नं सर्वत्र श्रूयमाणां कीर्त्ति वा Sy. २७. क्षत्रं बलं धासथः Sy.
२८. Omitted by M.

महती[1]। युवां द्यावापृथिवी[2]। धत्तम्[3]। येन[4]। सर्वा[5] प्रजा[6]। अभिभवेम[7]। सर्वदा[8]। तत् स्तुत्यम्। बलम्[9]। अस्मासु[10]। सम्प्रेरयतम्[11]।

I.161.

किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं[12] कद्यदूचिम।
न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥१॥

किमु श्रेष्ठः[13]। देवसकाशाद्[14] दूत्यार्थमागच्छन्नय किम्[15]। वृद्ध। आहोस्विद् युवा[16]। योऽस्मान्[17]। आगच्छति[18]। किमयमस्मान्प्रति देवप्रहित[19]। दूत्यम्। आगच्छति[20]। कि वा तत्[21]। यत्[22]।

---

१. अतिप्रभूतम् Sy महत् is suggested for महती

२. द्यावापृथिव्यौ Sy

३. विध० P

४. अन्नबलेन Sy.

५. ०र्वा M

६. पुत्रादिरूपाः प्रजाः। . कृष्टय इति मनुष्यनाम। 'कृष्टयश्चर्षणय.' (Ngh 2.3.) इति तन्नामसु पाठात् Sy

७. अभितो विस्तारयाम Sy

८. सर्वेष्वप्यहस्सु Sy.

९. शरीरबलम् Sy.

१०. सम्यगिन्वतं व्याप्नुतं प्रवर्धयतमित्यर्थः। इन्वतिर्व्याप्तिवचनः। 'इन्वति ननक्ष' (Ngh. 2 18.) इति तन्नामसु पाठात् Sy.

११. Ms. D. puts the figure ॥१६०॥ here to indicate the end of one hundred and sixtieth hymn. No such number is given in P. and M.

१२. देवासकाशात् M.

१३. ऋभवो नाम सुधन्वनस्त्रयः पुत्रा ऋभुर्विभ्वा वाज इति। ते च मनुष्याः सन्तः सुकर्मणा देवत्व प्राप्य कदाचित्कर्मकाले सोमपानाय प्रवृत्ताः। तान्प्रति देवैः प्रेरितोऽग्निः परस्परसमानरूपान् दृष्ट्वा स्वयमपि तदाकारं धृत्वा तेषु मध्ये स्वय चतुर्थः सन् पातुं प्रवृत्तः। ते चर्भव आगतं त समानरूपमवलोक्य विवेक्तुमसमर्थाः परस्परमेवं सन्दिहते, अयं किमु Sy

१४. कि नु खलु Sy.

१५. अस्मत्तोऽय प्रशस्यतमो वयसा श्रेष्ठः Sy.

१६ कि वाऽस्माक युवतमोऽस्मत्तः कनीयान् Sy.

१७. स M.

१८ आगमत् प्राप्तः। . अजगन्निति गतिकर्मा। 'अगन्, अजगन्'(Ngh. 2.14.) इति तन्नामसु पाठात् Sy.

१९ दूत्य दूतकर्म देवसम्बन्धि Sy.

२०. ईयते गच्छति। देवैः प्रेरितो दूतोऽस्मानागतो वा Sy.

२१. कथं निश्चेतव्यमित्यर्थः। वयं तावत्त्रय एवेदानीं चत्वारः समानरूपा वर्तामहे तस्मादधिकः किमु श्रेष्ठ इति विचिकित्सा Sy.

२२. यदेतत् Sy.

वयमेन[1] कार्यार्थमागतं ब्रूम[2] । आगतश्चायमस्मानेकमिमम्[3] । महातटम्[4] । 'चमस चतुर कृणोतनु' इति वक्ष्यति । तद्धि प्रस्तुत देवेषु, वय तेन चमसेन किं प्रयोजनमिति न[5] । निन्दाम[6] । किन्तु अग्ने[7] ! भ्रात[8] ! इत्यामन्त्र्य[9] । द्रुमस्य च[10] । बहुधा भावनम्[11] । एव[12] । वदाम[13] ।

एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमम् ।
सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥२॥

एकं चमसम्[14] । अग्निर्वदति—एकमिमम्[15] । चमसम्[16] । चतुरश्चमसान्[17] । कृणुत[18] । तदिद कार्यम्[19] । युष्माकम्[20] । देवा[21] । अब्रुवन्[22] । अह च तत्[23] । युष्माकम्[24] । आनीतवान्[25] । सौधन्वना[26] ! यदि[27] । एव यथोक्तम्[28] । अकरिष्यथ तत[29] । देवै[30] । सह[31] । यूयमपि यज्ञार्हा[32] । भविष्यथ[33] ।

---

१. ब्रूमस्तत्कत् कथ निश्चेतव्यमित्यर्थ Sy
२. ०कटं P.
महाकुलोत्पन्नस्त्वष्ट्रा निर्मितत्वात् Sy.
३. अधिकः समागत इति पानमकृत्वा चमस न दूषयामः Sy
४. एवं सन्दिह्य कथञ्चित् स्वतोऽन्य निश्चित्य तं प्रति, आपरोक्ष्येण (अपारोक्ष्येण) ब्रुवते । हे अग्ने भ्रातर्भ्रातृवद्भागार्ह ! भ्राता यथा बलात् स्वकीयभागं स्वीकरोति तद्वत् समानरूपमाश्रित्य बलाच्चमसपानाय प्रवृत्त इति भ्रातरित्युक्तम् Sy
५. अतः कारणात्.. विकारे प्रकृतिशब्द । ततश्च तत्स्थे तच्छब्द. । .. दारुविकारचमसस्य Sy.
६. प्राप्तिम् Sy.
७. इच्छब्दोऽवधारणे Sy.
८. ब्रूमः Sy.
९. VM. ignores उ । किम्
१०. एवं पृष्टोऽग्निस्तान्प्रत्युवाच Sy.
११. एवमि० P. त्वष्ट्रा सम्पादितं पूर्वमेकमेव सन्तम् Sy.
१२. Omitted by P.
१३. चतुःसङ्ख्याकान् । . . . यथोपरितने 'ज्येष्ठ आह चमसा द्वा करति' इत्युपक्रम्य 'कनिष्ठ आह चतुरस्करति' (RV IV 33 5.) इति चतुष्कं निर्धारितम् Sy
१५. उक्त चतुर्धाकरणरूप कर्म, उत्तरत्र वक्ष्यमाणमश्वरथादिकरणरूप च कर्म Sy.
१६ युष्मान्प्रति Sv.
१७. इन्द्रादयः Sy.
१८ अब्रवम् P.
न केवलमहमेव ब्रवीमि किन्तु .. देवाः . अब्रुवन् Sy.
१९ देवत्वप्राप्त्युपायत्वेन तत् तादृश कर्म Sy.
२०. युष्माक वक्तुम् Sy.
२१. प्राप्तोऽस्मि Sy.
२२. सधन्वना P.
सुधन्वन पुत्रा यूयम् Sy.
२३. यस्मादेव तस्माद्यूयं यदि Sy.
२४ यद्येव M.
मदुक्तप्रकारेण Sy.
२५. अवरिष्यतं P. कर्तुं शक्नुथ Sy.
On the analogy of the form भविष्यथ, करिष्यथ is suggested for अकरिष्यथ
२६. हवि० P. इति तैरुक्तमित्यर्थः Sy.

अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥३॥

अग्निं दूतम् । देवलोक प्रति गच्छन्तमग्निम्[१] । दूतम्[२] । प्रति । यत्[३] । उक्तवन्त[४] । इन्द्रस्याऽश्व । कर्तव्य[५] । रथश्चाश्विभ्याम्[६] । अस्मिन्नेव लोके । धेनुश्च[७] । बृहस्पतये कर्तव्या । पितरौ च[८] द्वावात्मीयौ । युवत्ववन्तौ[९] । कर्तव्यौ । तान्येतानि[१०] कृत्वा । अनन्तरमेक चमस चतुर[११] कृत्वा । देवान् युष्मान् । अग्ने ! भ्रात ! अनुगच्छाम[१२] इत्युत्तरत्र सम्बन्ध ।

चकृवांसं ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यं चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वन्तर्न्यानजे ॥४॥

चकृवांस[१४] । एतत्सर्वं कृतवन्त । पश्चाद् हे ऋभव[१५] ! तदा । यूयमपृच्छत[१६] । क्वाधुना[१७] । स[१८] । अभूत्[१९] । योऽयम् । दूत । अस्मान् । आजगाम[२०], अग्निर्नूनमश्वादिकरणव्याजङ्गोपन्यासाज्[२१] जगाम । यदाग्नि[२२] । चममान् । अवाग्यदग्रनीष्यानादाय[२३] जगाम । अनन्तरम्[२४] । त्वाष्टा तानादाय । देवपत्नीषु[२५]

---

१. अङ्गनाविगुणविशिष्टम् Sy
२. दूतकर्म प्राप्तवन्त त्वाम् Sy
३. यत्कार्यम् Sy.
४. अब्रुवन् । व्यत्ययेन मध्यम Sy.
५. एकस्मादश्वादश्वान्तर कर्तव्यमित्यर्थ । 'अश्वादश्वमतक्षत' (RV.I.161.7) इति वक्ष्यमाणत्वात् Sy
६. अपिच रथः . . . कर्तव्य Sy.
७. चर्मरहिता मृता गौर्नित्यबोग्ध्री पुनर्नूतना कार्या Sy.
८. द्वौ पितरौ जीर्णौ सन्तौ Sy.
९. युवानौ शयानौ प्रकृष्टयौवनोपेतौ Sy.
१०. युष्माकं देवानां तानि तैरुक्तानि कर्माणि Sy ११. अनतर० D ०मेवकं M अनु पश्चात् Sy.
१२. कृत्व्या कर्मणा Sy.
१३. अन्तर्ग० P. एम आभिमुख्येन प्राप्नुमः । . . . यद्वा । ऋषेरिदं वाक्यम् । हे ऋभवो यूयमागतमग्निं दूतम्प्रति यदब्रवीतन यत्कार्यं वक्ष्यमाणरूपं कर्तव्यत्वेन वदथाङ्गीकुरुथ तानि सर्वाणि सम्पाद्य हे भ्रातरग्ने ! कृत्व्या कर्मणैमसीति ब्रूयेत्यृषिराह Sv. १४. तत्कार्यम् Sy.
१५ पश्चास्ते ऋषभ P ऋषभः M. अत्र यद्यप्यूभुरिति त्रयाणा मध्य एकस्य नाम तथापि तस्य प्राथम्यात् 'छत्रिणो गच्छन्ति'इतिवत्सर्वेऽप्यूभव उच्यन्ते Sy.
१६. प्रश्न कुरुत Sy.
१७. कुत्र Sy १८ त्वाधु० P.
१९ Omitted by M स दूतः Sy.
२०. गतः Sy. २१. आगमत्प्राप्तः Sy.
२२ ०गामानाग्नि० P
२३. एवम्भूते सति यदायम् Sy.
२४. अव्याप्यत् M. कृतांश्चमसान् . . . अभिपश्यति Sy.
२५. आज० M.
२६. अनन्तरमेव Sy.
२७. तस्य चमसस्योत्पादक एतन्नामको देवः Sy. २८. स्त्रीषु Sy.
मेना ग्ना इति स्त्रीणाम् N. 3.21

अन्त[1]। निहितवान्[2]।

हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कृन्वा३ नामभिः स्परत् ॥५॥

हनाम[3]। अग्निनाऽवख्याताश्चमसान्दृष्ट्वा यदा। त्वष्टा। अब्रवीत्। अत ऊ
ये[4]। देवाना सोमपानसाधनम्[5]। चमसम्। निन्दन्ति[6]। तान्[7]। वय हनाम[8]। इति, त
ऊर्ध्वं प्रमादाच्चमसाना निन्दा भवेदिति तत्परिहारार्थमृत्विज[9]। यज्ञ[10]। सह[11]। अन्यानि
नामानि। कुर्वन्ति[12] होताध्वर्युर्ब्रह्मोद्गातेति। तैश्च[13]। नामभि[14]। तान्[15] कवचभूतै[16]। वाग्देवी
स्पृशति[17] रक्षायै।

इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुषासम्।
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥६॥

इन्द्रो हरी[20]। ऋभुभि[21] कृतौ द्वावश्वौ[22]। इन्द्र। स्वरथं युयुजे[23]। अश्विनौ च। रथमात्मी

---

१. मध्ये Sy
२. न्यक्तोऽभूत्। स्त्रियमात्मानममन्यते त्यर्थः Sy.
३. VM. ignores इत्। इत्। चतुरः। कृतान्
४. य ऋभवः Sy.
५. देवैः पातव्यम् Sy.
६. निन्दामकुर्वन् Sy.
७. एनान्वक्ष्यमाणान्। . . . एतच्छब्दस्य प्रकृतपरामर्शकत्वाद्भूणा प्रकृतत्वात्तेषा हननप्रसक्ति दर्शयति Sy.
८. पूजार्थं बहुवचनम्। . . . देवयोग्य त्वाष्ट्रचमसं मनुष्या ऋभवः स्वीकृत्य चतुर्धा व्यभजंस्तान् हनामेति यदाऽब्रवी-दित्यर्थः Sy.
९. त D. Omitted by P. तदा प्रभृति Sy.
१०. ०ज्यमसं चकन्व भवेदिति P.
११. मनुष्याः Sy.
१२. अभिषुते सोमे पानाय प्रस्तुते सति S
१३. परस्परम् Sy.
१४. होत्रध्वर्यूद्गात्रादीनि Sy.
१५ . . । पूर्वनाम प्रच्छाद्योपहवकाले 'अध्व उपह्वयस्व, होतरुपह्वयस्व' इत्येवमा रेव नामभिरात्मान त्वष्टृवधभीत प्रत्यापयन्तीत्यर्थः Sy
१६ अन्यैरेव Sy
१७ एनान् नरान् Sy.
१८ वाग्देवी M. स्वोत्पादयित्री माता S
१९. प्रीणयति। 'स्पृ प्रीतिबलयोः' Sy.
२०. इन्द्रो हरी omitted by M.
२१. ऋतुभिः P.
२२. पूर्वं सृष्टानां क्रमेण विनियोगमाह. एतन्नामानावश्वौ Sy.
२३. योजितवान् Sy.

रश्वैर्युजाते[1]। बृहस्पतिश्च[2]। सर्वरूपामेभि[3]: कृतां[4] धेनुम्[5]। आत्मानमुपनिन्ये[6]। एवं युष्माभिः कृतेषु शिल्पेषु देवैः परिगृहीतेषु, ऋभ्वादयस्त्रयो यूयम्[7]। देवान्[8]। प्राप्तवन्तः। सुकर्माणः[9]। यज्ञियं[10] च[11]। भागम्[12]। प्राप्ताः।

निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन।
सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥७॥

निश्चर्मणः[13]। मृताया गोश्चर्ममात्रादेव[14]। गाम्[15]। उत्पादितवन्त[16]। कर्मभि[17]। यौ च। जीर्णौ पितरौ। तौ। युवत्वयुक्तौ[18]। पुन कृतवन्त[19]। सौधन्वना[20]। अश्वात्[21]। द्वितीयमश्वम्[22]। कृतवन्त[23], द्वावश्वावश्विनौ कृतवन्त[24]। एतत्सर्वं कृत्वा गमनार्थं कञ्चन रथम्[25]। युक्त्वा[26]। देवान्[27]। उपगता[28]।

---

१. योजितवन्तौ Sy.
२. बृहतो मन्त्रस्य पालयितैतन्नामको देवः Sy.
३. नानारूपोपेताम् Sy.
४. कृतः M.
५. गाम्।...यद्यप्यत्र गौरिति विशेषो न श्रुतस्तथापि पूर्वं धेनु कर्त्वेत्युक्तत्वाद् पुरस्ताच्च 'ये धेनु विश्वजुवं विश्वरूपाम्' (RV.IV.33 8) इति वक्ष्यमाणत्वाच्च विश्वरूपा गौरित्येवाध्यवसीयते। अत एव विश्वरूपामित्यस्याश्वपङ्क्तिरिति केचन व्याचक्षते, तदसत्। युष्मत्सम्पादितानि रथादीनीन्द्रावयः स्वभागत्वेनाकल्पयन् Sy.
६. उपागमत् स्वीकृतवानित्यर्थः Sy.
७. तस्मात् Sy.
८. ऋभुभिर्वा वाजश्च यूयम् Sy.
९. इन्द्रादीन् Sy.
१०. शोभनाश्वरथादिकर्मवन्तो यूयम् Sy.
११. यज्ञार्हं यज्ञसम्बन्धिनम् Sy.
१२. सोमकर्म देवत्वं प्राप्तैः सेवनीयम् Sy.
१३. प्राप्नुत। कर्मसामर्थ्येन हविर्भुजो भवतेत्यर्थः। इत्येवमृषिराह Sy.
१४. यूयं निश्चर्मणो मृताया गोः सकाशादुत्कृत्ताच्चर्मण Sy.
१५ ०त्रा P.D. ०त्राम् M
१६. देवानां P.D
नूतनाम् Sy.
१७. उत्पा० P. निरगमयत, उत्पादितवन्त इत्यर्थः। तेनैव चर्मणा सवीतां तत्सदृशीमन्या धेनु कृतवन्त इत्यर्थः Sy.
१८. युवत्व युक्तवन्तौ P D. यद्यपि पूर्वमेवाश्वादीना विनियोग उक्तस्तथापि तेषामत्यन्तदुःखसम्पादत्वज्ञापनाय पुनराह। न केवलं गोकरणमेवापिच...युवानौ Sy.
१९ अकुरुत Sy.
२०. सनध० M.
२१. अश्वा P D.M. एकेन विद्यमानेनाश्वेन Sy. २२. अश्वान्तरम् Sy.
२३. प्रयत्नेन सम्पादितवन्तः Sy.
२४. ०नो P.D.
२५. यस्मादेवं कृतवन्तस्तस्माद् रथं युष्मदीयम् Sy.
२६. युक्ता P. अश्वैर्योजयित्वा Sy.
२७. इन्द्रादीन् Sy.
२८. देवसमीपं प्राप्नुत Sy.

इदमुदकं पिबतेत्यब्रवीतनेदं वो घा पिबता मुञ्जनेजनम् ।
सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥८॥

इदमुदकम्[१]। देवेष्वृभव[२] सोमपीथमैच्छस्तान्देवा अब्रुवन्[३]। प्रातःसवने[४] वसतीवरीः[५]। पिबतेति[६]। माध्यन्दिने[७] वा[८]। सोमनेजनम्[९]। उदकम्[१०]। पिबतेति, न[११] तदैच्छन्नृभवस्ततो[१२] देवानिन्द्रः[१३] सन्दधाति, देवा यूयमृभूनित्थमब्रूतेति देवानुक्त्वा ऋभूनेव[१४] वदति। हे[१५] सौधन्वना[१६]! यदि। नः। एतत्[१७]। एवम्[१८]। इच्छथ[१९]। तृतीयसवने[२०]। सोमेनैव[२१] मादयाध्वा इति[२२]।

आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
ब्रध्नर्यन्तीं बहुभ्यः प्रैको अब्रवीदता वदन्तश्चमसाँ अपिंशत ॥९॥

आपो भूयिष्ठाः[२४]। ब्रह्मवाद्य[२५] वदन्त ऋभव[२६] एत्येतरेतर[२७] पृष्ट्वा, कश्चित्[२८]। आपः। सर्वेभ्य[२९]

---

१. Omitted by P.D.
२. ०घृभवः P. इदानीमृषिर्वेवैरुक्तमर्थं तान्सम्बोध्य यूयमृभूनेवमुक्तवन्तः स्थेत्यनुवदति Sy.
३. उक्तवन्तः Sy.
४. एतत्प्रातःसवनिकाभिप्रायम् Sy.
५. सतीपरः M. इदमुदकं सोमलक्षणम् Sy.
६. एतद् माध्यन्दिनसवनाभिप्रायम् Sy.
७ ०न M.
८. अथवा घ इत्यनर्थकः प्रसिद्धचर्थो वा Sy.
९. इव मुञ्जनेजनं, मुञ्जवान् नाम पर्वतः सोमोत्पत्तिस्थानम् । तत आहृतत्वात्तेन मुञ्जतृणेन शोधितमपगततृणमित्यर्थः Sy. १०. इदं सोमरसरूपमुदकम् Sy.
११. पिबतेत्यब्रवीतन Sy.
१२. उभयसवनसम्बन्धि सोमपानकार्यम् Sy.
१३. नैव कामयथ (ध्वे)। हर्यतिः कान्तिकर्मा। 'हर्यत्युशिक्' (Ngh.2.6.) इति तत्कर्मतु पाठात् Sy. १४. सव० P.
१५. देवानि P. १६. एवम् Sy.
१७. यूयमृभूनुक्तवन्तः Sy.
१८. अथवा ऋभून्प्रति तस्यैवेदं वाक्यम् । हे सौधन्वना यूयं देवत्वं प्राप्य देवयजनं प्रति सोमपानाय रथेनागत्य श्रान्तानश्वान्प्रातःसवन इदमुदकं सोमलक्षणं पिबतेत्यब्रवीतन Sy.
१९. सुधन्वन. पुत्रा यूयम् Sy.
२०. इदं वा मुञ्जनेजनं मुञ्जेन दूषितं वाजिनं पिबत Sy.
२१. Omitted by P. पश्चात् तद् द्वयम् Sy. २२. यदि नेच्छथ Sy.
२३. ०य० D. मादयः M. अत्यर्थं तृप्ता भवथ। 'ऋभवो देवाः सोमस्य मत्सन्' इति तृतीयसवने तेषां सोमपानसद्भावात् Sy.
२४. VM. ignores घ । घ
२५. ब्रह्मवद्यं is suggested for ब्रह्मवाद्यं
२६. चमसचतुर्धाकरणकाले किमिति सत्यं वदन्तो व्यभजन्निति तदाह Sy. ऋभव उरु भान्तीति वर्तेन भान्तीति वर्तेन भवन्तीति वा N.11.15.
२७. एत्य is omitted by M.
२८. त्रयाणामन्यतमः Sy.
२९. ०य P.

पदार्थेभ्यो भूयिष्ठाः[1]। इति। अब्रवीत्[2]। अन्यः। अग्निः सूक्ष्मरूपेण सर्वत्र व्याप्तः[3]। भूयिष्ठः[4]। इति। अब्रवीत्। सीताप्रहार गच्छन्ती पृथिवी[5]। सर्वेभ्य[6]। प्ररिरिच[7] इति। तृतीय। अब्रवीत्। इत्थं[10] सत्यानि[11]। वदन्तः[12]। एकस्माच्चमसात्त्रीश्चमसान्। अपिशत[13]।

श्रोणामेकं उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम्।
आ निम्रुचः शकुदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥१०॥

श्रोणाम्[14]। पित्रोरर्वञ्जाम्?[15]। एक। उदक प्रति[16]। पानाय विसृजति[17]। मासम्। एक। पित्रोर्व्यंजनार्थमाहृतम्[18]। अग्निना[19]। शकलीकरोति[20]। अथापर[21]। अस्तमयात्[22]। प्राक्[23]। शकृत्।

---

१. नहृयुदकात्प्रशस्तं लोकोपकारक तस्वान्तरमस्ति Sy.

२. आपो भूयिष्ठा इत्यृतमब्रवीत्। आपमेव श्रेष्ठत्वम् 'अप एव ससर्जादौ' (Manu. 1.8.) इत्यादिशास्त्रात् Sy.

३. सर्वत्र (शकली करो अथापरोस्तमयात्प्राक् शकृदपभरतीत्थं शुश्रूषमाणेभ्यः) व्याप्तः D. सर्वत्र शकलीकरोत्यथोपरोऽस्तमयात्प्राक् शकृदपदभवतीत्यर्थं शुश्रूषमाणेभ्यः पुत्रेभ्यस्तौ पितरौ किं स्विद् व्याप्तौ P.

४. आन्तरं बाह्यं च दाहपाकभुक्तजरणादिव्यापारेणाग्नेरेव जगन्निर्वाहकत्वादग्नेरेव भूयिष्ठत्वमित्येव मन्यते Sy

५. प्रा० D. ६. ०न्ति P.

७. वधरिति रेफान्तोऽपि वज्रनाम। 'वधः ... अर्कः' (Ngh.2.20.) इति तन्नामसु पाठात्। तदिच्छति वृष्टचुदकायेति वधर्यन्ती मेघपङ्क्तिरुच्यते। यद्यपोय स्ववधार्थं वज्रं स्वयमेव नापेक्षते तथापि वृष्टचर्थमिन्द्रवज्रेण हन्यमानत्वात्तदीच्छतीत्युपचर्यते। यद्वा बहुभ्यस्तेषामर्थाय वधर्यन्तीं वधमात्मन इच्छन्तीं भूमिम्। छान्दसो रेफोपजनः। तामेव Sy.

८. संवादिभ्यः Sy.

९. परि० D. श्रेष्ठतमामब्रवीत्। उदकस्यापि मेघकारणत्वात् Sy.

१०. इत्यर्थं P. ११. सत्यावीनि M. उक्तरूपाणि यथार्थानि वाक्यानि Sy.

१२ परस्परं ब्रुवन्तः Sy.

१३. अविशत M. अवयविनोऽकुरुत। चतुर्धा व्यभजतेत्यर्थः। 'पिश अवयवे' Sy.

१४. णा M अत्र ऋभव एवर्त्विग्रूपेण स्थित्वा यज्ञ निर्वहन्तीत्याह श्रोणाम् Sy. पित्रोरर्थं गाम् is suggested for पित्रोरर्वञ्जाम्

१५. ऋभुषु मध्य ऋत्विक् Sy.

१६ शोणवर्णमुदक रुधिरम्... गाम् ... बाह्यभूमिं प्रति Sy.

१७. गमयति। रक्षोभागत्वेन स्थापयति Sy.

१८. व्यञ्जना० is suggested for व्यजना०

१९. Omitted by P. D. सम्पादितम् Sy. २०. छेदनसाधनेन स्वधितिना Sy.

२१. हृदयजिह्वावक्षआद्याकारेणाहृतं सम्पादितं मांसं पिशत्यवयवीकरोति, स्वधितिना तत्तदवयवान्विभजतीत्यर्थः Sy.

२२. ०स्तयात् M. निश्शेषेण छिन्नान्मांसात् Sy.

२३. कुक्षिस्थं जरत्तृणभूवध्यनामकम् Sy.

अपभरति। इत्थं शुश्रूषमाणेभ्यः पुत्रेभ्यः। तौ पितरौ। किम्। स्वित्। ररक्षतुः।

उद्वत्स्वस्मा अकृणोतना तृणं निवस्त्वपः स्वपस्यया नरः।
अगोह्यस्य यदसस्तना गृहे तदुद्येदमृभवो नानु गच्छथ ॥११॥

उद्वत्सु। उद्गूहितुमशक्यस्य सवितु। गृहे। यदा। अवर्तिष्वम्। तस्य। उन्नतेषु क्षेत्रेषु। ओषधी। अकृणुत। निम्नेषु च। उदकानि। शोभनकर्मेच्छया। नेतार। तत्। आश्रितरक्षण मयि

---

१. अपाहरन्निरसनाय Sy. २. एवम् Sy.
३. ऋत्विग्रूपेण स्थितेभ्यः Sy.
४. पुत्रात्मभ्यः पुत्रस्थानीयेभ्य ऋभुभ्यः सर्वेष्वनुष्ठितेषु Sy.
५. यज्ञस्य पालयितारौ जायापती Sy.
६. The passage beginning with शकलीकरोति and ending with किं is omitted by P.
७. नु खलु Sy.
८. ररक्षत M. रक्षतुः P. प्राप्नुतः। ... सर्वं तैरेवानुष्ठितमिति तयोर्न किञ्चित्कृत्यमस्तीत्यर्थः। अथवायमर्थः। एकस्तेषामन्यतमः श्रोणा पङ्गुका गामुदकं प्रत्यवगमयति। अपरः सूनया मांसविक्रयिण्या, आभृतं सम्पादितं मांसं पिशति। अपर आनिम्रुचोऽस्तमयादवगिव शकृद् गोपुरीष हरति। एवमृभुभिरनुष्ठिते सति किं स्विदेतस्मात्परिचरणावन्यत्पुत्रेभ्यः सकाशादुपावतुरुपगच्छेतामिति Sy.
९. VM. ignores उप
१०. आग्राह्यस्यादित्यस्य Sy. गूहितुमशक्यस्यादित्यस्य SKN. IV. 67. योऽयमगोह्य आदित्योऽगूहनीयो न गूहितु शक्यः केनचिदपि Dur.
११. मण्डले Sy. मण्डलाख्ये SKN. अस्य मण्डले Dur. १२. यावत्कालम् Sy. यदा रात्रावित्यभिप्रायः SKN.
१३. सुप्तवन्तः स्थ, रात्रौ निर्व्यापारास्तिष्ठथ Sy. सम्वप्ते (अस्वाप्त) SKN. सुप्ता एव निगूढा भवथ Dur. १४. अस्मै प्राणिजाताय तदुपकारार्थम् Sy. अस्मै जनाय SKN. अस्मै लोकाय Dur.
१५ तस्येन्ने० P.D. उन्नतेषु प्रदेशेषु मेर्वादिषु Sy. 'उपसर्गाच्छन्दसि धात्वर्थे' (Pā 5 1 118.) इति वतिः, उद्गतेषून्नतेषु। केषु? सामर्थ्याद् भूप्रदेशेषु SKN. य उन्नताः प्रदेशा भुवोऽद्भिरनाक्रान्तास्तेषु Dur
१६ व्रीहियवादिरूपम् Sy.
रश्मीना च भूतलगतास्याहीन्या व्यभिचरतीत्याथर्वणे व्यापारदर्शनादुपपन्नं तृणादिकरणम् SKN. तृणं कुशादि Dur १७. कृतवन्त स्थ Sy.
प्रतिसंवत्सरं कुरुध्वे ... वर्षेणादित्यमण्डलादौ वर्तमाना. Dur.
१८ प्रवणदेशेष्वस्मा एव Sy. निर्गतेषु SKN. निम्नेषु भुवः प्रदेशेषु Dur.
१९. पानावगाहनक्षमा अपः SKN. उदकम् Dur.
२०. शोभनं कर्म, एभिः कृतमिति यथा यजमानाः स्तुवन्ति तदिच्छयेत्यर्थः Sy. अप इति कर्मनाम। शोभनमपः स्वपस्तत इच्छाक्यजन्तादकारप्रत्यये भावे ततष्टाप्, तृतीया हेतौ, करणेच्छाहेतुना SKN. लोकानुग्रहप्रवृत्तया वर्षक्रियया Dur.
२१. नेतरतः P. नेतरः D. नेतराः M. पुराणप्रसिद्धान् सुधन्वनः पुत्रान्कर्मणा देवत्वं प्राप्तवत ऋभून् स्तुत्वा वेदप्रसिद्धया सूर्यरश्मिरूपानृभूनिदानीं स्तौति। तथा च यास्को निरुक्ते पुराणप्रक्रियासिद्धानृ-

बाध्यमाने स्तोतरि। न। अनुगच्छथ न तथेदानी कुरुथेति। यास्कस्त्वाह—"आदित्योऽगूहनीयः। तस्य यदस्वपथ गृहे" तदद्येदमृभवो नानुगच्छथ "यावत्तत्र भवथ न तावदिह भवथेति"

संमील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः।
अर्शपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥१२॥

संमील्य। मनुष्याणा नेत्राणि सम्मीलयन्त। सर्वाणि भुवनानि। यदा। पर्यसर्पत सवित्रा सह गच्छन्त। तदा युष्माकम्। मातापितरौ। तातशब्दार्हौ। क्व। आसतु, पितृशूश्रूषणप-

---

भून्बहुधा निरुच्य तदुवाहरणत्वेन 'विष्ट्वी शमी' इत्येतामुवाहृत्य 'आदित्यरश्मयोऽप्यृभव उच्यन्ते' (N 11 16.) इत्युक्त्वा तस्मिन्नर्थ एतामृचमुदाजहार। हे ऋभव उरु प्रभूत भासमाना ऋतेनादित्येन भासमाना वा ऋतेनोदकेनोदकार्थमुत्पन्ना वा। रश्मीनामुरुभासमानत्वं प्रसिद्धम्। तथाऽऽदित्यादुत्पत्तिरप्युदकार्थं भवनमपि रश्मीना घर्मकाले भूमिगतं सारभावाय पुनर्वर्षकाले प्रवर्षन्तीति प्रसिद्धम् 'आदित्याज्जायते वृष्टि.' (Manu 3 76) इति शास्त्रात्। तथाविधा नरः प्रकाशवृष्टचुदकावेर्नेतारो यूयम् Sy. हे ऋभवो रश्मयः SKN. उपकरिष्यन्तो यूयमृभवः ! Dur.

१ स्तोतनिरानु० M. ०च्छ P. D
२ यतस्वपत P.D यदस्वपत M
३ N.11.16; SKN. IV. 67
४. तावन्तं कालम् Sy. तदा SKN. यावत्तत्र निगूढा भवथ Dur.
५. अहनि Sy. रात्रिलक्षणे वर्तमानकाले SKN. रात्रौ Dur.
६. इदानीम् Sy. इदं जगत् SKN.
७. ०स्वपत ... मृभ० M.
८. अनुसृत्य न गच्छथ। यावन्तं कालं रात्रौ सूर्ये निगूढा वर्तध्वे तावन्तमेव कालमहन्यपि नानुगच्छथेत्यर्थः। यद्वा। अगोपनीयस्य तस्य गृहेऽन्तरिक्षे यद्यावन्तं कालमस्तन वृष्टिमदत्त्वा स्वापमकुरुत तत्तावन्तं कालमद्येदानीं वर्षसमय इदं सस्याभिवर्धनवृष्टिप्रवाहरूपं कर्म नानुगच्छथ। अनुसृत्य न प्राप्नुथ। यावन्तं कालं विवर्षथ तावन्तमेव कालं प्रवर्षयेत्यर्थः Sy. यावत्तत्र भवथ न तावदत्र। ततश्च युष्मद्विना निरालोकोऽयं लोकः। एतद्धो माहात्म्यमिति स्तुति. SKN न तावदिह भवथ। ततश्च युष्मद्विनाभावे निरालोकोऽयं लोकः सम्पद्यते। एतद्धो महाभाग्यमहमनुकीर्तयामि। ते यूयमिवं नामास्माकं कुरुतेति Dur
९. N 11 16.; SKN. IV 67. VM. ignores अद्य
१० समीलयन्त M. हे ऋभवो रश्मयो यूयं यदा ... सम्मीलन कृत्वा जलधरपटलैराच्छाद्य Sy. ११. भूतजातानि Sy.
१२ वर्य० P. ०समर्प० M. परितः सर्पण कुरुथो वर्षथ इत्यर्थः Sy.
१३. जगतः पालकौ सूर्याचन्द्रमसौ Sy.
१४. ०हौ M. तातौ तायमाने वृष्टचुदके। यद्वा तात्या तासु वर्षासु ... अथवा पितृविशेषणम्। ... तत्कालीनौ Sy.
१५. कुत्र खलु Sy.
१६. तिष्ठतः। ... यद्वा ... अहोरात्रविभागेन प्रवर्षयथेत्यर्थः Sy.

[1] [2] [3] [4] [5] [6]
राणां भवतामिदानीं क्व तावभवतामिति । यः । व प्रहरामीति । करम् । आदत्ते । तं यूयं हुङ्कारेणा-
[7] [8] [9] [10] [11]
ऽशपत । यो युष्मान् । प्रकृष्टा भवन्त इति । अस्तौत् । तस्मै यूयमपि । अधिकवचनमकुरुत ।

सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥१३॥

[12] [13] [14] [15] [16] [17]
सुषुप्वांसः । रात्रौ सुषुप्वास । ऋभव । प्रातस्तत् । अपृच्छत । हे सवित ! क । इदम् ।
[18] [19] [20] [21] [22] [23] [24] [25]
अस्मान् । प्रातरेवाऽबूबुधदिति । तत्र श्वानम् । बस्त । बोधयितारम् । अब्रवीच्छ्वेनि सवत्सरमाह
[26] [27] [28] [29]
बस्त इत्यात्मानम् । इत्थं यूय सवत्सरमात्र एव तप प्रभावाद्रश्मीभूता । सर्वमिदम् । प्रकाश-
[30]
यथेत्यृपिवचनम् ।

दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ॥१४॥

[31] [32] [33] [34] [35] [36]
दिवा यान्ति । द्युलोकेन । गच्छन्ति । मरुत । भूम्या । गच्छत्यग्नि । अयम् । वात ।

---

१. ०शुश्रूषां P. २. क...ताभव० P.
३. यः कोऽपि वृष्टिप्रतिबन्धकारी राक्षसादिः Sy. ४. ईदृशान् वो युष्मान् Sy.
५. बाहुनामैतत् । 'करस्नौ बाहू, (Ngh. 2 4) इत्युक्तत्वात् । अत्र त्वकारान्तम् । युष्मदीयं हस्तम् Sy.
६. गृह्णाति प्रतिरोध करोति तम् Sy.
७. नाशयथ Sy.
८. भवदन्त P. अभ० M. यश्च प्राब्रवीत्प्रकर्षेण वाचा निरुन्धे Sy.
९. इभ्यस्तौत् P. १०. ०तः M. प्रकर्षेण भर्त्सनादिशब्द कुरुथ । यद्वा यो नूनं स्तौति तं प्रकर्षेण स्तुतेत्यर्थः Sy.
११. VM. ignores स्वित् । उ
१२. आदित्यमण्डले स्वपन्तो वर्षणाय Sy.
१३. ०प्वांसंभवः M. रश्म्यात्मका यूयम् Sy.
१४. तमादित्यं तद् वाक्यम् Sy.
१५. प्रश्नं कुरुत Sy.
१६. केनचिदगोपनीयादित्य स्वामिन् ! Sy.
१७ कर्म वर्षणरूपम् Sy
१८ अस्मदीयम् Sy.
१९ बोधयति प्रेरयति साहाय्यं करोति Sy.
२०. अन्तरिक्षे श्वसन्तं वायुम् Sy.
२१ सर्वस्य वासयिताऽऽदित्यः Sy.
२२. बाध० P. प्रेरयितारम् Sy.
२३. प्रावादीत् । असौ युष्मान्प्रेरयतीति Sy.
२४. ध्वेति P. २५. ०ब्रवी...संव० M.
२६. ०त्मनागि० P.
२७. अथ वायुसहायेन वर्षन्तो यूयं संवत्सरे पूर्णे Sy. २८. अद्येदानीमिदं जगत् Sy.
२९. विविध प्रकाशितवन्तः । पूर्वं सूर्याचन्द्रमसो यथा न दृश्येते तथा वर्षित्वेदानीं वर्षकालेऽतीते विश्वं जगद् व्यक्तं कुरुथेत्यर्थः Sy.
३०. VM. ignores अद्य
३१. द्युलोकात् Sy. ३२. आगच्छन्ति Sy.
३३. वृष्ट्यनुकूला देवाः Sy. ३४. भूमेः सकाशात् Sy. ३५. आगच्छति Sy.
३६. सर्वदा सञ्चारी वायुः Sy.

अन्तरिक्षेण[१]। याति[२]। अद्भि[३]। याति[४]। वरुणः[५]। नदीभिश्च[६]। युष्मान्[७]। इच्छन्त.[८]। शवस.[९]। पुत्रा ऋभव.[१०]! तदिदं सर्वं भवत्प्रणीतमिति[११]।

I. 162.

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥१॥

मा नः[१२]। आयुर्वायु[१३]। मा[१४]। अस्मान्[१५]। मित्रादय[१६]। महान्[१७]। इन्द्रश्च[१८]।

---

१. अन्तरिक्षात् Sy.
२. आयाति Sy. ३. ताभ्यः Sy.
४. आयाति Sy.
५. आवरको जलाभिमानी देवः Sy.
६. समुन्वनस्वभावैः Sy.
७. वृष्टयनुकूलचिकीर्षया युष्मानेव Sy.
८. वृष्टिकार्यस्य बलस्य Sy.
९. नपातयितार ऋभवः Sy.
१०. यद्वा पूर्वं वृष्टिसाहाय्यायागता एते देवाः कृतकार्याः सन्तः पुनर्युष्मान्कामयमानाः स्वस्वदेश प्रति यान्तीत्यर्थः Sy.
११. Ms. D. puts the figure ॥१६१॥ here to indicate the end of one hundred and sixtyfirst hymn. No such number is given in P. and M.
१२. एति सततं गच्छतीत्यायुर्वायुः Mah. आयुः सततगन्ता वायुः Sy. आयुर्वायुर्वकारलोपेन U. अयनस्वभावकत्वाद्वायुः। छान्दसो वकारलोपः SKN. अत्र वायुरयनो वकारलोपेन । स कस्मात्? अयनात्, एति ह्यसौ विश्वम् Dur.
१३. मा, इति प्रतिषेधार्थीयः परिख्यशिस्येतेन सम्बध्यते SKN.
१४. अस्मान् Mah., Sy. अस्माकम् U., SKN., Dur
१५. के मा निन्वन्तु तानाह । मित्रोऽहरभिमानी देवः। वरुणो रात्र्यभिमानी देवः। अर्यमाऽऽदित्यः Mah. अहरभिमानी देवो मित्रः । रात्र्यभिमानी वरुणः । अर्यमा तयोरन्तरालाभिमानी, आदित्यः Sy. के ते देवाः? मित्रो वरुणोऽर्यमा U. परस्ताद्यच्छब्दश्रुतेस्तच्छब्दाध्याहारः। तन्मित्रो वरुणोऽर्यमा SKN.
१६. ऋभवो देवाः क्षियन्ति निवसन्ति यस्मिन्नस ऋभुक्षा देवाधारः प्रजापतिः । यद्वेयति व्याप्नोति सर्वमित्यृभुक्षाः । अर्तेर्भुक्षिन्प्रत्ययः।... इन्द्रविशेषणं वा Mah. देवानां निवासभूतः प्रजापतिः । यद्वैतन्मह्नाम, इन्द्रविशेषणम् । 'ऋभुक्षा उक्षा' (Ngh 3.3.)इति तन्नामसु पाठात् Sy. महन्नामैतत्, महान्। अथवा, उरु भातीत्यृभुर्विस्तीर्णमन्तरिक्षम्। तस्मिन्यः क्षयति वसति स ऋभुक्षाः, अथवा ऋभवः सौधन्वनास्तेषां यः क्षयति राजतीष्ट इत्यर्थः स ऋभुक्षाः SKN. स हि, उरुक्षयणः। उरावन्तरिक्षे क्षियति निवसति। अथवा क्षियतिरैश्वर्यार्थः। कस्येष्टे? ऋभूणां देवानां राजेति च तेषामीष्टे। एवमृभुशब्दात्पूर्वपदं क्षियतेरैश्वर्यकर्मण उत्तरपदम् Dur.
१७. इन्द्रो देवराजः Mah. इन्द्रः प्रसिद्धः Sy.

निषेधतु[१]। यत्[२]। बलवतः[३]। देवैर्जनितस्य[४]। अश्वस्य[५]। वक्तुं प्रक्रमामहे[६]। यज्ञे[७]। वीर्याणि[८] किमदेवोऽसौ स्तूयत इति परिख्यानसम्भव.[१०]।

---

१. मित्रावयो देवाः . . . मा परिख्यन्मा निन्वन्तु । परिख्यानं निन्दा । . . . अस्माभिर्देवाः स्तुता नत्वश्ववायस्तिर्यञ्च इति यद्यपि निन्दोचिता, तथाप्यश्वरूपेण देवानामेव स्तुतिः क्रियते Mah. अश्वं स्तोतुं प्रवृत्तान्मित्रावयो देवाः . . . परिख्यानं मा कुर्वन्तु । परिख्यानं नाम निन्दा । महानुभावं देवजातमश्वं तुच्छा नराः स्तुवन्तीति मा कुर्वन्तु Sy. मा गर्हन्तु । . . . देवाः स्तुत्या नत्वश्वप्रभृतयस्तिर्यञ्च इति स्याद् गर्हा । अतो ब्रवीमि मा परिख्यन्निति । यद्यपि गर्होचिता तथाप्यश्वादिरूपेण देवानामेव स्तुत्यत्वादित्याशय· U. परिख्यानं परिवर्जनम् । अनुमदन्तमाकाङ्क्षु. । यद्वाऽनुमन्यन्तामित्यर्थः SKN मा . . . तान्युच्यमानानि चक्षीरन् । कि तर्हि, अनुमन्यन्ताम् Dur. निषेधन्तु is suggested for निषेधतु

२. यस्मात् Sy. ३. वाजिनोऽश्वस्य Mah. वेजनवतो बहूनश्वतो वा Sy.

४. ०र्जनि० P. कीदृशस्य वाजिनः ? . . . देवात्सूर्याज्जातस्योत्पन्नस्य, देवैर्जनितस्य वा । "सूरादश्वं वसवो निरतष्ट"(YV. 29.13.) इत्युक्तेः Mah. बहुदेवतात्मस्वरूपेणोत्पन्नस्य । उषाद्यादीनामस्य शिराद्यावयवत्वादिति भावः । 'उषा वाऽश्वस्य मेध्यस्य शिरः' (Bṛh. U. 1.1.1.) इत्यादिश्रुतेः । यद्वा देवेभ्यो जातस्य गन्धर्वकुल उत्पन्नत्वात् Sy. देवैर्जनितस्य U. "(स)प्रथमामाहुतिमजुहोत्ततो मनुष्या अजायन्त । स द्वितीयामजुहोत्ततोऽश्व." इति श्रुतेर्देवादग्नेराहुत्या जातस्य । अथवा 'सूरादश्वं वसवो निरतष्ट' (YV. 29 13.) इति वर्शनाद्देवैर्वसुभिरादित्याज्जातस्य SKN.

५. 'सप सम्बन्धे' सपति देवैः सह युज्यत इति सप्तिस्तस्य Mah सर्पणशीलस्य । अश्वनामैतत् । एवंविधस्याश्वस्य महानुभावस्य Sy.
सरणस्य U., SKN.

६ वयम् . . . उच्चारयिष्याम· Mah. प्रकर्षेण ब्रूम· । अतो मा परिख्यन्प्रत्युतानुगृह्णन्त्वित्यर्थः Sy. उच्चारयाम· U. प्रकर्षेण वक्ष्यामः Dur

७. यज्ञे Mah., U. वेदनसाधने यज्ञे Sy. यज्ञेऽश्वमेधादौ SKN.

८. चरित्राणि Mah., U. वीरकर्माणि सामर्थ्यानि Sy गुणान् Dur.

९. कि दे० M.

१०. यद्वाजिनो देवैर्जातस्य सप्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि । मा नस्त्वं मित्रश्च वरुणश्चार्यमा वायुश्च वायुरयन इन्द्रश्चोरुक्षयण ऋभूणां राजेति वा मरुतश्च परिख्यन् N.9.3; SKN. III. 144.
This stanza=YV. 25. 24.

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥२॥

यन्निर्णिजा । यत् । निर्णिक्तेन । मणिमयेन । धनेन । प्राच्छादितस्य ।
घासम् । गृहीतम् । मुखत । हरन्त्यतिरिक्तमन्नमश्वायोपहरन्तीत्यश्वमेधब्राह्मण तदा ।
सुष्ठ्वग्रतो गच्छन् । अज । शब्द कुर्वन् । इन्द्रापूष्णो । स्थानम् । अपि । गच्छति ।

१. यदा Mah. यस्मात् Sy. यदा U.

२. निर्णिजाक्तेन P. कीदृशस्याश्वस्य ?... निर्णेजनेन स्नानेन प्रावृतस्य संस्कृतस्य । आलम्भनकाले स्नापितस्य, निर्णेजन निर्णिक् तया Mah निर्णिगिति रूपनाम । 'निर्णिग् वह्नि' (Ngh 3 7) Sy. निर्णेजनेनोदकस्नानेन संस्कृतस्य, आलम्भनकाले यस्नापनमश्वस्य तदेतदुक्तम् U. ३. मणि येन । सौवर्णमणिलक्षणेन Mah. मणिकाख्येन U

४. रेक्ण इति धननाम । धनेन... प्रावृतस्याश्वस्य, सौवर्णान्मणीन्केसरपुच्छेषु पत्न्य आवपन्ति (Cf. सौवर्णान्मणीन् केसरयो. पुच्छे च प्रवयन्ति Kā Śr 20.5.17) इत्युक्तेः Mah. रेक्ण इति धननाम । ...'रेक्णो रिक्थम्' (Ngh. 2.10.) इति... तन्नामसूक्तत्वात् । उभयत्र मत्वर्थो लुप्यते । रूपवता हिरण्यवताऽऽभरणेन Sy रेक्ण इति धननाम । धनेन ...सुवर्णान्मणीन्केसरपुच्छेषु पत्न्य आवपन्ति तदभिप्रायमेतत् U ५. सर्वतो वेष्टितस्याश्वस्य Sy. केसरपुच्छेषूपचितस्याश्वस्य U. ६. रातिं दानमाज्यसक्तुधानालक्षणम् Mah. दातव्या दातव्यत्वेन गृहीतामजाम् Sy. आज्यसक्तुधानालाजालक्षणम् U.

७. गृहीताम् Mah., Sy., U.

८. अश्वस्य मुखतो मुखाग्रे Mah. मुखतः पुरस्तात् Sy. मुखतः U.

९ हरन्त्य० P. नयन्ति प्रापयन्ति 'अश्वाय रात्रिहुतशेष प्रयच्छति' इत्युक्तेः Mah. नयन्ति, ऋत्विजः Sy. अश्वाय रात्रिहुतशेषं प्रयच्छन्ति (Cf. अश्वाय रात्रिहुतशेष प्रयच्छति Kā Śr.20.5.18) इत्येतदभिप्रायम् U. १०. अन्नम् is omitted by P.D. ११. ०योवाह०P.

१२. कीदृशोऽजः ? ... सुष्ठु प्राञ्चति पूर्वं गच्छति सुप्राङ् । ललाटे बद्ध इत्यर्थः । 'कृष्णग्रीव आग्नेयो ललाटे (ऱराटे) पुरस्तात्' (VV 24.1) इत्युक्ते Mah. सुष्ठु प्रशस्यागमनः Sy सुष्ठु प्रागञ्चनोऽजः U.

१३. अजश्छाग. Mah. स तादृशोऽजः Sy.

१४. मेम्यच्छब्दानुकरणम् । मे मे इति शब्दं कुर्वन् Mah. हन्यमानः । 'मीञ् हिंसायाम्'... यद्वा तस्य शब्दानुकरण मे मे शब्द कुर्वन् Sy मेम्यदिति शब्दानुकरणम् । मे मे इति शब्दं कुर्वाणः U.

१५. इन्द्रश्च पूषा चेन्द्रपूषणौ तयोः । .. इन्द्रस्य पूष्णश्च Mah. इन्द्र प्रसिद्धः पूषा पोषको देवोऽग्निस्तयोः Sy. इन्द्रस्य पूष्णश्च U

१६ प्रियमिष्टं पाथोऽन्न पशुलक्षणम् Mah. सर्वेऽपीन्द्रस्येतीन्द्रप्रियत्वम् । एवंरूपं पाथोऽन्नम् Sy. पाथोऽन्नं पशुलक्षणम् U.

१७. भक्षाय नाभिबद्धोऽप्यागच्छति 'सौमापौष्णः श्यामो नाभ्याम्' (VV.24.1.) इत्युक्तेः । हुतशेषमन्नं यज्ञश्वाय दीयते तदा ललाटनाभिबद्धावजौ भक्षायागच्छत इत्यर्थः Mah. प्राप्नोतु Sy. अभ्यागच्छति U.

[1]विश्वरूप पर्यङ्ग्[2]येष्वेन्द्रापूष्ण[3]· पशुरश्वस्य ग्रीवासु ललाटे वा बध्यते तदनयो[4]· स्थानम्।

एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥३॥

[5]एष छागः। "आग्नेय ग्रीव पुरस्तात्ललाटे पौष्णमन्वञ्चम्" इत्युक्तम्। अयम्। [6]छाग.। [7]बलवता। [8]अश्वेन सह। [9]पूष्णे। [10]दीयमानो यज्ञस्य प्रतिवेदात्[?]। [11]सर्वदेवहितोऽश्वस्य। [12]पुरत । [13]नीयते। [14]अभिप्रियम्। [15]पशुपुरोडाशम्। [16]यदा। [17]अश्वेन सह निर्वपन्ति तदानीम्। [18]अश्वम्। [19]त्वष्टा।

---

१. विश्वानि रूपाणि यस्य । नानावर्ण इत्यर्थः Mah. बहुवर्णोपेतः कृष्णग्रीवः कृष्णललामो वा नैकवर्ण इत्यर्थः । एवरूपोऽयम् Sy. नानावर्ण'। 'कृष्णग्रीव आग्नेयो ररा[1]टे पुरस्ता[2]त्' (YV. 24.1) इत्येतदभिप्रायमेतत् U

२. ० र्यङ्ग्ये० M. ० न्द्रापौष्ण is suggested fo1 ० न्द्रापूष्ण

३. P repeats पशुरश्वस्य पशुरश्वस्य

४. VM ignores प्रियम् This stanza=YV. 25 25.

५. ०न्वञ्ज० D.

६. छागोऽजः Mah भृङ्गरहितोऽज. Sy आग्नेयश्छागः U.

७ वेगवता Mah. शीघ्रव्यापकेन Sy व्यापकेन सहितः U. ८ ०तो श्वे० D

९. कीदृशश्छागः? ... पुष्णाति देवानिति पूषाग्निस्तस्य Mah पोषकस्याग्ने Sy. पोषकस्याग्नेश्च U

१०. भागो भजनीयः 'आग्नेयो ररा[1]टे' (YV.24.1) इत्युक्तत्वात् Mah भजनीयः Sy., U. ११. ०दान् P.

१२. विश्वेभ्यो देवेभ्यो हित· सर्वदेवार्हः, अग्नेः सर्वदेवात्मकत्वात् Mah. सर्वदेवार्हः। अग्नेः सर्वदेवात्मकत्वात्तदर्हत्वेन सर्वदेवप्रियत्वम् Sy. विश्वेभ्यः सर्वेभ्यो देवेभ्यो हितः । अग्नेः सर्वदेवात्मकत्वात्सर्वदेवप्रियत्वम् U.

१३. पुरस्तात् Mah. एवंविधोऽजः ... पुरस्तात् Sy. अग्रतोऽग्रे स्थितः U.

१४. नीयते प्राप्यते ललाटबद्धत्वात् Mah. प्राप्यते Sy. नीयते . .सोऽपि पर्यङ्ग्य एव U

१५. अभिप्रीणातीति तम्, समन्ताद्देवानां प्रीणयितारम् Mah प्रीणयितारम् Sy. अभिप्रेतम् U

१६. पुरो डाशन्ते दवत्येनं स पुरोडाशस्तं पुरस्ताद्दातव्यम् Mah. पुरस्ताद्दातव्यम् Sy. पुरोडाशं कर्तुम् U.

१७. यस्मादेवं क्रियते तस्मात् Sy. यच्च U.

१८. अरणवताऽश्वेन सह Sy. अश्वेन सहितम् U.

१९. तदा Mah. अश्वस्तस्मिन्काले सज्ज्ञाप्यते पशुपुरोडाशः क्रियते तदेतदुक्तम् U.

२०. एनं छागम् Mah. एनमजम् Sy., U.

२१. त्वष्टा इत् त्वष्टैव प्रजापतिरेव Mah. त्वष्टा सर्वस्योत्पादको देवः 'त्वष्टा रूपाणि विकरोति' (TS 1.5.9.2.) इति श्रुतेः। तूर्णव्यापकोऽग्निर्वा, 'उ[1]भे त्वष्टुर्बिभ्यतुः'(RV.I.95.5) इत्युक्तत्वात्। 'अहोरात्रे इति वा। अरणी इति वा' (N.8.15.) इति यास्केन 'अरणी बिभ्यतुः' इत्युक्तत्वादरणिसम्बन्धोऽग्नरेवेति गम्यते Sy.

एव विशसनकुशलः[१]। शोभनान्नत्वाय[२]। संस्करोति[३]।

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥४॥

यद्धविष्यम्[४]। यदा। हविषे हितमग्निम्। स्वे स्वे काले[५]। देवान्प्रति गन्तारम्[६]। ऋत्विज[७]। त्रि[८]। परिणयन्ति[९]। तत उदङ्[१०] नीयमानस्याश्वस्य[११]। अग्रत[१२]। पूष्ण[१३]। भाग[१४]। गच्छति[१५] स्वकीयेन शब्देन[१६]। यज्ञम्[१७]। देवेभ्योऽश्वमेधम्[१८]। निवेदयन्[१९]। अज[२०]।

---

१. ०ल. P

२. किमर्थम्। सौश्रवसाय शोभनं श्रव· कीर्तिर्यस्य स सुश्रवास्तस्य भावः सौश्रवसं तस्मै सुकीर्तये। यज्ञे मृतानां स्वर्गाप्तेरुक्तत्वात् Mah. देवानां शोभनान्ननिमित्तम् Sy शोभनान्त.करणाय U.

३ प्रीणाति Mah प्रीतिहेतुकं करोति Sy. प्रीणाति स हि तस्याधिकार इति U
This stanza=YV 25 26

४. कीदृशमश्वम्? हविष्य हविषे हित हवियोंग्यम् Mah. हवियोंग्यम् Sy.

५. ऋतावृतौ यज्ञकाले Mah ऋता ऋतौ काले काले Sy. ऋतावृतौ U

६. Omitted by P. देवानां प्रापणीय देवेषु यानं गमनं यस्य तम्, देवयानमार्ग-गमनं वा। यद्वा देववदादित्यवच्छानं गतिर्यस्य, अनिवारितगतिमित्यर्थ. Mah देवानां प्रापणीयम् Sy खचारिणं देवयानं देवानां प्रापणीयं देवयानमार्गगामिनं वाऽऽदित्यवदनिवारितगतिं वा U.

७. मनुष्या ऋत्विजः Mah. ऋत्विज· Sy. ऋत्विग्यजमानाः U.

८. त्रि D. वारत्रयम् Mah. त्रिः संस्कृतं स्नापनव्यञ्जनसुवर्णमणिकप्रवारैः U.

९. पर्यग्निकुर्वन्ति Mah पर्यग्निकुर्वन्तीत्यर्थः Sy परिणयन्त्यश्वम् U.

१० अत्रास्मिन्समये पर्यग्निकरणकाले Mah. अस्मिन्समये Sy. अत्र तत्रेत्यर्थः, तस्मिन्काले U
VM seems to explain अत्र as ततः in the sense of तस्मिन्काले तस्मिन्प्रदेशे वा

११ दीय० M. ०नेस्या० P.

१२ प्रथम. पुरोगामी सन् Mah., Sy

१३ ०ग्रत (यूप मे वृश्चन्त्यपि च ये वहन्ति वा येऽवयूपस्य तक्षन्ति नकारलोपः। पूष्ण· D. पोषकस्य वृद्धस्य वाग्नेः . . . 'पुष वृद्धौ' पूषति वर्धते पूषाग्निः Mah. पोषकस्याग्नेः Sy., U.

१४. भागोऽजः Mah., Sy. भागोऽजाख्यः U.

१५. गच्छति Mah , Sy.

१६. स्वशब्देन Mah.

१७. किं कुर्वन्। देवेभ्यो यज्ञं प्रतिवेदयन् ख्यापयन्.. ज्ञापयन् Mah. प्रख्यापयन् Sy देवेभ्यः प्रतिवेदयन्नजः स्वकीयेन शब्देन U.

१८. अयः P.

१९. VM. ignores अश्वम्
This stanza=YV. 25. 27.

होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥५॥

होताध्वर्युः[1]। होता[2]। अध्वर्यु[3]। आभिमुख्येनाध्वर्युं प्रति गच्छन्प्रतिप्रस्थाता[4]। अग्नीध्रः[5]। ग्राव्ण स्तोत्रेण गृह्णन् ग्रावस्तोता[6]। मैत्रावरुण[7]। ब्रह्मा[8]। च सर्वे[9]। एतेनानेन[10]। अग्नेन[11]। साध्वलङ्कृतेन[12]। स्विष्टेन[13] च देवानां तृप्तिकरा[14]। नदी[15]। परलोके पूरयध्वम्[16]।

---

१. हे होत्रादय ऋत्विज· Mah.

२. के, ऋत्विजस्तानाह। ...आह्वाता देवाना तन्नामक ऋत्विक् Mah देवानामाह्वातंतन्नामक ऋत्विक् Sy. होता तत्र शसिता सुविप्र इति सम्बन्धः U.

३. अध्वरमिच्छत्यध्वर्यति Mah अध्वरयुरध्वरस्य नेता Sy.

४. आभिमुख्येनावयजतीत्यावयाः... प्रतिप्रस्थाता Mah सोऽपि...आभिमुख्येन हविषां गमयिता। अध्वर्योर्विशेषणमेतत्। ...यद्वा। आभिमुख्येनावयष्टा प्रतिप्रस्थातोच्यते Sy. यस्मिन्यज्ञ आवया आभिमुख्येन वयति कर्मणीत्यावया U.

५. अग्निमिन्द्धे दीपयति, अग्निमिन्धोऽग्नीत् Mah, Sy. अग्निदीपक. U.

६. ग्रावाणः स्तोतार M. स्तोत्रा P. ग्राव्णो गृह्णाति स्तौति ग्रावग्राभ.। कर्मण्यण्, हस्य भ.। ग्रावस्तोता Mah ग्राव्ण स्तुत्या गृह्णातीति ग्रावस्तुत्Sy ग्रावग्राह सोमाभिषवाय ग्रावग्रहणशील. U.

७. उतापि, शस्ता शसति स्तौति शस्ता प्रशास्ता Mah. उतापिच...प्रशास्ता Sy. यस्मिन्यज्ञे..विशसिता शस्त्राणामपि U.

८ शोभनो विप्रो मेधावी सुविप्रो ब्रह्मा 'ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति' (N. 1 8.) इत्युक्तेः। अयमनुक्तर्त्विगुपलक्षकः Mah. सुविप्र इति मेधाविनाम। शोभनमेधोपेतो ब्रह्मोच्यते। 'ब्रह्मा त्वो वदति जातविद्याम्' (RV.X.71.11.) इत्यत्र "ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्य सर्वं वेदितुमर्हति" (N.1.8.) इत्युक्तत्वाद् ब्रह्मैव सुविप्रशब्देनाभिधेयः। स चानुक्तर्त्विगुपलक्षकः Sy. साधु मेधावी साधु ब्राह्मणो वा U.

९ एते यज्ञेन वक्षणाः पृणध्वमिति सम्बन्धः Mah एते सर्वे Sy.

१० अनेन is omitted by P. तेन प्रसिद्धेन Mah, Sy.

११ यज्ञेनाश्वमेधेन Mah यज्ञेन Sy., U.

१२ कीदृशेन यज्ञेन? स्वलङ्कृतेन। रलयोरैक्यं, सुष्ठ्वलङ्कृतेन विप्रहविर्दक्षिणादिभिः शोभितेन Mah. सुष्ठ्वरणीयं कृतेन स्वलङ्कृतेन वोच्चारसौष्ठवादिना सुष्ठु सम्पादितेन Sy. साध्वलङ्कृतेन U.

१३ सुष्ठ्विष्टेन Mah, Sy. साध्विष्टेन U.

१४ नदीर्घृतकुल्याद्या... वहन्तीति वक्षणाः Mah. अभितो घृतकुल्यावोन्प्रवहणस्वभावा. प्रसिद्धा नदीर्वा Sy. नदीर्वेदानां तुष्टिकराः U.

१५. घृतपयोदधिपयस्यापुरोडाशमांसैः पूरयत। ...यज्ञं सम्याद्य फलं साधयतेत्यर्थः Mah. सर्वतः पूरयत, यज्ञं सम्यग्निर्वर्त्य फलं साधयतेत्यर्थः Sy. पयोदधिपयस्यापुरोडाशमांसैरापृणध्वमापूरयध्वम्। अकृपणं दातव्यमित्यभिप्रायः U.

१६. VM. ignores आ।
This stanza=YV. 25. 28

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥६॥

यूपव्रस्काः[1]। यूप ये वृश्चन्ति[2]। अपि च। ये। वहन्ति[3]। चषाल वा[4]। ये। अश्वयूपस्य[5]। तक्षन्ति[6], नकारलोपश्छान्दस। ये[7]। च। अश्वाय। पचनोक्वाम्[8]। सम्भरन्ति[9]। अपि च। तेषाम्[10]। आगोरणमुद्योग[11]। अस्मान्[12]। व्याप्नोतु[13]।

उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥७॥

उप प्रागात्[14]। देवानुपप्रेदश्च[15]। शोभनपश्वादियुक्तम्[16]। अभिलषित च[17]।

---

१ ०व्रस्काः P.

२ व० D. तेषां केषाम्?...यूपाय वृश्चन्ति तरु छिन्दन्ति ते यूपव्रस्काः Mah. यूपार्हवृक्षस्य वृश्चनकर्तारश्छेतार. Sy. यूप ये वृश्चन्ति त एवमुच्यन्ते U.

३. महति P. यूपं वहन्ति ते यूपवाहा.। कर्मण्यण्। छिन्नस्य यूपस्य वोढार Mah. छिन्नस्य वोढार. Sy यूप ये वहन्ति U

४ यूपाग्रभागे स्थाप्य काष्ठम्...'चषालो यूपकटकः' इत्यमरः Mah यूपस्योपरिस्थाप्य यूपाग्रभाग चषालमाहुः Sy चषालं यूपाग्रभागम् U ५. येश्चयू० P. येश्चयू० M अश्ववबन्धनयूपार्थम् Mah अश्ववबन्धनयूपाय Sy, U अश्वयूपाय is suggested for अश्वयूपस्य

६ तक्षन्ति। वचनव्यत्ययः।...'तक्षू तनूकरणे' साधु सम्पादयन्तीत्यर्थः. Mah. तक्षतीति वचनव्यत्ययः। साधु सम्पादयन्ति Sy. तक्षति। तक्षन्तीति प्राप्ते छान्दसमेकवचनम्। साधु सम्पादयन्ते U

७ अपिच ये नरा Mah. ये जना. U.

८. अरणवतेऽश्वाय Sy.

९. वचनो वां M. पच्यतेऽनेनेति पचनं पाकसाधनं काष्ठभाण्डादिकम् Mah., Sy. काष्ठादि U.

१०. संहरन्ति, आनयन्ति Mah.

११. तेषामृत्विजाम् Mah., Sy. तेषां जनानां सम्बन्धिनी U.

१२. अभिगोरणमभिगूर्तिलक्षणः Mah.

सङ्कल्प, सर्वथा करणीयमिति बुद्धिः Sy. 'गुरी उद्यमने' आगूरणमभिगूर्तिः। स्वकाले सर्वं करणीयमिति बुद्धिः U.

१३ अस्मत्सम्बन्धिनाम् Sy.

१४ प्रीणानु व्याप्नोतु वा। अस्माकं यज्ञ सम्यक् साधयत्वित्यर्थः। 'इवि व्याप्तिप्रीणनयो' . तेषामुद्यमोऽस्मान्प्रीणात्वित्यर्थः Mah. व्याप्नोतु। इन्वतिर्व्याप्तिवचन. 'इन्वति ननक्ष'(Ngh 2.18.) इति तद्वचनेषु पाठात्। यद्वा तेषामभिगूर्तिर्नोऽस्मानिन्वतु। याग साधु पारं प्रापय्य फलेन योजयत्वित्यर्थः Sy. व्याप्नोतु U.
This stanza=YV. 25. 29

१५ उपगच्छतु Mah उपप्रेतु Sy. उपेतु U प्रकर्षेणोपागात्। लोडर्थे लुङ्। उपागच्छतु SKN. प्रकर्षेणतु Dur

१६. सुमत्स्वयम्...सुमदित्यव्ययं स्वयमित्यर्थे Mah. यद्वा स्वयमेव मावयितृतमे मयि Sy. स्वयम् U स्वयमेव। अत्रैकवाक्यतायै यत्तच्छब्दौ योग्यतार्थसम्बन्धावध्याहार्यौ SKN स्वयमेव। एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'सुमत्' इत्यस्य 'स्वयम्' इत्येष विपरिणाम उपपद्यते Dur. सुमत्स्वयमित्यर्थः N.6.22.

१७. मननीयं फलम् Mah., Sy. मननम् U. किं पुनस्तत्? उच्यते। यज्ञेनेदं यत्स्यादिति। सामर्थ्याद्यज्ञसाध्यं विशिष्टं फलम् SKN. मननीयमर्थजातम्। Dur.

[1]मम। [2]अधायि। सोऽय मनुष्यैर्यो[3]द्भिरभिलषितपृष्ठ । देवानाम्। [4]अभिलषितानि। [5]उपभवति। [6]अपगच्छन्त चैनमश्वम्। [7]मेधाविन । ऋषय । स्तोत्रैरनुमदन्ति। देवानाम्। [10]पोषणाय। [11]कुर्मो [12]वयम्। [13]एन [14]शोभनस्तुतिमिनि।

यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये ३ तृणं सर्वा ता ते अपि देवेष्वस्तु ॥८॥

[15]यद् वाजिनः। यद्। [16]बलवत । अश्वस्य। [18]पादबन्धनम्। [17]दाम। या च। शिरसि

---

१. मया Mah., Sy. मम U. मम, मदीयमिति शेषः SKN अहम् Dur

२. वायि P. धायि D M धृतमित्यर्थं Mah धीयते। फलभूतोऽश्व आगत. स च मया धृत इत्यर्थः Sv. निहितम् U शुद्धोऽप्ययं दधातिर्निपूर्वार्थो द्रष्टव्यः। न्यधायि निहितम् SKN मनसा ध्यातवानित्यर्थः Dur ३ ०र्योधृतिभिः M

४. अयं वीत पृष्टं पृष्ठं यस्य। यद्वा वीत कामित पृष्ठ यस्य, अश्वपृष्ठमारोहणाय सर्वे कामयन्ते, स वीतपृष्ठोऽश्वः Mah. किमर्थम्? .साधुपोषणेन प्राप्तपश्चाद्भागः कान्तपृष्ठो वा। अत्यन्त वृप्त इत्यर्थः Sy. साधुपोषणेन प्राप्तपश्चाद्भाग. कामितपृष्ठो वा। अश्वपृष्ठ हि सर्वे एवारोढु कामयन्ति (न्ते), यत एवमतो ब्रवीमि U वीते कान्तिकर्मण., वीतं कान्त पृष्ठं यस्य स। अश्वमेधसम्भूतोऽयमश्व इत्यर्थः SKN

५. आशा मनोरथान्पूरयितुमिति शेष Mah तावृशोऽय देवानामाशाः पूरयितुम् Sy शंसनानि साधु साध्वयं पशुरागच्छेदित्येवमादीनि U तदर्थं देवाना यागाङ्गभूताना या, आशा प्रार्थना हविर्भूतमिमश्वं भक्षयेत्येवरूपा SKN.

६ उपगच्छतु। उपसर्गेण क्रियावृत्तिः Mah उपगच्छतु Sy. उपागतः U. उपेत्युपसर्गश्रुतेर्योग्यक्रियाऽध्याहारः, उपागच्छतु SKN ७. अवग० M. उपगच्छन्त is suggested for अपगच्छन्तं

८. यागार्थमागतमेनम् Sy.

९ मन्त्रदर्शिन ऋत्विजः Mah. विप्रा मेधाविन ऋत्विज., ऋषयोऽतीन्द्रियद्रष्टारोऽन्ये वा विप्रा ऋषयश्च Sy. मेधाविनो विप्राः Dur १०. अनुमोदन्तां तुष्यन्तु Mah. अनुमोदन्ताम्। सम्यक् कृतमिति परितुष्यन्तु Sv. अनुमोदन्ति (न्ते) U अनुशब्दो मदन्तीत्येतेन सम्बध्यते. मदिरत्र सामर्थ्यान्मन्यतेरर्थे। लोडर्थे च लट्। अनुमन्यन्ताम् SKN.

११. आशास्यमानानाम् Sy

१२ पोषण पुष्टम्। भावे निष्ठा। निमित्ते सप्तमी। देवपुष्टिनिमित्तम् Mah. पोषणाय Sy, U पोषण पुष्टं, भावे निष्ठा, निमित्तार्थे च सप्तमी पोषणनिमित्ते पुष्ट्यर्थमित्यर्थः SKN. पोषणाय Dur.

१३ कृतवन्तः। सहितायां दीर्घः Mah. कुर्म Sy कृतवन्त. U, SKN.

१४ शोभनो बन्धुर्बन्धनं यस्य तं यमश्वं बद्धवन्त. Mah. शोभनबन्धनमश्वम् Sy शोभनबन्धनं शोभनार्थबद्धं वाU. सुबन्धन यूपे रशनया सम्यग् बद्धमित्यर्थः SKN शोभनयूपबन्धनम् Dur. N 6.22; SKN. II. 469., This stanza=YV. 25. 30.;

१५ वेगवतः Mah. गमनवतोऽश्वस्य Sy. वेजनवतः U. १६. पादबन्धनरज्जुः Mah. सम्यगवच्छेदकं बन्धनं पादबन्धनं दामास्ति Sy. सम्यगवच्छेदकं पादबन्धनम् U. १७. दम P. ग्रीवाबद्धा रज्जुः Mah., Sy. ग्रीवाबन्धनरज्जुः U

१ २ ३ ४ ५ ६ ७ ८
भवा। रशना। अस्य। नियमनी रज्जु। यत्। च। अस्य। आस्ये। निक्षिप्तम्। तृणम्।
९ १० ११ १२ १३
सर्वाण्येवञ्जातीयकानि। तवाश्व। देवेषु। सन्तु।

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति।
यद्धस्तयोः शमितुर्यक्षेषु सर्वा ता ते अपि देवेष्वस्तु ॥९॥

१४ १५ १६ १७ १८ १९ २० २१
यदश्वस्य। यत्। अस्य। मामम्। पिपीलिका। भक्षितवती। यत्। वाऽस्य। स्वरुस्व-
२२ २३ २४ २५ २६
धित्यो। लिप्तम्। भवति। यच्च। शमितु। हस्तनखेषु।

---

१ भावा P. शीर्षे भवा शीर्षण्या शिरोबद्धा ... रज्जुः Mah. अस्य . शिरसि बद्धा Sy. शिरसि बद्धा U

२. कटिस्था रशना रज्जुः, अस्यान्यापि या रज्जुः Mah स्वल्पोनरज्जु Sy.

३ अश्वस्य Sy.

४. ०मिनी P नियोजनीया रज्जु U

५ यात् P या D

६ Omitted by M वाऽथवा। अस्याश्वस्य घ प्रसिद्धम् Mah अश्वस्य। ... घशब्दो हार्थे स च प्रसिद्धपर्थ. Sy अश्वस्य यद्वा घ. पादपूरणे U

७ मुखे Mah , Sy., U ८ प्रहृत प्रक्षिप्तम् Mah , Sy. प्रहृत निक्षिप्तम् U

९. सर्वाणि ता तानि Mah तानि सर्वाणि Sy. सर्वाणि तानि U. १०. तव सम्बन्धीनि Sy. ११. देवोपयोगीनि Mah देवेषु मध्ये Sy. देवेष्वपि प्रजापतये U

१२ भवन्तु देवत्वं प्राप्नुवन्तु वा। अत्रोपयुक्तानां सर्वेषां देवत्वमाशास्यते Mah भवन्तु, देवत्वं प्राप्नुवन्तु वा। वचनव्यत्ययः। अत्रोपयुक्तानां सर्वेषां देवत्वं किलाश्वस्य तत्प्राप्तिर्नाशासनीया Sy. अस्तु। सन्त्विति प्राप्ते वचनव्यत्यय. U.

१३. VM. ignores घ। ता। अपि This stanza=YV. 25. 31

१४. यदङ्गम् Sy. १५. अ(श्व)स्य M. अश्वस्य Mah. तदवयवभूतस्य Sy. अश्वाङ्गभूतस्य U. १६. क्रविः। . . क्रविष इति कर्मणि षष्ठी Mah. आममासस्य। यद्वा कर्मणि षष्ठी। अश्वस्य यन्मामम् Sy. मांसस्याङ्गम् U 'क्रव्य विकृन्ताज्जायते' इति नैरुक्ताः। N 6 11.

१७. मक्षिका Mah , Sy., U.

१८. अभक्षयत् Sy. अशितवती U.

१९ यन्मांमम् Mah २०. अथवा Mah., Sy २१. पश्वञ्जनकाले Mah 'स्वरुणा पशुमनक्ति' (Cf. RV. IV. 6 3) इति श्रुतेः Sy.

२२ स्वतः स्वधित्य. यत् M यत्स्वधितौ शासे लिप्तमस्ति। छेदनकालेऽवदानकाले च Mah , Sy छेदनकाले U.

२३ लग्नमस्ति U.

२४ यच्च शमितुर्हस्तयोर्लिप्तम् Mah., Sy. यच्च हस्तयोश्शमितू रिप्तम् U.

२५ यच्च शमितुर्नखेषु लिप्तं हे अश्व, सर्वा ता सर्वाणि तान्यपि देवेषु ... भवन्तु। वचनव्यत्यय.। सर्वं त्वदीयं देवभोग्यं भवतु Mah. विशसनकाले ... नखेषु लिप्तम् ... तानि सर्वाणि हे अश्व! ते तव सम्बन्धीनि देवेष्वस्तु देवेषु सन्तोषार्थाय भवन्तु Sy.

२६. VM. ignores यत्। सर्वा। ता। ते। अपि। देवेषु। अस्तु This stanza=YV. 25. 32.

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ॥१०॥

यदूवध्यम्[1]। यत्। ऊवध्यम्[2]। उदरात्[3]। अपगच्छति[4]। यश्च[5]। आमस्य। मांसस्य। गन्ध[6]। भवति निर्गत[7] सह मासशकलै[8]। तानि सर्वाणि[9]। सुसंस्कृतानि। शमितारः[10]। कृण्वन्तु[11]। अपि च[12]। अश्वं च[12]। यथा सुष्ठु शृत[13] भवति तथा। पचन्तु[14]।

यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥११॥

यत्ते गात्रात्[15]। यत्। तव। गात्रात्[16]। अग्निना। पच्यमानात्[17]। सञ्ज्ञप्तस्य[18] मांसम्।

---

१. ०ध्य P

२. ईषज्जीर्णतृणपुरीष यत् . भक्षितमपक्वमामाशयस्थमूवध्यमुच्यते Mah ईषज्जीर्णं तृणपुरीषम् Sy. भक्षितमपरिणतमामाशयस्थमूवध्यमुच्यते U

३. उदकरात् P उदरस्य Mah. उदरस्य सम्बन्धि Sy. उदरस्यायुत पृथग्भूतम् U.

४ गन्धायते U

५. अपक्वस्य Mah., Sy., U

६. लेश Mah., Sy. गन्ध. U

७. पाकस्य समये यत्किञ्चिदूवध्यमपक्वस्य च लेशोऽस्ति, आमगन्धोऽस्ति Sy विद्यते U.

८ तत्सर्वम् Mah., Sy., U

९ सुकृतं सुसंस्कृतम् Mah. सुकृतमुक्तदोषरहितम् Sy.
दोषरहितानि U.

१०. विशासितारः Mah. विशसनकर्तारः Sy., U.

११ कुर्वन्तु Mah., Sy., U.

१२ अश्वं च is omitted by P D.
मेध्यमश्वम् Mah. मेध्य यज्ञार्हं पशवयवम् Sy
मेध्य यज्ञार्हम् U.

१३. शृतो देवयोग्यो जातः पाको यस्मिन्कर्मणि तथा पचन्तु Mah. देवयोग्यपाकोपेत यथा भवति तथा Sy. देवयोग्यपाकम् U.

१४ अतिपक्वमीषत्पक्वं च मा कुर्वन्त्वित्यर्थः Mah. पचन्तु। पितृमनुष्याद्वियोग्यमतिपक्वमीषत्पक्वं च मा कुर्वन्त्वित्यर्थ Sy पचन्तु U.
This stanza = YV. 25. 33.

१५. यत्र M. शूले सशेषश्रपणं तदभिवदत्ययं मन्त्रः U.

१६. शरीरात् Mah.
अवयवात् U.

१७. ना० D.

१८. निःशेषेण हुतस्य Mah., Sy., U.

हृदयशूलम्[1]। अभ्यवधावति[2] तत्र यल्लिप्तं भवति। मा[3]। तद्धृदयशूलेन[4]। भूम्याम्[5]। तृणेषु वा[6]। श्लिष्टं भवतु[7]। तदपि। देवेभ्यः[8]। कामयमानेभ्यः। प्रत्तम्[9]। अस्तु।

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥१२॥

ये वाजिनम्[10]। ये[11]। अश्वम्। परित[12] पश्यन्ति। कि पक्व उत नेति। ये च[13]। एनम्[14]। आहु[15]। सुरभिरय पक्व[16]। निर्हर[17]। इति[18]। ये। च। अश्वस्य[19]। देवस्य प्रदीयमान मासम्[20]। रक्षणार्थ[21]

---

१. यदङ्गम् Mah. तव यदङ्गं रसरूपम् Sy. यदङ्गरसरूपम् ... मासादुत्कृष्टम् U.

२. ऊष्मा रसो वाऽवधावति, अधस्ताद् गच्छति... शूलेन पाके क्रियमाणे यन्निर्गच्छति Mah. शूलमभिलक्ष्य... निर्गच्छति Sy.
ऊष्मरूपं रसो वाऽवधावति गच्छति तथा ...शूलमभिलक्ष्य... धावति गच्छति U.

३. तन्निर्गतमूष्माङ्गादिकम् Mah तदङ्गम् Sy., U

४. भूम्याश्लिष्टं मा भूत् Mah भूम्याम् ...आश्लिष्टं मा भूत्... पाकसमये Sy. मा श्लिषत्... भूम्याम् U

५. विशसनसमये तृणलग्नं मास्तु Mah विशसनसमये दर्भेषु माऽपगच्छतु Sy. मा च तृणेषु U.

६. तत्पतितं तृणलग्नं सर्वम् Mah. तर्हि तत्पतितं कुत्र गच्छतु? इति चेदुच्यते तत्तावृशम् Sy.

७. कामयजमा० P. कीदृशेभ्यो देवेभ्यः? उशन्ति कामयन्ते त उशन्तस्तेभ्यो हविः-कामयमानेभ्यः 'वश कान्तौ' Mah. कृत्स्नं हविः कामयमानेभ्यो देवेभ्यः Sy. देवेभ्यस्तदुशद्भ्यः U.

८. दत्तमस्तु Mah., Sy. दानमस्तु U.

९. VM. ignores आ। मा
This stanza=YV. 25. 34.

१०. ये जनाः Mah., U.

११. पक्व वाजिनमश्वम् Mah. अश्वावयवम् Sy.
पक्व सन्तम् U.

१२. ०न्तीति M. अयं पक्व इति जानन्ति Mah. परितः पावनबुद्धयेक्षन्ते Sy.

१३. ईमित्यव्ययं चार्थे Mah.

१४ अश्वम् U

१५. एव कथयन्ति Mah

१६ किम्? सुगन्धः Mah.
शोभनगन्ध Sy.
किमाहु.? सुरभिरयमश्वः U.

१७. पाको ज्ञातः Mah.

१८. अतो निर्हर, अग्नेः सकाशादुत्तारयेति Mah. किञ्चिदस्मभ्यं देहीत्याहुः। यद्वा। निश्शेषेण देवेभ्यो हरेत्याहुः। यतः सुरभिरतो देवयोग्यमिति Sy. किञ्चिदस्मभ्यं देहीति U.

१९. इतिशब्दः प्रकारवचनः U.

२०. जनाः Mah. नराः Sy.

२१. अस्य... अश्वस्य Sy. अश्वस्य सम्बन्धिनीम् U.

२२. ०सर० M. हुतशिष्टमांसयाचनाम् Mah., Sy. हुतशिष्टमांसयाञ्चाम् (ञ्ज्ञाम्) U.

परिवसन्ति[1]। तेषा[2] सर्वेषाम्। उद्यमनम्[3]। अस्माकमेव[4]। फलप्रदं भवतु[5]।

यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि।
ऊष्मण्यापिधानाँ चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥१३॥

यन्नीक्षणम्[6]। श्रृत मासमुत नेति, येन। मासपचनीम्[7]। उखाम्[8]। अवेक्षते दर्व्यादिना[9]। येषु[10]। पात्रेषु[11]। यूष्ण[12]। आभिमुख्येन[13] सेचन भवति। यानि[14] च तेषा पचनानामूष्मनिरोधार्थानि[15]।

---

१. कुर्वते Mah. काङ्क्षन्ते Sy. काङ्क्षते (न्ते) U. २. अपिच तेषां पाकव्रष्ट्राद्विजनानाम् Mah. उक्तविधानाम् Sy. तेषां सम्बन्धिनी U.
३. उद्यमः Mah. अभित उद्यमनम् Sy. या, अभिगूर्तिः सा U.
४. अस्मान् Mah., Sy, U
५. प्रीणातु। यद्वाऽयं मन्त्रो देवपरो व्याख्येयः। ये देवाः पक्व वाजिनं परिपश्यन्ति कदा होष्यतीति। ये च विलम्ब दृष्ट्वा सुरभिः पाको जातोऽस्मभ्यं निर्हर देहीत्याहुः। ये चार्वतो मासभिक्षामुपासते मांसं याचन्ते तेषामभिगूर्तिः सङ्कल्पोऽस्मान्प्रीणातु। सफलो भवत्वित्यर्थः Mah व्याप्नोतु। यथाऽस्माभिरुक्वे, उपालब्ध एवं स्पृहयन्ति तथा यज्ञो निर्वाहयत्वित्यर्थः। यद्वा मन्त्रो देवपरो व्याख्येयः। ये देवा वाजिन पक्वं परिपश्यन्ति, कदा होष्यतीति। विलम्बं दृष्ट्वा ये च सुरभिरीमेन निर्हर निश्शेषेणास्मभ्यं देहीत्याहुः। ये चार्वतोऽश्वस्य मासभिक्षामुपासते तेषामभिगूर्तिर्नं इन्वतु। तेषामुद्यमः सफलो भवत्वित्यर्थः Sy. व्याप्नोतु। यद्वा देवपरोऽयं मन्त्रो व्याख्येयः। ये देवा वाजिनं परिपश्यन्ति पक्वं कदा होष्यतीति। विलम्बं दृष्ट्वा ये च सुरभिरयमश्वोऽ (अश्वोऽतः) निर्हर निःशेषेणास्मभ्यं देहीत्याहुः। ये चार्वन्तो (र्वतो) मासभिक्षामुपासते लिप्सते, (न्ते) उतो तेषामभिगूर्तिं (र्तिः) न इन्वतु। वयं तु देवानामनन्यभूता इत्यभिप्रायः U.
६ VM. ignores उतो
This stanza=YV. 25. 35.
७. कीदृश्या उखायाः? मांस्पचन्या मांसं पच्यते यस्या सा मास्पचनी तस्या मासपाकाधिकरणभूतायाः Mah. मांसपचन्याः Sy मांस्पचन्याः 'मांसस्य पचि युङ्घञोः' इत्यकारलोपः U.
८. ०खं M उखायाः स्थाल्या. Mah.,Sy.
९ क्षिते P नितरामीक्षणं पाकपरीक्षार्थं दर्शनम् Mah. पाकपरीक्षासाधनम् Sy. यद् नीक्षणं नितरामीक्ष्यते भृताश्च तव सम्बन्धिनोऽर्था इति ... तन्नीक्षणम् U.
१०. काष्ठम् Sy. येन दर्व्यादिना (दर्व्यादिना) U. ११. यानि Mah., Sy., U.
१२. आसेचनसाधनानि ... पात्राणि Mah., Sy. १३. यूष्णं P.D. पक्वरसस्य Mah. रसस्य क्वथितस्य Sy. वसायाः U. १४. आसिच्यन्ते येषु तानि Mah. आसिच्यते येष्वित्यासेचनानिU.
१५. पचमानानाम् M. चरूणां मांसपूर्णपात्राणाम् Mah. पात्राणां मांसपूर्णानाम् Sy. चरूणां स्थालीनाम् U.
१६. ०रो (धा) र्थां० M. ऊष्माणं धारयन्ति तान्यूष्मण्यानि। ... आच्छादन ऊष्मा बहिर्न यातीत्यर्थः Mah. ऊष्मनिवारणार्हाणि Sy. यानि चोष्मण्यानि U

अपिधानानि[१] यानि[२] च[३]। अङ्गानाम्[४]। लक्षणानि[५] याश्चास्यादयो[६] विशसनसाधनीभूतास्त[७] इमे[८] सर्वे। अश्वम्[९]। अलङ्कुर्वन्ति[१०]।

नि॒क्रम॑णं नि॒षद॑नं वि॒वर्त॑नं॒ यच्च॒ पड्बी॑श॒मर्व॑तः।
यच्च॑ प॒पौ यच्च॑ घा॒सिं ज॒घास॒ सर्वा॒ ता ते॒ अपि॑ दे॒वेष्वस्तु ॥१४॥

निक्रमणम्[११]। निक्रमणादय[१२] क्रियाविशेषा। विशिविक्षेपणकर्मा[१३], अवटिर्गतिकर्मा, पादेन[१४] कृतो[१५] विक्षेप[१६] पड्वीशम्। यत्[१७]। चोदकम्। पपौ[१८]। यत्। च। तृणम्[१९]।

---

१. आच्छादनपात्राणि Mah. अपिधानानि तत्साधनानि Sy. पिधानानि U
२. Omitted by P. ३. वा M
४. चिह्नसाधनानि हृदयाद्यवयवज्ञापकानि वेतसमयानि Mah. हृदयाद्यवयवाङ्कनसाधना वेतसशाखाः Sy. अङ्कोपलक्षकाः। शरीरवचनोऽङ्कशब्दः U
५. स्वधित्यादयः Mah., Sy. वेतसमय्यः U.
६. विशसनकरणभूताः Mah. अवदानसाधना. Sy अश्वविशसनाधिकरणभूताः U. ७. एते पदार्थाः Mah.
८. सर्वम् P. Omitted by M. तानि सर्वाणि U.
९. Omitted by P. एतम्...अश्वावयवम् Sy.
१०. अलङ्कुर्वन्ति स्वव्यापारेण साधयन्तीत्यर्थ. Mah. परितो भूषयन्ति स्वस्वव्यापारेण साधयन्तीत्यर्थः। 'भूष अलङ्कारे' भौवादिकः, अलङ्कुर्वन्ति परिरक्षन्ति वाश्वम् U. This stanza=YV. 25. 36.
११. नितरां क्रमते यत्र तन्निक्रमणस्थानम्। निषदनं नितरां सीदत्यस्मिन्निति निषदनमुपवेशनस्थानम्। विवर्तनं, विविधं वर्तते यत्र तदितस्ततो लुण्ठनस्थानम्। सर्वत्राधिकरणे ल्युट्।...क्रियापरा वा निक्रमणादयः शब्दाः। आलम्भनसमये यान्यश्वस्य निक्रमणादीनि चेष्टितानि Mah. नितरां क्रमते यत्र तन्निक्रमणं स्थानम्। नितरां सीदत्यत्रेति निषदनम्। विवर्तनं विविधवर्तनमितस्ततो लुण्ठनं यत्र तत्। अत्र सर्वत्र देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वाभावाय तत्स्थानमपि स्वीक्रियते। यद्वा क्रियापरा वगन्तव्याः। आलम्भनसमये निग्रहेण या निक्रमणादयश्चेष्टाः सन्ति ता इत्यर्थः Sy. निक्रमणं गमन वसतिस्थानात्। निषदन तत्रैव स्थिति.। विवर्तनं भ्रमणं, यान्येतानि चेष्टितानि U.
१२. विशि. omitted by M.
१३. ०वभिर्ग० M.
१४. वादेन M. १५. कृते P.
१६ पड्वीशं P. पध्वीशं D. षड्वीजं M. यच्चार्वतोऽश्वस्य पड्वीश पदेषु विशति पड्वीशं पादबन्धनम् Mah. ...यद्वा बन्धनं पट्, तद्वान्प्रदेशः Sy. पादेषु विशतीति पड्विशं पादबन्धनमुच्यते-र्वतोऽश्वस्य U.
१७. जलम् Mah. उदकम् Sy., U.
१८. पीतवान् Mah. अपिबत् Sy. पीतवान् U. १९. अदनीयं तृणादिकम् Mah., Sy. यवसम् U.

१ २ ३
भक्षितवान्।

मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥१५॥

४ ५ ६
मा त्वाग्निः। धूमगन्ध। अग्नि। पच्यमानं त्वा। मा। शब्द कारयेत्। मा च।
७ ८ ९ १० ११ १२ १३
उखा। दीप्ता। क्षरन्ती। विविक्ता भिन्ना भवतु याज्यया। इष्ट देवै। प्रार्थितम्। अभिगू-

---

१. भक्षितवान् Mah. अभक्षयत् Sy भक्षितवान् U.

२. हे अश्व ता तानि सर्वाणि ते तव निष्क्रमणादीनि देवेष्वस्तु सन्तु। देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वं मास्त्वित्यर्थः Mah. . . . देवेषु व्याप्नोतु। तान्यपि निरर्थकानि मा भूवन्नित्यर्थः Sy.
सर्वाणि तानि निष्क्रमणादीनि ते तव हे अश्व, अपि देवेष्वपि प्रजापतयेऽस्तु सन्तु। तान्यपि निरर्थकानि मा भूवन्नित्याशयः U.

३. VM. ignores यत्। च। अर्वत'। सर्वा। ता। ते। अपि। देवेषु। अस्तु This stanza=YV 25.38.

४. कीदृशोऽग्निः? . . . धूमस्य गन्धो लेशो यत्र सोऽल्पधूमवानित्यर्थः Mah. धूमेन व्याप्तः Sy. कथम्भूतः? . . . अल्पधूमावरणः। मांस हि पचन्नग्निर्बहूष्मल्पधूमावरणो भवति U

५. हे अश्व पच्यमानाश्ववयव . . . त्वाम् Mah. त्वाम् Sy.

६. ध्वनिं मा कारयतु। ध्वनौ सति भाण्डभङ्गः स्यात्। वह्यमानं मांसं सिमसिमेति शब्दं करोति तन्मास्तु Mah. मा ध्वनयत्। धूमं दृष्ट्वा शब्द मा कुर्वित्यर्थः। अश्वस्य शब्दने प्रायश्चित्तविधानात्। यद्वा हे पच्यमानाश्ववयव त्वा त्वां धूमगन्धिरग्निर्मा ध्वनयीत्। ध्वनौ सति भाण्डभङ्गः स्यात् Sy. ध्वनिः शब्दकर्मा, शब्दं कारयेत् . . . तच्च वह्यमानं सिमसिमाशब्दं करोत्यत एवमुच्यते U.

७ उपा P स्थाली Mah., Sy.

८. दि० P. अतितापेन दीप्यमाना Mah. अत्यन्ताग्निसयोगेन दीप्ता Sy. सन्दीपिताऽत्यन्ताग्निसंयोगेन U

९. रक्षन्ति P. कीदृश्युखा? जघ्रिर्जिघ्रति गन्धं गृह्णातीति, . . . अधिष्ठाय्या देवताया घ्राणम् Mah. जिघ्रन्ती तापेन Sy जघ्रिर्गन्धगृहणशीलोखा। नन्वचेतनोखा कथं गन्धं जिघ्रति? उच्यते। अधिष्ठाय्योऽत्र देवताः सन्तीति पुरस्तात्प्रतिपादितं तच्चात्र पुन. स्मार्यते U.

१० विभक्ता M. मा चलतु 'ओविजी भयचलनयोः' Mah. अभितो मा चीचलत्तापातिशयेन मा नीनशदित्यर्थः Sy. अभिविनक्तु, अभिनष्टा विदीर्येत वा। उद्भावा वृद्धा मांसरसं तदिहोच्यते U.

११. ०ज्ययष्टं P. इष्टं प्रयाजैः Mah. होतुमिष्टम् Sy. योगेन सङ्गतीकृतम् U.

१२. आप्रीभिः पर्यग्निकृतम् Mah. होमायानीतम् Sy. कामितम् U.

१३. ये यजामह इत्यागूर्योक्तम् Mah. आभिमुख्येन प्रदानायोद्यतम्। यद्वा। इष्टं प्रयाजैराप्रीतं वीतं पर्यग्निकृतमभिगूर्तं ये यजामह इत्यागूर्योक्तम् Sy. अभ्युद्यतम् U.

तम्[1]। वषट्कृतमुच्चैर्वषट्कृतम्[2]। तमिमम्[3]। देवाः। प्रतिगृह्णन्ति[4]। अश्वम्।

यदश्वाय वासं उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै।
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥१६॥

यदश्वाय[5]। "अश्वाय निहन्यमानायोपास्यन्ति बर्हिश्च शतबलं च कृत्ति[6] चाधिवास च कशिपु[7] च" इति कल्प। यत्। अश्वाय निहन्यमानाय[8]। कृत्त्याख्य वास[9]। अधीवास[10] च। उपस्तृणन्ति[11]। यानि चालङ्काराथानि। अस्मै[12]। हिरण्यानि[13] निहितानि। तान्येतानि प्रियाणि[14]। सदितम्[15]। अश्वम्[16]। पादेन[17] विक्षिपन्तम्। देवेषु। प्रापयन्ति[18]।

---

१. ०ङ्कृ० P.D.

२. ०ङ्कृ० P.D. वषट्कारेण संस्कृतम् Mah. वषट्कारेण देवसंस्कृतम् Sy. वषट्कृतं चावानकाले। यद्वा। इष्टं प्रयाजैर्वीतमाप्रीभिः पर्यग्निकृतमभिगूर्तं ये यजामह इत्यागूर्योक्त, वषट्कृत वषट्कारेण संस्कृतम् U.

३. तमेवंविधमश्वम् Mah एवम्भूत तम् Sy. तादृशम् U.

४. प्रतिगृह्णन्तु Mah प्रतिगृह्णन्ति Sy., U.
This stanza=YV. 25. 37

५. ०माना ये (य) पा० M.

६. कृतं P. कृन्त D.

७. कशीपु M.

८. सञ्ज्ञप्यमानाय Sy., U

९. वस्त्रम् Mah.

१०. ०धि० D. अपवासं P. आच्छादकम् Mah. उपर्याच्छादनयोग्यम् Sy., U.

११. सर्वत आच्छादयन्ति 'स्तृञ् आच्छादने' Sy.

१२. अश्वाय Mah., Sy., U.

१३. सौवर्णशकलानि Mah. सौवर्णराजतकास्यानि कल्पयन्ति Sy.

१४. वस्तूनि Mah.

१५. कीदृशानि ? . प्रियाणि देवानामिष्टानि Mah. देवानां प्रियतराणि चात्वाले बद्ध्वा स्थापितानि Sy.

१६. सदि० P. शिरोबन्धनम् Mah., Sy. सन्दीयतेऽनेनेति सन्दानं शिरोबन्धनम् U.

१७. षष्ठ्यर्थे द्वितीया। अर्वतोऽश्वस्य Mah. Sy. अर्वत इति विभक्तिव्यत्ययः। अश्वायेति सामानाधिकरण्यात् U.

१८. पादबन्धनम् Mah. पादेषु प्रविष्टं पादबन्धनम् Sy.
पादवासः U.

१९. आगमयन्ति। ऋत्विजोऽश्वस्यैतानि देवत्वेव प्रापयन्तीत्यर्थः Mah. प्रापयन्ति Sy. गमयन्ति U.

२०. VM. ignores आ
This stanza=YV. 25.39.

यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥१७॥

यत्ते सादे। यत्। तव। अधिरोहणे। बलेन। शीघ्रगमनार्थं मुखनासिकाभ्यां शूकृतस्य। पार्ष्ण्या। वा। कशया। वा। अश्वारोहस्तुतोद। तादृशानि। तव। सर्वाणि। यज्ञेषु। स्रुचा। हवीषि। इव। मन्त्रेण। देवेषु प्रेरयामि।

चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शंस्त ॥१८॥

चतुस्त्रिंशत्। बलवत। देवज्ञाते। पशून्। अश्वस्य। स्वधिति। विशसनार्थं सङ्ग-

---

१. यस्मात् Sy. २ गमने ... सदनं साद, घञ् Mah सदने गमने निमित्तभूते सति Sy. सीदन्त्यश्ववारा अस्मिन्निति सादोऽश्वपृष्ठ तस्मिन्त्सादे U.
३. बले D महत्त्वेनान्वित· सन् U.
४. ०र्थं P. ५ मुखसि० P. D
६. शूकृ० P D. शूकृतमस्यास्ति शूकृतस्तस्य। शब्दानुकरणमेतत्। शूकारं कुर्वतः Mah शूत्कारं कुर्वतः Sy, U
७ पादाधोभागेन Mah
८. अश्ववार Mah अवस्थितोऽश्ववार·U
९ पीडितवान्। 'तुद् व्यथने' Mah. व्यथयति Sy., U
१०. तानि Mah., Sy, U.
११. पार्ष्णिकशताडनानि Mah.
१२. यागेषु Sy. १३ यथा स्रुचा जुह्वा सूदयामि तद्वत्। एकं तापदं पादपूरणाय Mah. स्रुचा यथा सूदयन्ति तद्वत् Sy. यथा स्रुचा ... जुह्वति U.
१४. इव is omitted by P. हविराज्यादिकम् Mah., Sy. हविरिति विभक्तिव्यत्ययः U. १५. त्रयीलक्षणेन U.
१६. 'सूद क्षरणे' चुरादिः, क्षारयामि। यज्ञ आहुतित्वेन कल्पयामीत्यर्थः Mah. क्षरामि। आहुतित्वेन कल्पयामीत्यर्थः Sy. सूदयामि क्षारयामि, आहुतित्वेन कल्पयामीत्यर्थः U.
१७. VM ignores ता
This stanza=YV 25.40
१८. कीदृशस्याश्वस्य ? ... वजति गच्छतीति वाजी तस्य, वेगवत इत्यर्थः Mah. अश्वस्य Sy. वेजनवतोऽश्वस्य U.
१९. ०वयज्ञा० M. देवानां बन्धुः प्रियस्तस्य। देवा बन्धवो यस्येति वा। भावी निर्देशः Mah. देवानां प्रियस्य Sy.... देवा बन्धवोऽस्येति वा भावी देवबन्धुः। देवो ह्यसौ भविष्यति। एवम्भूतस्याश्वस्य U.
२०. चतुस्त्रिंशत्सङ्ख्याकान्युभयपार्श्वास्थीनि ... अश्वस्य चतुस्त्रिंशद्वङ्क्रयोऽजादीनां षड्विंशतिः Mah. एतत्सङ्ख्यान्युभयपार्श्वास्थीनि, ... इतरेषामजादीनां षड्विंशतिरेव। 'षड्विंशतिरस्य वङ्क्रयः' (AB. 2.6.) इति प्रवादात् Sy. वङ्क्रय उभयपार्श्वस्थास्थीनि U. पार्श्वास्थीनि is suggested for पशून्
२१. पशुच्छेदनसाधनोऽसिः Mah. छेदनसाधनोऽसिः Sy., U.
२२. ०ति वि० M. छेदनाय Mah., Sy.

च्छते[१] यूयम्[२]। अच्छिद्राणि[३]। गात्राणि[४]। मार्गेण[५]। कुरुत। सर्वाण्येव शरीराण्यप्रमादार्थं समीपस्थानाम्। विकर्त्य[६]। विशस्त[७]।

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः।
या ते गात्राणामृतुथा कृणोमि ता ता पिण्डानां प्र जुहोम्यग्नौ ॥१६॥

एकस्त्वष्टुः[१०]। दीप्तस्य। अश्वस्य। प्रजापतिरेक[११]। विशस्ता[१२] भवति[१३]। "कस्त्वा छ्यति[१४] कस्त्वा विशास्ति[१५]" इति मन्त्र। द्वौ[१६] च देवेषु। यन्तारौ[१७]। भवतस्तूपरौ[१८] गोमृग इति। तथा।

---

१. सम्यगागच्छति Mah. सम्यग्गच्छति Sy. एकमकृत्वा सङ्गच्छति (ते) यतोऽतो ब्रवीमि U.

२. अतो हे ऋत्विजः Mah. हे विशसनस्य कर्तारः Sy. हे शमितारः U.

३. छिद्रहीनानि। ... स्वधितिना छिन्नानि सच्छिद्राणि वर्तन्ते तान्यच्छिद्राणि कुरुत Mah. अच्छिद्राणि यथा भवन्ति तथा ... हृदयजिह्वावक्षःप्रभृतीनि प्रज्ञाय मध्ये छिन्नानि मा कुरुतेत्यर्थः Sy. अच्छिद्राण्यनवखण्डितानि U.

४. शरीरावयवान् Sy.

५ वयुनेन ज्ञानेन Mah. वयुनानि प्रज्ञानानि। वयुनमिति प्रज्ञानाम। 'वयुनमभिख्या' (Ngh.3.9) इति तन्नामसूक्तत्वात् Sy. प्रज्ञानेन U.

६. 'ग्रन्थिर्ना पर्वपरुषी' इत्यमरः। ... प्रतिपर्वं प्रत्यवयवम् Mah. तदर्थम् ... प्रतिपर्वं प्रतिहृदयाद्यवयवम् Sy. पर्वपर्व हृदयाद्यङ्गम् U.

७. प्रक० M. इदमिति नाम्ना संज्ञप्य ... 'घुषिर् शब्दे' Mah. इदमवद्यमिति संज्ञप्यैव Sy. इदमिदमिति संज्ञप्य U.

८. ०स्तः P.D.M. यूयं विशस्त विशसनं क्षेपं कुरुत Mah. विशसनं कुरुत ... 'गात्रं गात्रमस्यानूनं कृणुतात्' (AB. 2.6.) इति प्रेषात् Sy. विशसनं कुरुत। उत्तरार्धस्यैव मन्त्ररूपसम्बन्धः U.

९. VM. ignores चतुस्त्रिंशत्
This stanza=YV. 25. 41.

१०. दीप्तस्य Mah. अस्य दीप्तस्य Sy. आदित्यादुत्पन्नस्याश्वस्य। तदुक्तम्, 'सूरादश्वं वसवो निरतष्ट' (RV. I. 163.2.) इति U.

११. ऋतुः ... ऋतूपलक्षितः कालात्मा प्रजापतिरेवाश्वस्य शस्तेत्यर्थः Mah. स कः? ऋतुः। एतदुपलक्षितः कालात्मा, तस्यैव सर्वेषामपि पर्यवसितृत्वात्। यद्वा। ऋतुर्निशाङ्गुविशसनाय गन्ता शमिता Sy. संवत्सरः। तदुक्तम् 'संवत्सरस्य तेजसेति' U.

१२. एक एव Sy.

१३. विशसनकर्ता Mah. विशसनस्य कर्ता Sy. विशसिता U.

१४. ०श्यति M. १५. TS. 5.2.12.1.

१६. द्यावापृथिव्यभिमानिदेवौ Mah. अहोरात्रे देवौ द्यावापृथिव्यौ वा ऋत्विक्षु भवतः Sy. अहोरात्रौ द्यावापृथिव्यौ वा U.

१७. ०रौ M. नियमनकर्तारौ ... तयोरेव सर्वेषां नियन्तृत्वादिति भावः Mah. नियमयितारौ Sy. नियन्तारौ U.

१८. तूबरः P. D.

कालश्चापि वाऽध्रिगुश्चापापश्च[1] कालश्चेति यन्तार.। यानि[2]। तव[3]। गात्राणाम्[4]। यागकाले मासानि[5]। छिनधि[6]। मांसपिण्डानाम्[7]। तानि[8] तान्यहम्। अग्नौ। प्रजुहोमि[9]।

मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व१ आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहायं छिद्रा गात्राण्यसिना मिथू कः ॥२०॥

मा त्वा तपत्[10]। मा। त्वा[11]। तापयतु[12]। प्रियम्[13]। शरीरम्[14]। देवान् प्रति गच्छन्तम्[15]। मा च। स्वधितिर्विशसने[16] प्रवृत्ता। तव। आस्थान[17] करोतु न तिष्ठतु शीघ्र छिनत्तु[18]। मा च। ते[19]।

---

१. कल० P. D.

२. यान्यङ्गानि Mah. यानि हृदयाद्यवयवानि Sy.

३. एवमश्वस्य विशसितृयन्तृक्त्वाऽध्वर्युः स्वकर्माह हे अश्व ते तव Mah. एवमश्वस्य विशसितृनुक्त्वाऽथेदानीं स्वकीय कर्माऽध्वर्युराह या ते यानि तव हे अश्व U.

४. गात्रसम्बन्धिनाम् Mah गात्राणां मध्ये Sy. अङ्गानाम् U.

५. ऋतावृतूपलक्षिते वसन्तादियज्ञकाले Mah. काले Sy. ऋतावृतौ काले काले U.

६. च्छन्धि M. अहं कृणोमि हन्मि छिनधि 'कृञ् हिंसायाम्' स्वादिः Mah. छिनधि सम्पादयामि Sy. बन्धनानि कृणोमि करोमि U.

७. पिण्डानां मध्ये Sy.
मांसपिण्डानां मध्ये U.

८. तानि तान्यङ्गानि Mah. तानि तानि प्रज्ञानानुरोधेन Sy.

९. प्र is omitted by P. प्रकर्षेण हुतानि करोमि Mah. प्रकर्षेण हुतं करोमि Sy. प्रज्ञानानुरोधेन जुहोम्यग्नौ U.

This stanza=YV. 25.42

१०. त्वाम् Mah., Sy. त्वाशब्देनात्र विज्ञानात्मोच्यते U.

११. तप्तं दुःखितं मा कार्षीत्। तव देहवियोगजनिता व्यथा मा भूदिति विज्ञानात्मानं प्रत्युच्यते Mah. तप्त मा कार्षीत्। वियोगजनिता व्यथा मा भूदित्यर्थः Sy.

१२ प्रियो वल्लभो भोगायतनत्वात् Mah. भोगायतनत्वात्तव प्रियतरः Sy. सुखदुःखयोर्भोक्ता प्रिय आत्मा प्राण उक्तः। स हि श्रुतौ 'प्रियमित्येतदुपासीत' (Brh. U. 4.1.3.) इत्युक्तम् U.

१३ तवात्मा देहः Mah. देहः Sy.

१४ देवलोकम् Mah. देवान्प्रति Sy.

१५. अप्येतीत्यपियस्तम्... गच्छन्तम् Mah. देवलोकगमनप्रवृत्तं सन्तम् U.

१६. शस्त्रम् Mah., Sy., U.

१७. तनूरङ्गानि Mah., Sy.
शरीरस्य U.

१८. मा स्थापयतु सर्वाणि च्छित्वा देवेभ्यो ददत्वित्यर्थः Mah. त्वयि चिरमास्थितानि मा कार्षीत् Sy. अस्थापयदेकादशमवदानभूतम् U.

१९. तव Mah., Sy., U.

मासाध्यवीनां[1] शस्ता[2]। व्याधः[3]। अस्मानतिक्रम्य[4]। असिना[5]। छिन्नानि[6]। गात्राणि[7]। वृथा[8]। करोतु[9]।

न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥२१॥

न वै[11]। अश्व[12]! न त्वम्[13]। एव[14]। तत्[15]। म्रियसे[16]। नच। विनष्टो भवसि किन्तु। देवान्[17]। एव। गच्छसि[18]। मार्गे[19]। सुगमैर्देवलोक प्राप्तस्य[20]। इन्द्राश्वौ[21]। ते[22]। सहायौ[23]। भवत एवम्[24]। मरुता-

---

१. मांसात्म्यविनां P. मासाध्यपीनां M. मांसार्थी। अबीनां is suggested for मांसाध्यवीनां

२. अत एवाविशस्ता न विशेषेण शसति हिनस्त्यविशस्ता विशसनेऽकुशल Mah विशसनेऽकुशलश्शमिता Sy. विशसनेऽकुशलः U. ३. कीदृशश्शमिता? गृध्नुर्गृध्यतीति गृध्नुर्लुब्धः. केवलं मांसग्रहणेच्छुः Mah. केवलमांसग्रहणेप्सुः Sy. मांसग्रहणे गर्धालुर्लुब्धः U.

४. त्यक्त्वा, शास्त्रोक्तक्रमं त्यक्त्वा Mah न्यूनातिरेकभावेन ... अतिक्रम्य Sy. अतिक्रम्य U. ५ शासेन Mah

६. छिद्राण्ययथाच्छिन्नानि Mah छिद्राणि तिर्यक्छिन्नानि Sy. छिद्राणि U.

७. अङ्गानि Mah. तत्तवङ्गम् Sy

८ मिथुरिति मिथ्यार्थेऽव्ययम् Mah मिथ्या व्यर्थम् Sy. मिथ्या U.

९. मा कार्षीत् ... अन्यथा माच्छिवत्। सम्यगवदानानि करोत्वित्यर्थः Mah. मा कार्षीत् Sy. १०. VM ignores तन्वः। This stanza=YV.25 43

११. M. adds उ after वै।

१२. नैव खलु Sy. १३. वै, एवार्थे, उ अवधारणे Mah. वैशब्द एवकारार्थः। उ इत्यवधारणे नैवेदानीम् Sy.

१४. त P. Omitted by M.

१५. हे अश्व त्वमेतन्नैव म्रियसे, इतराश्ववन्मृतो न भवसि देवत्वप्राप्तेर्वक्ष्यमाणत्वात् Mah., Sy.

१६. अत एव न रिष्यसि हिंस्यसे, व्यर्थोहिंसाया अभावात् Mah, Sy.

१७. गच्छसि। अथो युक्ता मदुक्तिः Mah. प्राप्नोषि। अतो युक्तमेवोक्तिः Sy.

१८. मार्गे वैवयानरूपे. Mah. मार्गे वैवयानलक्षणे. Sy.

१९. ननु प्रत्यक्षत्वे मरणमङ्गनाशश्च दृश्यते तर्हि कथमेवमुच्यते तत्राह। सुष्ठु गम्यते यत्र ते सुगास्ते. सुगेभि. सुगैः साधुगमनैः Mah. शोभनगमनसाधनैः Sy.

२०. कथ देवान्प्रति गमन तत्राह।... Mah एतन्नामानाविन्द्रस्याश्वौ Sy. हरी इन्द्रस्य N 1.15.

२१. तव Mah. U त्वां वोढुम् Sy.

२२. युञ्जौ रथे युक्तौ Mah., Sy योजनार्हौ वोढारौ प्रतिधुरौ U

२३. भविष्यत ... भूतकालप्रयोगो भविष्यदर्थे Mah भविष्यतः। आशासारूपत्वाद् भूतार्थनिर्देशः Sy. तदुक्तमश्वरथयाने 'युञ्जन्त्यस्य काम्या हरी' (RV. I 6. 2.) इति U.

२४. पृषती मरुतां वाहनभूते तव युञ्जावभूताम् Mah. पृषत्यौ मरुतां वाहनभूतौ (ते) ... युक्तौ (ते) भविष्यतः Sy. मरुतां सम्बन्धिनावश्वौ प्रतिधुरावभूताम् ... एभिर्विध्यैस्त्वं समानं लोकं सञ्जप्त इत्यभिप्रायः U. पृषत्यो मरुताम् N.1.15.

मघवा। सोऽयम्। अश्विनोरश्वस्य। धुरि। उपतिष्ठतु।

सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम्।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥२२॥

सुगव्यं न.। शोभनगोसमूहम्। अश्वसमूहम्। पुसश्च। पुत्रान्। उत। सर्वस्य पोषकम्। धन च। अस्माकम्। अश्व करोतु। अनागास्त्व च। अदीन। कृणोतु। बल च। अस्मभ्यम्।

---

१. कश्चिदश्वः Mah कश्चित् Sy.

२. रासभस्याश्विवाहनस्य Mah अश्विवाहनस्यैतन्नामकस्याश्वस्य Sy. अश्वसम्बन्धिनः। रासभावश्विनोरित्यादिष्ट प्रयोजनम् U. ३. अश्विवाहनस्थाने Mah. स्थाने वर्तमान. Sy.

४. अवति P. उपस्थास्यति। देवत्व प्राप्तस्य तव वहनायेन्द्रादयो निजवाहनानि प्रेषयिष्यन्तीति भावः। यद्वा तत्तद्देवभाव प्राप्त त्वां तानि तानि वाहनानि वक्ष्यन्तीत्यर्थ Mah उपस्थास्यति वहतीत्यर्थ। यद्वा रासभस्य भानोर्धुरि वर्त्मनि युक्तो वाजी, अश्व उपस्थास्यति देवत्व गच्छतस्तव गमनायेन्द्रादयः स्वस्ववाहनानि प्रेषयन्तीत्यर्थ। यद्वा तत्तद्देवभावमापन्न त्वां तानि तानि वाहनानि वहन्ति Sy एनमुपश्रुत्य स्वयमेवोपास्थादुपस्थितः U

५. VM. ignores उ। This stanza =YV. 25.44

६. Omitted by M. इदानी याच्ञा क्रियते Mah ७. शोभन गोसमूहम्। ... गवां समूहो गव्यम्, शोभन गव्य सुगव्यम् Mah. शोभनेन गोसमूहेन युक्तम् Sy. शोभनगव्यम् U

८. अश्वाना समूहोऽश्व्यम्। ... शोभनमश्व्यं स्वश्व्यम् Mah. शोभनाश्वसमूहयुक्तम् Sy. शोभनाश्व च करोतु U.

९. ०सऽ-च P.

१०. पुत्रशब्दोऽपत्यवाचक इति पुस इति विशेषणम्। यद्वा पुंसः पुरुषार्थसाधकान्पुत्रान्करोतु Mah. पुत्रशब्दः स्त्रीपुमपत्यसाधारणोऽतः पुमपत्यानीत्यर्थः। यद्वा पुसो वध्वादीन् पुत्रान्पुररक्षकानात्मजान्। स्त्र्यपत्यानि पुमपत्यानि चेत्यर्थः Sy. पुसः पुत्रान्करोतु। दुहितरः पुत्राश्च पुत्रशब्देनोच्यन्त इत्यतो विशेषणं पुंस इति U.

११ अपि च Mah., Sy, U.

१२. पुष्णातीति पुषः। ... विश्वस्य सर्वस्य पुषस्तं सर्वजनपोषणसमर्थं धनं करोत्वित्यर्थ. Mah. विश्वपोषणसमर्थं धनम् Sy सर्वस्य पोषकम् U

१३ देवत्व प्राप्तोऽश्वः Mah. अश्व आलभ्यमान Sy.

१४ अनास्त्व P. नास्त्यागोऽपराधः पापरूपो यस्य सोऽनागास्तस्य भावोऽनागस्त्वं, दीर्घश्छान्दसः। निष्पापत्वं करोतु पापसद्भावे उक्तफलाप्राप्तेः Mah. सर्वतो निष्पापत्वं करोतु। उक्तानां फलानां न्यूनातिरेकजनितपापक्षयाभावेऽसम्भवादपापत्वं प्रार्थ्यते Sy. अनपराधम् U.

१५. अदितिः M. कीदृशोऽश्वः। अदितिर्नास्ति दितिः खण्डनं वैन्यं वा यस्य सः Mah. अदीनोऽश्वः Sy. अदितिर्देवमाता च करोतु। निघण्टुको वाऽदितिशब्दः। ... अदीनोऽश्वः U.

१६. क्षतत्राणं, परवा (पश्वा) सम्भनाद्रक्षणं वा करोतु Mah. क्षात्रं तेजः Sy.

१७. अस्माकम् Mah., Sy., U.

प्रयच्छतु[1]। अश्व। पर्यङ्गैर्युक्त[2]।[3]

I. 163.

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥१॥

यदक्रन्दः[4]। यदा[5]। त्वं शब्द कृतवानसि[6]। पुरा[7]। जायमान[8]। उद्यन्[9]। अन्तरिक्षात्[10]। अपि[11]। वा[12]। जलादद्भ्योऽन्तरिक्षाच्चाश्वो जातस्तदानी शीघ्र प्रादुर्भवत[13]। श्येनस्य[14]। पक्षावास्ताम्[15]। हरिणस्य[16]। बाहू तत्[17]। तव[18]। अश्व[19]। महत्[20]। जननम्। उपस्तोतव्यम्।

---

१. करोतु। वनति. करोत्यर्थः Mah. सम्भजतां कुरुताम् Sy करोत्यर्थे वनति. करोतु U

२. पर्यय्यंर्यु० P. हविरस्यास्तीति हविष्मान् ... हविर्भूतावयवः। यद्वा देवत्वाप्त्या हविष्मानीदृशोऽश्वः Mah हविर्भूतावयवोपेतः Sy. हविष्मानश्वः सर्वेऽश्वावयवा हवींषि U.

३ VM. ignores नः This stanza=YV 25 45 Ms. D puts the figure ॥१६२॥ here to indicate the end of one hundred and sixtysecond hymn No such number is given in P. and M.

४. यस्मात् Sy. ५. क्रन्दितवान्। हेषारवमकार्षीः Mah. महाशब्दमकरोर्यजमानमनुग्रहीतुम् Sy. हेषाशब्दमकार्षीः U.

६. प्रथमम् Mah., U. पूर्वम् Sy.

७. उत्पन्नः Sy. ८. उत्पद्यमानः Mah. जायमानः Sy. उद्गच्छन् U.

९. अन्तरिक्षादुदधेर्वा Mah. अन्तरिक्षनामैतत्। उदकसमुन्वनापादानाद्यक्षगन्धर्वादिसम्मोदनाधिकरणाद् वाऽन्तरिक्षात् ... यद्वा समुद्र आदित्यः समुन्वनाद् वृष्टया तस्माद्वा जायमानः Sy. अन्तरिक्षलोकात्पार्थिवाद्वा समुद्रात् U

१०. अथवा Mah., Sy.

११. पशोः सकाशात् Mah. सर्वकामानां पूरकादुदकात् Sy. अन्यस्माज्जलसङ्घात्यशोर्वा U १२ जलायद्भ्यो० P.

१३. ०त P. १४. M. repeats पक्षौ पक्षौ। पतनसाधनौ पक्षौ ... तौ यथा शीघ्रपतनसाधनौ तादृशावित्यर्थः Sy. श्येनस्य पक्षौ शीघ्रतयाऽजैषीः U.

१५ M repeats बाहू बाहू। ०हु P. हरिणस्य बाहू अनेन क्रन्दनेन जिताविति शेषः। श्येनपक्षौ शौर्येण हरिणबाहू वेगेनेत्यर्थ Mah तव बाहू हरिणस्य बाहू इव, तौ यथा वेगवन्तौ तादृशावित्यर्थः Sy. हरिणस्य बाहू शीघ्रतयाऽजैषीरिति शेषः U.

१६. Omitted by P. D.

१७. अरणकुशलाश्च Sy. अरणाश्च U.

१८. माहात्म्यम् Mah. १९. जातम् Mah. जन्म जननम् Sy. उत्पन्नम् U.

२०. स्तोतुं योग्यम् Mah. उपेत्य सर्वैः स्तोतव्यम्। ... यस्मादेवं तस्मात्ते जन्म स्तुत्यमित्यर्थः Sy. उपसङ्गम्य स्तुत्यं स्तवनीयमृषिभिः U.

This stanza=YV. 29. 12.

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥२॥

यमेन[1] । यमेन । त्रिताय दत्तम् । अश्वम्[4] । स त्रिस्थानो[2] वायु[3] । आयुक्तवान्[3] । इन्द्रश्च । एनम्[4] । पूर्वं जातम्[5] । अध्यतिष्ठत्[7] । गन्धर्वश्च[8] । अस्य[9] । रशनाम्[10] । अगृह्णात्[11] । तमिममश्वम्[4] । हे वसव[12] ! सूर्यात्[13] । उत्पादितवन्त[14] । "वायुर्वा त्वा मनुर्वा त्वा गन्धर्वा सप्तविंशति । ते अग्रेऽश्वमयुञ्जन्" इति मन्त्र[15] ।

---

१. नियामकेनाग्निना Sy. यमो द्युस्थान आदित्यस्तेन SKN.

२. त्रिस्थानो वायुः Mah., U.
पृथिव्यादिषु त्रिषु स्थानेषु वर्तमानः स्तीर्णतमो वा वायु Sy
त्रिस्थानो वायुर्ऋषिर्वा सः SKN.

३. आयुरायुक्त० P. युक्तवान् Mah
रथे योजितवान् Sy. युक्तवान् U
युक्तवान् रशनया पर्यायणेन वा . .
पर्याणितवान् वेत्यर्थः SKN.
यत्रायं योक्तव्यस्तत्र Dur

४. अश्वम् Mah., Sy., U , SKN

५ आदौ Mah. प्रतमः प्रकृष्टतमः । प्रथम इति मुख्यनाम Sy.
उत्कृष्टो देवाना मध्ये SKN
सर्वदेवानां मुख्यः । कोऽन्य एवमास्थास्तु शक्नुयादित्यभिप्राय Dur

६. पूर्वजतम् P.

७. अधिष्ठितवान् Mah , Sy
आरूढः SKN.

८. विश्वावसुः Mah , U. सोम Sy

९. अश्वस्य Sy.
आह्रियमाणस्य SKN.

१०. नियमनरज्जुम् Sy.
बन्धनीं रज्जुम् SKN

११. गृहीतवान् । य ईदृशस्तं स्तुमः Mah
अग्रहात् Sy. अगृह्णात् । य इत्थम्भूतोऽश्वस्तं वयं स्तुम इति वाक्यशेषः U.
गृहीतवान् SKN. गृह्णाति Dur.

१२. एवंमहानुभावम् Sy.

१३ अष्टगणदेवा. Mah. वसवो रश्मयः Sy.
हे वसवो यूयम् U.
स्वेन स्वेन व्यापारेण सर्वस्याऽऽच्छादयितारः SKN.

१४. आदित्यमण्डलात् Mah.
आदित्यात् Sy
आदित्यमण्डलात् U

१५ उत्पा० P. निष्कृष्टवन्तः Mah. निश्शेषेण साधु सम्पादितवन्तः । यद्वा वसुशब्देनोक्ता एव यमादय. परामृश्यन्ते । हे वसवः ! स्वस्वव्यापारेण सर्वस्याच्छादयितारो यूयं सूरादादित्यादश्वमेनं निरतष्ट, अतक्षत । निरित्येष समित्येतस्य स्थाने । तक्षतिः करोतिकर्मा । स च क्रियासामान्यवचन. ! अत्रौचित्याद्धारणे वर्तते । सम्यग्धारितवन्त इत्यर्थः Sy.
निष्कृष्य कृतवन्तः U. निरित्येष आ इत्येतस्य स्थाने . . . सोऽत्र सामर्थ्याद् हारणे (आह्वाने) वर्तते, आहूतवन्त इत्यर्थः SKN.
निष्कृष्टवन्तः । . . . एवमेतस्मिन्मन्त्रे सूर्यप्रभवोऽश्व इति स्तूयते Dur.

१६. ०ग्ने अश्वमायु M. ०ग्नेश्च P. D. TS. 1.7.7.2.

१७. This stanza=YV. 29.13.= N.4.17; SKN. II.227.

असि॑ य॒मो अस्यादि॒त्यो अ॑र्व॒न्नसि॑ त्रि॒तो गुह्ये॑न व्र॒तेन॑ ।
असि॒ सोमे॑न स॒मया॒ विपृ॑क्त आ॒हुस्ते॒ त्रीणि॑ दि॒वि बन्ध॑नानि ॥३॥

असि यमः। देवगुह्येन। कर्मणा त्वम्। यमादि.। भवसि तत्र मन्त्र "अग्निः पशुरासी-त्तेनायजन्त स एत लोकमजयत्" इत्येवम्। सोमेन। सह। सम्पृक्त। भवसि। तस्य तव। त्रीणि। उत्पत्तिस्थानानि सन्तीति। आहु सूर्यस्त्वष्टा प्रजापतिरिति।

त्रीणि॑ त आहुर्दि॒वि बन्ध॑नानि॒ त्रीण्य॒प्सु त्रीण्य॒न्तः स॑मु॒द्रे ।
उ॒तेव॑ मे वरुण॒श्छन्त्स्यर्व॒न्यत्रा॑ त आ॒हुः प॑र॒मं ज॒नित्र॑म् ॥४॥

त्रीणि ते। त्रीणि। ते। कथयन्ति। द्युलोके। बन्धनानि—उत्पत्तिस्थानान्येवम्। अन्तरिक्षे च। त्रीणि स्थानानि सन्ति। त्रीणि च। अन्त। समुद्रे। अपि।

---

१. गोप्येन Mah गोपनीयेन दुर्निरूपेण वा Sy गुप्तव्रतेन U. २. सर्वत्र व्याप्ति-रूपेणेत्यर्थः। तेन त्रितस्त्रिषु स्थानेषु तायमानो वायुरसि 'त्रित एनमायुनक्' (RV.I 163.2) इत्युक्तत्वात्तद्रूप-त्वम्। अथवा गुह्येन व्रतेन गोपनीयेन कर्मणा योगादिसाधनरूपेण त्रित-, एतन्नामक ऋषिरसि Sy.

३. यमोऽसि आदित्यश्चासि त्रितस्त्रिस्थान इन्द्रोऽसि Mah. नियमिताऽग्निरसि, तेन वस्तत्वात्तच्छब्दव्यपदेशः। तथा आदित्यो-ऽसि Sy. असि यमो भवसि चादित्यः U.

४. ०नय० P. ५. VS. 23.17.

६. मध्यतः U. ७. एकीभूतोऽसि Mah. वि इत्येष समित्येतस्मिन्नर्थे। सम्पृक्तोऽसि तेन गृहीतत्वात् Sy. एताभिर्देवता-भिस्तव सायुज्यं जातमित्यभिप्रायः U.

८. एवं यमादिभिः सायुज्यं प्राप्तस्य Mah.

९. दिवि नभस्यादित्यरूपेण स्थितस्य Mah. तव दिवि द्युलोक आदित्ये वा वर्तमानस्य Sy. द्युलोक आदित्यात्मनाऽऽस्थितस्य U.

१०. ऋग्यजुःसामरूपाणि मण्डलान्तरपुरुषा-र्चींषि ... 'यदेतन्मण्डलं तपति तन्महद्-ब्रह्म' इत्यादिश्रुतेः Mah. वसव आ-दित्यो द्युस्थान इति त्रीणि Sy. ऋग्यजुः-सामलक्षणानि मण्डलान्तरपुरुषार्चींषि U

११ स्वरूपाणि Mah. उत्पत्तिकारणानि Sy.

१२ बुधा आहु. Mah. आहुः पुराविद. Sy. आहुर्बुधाः U.

१३. VM. ignores दिवि। त्रितः। अर्वन् This stanza=YV 29.14.

१४ Omitted by D. इदानीं स्थानत्रये-ष्वपि त्रीणि बन्धनानीत्याह Sy.

१५ उत्प० P त्रीणि बन्धनानि पूर्वमन्त्रोक्ता-न्याहु Mah बन्धनानि त्रीण्याहुस्तानि पूर्वमुक्तानि Sy. १६. उदकेषु Mah अबुपजीवितत्वाद् भूलोकोऽप्यप्शब्देना-भिधीयते, पृथिव्याम् Sy. १७. कृषिबी-ष्टिबीजमिति Mah., U. अन्नं स्थानं बीजमिति त्रीणि Sy. १८. Omitted by D. १९. मेघो विद्युत् स्तनयित्नु-रिति Mah. त्रीणि वृष्टयुत्पत्तिनिमि-त्तानि मेघो विद्युत्स्तनितमिति Sy. मेघो विद्युदशनिरिति U. २०. समुद्रमध्ये Sy. मध्ये U. २१. अन्तरिक्षमध्ये Mah. समुद्रवणादपादानात्समुद्र-मन्तरिक्षम्। तस्मिन् Sy समुद्रशब्देना-न्तरिक्षमभिधीयते। अन्तरिक्षस्य U.

च। समुद्रमध्यस्थं तव परम जन्म समुद्राधिपतिर्वरुण एव। मम। शसत्वस्मात्स्थानादस्माच्चाश्वोऽजनीति। यत्। तव। वदन्ति। उत्तमम्। जन्मेति।

इमा तें वाजिन्नवमार्जनानीमा शफानां सनितुर्निधानां।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥५॥

इमा ते। पिण्याकादिभिरश्वमवमृजन्ति तानि। इमानि तथा। इमानि। शाला सम्भक्तु। तव। शफानाम्। निधानस्थानानि। अत्र। तव। शोभना। पश्यामि। दर्भमयीमौञ्जीश्च। यज्ञस्य। गोप्तार। या रशना।

---

१ उतापि च Mah.
इवशब्दश्चार्थेऽपि च Sv. अपि च U
२. वरुणरूपस्त्वम् Mah. पापस्य वारक. फलस्यावर्जयिता वा त्वम् Sv.
३. माम् Mah महाम् Sv. मम U
४. प्रशंससि। कर्मणि षष्ठी। छन्दतिरर्चतिकर्मा। अर्चन प्रशसनम् Mah. कथयसि ... तादृशं प्रशस्यं जन्म यज्ञसाधनभावेन कथयसीत्यर्थः Sv. शसति कथयति U
५. शसत्वस्मात् D. शसत्वममस्मात् P
६. अश्वाच्चा० P
७ यत्र Mah. येषु त्रिषूक्तेषु स्थानेषु Sy. यत्र U.
८. बुधा आहुः Mah. कथयन्ति। यद्वा यत्र यस्मिन्नादित्ये परमं जनित्रमाहु Sy
९. ०म D. M निरतिशयम् Sy
१०. जनित्रम् ... आदित्यरूपेण Mah जनेरौणादिक इत्रप्रत्ययः Sy. जन्म वायुरूपेण U. ११. VM ignores अर्वन् This stanza=YV.29 15
१२. पिण्डधाका० D. पिण्डयका० P.
१३. अवमार्ज्यते यैस्तान्यवमार्जनानि वेतसकटादीनि Mah. अङ्गसंशोधकानि स्थानानि Sy. यैस्तवावमार्जनं कृतं तान्येव मार्जनानि नूतनवेतसकटप्रभृतीनि U.
१४. उक्तानि शुलोकादीनि Sy.
१५. ०ला D.
१६ नियन्तुः पादवासस्य Mah. यागसम्भक्तुस्तव Sy पादवाससः U.
१७. हे वाजिन्नश्व ! ते सम्बन्धीनि Sy.
१८ खुराणाम् Mah , U.
१९ निधानानि स्थानानि Mah. सञ्चारप्रदेशा इत्यर्थ Sv निधानानि, यत्र पादवासःप्रभृतीनि धीयन्ते तानि U.
२०. पुत्र M यज्ञे Mah. एषूक्तस्थानेषु Sy.
२१. भव M
२२ भद्रा: कल्याणरूपाः स्तुत्याः Mah. भन्दनीया: कल्याणाः Sv. स्तुत्याः U.
२३. दृष्टवानस्मि Sy अहमपश्यम् U.
२४ ०यी M.
२५. मञ्जीश्च P ०ञ्जीं च M.
२६. ऋतस्य ऋतं यज्ञम् ... कर्मणि षष्ठी Mah. सत्यभूतस्य यज्ञसाधनस्य वाश्वस्य। कर्मणि षष्ठी। ऋतम् Sy
२७. गोपायन्ति गोपा रक्षणकर्त्र्यः Mah. गोपयित्र्यो रशनाः Sy. गोपायितव्यान्शून् U. गोप्त्र्यः is suggested for गोप्तारः as it qualifies रशनाः and should be in the fem. gend.
२८. मध्यबन्धनरज्जूः Mah. ग्रीवादिषु संयुक्ता रज्जूः Sy.

अभिरक्षन्तीति ।

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥६॥

आत्मानम् । तव । शरीरम् । मनसा चक्षुसहितेन । समीपेन । पश्यामि । अधस्तात्पृथिव्या पश्यामि । दिवा । गच्छन्तम् । आदित्यमादित्यवदश्व स्तूयते ततस्तमेवाध पश्यामीत्यश्वरूपमिति । शिरश्च तव । पश्यामि । मार्गे । सुगमै । पासुवर्जितै । गच्छन् । पतन-

---

१. अभितः पालयन्ति ता· । ..यद्वा, इमा ते तवावमार्जनान्यङ्गप्रक्षालनसाधनान्युव - कानि । इमानि सनिमुस्तव शफानां निधानानि देवयजनभूमयः सञ्चारप्रवेशा वा। अत्रास्मिन्देवयजनस्थाने या रशना गोपास्तव पालयितारो राजपुरुषा ऋत्विजो वा ऋतस्य सम्बन्धिन्योऽभिरक्षन्ति ता अपश्यम् Sy.

२. VM ignores वाजिन्
This stanza = YV 29 16.

३. एवमश्व स्तुत्वा भविष्यत्कर्मणा स्तौति हे अश्व, ते तव Mah एतैरधस्तनैरश्वचरित्रैरश्वमभिष्टुत्याथेदानी भविष्यत्कर्मभिरभिष्टौति. . . ते तव दिव्यम् U

४. पशुसंस्पर्शनोत्तरकालमात्मानम् U

५. अस्मदीयेन प्रकृष्टगमनवता चेतसा Sy.

६. ० पे M. दूरे Mah. अतिदूरे स्थितम् Sy. दूरात् U. ७ जानामि Mah. अतिव्याप्तं भावयामीत्यर्थः Sy

८ अधस्तात्प्रदेशात् Mah., U अवस्तात्सामर्थ्याद् भूमेः । भूमिमारभ्य Sy.

९. नभोमार्गेण Mah. अन्तरिक्षेण मार्गेण Sy. दिवं प्रति U.

१०. उत्पतन्तम् Mah., U. गच्छन्त व्याप्नुवन्तम् । यद्वा यतो दिवाऽन्तरिक्षेण मार्गेण दिवि वा पतयन्तं गच्छन्तं पतङ्गमादित्यमवः, आवो व्याप्नोषि । अतो व्याप्तं जानामि Sy.

११. Omitted by P सूर्यं प्रति Mah. आदित्यरूपिणम् U

१२ शिर सूर्यरूपम् Mah.

१३ भावयामि । एव लोकत्रयव्याप्त भावयामीत्यर्थः । यद्वा त आत्मानमेव भावयामि । मनसा दिवा द्योतनात्मकेनान्तरिक्षमार्गेण दिव· सकाशाद्वा, अवोऽवस्तादवाङ्मुख पतयन्तं यागदेशं प्रति व्याप्नुवदत एव पतङ्ग पतनशीलमधःपतदादित्यसदृशं वा। एव तव शिरो भावयामीत्यर्थः । शिरश्चैवमपश्यम् । उक्तरूपैर्देवयजनमार्गैर्जेहमान यज्ञदेश व्याप्नुवत्पतत्रि शीघ्रगामि शिर· पश्यामि । यद्यप्यात्मशब्देन सशिरस्कं शरीरमुक्तं तथापि देहात्पूर्वं शिरसो दृश्यमानत्वात्पृथगभिधीयते Sy.

१४ नभोमार्गै. Mah. मार्गैः । आदित्यमण्डलादप्युपरिभूतैः सत्यलोकमार्गैरित्यर्थः । तत्र प्रतिबन्धाभावान्मार्गाणामुक्तरूपत्वम् । तथाविधैस्तैः Sy. मार्गैः U.

१५ मागमै. सुगमैः M. सुगैः सुखेन गम्यते येषु ते सुगास्तैः Mah. शोभनगमनसाधनैः Sy सुगमनैः U.

१६. वांसु० M अरेणुभिर्नास्ति रेणुर्येषु तेऽरेणवस्तैः । उपद्रवरहितैरित्यर्थः Mah. अपापैः Sy. १७. गच्छत् Mah. उपर्युपरि व्याप्नुवत् Sy. गच्छत् U. As पतत्रि is in the neut., the reading should be गच्छत् ।

१
शीलमिति।

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः।
यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥७॥

२ ३ ४ ५
अत्रा ते। अत्र—अश्वत्थे व्रज ऊर्ध्वमेकादशात्मामाद् बद्धस्य। तव। उत्तमम्। रूपम्।
६ ७ ८ ९ १० ११ १२
अहमपश्यम्। जयशीलम्। अन्नस्य। पदे। गन्तु। आकार सप्तम्यर्थस्य स्फुटीकरणार्थ।
१३ १४ १५ १६ १७
यदा। तव। मनुष्य। भोगसाधन घासम्। अग्रनोऽनुप्रापयति। अनन्तरम्। एव। ग्रसितृतमो-

---

१. पतनशीलं गन्तृ Mah. पतनवत् Sy उत्पतनशीलम् U
This stanza=YV 29. 17

२. अस्मिन् Mah. अस्मिन्यागदेशे Sy द्युलोके U. अत्र स्थितोऽत्र वा काले SKN एतस्मिन्काले Dur

३. प्रजा D.

४. ०मेकादशात्मा सन् D. ०शास्मान् स P.

५. उक्तरूपेणोत्कृष्टतमम् Sy. अत्यन्तोत्कृष्टम् SKN उत्कृष्टम् Dur.

६ पश्यामि Mah., Sy. एव द्युलोकावस्थितस्य तवाहं रूपमपश्यम् U दृष्टवानहम् SKN

७ जेतुमिच्छत् Mah., U गन्तुमिच्छन्तम् Sy. जेतमिच्छन्तं सर्वम् SKN जेतुमिच्छमानम् Dur

८. अन्नानि हवींषि Mah. कर्मणि षष्ठी, इषमिष्यमाणमन्नमन्नानि वा Sy अन्नानि U. अन्नस्य हविरात्मस्य सम्बन्धिनि SKN.

९. मण्डले Mah स्थाने देवस्थाने देवयजनप्रदेश आजिधावनस्थाने वा Sy स्थाने वेद्याख्ये SKN. शरपथे वेद्या वा...यज्ञेनापि ह्यन्नमेवामुष्मिँल्लोके जीयते तस्माद्वेद्यामित्येवोपपद्यते Dur.

१०. सूर्यस्य ... 'गौर्नादित्ये बलीवर्दे' (Keśava as quoted by Bhānuji Dīkṣita in his commentary on Amara 3.3.25.) इत्यभिधानाद् गौरादित्यः Mah. भूम्याः Sy. गन्तुर्मण्डलस्य U. पृथिव्या अवयव इति शेषः SKN. भूम्याः Dur.

११. समन्तात् Mah. सर्वतः Sy. आस्थितम् U.

१२. सम्य० P.

१३. पृथिवीस्थितस्य ... ते तव U.

१४. भोक्तव्यमन्नम् Sy. वाहनादिकम् U. वाहत (वाहन) लक्षणम् SKN.

१५. ०प्रवर्यन्ति P. यन्ति M. अनुव्याप्नोति, हवीरूपं भोग्यं समर्पयति Mah. नशतिर्गतिकर्मा अनुक्रमेण समीप गमयति Sy. अनुव्याप्नोत् U. अनु इत्येतदानडित्येतेन सम्बध्यते ... अनुसव्याप्नोति त वाहयतीत्यर्थः SKN प्राप्नोति Dur.

१६ तदानीमेव तवनुग्रहाद्विलम्बमकृत्वा Sy. आदित्, इति पादपूरणार्थौ U. यदेति श्रुतेस्तदेत्यध्याहार्यम्। आद् अथ तदा, इत् पदपूरणः श्रान्तः सन् SKN.

१७. ग्रसत इति ग्रसिताऽतिशयेन ग्रसिता ग्रसिष्ठोऽत्यन्तं भक्षयिता Mah. महातृष्णयेव ग्रसितृतमो भक्षयितृतमः सन् Sy. ग्रसितृतमोऽतिशयेन भक्षयिता सन् U. अतिशयेन ग्रसिता भक्षयिता SKN.

अश्वः। ता ओषधीः। भक्षयसीति।

अनु त्वा रथो अनु मर्यो अर्वन्नु गावोऽनु भगः कनीनाम्।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥८॥

अनु त्वा रथः। रथोऽन्नमाहरति सर्वेषाम्, अथापि स। त्वाम्। अनुभवति न त्वत्सममाहरतीत्यर्थः। एवं मर्योऽप्युदारः। त्वामनुभवति। तथा गावश्च पयःप्रभृतेर्दात्र्यः। त्वामनुभवन्ति। कन्यकानाम्। भग सौभाग्यं च। त्वामनुभवन्ति सुभगा हि कन्यका पितृणा विक्रये बहु धनमावहति, अथवा सौभाग्यं पतिभ्यो धनमात्मन आहरति। अश्वरक्षिणो व्राता। तव। सख्यम्। गता। तव। देवाः। वीर्यम्। अश्व!

---

१. हवीरूपाः Mah. अन्नानि Sy.

२. 'गृ निगरणे' गिरसि भक्षयसि Mah. महानुभावोऽपि त्वं लौकिकाश्ववत्तुच्छेन पुरुषेण दीयमान स्वल्पं भक्ष्यमनुग्रहास्त्वीकरोषीत्यर्थः Sy. गृह्णासि गिरसि वा। अन्यो हि वाहितश्चलितुमपि न शक्नोति त्वं वीर्यवत्तरोऽसीति भावः U. अवगिरसि, अभ्यवहरसि गृह्णासि भक्षयसीत्यर्थः SKN. अन्ये हि प्राणिन परिश्रान्ताश्चरितुमपि न शक्नुवन्ति, त्वं तु सुतरामोषधीर्भक्षयसीत्येतदधिकं तवेति Dur.

३. यदा ते मर्तो भोगमन्वापदथ प्रसितृतम ओषधीरगारीः। जिगर्तिगिरतिकर्मा वा। गृणातिकर्मा वा गृह्णातिकर्मा वा N.6.8. This stanza=YV. 29. 18.= SKN. II. 418.

४. अनु, वर्तत इति शेषः Mah. अनुसृत्य रथो गच्छति ततः पुरतोऽश्वस्य गमनात् Sy. अनु, इति परभावमाचष्टे ... यस्य सुकृतिनो गृहे त्वं चेष्टसे तस्य गृहे ... रथस्त्वामनु U.

५. मनुष्यः Mah. मर्त्यः। जात्येकवचनम् Sy. मनुष्यः U.

६. मर्त्यो ह्यु० M.

७. ०स्त्वम् P.

८ गावोऽपि Sy.

९. ०स्त्वम् P.

१०. त्वामनुगच्छन्ति Sy.

११. कन्यानाम् Mah. कन्यकाना स्त्रीणाम् Sy., U

१२ भग० P D. M भाग्यं सौन्दर्यम् Sy.

१३. यत्र त्व तत्र रथादय. स्युरित्यर्थः Mah. त्वद्गमनु Sy. तत्रैते पदार्था भवन्तीत्यर्थ. U. ० भवति is suggested for ० भवन्ति

१४. अवि० M.

१५ मनुष्यसङ्घा. Mah. व्राताः सङ्घात्मका अन्येऽश्वसमूहा वस्वादिदेवगणा वा Sy. पुरुषसङ्घा अपि U.

१६. मैत्रीम् Mah. त्वामनु, अनुसृत्य तव ... सखिभावम् Sy., U.

१७. प्रापुः Mah. गच्छन्ति Sy. अन्वीयुः U.

१८. किं बहुना, देवाः Mah. ऋत्विजो द्योतमाना देवा वा त्वामनुसृत्य Sy. किमन्यद्बहु ववामः ... देवाः U.

१९. तव वीर्यं सामर्थ्यम् Mah. वीरकर्म Sy., U.

२०. गमनशीलाश्च! Sy.

[1]अजानन्निति।

हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत्।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥९॥

हिरण्यशृङ्गः। हिरण्मयैर्मणिभिरलङ्कृत. शिरोभागो हिरण्यशृङ्ग उच्यते हिरण्यशृङ्गोऽस्य[1] भवति। तथा, अस्य[2]। पादा[3]। अयोवद्[4] दृढा भवन्ति। मनोवेग[5]। सूर्यश्च। अस्य गमनेऽवर[6]। भवति न सममनेन गच्छतीत्यर्थ[7]। देवा[8]। अस्य। अदनीयम्[9]। हवि। अभिगच्छन्ति[10]। य[11]। भ्रातृव्यम्[12]। प्रथमम्[13]। अधितिष्ठति[14]।

---

१. जा० M. अनुमितवन्तः Mah. ममिरे स्तुत्या मान्ति। अत. सर्वोऽपि त्वामनुसरः (सरति)। त्वं तु सर्वस्य श्रेष्ठ इत्यर्थः Sy. अचिन्त्यशक्तिस्त्वमसीत्यभिप्रायः U.
VM. ignores अनु। अनु
This stanza=YV. 29.19.

२. कीदृश इन्द्रः? ... हिरण्यवच्छृङ्ग दीप्तिर्यस्य। शृङ्गमिति ज्वलन्नामसु पठितम् Mah अयमश्वो हिरण्यशृङ्गो हितरमणीयशृङ्गो वोन्नतशिरस्को हृदयरमणशृङ्गस्थानीयशिरोरुहो वा Sy. हिरण्य शृङ्गस्थानीयमस्येति हिरण्यशृङ्ग U.

३. अश्वस्य Mah., Sy यस्य चास्य U.

४. पाद इत्यवयवानाम् U.

५. oव P अयो लोह हिरण्यं वा। अयोरूपा. पादा इत्यर्थः Mah. अयोमया अयःपिण्डसदृशः इत्यर्थः Sy. अय इति सर्वेषां रजतादीनामुपलक्षणम्। .. रजतादिविशिष्टा अवयवाः U.

६. कीदृशाः पादाः? ... मनोवज्जवो वेगो येषां त Mah. मनोवेगाः। अथवा, एतदिन्द्रविशेषणम्। ईदृशस्याश्वस्य सामर्थ्यं प्रति मनोवेग इन्द्रोऽपि Sy. मनोवेगयुक्ताः U.

७ अपरः M. सोऽपीन्द्रोऽवर इन्द्रापेक्षया न्यूनः Mah. निकृष्टः Sy. यस्माच्चावरः कनिष्ठ इन्द्रः U.

८. अभवत्। वायुरूपेणाश्वस्यावस्थानात् U.

९. इदेवार्थेऽप्यर्थे च Mah. देवा इत् सर्वेऽपि देवाः Sy. देवा अपि U.

१० देवस्यायनीयम् M. वनी० P. अत्तुं योग्यमन्नं हविश्च तदन्नं हविरन्नं हविर्लक्षणं भक्ष्यं प्रति Mah. हविषोऽवनं भक्षणं, स्वार्थिको यत्। अवनयोग्यं हविर्बाऽपेक्ष्य Sy. हविर्लक्षणमवनीयम् U.

११ आगच्छन् Mah., U. प्राप्ताः Sy.

१२. इन्द्रः Sy.

१३ अश्वम् Mah.

१४. प्रथमो मुख्यः Mah. प्रथमभावी सन् Sy.

१५. अधिष्ठितवान् Mah. स्वहविष्ट्वेन स्वकीयत्वेन वा आश्रितवानित्यर्थः Sy. स चेन्द्रो यस्य हविरन्नभागतं तं वयं स्तुम इति शेषः U.
VM. ignores इत्
This stanza=YV. 29.20.

ईर्मान्तासः[1] सिलिकमध्यमासः[4] सं शूरणासो दिव्यासो अत्याः ।
हंसाइव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥१०॥

ईर्मान्तासः[1]। यास्क.[2]—"समीरितान्ता.[3] पृथ्वन्ता वा। संसृतमध्यमा शीर्षमध्यमा वा। शिर[5] आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये[6] चोत्तिष्ठति, इदमपीतरच्छिर एतस्मादेव,

---

१. सूर्याश्वरूपेणायमश्वः स्तूयते Mah. अत्राश्वसमूहस्तुतिद्वारेणायं स्तूयते Sy. आदित्यस्य रथे येऽश्वा युक्तास्तद्द्वारेणायमश्वः स्तूयते U. आदित्याश्वानामियं स्तुतिः, ते च सप्त SKN

२. ०स्क M.

३. N. adds [सुसमीरितान्ताः] after समीरितान्ताः।
कीदृशा अश्वाः?...ईर्यत ईर्मः 'ईर प्रेरणे'.. ईर्मः प्रेरितोऽन्तः शरीरप्रान्तो येषां ते पृथुजघनोरस्का इत्यर्थ. Mah
ईरिताः प्रेरिता अन्ता येषां ते तथोक्ता विरलान्ता इत्यर्थ· Sy
ईरितोऽन्तो येषां त ईर्मान्ता ईर्मान्ता एवेर्मान्तास·। तेषां हि सप्तानामश्वाना समीरितान्ता विक्षिप्ता. प्रान्ता· विरला इत्यर्थः। वृष्टान्ता वा। ते हि पृथूरस्का. पृथुजघनाश्चेत्यर्थः U ईरिता प्रेरिताः SKN तेषां सप्तानां येऽश्वाश्चत्वारस्ते समीरितान्ता विक्षिप्तान्ता· प्रसृतान्ता· प्रविरला इत्यर्थ·। तेषामेवाश्वाना पृथवोऽन्ताः पृथूरस्काः पृथुजघना वेत्यर्थः Dur.

४. N. adds सिलिकमध्यमाः after वा

५ सिलिकः श्लिष्टः सँल्लग्नो मध्यमो मध्यप्रदेशो येषां ते सिलिकमध्यमाः कृशोदरा इत्यर्थः। 'श्लिष आलेषणे' Mah. संसृताः सङ्गता मध्यप्रदेशा येषां ते तथोक्ता मध्ये निबिडा इत्यर्थः। अथवा शरीरस्यैते विशेषणे। ईर्म ईरितः पुरतो नुन्न इत्यर्थः। तादृशः पृथुरस्तो जघनप्रदेशो येषां ते तादृशाः। पुष्टत्वात्प्रौढपृष्ठाः सँल्लग्नमध्याश्चेत्यर्थः। जघनपुरोभागावपेक्ष्य सिलिकमध्यमा इत्युक्तम् Sy. सँल्लग्नमध्यमाः कृशोदरा इत्यर्थ.। सप्तानामपि संश्लिष्टा उदरप्रदेशाः। निरुदरास्तेऽश्वा इत्यर्थः U. ये तु मध्यमास्ते संसृताः सङ्गताः पर.समुच्चिता इत्यर्थः। तेन त ईर्मान्ता· सिलिकमध्यमाश्चोच्यन्ते। अथवा प्रत्येकं शरीरद्वारेणैते विशेषणे। अश्वस्यान्तरेकत उरोऽन्यतो जघनं स येषामीर्मा प्रेरितः पृथुरित्यर्थः, त ईर्मान्ताः। मध्यमप्रदेश उदर स येषा संसृतः सङ्गतस्तनुरित्यर्थ·। ते सिलिकमध्यमाः। शीर्षं प्रधानो मध्यमो येषां ते सिलिकमध्यमाः। अथवा शिर इत्यादित्य उच्यते सोऽधिष्ठातृत्वान्मध्यवर्ती येषां ते सिलिकमध्यमाः SKN. संसृतमध्यमाः संश्लिष्टमध्यमा इत्यर्थः। तेषां हि सप्तानां ये मध्यमास्त्रय इतरेतरमुत्पीड्य संश्लेषेणावस्थिताः। अथवा पृथुजघनोरस्कानां सतां मध्यमाश्शरीरप्रदेशाः सप्तानामपि संश्लिष्टाः सँल्लग्नास्तनवः। निरुदरास्तेऽश्वा इत्यर्थः। यो हि तेषां सप्तानां मध्यमः स शिरोभूतः प्रधान इत्यर्थः Dur.

६. शीर्षमा P.D.M.

७. N. adds अपि वा before शिरः

८. चैनां ति० M. चैवां ति० N.

समाश्रितान्येतदिन्द्रियाणि भवन्ति। संशूरणासः शूरश्शवतेर्गतिकर्मणः। दिव्या दिविजाः। अत्या अतना। हंसा हन्तेर्ऋन्त्यध्वानम्। श्रेणिश्श्रयते. समाश्रितो भवति। यदाक्षिषुर्यदापन्। दिव्यम्। अजममजनीयमाजिम्। अश्वा., अस्त्यादित्यस्तुतिरश्वस्य, आदित्यादश्वो निरतष्ट इति

---

१. भवति P.D.M.

२. समित्ययमुपसर्गो यतन्त इत्याख्यातेन सम्बन्धयितव्यः Sy. समित्युपसर्गो यतन्त इत्याख्यातेन सम्बन्धयितव्यः SKN

३. N. adds (दिव्यासो अत्याः) after सशूरणासः। शू शीघ्रं रणो रवो युद्ध वा येषा ते शूरणा। यद्वा शूरणो रविस्तदीयाश्शूरणाः Mah विक्रमशीलाः Sy सहिताः शूरणेन भगवताऽऽदित्येन U शूर आदित्य स नेता येषा ते शूरनेतृकाश्शूरणासः SKN स हि परानभिमुखो गच्छत्येव न पर्य्यावर्तते Dur

४. ०रं P. D.

५. निवि० M. दिवि भवा दिव्या. Mah, Sy. दिविजाः U दिवि जाता. SKN

६. अत्यातनाः P. D अतन्ति सतत गच्छन्ति, अत्याः सकृद्युक्ता ब्रह्माहःपर्यन्त रविरथं वहन्ति Mah अतनशीला.। यद्यप्ययमश्वनाम। तथाप्यश्वशब्दस्य वक्ष्यमाणत्वादयं यौगिकोऽवगन्तव्य.। ईदृशा अश्वाः Sy. सततगमनाः। ते हि सकृद्युक्ता ब्राह्म सहस्रयुगपर्यन्तमहर्वहन्ति। य इत्थंभूता अश्वा U परस्तादश्वश्रुतेः पौनरुक्त्यप्रसङ्गादत्यशब्दः सत्यप्यश्वनामत्वे क्रियायोगाद्विशेषणत्वेन द्रष्टव्यः। ... सततगामिन इत्यर्थः SKN. ते ह्यतन्त्येव मुहूर्तमपि नावतिष्ठन्ते Dur.

७. N. adds हसा इव श्रेणिशो यतन्ते before हंसाः।
हंसा इवा गमनाय यतन्ते तथाऽश्वा अपि Mah तत्र दृष्टान्त.।...ते यथा श्रेणीभूता ईर्मान्तास इत्याद्युक्तरूपाः सन्तोऽन्तरिक्षे गमनाय यतन्ते तद्वत् Sy. यथा हंसाः...प्रथमगमनाद्यान्कुर्वन्ति, एवमश्वा अपीत्युपमार्थः U. हंसा इव गच्छन्ति Dur. ८. ०र्घन्त्य० P. ०र्धन्त्य० D.

९. ०णि P. D. M. श्रेणिश इति is added by N before श्रेणिः। श्रेणीभूता:Mah. एकव्यापाराणां बहूनां समूहः श्रेणिरित्युच्यते। शीघ्रधावनाय श्रेणिशः पङ्क्तीभूय Sy. श्रेणीभूता एकया रीत्या U. समूहीभूताः SKN. पङ्क्तीकृताः Dur.

१०. ता N. ११. भवन्ति N.

१२. ०प D. M. ०यदावं P. यदा... संयतन्ते सम्यक् प्रयत्न कुर्वन्ति तदा ... व्याप्नुवन्ति Mah सम्यग्यत्नं कुर्वन्ति ... यदा . . व्याप्नुवन्ति Sy. यतन्ते ... कदेत्याह यदा यस्मिन्काले ... व्याप्नुवन्ति U. सम्यग्गच्छन्ति। कदा ? उच्यते...यदा... व्याप्नुवन्ति SKN. यस्मिन्काले, आप्नुवन्ति ... यदा त आप्नुवन्त्युद्यमारभ्य यावदस्तमिति तदैव यतन्ते Dur.

१३ ०मज्जनी० D. ०यमजमजनी० M. दिव्यजन्ममजनीयमानं जिमश्वाः P. ० जनिमाजिम् N. गमनं सङ्ग्रामं वा Mah. गमनं गन्तव्यं वा मार्गम् Sy. अजनमाजिम् U. अजतं (नं) गमनमार्गम् SKN. अजनिम्। अज्यतेऽस्यां गम्यत इत्यजनिर्वाहिका। स्वर्गपथ इत्यर्थः Dur. १४. सप्त रविरथस्याः Mah. अश्वा आदित्यस्य स्वभूताः SKN.

१५. स्यादित्यस्तुतिरश्वः स्य M. ०दित्यस्य स्तु० P.D. १६. आदित्यदित्यश्वो P.

'सूरादश्वं' वसवो निरतष्ट' इत्यपि निगमो भवति''। इति।

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वातइव ध्रजीमान्।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥११॥

तव शरीरम्। तव। शरीरम्। पतनशीलम्। अर्वन्। तव। चित्त च। वात इव। वेगवान्। तव। शृङ्गाणि। विष्ठितानि। बहुधा। अरण्येषु। शत्रूणा वीर्याणि हरमाणानि। चरन्ति।

---

१. निस्तष्टे D. RV. I. 163.2ª; VS. 29.13.
२. P. adds न before भवति
३ ईर्मान्ताः (सुसमीरितान्ताः) पृथ्वन्ताः वा। सिलिकमध्यमाः ससृतमध्यमा शीर्षमध्यमा वा। अपि वा शिर आदित्यो भवति। यदनुशेते सर्वाणि भूतानि। मध्ये चैषां तिष्ठति। इदमपीतरच्छिर एतस्मादेव। समाश्रितान्येतविन्द्रियाणि भवन्ति। संशूरणासो विख्यासोऽस्याः। शूरः शवतेर्गतिकर्मणः। विख्या विविजा.। अत्या अतनाः। हसा इव श्रेणिशो यतन्ते। हसा हन्तेर्घ्नन्त्यध्वानम्। (श्रेणिश इति) श्रेणि. श्रयतेः। समाश्रिता भवन्ति। यदाक्षिषुर्यदापन्। विव्यमज्ममजनिमाजिमश्वाः। अस्त्यादित्यस्तुतिरश्वस्य। आदित्या-दश्वो निरतष्ट इति। 'सूरादश्वं' वसवो निरतष्ट' (RV. I 163. 2ª.) इत्यपि निगमो भवति N. 4.13; SKN. II 226. VM. ignores इव। यतन्ते This stanza=YV. 29.21
४. शिरं D.
५. शिरं D.
६. उत्पतनशीलम् Mah. पतनशीलं व्याप्तमित्यर्थः Sy.
७. मनः Sy.
८. P. D. M. add त्वं after च।
९. शीघ्रगमनवायुरिव Sy.
१०. वेगवत्। वात इव वेगवत्सूक्ष्मार्थान्गच्छतीत्यर्थः Mah. तद्वच्छीघ्रगमनानुकूलमित्यर्थः Sy. गतिमद् वेगवत् सूक्ष्मानर्थान्प्रति गच्छेदित्यर्थः U.
११ दीप्तयः Mah शिरसो निर्गताश्शृङ्गस्थानीया केशाः Sy.
शृङ्गाणीति ज्वलन्नामसु पठितम्। तवार्चींषि U.
१२ विद्युच्चन्द्रार्काग्निषु स्थितानि Mah. विविधं स्थिताः Sy. विविधं स्थितानि ... विद्युच्चन्द्रार्काग्न्यादिषु U.
१३. विविधम् Mah. बहुषु प्रवेशेषु Sy. बहुधा U.
१४. वनेषु Mah., U.
१५. जर्भुराणानि 'जृम्भ विकसने' विकसितानि Mah. मनोहराणि पूर्यमाणानि वैवम्भूताः केशाः ... यद्वा अत्राश्वस्य शृङ्गाभावात्तद्वद्बहुतानि तेजांसि परिगृह्यन्ते Sy.
देदीप्यमानानि U.
१६. दावाग्निरूपेण चरन्ति प्रसरन्ति Mah., U.
This stanza=YV. 29.22.

उप॒ प्रागा॒च्छस॑नं वा॒ज्यर्वा॑ दे॒वद्री॑चा॒ मन॑सा॒ दीध्या॑नः ।
अ॒जः पु॒रो नी॑यते॒ नाभि॑र॒स्यानु॑ प॒श्चात्क॒वयो॑ यन्ति रे॒भाः ॥१२॥

उप प्रागात्। उपप्रागच्छति। विशसनस्थानम्। बलवान्। अश्व। देवानञ्चता। मनसा। दीप्यमान.। तस्याश्वस्य। बन्धु। अजो ललाटे नियुक्त.। पुर.। नीयते। अनुनयन्ति तमश्वम्। पश्चात्। क्रान्तदर्शना। स्तोतार।

उप॒ प्रागा॑त्पर॒मं यत्स॒धस्थ॒मर्वाँ॑ अच्छा॑ पि॒तरं॑ मा॒तरं॑ च ।
अ॒द्या दे॒वाञ्जु॒ष्टत॑मो॒ हि ग॒म्या अथा॑ शास्ते दा॒शुषे॑ वा॒र्याणि ॥१३॥

उप प्रागात्। उप प्रागान्। यत् स्वर्गाख्यम्। परमम्। स्थानम्। अर्वान्=

---

१. आगतः Mah. उपप्रैति Sy. उपप्र, अगात् U. २. विशसनम् U.
३. कीदृशोऽर्वा ? ... वजतीति वाजी गमनशीलोऽश्ववान्वा Mah. अश्वः Sy. वेजनवान् U.
४. अरणकुशलः Sy. अरणोऽश्व U
५. देवानां च ता D. देवान्प्रत्यञ्चति देवद्रयक् तेन ... देवान्प्रति गतेन Mah देवान्गच्छता Sy. देवान्प्रत्यञ्चितेन U
६. चित्तेन Mah.
७. दीधीते दीध्यानः Mah. ध्यायन्। कदा देवानस्मवयवेनार्चामि देवत्वं प्राप्नोमीति वा मनसि ध्यायन् Sy. ध्यायन् हिरण्यगर्भपदम् U.
८. अस्य Mah., Sy., U.
९. नाभौ। ... तदुक्तम् 'सौमापौष्णः श्यामो नाभ्याम्' (ŚB 13.2.2.6.) इति Mah. नहनं बन्धुभूत इत्यर्थ.। यद्वा। अस्य बन्धनस्यानीयोऽविमुक्तत्वात् Sy.
१०. एवम्भूतोऽजः Sy.
११. अग्रे Mah. पुरस्तात् ... पुरतः Sy.
१२. स्थाप्यते Mah. प्राप्यते Sy. तदुक्तम् 'कृष्णग्रीव आग्नेयो ररा॒टे पु॒रस्तात्' (YV. 24.1.) इति U.
१३ ०ते ननुनय० D. अनुगच्छन्ति Mah. अनु अनुसृत्य, पश्चादनन्तरम्। अत्र यद्यप्युभयोः पर्यवसितोऽर्थ एक एव तथाप्यजाश्वोभयानन्तर्यत्वप्रकटनाय पदद्वयम्। यद्वा। अन्विति क्रियया सम्बध्यते ... गच्छन्ति Sy. गच्छन्ति U.
१४. अनन्तरम् Sy अनुलग्नाः पश्चात् U.
१५ ऋत्विजः Mah. अनूचानाः। ... 'ये वाऽनूचानास्ते कवयः' (AB 2.2.) इति श्रुते। यद्वा कवय इति मेधाविनाम 'कविर्मनीषी' (Ngh 3.15.) इति तन्नामसु पठितत्वात् Sy १६. रेभन्ते रेभाः 'रेभृ शब्दे' स्तोतार इत्यर्थः Mah. रेभ इति स्तोतृनाम। 'रेभो जरिता' (Ngh 3 16) इति तत्र पाठात् Sy. This stanza=YV. 29.23.
१७. Omitted by M ... उपगच्छति Sy. एवमश्वमभिष्टुत्याथेदानीं यजमानं कृतकृत्यतया सम्बोधयन्नाह. ... प्राप्तवान् U.
१८ यस्मात् U. १९. सुकृतिभिरेकत्र निवासयोग्यं स्वर्गाख्यं यदस्ति तत् Sy.
२०. उत्कृष्टम् Mah., Sy., U.
२१. सहस्थानम् Mah., Sy. सहस्थानं देवमनुष्याणाम् U.

गमनवान्[1]। पितरम्। मातरम्[2]। चास्मीयौ। द्रष्टु[3] ननु न तौ मृतौ 'मातृमन्तं पितृमन्तम्' इति वचनात्, एवं तर्हि दैव्यं पितर मातरं चाप्तुम्[4]। अथ प्रत्यक्ष—अद्य[5]। देवान्[6]। पर्याप्ततमः[7]। गच्छ[8]। अथायम्[9]। आशास्ते होता[10]। यजमानाय[11]। वरणीयान्यायु प्रभूतीनि[12]।

I. 164.

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥१॥

अस्य वामस्य। अस्य[14]। वननीयस्य[15] सूर्यस्य[16]। पलितस्य=रश्मिभिश्वेतैर्युक्तस्य[17]।

---

१. अर्वाञ्चः... अर्वञ्छब्दस्य नलोपाभावश्छान्दसः Mah. अरणकुशलोऽयमश्वः Sy. अर्वाञ्चः। नकार उपजन U

२. द्यावापृथिव्यावभि समीपे Mah. यस्मात्पितरं मातर च द्यावापृथिव्यौ U.

३. आभिमुख्येन प्राप्तुम् Sy 'अच्छाभेराप्तुमिति शाकपूणि.' (N. 5.28.) अभ्यगात् U.

४. अद्य P. D. M अस्मिन्काले Sy

५. अद्य एव देवलोक गते हे यजमान! ... अद्य त्व देवान्... देवलोकम् Mah

६. प्रीततमः सन् Mah. प्रीततमः, स्वर्ग प्राप्नोमीति हर्षयुक्त इत्यर्थः Sy.

७. गच्छ Mah एवम्भूतः ... गच्छेर्देवान्। हिशब्दो यज्ञ उपयुक्तस्य पशोः स्वर्गप्राप्तेः 'सगर्भ्योऽनु सखा सयूथ्य' (TS. 1 2.4 2) इत्यादिमन्त्रान्तरप्रसिद्धिद्योतनार्थः Sy. कृतकृत्यः सन्देवानाम्या गच्छेः... हिनिश्चये U.

८. अनन्तरम् Sy. ९. यजमानः Sy

१०. हि नूनमाशास्ते, देवगणोऽश्वो वा ददात्वित्यर्थः Mah. यद्वा पुरुषस्य व्यत्ययः। आशास्ते प्रार्थये यजमानार्थम् Sy. आशास्तेऽश्व एव U. ११. अथैवं देवत्वं गताय वाजाय हविर्दत्तवते तुभ्यम् Mah. हविर्दत्तवते स्वस्मै Sy. एवंगताय भवते... दत्तवते हवींषि यजमानाय U.

१२. भोग्यवस्तूनि Mah. धनानि Sy.

१३. VM. ignores हि
This stanza=YV. 29. 24.
Ms. D. puts the figure ॥१६३॥ here to indicate the end of one hundred and sixtythird hymn. No such number is given in P. and M.

१४. अत्र द्वितीयपादे तच्छब्दश्रुतेः प्रथमपादे प्रतिविशेषण योग्यक्रियार्थसम्बद्धो यच्छब्दोऽध्याहार्यो योऽयं विवि द्योतते तस्यास्य Sy. अस्य प्रत्यक्षादिप्रमाणासन्निहितस्य परोक्षस्य At. द्वितीये पादे तच्छब्दश्रुतेर्योगा(ग्या)र्थसम्बन्धो यच्छब्दोऽध्याहार्यः। योऽय विवि द्योप्यते तस्यास्य SKN. एतस्मिन्मन्त्रे सूर्यः प्रधानः सूक्ते सूर्याधिकारात्। तस्मात् 'अस्य वामस्य' इत्येवः 'अस्य' शब्दोऽन्तोदात्तः Dur. १५. वमनी M.

१६. सम्भजनीयस्याऽऽरोग्यार्थिभिः सर्वैः सेवनीयस्य Sy. कुब्जस्य शरीरेण परिच्छिन्नस्य व्यापकस्य वा At.

१७. पतित० M.

१८. ०भिश्चैतै०M.०तैयु० D. ०भि श्वे०P. पालयितुः प्रकाशवृष्ट्यादिप्रदानेन पालकस्य Sy. पालयितुः SKN. अयं हि सर्वमेवेदं जगत्पालयति Dur.

तस्य। ह्वातव्यस्य। भ्राता। मध्यमोऽपि। अस्ति वायुः। व्याप्तः। तृतीयः।
भ्राता। घृतपृष्ठः=अग्निः। अस्य। एषां मध्ये। विशा पतिम्। सप्तपुत्रममुम्।

---

१. ह्वातव्यस्याऽऽह्वानार्हस्यादित्यस्य Sy. यो होतोद्गाता विचारकस्तस्य होतुः At. आह्वानार्हस्येत्यर्थः SKN.

२. भूता P. तावृशो भ्राता ... भ्रातृस्थानीयः ... यथा लोके भ्राता पितृधनस्य भागं हरति तद्वत्। मध्यस्थानमन्तरिक्षलोकं हरतीति वा। वृष्टघर्थं रश्मिभिराहृतानां भौमानां रसानां हरणाद्वा भ्रातेत्युच्यते। पित्र्येण धनेन स्वार्जितेन वा भर्तव्यो भवतीति भ्राता। मध्यमो वायुरपि वृष्टघर्थं रसैर्भक्तव्यो भवति Sy. जागृदवस्थाया नाम्ना विश्वस्य प्रथमस्य भ्रातुर्द्वितीयो भ्राता At. क्रियाशब्दो वा भ्रातृशब्दो हरतेर्बिभर्तेर्वृष्ट्यर्थः। रश्मिभिराहृताना भौमानां हर्ता भर्तव्यो वा रसै. SKN. भागहर्ता भर्तव्यो वोदकेन Dur.

३. मध्यमस्थानः। मध्ये भवो वायुरुच्यते। आदित्याग्नी अपेक्ष्यास्य मध्यमत्वम् Sy. मध्ये स्वप्ने भवतीति मध्यमो नाम्ना तैजसः At. मध्यमो वायु SKN

४. भवति Sy., At. भवति। एकस्मात्कारणादुत्पन्नत्वात् SKN.

५. ०यु व्याप्तः P. सर्वत्र व्याप्तः। नहि वायुरहितः कश्चित्प्रदेशोऽस्ति Sy. अशनो मेघस्य गिरेर्वा नामैतत्। तैजसो हि मेघसदृशः। निद्रया तिरोहिततेजस्त्वात्। स्वप्नाख्यगन्धर्वनगराधिष्ठातृत्वाच्च गिरिवदाश्चर्यविषय. At. अशनो व्यापी SKN. व्यापनो वायुरित्यर्थः। स हि द्युलोकादादित्येनोदकेन म्रियते हरति चोदकं द्युलोकात् Dur.

६. त्रयाणां पूरणस्तृतीयः। उक्तोभयापेक्षया तृतीयत्वम् Sy. वायुरादित्योऽग्निरित्येवं परिसङ्ख्याय वायोस्तृतीयोऽग्निर्भवति। सर्वेभ्यो ह्यधि वायुर्बलवान्। वायुरपि च ज्योतिरेव Dur.

७. भूतं P. भ्रातृत्वं प्रतिपादितप्रकारेणात्रापि द्रष्टव्यम्। रात्रौ सवितुस्तेजोभागस्य हरणाद् दिवा स्वकीयतेजसो भागस्य तदर्थमेव भक्तव्यत्वाद् वा भ्रातृत्वम् Sy. तृतीयो भ्राता सुषुप्तौ, नाम्ना प्राज्ञः At. ऐन्द्राग्ने हविषि संस्तुतौ वा हविर्भागहर्ता Dur.

८. घृतमाहुतिलक्षणं पृष्ठे यस्य तावृशः Sy. घृतौ क्षरितौ लीनौ पृष्ठौ परिभवो बाह्यप्रदेशसमौ जागरस्वप्नौ यस्मिन्स घृतपृष्ठः प्राज्ञः। 'घृ क्षरणदीप्त्योः' At. घृतेन वा यः स्पृष्टः स घृतपृष्ठः पार्थिवोऽग्निः सः SKN. पृथिवीस्थानः Dur.

९. Omitted by P.

१०. एषु भ्रातृषु मध्ये पुरोदेशे वा Sy. अत्र विश्वादिषु त्रिषु At. एषां च मध्ये SKN.

११ विशा प्रजाना पालयितारम् Sy. विश्वतैजसप्राज्ञाना पति पातार स्वचैतन्यदानेन रक्षकम् At विश्वस्य पातारं भौमस्य रसस्य पालयितारं वा रश्मिभी रक्षितारमित्यर्थः SKN. सर्वस्य जगतः पालयितारम् Dur.

१२ सर्पणरश्मिपुत्रोपेतम्। ऐतिहासिकपक्षे 'अदितिः पुत्रकामा' (TB.1.1.9.1.) इति प्रस्तुते मित्रावरुणादिष्वदितिपुत्रेष्वस्यादित्यस्य सप्तमपुत्रत्वम् Sy.
तुरीयं सप्तपुत्रम्। सप्त महाबाबयो जगत्प्रकृतयः पुत्रा. कार्यभूता विकृतयो यस्य स. At. अन्यत्र सप्तपुत्र सप्तमङ्कुचाका रश्मयः पुत्रा' पुत्रस्थानीया अस्य, सप्तमो वा योऽदितेः पुत्र इतीतिहासपक्षे। 'अदितिः पुत्रकामा' (TB.1.1.9.1.) इति प्रस्तुतस्यैव मित्रं च वरुण इत्यादिषु सप्तम इति। सर्पणा वा सततगन्तारो रश्मयः पुत्रा रसादानप्रकाशनात्पुत्रवदेनं, पुरुणस्त्रातारो यस्य स सप्तपुत्र आदित्यस्तम् SKN.

१३. ०त्रममृतम् P.

[1]अपश्यमादित्यम्, सप्तादित्यरश्मय [2] [3] इति [4] वदन्तीति।

१. ईदृशं महानुभावमादित्यमपश्यमद्राक्षम्। भावनयाऽऽत्मत्वेन साक्षात्करोमीत्यर्थः। 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' इति श्रुतिः Sy. दृष्टवानस्मि At. पश्याम्यहम् SKN.

तत्रैतस्मिंस्त्रेधा विभक्ते ज्योतिषि प्रधानमेतमेवाहमपश्यम् Dur.

२. अपश्यमादित्यरश्मय P.

३. एवं वा—अस्य वामस्य विश्वस्योद्गरितुः स्रष्टुरित्यर्थ.। पलितस्य पालयितु· स्वसृष्टजगत्पालनशीलस्य होतुरादातु. स्वस्मिन् संहर्तुरित्यर्थः। परमेश्वरस्य सृष्टयादिकर्तृत्वं श्रुतिस्मृतिपुराणादिषु प्रसिद्धम्। तस्य तादृशस्य परमेश्वरस्य भ्राता तद्भागहारी तदंशभूतः सूत्रात्मा मध्यमः सर्वत्र मध्ये वर्तमानोऽस्ति जगद्धारकत्वेन वर्तते। स चाश्नो व्यापनशील·। 'वायुना वै गौतम सूत्रेणायं च लोक. परश्च लोक. सर्वाणि च भूतानि संरब्धानि' (Bṛh. U. 3 7.2.) इति श्रुते.। वक्ष्यमाणविराडपेक्षया वा मध्यमत्वम्। किंचास्य परमेश्वरस्य तृतीयो घृतपृष्ठ· । घृतमित्युदकनाम, तेन तत्कार्यं शरीरमुच्यते। तदेव पृष्ठं स्पर्शकं वा यस्य स तादृशः। 'पृष्ठं स्पृशतेः' (N.4.3.) इति निरुक्तम्। यद्वा प्रदीप्तपृष्ठः। पृष्ठशब्दः कृत्स्नशरीरोपलक्षकः। प्रकाशितशरीराभिमानीत्यर्थः। न स्वयं सूक्ष्मशरीराभिमानिसूत्रात्मवत्स्पर्शनाविषयो भवति। अत्रैषु मध्ये विश्पतिं विशां प्रजानां पतिम्। उपलक्षणमेतत्। सर्वस्य पतिमित्यर्थः। 'सर्वस्य पतिः सर्वस्येशानः' (Cf. Bṛh. U. 4.4.15.) इति श्रुतेः। सप्तपुत्रं सप्त लोकाः पुत्रा यस्य तादृशं, स्वमायया सृष्टसर्वलोकमित्यर्थः। अपश्यं, पश्येय साक्षात्करोमीत्यर्थः। अयमर्थः—स्वाधीनमायो जगत्कारणभूतः परमेश्वर एक·। तत उत्पन्नौ स्थूलसूक्ष्मशरीराभिमानिनौ द्वौ विराट्सूत्रात्मानौ। तेषु मध्ये द्वयो· साक्षात्कारे मोक्षाभावात् सृष्ट्यादिकारणं परमेश्वरं ज्ञेयत्वेन प्रसिद्ध श्रवणमननादिसाधनेन साक्षात्करोमीत्यर्थ·। एवमुत्तरत्राप्यध्यात्मपरतया योजयितुं शक्यम् ... यत्र 'द्वा सुपर्णा' (RV. I. 164.20.[a].) इत्यादौ स्फुटमाध्यात्मिको ह्यर्थ· प्रतीयते तत्र तत्र प्रतिपादयामः Sy.

४ अस्य वामस्य वननीयस्य। पलितस्य पालयितु·। होतुर्हूतव्यस्य। तस्य भ्राता मध्यमोऽस्त्यशनः। भ्राता भरतेर्हरतिकर्मणः। हरते भागं भर्तव्यो भवतीति वा। तृतीयो भ्राता घृतपृष्ठोऽस्यायमग्निः। तत्रापश्यं सर्वस्य पातारं वा पालयितारं वा। विश्पतिं सप्तपुत्रं सप्तमपुत्रं सर्पणपुत्रमिति वा। सप्त सृप्ता सङ्ख्या। सप्तादित्यरश्मय इति वदन्ति N.4.26; SKN. II. 279.

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥२॥

सप्त[1] युञ्जन्ति । सप्तर्तव[2] । कालरथम्[3] । सवत्सरैकचक्रम्[4] । युञ्जन्ति[5] तम्[6] । एक[7] । अश्व[8] । वहत्यादित्य[9] । सप्त रश्मयो यस्मै रसानभिसन्नामयन्ति[10] । तत्

---

१. सप्त, एतत्सङ्ख्याका अश्वाः Sy. वामस्येत्यनेन परिच्छिन्नस्येत्युक्तं, केन परिच्छेदः? देहेनेत्याह। तन्मात्राः पञ्च, महदहमौ च द्वावेवं सप्त At. सप्तसङ्ख्योपेताः सर्पणा वा Dur

२. कल० P. रथं रंहणस्वभाव सूर्यस्य सम्बन्धिनम् Sy.
रथरूपकल्पित शरीरम् At.
रंहतेर्गतिकर्मणः। रंहितारं गन्तारमादित्यम् SKN रंहणमादित्यम्। ... रहणश्चासौ मुहूर्तमप्यनवस्थायित्वात् Dur.

३. ०रैचका P. एकरथाङ्गोपेतम्। यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते Sy. एकः कालश्चक्रवद् भ्रामको यस्य तम् At. एकमेव चरितारं दीपितारमित्यर्थः। चरितार गन्तारमित्यर्थः। उदिते ह्यादित्ये स एवैकश्चरति वा नान्यानि ज्योतींषि तद्रश्मिभिराच्छादितत्वादवदृश्यमानत्वात् SKN. एक एव ह्यसावन्तरिक्षे चरति। इतराणि ज्योतींषि नाशयत्येव स्वेन तेजसा प्रकाशेन Dur.

४. अनुबध्नन्ति, वहन्त्यहोरात्रनिर्वाहाय Sy योजयन्त्यात्मना, उदितमात्रमेव SKN.
योजयन्त्यात्मना रश्मयः ... उद्यन्नेव ह्यसावादित्यो रश्मिभिर्युज्यते Dur.

५ एतो P. एक एवाहङ्कारः At.
स च तैर्युक्त एकः SKN.
एक एव Dur.

६. अश्वस्थानीयः At. अशनो व्यापी SKN. अशनो व्यापनः सर्वभूतानाम् Dur.

७. एक एव वायुः सप्तरूप धृत्वा वहतीत्यर्थः। वाय्वधीनत्वावन्तरिक्षसञ्चारस्य Sy.
चेष्टयति At. गच्छति SKN , Dur

८ किं वस्तुत. सप्त ? नेत्याह...सप्तनामा, एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा Sy. सर्पयतीति सप्त, सङ्क्षिपतीति वा, नामा नामयिता स रुद्रश्चेष्टको यस्य। अहङ्कारस्य रुद्रो देवता At. सप्त रश्मयो यस्मै रसानभिसन्नामयन्ति, सप्तर्षयो वा यं प्रति स्तावकत्वेन नमन्ति स सप्तनामा SKN.
सप्तपुत्र इत्येवमाद्याः सप्तसङ्ख्यायुक्ताः स्तुतयोऽस्य। ...सप्तनामा सर्पणैः सप्तभिर्वा रश्मिभिर्युक्तः Dur.

९. ०यति P. D.

१०. त P.M.

त्रिनाभि[1]। चक्रं[2] त्र्युतु[3]. सवत्सरो ग्रीष्मो वर्षा हेमन्त इति नाभय[4]। अजरम्[5]। अनाश्रयम्[6]। यस्मिंश्चक्रे[7]। सर्वाणि। इमानि[8]। भूतानि[8]। अधितिष्ठन्ति[9]।

---

१. त्रिगाभि M. एकचक्रमित्युक्तं कीदृश तत्? इत्यत आह। त्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम् Sy.

त्रिधा नभति। 'नभ बीप्तौ' At उत्तरोऽर्धर्चः संवत्सरस्तुतिः। त्रिनाभि नाभित्रयं ग्रीष्मो वर्षा हेमन्त इत्येत ऋतवो नाभिस्थान यस्य तत्त्रिनाभि SKN. स एवँलक्षण एकचारी व्यापनः ...यवा वहत्युदयादारभ्य यावदस्तमिति तवैवं वहन्किमभिनिर्वर्तयतीत्युच्यते त्रिनाभिसयुक्तम् Dur

२ एकचक्रमित्यत्र चक्रशब्देन यदुक्तं तत्। त्रिधा हि कालो भिद्यते। प्रकृतेः परः, प्रकृतिसन्निहितः, शुद्धब्राह्मणोऽर्वाचीनः। ईशः प्रकृतिचेष्टकः प्रथमः काल। क्षणलवात्मा द्वितीयः। सूर्यात्मा तृतीयः। ईदृशं चक्रं अस्य रथस्य त्रिधा काल.। चक्रवद् भ्रामकत्वात् At.चक्रं संवत्सराख्यम्। परिवर्तमानसामान्यात्संवत्सरस्य चक्रव्यपदेशः SKN. कालचक्रम्। चक्रनधर्मि, चक्रनं चलनमुच्यते। चलनधर्मि क्रमणधर्मि वा Dur.

३. त्र्युतु P. त्र्युतुः M. एतदेवास्य त्रिनाभित्वमभिप्रेतम् Dur.

४. अमरणधर्मकम् Sy.

जरावर्जितम् SKN.

तत्संवत्सरचक्रमजरणधर्मि, नहि संवत्सरस्य जरा नाम धर्मोऽस्ति Dur.

५. अशिथिलम् Sy. अगमयितृ। स्थानान्तरं न गच्छतीत्यगन्तृ, इत्युच्यते At. अप्रतिहतमन्यत्राश्रितत्वेन पराश्रयमित्यर्थः SKN. अप्रतिगतमनाश्रितमन्यत्र क्वचिदिति Dur.

६. कालचक्रे At. यस्मिन् SKN.

७ प्रसिद्धानि Sy.

८ Omitted by P.

भूतजातानि Sy.

भुवनानि At. भूतजातानि SKN.

९ आश्रित्य तस्थुस्तिष्ठन्ति Sy. अध्यधिश्रित्य तस्थुरविमुच्य तिष्ठन्ति At. अधिशब्दः .. कर्मप्रवचनीयसञ्ज्ञकः पदपूरणः। उत्पत्तिप्रलयस्थितिभिरपि स्थानि? यवनपेक्ष्य न कस्यचिदुत्पत्तिः स्थितिः प्रलयो वास्तीत्यर्थः SKN अभिसन्तिष्ठन्ते। आश्रितानि विनाशमुपयान्ति। विनाशोऽपि हि संस्थोच्यते। तदेवंलक्षणं त्रिनाभिकालचक्रमजरं य आदित्योऽभिनिर्वर्तयति यच्चेवमभिनिर्वर्त्यते कालचक्रं तदेतदुभयमप्यहं स्तौमीत्येवमस्य मन्त्रस्य पूर्वोऽर्धर्चः आदित्यप्रधान उत्तरः संवत्सरप्रधान इति Dur.

पञ्चधा च त्रिधा चैव षोढा द्वादशधैव च ।
सवत्सरं चक्रवच्च[1] पराभि[2] कीर्तयत्यृषि[3] ॥इति शौनक[4]॥

---

१. ०रश्च० P. २. वरा० P.
३. ०यन्नृ० M. ०यन्त्यृ० P.
४. BD. IV. 35.
५. यद्वा। एकचक्रमेकचारिणमसाहाय्येन सञ्चरन्तं रथमादित्यमण्डलं सप्त युञ्जन्ति। सर्पणस्वभावाः सप्तसङ्ख्या वा रश्मयः सप्तप्रकारकार्या असाधारणा परस्परविलक्षणाः षड्ऋतव। एकः साधारण इत्येवम्। अथवा मासत्रयात्मकाः षट्, अपरोऽधिकमासात्मक इत्येवं सप्ततंवो युञ्जन्ति। एतस्य कार्यं निर्वहन्तीत्यर्थः। स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्त रसानां सन्नमयितारो रश्मयो यस्य तादृशः, सप्तर्षिभिः स्तूयमानो वाऽऽदित्यो वहति धारयति भ्रमयतीत्यर्थः। किम्? त्रिनाभि चक्रम्। तिस्रो नाभिस्थानीया. सन्ध्या. सम्बद्धा वा त्रय ऋतवो यस्य तत्तादृशम्। के ते? ग्रीष्मवर्षाहेमन्ताख्याः। यद्वा भूतभविष्यद्वर्तमानाख्यास्त्रयः कालास्त्रिनाभय। तद्विशिष्टं चक्रं चक्रवत्पुनः पुनः परिभ्रमाणं संवत्सराख्यं चक्रमजरं मरणरहितम्। नहि कदाचिदपि कालो म्रियते। 'अनाविनिधनः कालः' (*Tithtattva* of Raghunandana P. 1.) इति स्मृतेः। अनर्वमप्रतिहतम्। ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनरावर्तयति। संवत्सरादर्वाचीनानां तत्रैवान्तर्भावात्। ततो युगादीनां तदावृत्तिसाध्यत्वात्संवत्सरस्य चक्रत्वेन निरूपणम्। पुनः कीदृशं तत्? यत्र यस्मिंश्चक्र इमा विश्वा भुवना, इमानि सर्वाणि भूतान्यधितस्थुराश्रित्य तिष्ठन्ति कालाधीनत्वात्सर्वस्य स्थिते। ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् Sy.

सप्त युञ्जन्ति रथम्। एकचक्रमेकचारिणम्। चक्रं चकतेर्वा चरतेर्वा। क्रामतेर्वा। एकोऽश्वो वहति सप्तनामादित्यः। सप्तास्मै रश्मयो रसानभिसन्नामयन्ति। सप्तैनमृषयः स्तुवन्तीति वा। इवमपीतरन्नामैतस्मादेव। अभिसन्नामात्। संवत्सरप्रधान उत्तरोऽर्धर्चः। त्रिनाभिचक्रम्। त्र्यृतुः संवत्सरः। ग्रीष्मो वर्षा हेमन्त इति। संवत्सरः संवसन्तेऽस्मिन्भूतानि। ग्रीष्मो ग्रस्यन्तेऽस्मिन्ग्रसाः। वर्षा वर्षत्यासु पर्जन्यः। हेमन्तो हिमवान्। हिमं पुनर्हन्तेर्वा। हिनोतेर्वा। अजरमजरणधर्माणम्। अनर्वमप्रत्यूतमन्यस्मिन्। यत्रेमानि सर्वाणि भूतान्यभिसन्तिष्ठन्ते। तं संवत्सरं सर्वमात्राभिः स्तौति N.4.27; SKN.II.281.

इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥३॥

इमं रथम् । इमम् । कालरथम् । ये । अधितिष्ठन्ति । सप्ततंव । सप्ततुचक्रम् । सप्त । अश्वा । वहन्ति । सप्त । स्वसारोऽश्वा । तस्मिन्नथेऽभिसम्पतन्ति । यत्र । उदकानाम् । नामकानि । सप्त ज्योतीषि । निहितानि ।

---

१. उक्तस्वरूपमादित्यमण्डलाख्यं संवत्सराख्यं वा Sy. सूक्ष्मदेहमाश्रित्योक्तम् । अथ स्थूलदेहमाश्रित्योच्यते । इमं प्रत्यक्षादिसन्निहितम् At.

२ रथं स्थूलदेहम् At. ३. यानि At

४. अभिति० P. अधिष्ठिताः । सवत्सरपक्षेऽयनर्तुमासपक्षदिवसरात्रिमुहूर्ताख्याः सप्तावयवा अधितिष्ठन्ति Sy. अधि, अधिष्ठायाश्रित्य ये तस्थु. At.

५. सप्त रश्मयः Sy सप्ताङ्गानि वर्तन्ते At

६. कीदृशं तत् ? सप्तचक्रं, चकनाच्चरणात्कर्मणाद्वा चक्राणि रश्मयस्ते सप्त यस्य रथस्य तादृशमुभयविधं रथम् Sy. तैरेव सप्ताङ्गैः सप्तचक्रो देह.। 'चक तृप्तौ प्रतिघाते च' सप्ताङ्गानि सप्तचक्राणीष्टप्रवर्तकानि यस्यानिष्टान्निवर्तकानीति वा सप्तचक्रस्तं सप्तचक्रम् At.

७. पूर्वोक्ता अधिष्ठिता अश्वा व्यापनशीलाः Sy. सप्ताश्वा रजस्तमःसहितानि कर्मेन्द्रियाणि At. ८. वहन्ति निर्वहन्ति च Sy. गमयन्ति चालयन्ति At

९ असाधारणाः परस्परविलक्षणकार्याः षड्ऋतवः सर्वसाधारण एक इति सप्तत्वम् । यद्वा । उक्तरूपा मासद्वयात्मकाः षट् त्रयोदशमासात्मकः सप्तम इति सप्तत्वम् Sy. १०. तादृशं रथं सप्त स्वसारः स्वयंसरणाः । स्वरादित्यः । तेन सारिताः परस्परं स्वसृभूता वा सप्तसङ्ख्याका रश्मय ऋतवश्च Sy. सप्त धर्माधर्मसहितानि ज्ञानेन्द्रियाणि स्वसारो भगिनीस्थानीयानि At.

११. आभिमुख्येन सङ्गच्छन्ते Sy. इतरेन्द्रियशक्तीनामभि, आभिमुख्येन संनवन्ते प्रवर्तन्ते । 'णु स्तुतौ' अनेकार्था धातवः At.

१२. यस्मिन्रथ उभयविधे Sy. यत्र विषये At.

१३. गवां वाचां स्तुतिरूपाणाम् Sy. रजस्तमःसहितानां कर्मेन्द्रियाणां तथा धर्माधर्मसहितानां ज्ञानेन्द्रियाणां च At.

१४ नमनानि सप्तस्वररूपाणि Sy. नामानि देवतानीन्द्रियदेवताः At.

१५ सप्तविधानि Sy. सप्तसङ्ख्याकानि At.

१६. निहितानि । सप्तस्वरोपेतैः सामभिः स्तुत्य रथमित्यर्थः । यद्वा गवामुदकानां सप्त सर्पणस्वभावानि नाम नमनानि यत्र यासु स्वसृषु निहिता । स्वसारः परस्परस्वसृभूता देवनद्योऽभि संनवन्ते Sy. नितरा हितान्यनुकूलानि ... अस्यायमर्थः—मूर्धादित्रिकं, करावङ्घ्री चेति सप्ताङ्गानि चक्राख्यानि । सप्त, सप्तकमित्येव सप्त वहच्छरीरं गमयन्ति चालयन्ति । खानि, कर्मकरणानि कर्मेन्द्रियाणि रजस्तमसीत्येव सप्तैव । तथान्यानि खानि धर्माधर्मसहितानि ज्ञानेन्द्रियाणि पञ्च, एवं सप्त, ग्रामृतेविषयान्सङ्ग्राहयन्ति । यत्र येषु विषयेषु खानि सुरैरिन्द्रियदेवताभिः प्रवर्तित प्रापितानीन्द्रियाणि तान्विषयान् संयोजयन्ति । एवं स्थूलशरीरमुक्तम् At.

को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्वा बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत् ॥४॥

को ददर्श । चक्र स्तुत्वाऽऽदित्यमेव स्तौति—कस्तम् । ददर्श । प्रथममेव । जायमानं पुरुषम् । अस्थन्वन्तम् । यदि कश्चिद् । अनस्या । बिभर्ति । भूम्या । चालक । ता भूमिमविसृजन् । तस्या आत्मभूत । क्व । स्विद् वर्तते तादृश क इति । क । विद्वांसम् । प्रष्टुम् । उप-

---

१. चक्रुस्त्वादि ० P स्तुत्यादि० M.

२. एवं प्रपञ्चस्य कालायत्ततां प्रतिपाद्य तस्य कारणभूतस्य परमेश्वरस्याविषयत्वमाह Sy.
देहात्मपक्षनिरासोऽत्र At.

३. ०स्तद् M. क. पुमान् ? At

४. द्रष्टुं शक्नुयात् Sy. पश्यति मन्यते व्याघातात् At.

५. कदा ? प्रथमं सृष्टेः पूर्वम् । अव्याकृतावस्थायामित्यर्थः Sy कारणमात्मानम् At.

६. प्रथमभावविकारमापन्नम् । उत्पद्यमानं प्रपञ्चमित्यर्थः Sy. जायमानदेहचक्रमिति At.

७. पुषमन्थन्वन्त P अस्थिमन्त शरीरम् । उपलक्षणमेतत् । कार्यभावमापन्नमित्यर्थः Sy. सावयवम् At

८. दुर्ज्ञेयत्वे हेतुमाह । .. यस्मात् Sy., At

९ अस्थिरहिताऽशरीरा साङ्ख्यप्रसिद्धा प्रकृतिर्वेदान्तप्रसिद्धा, ईश्वरायत्ता माया Sy. अस्थिरहितो निरवयव· At

१०. गर्भवदन्तर्धारयति । अव्याकृतावस्थायामनस्थोऽशरीरः परमेश्वरो बिभर्ति । यदा केवलः परमेश्वरो मायाशबलितः सन्निदं जगन्निर्मितवानुत्पत्तिसमये देहाद्यसहितस्य कस्यचिदभावात्को ददर्श Sy. धारयेदन्यथाऽनवस्था स्यात् At.

११. तदानीं मनो नित्यमात्मा च नित्यस्तत्संयोगात्कश्चिदात्मा जानातीति चेत्सोऽपि न सम्भवतीत्यत आह । भूम्याः सम्बन्धि पार्थिवं स्थूलशरीरम् Sy. यो निरवयव आत्मा भूम्याः पार्थिवादिधातोर्बहिस्य At

१२ ०का० D युक्ताश्वा कलंकस्तां P. असु. प्राणस्तदुपलक्षितं सूक्ष्मशरीरम् Sy. असुः क्षेप्ता प्रवर्तक· At.

१३ इवसृ० D. असृक् शोणितम् । एतत्सप्तधातूपलक्षकम् । यद्यपि शरीर पञ्चभूतात्मक तथापि भूतद्वयप्रत्यक्षत्वात्तदपेक्षयोक्तम् Sy अतश्चासृक् तद्वान्देहः At.

१४ आत्मा तं सम्बद्धश्चेतन. Sy.

१५ क्वस्मि P तादृशो देहेन्द्रियसङ्घातरूप आत्मा तस्मिन्समये कुत्रास्ति, प्रष्टा प्रतिवक्ता चोभावपि नास्ति, (न स्तः) इत्यर्थ· । 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त यत्पश्येत्' (Brh. U. 4.3.23.) इति श्रुते. Sy.

१६. स्विच्छब्दोऽसम्भावनायाम् At.

१७ आस्ते, न कश्चिदस्तीत्यर्थः । 'नान्यत्किञ्चन मिषत्' (AA. 2.4.1.) इति श्रुतेः Sy. स्यादेव At.

१८. Omitted by P.D. कः शिष्योऽल्पमतिः Sy. नन्वमुमर्थमेतैरेव त्रिभिर्हेतुभिः सर्वे कथं न विदुः पुरुषाः ? शृणु । कः पुरुषः At.

१९. जगत्कारणविषयज्ञानवन्तमन्यं गुर्वादिकमेतत्कारणं प्रष्टुम् Sy. जानन्तमेतदात्मस्वरूपम् At.

गच्छति भूमिः=शरीरम् 'सूर्य आत्मा जगतस्तस्थुषश्च' इत्युक्तमिति।

पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥५॥

पाकः पृच्छामि। पक्तव्यप्रज्ञस्तन्। मनसा निरूपणेऽपि। अविजानन्। पृच्छामि। देवानाम्। एना। निहितानि। आवासस्थानानि 'सप्ततंवो द्वादशमासा. पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविश एतावन्तो वै देवलोका' इति ब्राह्मणम्। वत्से। एकहायने। अधि। सप्त। दीर्घसूत्राणि। तिर्यक्सूत्रैर्वातुम्। कवयो देवा।

---

१. उपगच्छति। ... यद्वा प्रथमं प्रथमभाविनं जगतः कारणभूतं को ददर्श क. साक्षात्करोति जायमानमस्थन्वन्तं मनुष्यमनस्थिकः परमेश्वरः सशरीरमशरीरो यद्यस्माद् बिभर्त्ति। द्रष्टुरपि तत्कार्यत्वादिति भावः Sy.
२ ०भि M. (RV. I 115 1d)
३. VM. ignores एतत्
४. ०व्यं प्र० D पक्तव्योऽपक्वमतिरहम् Sy. पक्वोऽबालः प्रशस्तः At.
५ अमस्कृतेन Sy सङ्कल्पविकल्पवता मनसा हेतुना At
६. ०णेव्यवि M. अतिगहनं तत्त्वं विशेषेण ज्ञातुमशक्नुवन् Sy. सामान्येन जानन्नपि विशेषेण न जानन् निर्विशेष आत्मनि किं ज्ञातव्यम् At
७. प्रश्नं करोमि Sy.
८. देवानामपि Sy. देवानामिति वेदानां, वर्णव्यत्ययात् At.
९. आ P. एनानि Sy., At.
१०. गूढानीत्यर्थः। यद्वा देवानां पदानि तत्त्वानि निश्चिद् गोपायित्वा स्थापितानि। अतः पृच्छामि तत्त्वज्ञानोपयोगायेति शेषः Sy. निगूढार्थानि लक्षणया प्रवृत्तानि 'तत्त्वमसि' (Cha. U.6.8.7.) इत्यादीनि पृच्छामीत्यन्वयः At.
११ सन्देहास्पदानि तत्त्वानि Sy ब्रह्मविष्णुरुद्राणां प्रसिद्धानि पदानि 'अस्य वामस्य' (RV. 1.164.1.) इत्यत्रार्थतः प्रसिद्धानि At.
१२. ०वः स्त्र० M
१३ ०ण M. (Cf. TB. 3.8.10.3.)
१४ सर्वस्य निवासभूते Sy पुत्रत्वमापन्ने At.
१५ बडिति सत्यनाम। तत्कथयतीति बष्कय आदित्यः। यद्वा बष्कयो नामैकहायनो वत्सः। पुनरपि वत्सशब्दस्य पृथङ् निर्देशाद् बष्कयशब्देन तत्कालमात्र लक्ष्यते। तस्मिन्नादित्ये Sy. बष्किहिं गत्यर्थः। सर्वे गत्यर्था ज्ञानार्थाः At.
१६. अति M. अधिकम् Sy. एवंपृष्टा गुरवो यद् ब्रूयुस्तदाह। अध्यधिकान्निष्कामान्काम्यनिषिद्धेतरान् At.
१७. तायमानान्सप्त सोमसंस्थान् Sy. सप्तधातूत्पन्नांस्तन्तून् At.
१८. जगद्रूपतिर्यक्तन्तून् Sy.
१९. वातु P.M. वेतुम् Sy. अवितुं ज्ञापयितुम्, उ अभिमतं वस्तु At.
२०. मेधाविनो यजमानाः Sy. कवयो गुरवः At.

वितेनिरे। सवत्सर ऋतवो निहितास्तेषांमहोरात्रैर्वानमिति।

अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान्।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥६॥

अचिकित्वान्। अजानन्नहम्। विदुष। चित्। अत्र। कवीन्। पृच्छामि। ज्ञानाय। नतु। विद्वान् विजिगीषया पृच्छामि। यो देव। षट्। इमान्। ऋतून्। वितस्तम्भ मेधीभूतो धारयति। तस्याजायमानस्य। रूपे। किम्। अपि। स्विदस्ति, अनुवृत्त रूप कि स्विदस्ति। ऋतुश:

---

१. वितन्नि० D तत्तीरे P. वितन्वन्ति। यद्वा सप्त तन्तवः सप्त च्छन्दांसि, तानि वितन्वन्ति। किमर्थम्? श्रोतवे सप्त सोमसंस्थारूपतिर्यक्तन्तुसन्तानाय। यज्ञनिर्माणायेत्यर्थः। यज्ञाना स्थिते. सूर्याधीनत्वादिति भावः। ईदृश तत्त्व पृच्छामीत्यर्थः Sy.
वितताम्विस्तृतान्यज्ञान् वितन्तिरे। विशेषेण तन्वन्ति At.

२. VM. ignores उ

३. देवतातत्त्वमजानन्नहम् Sy
अजानन् At.

४. विशेषेण तत्त्व जानतः Sy
सम्यग्जानतः At.

५. सम्यक् At.

६ अस्मिस्तत्त्वविषये Sy.

७. क्रान्तदर्शिनोऽधिगतपरमार्थान् Sv.
ज्ञापने प्रौढान् At.

८. वेदनाय परमार्थज्ञानाय Sy. परोक्षज्ञानाय At.

९. नैव विद्वान्। शास्त्रश्रवणादिना विद्वानिव वर्तमानोऽप्यह परमार्थतो नैव विद्वान् At.

१०. विद्वान् न पृच्छाम्यपि त्वज्ञानादेव Sy.

११. यः परमेश्वरः Sy.
योऽहम् At.

१२. यद्यपि लोकाः सप्त तथापि सत्यलोकस्य कर्मिणां सर्वेषां साधारणत्वाभावाद् षडित्युक्तम् Sy.

१३ इमानि Sy.
प्रसिद्धानि कालावीनि At.

१४. लोकाश्चञ्जनात्मकान् Sy.
रजासि मलानि रजोगुणकार्याणि वा युष्मत्प्रसादात् At.
लोका रजास्युच्यन्ते N. 4.19.

१५. वीत० P स्तम्भितवान्नियमितवान्। 'अय य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय' (Cha U.8.4.1) इति श्रुते. Sy. विशेषेण तस्तम्भ, स्तम्भयिष्यामि At.

१६ मेधिभू० P. मेधीभू० D. M.

१७. ननु षडेवोक्ता सप्तमः किमिति न निर्दिष्ट इति? उच्यते। अजस्य जननादिरहितस्य चतुर्मुखस्य ब्रह्मणः Sy.
अजस्य नित्यस्यात्मनः At.

१८ स्वरूपे Sy.
स्वरूपे जगति At

१९ किं स्विदेव। तत्र केनाप्यधिगन्तुं शक्यमित्यर्थः। कैश्चिदेवोपासकैरर्चिरादिमार्गेण गन्तव्यत्वादिति भावः Sy.
किं स्विदेकमेव रूपमादरणीयमपि स्विदनेकमेव रूपमादरणीयमिति सोऽहं पृच्छामि At.

२०. ०ञं P.

काल[1] एक उपलभ्यत इत्युत्तरमिति[2]।

इह ब्रवीतु य ईमङ्ग[3] वेदास्य[4] वामस्य[5] निहितं[6] पदं[7] वेः[8]।
शीर्ष्णः[9] क्षीरं[10] दुहते[11] गावो[12] अस्य[13] वव्रिं[14] वसाना[15] उदकं[16] पदापुः[17] ॥७॥

इह ब्रवीतु। इह=मत्समीपे[1]। ब्रवीतु[2]। य[3]। एनम्[4]। अङ्ग[5]। वेत्ति कञ्चन सम्बोधयत्यङ्गेति। अस्य[6]। वामस्यादित्यस्य[7]। गच्छत.[8]। यत् पदम्[9]। निहित यत्राय पद निधत्ते[10] तद्वदतु[11] सवत्सरेऽस्य[12] पदं निहितमिति यद्वा सवत्सर पदमस्य भवति। शिरस्त[13]। क्षीरम्[14]। दुहन्ति[15]। गाव. काश्चित्[16]।

---

१. एकं सत्यलोकाख्यं पुनरावृत्तिरहित स्थानम् Sy.

२. ०त्युक्तार० M यद्वा षड्जातिविलक्षणाः षड्ऋतवः। तान्यस्तम्भयत्तत्त्वम्। अजस्य गमनशीलस्य जन्मरहितस्य वाऽऽदित्यस्य रूपे रूप्यमाणे दृश्यमाने मण्डल एकमद्वितीयं किमपि स्वित्। यत्किञ्चिदवाङ्मनसगम्य तत्त्वमस्ति तत्पृच्छामि। 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' (Cha. U. 1 6 6) इत्यादिश्रुतिप्रतिपादित तत्त्वमित्यर्थ.। अथवा षडिमानि रजांसि त्रिविधान् भूलोकांश्च यस्तस्तम्भ। 'तिस्रो भूमीर्धारयन्। त्रीरुत द्यून्' (RV. II. 27.8.) इति निगमः। तस्याजस्य परब्रह्मणो रूपे नानाविकारभाजि जगति किमपि स्विदेकमेकात्मकमस्तीति प्रश्नः। अविशेषमस्ति नाममात्रमेकरूपमस्तीत्युत्तर—विवक्षया प्रश्नः। 'अस्तीत्येवोपलब्धव्यम्' (Ken. U. 2 6.13.) इति श्रुतेः Sy.

३. इदानीम् Sy. गुरुलक्षणमत्र। इह ब्रह्मविद्यायाम् At.

४. वक्तु Sy.

५. Omitted by P.
वक्ता यः At.

६. एतल्लक्ष्यमाणं तत्त्वम् Sy. इदमात्मतत्त्वम् At.

७. क्षिप्रमविचारेण Sy.
असन्दिग्धम् At.

८. जानाति At.

९. कीदृश तत्? अस्य पुरतो दृश्यमानस्य Sy. किं वेद? तत्राह। अस्य प्रत्यक्षादिप्रसिद्धस्य At.

१०. वननीयस्य Sy. कुब्जस्य परिच्छिन्नस्य जीवस्य At

११. गन्तुरादित्यस्य Sy. तथा वेः सुपर्णस्य परमात्मनो ब्रह्मणो यत्तदिति पदं लक्षणया प्रवृत्त वेद स इह वक्तु स एव गुरुः स्यादित्यर्थ At.

१२ सर्वैर्गन्तव्यं स्वरूपम् Sy. त्वमिति पदम् At.

१३. गूढ वर्तते Sy.
लक्षणया प्रवृत्तम् At.

१४. निवत्ते P.

१५. ०त P. ०वनु M.

१६. ०रस्य D.

१७ ०स्तव M. शिरोवदुन्नतस्य सर्वेषामुत्कृष्टस्य वा Sy. किञ्चायमाभाणकोऽपि गुरुणा भवित्रा ज्ञेय इत्याह...शिरसः सकाशात् At.

१८. क्षीरमुदकम् Sy.

१९. क्षरन्ति Sy.

२०. केचन वर्षकालीना रश्मयः Sy.

[1] [2] [3] [4] [5] [6] [7] [8]
अस्य स्वभूता ननु जघनार्धात्। आच्छादकं तेजोरूपम्। वसानास्ता गावः। उदकम्। पादेन।
[9] [10] [11]
पिबन्ति न त्वास्येनेति रश्म्यभिप्राय', रश्मयो हि विसृजन्त्याददते चोदकमिति।

माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे।
सा बीभत्सुर्गभरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥८॥

[12] [13] [14] [15]
माता पितरम्। काचिन्माता। स्वपितरम्। ऋतुकाले। भेजे। अभिमुखम्।

---

१. आदित्यस्य Sv. उक्तस्य पुरुषस्य At
२ स्व is omitted by P. M
३ ०नाद्धाद् M. ४. ०क' M.
५. रूपनामैतत् Sv. वरणीय, विचित्ररूपवत्। रूपसहित रोचनादिरागेण रञ्जितमरञ्जितरागद्वयवियुक्तं कमनीयमाञ्जिष्ठं वस्त्रम् At. ६ वा० M. आच्छादयन्तोऽतिविस्तरेण तेजसा तपन्तः केचनास्य गावो रश्मयः Sv परिदधाना गावः At. ७ स्वमृष्टम् Sy
८. सृष्टेनैव मार्गेण Sv. पादेन At.
९. भूमिं निरुदकां कुर्वन्तीत्यर्थ । तस्य स्वरूपं ब्रवीत्वित्यन्वय Sy अन्तर्भावितण्यर्थोऽयम्। पार्थं पाययन्ति बोधयन्ति। अयमाभाणकोऽपि भवित्रा गुरुणा ज्ञेय.। आभाणकविवृतिस्तु तस्य जीवस्य शिष्यभावं गतस्य गावो वेदा. क्षीर सारं ब्रह्मामृतरसं क्षीरेण उपनिषद्भागादूधंस्थानीयाद् दुह्रते दुहन्ति स्पष्टं प्रतिपादयन्ति। कथम्भूता.? वर्त्रि सत्वरजस्तमोभिश्चित्रपटसदृशं त्रिगुणात्मकप्रपञ्च ब्रह्मव्यतिरिक्तं वस्तु प्रतिपादयन्त्य इव दृश्यमाना.। परमार्थतस्तु सर्वत्र ब्रह्मपरत्वाद् ब्रह्मैव प्रतिपादयन्ति वेदाः। उदकम्, कं सुखमक दुःखं तस्मादुद्गतं सुखमयं दुःखरहितं शुद्धं ब्रह्म पर्वैकदेशेनोपनिषद्भागेन स्वांशेन महाव्याक्येन वापुः पाययन्ति बोधयन्ति। .. यद्यपि सर्वोऽपि वेदो ब्रह्मपरः। किंच, सगुणेशविषयाणां तत्पदार्थविवेचकत्वात्कर्मविषयाणां वेदाना त्वपदार्थविवेचकत्वाद् ब्रह्मात्मैक्यपरवेदापेक्षिपदद्वयार्थप्रतिपादकत्वेनोपनिषदेकवाक्यत्वमेव। तथापि सगुणेशविषयकर्मविषयवेदभागेषु न स्पष्टा ब्रह्मधीरुपनिषत्सु स्पष्टा भवतीत्यभिप्रायेणोदकं पदापुरित्युक्तं न किञ्चिदप्यनुपपन्नम At
१०. रश्म्यभिप्राय P M.
११. विवृजन्त्याददतो P
१२. सर्वस्य निर्मात्री पृथिवी Sy. मायासम्बद्ध आक्षेपाशङ्कायामृच्युत्तरम्। नन्वाचार्योपदेशे किं भवति? जीवब्रह्मभेदिकाया मायाया निवृत्तिः। ननु सा माया स्पृष्ट्वा भिनत्त्यस्पृष्ट्वा वा? द्वितीयेऽनवस्था, अतिप्रसङ्गो वा। स्पृष्ट्वा चेत् कं स्पृशति? जीव चेदितरेतराश्रयः। परस्पर्शोऽसम्भावितस्त प्रति चोद्यं कार्यम्। मुखप्रतिमुखभेदके च दर्पणेऽप्येवं वाच्यम्। अत्राप्यस्पर्शेऽतिप्रसङ्गः। प्रतिबिम्बस्पर्शेऽन्योन्याश्रय.। असम्भवो बिम्बस्पर्श'। अत्रोत्तरमिद, सन्निधिसत्तालक्षणेन सम्बन्धेन मुखं स्पृष्ट्वा प्रतिबिम्बाद्भिनत्ति दर्पणस्तर्हि प्रकृतेऽप्येवमित्यत्रोच्यते। माता सृष्टेर्जननी माया At.
१३. पालकं द्युलोक तत्स्थं द्युलोकस्थमादित्यमित्यर्थः Sy. ईशम् At. १४. ०तैः M. ऋत उदके यज्ञे वा निमित्तभूते सति Sy. ऋते विना At. १५. आभजते Sy. संस्पृशत्यपि, आ बभाज इवद्भूजति At.

कर्मणा[१]। तस्याग्रत[२]। श्रद्धानेन[३] मनसा[४]। सङ्गता[५] सीताऽऽसीत्। ततोऽनन्तरं[६] गृहीतरसा[७]। पितु-
सकाशान्मिथुनीभावेन[८] बीभत्समाना। पित्रा च मैथुनानन्तर परित्यक्ताभूत्[९] तत। अन्नवन्तो[१०] मनु-
ष्या[११] दरिद्रै.। उपवक्तव्यताम्[१२]। अगच्छन्निति, आदित्य. पृथिवीमभिवर्षति वर्षासु तत्रैतदुक्तमिति।

युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥९॥

युक्ता[१३] मातासीत्। काचिन्माता[१४]। दक्षिणस्याम्[१५]। धुरि[१६]। पुत्रेण[१७] युक्ता[१८]।

---

१. केन द्वारेण ?... धीत्या कर्मणा यागादि-रूपेण । स्वकीयेनाऽऽज्यसोमादिहविषा तर्पयतीत्यर्थ· Sy. सन्निधिसत्तालक्षण-मिथ्यासम्बन्धमनुभवन्त्यपि धीती At.

२ ०त P ततः पूर्वं पिता च Sy आदौ At

३. शूरद० P अस्यामभिप्रायवता Sv.

४ चेतसा Sy कार्येण At ५ संश्लिष्टो वर्तते खलु, वृष्टिमकरोदित्यर्थ· Sy. सङ्गता बभूव At ६. ०सीता ततो० P.D ०सीता स्तुतो० M. हि तत At

७. सा माता . गर्भरसेन गर्भोत्पत्तिनिमि-त्तेन रसेन Sv सा च माया . गर्भरसा रस· परमात्मा 'रसो वै स रस ह्येवाय लब्ध्वाऽऽनन्दी भवति' (T U 1 6 1.) इति श्रुते· । गर्भो गर्भीकृतः प्रच्छादितो रसो यया सा गर्भरसा At

८. गर्भबन्धनेच्छावती Sy. प्रपञ्चजननद्वारा बन्धनहेतु.। जुगुप्सितससारहेतुरित्येके। अभयस्यात्मनो भयजननीत्यन्ये At.

९ नितरां विद्धाऽऽसीत् । यद्वा । गर्भे रस ओषध्याद्युत्पादनसमर्थमुदकं यस्या सा तादृश्युदकेनात्यन्तं क्लिन्ना निविद्धा कृषी-वलैर्हलमुखेन नितरां विदारिता भवति बीजवापार्थम् । अत्रायं समाधिः । या काचन योषिदपत्यार्थं स्वपतिं युवानं याति स च तस्यामनुरागयुक्तः सङ्गतो भवति सा चान्तर्वत्नी सती पुत्राञ्जनय-तीति तद्वदत्रापि Sy. नियतं विद्धं ताडनं तत्त्वज्ञानकृत यस्याः सा निविद्धा । तत्त्व-ज्ञाननाश्येत्यर्थ At.

१०. भाविव्रीहिप्रियङ्ग्वाद्यन्नवन्त एव Sy. अनया च नमस्वन्तो नमनवन्तः सङ्कोच-वन्त. At. ११. परिच्छिन्नमात्मानं मन्यमाना जीवा अज्ञानप्रवृत्ता एव At.

१२ ०व्या० D. उपेत्य वचन परस्पर सम्य-गभिवृद्धानि सस्यानीति वचनम् Sy. उपवाकमप्रधानवाक्य महावाक्यादित-रत्कर्मविबोधक वाक्यम् At.

१३. ०नि० P. प्राप्नुवन्ति । यद्वा हविर्लक्षणान्न-वन्त उपेत्य वचनं प्रैषादिरूपमीयुः। वृष्टौ सत्या सस्यादिद्वारा यागमनुतिष्ठेयुरि-त्यर्थ· Sy. प्राप्नुवन्ति । तत्राधिकृतास्ते भवन्तीत्यर्थ. At

१४. VM ignores हि । सा । इत्

१५. निर्मीयन्तेऽस्मिन्भूतानीति माता द्यौः Sv. माया निवर्तते । केन ? विद्यया । स प्रमा न वा ? न चेद्वृथार्था प्रमा । सत्या चेद् द्वैतम् । असती वृथा... तदत्रोच्यते... माता जगज्जननी मायाऽपि At.

१६. अभिमतपूरणसमर्थायाः पृथिव्याः Sv. प्रौढायाः संविद्रूपाया मुक्तेर्बलवत्या वो-त्साहवत्या वा At. १७. निर्वहणे Sy. धूःस्थानीयान्तःकरणशोधके सत्त्वे At.

१८. योगनिरूपिणी चेत् At.

आसीदथैतेन तस्यां मातरि। निधास्यमानो गर्भं। शोषिकासु कासुचिद् दीप्तिषु। वर्तत इति दक्षिणायने वृष्ट्युन्मुखमादित्य दृष्ट्वा वदति। शब्दं करोति। कश्चन वत्स। अनुपश्यति च। गां मातरम्। त्रिषु। योजनेषु स्थिताम्। नानारूपाम्, 'अन्तरिक्षेण व्यवहिता भूमिरादित्यस्य त्रिषु योजनेषु भवति योजनशब्दो योगपर्याय, यद्वाऽस्या विश्व भूतमधि प्रजायते तेनेय चित्रा' इति ब्राह्मणमिति।

तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥१०॥

तिस्रो मातृः। दिवमन्तरिक्ष भूमि च तिस्र। मातृ। तेषा पुत्रभूत कश्चित्।

---

१. वर्षणाय समर्थोऽभूदित्यर्थ. Sy. भवति तिष्ठति। सत्त्वगुणस्था माया विद्यामुक्तिहेतुः At.
२ ०य ते० M. ३. ०धान्य० P.
४. गर्भस्थानीय उदकसङ्घ Sy. विद्योत्पत्तौ किं भवति? तत्राह। ..अन्त', आन्तरो जागरस्थविश्वादान्तरः स्वप्नस्थतैजसस्तस्मादान्तरः सुषुप्तौ प्राज्ञस्ततोप्यान्तरस्तुरीयो नास्मादन्य आन्तरोऽस्तीत्यन्तर्गर्भशब्दाभ्यामुक्तः सर्वा(र्वं)सर्वान्तरः। आन्तरेभ्यो विश्वतैजसप्राज्ञेभ्य आन्तरस्तुरीयः At. ५. काचिद् P.
६ उदकवत्सु मेघपङ्क्तिष्वन्तर्मध्ये Sy. बलवतीषु तिसृष्ववस्थासु At
७ तिष्ठति Sy. गतिनिवृत्तो भवति At
८. वृष्टुमु० P.
९. वर्षणसमये शब्दयति Sy अन्वमीमेत् .. अनुगच्छेवनुसरेदभ्यसेत् At.
१०. पुत्रस्थानीय उदकसङ्घ· Sy. पुत्रभावमापन्नः शिष्यः At.
११. अनुक्रमेण पश्यति वर्षतीत्यर्थः। यद्वा त्रिषु योजनेषु सत्सु वत्सो मेघो वर्षणाय गां भूमिं प्रत्यमीमेत्। अनन्तरं सर्वो जनोऽनुक्रमेण विश्वरूप्यं सस्यादिभिर्नानारूपवतीं भूमिमपश्यत्पश्यति Sy. अनन्तरम् ..स पश्यतीति सूचितम्। युक्ता मातेति सम्बन्धः At.
१२. मातरि P गा महावाक्यरूपिणीं वाचम् At.
१३ मेघरश्मिवायुषु सयुक्तेषु सत्सु Sy. योगेषु श्रवणमननिदिध्यासनात्मकेषु सत्सु At.
१४. विश्वरूपवतीम् Sy विश्वं रूपमस्येति विश्वरूप्य सगुणं ब्रह्म तवस्मिन्नस्तीति .. प्रशस्तो विश्वरूपस्तद्वन्तं वा। विश्वानि तानि रूपाणि तद्वन्तं वा At.
१५. प्रभू० M.
१६. The passage beginning with अधि प्रजायते and ending with ब्राह्मणमिति is omitted by P.
१७. V.M. ignores अन्तः
१८. सस्यवृष्टधाद्युत्पावयित्रीः। क्षित्यादिलोकत्रयमित्यर्थः Sy. अथ तुर्यः प्रपञ्च्यते, लक्ष्मीगौरीसरस्वतीः At. तासां is suggested for तेषां
१९. एकः प्रधानभूतोऽसहायो वा पुत्रस्थानीय आदित्यः संवत्सराख्यः कालो वा Sy. मुख्यत्वेन परमात्मैव At.

त्रींश्च। पितृन्[१] सूर्यं वायुमग्निं च। धारयन्[२]। ऊर्ध्वम्[३]। तिष्ठति[४]। नच[५]। तम्[६]। अवग्लपयन्ति[७] तेन म्रियमाणा[८]। स चायमादित्यो[९] यस्यामुष्य[१०]। पृष्ठे[११]। विश्वस्य[१२] वेदयित्रीम्। सर्वेश्चाज्ञायमान[१३]-परिमाणाम्। वाचं[१४] स्वित[१५]? कथयन्ति[१६] 'सर्वा वागादित्ये वर्तते' इत्यृषय[१७] कथयन्ति[१८]।

द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य[१९]।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥११॥

द्वादशारम्[१९]। द्वादशमासारम्[२०]। तच्चक्रम्[२१]। नहि[२२] कदाचित्।

---

१. जगतां पालयितॄंल्लोकत्रयाभिमानिनोऽग्निवायुसूर्यास्त्रियान् Sy. विष्णुहरब्रह्मण. पुत्रत्वेन At. २. ध० D. बिभ्रत् सन् Sy. पुत्रत्वेन धारयन्नियमयन् At.

३. उन्नतोऽत्यन्तदीर्घः... सूर्यपक्षे सर्वेभ्य उन्नतः Sy. अवस्थात्रयात्परतस्स्थितस्तुरीयः At.

४. तिष्ठति भूतभविष्यद्वाद्यात्मना Sy.

५. एनम् Sy. मुक्तो... एनं तुरीय मुक्तम् At. ६. अवकृष्य At.

७. The passage beginning with तिस्रो मातृः and ending with अवग्लपयन्ति is omitted by P. नच तम्। अवग्लपयन्ति is omitted by D. ग्लानि नैव कुर्वन्ति। नहि कालं आदित्यो वाऽन्येन पराभूयते Sy अज्ञानेन न पीडयन्ति At.

८. न P. ९. ०त्यस्त० D M.

१०. आदित्यस्य सम्बन्धिनीं मन्त्रयन्त इत्यर्थः Sy. दिवो दीव्यमानस्यामुष्य परमात्मनः At.

११. दिवः पृष्ठे द्युलोकस्योपर्यन्तरिक्षे Sy. उपरिभागे तुरीये स्थितम् At.

१२. विश्ववेदनसमर्थां विश्ववेदनीयां वा Sy. विश्वं जाग्रतं पुरुषं वेत्तीति (ताम्) At.

१३. सर्वेज्ञाज्ञा० P. ०ज्ञायप० M. अखर्वव्यापिनीम् Sy. विश्वमिम् विश्वस्नेहस्तद्रहिताम्... 'ञिमिदा स्नेहने' व्यत्ययेन मिच्छब्दस्य मिन्वा ताम्।... मिन्वञ्छब्दः प्रधानवाचीत्यन्ये। अर्थतस्त्वेक एव तिष्ठति तात्पर्यतो विश्वमेत्यपनयतीति ताम्। तुरीयरूपेणावस्थापयन्तीमित्यर्थः। तुरीये सस्कारकल्पनाकल्पनाभ्या तुरीयतुरीयातीतयोर्योगिवेदान्तिविप्रतिपत्तिरिति सज्ज्ञाभेदमात्रे विवादः At. १४. गर्जितलक्षणाम् Sy. महावाक्यरूपिणी वाचम् At.

१५ स्थित P. स्थिताम् is suggested for स्वित

१६. गुप्तं परस्परं भाषन्ते देवाः Sy. तिस्रो मातरस्त्रयश्च पितरस्तुरीयमेकमुपदिशन्तीत्याह। मन्त्रयन्ते गुप्तं भाषन्ते। एकान्त उपदिशन्ति At.

१७ सर्वं P. १८. VM. ignores दिवः

१९. द्वादशसङ्ख्याकमेषादिराश्यात्मकैर्मासात्मकैर्वाऽरं रथाङ्गावयवैर्युक्तम् Sy. 'त्रिनाभि चक्रम्' (RV. I. 164.2.) इत्यत्रोक्त त्रिषु कालेषु मध्यमकालमाह। द्वादशारं द्वादश मासा अरा यस्य At. अराः प्रत्यृता नाभौ N. 4.27.

२०. शास्त्रान्तरप्रसिद्धम् At.

२१. पुनः पुनः क्रमणशीलं मण्डलाख्यं रथचक्रं वा Sy. कालचक्रम् At.

२२. नैव खलु Sy.

जरणाय[1] भवति[2]। तदिद चक्रम्। आदित्यस्य[3] स्वभूतम्। दिवम्[4]। परितः[5]। पुनः[6] पुनर्वर्तते। तस्मिंश्च[7] चक्रे[8]। पुत्रस्थानीयाः। अहोरात्रात्मकत्वाद्[9] मिथुनभूता[10]। सप्त। शतानि। विंशतिः[11]। चाहोरात्राणाम्[12]। तिष्ठन्ति[13] तमिममर्थमग्ने[14]निवेदयति[15] सिद्धार्थान्विाख्यानेषु काञ्चन देवतामपि निवेशयन्तीति[16] वक्ष्याम[17]।

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥१२॥

पञ्चपादम्[18]। पञ्चर्तुपादम्। पितरम्[19]।

---

१. जरायै Sv. जरणाय योग्यं रक्षयितुं शक्यम् At.

२. भव P P. adds त्रीश्च पितॄन् सूर्यं वायुमग्निं च धारयन्नूर्ध्वस्तिष्ठति नच तमवग्लपयन्ति after भवति।

३. ऋतस्योदकस्य सत्यात्मकस्य वाऽदित्यस्य Sv. सत्यस्य परमात्मनः सम्बन्धिनीम् At.

४. द्युलोकस्यान्तरिक्षस्य (द्युलोकमन्तरिक्षम्) परितः Sv. द्योतमानां ब्रह्मविद्याम् At.

५ ऋते विना वर्जयित्वा At.

६. सञ्चरति Sv. वर्तते। ब्रह्मविद्याया अभाव एव कालचक्रप्रभाव इत्यर्थः At.

७. The passage beginning with तदिदम् and ending with चक्रे is omitted by M अत्रास्मिन्स्ववदीये चक्रे Sv. अत्र कालचक्रे At अस्मिंश्च is suggested for तस्मिंश्च

८. तेस्था० P. पुत्रवदुत्पद्यमानाः प्राणिनो दुःखात्त्रातारो वा Sv. आ समन्तात् पुत्रा अवयवा अंशाः At.

९. ०त्वा P

१०. मिथु. P. मिथः M. ०ता D. स्त्रीपुंसरूपेण परस्परं मिथुनभूताः Sv. अन्योन्यनङ्घटितरूपा मिथुनीभूता इव At.

११ ०ति P M. विंशत्युत्तरसप्तशतसङ्ख्याकाः। ... षष्ट्यधिकशतत्रयसङ्ख्याकान्यहानि, तावत्य एव रात्रय इत्येव तद्विभागः। 'सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स एषोऽहःसम्मानः' (ĀĀ 3.2 1) इत्यारण्यकम् Sv.

१२. अहोरात्ररूपाः Sv. रात्रिदिवसरूपा At.

१३. निष्पद्यन्ते Sv. आतिष्ठन्ति At.

१४. तमित्थमग्ने० P D.

१५. सर्वदा गमनयुक्तादित्य! यद्वा। अग्नेरेव स्थानत्रये तत्तदात्मना वर्तमानत्वादसावप्यग्निरित्युच्यते Sv. अग्रणीः At.

१६. ०वेदय० M.

१७ VM ignores आ। अग्ने

१८ पञ्चसङ्ख्याकर्त्वात्मकपादोपेतम्। एतद्धेमन्तशिशिरयोरेकत्वाभिप्रायम् Sv. अनेन प्रथमः काल उच्यते। तस्य कालस्य मूलप्रकृतिरेव देहः। तस्याः पञ्चावयवाः ... पञ्च पादा अंशा यस्य त पञ्चपादम् At. पञ्चर्तवः पादा यस्य स पञ्चपादस्तम् SKN. ऋतवो हि संवत्सरस्य पादास्तैरसौ पतति गच्छति Dur.

१९. पितरम् M. सर्वस्य प्रीणयितारम् Sv. जगतां पितरम् At. पातारं वा सर्वस्य SKN. पालकं सर्वभूतानामुत्पादयितारं वा Dur.

द्वादशमासाकृतिम्। [२] दिवः। [३] आहुः। [४] परस्मिन्। [५] अर्धे स्थितम्। [६] उदकवन्तम्। [७] अथ। [८] इमे। [९] अन्ये। दिव [१०] उपरे [११] मूले स्थितम्। [१२] विद्रष्टारम्। [१३] सप्तर्तुचक्रे। [१४] षडृत्वरे।

---

१. P. adds इति तदिदं चक्रमादित्यस्य स्वभूतां दिवं परितः पुनः पुनर्वर्तते तस्मिंश्चक्रे पुत्ररं after द्वादशमासाकृतिम्। द्वादश मासा एवाकृतयो यस्य तादृशम् Sy. द्वादशाकारम्। सृष्टिस्थितिसंयमार्थानि चत्वारि चत्वारि रूपाणि सन्त्यस्य। विष्णुपुराणाद्युक्तानि प्रकृतिविधात्रादीनि ब्रह्मप्राणिकर्तृकानि At द्वादश मासा आकृतिराकारो यस्य स द्वादशाकृतिस्तम् SKN. द्वादशमासप्रविभक्तविग्रहम्। 'द्वादश मासा. संवत्सरस्य' (Cf. AB. 1.28.) इति च ब्राह्मणम् Dur. २. द्युलोकस्य Sy., SKN. दिवस्तत्त्वज्ञाः At.

३ अर्पितमाहुः। एतदुत्तरत्र स्थितमत्राप्यनुषज्यते। यद्यत्रार्पितं तत्तदधीनमतः सवत्सरं सूर्यायत्तमाहुरित्यर्थः Sy. अर्पितमित्येतदनुषङ्गः स्याद्येनादित्यमाहुरर्पितं केचित् SKN. ४. तात्स्थ्यात्ताच्छब्द्यम्। परस्मिन् Sy. कतिपय इतरे तत्त्वविदस्तु At. अपरे SKN.

५. अर्धेऽन्तरिक्षलक्षणेऽवस्थित आदित्य इत्यर्थस्तस्मिन् Sy. तात्स्थ्यादत्र ताच्छब्द्यम्। 'मञ्चाः क्रोशन्ति' इति यथा। परस्मिन्नर्धे यः स्थित आदित्यस्तत्रेत्यर्थः SKN.

६. वृष्टयुदकेन तद्वन्त प्रीणयितारं वा। पुरीषमित्युदकनाम। उक्तलक्षणं संवत्सरचक्रम् Sy. उदकवन्तमध्यशायिनं नारायणं पञ्चपादाविगुणमाहुः। 'दिव आहुः परे अर्धे पुरीषिणम्' (RV. I. 164. 12b.) इत्यस्यात्पार्थं वदन्ति केचित्, पुरीषशब्देनाविद्यावान्नरापि उच्यते, तद्वन्तं सूत्रात्मकं नारायणं दिवः स्वर्गलोकस्य पर उत्कृष्टेऽर्धे भागे वैकुण्ठाख्ये लोके At. वृष्टयुदकेन तद्वन्तं संवत्सरमाहुः SKN. ७. अपिच Sy. अनन्तरम् At ८. इमे प्रसिद्धाः At.

९. अन्ये केचन वेदवादिन एवमाहुः Sy. एक आचार्याः At. १०. उपरि M.

११. उपरमन्तेऽस्मिन्नुपरताः प्राणिनोऽत्रेति वा, उपरः संवत्सरस्तस्मिन् Sy. अद्रीत्यादिषु। निघण्टवादौ त्रिंशन्मेघनामसु मध्य एकोनविंशतिनामानि पर्वतस्याप्यभिहितानि भवन्तीति सम्प्रदायज्ञा आहुः। अपरे कैलासादिके सन्तम At. उपरि स्थितमिति शेषः SKN उपर्यवस्थिताः Dur.

१२. The passage beginning with दिवः and ending with विद्रष्टारम् is omitted by P. विविधदर्शनकरमादित्यम् Sy., SKN. विचक्षणं विश्वरूपाक्ष रुद्र तमाहुः At. विविधानां सर्वभूतकर्मणां द्रष्टारम् Dur.

१३ सप्तादित्यरश्मयस्तद्द्वारेण चक्रस्थानीया यस्य स तथोक्त। यद्वा। अयनर्तुमासपक्षाहोरात्रिमुहूर्तानि सप्त सप्त चक्राणि पुनः पुनः क्रममाणानि यस्य तादृशे Sy. सप्तदशे महदादिसप्तपरिधौ At. चक्रनाञ्चरणात्क्रमणाच्चक्रा रश्मयस्ते सप्त, आदित्यद्वारेण सम्बन्धिनो यस्य स सप्तचक्रस्तस्मिन् SKN. अथवा सप्तचक्र आदित्यः। स हि सप्तभी रश्मिभिश्चकते दीप्यते Dur.

१४. षवृत्वरे P. षड्ऋत्वरे M. षड् ऋतव एवारा नाभौ प्रत्यृताः सम्बद्धा यस्य तथोक्तलक्षणे संवत्सरे रथे Sy. षड्तुपरिधौ वर्तमानेन मध्यमेन चराचरादौ ब्रह्माण्डे At. षड्भिररभूतैर्युक्ते तस्मिन्संवत्सरचक्रे SKN.

[१]अर्पितम्। [२]आहु., सोऽयं देवताभूतः पृथिव्याः पर्यन्ते दृश्यते ततो दिवीत्युभयथा वादः।

पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥१३॥

[३]पञ्चारे। हेमन्तशिशिरयोः समासेन [४]पञ्चारे। [५]संवत्सरचक्रे। [६]परिवर्तमाने। [७]तस्मिन्। [८]आतिष्ठन्ति। [९]सर्वाणि। [१०]भुवनानि। तस्य [११]चक्रस्य।

---

१. अर्पिम् P. अधिकृतम् At. यद्यदर्पितं तदधीनं तद्भवति, अतोऽत्रार्पितत्वेनाधीनत्वं लक्ष्यते, अधीनमाहुः SKN. एवमेके संवत्सरमादित्यप्रविष्टमाहुः Dur

२. आहुः। एतदुक्तं भवति। अमुमादित्यं दक्षिणोत्तररूपभिन्नगतेस्तीव्रमन्दादिभावस्य च कालाधीनत्वात्तदधीनमाहुः। अन्ये तु सवत्सरात्मकस्य कालस्य सूर्यगमनागमनसाध्यत्वात्तदायत्तत्वमाहुरिति Sy. ब्रह्माणं तमाहुः At केचित्सवत्सरमादित्यस्यायत्तमाहुः। अन्य आदित्यं संवत्सरस्य। कथम्पुनः संवत्सर आदित्यायत्तः, आदित्यो वा सवत्सरस्य? उच्यते। संवत्सरस्तावदहोरात्रनिर्वर्त्यः। तेन स तस्यायत्तः। आदित्यस्यापि सवत्सरावयवभूतैर्ऋतुभिस्तावदस्य तीव्रत्वमन्दत्वे क्रियेते। गतेश्च कालवैषम्यं, दक्षिणोत्तरादिदिग्गमनभेदश्च। अतः सोऽपि संवत्सरायत्तः SKN. एवमेतस्यामूच्यादित्यसंवत्सरौ स्तूयेते Dur. This stanza is explained in N. 4. 27; SKN. II. 283.

३. पञ्चर्तूरूपैरर्पयुक्ते Sy. एवविधकालाख्येऽधीशानं लिङ्गदेहमाश्रितः सर्वसंसार इत्युच्यते।...कर्मेन्द्रियाणि, ज्ञानेन्द्रियाणि, तन्मात्राश्च, प्राणाश्चान्तःकरणानि चेति राशयः। एवं पञ्चावयवा अस्य (तस्मिन्) At. इत्यत्र तावत्पञ्चर्तुतया। ...ऋतव. पञ्च हेमन्तशिशिरौ (रयोः) तुल्यप्रभावत्वात्समासेनैकः। इतरे चत्वारस्तेऽरभूता यस्य तत्(सः) पञ्चारस्तस्मिन् SKN. पञ्चर्तुतया संवत्सरस्य स्तुतिः। ऋतवोऽत्रारत्वेनाभिप्रेताः Dur. इति पञ्चर्तुतया। 'पञ्चर्तवः संवत्सरस्य'(AB.1.1.14.)इति च ब्राह्मणम्। हेमन्तशिशिरयोः समासेन N.4.27.

४. सप्तव P. चक्रे संवत्सरात्मके Sy. तत्करोति चक्रम्। कृष्णः केचित्। लिङ्गशरीरमेकमेव कर्तृ न त्वात्मा। अविवेकादात्मनि कर्तृत्व प्रतीतम्। यद्वा चरतीति चक्रम्। रूपसिद्धिरुक्तेया। लिङ्गधारक(त्व) मेव लोकान्तरसञ्चारित्वमात्मन इत्युक्त भवति। तस्मिन्...चक्रे At. चक्रे संवत्सराख्ये SKN. ५. सवत्सरपरिवत्सरादिरूपेण पुनः पुनरावर्तमाने सति Sy. लोकान्तरं वाञ्छति सति At. परिगृह्येदं सर्वं जगद् वर्तमाने Dur.

६. कालचक्रे Sy. परोक्षे At. प्रकृतप्रतिनिर्देशोऽयम्। पूर्वस्यामृचि...यत्प्रकृतं तस्मिन् SKN. ७. वर्तन्त इत्यर्थः Sy. आधारीकृत्य तिष्ठन्ति At. आस्थितान्यारूढानीत्यर्थः. SKN. अधिरूढं बम्भ्रमीति Dur. ८. D. repeats सर्वाणि सर्वाणि। सर्वमेवेदम् Dur.

९ भूतजातानि Sy., SKN. स्थूलशरीराणि तस्य च भावविकारा इति At. जगत् Dur. १०. तस्य चक्रस्य मध्ये वर्तमानः Sy. तस्य चक्राख्यस्य लिङ्गस्य At. अथैवमतिमहताऽपि सर्वभूतचक्रेणाक्रान्तस्य कालचक्रस्य Dur.

अक्षभूत आदित्य.[1] । न कदाचित्[2] । तप्यते न नमति[3] । भारमहत्त्वेऽपि[4] । न च[5] । शीर्यते[6] । चिरात्[7] । एवारभ्य[8] । नाभिसहितो लौकिकं चक्रं नाभिपरिवर्तने शीर्णं भवति[9] ।

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥१४॥

सनेमि चक्रम्[10] । मूहूर्ता नेमयस्तद्युक्तम्[11] । जरावर्जितम्[12] । कालचक्रम्[13] । विवर्तते[14] । युक्ता.[15] ।

---

१. अक्ष P. P. adds व आहुः परस्मिन्नर्धे स्थितमुडुकवन्तमर्थमेमे अन्ये दिव उपरे मूलं स्थितं विन्रष्टाभ्यः after अक्षभूतः । अक्षो भ्रामक आधारः प्रथमकालः । शुद्ध आत्मा प्रधानञ्चेत्येके At. अक्षभूत आदित्यः SKN. अयमक्षः संवत्सराख्य. Dur.

२. न पीड्यते Sy. न भ्राम्यति न कदाचिदपि नश्यति At. नैव . . . तप्यते । न सन्तापयति । नापयास्यतीत्यर्थः Dur.

३. नुमति M. ४. सकलभुवनवहनेन प्रभूतभारोऽपि Sy. भूरीणां भर्ता । आधारनाशे सर्वशून्यता स्यादित्यर्थः At. बहुभारेण सर्वभूतैर्बहुभारोऽपि SKN. एवमपि बहुभारः सन् Dur.

५. न भिद्यते Sy. न नश्यति । परमार्थतो न देहत्रयधर्मेण युज्यते, जीवात्मनाशे कृतनाशाभ्यागमप्रसङ्गः At न वा तप्तोऽपि सन् सहसैव नश्यति Dur.

६. सनातन एव Sy. सर्वदैव At पुराण एव SKN. चिरन्तन एव सः Dur.

७. The passage beginning with आदित्यः and ending with एवारभ्य is omitted by P.

८. समाननाभिकः सर्वदैकरूपनाभिरसौ Sy. चक्रस्य लिङ्गस्य नाभावेव वर्तमानोऽपि जीवात्मा At. सह नाभ्या, नाभिस्त्रय ऋतवो ग्रीष्मो वर्षा हेमन्त इत्येते । आदित्यमण्डलं वा SKN. अक्षः Dur.

९. यथा लौकिकरथाक्षो भारेण भग्नो भवति । अक्षघातेन च नाभिर्विद्धता भवति तद्वदत्रापि नास्तीत्यर्थः Sy.
This stanza occurs in N. 4. 27; SKN. II. 282.

१०. नेयमस्त० P. ०स्तद्युं M. समाननेमि । एकप्रकारबहिर्वलयमक्षीणनेमि Sy. अनेनान्यदपि जगच्चक्रमस्तीति प्रासङ्गिकं वदन्वेदः सर्वमुक्तिपक्षं निराचष्टे । . . . नेमिशब्दोऽर्धवाची । इह जगति प्रकृतिः पुरुषश्चार्द्धे विद्येते । तदंशत्वेन जडाजडप्रपञ्चौ नेमिनौ ताभ्यां सहितं कृत्स्न जगत्सनेमि । नेमिभिर्नेतृभिः । परिच्छिन्नैः सङ्कुचद्भिर्जीवैः सह वर्तमानं जगदित्यर्थः । अन्ये त्वाहू रथनेमिरिव जडप्रपञ्चस्योपरि स्थितश्चेतनप्रपञ्चो नेमिस्तेन युक्तं जगच्चक्रम् At.

११. सदातनमपि जरारहितम् Sy. अजरमनश्वरम् । आत्मज्ञानासम्भाव इति शेषः । अनेन जगच्चक्रस्य प्रवाहनित्यतोक्ता At.

१२. ०ल च० M. चक्रं संवत्सराख्यम् Sy. जगच्चक्रम् । 'भ्रमतीति वा चरतीति वा चक्रम्' इति शाकपूणिः । पुनः पुनरुत्पत्त्याविधर्मैर्युज्यमानमित्यर्थः At.

१३. पुनः पुनर्विशेषेण वर्तते Sy. विवर्तते विवर्तोऽयं प्रपञ्चो न परिणाम इत्यर्थः At.

१४. स्वस्वव्यापारयुक्ताः Sy. योगाः At.

दश[१] दिशस्तच्चक्रम्[२]। अस्यां भूम्याम्[३]। वहन्ति[४]। सूर्यस्य[५]। दर्शनसाधनं[६] तच्चक्रम्[७]। उदकेन[८]। परिवृतम्[९]। एति[१०]। तस्मिन्[११]। सर्वाण्येव[१२]। भुवनानि[१३]। अर्पितानि[१४], सूर्यस्तस्मिंश्चक्रेऽर्पितैरहोरात्रैः सर्वाणि भूतानि[१५] पश्यति[१६]।

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥१५॥

साकञ्जानाम्[१७]। सह जातानां मिथुनभूतानाम्[१८]। सप्तममृतुम्[१९]। एकजम्[२०]। आहु[२१]। षट्।

---

१. दशेन्द्रियाणि पञ्च लोकपाला निषाद-पञ्चमाश्चत्वारो ब्राह्मणादयो वर्णा मिलित्वा दशसङ्ख्याकाः Sy.
आत्मानुसन्धानसिद्ध्यर्थं दशसङ्ख्याकाः At. २. यु...व० M.

३. ऊर्ध्वतनायामीषायामुपरि विस्तृतभूम्यां वा Sy.
विवर्तनिवृत्तिहेतुं कथयति। ... ऊर्ध्वं ब्रह्मविद्यायाम्। उदूर्ध्वमात्मान तनोतीत्युत्ताना ब्रह्मविद्या। निमित्तसप्तम्येषा। अविद्यानिवर्तकब्रह्मविद्योत्पत्त्यर्थमित्यर्थः At.

४. निर्वहन्ति। कृत्स्नं जगन्निर्वहन्तीत्यर्थः। तन्निर्वाहार्थत्वात्कालस्य Sy. अनुवर्तन्ते। निर्वहणीयाऽनुवर्तनीयेत्यर्थः At.

५. आदित्यस्य Sy. तदा च सूर्यस्य परमात्मनः At.

६. चक्षुः स्थानस्वभावं सर्वस्य चक्षुःस्थानीयं वा मण्डलम् Sy. ज्ञापकं ज्ञानम् At.
चक्षुः ख्यातेर्वा चष्टेर्वा N.4.3.

७. वृष्ट्युदकेन Sy.
तत्पूर्वं संशयविपर्यासाऽसम्भावनामलेन At. उदकं रज उच्यते N.4.19.

८. व्याप्तम् Sy. आवृतमाच्छादितमनुद्भूतमासीत् At.

९. गच्छति Sy. आगच्छति At.

१०. तादृशे मण्डले Sy.
तस्मिंश्चक्षुषि ज्ञापके ज्ञाने At.

११. भूतजातानि Sy. जगन्ति At.

१२. अर्पितानि, तदधीनत्वात्तेषाम् Sy. विलीनानि भवन्ति At.

१३. ०स्तद्यस्मिन् च० M. ०क्रेष्वितर० P.

१४. भुवनानि P.

१५. ०ता P. एकस्मादादित्यात्सहोत्पन्नानां सप्तानामृतूनां मध्ये Sy. 'पञ्चारे (RV I.164 13.) इत्यत्र लिङ्गं वक्तुं प्रसक्तं, 'सनेमि' (RV.I.164 14.) इत्यत्रानुप्रसक्तं स्थूलशरीरं विविच्योच्यत इति लिङ्गमाहुः। ... देहेन्द्रियादिभिः सार्धं जायमानमिवानं ब्रह्म यस्मिन् (तत्)। नेदं षष्ठीबहुवचान्त पदम् At.

१६. 'पथ गतौ' पलोपश्छान्दसः। सप्तापि लोकान्पथति गच्छतीति सप्तथम् At.

१७. एककम् M. एकेनोत्पन्नम्। ... चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसन्ताद्याः षडृतवो भवन्ति। अधिकमासेनैक उत्पद्यते सप्तमर्तुः। नच तादृशो मास एव नास्तीति मन्तव्यम् 'अस्ति त्रयोदशो मास इत्याहुः' (TS. 6.5.3.4.) इति श्रुतेः Sy.
कारणशरीरात्परं लिङ्गं तु तेनैव जायत इत्येकजम्। द्वाभ्यां जायत इति द्विजं स्थूलशरीरम् At.

१८. आहुः कालतत्त्वविदः Sy.

एव[1]। द्वाभ्यां मासाभ्यां संयुक्ता[2]। सर्वस्य द्रष्टार[3]। सवत्सराद् देवाज्जाता[4]:[5]। इति[6]। तेषामृतूनां सम्बन्धीनि[7]। सर्वेषामिष्टान्यृतुलिङ्गानि[8]। स्वे स्वे काले निहितानीमानि[9]। स्थाने[10]। संवत्सराय[11] पुन पुनरावर्तन्ते[12]। रूपश[13]। विकृतानि नानारूपाण्यृतुलिङ्गानि[14] सवत्सरे पुन: पुनरावर्तन्त इति[15][16]।

स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥१६॥

स्त्रिय: सती:[17]। स्त्रीपुविभाग शरीरकृतो नात्मभूते सूर्ये स विशेषो भवतीति पश्यन् वदत्य[18]-

---

१ इच्छब्द एवकारार्थः Sy.

२. ऋतवो मासद्वयरूपाः Sy.
अथ लिङ्गदेहावयवानाह ... ज्ञानकर्मेन्द्रियरूपेण युगलरूपाश्शब्दाद्या इन्द्रियार्थाश्च At.

३. गन्तार: Sy. ऋषय: प्राणा:। 'प्राणा वाव ऋषय:' (Cf. ŚB.6.1.1.1) इति श्रुते: At.

४. देवादावित्यात् Sy.

५. ०रा देवा ज्ञा० P.D. सप्तमाधारस्य त्रयोदशस्य मासस्य देवाभाव:। 'नि:सूर्योऽधिकमासो मण्डलं तपते रवे.।' इत्यादिस्मृते:। तस्मात् षडेव देवजा अदेवज एक: Sy. आकाशजं श्रोत्रजात वाक्च, वायुजौ त्वक्पाणी, तेजोजं चक्षु:पादम्, अब्जं रसनोपस्थं, भूजौ घ्राणपायू, उभयेन्द्रियात्मकमनेकभूतज मन एवमेकादशेन्द्रियाणि भवन्त्युक्तानि At.

६. एवमाहु: Sy.

७. ऋतूनां स्वरूपाणि Sy.
यमादीनां लिङ्गावयवानाम् At.

८. ऋष्टा० P. सर्वलोकाभिमतानि Sy.
एषणस्थानानि विषयरूपाणि गन्धादीनि At.

९ इमानि is omitted by P. D.
पृथक् पृथक् स्थापितानि Sy.
विधिप्रतिपादितानि चेत् At.

१०. तत्तत्स्थाने Sy. धामनि धामनि स्वर्गादिके स्थाने स्थाने, वैदिके ज्ञाने ज्ञाने वा At.

११. जगद्व्यवहाराय पुन: पुनरावर्तन्त इत्यर्थ: Sy.

१२. चलन्ति Sy. उपयुज्यन्ते स्थातारमात्मानं बद्धुम् At.

१३. रूपभेदेन। ... स च रूपभेदस्तैत्तिरीयैराम्नात:। 'स रसमेह वसन्ताय प्रायच्छद्यवं ग्रीष्माय' (TS. 7.2.10.1.) इत्यादि Sy. रूप रूपमनेकदेहग्रहणमित्यर्थ: At.

१४ विविधाकृतियुक्तानि Sy. तानि चेद्विकृतानि काम्यानि वा निषिद्धानि वा At.

१५. स्थात्रेऽधिष्ठात्रे तदर्थाय Sy. स्थायिने, स्थिरं स्थातारमात्मानं मोचयितुम् At.

१६. VM. ignores स्थात्रे

१७. इति is omitted by P.

१८. पश्य P.

१९. ०न्त्य० P. पूर्वजन्मनि सिद्धानां स्त्रीणामन्धादीनां चाक्षाधिकार उच्यते At.

नात्मविदाम्— स्त्रियः। सती। इमाः। मम। तत्त्वविदः पुंसः।
आहुस्तमिममर्थम्। चक्षुष्मानेव। जानाति प्राज्ञ। न पुनः। अन्ध। विजानाति।

१. संस्त्यानवत्यो योषितः Sy. स्त्रियोऽपि At. स्त्रीत्वपुंस्त्वयोरेकत्रासम्भवात्स्त्रीशब्दोऽत्र क्रियानिमित्तस्त्रातृवाचकः पुंशब्दोऽपि पुरुमनसः SKN. त्रायतेः पालनार्थस्यात्र स्त्रीशब्दो निरुच्यते। पालयित्र्य एवैताः सत्यः कृत्स्नस्य जगतः। एत एव रश्मयो नाडीभिराध्यात्मिकीभिरनुप्रविश्य प्राणिनां शरीराण्यन्नपक्तिं कुर्वन्ति। ततः स्थितिरुपजायते। एत एव वर्षप्रदानेन कृत्स्नं जगत्त्रायन्ते तस्मात्त्राणात्स्त्रिय एताः Dur.

२. सत्यः। योषिद्वदुदकरूपगर्भधारणात्स्त्रीत्वम्। एषां रश्मीनामाविष्टलिङ्गत्वात्स्त्रीलिङ्गता Sy. परमात्मनः सतीः सम्बन्धिनीरात्मविद्याप्रवणाः At. तमोऽपनयनान्नपक्त्यादिना कृत्स्नस्य जगत इत्यर्थः SKN.

३. तान् उ तान् रश्मीनेव Sy. अत्यन्तोत्कृष्टान्। उकारोऽत्र पूरणार्थः At. रश्मीन्। उ इति पदपूरणः SKN तानेव लक्षणान्रश्मीन्पालयितॄन्सतः Dur.

४. मदीया या दीधितयः Sy. मम ब्रह्मवित्त्वेन At. मह्याम् SKN. मम Dur.

५. त्वदि० P. D. ब्रह्मविद SKN.

६. प्रभूतवृष्टयुदकसेक्तॄन् पुरुषानाहुः। प्रतिनिर्देशापेक्षया पुंल्लिङ्गता Sy. पुरुषान् At. पुरुमनसो बहुमनस आत्मादिविषयस्य मननस्य ज्ञानस्य कारणभूनानित्यर्थः SKN. एतान्पुंसः Dur.

७. आहुः . . . कथम्? आदित्यान्तरपुरुषो हि बुद्धयधिदैवतं, तदवयवभूताश्च रश्मयः। तेनैते बुद्धिमधिष्ठाय ब्रह्मविदः सर्वानात्मादीनर्थान्प्रकाशयन्ति। अत उच्यते बहुनो ज्ञानस्य कारणभूतानाहुरिति SKN. एत एव रश्मयो बहुप्रज्ञाना इत्येवं ब्रह्मविद आहुः। एत एवान्नपक्त्यादिनोपकारेणोपकुर्वन्तो जगत्त्रायन्ते। एत एव बुद्धेः सर्वार्थप्रकाशित्वेनोपकुर्वन्तीत्यभिप्रायः। आदित्यान्तरपुरुषो हि बुद्धयधिदेवता। तदवयवभूताश्च रश्मयः। ते नाड्यन्तर्गता अध्यात्मपुरुषस्य विज्ञानमुपाहरन्ति। अतस्तेषा बहुप्रज्ञानत्वमुपपद्यते Dur.

८. अमुमर्थमत्यन्तनिगूढम् Sy. ताभ्यां च SKN. ताभ्यां गुणाभ्यां युक्तान् Dur.

९. चयुष्मा० P. ज्ञानदृष्टयुपेतः कश्चिन्महान् Sy. चक्षुष्मानेवासौ। ब्रह्मविद्यायां जात्यन्धनियमनिर्बन्धो नास्तीत्यर्थः At. अक्षशब्देनात्र ब्रह्मज्ञानमुच्यते। क्षितायुकरत्वाद् ब्रह्मज्ञानवान् SKN. योऽक्षण्वान्भवति दर्शनवान्विज्ञानवान्वेदार्थविज्ञानेनोपजनितप्रज्ञः स एव Dur.

१०. ०तिनि M. एवं जात्यन्धस्यापीत्याह। . . पश्यति चेद् ब्रह्म At. पश्यन्ति SKN. पश्यन्नास्ते नित्यकालं नित्ययुक्तत्वात् Dur.

११. अतथारूपः स्थूलदृष्टिः Sy. अन्ध एवासौ At अन्धस्तद्रहितः सन् SKN. इतरस्तु योऽन्धोऽध्यानवानश्रुतवेदोपनिषत्कः Dur. तमोऽप्यन्ध उच्यते। नास्मिन्ध्यानं भवति। न दर्शनम्। अन्धन्तम इत्यभिधायन्ते। अयमपीतरोऽन्ध एतस्मादेव N.5.1.

१२. न विचेतयति न जानाति Sy. ब्रह्मविद्यां न वेत्ति चेत् At. न विजानाति SKN. स मन्दबुद्धित्वान्नैतान्याथात्म्यतः पश्यति। न विजानातीत्यर्थः Dur.

विद्वान्[1]। यः। कस्यचित्[2] पुत्रो भवति। सः। इममर्थम्[3]। आजानाति[4]। य.। तान्येतानि भूतानि। एव वेद[5]। स[6] ज्ञानातिशयेन[7]। पितु.[8]। पिता[9]। भवति[10] न[11] तु[12] पुत्र[13] इति।

---

१. यः कविः क्रान्तदर्शी Sy. तत्त्वज्ञो यः At. मेधावी यः SKN. यः पुनरेवमेतान्याथात्म्यतः पश्यति स एव क्रान्तदर्शनो भवति परिनिष्ठितविद्य इत्यर्थः Dur. २. स्त्रीपुरुषरूपाणां रश्मीनां पुत्रस्थानीयः, पुरु जगतां त्राता वृष्टयुदकलक्षणोऽस्ति Sy. बहुनोंऽहस आत्मज्ञानस्य त्राता परिनिष्ठितविद्यश्चेत्यर्थः SKN. स च परिनिष्ठितविद्यत्वादेव बहुनोंऽहसस्त्राता Dur.

३. स एव पुत्रः। यद्वा। ईमेनमर्थम्। स्त्रीणां सतीनां पश्चात्पुरुषभावम् Sy. इदमात्मतत्त्वम् At. स तान्, ईमिति पदपूरणः SKN. स एवंतानेवम् Dur.

४. सर्वतो जानाति। पित्रोः स्थितिं पुत्र एव जानाति नान्यः Sy. आज्ञापयतीति स गुरुः स्यादेव। ज्ञापको हि गुरुर्ज्ञानेनैव ज्ञापयति At जानाति नेतरः SKN आभिमुख्येन यथावत्पश्यति नेतरो मूढः Dur. ५. यः कश्चित्... तानि Sy. पुत्रत्वात् पितरं प्रत्यनुपदेष्टृत्वमिति चेत् तत्राह यस्तावदात्मतत्त्वम् At. यश्च तान् SKN. यश्च तानेवम् Dur.

६. स्त्रीपुरुषपुत्ररूपाणि जानीयात् Sy. विजानाति At., SKN. पश्यति Dur.

७. सं P. ८. जाना० P.

९. पिता वृष्ट्या जगत्पालको रश्मिसमूहस्तस्यापि Sy. पितुरपि At., SKN, Dur. १०. पिता, आदित्य. सः Sy. पितृस्थानीयः पालयिता वा SKN.

११. आदित्य एव भवतीत्यर्थः। यद्वा लौकिकोक्तिरियम्। यस्तानि जानाति स एवं भवति। स्वयं पितुः पुत्रः सन्नपि स्वपुत्रापेक्षया पिता च भवति। पुत्रपौत्रादिसहितश्चिरकालं जीवी भवतीत्यधिदैवतम्। अथाध्यात्मम्—या इदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ता आहुर्लौकिकास्तान् उ तानेव मे मह्यं पुंसः पुरुषानाहुः प्रतिपादयन्ति तत्त्वज्ञाः। कथमन्यस्यान्यभावः? उच्यते। एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तद्देहावस्थानमात्रेण तत्तद्व्यपदेशोपपत्तेः। श्रूयते हि 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी' (Sve. U. 4 3.) इत्यादि। स्त्रीरूपं पुंस्त्वं चोभयमपि वस्तुतो नास्तीत्युक्तं भवति। श्रुतिरपि तदभावं बोधयति। 'नैव स्त्री न पुमानेष नैव चाय नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स युज्यते (युज्यते)' (Sve. U. 5 10.) द्वितीय. पादः पूर्ववत्। किं च पुत्रो वयसाऽल्पोऽपि यः कविः क्रान्तप्रज्ञो ज्ञानी स्यात्, ईमिममर्थं स विचिकेत जानाति। एवमुक्तलक्षणस्य परमात्मनस्ता तानि स्त्रीत्वपुंस्त्वादीनि यो विजानादौपाधिकानि जानीयात्स पितुः स्वोत्पादकस्यापि ज्ञानरहितस्य पिता, असत्पितृवत्पूज्यो भवति। उक्तमर्थमभिप्रेत्य ताण्डकब्राह्मणम्—'शिशुर्वाऽऽङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत्स पितॄन्पुत्रका इत्यामन्त्रयत्' इत्युपक्रम्य 'ते देवानपृच्छन्त ते देवा अब्रुवन्नेष वाव पिता यो मन्त्रकृत्' (TMB.13.3.24.) मन्त्रद्रष्टुरेव किल पितृत्वं, तत्त्ववित् पितुष्पितासदिति किमाश्चर्यमित्यभिप्रायः Sy. लौकिकं पुत्रत्वं ब्रह्मविद्याविषय आतिदेशिकेन पितृत्वेन औतेन बाध्यते At. पिता भवतीत्यर्थः। स ह्याधिदैविकमात्मानमभिसम्पन्नो भवति। न हि तस्य पिता नाम कश्चित्। स एव हि सर्वेषां जनानां पिता भवतीत्यभिप्रायः Dur. १२. Omitted by M.

१३. VM. ignores उ। This stanza occurs in N. 5 1; SKN. II. 286.

अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीचीं कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अन्तः ॥१७॥

अवः[1] परेण[2]। परेण लोकेन। अवस्तथा[3]। परश्च[4]। एनेन[5]। अवरेण[6] लोकेन द्यावापृथिव्योर्मध्यत इत्यर्थस्तत्र। काचिद् गौ[7]। पदा[8]। क च वत्सम्[9]। बिभ्रती[10]। उदतिष्ठदहरास्यम्[11]। सा च गौ[12]। कञ्चिदर्धमहरास्यमञ्चन्ती[13] रात्र्यास्यम्[14]। कम्[15]। चित्[16]। अर्धमतीत्य[17]। प्रादुरभूत् सा गौस्त वत्सम्[18]। क्व[19]। स्वित्[20]। जनयतीति प्रश्नः।

---

१. अत्राग्नौ हूयमानाऽऽहुतिर्गोरूपेण स्तूयते Sy. ननु कथमुपदेशः कर्तव्यः? किं त्वंपदार्थानुवादेन तत्पदार्थोपदेशस्तत्पदार्थानुवादेन त्वंपदार्थोपदेशो वा? अत्रेदमुत्तरम् At.

२. वतरण P. परेण पदा पादद्वयेन स्वावयवेनाकृष्य Sy. आदावनूद्य परेण ब्रह्मणा योज्य इति शेषः At.

३. अवोऽवस्तावधोदेशेSy. अवरो जीव At

४. वर० P. परस्तादुपरि देशे Sy. पश्चात्परः परमात्मा ब्रह्म At.

५. अनेन Sy. अनेन जीवेन At.

६. अवरेण च पदा पादद्वयेनाकृष्य Sy. अवरेण जीवेन सह योज्य At

७. गोरूपा गमनशीलैषा Sy. ततो गौः श्रुतिः At.

८. आहुतिसङ्घेन पोष्यम् Sy. पादेन महावाक्यात्मनैकदेशेन At.

९. वत्सस्थानीयमग्निम् Sy. पुत्रभावमापन्नं शिष्यम् At.

१०. धारयन्ती Sy. परमात्मस्वरूपेण योजयन्ती At.

११. ०तिदह० M. सूर्यं प्रत्युत्तिष्ठति। 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते' (Manu. 3. 76) इति स्मृतेः Sy. उत्तिष्ठदुत्कर्षेणास्ते श्रवणमननिदिध्यासनरूपमुत्कर्षं प्राप्नोति। कार्यकारणभेदविवक्षाऽत्र At.

१२. अथैवं कृतवती साऽऽहुतिः Sy. सा स्वात्मानुभूता At.

१३. ०वत्यम० D. 'रीङ् गतौ' गतिरत्र नाशः। ...कत् कुत्सितं संसारमशुभं रीयते ध्वंसते नाशयतीति परमात्मज्ञानाभ्यासः कद्री, ताम् At.

१४. ०ति P. अञ्चन्ती is omitted by M क्व गतेत्यनिश्चयगमना। आदित्यं प्राप्तवतीत्यर्थः Sy. अञ्चति गच्छति पूजयति च कद्रीची, स्वात्मानुभूतित्वात् At.

१५. कं फलभाजं पुरुषं प्रति Sy. कमपि At.

१६. अर्थम० D. अर्धमार्गम्...यद्वा। अर्धमृद्धम् Sy. भागलक्षणयाऽवशेषितमशङ्कमपि जडरूपमशम् At.

१७ आगत्य Sy. पराकृत्य At.

१८. परागच्छति Sy. गच्छत्यनुभवति At.

१९. आगत्य च क्वचित्...कुत्र प्रदेशे Sy. क्व स्थाने At.

२०. फलमुत्पादयति Sy. ननु यद्यपि भागलक्षणया स्वस्य चिदंशग्रहणेनाङ्गत्याग उक्तस्तथापि माया तं जडांशं पुनरप्यपेक्षते सूते। इति चेत्, क्व स्थाने जडांशं सूते पुनः? न हि स्विदात्मनि। प्रणष्टत्वात्। नाप्यात्मनि, नापि कारणे। तस्य निरस्ताविद्यत्वात् At.

न[1] तावत्। गवां[2] यूथमध्ये[3] प्रसूत इत्युद्यन्तमादित्यं दृष्ट्वा वदति।

अवः परेण पितरं यो अस्यानुवेद पर एनावरेण।
कवीयमानः क इह प्र वोचदेवं मनः कुतो अधि प्रजातम् ॥१८॥

अवः[4] परेण। अस्य वत्सस्य। पितरम्[5]। परस्य[6] लोकस्य। अवस्तात्[7] स्थितम्। यः। अनु-वेद[8]। परस्ताच्च[9] स्थितम्। अस्य। अवरस्य[10] लोकस्य। सः[11] कविमात्मानं[12] कुर्वन्[13]। कः[14]। इहागत्य[15] तत्।

---

१. नहीतरगोवद्वियम् Sy.

२. सजातीयगोमध्ये Sy. अथ कारणादि-यूथे तदपि नेत्याह, न हि यूथेऽन्तरिति, ईशमायाभिप्रायेणैतदुक्तं भवति न जीव-मायाभिप्रायेण At.

३. साधारण्येन यत्र क्वचिन्न सूतेऽपि तु कस्मिंश्चिदनुष्ठातरि। अतः स महा-न्को नु खल्विति। यद्वा। आदित्य-रश्मिसमूह एव गोरूपेण स्तूयते। गौः, उक्तलक्षणा रश्मिरूपा गौर्वत्सं वत्सवद्रक्षणीयं यजमानमुक्तक्रमेण बिभ्रती, उदस्थात्। अथ तथा कृत्वा सा कद्रीच्यदृश्यगमना सती क स्वि-दर्घमृद्धमर्घस्थानभाज वा क स्वित्पु-रुषमादित्यं, परागादप्रतिनिवृत्ता गता। 'तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास.' (Mu. U 1 2.5.) इति श्रुतेः। तथा कृत्वा च क्व स्वित्सूते कस्मिन्निन्द्रादिलोके जनयति न सर्वत्र Sy. जीवमायानाशे सति कुण्ठितशक्तिरी-शमाया क्व संसाररूपं जडाशं सूते स्वित्। नात्मनि, नाप्यात्मदेहेन्द्रियादि-यूथे। जीवमायांशेन तस्या अपि निर्मूल-त्वेन नष्टप्रायत्वात् At.

४. पूर्वमन्त्रोक्तव्यतिहारं जानन्नेव गुरुर्ब्रवी-मित्युक्त्वतेऽनेन मन्त्रेण . . . अस्य जगतः At.

५. एतल्लोकपालमग्निम् Sy. ईश्वरम् At.

६. आदित्येन सह Sy. परमात्मना योज्य इति शेषः At.

७ अवरो जीवः At.

८ अनुक्रमेण जानाति Sy. आचार्योपदेश-क्रमेण यो वेद वेत्ति At.

९. ०स्था० P. पश्चात् परः At.

१०. आदित्यमस्य पितरं पालकम्। सोऽपी-ममेव लोकं वृष्टद्वारेण पालयति। तादृशमादित्यम् Sy.

११ अपर० M. अनेनावरेणाग्निना सह योऽ-नुवेद, अग्न्यादित्यौ व्यतिहारेणोपास्ते। यद्वा, अभिभूतरजस्तमस्कावुद्बुद्धसत्त्वावत एव स्वाधीनमायावेतावेकत्वेन वाऽधि-गच्छति Sy.
अनेनावरेण योज्यः At.

१२ स तादृशः पुरुषः Sy. स एव At.

१३. कविवदाचरन् क्रान्तदर्शित्वमात्मनः ख्या-पयन् Sy. कवींस्तत्त्वज्ञाञ्ज्ञिक्ष्यानात्मन इच्छन्। ज्ञानच्प्रत्ययः। स्वरस्त्वनु-सर्तव्यः। कविमिव ब्राह्मणमिवात्मान-माचरन्। कविर्ब्रह्म स इवाचरतीति विग्रहः। आचरतीत्याचार्यः। 'आचार्यो ब्रह्मणो मूर्तिः' (Manu 2. 226.) इति श्रूयते At.

१४. न चैवं वाच्यमेवंविधा गुरवः सुलभा इति। यथावसरस्तूपदेशः। नात्र स्वरणीयमित्यत आह . . . को दुर्लभः कः पुरुषः At.

१५. अस्मिँल्लोके Sy. ब्रह्मविद्यायाम् At.

[1] ब्रूयात्तस्य लक्षणम्। देवनशीलम्। [3] मन.। [4] कुतः। [5] अधि। [6] प्रजातमिति प्रश्नेन सूचयत्युदितादादित्याज्जायमान. 'तस्मादन्तरेमौ लोकौ यन्, सर्वेषु [7] सुवर्गेषु [8] लोकेष्वभितपन्नेति' इति ब्राह्मणम्। [10]

ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥१९॥

[11] ये अर्वाञ्चः। [12] ये। [13] अर्वाञ्चो रश्मय। तान्। एव पुन। [14] पराच। आहुस्तथा। [15] ये। पराञ्च। तान्। एव। [16] अर्वाच। आहु। इन्द्रश्च=[17] आदित्य इन्द्र सः। च। [18] सोमश्च। [19] यानि तानि। तथा [20] चक्रथु। [21] तानि तेजासि। [22] धुरा।

---

१. प्रब्रवीति Sy. प्रवक्ष्यति At.

२. द्योतमानं देवविषयमलौकिकं वा Sy. तं देवं परमात्मानम् At.

३ वक्तरि लब्धे श्रोता स्यात्तथा श्रोतरि सति वक्ता स्यात्। यतः श्रोतापि दुर्लभ इत्याह मनश्चित्तम् At.

४. कस्माददृष्टविशेषात् Sy. कुतः कारणात् At.

५. आधिक्येन Sy. अधिकं शुद्धम् At

६. उत्पन्नम्। उभयमपि दुर्लभमित्यर्थः Sy. जातं भवेत्। तत्र कारण सत्कर्माद तत्तु दुरनुष्ठानम्। शुद्धान्तःकरणस्यैवाध्यात्मश्रवणं निर्वहतीति श्रोतापि दुर्लभ इत्यर्थ. At. ७. उदिता आदित्या जायते मनस्त० M. ०स्तस्यावन्तरमौ D

८. Omitted by P.

९. अपि त० P. १०. TB.1.2.4.1. VM. ignores प्र

११. ०र्व० P. ब्रह्मविद्येतरमन्त्राद्युपविष्टाना ब्रह्मलोकप्राप्तावपि पुनरावृत्तिरित्यनेनोच्यते At.

१२. सूर्यसोमयोश्चक्रे वर्तमाना रश्मयो ग्रहाश्च तत्परिभ्रमणवशेन Sy.

१३. अर्वागञ्चना अधोमुखाः सन्ति Sy. येऽर्वाञ्चो मनुष्या मन्त्राद्युपासकाः At.

१४. पराङ्मुखाञ्चनानूर्ध्वानाहुः कालविदः Sy. ब्रह्मलोकगामिन आहुः At.

१५. ०चः D. तथा प्रथम ये पराञ्चः परागञ्चनाः Sy. ये पराञ्चो ब्रह्मलोकादिस्थाः At.

१६. तानर्वाचो मनुष्यानाहुः। ब्रह्मविद्याऽभावे मन्त्राद्युपविष्टाः पुनरावर्तन्ते। मन्त्रादौ मनुष्याणामेवाधिकार इति सूचितम् At.

१७. इन्द्रः परमेश्वर इरां भूमिं (इराया भूमेः) वृष्ट्या धारक आदित्यः। यद्वा द्वादशादित्यानां मध्य इन्द्रोऽप्येकः 'विवस्वदिन्द्रयुता.' इत्युक्तत्वादयमपीन्द्रः Sy. ननु मर्त्यलोकस्थान्के ब्रह्मलोकं प्रापयन्ति, के वा ब्रह्मलोकस्थान्मर्त्यलोकं प्रापयन्ति। किं कर्माण्येवेत्याह। इन्द्र ईश्वरः प्रयोजककर्ता At.

१८. हे सोम त्वम् Sy त्वञ्च भोः सुन्वन्कर्मिन् प्रयोज्यकर्तः At. सोम is in the voc. in the original. The reading सोम for सोमश्च is therefore suggested.

१९. युवां या यानि मण्डलपरिभ्रमणानि Sy. युवां या यानि कर्माणि At.

२०. कृतवन्तौ Sy. कृतवन्तौ स्थः At.

२१. तानि कर्माणि At.

२२. तत्र दृष्टान्तः... शकटादौ धुरि Sy. अग्रेसरेण लिङ्गशरीरेण At.

युक्ता[1] अश्वाः। इव[2] रथान्[3]। लोकान्[4]। वहन्ति[5], आदित्यचन्द्रमसावलातचक्रवदितरेतरं तेजोभिरापूरयन्तौ[6] परिवर्तेते[7] तेजोभिर्जगद्धारयन्ताविति।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥२०॥

द्वा[8] सुपर्णा। द्वौ। सुपतनावादित्यश्च[9] सोमश्च[10]। सह लोकनिर्वहणे युज्जानौ[11]। सखायौ[12]। एकम्[13]। वृक्ष सवत्सरम्[14]। आश्रित्य[15]। निष्ठत[16]। तयो[17]। एक[18]। तस्य स्वादु[19]। फलम्[20]। अत्ति[21]। अनश्नन्[22]। अन्य सोम[23]। तमभिविपश्यति[24] सोममत्तीन्द्र

---

१. सम्बद्धा अश्ववादयो यथा धुरं वहन्ति तद्वत् Sy. युक्तानि At.

२. धुरा न युक्ता यथा रथस्य धुरा युक्ता अश्वास्तं रथं देशाद्देशान्तर प्रापयन्ति तद्वदित्यर्थः At.

३. रञ्जनात्मकस्य लोकस्य। कर्मणि षष्ठी। लोकम् Sy.
मनुष्यलोकम् At.

४. निर्वहन्ति।...यद्वा। एतत्पूर्वार्द्धे दृष्टान्तितम्। धुरा युक्ताः। धुरि स्थितं चक्रमपि धुरशब्देनोच्यते। तत्र युक्ताः समर्पिताः पुरुषास्तत्परिभमणवशेनार्वाञ्चोऽपि पराञ्चः पराञ्चोऽप्यर्वाञ्चो भवन्ति तद्वत् Sy.
ब्रह्मादिलोकं प्रापयन्ति। रजसो ब्रह्मलोकाद्वा वहन्ति मर्त्यलोकं प्रापयन्ति At.

५. ०वकात० M.

६. ०जोऽभि० M.

७. ०वर्तयेते P. D.

८. अत्र लौकिकपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते Sy.
अतो ब्रह्मविद्वैवाश्रयणीया। सा चाविद्यासिद्धं जीवमनु (नू) य तत्पदार्थप्रतिपादनममुमर्थमभिप्रेत्य जीवपरमात्मानावाह At.

९. यथा लोके द्वौ सुपर्णौ सुपतनौ शोभनगमनौ Sy.

१०. सोम P. D

११. सयुजा समानयोगौ Sy.
द्वौ साधूनभ्युदयनिश्श्रेयसपक्षान् बिभ्रतौ जीवपरमात्मानौ सयुजा At.

१२ समानख्यानौ Sy.
अन्योन्यममुञ्चन्तौ सखाया परस्परोपकारिणौ At.

१३. एकमेव वृक्षम् Sy. समानमेकं वृक्षं वृश्चनीयं देहम् At.

१४. परित आलिङ्ग्य At.

१५. आश्रयतः Sy.

१६. तयोर्मध्ये At.

१७. एको जीवः At.

१८. पिप्पल पक्व स्वादुतरम् Sy. पिप्पलफलसमं बहुदोषयुक्तमपि कर्मफलम् At.

१९. स्वादुं कृत्वा, अत्ति स्वदिति (स्वदते) At.

२० अभुञ्जानोऽपि At.

२१. अपरः Sy. परः परमात्मा At.

२२. अभिपश्यति Sy. अभितोऽत्यर्थं प्रकाशते At.

इति।

१. तद्वद् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ, सयुजा समानयोगौ योगो नाम सम्बन्धः स च तादात्म्यलक्षणः। स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स तदात्मा। एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूप यस्य जीवात्मनः। एवमेकस्वरूपावित्यर्थः। अनेन भास्करमतानुसारिणोऽतिरेकिनाम्नो जीवात्मा परमात्मनो नान्यः। स च परमात्मा जीवादन्यो नानाजीवाश्रयणादिति मतं निरस्तं भवति। ननु सम्बन्धो द्विष्ठः स च पक्षिणोरेव भेदमपेक्षतेऽतः कथमैकात्म्यमिति। न। औपाधिकभेदं वास्तवाभेदं चापेक्ष्य प्रवृत्तः। अत एव सखायौ समानख्यानौ नान्यख्यानौ। नन्वेकस्य यादृशं ख्यान तादृशमेवान्यस्येति व्युत्पत्त्या भेद स्फुटं प्रतिभाति कथं तादात्म्यमुच्यते? इति न वक्तव्यं, नात्र परस्परं दृष्टान्तदार्ष्टान्तिकभावोऽपि तु यस्य यादृशं ख्यान स्फुरणं परमात्मनस्तदेव ख्यानमितरस्यापि जीवात्मन इति सख्यावित्युच्यते। एकरूपप्रकाशावित्यर्थ.। अत उपपन्नमैकात्म्यम्। अनेन वास्तवभेदोऽपि निरस्तः। 'समानं वृक्षं परि षस्वजाते' इत्यत्र यथाऽऽश्रयान्तराभावादुभयोरेकाश्रयत्वमभ्युपगन्तव्यं तद्वत् 'सयुजा सखाया' इत्युभयत्राप्येकयोगाख्याने आश्रयणीये। वृश्च्यत इति वृक्षो देहः। स चोभयोः समान एक एव। जीवस्य भोगार्थत्वात्परमात्मना सृष्टैर्महाभूतैरारब्धत्वात्तस्योपलब्धिस्थानत्वाच्चोभयोरपि समानः। तादृशं समानं वृक्षं परि षस्वजाते परिष्वजत आश्रयत.। न च जीवस्य वस्तुत ईश्वरत्वे कथं जीवबुद्धया संसारशोकाविति वाच्यम्? तयोर्मोहकृतत्वात्। तथा चाथर्वणिका अमुं मन्त्रमाम्नायास्य सन्देहनिवर्तकमुत्तरं मन्त्रमेवमामनन्ति "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः"(Muṇḍak. U. 3.1.2.)इति। अस्यायमर्थः। एक एव शरीरे पूर्णः पुरुषः परमात्मा निमग्नो निगूढः सन् स्वयमपीश्वरोऽप्यनीशत्वबुद्धया मुह्यमानो मूढः सञ्शोचति। संसारेऽहं कर्ता सुखी दुःखीति जननमरणे अनुभवति। यदा तु जुष्टं नित्यतृप्तमन्य संसारशोकातीतमीशं परमेश्वरं पश्यति स्वानन्यतया साक्षात्करोति, तदा वीतशोको देहाद्युपाधितिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन्नस्य महिमानमिति। निरस्तसमस्तौपाधिकस्य परमेश्वरस्य महिमान सार्वात्म्यसर्वज्ञत्वादिमहिमानमित्येति प्राप्नोति। न च तद्भावानाप्तौ तन्महिमा प्राप्यते। अतस्तद्रूपो भवतीत्यर्थ। तस्माद्वस्तुत एक एव भेदस्तु मोहकृत इति सिद्धम्। अनुभवदशायां लौकिकबुद्धया भेदमभ्युपेत्योच्यते। ततोऽन्यो जीवात्मा पिप्पलं कर्मफलं स्वादुभूतमत्ति भुङ्क्ते। यस्य यदुपार्जितं तत्तस्य स्वादु भवति। अन्यः परमात्माऽनश्नन्नाप्तकामत्वेनाभुञ्जानः स्पृहाया अभावात्। 'आप्तकामस्य का स्पृहा' (Gauḍapāda's Kārikā 1.9.) इति स्मृतेः। तस्मादवास्तवभेदमुपजीव्य तयोरन्य इत्युक्तम्। वस्तुतस्तु 'अनीशया शोचति मुह्यमानः' (Muṇḍak U. 3.1.2.) इत्युक्तत्वाद्भेद एव। तादृशः परमात्मा स्वात्मन्यध्यस्तं जगत् साक्षित्वेनेक्षते Sy.

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥२१॥

यत्रा[१] सुपर्णा[२]। यत्र[३]। सुपतना[४] आदित्यरश्मय[५]। अमृतस्य[६]। भागम्[७]। अनिमेषम्[८]। वेदनेन[९]। अभिप्रयच्छन्ति[१०]। ईश्वर[११]। सर्वेषाम्[१२]। भूतानाम्[१३]। गोपायिताऽऽदित्य[१४]। स[१५]। मा[१६]।

---

१. ०वर्णाः P. कोऽयमत्रार्थस्य प्रकाशस्तत्रेदमुत्तरम् At. अधिदैवतं तावदस्या ऋचोऽर्थः SKN.

२. आदित्यमण्डले Sy. यत्रार्थे प्रकाशेऽभिव्यज्यमाने सति At. यत्रेति सप्तमीश्रुतेः स्थिता इति शेषः। ..यस्मिन्नादित्यमण्डले स्थिताःSKN यस्मिन्मण्डलेऽवस्थिताः Dur

३. शोभनगमना रश्मयः Sy. मोक्षपक्षीया जीवा. At सुपर्णा इति रश्मिनाम।... रश्मयः SKN. ते हि शोभनमर्थमुद्दिश्य तपोऽपघातलक्षण पतन्ति। अथवा शोभमानाः पतन्तीनि सुपर्णा. Dur.

४. वादि० P.

५. उदकस्य Sy. अमृतस्याऽऽनन्त्यस्य सुखरूपस्य ब्रह्मणः At प्राणिना जीवनहेतुत्वादमृतसदृशस्यामरणधर्मणो वा भौमरसलक्षणस्योदकस्य SKN अमरधर्मिण उदकस्य Dur

६. भजनीयमंशमादाय Sy. भजनं प्राप्तिम् At. अंशं स्वं स्वम् SKN भजनीयमंशमादाय पृथिवीलोकात्तेनान्विताः सन्तः Dur.

७. अनवरतम् Sy. अनश्वरम् At निमेषवर्जितम्, महताऽऽदरेण सातत्येन वेत्यर्थः SKN. अनिमिषमाणा इवादरवन्त इत्यर्थः Dur.

८. ज्ञानेन, अस्माभिरेवं कर्तव्यमिति बुद्ध्या Sy. ज्ञानेन वृत्तिलक्षणेन At. देवतामाहात्म्याज्ज्ञानेन केनापि विज्ञानेन SKN. स्वकर्माधिकारयुक्तेनान्विताः सन्त इदमेवास्माभिः कर्तव्यं रसादानादिलक्षणं कर्मेत्यभिस्वरन्ति Dur.

९. अभिप्रापयन्ति Sy. अभिस्वरतिर्गतौ At. 'स्वृ शब्दोपतापयोः' आभिमुख्येनोपतापयन्ति शोषयन्तीत्यर्थः। अथवा स्वरतिरत्र गतिकर्मस्वपठितोऽपि गत्यर्थः। भागमिति द्वितीयाश्रुतेरादायेति शेषः। यस्मिन्नादित्यमण्डल उदकस्याशं स्व रसमादाय गच्छन्तीत्यर्थः। SKN. सर्वभूतानि ... अभितपन्तीत्यर्थः। अथवा। अभिस्वरन्त्यादित्यमण्डलमभिप्रयन्ति, आभिमुख्येन रसान्गृहीत्वा प्रयान्तिDur.

१०. स्वामी Sy ईश्वर एव At. यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। तत्र स्थितः ...ईश्वरः SKN यत्रैतदेवंलक्षणं कर्म कुर्वन्त्यादित्यरश्मयस्तत्र किम्? इत्युच्यते ..इनो ह्यसावादित्य ऐश्वर्येण भवति Dur. ११. अत्र ज्ञानमार्गे विघ्ननिरासकः परमेश्वर एव सेव्यमान इत्याह ... सर्वस्य At., SKN.

१२. भूतजातस्य Sy., SKN. लोकस्य At. भूतस्य Dur.

१३. तथा तस्यैव ... गोपायिता रक्षिताऽयमादित्यः Sv. ज्ञानमार्गप्रवृत्तस्य गोपा गोप्ता रक्षकः At. गोपायिता च, य इति शेषः परस्तात्तच्छब्दश्रुतेः SKN. गोपायिता भवत्यादित्यो मण्डलान्तरपुरुषो यस्तत्र मण्डलेऽवस्थितः Dur.

१४. परमेश्वरः Sy. कथं भिन्नस्वभावयोरैक्यं तत्राह स इतश्चिन्मात्रांशः At.

१५. माम् Sy., At., SKN., Dur.

धीरः। पाकम्। अत्र। आ। विवेश आदित्य, उदकं रश्मयः सम्भरन्ति स चाज्ञान्मनुष्यानात्मनाऽधितिष्ठति।

---

१. धीमान् प्राप्यनुग्रहबुद्धियुक्तः सन् Sy. धीः, इराऽवशिष्यमाणा यस्य स तथा At. प्रज्ञावानादित्यः SKN. प्रतिविशिष्टया बुद्ध्यान्वितो बुद्धिरेव हि तस्य शरीरम् Dur.

२. पक्तव्यमपक्वप्रज्ञम् Sy. पाकं प्रशस्तं विगलितासद्द्वितीयत्वादिदोषं चिन्मात्र सन्तम् At अर्थित्वाद्भुक्तियुक्तत्वादपक्वप्रज्ञत्वाच्च पक्तव्यप्रज्ञम् SKN. सम्यग्दर्शनोऽनुग्राह्यतया Dur.

३. धिर, पाक मन्त्र P. अस्मिन्स्वकीयमण्डले Sy. अत्र वेदनेऽसन्निवृत्तिलक्षणे At अत्रादित्यमण्डले SKN.

४. प्रवेशयति। अत्रास्मदीये देहे वा नियामकतया प्रविष्ट इत्यधिदैवतपक्षे Sy. प्रविशति। प्रवेश औपचारिकः। चिन्मात्रयोर्जीवपरयोरैक्य न विरुध्यत इत्यर्थः At. आवेशयतु प्रापयत्वित्यर्थ. SKN. आविशतु Dur.

५. उदकाश्मय. P

६. ०त्मताधि० P.

७. अथाध्यात्मपक्षे। यत्र यस्मिन्नात्मनि, सुपर्णा शोभनपतनानि स्वस्वविषयग्रहणाय गमनकुशलानीन्द्रियाणि चक्षुरादीन्यमृतस्य भागम्। अत्र विषयावच्छिन्नचैतन्यममृतमित्युच्यते। तस्य भागं भजनीयं स्वस्वांशमनिमेषं निमेषरहितमनारतं, विदथा वेदनेन वृत्त्यवच्छिन्नचैतन्येनावरुद्धान्यभिस्वरन्त्यभिप्रयन्त्यावरणापगमनेन स्फोरयन्ति। किञ्च यस्त्विनः स्वामी, अस्य देहस्य विश्वस्य भुवनस्य गोपा गोपायिता रक्षिता। यद्वा विश्वस्य भुवनस्य भूतजातस्य स्वामी, अस्य देहस्य गोपाः। अनेन तत्त्वंपदार्थयोरेकत्वं प्रतिपादितं भवति। स परमेश्वरो धीरः समाधिनिष्ठः सर्वदाऽविक्रियो मा मां पाकं परिपक्वमनस्कं यागदानादिनाऽपगतरजस्तमस्कत्वेन दर्पणवदतिनिर्मलसत्त्वोद्रिक्तमनस्कं मामाविवेश। उक्तरूपे चित्ते तादृशं वस्तु स्फुरतीत्यर्थः। यद्वा। अपरिपक्वमना अहं पूर्वमज्ञानदशायां मदन्य ईश्वरोऽस्तीत्यविद्वांस्ततः परमस्ति कश्चित्सर्वज्ञः सर्वेश्वरः सत्यज्ञानादिलक्षण इति निश्चित्य पश्चाद् गुरुशास्त्राभ्यां स एवाहमस्मीति मत्वैव पारम्पर्येणावगत्य, असम्भावनाविपरीतभावने व्युदस्य भावनया साक्षात्कृत्य परिपूर्णः परमात्माऽभूवमित्यर्थः। ... नन्वनवच्छिन्नस्य परमात्मनः सर्वत्र व्याप्तत्वात्प्राप्तिरेव नोपपद्यते। सम्प्रति (सत्यम्) अत्र प्राप्तिर्द्विविधा, प्राप्तप्राप्तिरप्राप्तप्राप्तिश्चेति। प्राप्तस्यापि कण्ठे चामीकरन्यायेनाऽऽवरणाज्ञानहानद्वारेण प्राप्तिरुपपद्यते Sy. अध्यात्ममप्यस्या ऋचोऽर्थः। यत्र यस्मिञ्छरीरे स्थिता रश्मयः प्रकाशकत्वाद्रश्मिसदृशानि चक्षुरादीनीन्द्रियाणि। अमृतस्य रूपादेर्ज्ञेयस्य विषयस्य, भागं स्वं स्वमंशं चक्षू रूपं श्रोत्रं शब्दं घ्राणादीनि गन्धादीन्यनिमेषं विज्ञानेनोपतापयन्ति। आत्मानं प्रकाशयन्तीत्यर्थः। तत्र भोक्तृत्वेन स्थित इन ईश्वरः सर्वस्येन्द्रियग्रामस्य गोपा यः स धीरः प्रज्ञावान्। पाक पक्तव्यप्रज्ञमत्रैवस्थितमाविशतु मम प्रकाशीभवत्वित्यर्थः। अथवा—यत्रेत्यात्मा निर्दिश्यते न शरीरम्। भागमित्यत्र च पूर्ववदायेति शेषः। स्वर-

यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥२२॥

यस्मिन् वृक्षे । यस्मिन्[1] । आदित्यवृक्षे । मधुन[2] उदकस्यात्तारः । सुपतना[3] पक्षिणो रश्मयः[4] ।

तिश्च गत्यर्थः । यस्मिन्निहितानीन्द्रियाणि विषयस्यांशं स्वमादाय विज्ञानेनोपलभ्यार्थमभिगच्छन्ति । ईश्वरो गोपायिता च स मामाविशत्विति । ... पूर्वो देवताविषयः । अयमात्मविषय इति विशेषः SKN. आध्यात्मिकमुच्यते ... यत्र यस्मिञ्छरीरे सुपतनानीन्द्रियाण्यवस्थितानि स्वेषु स्वेष्वायतनेषु कृष्णतारादिषु । किं कुर्वन्ति? इत्युच्यते, अमृतस्यामरधर्मणो ज्ञानस्य भागं भजनीयं स्वं स्वं रूपादिलक्षणमंशमादाय विद्यया वेदनेन विज्ञानेन युक्तानि, अभिस्वरन्ति नहीन्द्रियाणा चैतन्यमस्तीति । तानि ह्यचेतनानि चेतनस्य पुरुषस्य कर्तुविज्ञानमयस्य करणानि, तदधिष्ठात्र्यस्तु देवताश्चेतनाः । ... किं कुर्वन्ति ? अभिस्वरन्ति, अभिप्रयन्ति विषयविज्ञानं पुरुषस्यापि भोक्तुः पटुकुर्वन्ति । अथवाऽभिस्वरन्ति बुद्धिभाभिमुख्येन विषयविज्ञानमादाय बाह्यप्रत्ययाधानार्थं स्वरन्ति गच्छन्तीत्यर्थः । तत्र किम्? इत्युच्यते । तत्र योऽवस्थित ईश्वर इनः सर्वेषामिन्द्रियाणां गोपायिता य आत्मा स मा धीरो धीमान् ... पक्तव्यप्रज्ञोऽसम्यग्दर्शिनमसर्वज्ञं विपक्वप्रज्ञः सम्यग्दर्शी सर्वज्ञः सोऽत्रैव हि देहेऽवस्थितो बुद्ध्यधिदैवतभावेन तैजसाख्यो मामाविवेश, आविशत्वनुग्राह्यतया स माममत्रैवावस्थितोऽनुगृह्णात्वित्यर्थः । तदनुग्रहानुग्रहस्य सम्यग्दर्शनं प्रकाशते तदाशास्यत इति Dur.

यत्र सुपर्णाः सुपतना आदित्यरश्मयः । 'अमृतस्य भागम्'उदकस्य । अनिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वा । ईश्वरः सर्वेषां भूतानां गोपायिताऽऽदित्यः । 'स मा धीरः पाकमत्रा विवेश'इति । धीरो धीमान् । पाकः पक्तव्यो भवति । 'विपक्वप्रज्ञ आदित्यः' । इत्युपनिषद्वर्णो भवतीत्यधिदैवतम् । अथाध्यात्मम् । यत्र सुपर्णाः सुपतनानीन्द्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वा । ईश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा । 'स मा धीरः पाकमत्रा विवेश'इति । धीरो धीमान् । पाकः पक्तव्यो भवति । विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे N. 3. 12; SKN. II. 154.

१. अत्र वृक्षस्वरूपकल्पना । अधिदैवमादित्यमध्यात्ममात्मानं च प्रशंसति, यस्मिन्नादित्ये Sy. एवं चेज्जीवानां मुक्तिः स्यात्कर्मफलं क्व नु । कर्मकर्तृत्वे न मुक्तिः स्यात् । प्रारब्धं तु न नश्यति । प्राप्ताप्राप्तविवेकेन लिङ्गदेहस्यैव भोक्तृत्वमित्युच्यते At.

२. वृक्षवत्सर्वफलाश्रयभूते Sy. वृक्षनीये लिङ्गशरीरे स्थिताः At.

३. ०स्य० P. मध्वित्युदकनाम । तद्वन्तीति मध्वद उदकस्यात्तारः Sy. कर्मफलभोक्तारः At.

४. ०श्मा M. रश्मयः Sy. जीवाः At.

निविशन्ते[1]। यस्माच्च[2], अधि[3]। विश्वे[4] सुपर्णा[5]। सुवते[6]। तस्य[7]। एव वृक्षस्य[8]। आहु[9]। पिप्पलम्[10]। स्वादुरसम्[11]। तस्याग्रे स्थितम्[12]। तत् पिप्पलम्[13]। नो[14]। व्याप्नोति[15]। यः[16]। पितरमादित्यम्[17]। न[18]। वेद, इत्यनादित्यविदो निन्दा।

---

१. निवेशयन्ते P. निवेश० D. प्रविशन्ति रात्रौ Sy.
लोकाल्लोकान्तरं निविशन्ते, कर्मफलं भुञ्जते At.

२. उपरि Sy. अधिकानि काम्यानि, निषिद्धात्मकानि संसारकारणानि At

३. पश्वे M. विश्वस्य Sy. सर्वात्मका अमुक्ताश्च भवन्ति। एवं लिङ्गदेहस्थाना जीवाना त्रैविध्यमुक्तम् At.

४. स्तुवते P पुनरुदयकाले प्रकाश जनयन्ति च यस्मादादित्यात् Sy. ऐहिकामुष्मिकफलानि सुवते कुर्वते च At

५. आदित्यवृक्षस्य Sy.
लिङ्गदेहस्य At

६. Omitted by P. कथयन्ति तत्त्वविदः। यद्वा सर्वस्याधि, उपरि वर्तमानमाहुः Sy.

७. ०पलं P. पालकं फलम् Sy. परमार्थतः पिप्पलं कर्मफलम् At.

८. रसवत् Sy.
स्वदनीयम् At.

९. तेऽस्य M.

१०. उपरि, उपासनान्तरम् Sy. ननु जीवस्य चिन्मात्रतत्त्वज्ञानादेव मुक्तिरस्तु, किमन्तर्गतेन तत्पदार्थज्ञानेन प्रक्रियापरिकल्पितेन। तत्राह यतोऽग्रे At.

११. तद् ब्रह्म At.

१२. नशतिर्गतिकर्मा। तत्फल न प्राप्नोति। वेदितारस्त्वग्रे पिप्पलमाहरित्यर्थः Sy. उद्वृत्कृष्टं न नशद् न प्राप्नोत्येव सः At.

१३. यो नर Sy.

१४. ईदृशं पितरं जगतः पालयितारम् Sy. जगत्कारणं तत्पदार्थमीशम् At.

१५. व M, नोपास्ते ... इत्यधिदैवपक्षे Sy. न वेत्ति वैदिकेषु केवलयुक्तेरप्रामाण्यादिति भावः At.

१६ न वेद, इति is omitted by P. अथाध्यात्मपक्षे। यस्मिन्परमात्मनि वृक्षे वृक्षवद् गमनादिरहितेऽविक्रिये सुपर्णाः शोभनगमनानीन्द्रियाणि मध्वदो मधुनो ज्ञानस्यात्तृणि तज्ज्ञानेन ज्ञानभाञ्जीत्यर्थः। निविशन्ते स्वापकाले स्वस्वविषयेभ्यः प्रतिनिवृत्तान्यात्मनिवृत्या लीयन्ते पुनः प्रबोधकालेऽधि विश्वे विश्वस्योपरि सुवते च, उद्यन्ति स्वस्वविषयाँल्लभन्त इत्यर्थः। तस्य परमात्मनः पिप्पल पालक संसारत उद्धारकं स्वादु, आस्वादनीयममृतत्वलक्षणं ज्ञानम्। यत्फलास्वादने पुनः क्षुत्तृष्णाशोकमोहजरामरणादयो न भवन्ति तद्धि स्वादुतमम्। इतरस्वर्गादिफलानि पुनर्जननाद्यापादकत्वादापातस्वादूनि। तत्फलमग्रे स्वरूपज्ञानोत्तरकालमाहुः। यः पुमान् पितरं पालकं ज्ञानफलं तत्फलाधारमात्मानं वा न वेद न जानाति गुरुशास्त्राभ्यां स तत्फलं नोऽग्रश्न प्राप्नोति। अत आत्मानं यो वेद स एव तन्मोक्षफलं प्राप्नोतीत्यर्थ.। यद्वा 'अमेवदाकाशम्' (Svet. U. 6. 20.) इत्यादिश्रुतिर्ज्ञानादन्योपायस्यामृतत्वप्राप्ति निवारयति। 'ब्रह्म वेद ब्रह्मैव भवति' (Mu.U.3. 2.9.) इत्यादिका तु ज्ञानात्प्राप्तिमाह। तस्मादीदृशं परमेश्वरं विदित्वा मुक्तो भूयासमित्यर्थः Sy.

यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥२३॥

[1] यद् गायत्रे । [2] यत् । [3] गायत्रे छन्दसि । [4] अधि । निहितम् । [5] [6] गायत्र यत् । वा पदम् । त्रैष्टुभाच्छन्दस । [7] त्रैष्टुभम् । निरतक्षत=[8] पृथगकुर्वन् । यत् । वा । जङ्गमस्वभावात् । [10] जगत्या (म्) । [11] निहितम् । [12] ये । एव । तत् । [13] पदम् । [14] विदुः । त एव । [15] अमृतत्वम् । [16] आनशु, त्रीणि वैदिकानिच्छन्दांसि तानि चामुमादित्यं वहन्ति तस्मादेवादित्यो गायत्रस्त्रैष्टुभो जागतश्च [17] भवति यद्वा गायत्रादीनि सामानि

---

१. यं D. अथ महावाक्यविषये गायत्रीत्रिष्टुब्जगत्यश्छन्दांसि सन्ति तान्याह At.

२. यद् ब्रह्म At.

३. प्राथम्यात्सर्वैः स्तुत्यत्वाच्च गायत्री भूस्तदीयं स्थानं गायत्रम् . . . तत्र Sy.
गायत्रीछन्दसि At.

४. उपरि Sy.
अधिकं सर्वोत्कृष्टम् At.

५. 'हि गतौ' आगतमवगतं ज्ञातं तद् ब्रह्म At.

६. आग्नेयं पदम् . . .प्रथमसृष्टत्वाद् गायति त्रायते चेति व्युत्पत्त्या च प्रजापतेर्मुखाद् गायत्र्या सहोत्पन्नत्वाद् भक्त्याऽग्निरपि गायत्रः । 'गायत्रोऽग्निः' (TS. 2 2.5 5.) इति श्रुतेः । भूम्यामग्निः स्थापित इति यदस्ति Sy. गायत्र ब्रह्मोत्युच्यते । सञ्ज्ञाकरणस्य प्रयोजन वक्ष्यामः At

७. द्वितीयत्वाद् वृष्टिपर्जन्यविद्युद्रूपत्रिस्तोभयुक्तादन्तरिक्षात् Sy.
पक्षान्तरे वाशब्दः । . . . त्रिष्टुप्छन्दस्कान्मन्त्रात् At.

८. ०से त्रै० P. स्तोभयुक्तमूर्ध्वास्तिर्यग्लक्षणस्तोभत्रयोपेतं वायुम् Sy.
त्रिष्टुभा प्रोक्तत्वात्त्रैष्टुभं ब्रह्मेत्युच्यते At.

९. साधु सम्पादितवन्तो देवा इति यदस्ति Sy. निष्कृष्य निर्णीतवन्तः । के? हिरण्यस्तूपाद्या आचार्याः At.

१०. वा, अथवा . . . गमनशीलमादित्याख्यं पदम् Sy यद् वा पक्षान्तरमिदं जगन्निरनक्षत । जागतं ब्रह्मप्रायपाठादक्षरसाम्याच्च जगत्याः पर्यायान्तर वा, इदम् At.

११. जगति सर्वैर्गन्तव्य उद्गततमे वा तृतीयभूते द्युलोके Sy.
जगत्यां छन्दसि प्रतिपाद्यत्वेन हितम् At

१२. य एव नराः Sy.

१३ तदिद त्रिषु स्थानेषु त्रयाणामग्न्यादीनां पदाधानम् Sy पदं पदनीयं गम्यफलरूपम् At.

१४. जानन्ति Sy. एवं तावद् गायत्रत्रैष्टुभजागतसञ्ज्ञाभिर्ब्रह्मविषयास्त्रयः पक्षा उपन्यस्तास्ततप्रयोजनमुत्तरत्र वक्ष्यन्दीर्घतमाः स्वमतं तावदाह । य इत्तु ये तु तद् ब्रह्माच्छन्दोभिरनुपहितं निर्गुणं तत्त्वमस्यादिवाक्यलक्ष्यं निःसञ्ज्ञकं विदुरनुभवन्ति At.

१५. ०वोमृ० P. अमरणरूपं पदम् Sy.
तेऽमृतत्वमिहैव मोक्षम् At.

१६. आप्नुवन्ति । इत्यधिलोकम् Sy. अश्नुवते, यद्वाऽमृतत्वं सुखरूपत्वमानशुर्भुञ्जतेऽनुभवन्ति At.

१७. ०भं त्रै० P.

वहन्ति तदानीं जगदिति साम्नो विशेषणादुपपन्नं लिङ्गमिति।

गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥२४॥

गायत्रेण। प्रसङ्गादक्षरप्रशसा क्रियते, ऋक्सहिताया कियन्तो मन्त्रा इति जिज्ञासमानो

---

१. अथाधियज्ञम्। गायत्रे प्रातः सवनेऽधि, उपरि गायत्रं छन्दः पदमाहितमिति यत्। तथा त्रैष्टुभान्माध्यन्दिनात्सवनात्त्रैष्टुभं छन्दो निरतक्षत तत्राहितमिति यत्। वा किञ्चेत्यर्थः। जगति तृतीयसवने जगज्जागतं पदमाहितमिति यत्। तत्तादृशं सवनत्रयेषु छन्दस्त्रयसंस्थानं ये नरा विदुर्यजमाना विदुर्जानन्ति तेऽमृतत्वं ज्ञानानुष्ठानद्वारेण मोक्षमानशुराप्नुवन्ति। अथवा गायत्रे प्रातःसवने त्रिषु सवनेषु छन्दस्त्रयपरिमाणात्सवनान्यपि तत्तच्छन्दश्शब्देनोच्यन्ते। 'गायत्रं प्रातः सवनं, त्रैष्टुभं माध्यन्दिनं सवनं, जागतं तृतीयसवनम्' (TS. 2.2.9.5-6) इति श्रुतेः। तादृशे प्रातःसवनेऽधि, उपरि गायत्रमष्टाक्षरात्मकमाहावप्रतिगररूपं गायत्रं पदमाहितम्। तद्यथा होता 'शोंसावोम्' इति त्र्यक्षरेण तथा 'शंसामोदैवोम्' इति पञ्चाक्षरेणाध्वर्युः प्रतिगृणाति, तन्मिलित्वाऽष्टाक्षरं सम्पद्यते। तच्चाष्टाक्षरं गायत्रीसदृशं, तस्या अपि पादस्याष्टाक्षरत्वात्। इदमेकं प्रातःसवनरूपे गायत्रपदप्रतिष्ठापनम्। तथा सवनान्तेऽपि शंसनानन्तरम् 'उक्थं वाचि' इति चतुरक्षरमाह (होता)। 'ओमुक्थशाः' इति चतुरक्षरमध्वर्युः। तदष्टाक्षरं सम्पद्यते। एतदेकं परं गायत्रे गायत्रस्थापनम्। तथा त्रैष्टुभान्माध्यन्दिनात्सवनात्त्रैष्टुभमाहावप्रतिगररूपं पवं निरतक्षत ऋत्विजः। तद्यथा माध्यन्दिनसवने होता 'अध्वर्यो शोंसावोम्' इत्याह्वयते षडक्षरेणाध्वर्युश्च 'शंसामोदैवोम्' इति पञ्चाक्षरेण प्रतिगृणाति। तन्मिलित्वैकादशाक्षरं सम्पद्यते। इदमेकं माध्यन्दिनसवनावौ त्रैष्टुभे त्रैष्टुभाधानम्। तथा सवनान्तेऽपि शंसनानन्तरम् 'उक्थं वाचि इन्द्राय' इति सप्ताक्षरमाह (होता)। अध्वर्युश्च 'ओमुक्थशाः' इति चतुरक्षरेण प्रतिगृणाति। तन्मिलित्वैकादशाक्षरं सम्पद्यते। इदमपरं त्रैष्टुभे त्रैष्टुभस्थापनम्। तथा तृतीयसवने होता 'अध्वर्यो शोंशोसावोम्' इति सप्ताक्षरेणाह्वयते 'शसामोदैवोम्' इति पञ्चाक्षरेणाध्वर्युः प्रतिगृणाति। द्वादशाक्षरं भवति। तदिदं प्रथमं जागते जागतोत्पादनम्। तथा पश्चादपि शंसनानन्तरमाह (होता)। 'उक्थं वाचि इन्द्राय देवेभ्यः' इत्येतदेवैकादशाक्षरं भवति। अध्वर्युश्च 'ओम्' इत्येकाक्षरेण प्रतिगृणाति। तदुभयं मिलित्वा द्वादशाक्षरं भवति। तदिदमपरं जागते जागतपदस्थापनम्। एवं त्रिषु छन्दःसु त्रिषु गायत्र्यादिसवनेषु गायत्रादिच्छन्दस्त्रयपदप्रतिष्ठापनम्। एतत्सर्वमैतरेयब्राह्मणे 'देवविशः कल्पयितव्याः' (AB.3.12.) इति खण्डे विस्पष्टमाम्नातम्। तत्तादृशं छन्दसि च्छन्दस्थापनं य इत्तद्विदुर्ये च जानन्ति त एवामृतत्वमानशुः प्राप्नुवन्त्यनुष्ठानद्वारा। एवमजानन्तोऽनुष्ठानेनापि फलं न प्राप्नुवन्तीत्यर्थः। तस्य साकल्याभावादिति भावः Sy.

गायत्रेण[1] पादेन[2] । मन्त्रम्[3] । परिच्छिन्द्याद् बहूनि हि गायत्राणि पदान्युष्णिक्ककुभोरनुष्टुभि पङ्क्त्यां च[4] सम्भवात्[5] । साम्नः[6] परिच्छेदः[7] । अर्केण[8] भवति सस्थितायामृचि साम च सस्थितं भवति । अथ कियन्ति च्छन्दासीति जिज्ञासुस्त्रैष्टुभं[9] छन्दः प्रथमं प्रतिपद्येत । बहूनि त्रैष्टुभानि[10] वाक्यानि भवन्ति । ततोऽवशिष्टं[11] परिच्छिन्द्यात् । अथ सूक्तं[12] परिच्छेतुकामः । द्विपदा[13] त्रिपदा । चतुष्पदा[14] चर्चा परिच्छिद्य

---

१. गायत्रच्छन्दसा Sy. अत्र ... गायत्र्यादिभिर्गुणैः सगुणे ब्रह्मण्यहङ्ग्रहेणोपास्यमाने फलविशेषः प्रतिपाद्यते । गायत्रेण गायत्रसञ्ज्ञकेनोपासितेन ब्रह्मणा At.

२. अर्चनसाधनं मन्त्रम् Sy. सूर्यम् At अर्को मन्त्रो भवति यदनेनार्चन्ति N 5 4

३. प्रत्येकं परिच्छिनत्ति ... प्रतिमन्त्रं गायत्रेणच्छन्दसोपनिबद्धं करोति । उपलक्षणमेतदन्येषां छन्दसाम् । यद्वा । इतरेषां छन्दसामप्येवं चतुश्चतुरक्षराधिक्येन तत्तच्छन्दोभिः प्रतिमिमीत इत्यर्थः । यद्वा प्रतिशब्दः समित्येतस्मिन्नर्थे, छन्दोभिर्मन्त्रान्सम्मित (सम्मितान्) करोतीत्यर्थः Sy. गच्छति । धातूनामनेकार्थत्वात् At

४. यत्राग्नि M. ५. पदान्युष्णिगभोरनुष्टुबिव ... संभावात् M

६. गायत्ररथन्तरसञ्ज्ञक साम प्रतिमिमीते । ननु 'एकं साम तृचे क्रियते' इति तिसृष्वेकं साम विहितमतोऽर्कैः सामेति वक्तव्यं कथमुच्यतेऽर्केणेति? न। वस्तुत एक साम, एकस्यामृच्यारूढम् । पश्चादन्योन्या तदुत्तरयोर्गायति, इत्यतिदेशतः प्राप्तं तिसृषु गानम् । अत एकवचनमविरुद्धम् Sy. सामाभिमानिनीं देवतां सालोक्येन गच्छति At. ७. उक्तलक्षणेन मन्त्रेण Sy. तदनन्तरमर्केण प्रयोजकेन At.

८. अत्र त्रिष्टुबुपादानमितरच्छन्दःप्रदर्शनार्थम् । अथवाऽनादेशे सर्वत्र त्रिष्टुभो ग्रहणात्प्राचुर्याभिप्रायेणेदमुक्तम् । त्रैष्टुभेन द्विवारत्रिवारावृत्तेन Sy. त्रैष्टुभसञ्ज्ञकेनोपासितेन ब्रह्मणा At.

९. बृहतृचरूपं वाकं वक्तव्यमेकैकं छन्दः प्रतिमिमीते Sy. वाकं वागभिमानिनीं देवता प्रतिमिमीते At.

१०. ०विशि० D.

११. वाक सूक्तम् । एतावद्भिस्त्रिष्टुब्भिरुपनिबद्धमिदं सूक्तमिति तादृशेन वाकेन वाकं वर्गमनुवाकं वा मिमीते Sy. वाकेन प्रयोजकेन वाक महावाक्यमुपनिषदभिमानिनीं देवता प्रति मिमीते At.

१२. कीदृशेन वाकेनेति स विशेष्यते । ... पादद्वयबद्धविराडादिच्छन्दोनिबद्धमन्त्ररूपेण Sy. अथ क्रमप्राप्तं जागतं ब्रह्म त्यक्त्वा त्रैष्टुभब्रह्मणा तुल्यफलत्वात्प्रासङ्गिकविद्यात्रयमेकफलमाह । द्विपदा द्विपदा मन्त्रेण प्रतिपाद्य ब्रह्म । द्विपदा त्वेषा द्विपदी ब्रह्मविद्या । द्विपदा ब्रह्मणोपासितेन वाक प्राप्य तेन प्रयोजकेन वाकमुपनिषद्देवता प्रतिमिमीते At.

१३. चतुष्पदा पादचतुष्टयोपेतेनानुष्टुबादिमन्त्ररूपेणेति । इयतीभिर्द्विपदाभिर्वर्ग इयतीभिश्चतुष्पदाभिरुपेतो वर्गः । इयद्द्विपदरूपैर्वार्कैरियच्चतुष्पदरूपैर्वार्कैश्च परिमितोऽनुवाक इति । सूक्तपक्षे, एतावद्भिः सूक्तैरयमनुवाक इति Sy. चतुष्पदाऽनुष्टुभा बृहत्या च प्रतिपाद्यं ब्रह्म सामान्यसञ्ज्ञया चतुष्पात् । विशेषसञ्ज्ञयाऽनुष्टुभं बार्हतं चोच्यते । एषा चतुष्पदी ब्रह्मविद्याऽनुष्टुभी बार्हती चोच्यते । चतुष्पदा ब्रह्मणोपासितेन वाकं प्रतिमिमीत उपासकः At.

१४. परिछिन्द्यच्च P.

तृचं तृच चतुऋ्चमिति ब्रूयाद्, अथ किमिय गायत्री, उतोष्णिगिति परिच्छेत्तुमुपक्रान्ता । सप्त । छन्दांसि । अक्षरेण । मिमते=परिच्छिन्दन्ति, अष्टावक्षराणि भवन्ति तस्मादियं गायत्रीति ।

जगता सिन्धुं दिव्यस्तभायद्रथंतरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥२५॥

जगता सिन्धुम् । गायत्र प्रशसति गायत्र प्रवृद्धाक्षर भूत्वा । अन्तरिक्ष आदित्ये वा । उदकम् । अस्तभायत् । रथन्तरे च । सूर्यम् । पर्यपश्यद्यथा सूर्यो रथन्तरे तिष्ठति तथाऽकरोज्जागत सामोदक धारयति रथन्तरमादित्यमिति । गायत्रस्य साम्न । समेधिका. ।

---

१. ०तुः ऋ० P. ०तू रु० र+ऋ D. ०तू ऋ० M. २. ०मुक्ता० P.
३. सप्तसङ्ख्याताः At.
४. वागधिष्ठितानि सप्तच्छन्दांसि Sy. छन्दोरूपवागभिमानिनीर्देवता. At.
५. अक्षरेणैव Sy. गायत्र्यादिषु सगुणब्रह्मप्रतिपादकेषु महावाक्येष्वनुगतो यः प्रणवस्तमाश्रित्यापरास्ति ब्रह्मविद्येति ब्रह्मविद्याप्रसक्तानुप्रसक्त्या तामप्याह । अक्षरेणेति । अक्षरमिति यत्तत्प्रतिपाद्यब्रह्माप्यक्षरमुच्यते । अक्षरसञ्ज्ञकेनोपासितेन ब्रह्मणा At. ६ मिमीते D.
७. निर्माण कुर्वन्ति । अष्टाक्षरा गायत्री । एकादशाक्षरा त्रिष्टुब् द्वादशाक्षरा जगतीति । अक्षरैः पादाः परिमीयन्ते परिमितैः पादैश्छन्दांसि । ततः पादाना छन्दसामक्षर मूलमिति । तथा ऋग्वगसूक्तानुवाकादीना चाक्षरं मूलमित्यक्षरप्रशंसा Sy. गच्छति At.
८. प्रशंसितं D. प्रशं P. प्रकृतमवशिष्ट जागतं ब्रह्माधिकृत्योच्यते At.
९. Omitted by P. जगतीच्छन्दस्कायामुत्पन्नं साम जगत् तेन ब्रह्मा सृष्टिकाले Sy. जागतेनोपासितेन ब्रह्मणा At.
१०. द्युलोके Sy. स्वर्लोके At.
११. स्यन्दनशीलमुदकस्य स्यन्दकं वाऽऽदित्यम् Sy. समुद्राभिमानिनीं देवताम् At.
१२. स्तम्भितवान् । 'जागतो वा एष य एष तपति' इति श्रुतिः Sy. वशीकरोति At.
१३. एतन्नामके साम्नि Sy. द्युस्थानप्रसङ्गाद्विद्यान्तरमाह—रथन्तरे रथन्तरसामप्रतिपाद्यं यद् ब्रह्म तद्, रथन्तरसामप्रतिपाद्यत्वं सामाभिव्यङ्ग्यत्वमात्रम् । साम्नां वर्णपदवाक्यात्मकत्वाभावात् । रथन्तरे ब्रह्मण्युपासिते सति At
१४. स्तम्भित सूर्यम् Sy सूर्यं वशीकृतम् At.
१५. परिवृष्टवान्प्रजापतिः । तदाधारभूतायामृचि 'स्वर्दृशम्' (RV.VII.32.22.) इति सूर्यप्रतिपादकशब्ददर्शनात् । 'असौ वाव स्वर्दृक्' (ΛB.4.10.) इति हि श्रुतिः । अत एव तत्र सूर्यदर्शन विधीयते रथन्तरे 'प्रस्तूयमाने सम्मीलयेत् स्वर्दृशं प्रति वीक्षेत' (TMB.7.7.15.) इति सामब्राह्मणेन Sy. परितः पश्यति At.
१६. सूर्यं P. D.
१७. गायत्र्यामुत्पन्नस्य साम्नः Sy. अथ गायत्र्यादीनां रथन्तरान्तानां विद्यानां फलमाह । गायत्रस्याजहल्लक्षणया गायत्रादेः सप्तकस्य गणस्य गायत्रत्रैष्टुभजागतदृपदानुष्टभबार्हतरथन्तराख्यानां विद्यानाम् At. १८. ०धिताः D. समिन्धनाः Sy. फलाभिव्यञ्जकाः At.

तिस्रः[1]। आहुर्गायत्री त्रिष्टुभं जगतीमिति। तत.। तस्यैव[2] महत्त्वम्[3]। प्रकर्षेण[4] रिरिचे, चतुर्षु छन्दःसु[5] त्रीणि गायत्री समेधयन्ति, ता त्रिष्टुप् त्रिभिरक्षरैरुपैत्[6] सैकादशाक्षरा भूत्वा प्राजायत[7] तां जगत्येकेनाक्षरेणोपैत्[8] सा द्वादशाक्षरेत्यनुष्टब्[9] गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभतीति[10]।

उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम्।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ॥२६॥

उपह्वये। माध्यमिका वाग् गोरूपा भवति[11] ता स्तौति—उपह्वये[12]। सुदोहाम्[13]। धेनुम्[14]।

---

१. तिस्रो विभक्तीराहुः पादत्रयमाहुरित्यर्थः। अथवा तिस्र ऋच आहु· Sy. तिस्रो मूर्तयो भवन्ति। अयमर्थ.—गायत्राद्युपासकान् ब्रह्मा वा विष्णुर्वा शिवो वाऽवान्तरफलभोगानन्तरमार्चिरादिमार्गेण स्वर्काल्लोकान्नयन्ति। तत्र ते तदुपासकाना तारतम्येन तेभ्य फलविशषान्ददति। ब्रह्मादयस्त्रयोऽपि सगुण ब्रह्मेत्युच्यते। तेषा लोको ब्रह्मलोक इत्येवोच्यते At

२. ततो हेतो. Sy. ततो ब्रह्मलोकभोगानन्तरम् At.

३. महत्ता बलेन महित्वा महत्त्वेन Sy महत्ता महता विष्ण्वादिना सगुणेन ब्रह्मणा सह तवुपदिष्टसगुणोपासन श्रुत्वा क्षणमवधार्य ... महित्वा महत्त्वेन मुक्तत्वेन हेतुना At.

४. प्ररिच्यते। अन्यानि सामानि पृथक् पृथड् निर्मितवान्। यद्वा गायत्रशब्दश्छन्दोवाची तस्य तिस्रो मूर्तीराहुः क्रमेणाष्टाक्षरंकादशाक्षरद्वादशाक्षरंर्गायत्रीत्रिष्टुज्जगत्यात्मिकाः। यस्मादेव ततस्तस्माद् गायत्री छन्दसां कनिष्ठा सती महत्ता बलेन महत्त्वेन प्ररिरिचे सर्वाणि च्छन्दांस्यतिक्रामति येनैव बलेन सोममाहृतवती तावृशेनैवं भवति Sy. प्रकर्षेण प्रपञ्चात् पृथग्भवन्ति At.

५. ०न्दः M.

६. ०यन्ती त्रीं M

७ ०ष्टुतिभि० M.

८ प्रजा० P.D

९. तार M.

१० ०णौ M

११. स द्वादशाक्षर· सुरेत्यनुष्टुप् च M

१२ पदेन पदेनानुष्टुभो भवतीति M ०ष्टाभ० P

१३ VM ignores महत्ता

१४ ०न्ति M

१५ अह होता . उपेत्याह्वयामि Sy. उपग्राह्यत्वेन ह्वये स्वीकरोमि At अहं तावदुपह्वये SKN. उपगम्य मनसा ह्वय आह्वयेऽह स्तुतिभिः Dur.

१६. सुष्ठु दोग्ध्रीम् Sy. सुष्ठु दोहिकां शुभकर्मभिर्व्यासादिभिः सूत्रप्रणयनेन दुह्यमानत्वात् At
सुदोहनाम् SKN.
कल्याणमुदक या दुग्धे ताम् Dur.

१७. क्षीरेण प्रीणयित्री गा प्रवर्ग्यार्थाम् Sy. कामधेनुस्थानीयां, धिनोति प्रीणयतीति धेनुस्ताम् At.
उक्तनिर्वचनाम् SKN.
तर्पयित्रीं सर्वलोकस्य Dur.

१ २ ३ ४ ५ ६ ७ ८ ९
एताम्। कल्याणहस्तः। गोधुक्। अपि च। दोग्धि। एनाम्। श्रेष्ठम्। सवम्। सविता ।
१० ११ १२ १३ १४ १५ १६
प्रसौतु न=प्रेरयतु। अस्मान्। अभीद्ध । अयं धर्मः। ततोऽहमित्यम्। सुप्रब्रवीमि

---

१. आगच्छन्तीम् Sy. एतां प्रसिद्धां प्रकृतां चाध्यात्मपरां श्रुतिम् At. माध्यमिकां वाचं धर्मदुहं वा SKN. माध्यमिकां वाचम् Dur.

२. शोभनहस्तो दोहनकुशल· Sy. सुखहस्तः सुखकरः शङ्कराचार्यः स गोधुक् सूत्रवाचा तात्पर्यज्ञो भाष्यकारो व्यासादिसूत्रव्याख्यानद्वारा यथा गां श्रुतिं दोग्धि तथैव तवर्थो नान्यार्थ इत्यर्थः। यद्वा। उत एव स एव दोहद्दोग्धा, एनामुपनिषदम् At. शोभनहस्त. कुशल इत्यर्थः SKN.

३. ०धुङ् M. गोदोग्धाऽध्वर्युः Sy. व्याससूत्राणा भाष्यकरणद्वारा सूत्रवाचा दोग्धा At.
गोर्माध्यमिकाया दोग्धा, इन्द्रो धर्मदुहो वाऽध्वर्युः SKN

४. तथा At. उतशब्दोऽप्यर्थे SKN. अपि च मयैतामुपहूताम् Dur.

५. दोग्धि यस्मादेवं तस्मादुपह्वय इत्यर्थः Sy. सूत्रवाक्यतात्पर्यविवेचक एव श्रुतिं दोग्धि, तात्पर्यकथनेन श्रुत्यर्थसारं कथयति At. दोग्धु क्षारयतु SKN. प्रक्षारयतूदकानि Dur

६. दोग्धेनां M. उक्तलक्षणा गाम् Sy. ननु श्रुतिव्याख्यानरूपाणामपि दुर्बोधत्वात् सूत्रव्याख्यातश्रुत्यर्थो दुर्बोध एव तत्राह.. एना प्रकृता श्रुतिं ... दोग्धि At
७. श्रेष्ठं प्रशस्यम् Sy. नच शङ्कराचार्यो मर्त्यमात्रमित्यत आह श्रेष्ठमज्ञानलक्षणस्यान्तस्तमसो हन्ता At. किं दोग्धु? श्रेष्ठमतिशयेन प्रशस्यम् SKN. अमुना प्रकारेण ... अतिशयेन प्रशस्यमेतम् Dur.

८. सवं M. सोमयागं क्षीरं वा Sy. जन्म At. सूयतेऽभ्यनुज्ञायत इति सव उदकलक्षणः पयोलक्षणो वा तमभ्यनुज्ञात इत्यर्थः SKN. उदकम् Dur.

९. सर्वस्यानुज्ञाता परमेश्वरः Sy. आदित्यो यजमानो वा SKN.

१०. प्रब्रसौ० P. ०सो० D.

११. अनुजानातु Sy
आमादितवान् At.
सुवतु। अभ्यनुजानातु SKN. नित्यं ददातु Dur.

१२. अस्मदीयम् Sy. अस्मदर्थाम् । नृशब्दसम्बुद्धिरेष इति केचित् At. अस्माकम् SKN.

१३. तत्तादृशोऽभीद्धोऽभिदीप्तः Sy. तत्र सवितापि जीवमात्रमित्यत आह ... अध्यात्मप्रकाशितः At कस्मात्। (यस्माद्) ... अतिदीप्त. SKN.

१४. तच्छब्दश्रुतेर्यच्छब्दाध्याहार· । यद्यस्माद् धर्म· प्रवर्ग्यः। 'यद् ह्रां इत्यथतत्तद् धर्मस्य धर्मत्वम्' (TA. 5.1.5.) इति तैत्तिरीयकम् Sy.
'घृ क्षरणदीप्त्योः' विगलितावद्यः परमात्मैवात्र सूर्यपदेन विवक्षितो महापुरुष इति At
ग्रीष्मसन्तापो महावीरो वा SKN.
मध्यस्थानो विद्युदाख्यः Dur.

१५. तदुशब्द एवकारार्थः। तस्मादेव कारणात् Sy. तद्वाच्यं ब्रह्मैव At. ततस्तस्मादहम्। उकारः पादपूरणः SKN.

१६. ०मिमि M. सुष्ठु ब्रवीमि, उपह्वय इति Sy. सुष्ठु, असंशयं प्रकर्षेणाविपर्ययेणावोचमुक्तवानस्मि At.
सुष्ठु ब्रवीमि SKN.
इति तं सुष्ठु प्रब्रूमः Dur.

दोहार्थम्।

हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात्।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥२७॥

हिङ्कृण्वती। वत्ससन्दर्शनाद्धिङ्कृण्वती। वसूना पालयित्री। वत्सम्। मनसा। इच्छ-

---

१. दोहाय M. यद्वा। एता पुरतो दृश्यमानां धेनुं वृष्टया प्रीणयित्रीं मेघलक्षणां धेनुमुपह्वय आह्वयामि वर्षदोहाय। किञ्चैना धेनुं सुहस्तः शोभनदोहनकुशलहस्तोपेतो गोधुक्, गोदोग्धाऽदित्यो वा वायुर्वा दोहद् दोग्धि तदधीनत्वाद्वर्षणस्य। किञ्च तवर्थं सविता प्रेरकः परमेश्वरोऽस्मदर्थमस्मदुपभोगादृष्टमपेक्ष्य साविषदनुजानातु। प्रतिबन्धं मा करोत्वित्यर्थः। किमितीदमुच्यते, धर्मो ग्रीष्मोऽवर्षणजनितसस्यशोषोऽभीद्धः प्रवृद्धः। तदु षु प्रयोच तस्मादेव कारणाद् ब्रवीमि Sy. धर्मधुक्पक्षे—धेनुरेव धेनुस्तामुपह्वये। सुदुघा सुदोहां धेनुमेतामस्मिन्कर्मण्यङ्गभावमुपागताम्। होता ब्रवीति-मया चैवमुपहूता सुहस्तो गोधुगध्वर्युरपि च दोग्ध्वेनां श्रेष्ठमतिशयेन प्रशस्यमेत सवमेत्तद्यजुष्मत्पय. साविषत्सुनोतु, अभ्यनुजानातु सविता। यद्धि सवित्रा प्रसूतं क्रियते तदेव साधु भवति। अभीद्ध एष धर्मो रुचितो महावीरः। तमधिकृत्य प्रब्रूमः Dur. धेनुर्धयतेर्वा, धिनोतेर्वा। ...तस्या एषा भवति। ... उपह्वये। सुदोहनां धेनुमेतां कल्याणहस्तो गोधुगपि च दोग्ध्र्येना श्रेष्ठ सवं सविता सुनोतु न इत्येष हि श्रेष्ठ. सर्वेषा सवानां यदुदकं यद्वा पयो यजुष्मदभीद्धो धर्मस्तं सु प्रब्रवीमि। वागेषा माध्यमिका। धर्मधुगिति याज्ञिकाः N. 11.43; SKN. IV. 89.

२. VM. ignores उ

३. ०ति P. Omitted by M. श्रीशङ्कराचार्यव्याख्या ब्रह्मविद्यैव निष्कृष्यत इत्याह At.

४. ०गां M. यथाऽऽहूता गौः... वत्सं प्रति हिङ्कारं कुर्वती Sy. 'हि गतौ वृद्धौ च' हि प्रसिद्धं गतमनुभवसिद्ध च देशकालानवच्छिन्नं सर्वशास्त्रप्रसिद्धं च हिड् ज्ञानं यस्य तद् ब्रह्म हिड्। "पञ्चमा ज्ञानवाचकाः" इत्येकाक्षरनिघण्टुः। 'ब्रह्मैव हिङ्कारः' इति श्रुतिः। त वत्स हिङ्कृण्वती ब्रह्म कुर्वती ब्रह्मभावं नयन्ती At हिड्डित्येवं रूप स्तनयित्नुलक्षणं कुर्वती SKN हिड्डित्येवं प्रकारं शब्दं स्तनयित्नुं कुर्वती Dur

५. वसुपत्नी क्षीरदध्याज्यादिबहुधनानां सर्वदा पालयित्री। वृत्र्यवृत्तिभ्या वसुन. पालयितृत्वं तस्यैवाधिक्यं च प्रतिपाद्यते Sy. ब्रह्मविद्या, वसू देवौ जीवपरमात्मानौ वसनौ छादनशीलौ पती ईशौ विषयत्वेन पतनीयौ ज्ञापनीयौ यस्याः सा वसुपत्नी जीवपरावेकत्वेन प्रकाशयन्ती At. वसु धन वृष्टयुदकाख्यं तस्याधिपतिभूता, वसूना वसव आदित्यरश्मयो मरुतो वा तेषाम् SKN. वसूनामुदकानामीश्वरी वसूनां वाऽऽदित्यरश्मीना मरुता वा Dur.

६. पुनः कीदृशी ? वसूनां वत्समिच्छन्ती। वसुरिति रश्मिनाम देवतानाम च। वामदेवादीनामंशानां देवतात्वेन भावितात्मनां ब्रह्मविद्याचार्याणा वत्सं पुत्रं भावितं शिष्यमिच्छन्ती, At. रसहरणाद् वत्सं वत्सभूतमादित्यम् SKN. वत्स आदित्यो मध्यस्थानो वा रसहरणाद् वत्सस्तम् Dur.

७. 'मनो निर्वचनकर्मा' मननेन गुरुवचनेन At.

१ २ ३ ४ ५ ६ ७ ८
न्ती। अभ्यागात्। दुग्धाम्। अश्विभ्याम्। पयः। अहन्तव्या गौः। इयम्। सेयमस्माकम्।
९ १० ११ १२
महते। सौभाग्याय। वर्धताम्।

---

१. ममायमस्त्विति काङ्क्षन्ती At.

२. ०ति P. ईदृशी सा ... अभ्यागमत् Sy. अभि, आगादागच्छति। अत्यादरादेव निश्चितार्था भवतीति शिष्यस्यात्मसाद्भवति। श्रद्धया हृदि स्थिरा भवति At अभ्यागच्छति SKN. या माध्यमिका वाङ् नित्यमभ्यागात् Dur.

३. दुह्यते।...द्विकर्मको दुहिः। कर्मणि प्रत्ययः। द्वितीयाच्छान्दसी At. दोग्धि वेत्यर्थः SKN. वर्षाय ... प्रक्षरताम् Dur.

४. ताभ्यामर्थाय Sy. इन्द्रियाश्विभ्यां गुरुशिष्याभ्याम् At तादर्थ्ये चतुर्थी। अश्विनावत्र द्यावापृथिव्यौ सूर्याचन्द्रमसौ वोच्येते। कुत एतत्? कावश्विनाविति प्रकृत्यैवमाद्यर्थप्रदर्शनात्। तयोरश्विनोरर्थायेत्यर्थ. SKN. द्यावापृथिवीभ्या सूर्याचन्द्राभ्यां वा Dur.

५. फलम् P. क्षीरम् Sy. परमानन्दाख्यं पयः।...पयो ब्रह्मामृतं क्षीरञ्च At. उदकं वृष्टिलक्षणम् SKN. उदकम् Dur.

६. आह तस्या P. गोनामैतत्। अहननीया गौः Sy. गोश्चात्र श्रुतिः। अघ नयन्त्यहन्तव्या त्वनित्या, पापहन्त्री At. माध्यमिका वाक् SKN

७. आगता Sy. उपनिषल्लक्षणा महावाक्यलक्षणा सा At. पञ्चात्मा वर्धतामिति तच्छब्दश्रुतेर्यदध्याहारः, या SKN.

८. तादृशी Sy. ९. प्रवृद्धाय Sy. तत्प्रवृद्ध्योदकजन्याय महते SKN.

१०. सौभाग्याय Sy. महानन्दाय, महानन्दमनुभवितुं, यावदानन्दाविर्भावस्तावदित्यर्थः At. सुभगत्वायास्माकमित्यर्थः SKN. यथा महत्सौभाग्यं धनवत्त्वं स्यात्तथा Dur.

११. प्रवृद्धा भवतु Sy. दीर्घा भवतात्। असकृदावर्तमाना। दीर्घकालमनुवर्तते At. रूपेण विद्योतनालक्षणेन वृष्टयुदकेन वर्धताम् SKN. अमुना प्रकारेण प्रतिसवत्सरं वर्धताम् Dur.

१२. यद्वा। अस्मै सौभगाय क्षीरं वर्धयताम्। अत्रापि वृष्टिपरत्वेन यथायोगं योज्यम्। हिङ्कृण्वती वर्षणाय शब्दयन्ती, वसूनां गोसस्यादिधनाना बहूनां वसुपत्नी तेषामेव पालयित्री, वत्सं लोक वत्सवत्पोषणीयं, मनसा, इच्छन्ती प्रीणयितुमभ्यागादभिगच्छति मेघरूपा। सा चाघ्न्याऽहन्तव्या। प्रस्तुत्येत्यर्थ। पय उदकमश्विभ्यां व्याप्ताभ्या स्थावरजङ्गमाभ्यामर्थाय। यद्वा। अश्विनौ वाय्वादित्यौ ताभ्यां सकाशाद् दुहा दुग्धाम्। तौ हि वृष्टेर्मोचयितारौ। शिष्टमविशिष्टम् Sy. इतरपक्षे–अघ्न्या धर्मधुक् सा हीत्येवं रूपं शब्दं कुर्वती, वसुपत्नी पय आवेधनस्याधिपतिभूता, वसूनां वसवो हविर्भिः स्तुतिभिर्वा देवानामाच्छादयितार ऋत्विग्यजमाना इहाभिमतास्तेषाम्। षष्ठीश्रुतेः स्वभूत वत्समात्मीयमिच्छन्ती मनसाभिगच्छन्ती दोग्धि च प्रवर्ग्येऽश्विनामश्विभ्यो वार्थाय। कि दोग्धि? पय.। अघ्न्या धर्मधुक्। इयं गौः सर्वकर्मण्यध्वर्युणा दोहार्थमाहूयमाना पयसा वर्धताम्। महते सौभगाय सुभगत्वायास्माकमिति SKN.

VM. ignores वसूनाम्।

This stanza occurs in N. 11. 45; SKN. IV. 90

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्कांणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥२८॥

गौरमीमेत् । मिषन्तम् । वत्सम् । प्रति । गौ । शब्द करोति ।

---

१. भिषगं P. रिषणं D. निमीलिताक्षम् Sy. 'मिष दर्शने' पश्यन्तम् । सर्वदा ज्ञानमारूढम् At. पश्यन्तं जगत्सर्वम् SKN. अव्यवहितदर्शनं सर्वदा Dur.

२. पुत्रभावमापन्नं शिष्यं ब्रह्मविद्यायामुपविष्टम् At. रसहरणसामान्यादात्मनो वत्सं वत्सभूतमादित्यम् SKN. पुत्रम् । ... आदित्यं, स हि तस्या रसहरणाद् वत्सः Dur.

३. अनु प्राप्य Sy. अनु, उपलक्ष्य । अनेनारूढभाव प्रतिपन्ने शिष्ये प्रवृत्तिर्दर्शिता At.

४. धेनुः Sy. श्रुतिः At. मध्यस्थाना वाक् SKN. माध्यमिका वाक् Dur.

५. मीमयतिश्शब्दकर्मा । यद्वा । उक्त वत्समन्वात्मानं प्रक्षिपति Sy. पलायते At मीमयतिः शब्दकर्मा ... स्तनयित्नुलक्षणेन शब्देनानुशब्दयति SKN अनुशब्दयति महद्भिः स्तनयित्नुशब्दं. Dur

६. किञ्च तस्य वत्सस्य मूर्धानं मातवै मातुं निर्मातुं लेहनेन शोधयितुम् । उशब्दोऽवधारणे । हिङ्ङकृणोद् हिङ्कारमकरोत्करोति । किञ्च सृक्वाणं वत्सस्य शब्ददवदनप्रान्तं फेनस्य स्रष्टारं, घर्मं क्षीरस्य क्षरणशीलं वत्समभि, अभिलक्ष्य वावशाना भृशं कामयमाना, मायुं शब्दं, मिमाति निर्माति करोति । तादृशी सती पयोभिः प्रभूतैः क्षीरैः, पयते प्यायत आप्यायन करोति वत्सम् । अत्रापि मेघपरतया योजनीयम् । एवमाहृता मेघरूपा गौर्धेनुर्मिवत्सं वृष्टिरूपक्षीराभावेन निमीलिताक्षं लोकाख्यं पुत्रमनु, अनुसृत्यामीमेद् गर्जनशब्दं वर्षणचिह्नरूपं करोति । मूर्धस्थानीया भूमिं मातवा उ निर्मातुमेव सस्यादियुक्ता कर्तुं हिङ्ङकृणोद् हिङ्कारशब्दरूपं शब्दमकरोत् । प्रतिपादनभेदादपुनरुक्तिः । किंच सृक्वाणं फलस्य स्रष्टारं घर्मं दीप्तं पुत्रमभि वावशानाऽऽभिमुख्येन कामयमाना पयोभिरुदकैः पयते प्यायत आप्यायनं करोति Sy. अथ तदधरमनुभाविनं प्रत्याह—हिङ् ब्रह्मेदमुक्तं पूर्वमन्त्रे । मातवा उ .. अन्तर्भावितोऽत्र व्यर्थः । मापयितु ज्ञापयितुमेव पूर्वोक्तं वत्सं मूर्धान मुख्यं प्रवर्तक श्रुतौ स्मृतौ चोपदेष्टारमज्ञानहिंसकमकृणोत् करोति । ... अनुभवी तु लोकहितकर्ताऽऽत्मानं परं च संसारादुद्धरति । स हि ब्रह्म तत्त्वमसीति बोधयति शिष्यम् । अथ तदधरमभ्यासिनं प्रत्याह । सृक्वाणम् ... सृक्वा वदनैकदेशश्चर्वणाद्वार इति भट्टभास्करमिश्र आह । लेलिहान इत्यपरे । सृक्वाणं प्रयतमानमित्यर्थ. । अभ्यस्यन्तमभ्यासिनमभि लक्षयित्वा वावशाना स्निह्यतो हितकारिणी श्रुतिरभ्यासकालवर्जं मिमाति प्रतिपादयति धर्मज्ञं धर्मं नित्यनैमित्तिकात्मकम् । अथ तदधरं मुमुक्षुं प्रत्याह—मा प्रमा प्रमितिमात्मन इच्छन्तं वत्सं जिज्ञासुं मुमुक्षु पयते । 'अय पय गतौ' गत्यर्था ज्ञानार्थाः । अन्तर्भावितण्यर्थः । बोधयति पयोभिर्गमकैर्हेतुभिर्विचारैः At. मूर्धानं चास्य रश्म्याख्यं मध्यमस्थानमागतं प्राप्येति शेषः । हिङ्ङकृणोद् हिङ्कारोति । मातवा उ उकारः पदपूरणः । मातवै मातुं मन्तुं वा ज्ञातुम् । ज्ञानायोद-

अयं स शिङ्क्ते येन गौरमीमृता मिमाति मायुं ध्वसनावधिं श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥२९॥

१ २
अयं स —

कस्येत्यर्थः। न च सकृदनुशब्दयति किन्तर्हि? सृक्वाणं सर्तेरेतद्रूपं, घर्मं हरतेरेतद्रूपम्। हर्तरि च रसानामादित्यम्। अभि वावशानाऽत्यर्थमभिशब्दयन्ती मिमाति पुनः पुनर्मीयते। मायु स्तनयित्नुलक्षणं शब्दम्। पयते, प्यायतेर्वृद्धघर्थस्येदं रूप प्रप्यायते प्रवर्धयते च। केन, पयोभिः स्वेन वर्त्तरुदकैः। गौरन्वमीमेद् वत्सं मिषन्तमादित्यमिति पाठः। अनिमिषन्तमित्यपपाठः। प्रप्यायते पयोभिः। वागेषा माध्यमिकेति नैरुक्ताः। घर्मधुगिति याज्ञिकाः। अतस्तदभिप्रायेणान्यथा मन्त्रस्य योजना। गौर्घर्मंधुक् साऽनुशब्दयति वत्सं मिषन्त तामेव मातर निरीक्षमाणम्। मूर्धनि चास्य जिघ्रतीति शेष। हिङ्करोति मातर्वं ज्ञानायात्मनः। स एवायं मदीय उतान्य इति। सृक्वाणमित्यादि समानयोजनम्। पयते प्यायते वर्धते च। पयोभिः प्रस्नुतपीवरस्तनी बहुक्षीरा भवन्तीत्यर्थः SKN अपि च मूर्द्धानं शिरो रश्मीनस्य मध्यस्थानप्राप्तं प्राप्य ... हिङ्कारेणोपशब्दयति। मातर्वं सर्वलोकज्ञानाय। उदकाना सृक्वाणं सरणमनवस्थायिनमादित्यं, घर्मं हरण रसानाम्। अभि वावशाना पुनः पुनर्वाश्यमाना, वाशन्ती प्रतिसवत्सरमेव मिमाति मायुं शब्दं करोति। पयते प्रप्यायते च प्रकर्षेण वर्धते पयोभिरुदकैः। घर्मधुक्पक्षे—गौरेव गौरन्वमीमेदनुशब्दयति वत्समेव ... मिषन्तं तमेवोन्मुखं पश्यन्तम्। अपि च प्राप्य मूर्द्धानमस्योपाघ्राय हिङ्हिङित्येवं शब्दं करोति। स हि गोः स्वभावः। मातर्वं कथं नामायं मां जानीयान्ममेयमिति। सृक्वाणं तामेव प्रत्यभिमुखं सरणं घर्मं हरणं पयसाम्। अभि वावशाना पुनः पुनर्वाश्यमाना प्रत्यहमेव शब्दं करोति। प्रप्यायते च पयोभिर्वत्समस्मांश्च या वर्धयति सा नित्यमेवमस्त्विति Dur. गौरन्वमीमेद् वत्सं निमिषन्तमनिमिषन्तमादित्यमिति वा। मूर्द्धानमस्याभि हिङ्डकरोन्मननाय। सृक्वाणं सरणम्। घर्मं हरणम्। अभि वावशाना मिमाति मायुं प्रप्यायते पयोभिर्मायुमिवादित्यमिति वा। वागेषा माध्यमिका। घर्मधुगिति याज्ञिकाः N. 11.42; SKN. IV. 88.

७ VM ignores मूर्धानमित्यादि

१. वत्स· Sy. विचारप्रवृत्तिरपि स्वप्रज्ञाकारिता नैव हिताय, किन्त्वाचार्यप्रवर्तितैवेति वक्तुमाचार्योपदेश उच्यते—अयं जीव एव At.
माध्यमिका वागत्र देवता सा चैश्वर्ययोगाच्छरीरेणैवोभयलिङ्गा। एतस्यामृच्युभयलिङ्गैः शब्दैरादिश्यमानत्वात्। आह—... इयं सा ... या माध्यमिकाया वाचोऽधिष्ठात्री देवता। ... अथवा 'अयं सः' इति नैव माध्यमिका वाङ् निर्दिश्यते। किन्तर्हि? मेघः। तत्स्थायां च माध्यमिकायां वाचि शिञ्जानायां स एव शिङ्क्त इत्युच्यते। यथा मञ्चस्थेषु मनुष्येषु क्रोशत्सु 'मञ्चाः क्रोशन्ति' इति। अयं स मेघः शब्दं करोति SKN.
अयं स मेघः Dur.

२. स्वस्य परोक्षग्रहं प्रतिपन्नः At.

शिङ्क्ते[1]। येन[2]। माध्यमिका वाग्[3] देवी। परिवृता[4]। शब्दम्[5]। करोति[6]। ध्वसने=मेघे[7]। अधिश्रिता[8]। सा[9]। कर्मभि[10]।

---

१. अव्यक्तध्वनिं करोति Sy. एकान्त उपदिशति। 'शिजि अव्यक्ते शब्दे' At. स्तनयित्नुलक्षणं शब्दं करोति SKN. शब्दमिव करोति। न च तावदसौ शब्दं करोति। अयं च तावन्माध्यमिकायां वाचि तत्स्थायां शब्दं कुर्वत्या तत्साहचर्याद्विज्ञायते स एव मेघः शब्द करोतीति Dur

२. वत्सेन Sy शिञ्जनकर्त्राऽऽचार्येण At यया SKN. येन मेघेन Dur

३ गौर्माता Sy श्रुतिः At वाङ्नामैतद् वाङ् माध्यमिका SKN, Dur.

४. आगत्याभितो वेष्टिता भवति Sy. अनुप्रयोगादन्वर्था कृता At अभिव्याप्ता, अधिष्ठितेत्यर्थ। ..येन मेघेन माध्यमिका वागभीवृता, अभिव्याप्ता। अभीत्येष परीत्येतस्य स्थाने परिवृता SKN अभिप्रच्छादिता सती Dur

५. किं च सा गौः ...शब्दम् Sy. मायु प्रमितिमात्मन इच्छन्तं मायावन्त वा। मतुपो लोपः 'मायुर्वचसि मायायाम्' इति निघण्टुः At. मायुरिति वाङ्नाम, वाचं स्तनयित्नुलक्षणाम्। अथवा मायुरादित्य उच्यते। स हि मिनोति प्रक्षिपति सर्वत्र स्वं ज्योतिरतो मायुरादित्यः। लुप्तोपमश्चात्र द्रष्टव्यः। मायुसदृशम् SKN. 'मायुः काकुत्' (Ngh. 1.11) इति च वाङ्नामसु पठितम्। ... अथवा मायुरादित्यो भवति। सर्वभूतनिर्माता। तमिवात्मानम् Dur.

६. निर्मिमाति Sy. अध्यधिकं यथा तथा मिमाति बोधयति At. निर्मिमीते, करोति। . . . यादृश आदित्यस्तादृश तेजस्विनं निर्मिमीत इत्यर्थ.। कम्? सामर्थ्यादात्मानम् SKN. निर्मिमीते Dur.

७ ध्वसनस्थाने गवां निवासाश्रयेऽधिष्ठिता Sy. अन्यत्र ध्वंसने शब्दे तद्देशे नासाग्रे च वर्तते यद्यपि तथापि प्रकृतानुपयोगादन्यार्थता। धुरिति मनुष्यनाम। अस्यति प्रेरयतीत्यसनः परः। द्वन्द्वसमासः। ध्वसनौ जीवपरौ At. उदकध्वसने तस्मिन्नेव मेघे SKN. उदकध्वसन उदकस्रंसने मेघे Dur

८. अधिष्ठिता Sy. विषयीकुर्वती At आश्रिता SKN. अयं तावदर्धर्चो मेघान्तर्वर्तिन्या वाचोऽनभिव्यक्तविद्युद्रूपाया अभिधायकः। मेघरूपत्वात्पुरुषत्वाभिप्राय. Dur

९ सा तादृशी Sy. सा गौः At. यैवंलक्षणा वाक् कर्मस्वरूपा मेघशरीरा वा सा Dur

१०. ज्ञानैस्तत्पूर्वकैः कर्मभिर्वा Sy. चिन्तनाभिर्विवर्तनीभिर्युक्तिभिर्विद्युदपरोक्षरूपा भवतीति। प्रमाणजनितज्ञानस्यैवाविद्यानिवर्तकत्वादेवमुक्तम्। कार्यकारणयोर्भेदोपचारः। श्रुतिरेव प्रमाणमस्माकम्। श्रुतिजनितं ज्ञानमेव मननादिहीयमानसंशयादिदोषमपरोक्षं ज्ञानं भवति At. स्वैश्चित्तिभिः। अपठितमपि सामर्थ्यात्कर्मनामैतत्। कर्मभिर्बुद्धिलक्षणैः SKN. कर्मभिः स्वैश्चटचटाशब्दकर्मभिः Dur.

नि करोति। मर्त्यम्। विद्युत्। भवन्ती। प्रत्यूहते च। स्वम् रूपं तिरोभव-

---

१. नी० M. नीचैः करोति। ज्ञानविशिष्टा मनुष्या यथा बालकस्यावनस्तनपानादिस्नेहं कुर्वन्ति ततोऽप्यतिशयमियं करोतीत्यर्थः Sy. निराकरोत्। निकरो न्यक्कारः। अपरोक्षज्ञानेन मिथ्यात्वबोधमात्रं क्रियते न विनाशः। तेन बृशिव्यवहारो न लुप्यते At. हिशब्दः पदपूरणः। नियमेन करोति। उत्पादयतीत्यर्थः। ... अथवा चित्तिभिर्दारुणरूपैश्चटचटाशब्दैर्भयङ्करैः कर्मभिर्विद्योतनलक्षणैर्नि चकार नीचैः करोति मर्त्यं मनुष्यम्। सर्वो हि मनुष्यो विद्युति विद्योतमानायां भीतो नीचैर्नमति तदभिप्रेत्यैतदुच्यते नि चकार मर्त्यमिति SKN. नीचैः करोति। ... सर्वो हि बिभ्यत्तस्या आसीदत्यवनमति च Dur.

२. मर्त्या P. अनित्यप्रपञ्चम् At. मरणधर्माणं कृत्स्नं स्थावरजङ्गमम् SKN मनुष्यम् Dur.

३. वि P. बहुक्षीरतया विद्योतमाना Sy. नन्वपरोक्षज्ञानाश्रितः प्रपञ्चः कथं तेन शिष्ज्जनकर्त्राऽऽचार्येण दृश्यते व्यवहीयते च तत्राह विद्युद्भवन्ती सा गौः At. किं पुनः कुर्वती मिमाति मायु नि चकार मर्त्यम् ? इत्युच्यते। ... विद्युद्रूपमापद्यमाना SKN. विद्युदात्मना स्त्र्याख्येनाभिनिर्वर्तमाना। तदा हि दारुणश्चटचटाशब्दो भवतीति विशेषेण भयङ्करो न तथा विद्युद्रहितः। सैवमात्मानमाविष्कृत्य विद्युद्रूपेण विक्षिप्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीं ततो वर्षव्युपरमे Dur

४. भवन्ति P.

५. ०हेत P. प्रकाशयति। यद्वा वत्सस्नेहातिशयस्वरूपं विद्युद्भवन्ती विद्युदिव शीघ्रदर्शना, औहत। अयमेकोऽर्थः Sy. प्रत्यूहो विघ्नो व्यहन्यत स्वयमेवोपरमति At. ऊहतिरत्र सामर्थ्यानुपसंहारार्थः प्रत्युपसंहरति SKN. अवश्यं करोतीत्यर्थः Dur.

६. स्वकीयं रूपम्। वन्निरिति रूपनाम Sy. निवर्तकज्ञानस्य रूपम् At. रूपमुदकलक्षणम्। रसांश्च रश्मिभिः प्रत्यावत्त इत्यर्थः SKN. रूपमात्मीयम् Dur.

७. ०वन्ती० P. अर्थान्तरं च। शाकपूणिर्नाम निरुक्ताचार्यः सकलमन्त्रदेवता जानामीत्यभिमानितवान्। दुर्ज्ञेयस्य तत्त्वस्य स्वरूपमसौ जानाति किलैनं व्यामोहयामीति मनसि कृत्वा सन्दिग्धोभयलिङ्गा देवता प्रादुरासीदथ तस्य पुरतः। स च तां न बुबुधे। बुभुत्सया च ता स्वरूप प्रदर्शयेति पप्रच्छ। सा च, 'अयं स शिड्क्ते' इत्येषा महदेवता तत्र प्रतीयमानं मत्स्वरूपमित्युपविवेश (N. 2.8.) कथमत्रोभयलिङ्गत्वं, वस्तुत उभयलिङ्गत्वे कथं वैवतैक्यमित्युच्यते। अत्रोभयलिङ्गत्वमुभयथा सम्भवति स्त्रीपुंल्लिङ्गद्वयेन मध्यमोत्तमलिङ्गद्वयेन च। तत्कथम्। 'अयं स येन' इति पुंल्लिङ्गवाचिना शब्दत्रयेण मेघः प्रतीयते 'अधिश्रिता सा' इत्यादिना स्त्रीलिङ्गवाचकेन माध्यमिका वाक्। अत उभयलिङ्गत्वम्। तथा 'विद्युद्भवन्ती' इत्यन्तं मध्यमलिङ्गं तत्र मेघस्तनितयोर्माध्यमिकयोः प्रतीतेः। तथा सति 'वन्निरौहत' इत्यत्र वर्षेण पृथिवीं प्रच्छाद्य तस्या रसं प्रत्यावत्त इत्ययमर्थो विवक्षितः। स चादित्यव्यापार इत्युत्तमलिङ्गत्वम्। तर्हि वस्तुत उभयलिङ्गत्वप्रतीतेरुभे अपि देवते 'यल्लिङ्गं सा

तीति।[1]

देवता' (KSA. 1.139.) इति न्यायात्। अतः कथमेकदेवतासिद्धिरिति। 'अयं स येन' इत्येतेषां व्यत्ययाश्रयणेन सर्वदेवतानामधिष्ठात्मिकाया एकत्वाश्रयणेन वा सर्वफलदात्रात्मन एकत्वाश्रयणेन वा देवतैक्योपपत्ते.। अनेन मध्यमोत्तमभेदेनोभयलिङ्गत्वपक्षेऽपि देवतैक्यमुक्तं भवति। अतः 'एकैव वा महानात्मा देवता' इत्युक्तत्वाद् वस्तुतो देवतैक्यमधिष्ठात्रधिष्ठानभेदेन भेदश्च न विरुध्यते। अयं स शिङ्क्ते। इयं सा माध्यमिकाया वाचोऽधिष्ठात्री देवता शिङ्क्तेऽव्यक्तध्वनिं करोति। येन गौरभीवृता। गौरिति वाङ्नाम। माध्यमिका वाग् ययाभिवृताऽभितो व्याप्ता, अधिष्ठितेत्यर्थः। सेयं शिङ्क्ते। अथवा 'अयं स शिङ्क्ते' इति नैव माध्यमिका वाङ् निर्दिश्यतेऽपि तु मेघ·। तस्यां वाचि शिञ्जानाया स एव शिङ्क्त इत्युपचर्यते 'मञ्चाः क्रोशन्ति' इतिवत्। अयं स मेघ. शब्द करोति येन माध्यमिका वागभिव्याप्ता। शब्दने प्रकार एवोच्यते। मिमाति मायु स्तनितलक्षणं शब्दं करोति। अथवेयं लुप्तोपमा। मिनोति स्वतेज. सर्वत्र प्रक्षिपतीति मायुरादित्यः। तमिवातिदीप्तं करोतीत्यर्थः। अथवा सामर्थ्यादात्मानमादित्यसदृशं निर्मिमीते। कुत्र स्थिता ध्वसनावधि श्रिता। ध्वंसने मेघेऽधि श्रिता। सा, ईदृशी चित्तिभिः कर्मनामैतत्। स्वकर्मभिर्वृष्टिरूपैर्मर्त्यं मरणधर्माणं स्थावरजङ्गमरूपं कृत्स्नं जगन्नि हि चकार नीचैः करोति। मनुष्यान्प्रणतान्करोति। ओषध्यादिकं फलेनावनतं करोति। अथवा चित्तिभिर्द्योतनलक्षणैः कर्मभिः। विद्युति विद्योतमानायां (यां) प्रतिवव्रिमौहत। वव्रिरिति रूपनाम। ऊहतिरत्र सामर्थ्यादुपसंहारवाची प्रत्युपसंहरति। उदकलक्षणं रूप पुनरादत्ते। रश्मिद्वारा वृष्टमुदकं पुनर्घर्मकाल आदत्ते। एकस्यैव ज्योतिषस्त्रेधाकरणाद् विद्युतः सूर्यरश्मिभाव उपपद्यते।...स्तनितस्य विद्युद्भावो मेघविद्युत्स्तनितानामभेदाभिप्रायेण Sy. यस्मिंस्तु पक्षे, मध्यस्थानलिङ्गा द्युस्थानलिङ्गा चेति तस्मिन्पक्षे मेघरूपत्वमविवक्षितमेव। वाचो विद्युद्रूपत्वं च। किन्त्वेतावद्विवक्षितं, मेघाश्रया शब्दवती भूत्वा माध्यमिका वाग् विद्युतात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्षमुदकरूपभूतं जलाशयेभ्यश्चादित्यात्मना स्थित्वा तत्पुनरादत्ते। विद्युदात्मना मध्यस्थाने स्थित्वा वर्षति। आदित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः।... सेयमेकैव देवता मध्यस्थाना विद्युद्रूपा, द्युस्थाना वाऽऽदित्यरूपा। इत्ययमेवंलक्षणो देवतातत्त्वसन्देह उपेक्षितव्यो मन्त्रदर्शनाच्च निर्वक्तव्य इत्ययं मन्त्रसङ्क्षेपार्थः Dur. अयं स शब्दायते। येन गौरभिप्रवृत्ता मिमाति। मायुं शब्दं करोति। मायुमिवादित्यमिति वा। वागेषा माध्यमिका। ध्वंसने मेघेऽधि श्रिता। सा चित्तिभि·(कर्मभिर्नीचैः) नि करोति मर्त्यम्। विद्युद्भवन्ती प्रत्यूहते वव्रिम्। वव्रिरिति रूपनाम। वृणोतीति सतः। वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते N. 2.9; SKN. II. 66.

१. VM. ignores अयम्। सः। शिङ्क्ते and हि

अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥३०॥

अनच्छये[1]। यत् प्राणिति[1]। जीवति[2] च। तूष्णंगमन[3] भूत्वा। रात्रिषु शेते[4]। तथा यदेजति[5] तत्। गृहाणाम्[6]। मध्ये। आगच्छति[7]। जीव.[8]। रात्रिषु[9] मृतस्य[10] पुरुषस्य। दिवाभुक्तैरन्नै[11]। धार्यमाणो[12] वर्तते[13]। अमरणधर्मा[14]। मरणधर्मणा[15]। समानस्थान[16] शरीरेणेति रात्रि स्तौति[17]।

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥३१॥

अपश्यं गोपाम्। तथा रात्र्या वर्तमानायामुदित सूर्य स्तौति। अत्र वाजसनेयकम्—

---

१. प्राणनं कुर्वत् Sy. 'अन प्राणने' प्राणधारणक्रियायोगात् At.
२. जीवनवत् Sy ब्रह्मैव जीव उच्यते At
३. स्वव्यापाराय तूष्णंगमन सत् Sy. स्वप्ने तुरेण त्वरावता केवलेन मनसैव गमनशीलम्। ततो जागरे विषयवायुविक्षिप्तप्रायम् At.
४. वर्तते Sy. शिष्ये। ..सुषुप्तावज्ञानमात्रोपाधिकम् At.
५. सर्वतः कम्पते। दृढमेकरूपमप्यनाद्यविद्याया ईशाश्रिताया अंशे जीवज्ञान कारणदेहस्थित ब्रह्म जीवः सुप्तिवदिव भवति। ततः कारणदेहकार्ये लिङ्गे स्थितं जीवान्तरं स्वप्नवदिव भवति। ततो लिङ्गकार्यस्थूलदेहे स्थितं ब्रह्म जागरवदिव भवति जीवतम·। एव ब्रह्मैव जीवः सवाऽनाविस्थसहधर्माविभिश्चरति स एष देहादिगुणवानिव At.
६. पश्चात्प्राणापगमनान्तरमुक्तविलक्षणं सद् ध्रुवमविचलितं सत् पस्त्यानां गृहाणां मध्ये Sy. ननु किमयं जीवः परावृत्तो नेत्याह।...त्रयाणाम् ...कारणलिङ्गस्थूलानां देहानां मध्ये वर्तमानं ध्रुवमचलं नित्यम् At.
७. आशेते च स्थाणुवत्तिष्ठति। आकारः पूरणो वा Sy
८. मृतस्य शरीरस्य सम्बन्धी जीवः Sy. अङ्गीकृतजीवभाव आत्मा At.
९. ०ति किं चासौ जीव. रा० M.
१०. नष्टस्य पूर्वपूर्वदेहस्य सम्बन्धिभिः At
११. उक्तस्वभावो जीव· स्वधाभि·...पुत्रकृतै. स्वधाकारपूर्वकदत्तैरन्नैः Sy. 'अन्ननामैतत्' (Ngh 2 7.) उत्तरदेहभोगसाधनैः स्वधाभिरात्मीय भोगं दधद्बिर्वा धर्माधर्मसंस्कारैः At.
१२ धारय० P
१३ विषयानुपभुङ्क्ते At.
१४. अमरणस्वभावः 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते' (Cha. U. 6 11.3) इति श्रुतेः Sy. देहधर्मैरपरामृष्टः At
१५. मरण P.D. मरणधर्मकेण शरीरेण Sy. मरणाविधर्मवता देहेन्द्रियादिना सयोनिः At.
१६. पूर्वं समानोत्पत्तिस्थानः। यद्यपि जीवस्य न जन्मास्ति तथापि वपुषस्तत्सम्बन्धेनोपचर्यते Sy. सजन्मा, देहादिजन्मादीन्यात्मनि मन्यमानः At.
१७. VM. ignores ध्रुवम्

"[1]अपश्यं गोपामनिपद्यमानम्," इत्येष वै गोपा देवाना य एष तपति। एष हीदं सर्वं गोपायति। अथो [2]न [3]निपद्यते तस्मादाह 'अपश्य [4]गोपामनिपद्यमानमा [5]च परा [6]च पथिभिश्चरन्तम्' इति। [7]आ। च [8]ह्येषः। [9]परा। च। दिव्यै [10]पथिभि। [11]चरति। 'स [12]सध्रीची [13]स [14]विषूचीर्वसान' इति। सध्रीचीश्च। [15]ह्येष.।

---

१. अवश्यं M. आदित्यरूपं पश्यामि Mah. याथात्म्येन पश्येयम् Sy. पश्यामि At. आदित्यात्मना धर्मस्तुतिः। यमहम-पश्यम् U.

२. निवद्य० P

३. ०न इ० M.

४. निवद्य० P.

५. कीदृशम् ? गोपां गोपायतीति गोपास्तम् Mah. सर्वस्य लोकस्य वृष्टिप्रकाशादिना गोपायितारम् Sy.
गोप्तारमीशम् At.
गोप्तारम् U. 'एष वै गोपा एष ह्येव सर्वं गोपायति' (ŚB 14 1 4 9) 'अपश्यं गोपामित्याह असौ वा आदित्यो गोपा स ह्येमा. प्रजा गोपायति' (TA 5.6 4.)

६. ०निवद्य० P. निपद्यते पततीति निपद्य-मानो न निपद्यमानोऽनिपद्यमानस्तम्। अन्तरिक्षे गच्छन्तमपि नाथ. पतन्तम् Mah. कदाचिदप्यविषण्णम् Sy पदनं संसारस्तदाख्यायां निशब्दस्ततो निवृत्त-स्तमपश्यम् At. अनालम्बनेऽन्तरिक्षे गच्छन्नासौ पतति U.

७. आचरन्तमागच्छन्तम् Mah.,U. उदय-प्रभृत्या मध्याह्नमागच्छन्तम् Sy. अथ जीव आचरन्तं धर्मं कुर्वाणम् At.

८. आचष्टे M.

९. परागच्छन्तं च गमनागमने कुर्वाणम् Mah. मध्याह्नप्रभृत्यासायं पराङ्-मुख गच्छन्तमेवं महानुभावमादित्यम-पश्यम् Sy.
पराचरन्तमधर्मं कुर्वाणम्। चकाराव-न्योन्यमिश्रधर्मार्थौ। यद्वा मर्त्यलोक-मागच्छन्तं परलोकं च गच्छन्तं चकारादागच्छन्तं च At.

१०. देवमार्गैः Mah. विचित्रैर्मार्गैरन्तरिक्ष-रूपैं Sy. पुराणाद्युक्तमार्गैः। यद्वा। देवयान· पितृयानः, जायस्व म्रियस्वेत्येव तृतीयं स्थानमिति च तृतीयः पन्थास्तैः। 'आपथय.' (RV. V. 52. 10) इत्याद्युक्तेर्वा At. देवैः सह U.

११. चरति is omitted by D.

१२. स धर्मः Mah. स आदित्यः Sy. अथा-न्तर्यामी स एव परमात्मा At.
स एव U

१३ सह, अञ्चन्तीति सध्रीच्यः... सहा-ञ्चना दिशो रश्मीन्वा Mah. सहा-ञ्चन्ती· Sy. सन्ध्याक्रियादौ देवताभिः सहाञ्चिताः पूजिता दिश· At. सहा-ञ्चना दिशो रश्मीन्वा सहस्रम् U.

१४. विषुनिपातो नानार्थः। विषु, अञ्चन्तीति विषूच्यस्ता नानाञ्चना दिशो रश्मीन्वा .. एक. सशब्द· पादपूरण. Mah.
विष्वगञ्चन्ती रात्रावपि चन्द्रभौमा-दित्यानां प्रकाशयित्रीस्त्विषः Sy.
स एव विषूचीर्विगतगतीः कोण-गतावान्तरदिशश्च At विषु, इति निपातो नानावचनः।... नानाञ्चना दिशो नानाञ्चनान्वा रश्मीन् U.

१५. ०ची व० D. आच्छादयन् Mah, Sy, U. नियच्छन्त्यर्यामीत्युच्यते। यस्तु वस्त्राणि वस्त आच्छादयत्यन्यस्मा अवश्यं नियमयतीति दृष्टम्। दिगुक्त्या हि जीवा नियम्या अभिप्रेताः At.

१६. ०ह्याप्येव P. M. adds स before ह्येष।

विषूचीश्च। दिशो वस्तेऽधो रश्मीन्। 'आ वरीवर्ति भुवनेष्वन्तः' इति। पुनः पुनर्ह्येष एषु लोकेषु। परिवर्त्यमानश्चरति" इति।

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥३२॥

य ईं चकार। य। एतच्छरीरम्। पिता चकार। न। स.। अमुम्। वेत्ति जीव, कुतोऽयमागच्छति कीदृश इति। यश्च। एतत्। पश्यति सङ्ख्यादि?। तस्मात्।

---

१. ०श्मिन् P. २. आपरिवर्ति P. M पुनः पुनरावर्तते Mah., U. उदयास्तमयं कुर्वन्पुनः पुनरावर्तते। तमपश्यमित्यर्थः Sy. अथ साक्षी... आवृणोत्यतिशयेन At.

३. भुवनेषु त्रिलोकेषु Mah. भुवनैकदेशेषु लङ्कादिप्रदेशेषु Sy. जगत्सु At. त्रिषु लोकेषु U.

४. मध्ये व्यवस्थितः Mah. U., अन्तर्मध्ये Sy. अन्तर्मध्ये यद्यत्तत्सर्वमावरण चैतन्यादिति तत्प्रकाशकः साक्षी, उक्तः। तत्रास्त्येव यत्साक्षिणाऽप्रकाशितम्। सर्वं हि वस्तु ज्ञानतयाऽज्ञानतया वा साक्षिचैतन्यस्य विषय एव। सर्वोपाधिविशिष्टेष्ववशेषितमुपलक्षितं चैतन्यं साक्षीत्याहुः At.

५. परी० D.

६. This stanza=YV. 37. 17.

७. अत्र गर्भवासक्लेशपूर्वकजननप्रतिपादनेन तत्परिहारायात्मा ज्ञातव्य इत्यर्थात्प्रतिपाद्यते Sy. प्राक् प्रतिपादितात्मज्ञानादेव मोक्षो न कर्मणा नापि समुच्चयेनेति कर्मसमुच्चयनिराकरणम् At.

८. पुमान्पुत्रार्थी Sy. कामार्तः पुत्रार्थी वा SKN. ९. एनं गर्भम् Sy. इदं कर्म At. ईमिति पदपूरणः। एवं गर्भम् SKN. गर्भम् Dur.

१०. चका P. करोति विक्षिपति वा तत्कारणभूतस्य विक्षेपद्वारेण Sy. करोति At. करोते किरतेर्वा लिट्, करोति विक्षिपति वा तत्कारणभूतरेतोविक्षेपद्वारेण SKN. करोति Dur.

११. पुमान् Sy.

१२. सोमं for स.। अमुम M. नमुं for न। स.। अमुम् P. अस्य तस्त्वम्...कर्मणि षष्ठी वा, एन गर्भम् Sy. अस्येममात्मानम् At. अस्य तस्त्वमिति शेषः। द्वितीयार्थे वा षष्ठी। एनं गर्भम् SKN. गर्भस्य तस्त्वम् Dur.

१३. जानाति। कथम्भूतः कथं वा केन प्रयोजनेनेति सर्वात्मना न जानातीत्यर्थः Sy. वेत्ति At. कुतो वा कथं वा केन वा प्रयोजनेनेत्येवमध्यात्मदृष्ट्या यदज्ञानं तदभिप्रायमिदं न चेद्वेदेति वचनम् SKN. केवल त्वसौ कामार्तः पुत्रार्थी वा करोत्येव गर्भम् Dur.

१४. कुरुतो० P. १५. ०गतः M.

१६. मातुरुदरस्थम् Sy. इममात्मानम् At. एन मातुरुदरस्थमुदरवृद्ध्याऽर्थापत्त्याऽनुमानेन वा जातं सन्तम् SKN. एनम् Dur.

१७. उदरवृद्धचन्यथानुपपत्त्याऽनुमानेन वा दर्शयति Sy. प्रत्यक्षेण दर्शयति SKN.

१८. सख्या० M.

१ २ ३ ४ ५ ६
अपि। अयमन्तर्हित। एव भवति। सोऽयं जीव। अन्त। मातु।
७ ८ ९ १० ११
योनौ। जरायुपरिवृत। अनेकजनन। कृच्छ्रम्। आपद्यते। यद्योनं

१. द्रष्टुः सकाशात् Sy. स पुरुषस्तस्मात्कर्मकर्तुः सकाशात् At. तस्यैवैष गर्भो यायात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या, नेतरस्य गर्भकर्तुः Dur.

२. हिरुगित्यन्तर्हितनाम।...नु निश्चये, अत्यन्तमन्तर्हित एव खलु। यद्वा यः संसारावस्थायामीम्, एनं कृषिवाणिज्यवेदाध्ययनादिकं चकार सोऽस्य, एतन्न वेद लोकान्तरे जन्मान्तरे वा। तथा य इमेनं ददर्श गिरिनदीसमुद्रबन्ध्वादिकं ददर्श जीवनसमये तस्माद् दृष्टाद् हिरुगिन्नु पृथगेव। अत्रानूभूत सर्वं न लोकान्तरे जन्मान्तरे वाऽनुभवतीत्यर्थः Sy. पृथगेव। कर्तृकरणबुद्धचोर्युगपदेककर्तरि विरोधात् At.
अन्तर्हितनामैतत्। अन्तर्हितो यो गर्भस्तस्मादपि। सोऽप्येनमध्यात्मज्ञानाभावाज्ज्ञैव जानातीत्यर्थः SKN.
अन्तर्हितमेतस्मिञ्जठर एतस्मिञ्छरीरे वा ईं नु जन्तुम् Dur.

३. इच्छब्द एवकारार्थः Sy.

४. स तादृशः Sy. यस्त्वेते न्यायादिविरुद्धे ज्ञानकर्मणी मोक्षसमुच्चिते मन्यते स उभयभ्रष्टः At. अजानंश्च सः SKN.
स पुनरेष गर्भः Dur.

५. अन्तश्चाविद्यादिना परिवीतः At मध्ये SKN. उदरे पच्यति स मातुरशितपीतलीढभक्षितेन चतुर्विधाहारपरिणामेन Dur.

६. जनन्याः Sy. स्वस्या मातुः SKN.

७. गर्भे स्यात् At.
योनौ स्थितः SKN.
गर्भाशयस्थाने Dur.

८. उल्बजरायुभ्यां परितो वेष्टितः सन् Sy. सर्वगतोऽपि परिवीतो वस्त्रादिना At. जरायवादिभिर्व्याप्त इत्यर्थः। यथा कालं जायते SKN. जरायुणा परिवेष्टितो यथाकालं जायते Dur.

९. ०जनः M. बहुजन्मभाक्। अथवोत्पन्नः सन् स्वयमप्यपत्योत्पादनेन बहुप्रजाः Sy. बहूनां प्रजाः पुत्रत्वेनानेकजन्मवान् At. बहुप्रजननः। आत्मज्ञानाभावान्मोक्षमप्राप्नुवन्संसारे पुनः पुनर्जायमान इत्यर्थः। अथवा पुत्रः प्रजा अपत्यानि। बह्वपत्यश्च प्रथम मातुर्योनौ स्थितो जातश्च बह्वपत्यतामापन्नः सन्नित्यर्थः SKN.
बहुशः प्रजायमानः स गर्भकर्ता गर्भतस्वमजानान Dur

१०. एव गर्भवासमनुभवन् निर्ऋत्यभिधान प्रदुःखम् Sy. मृत्युम् At.
गर्भवासकृतमपत्यपोषणकृतञ्च निर्ऋत्यभिधानं प्रलय दुःखम् SKN.
कश्चिद् बहुप्रजा बह्वपत्यो दरिद्रः पुरुषः स दुष्पोषत्वादपत्याना व्यापन्नत्वात्कृच्छ्रं दुःखमापद्यते। सा या तस्य कृच्छ्रापत्तिः सैवैतस्यामृचि निर्ऋतिशब्देनोच्यते Dur

११. अनुभवति यावत्स्वरूपभूतात्मज्ञानम्। अतस्तत्परिहारायात्मा ज्ञातव्य इत्युक्तं भवति। एवमात्मविदामभिप्रेतोऽर्थः Sy. आविशति At. प्राप्नोतीत्यर्थः। एष परिव्राजकानामात्मविदां दर्शने चास्या ऋचोऽर्थः SKN. आविशतीत्यर्थः। एवं गर्भतस्वापरिज्ञानाद्यो गर्भं करोति स दुःखमापद्यते। यस्त्वध्यात्मवृष्ट्या गर्भतस्वं वेद स गर्भकर्मणो निवर्तते न निर्ऋतिमापद्यते Dur.

जानाति ततो मुच्यत इति।

१. ०न्ति P.D.M. नैरुक्तानां तु मते—य ईम् चकार मध्यस्थानो वायुर्मेघो वा, एतद्वृष्टपुदकं करोति सोऽस्य तत्त्वमिति शेषः। अथवैतत्कर्म न जानाति। तयोरचेतनत्वादिति भावः। यस्त्वीमेतद् ददर्श पश्यति तस्मादपि हिरुगन्तर्हितः। प्राणिकर्मवशेन काले वर्षिता परमेश्वर आदित्यात्मनि गूढ इत्यर्थः। य ईं हिरुगन्तर्हितं, ईमेतद्ददर्श पश्यति स वृष्टिलक्षणः पुत्रो मातुर्निर्मातुरन्तरिक्षस्य योनौ योनिवदुत्पत्स्याधारभूतेऽन्तरिक्षे। उभयोरप्यन्तरिक्षनामत्वात्सामान्यविशेषभावो द्रष्टव्यः। अन्तरिक्षकवेशे योन्यामन्तर्मध्ये बहुप्रजा बहुप्रजाताम्नो बहुप्राण्युपकारी। अथवा जनिरत्रान्तर्भावितण्यर्थः। बहूनां धाराणा सस्यनिष्पादनद्वारेण प्राणिना वा प्रजनयिता सन्निर्ऋतिं निरमणसाधनां भूमिमा विवेश प्रविशति प्राप्नोतीत्यर्थः. Sy. नैरुक्तानान्तु—य एनं वर्षलक्षणमुदकसंस्थायं पूर्ववत्करोति किरति वा। न सोऽस्य वेद (वर्षस्य तत्त्वं न वेद, कुतोऽप्येतदुदकमप्यागच्छति, यन्मया विसृज्यते, किञ्चोदकस्य तत्त्वमिति, केवलं त्वसौ विसृजत एवोदकम्) क. पुनरसौ? मध्यमो वायुर्मेघो वा। मेघोऽपि हि मध्यभवत्वाद् भवति मध्यमः। यस्त्वेन ददर्श, यदासावादित्यो न्यङ् रश्मिभिरावर्तते तदादित्येनोपहितं मेघस्योदरे स्थितमुदकसङ्घातं, हिरुगन्तर्हितमपि सन्तं, तस्मात्प्रथमार्थे षष्ठ्यभ्येषा। ददर्शेत्येतच्चानुषक्तव्यम्। य एनं मेघहननसमये प्रत्यक्षं पश्यति, अन्तर्हितमपि स पश्यतीत्यर्थः। कः पुनरसौ? इन्द्रः, स हि मेघहननकाले तत्स्थमुदकसंस्थायं प्रत्यक्षानुमानाभ्यामुभयथा पश्यति। किञ्च य उदकसंस्थायः पूर्वं सर्वभूतानां निर्मातुरन्तरिक्षस्यावयवभूते योनावन्तः, योनिस्थानं तस्य मध्ये परिवीतः परिगतो वायुना व्याप्तः। बहुप्रजा बहुप्रजननोऽपर्यन्तधारात्मना व्यवस्थित इत्यर्थः। अथवा जनिरन्तर्णीतण्यर्थः। बहूनां धाराणां सस्यानां वा, सस्यनिष्पादनद्वारेण प्राणिनां प्रजनयिता। निर्ऋतिं भूमिमाविवेश। आविशतीत्यर्थः SKN. अन्ये तु ब्रुवते—यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु बहु प्रजायमानो जन्ममरणसन्तानानुबद्धां निर्ऋतिमाविशति। यद् रेतः सिञ्चति तद् भूयो भूयो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसन्तानाननुभवतीत्युक्तम्। 'वर्षकर्मेति नैरुक्ता.' (N.2.8.)—वर्षकर्मैतदुच्यते। निर्ऋतिश्चात्र भूमिरुच्यते। एव नैरुक्ता मन्यन्ते। य ईं चकारेति यः करोति वर्षं, यो वा किरति क्षिपति। कः पुनरसौ? मेघ.। स हि वर्षस्य कर्ता विक्षेप्ता वा। मेघाद्धि वर्षं प्रवर्तते। किं तस्य, न सोऽस्य वर्षस्य ... तत्त्वं वेद कुतोप्येतदुदकं मय्यागच्छति यन्मया विसृज्यते। किं वोदकस्य तत्त्वमिति केवलं त्वसौ विसृजत एवोदकम्। य ईं ददर्श य एव पश्यत्येतद्वर्षं हिरुग्, ईं नु तस्मादन्तर्हितमन्तरिक्षलोके तस्मात्तस्येत्यर्थः। तस्यैव प्रत्यक्षम्। तद्यथाऽऽत्मनो वर्षं नेतरस्य घनस्य मध्यस्थानस्य। स एव ह्यस्य वर्षस्य ... तत्त्वं वेद यो ददर्श यः पश्यति। आदित्योपहितमादित्यस्य रश्म्यन्तर्गतं वर्षमनभिव्यक्तम्। कश्चासावन्तर्गतः? इन्द्रः। असावपि मध्यम एव।

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥३३॥

द्यौर्मे[१] पिता[२]। द्यौ[३]। मे[४]। पिता। जनयिता[५]। वर्षणान्मम[६] सम्प्रहनकृत्[७]। शुक्रस्य तेजो[८] दिवि भवति पार्थिवैर्धातुभि शरीर बध्यते। ततश्च महती[९]। इयम्। पृथिवी। मम।

तत इदमुक्तम् 'न सोऽस्य वेद मध्यमः' मेघः। 'स एवास्य वेद मध्यमः' इन्द्र इति। स एव महानुदकसंस्त्याय इन्द्र· प्रत्यक्षो मध्यमो मातुरन्तरिक्षलोकस्योदकाभिव्यक्त्याशयस्थाने परिवीत· परिवेष्टितः सौर्येण रश्मिजालेन वायुना च मेघोदरान्तर्गतः प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजा बहुश· प्रजायमानो निर्ऋतिं भूमिमा विशतीति समस्तार्थं Dur. 'तत्र निर्ऋतिर्निरमणाद् ऋच्छते· कृच्छ्रापत्तिरिनरा। सा पृथिव्या सन्दह्यते। तयोर्विभाग·।...तस्या एषा भवति। .. बहुप्रजा कृच्छ्रमापद्यत इति परिव्राजका। वर्षकर्मेति नैरुक्ता। य ईं चकारेति करोतिकिरती मन्दिग्धो वर्षकर्मणा। 'न सोऽस्य वेद' मध्यम·। स एवास्य वेद मध्यमो यो ददर्शादित्योपहितम्। 'स मातुर्योनौ' मातान्तरिक्षम्। निर्मीयन्तेऽस्मिन्भूतानि। योनिरन्तरिक्ष महानवयवः परिवीतो वायुना। अयमपीतरो योनिरेतस्मादेव, परियुतो भवति। बहुप्रजा भूमिमापद्यते वर्षकर्मणा N.2.8, SKN. II.61.

१. दीर्घतमा ब्रवीति Sy. सगुणब्रह्मविद्याया तु ज्ञानकर्मसमुच्चयो युक्त एवेति वक्तुकाऽन्यत्र सगुणविद्यामाह At. दीर्घतमा आह SKN.

२. द्युलोकः Sy. या द्यौः सैव At. उपरि स्थिता द्युलोकाख्या Dur.

३. मम Sy., At., SKN., Dur.

४. द्यौः। मे। पिता। omitted by D.

पालकः Sy. एषैव मम पिता। 'द्यौरहम्' इत्येव वैवाहिके कर्मणि द्युलोकभावेन पित्राऽऽत्मानमभिसम्पद्यमानं दृष्ट्वैवमाह मन्त्रदृग् 'द्यौर्मे पिता' इति Dur

५. न केवल पालकत्वमात्रमपि तु जनिता जनयितोत्पादयिता Sy. जनं कश्यपमिता जनिता। .. जनो हि कश्यपो यवजीजनज्जगत्।... यद्वा जनं कश्यपमेतीति। कर्तरि निष्ठा At.
जनयिता SKN
उत्पादयितेत्यर्थः Dur.

६. नाभिभूतो भौमो रसोऽत्र तिष्ठतीति शेष। ततश्चान्न जायते, अन्नाद्रेतो रेतसो मनुष्य इत्येव पारम्पर्येण जनन-सम्बन्धिनो हेतो रसस्यात्र सद्भावात्। अनेनैवाभिप्रायेण जनितेत्युच्यते Sy. सैव मम नाभि· सहोदरा स्वसा At. नाभिभूतो भौमो रस.। अत्र निष्ठतीति शेष। ततश्चान्नं जायते। अन्नाद्रेतः। रेतसो मनुष्या। एवं पारम्पर्येण जनन-हेतो रसस्याधारभावाद् द्यौर्जनयिता ततश्च मम पिता SKN नहनमेव नाभि·। अत्रैतस्मिन्द्युलोकलक्षणे पितर्युदकदानेनानुग्रहीतरि सति सन्तानोत्पत्त्यनुग्रहक्रमेणैव शुक्रात्मनोत्पत्तिरुपपद्यते Dur.

७. तो P.D.

८. मही, इयं (व) गोर्नाम। 'या मही कामधेनुरधिदैवं सैव मम गृहे इयं गौः' (TA. 2. 6. 2.) At.

९. या पृथिवी सैव मम माता At.

बन्धु[1] । माता[2] भवति । उत्तानयो[3]. । द्यावापृथिव्यो[4]: । मध्ये[5] । अवकाशरूपमन्तरिक्षं[6] भवति[7] । तत्र[8] । दुहितु[9] =अद्भ्य पृथिवी जातेति पर्जन्यस्य दुहिता पृथिवी भवति । स[10] तस्या । गर्भम्[11] ।

---

१. बन्धिका Sy. अत्र जगति यो बन्धुर्भ्राताऽग्निर्वा सोमो वा स एव ममापि बन्धुर्भ्राता At. शरीरस्य बन्धनकशरीरात्मना परिणमयित्रीत्यर्थः । ... अथवा बन्धुशब्दोऽत्र जातिवचनः सञ्ज्ञातिर्मं(र्मा) तेत्यनेन विशेष्यते SKN. अङ्गसम्बन्धकारणाद् बन्धुः Dur.

२. मातृस्थानीया । स्वोद्भूतौषध्यादिनिर्मात्रीत्यर्थः Sy. मातृभूता SKN. मातुर्मन्त्रेण पृथिवीत्वं सम्पद्यमानं वृष्ट्यैवमाह बन्धुर्मे माता पृथिवी महीयमिति Dur

३. ऊर्ध्वतानयोः Sy अन्योन्याभिमुखयो. ... अध्यात्मपक्षे–ऊर्ध्वाधोदेहभागयो. । अधिदेवतापक्षे तु—ब्रह्माण्डस्योर्ध्वाधोभागयोः At. ऊर्ध्वमेव ह्येनयोरन्तरा च प्रतिधारणीयोऽन्तः प्राणस्तत इत्युत्तानेद्यावापृथिव्यौ, प्राणेन हीमे वायुना सूत्रभूतेन विधृते तिष्ठतः Dur

४. सर्वस्यात्र्योर्भोगसाधनयोर्द्यावापृथिव्योः Sy. उदकं हि द्युलोकात्पतितं पार्थिवेन धातुना सम्पृक्तमोषधिभावमागम्य शरीरभावेनावतिष्ठत इत्येतदपेक्ष्य सर्वभूतानां द्यावापृथिव्यौ मातापितरावुच्येते तत्र तत्र । ... तत्कृतस्य ह्युपकारस्याभावे सतीतरौ मातापितरावकिञ्चित्करावेव भवत. । तस्मादुपपद्यते द्यावापृथिव्योर्मातृपितृभावः । ... किमेते द्यावापृथिव्यावन्यत्किञ्चिदनपेक्ष्यैव सर्वभूतानां मातृपितृभावं बिभृत उतान्यदपि किञ्चिदपेक्षेते इत्युच्यते, अनयोः ... द्यावापृथिव्योः Dur.

५. ०ब्रम् D.

६. अन्तर्मध्ये योनिः सर्वभूतनिर्माणाश्रयमन्तरिक्षं वर्तत इति शेषः Sy. जगद्वीजमीश्वरोऽस्ति । ... अध्यात्मपक्षे तु हृद्युपास्यो जगद्धेतुर्देहेन्द्रियादिप्रवर्तक ईशोस्ति । अधिदैवपक्षे तु क्षीरसागरशायी नारायणो जगद्योनिः प्रसिद्धोऽस्ति At. स्थानमन्तरिक्षाख्यातम् SKN. एतयोर्द्यावापृथिव्योरुत्तानयोर्य एवोऽन्तरिक्षाख्यः Dur.

७. अस्मिन्नन्तरिक्षे Sy. जगद्योनावीश्वरे नारायणे At. स्थित इति शेषः SKN. एतस्मिन्नवकाशदानोपकारप्रवृत्ते सति Dur

८. दूरे निहिताया भूम्याः Sy. स्व दुहितुः सरस्वत्या योनावन्तः At.
दूरे निहिताया पृथिव्याः SKN.
अत्र पृथिव्येव दुहितृशब्देनोक्ता । सा हि द्युलोकाद् दूरे निहिता । अथवा सा हि द्युलोक दोग्धीति दुहिता । सा हि द्युलोकात्पतितमुदकमुपजीवत्येवादूरे निहिता दोग्धि वा Dur.

९. पिता द्युलोक. । अधिष्ठात्रधिष्ठानयोरभेदेनादित्यो द्यौरुच्यते । स स्वरश्मिभिः । अथवेन्द्र. पर्जन्यो वा Sy.
बहिर्निर्गतरूपो जगत्पिता चतुर्मुखाख्यो ब्रह्मा जात. स च At. पिता पालयिता पर्जन्यः । ... अथवा सस्यवत्ताया जनयितृत्वात्पितैव पर्जन्यः पृथिव्याः पृथिवी चास्य दुहिता SKN. द्युलोकाख्यः । द्यौरेव हि रसान्प्राजयति तस्मात्सैवात्र पर्जन्यशब्देन भाष्यकारेणोक्ता Dur.

१०. सर्वोत्पादनसमर्थं वृष्ट्युदकलक्षणम् Sy. वीर्यम् At.
स तस्या वृष्टिप्रदानद्वारेण सस्यनिष्पत्तिफलं गर्भम् SKN.
सर्वभूतगर्भोत्पत्तिहेतुभूतोदकम् Dur.

[1]दधाति ततः [2]शुक्रशोणितससर्गाज्जीव [3]प्रादुर्भवतीति [4]।

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥३४॥

[5]पृच्छामि त्वा। द्यौर्मे [6]पितेति प्रसङ्गात् [7]पृथिव्या अय प्रश्न। [8]परम.। [9]अन्त.। [10]क्वास्या [11]पृथिव्या भवति यत्रेय सन्तिष्ठते। [12]सर्वस्य जगत.। [13]धारक। यत्र

---

१. सर्वतः करोति Sy. आहितवान्। तस्माद्वीर्यात्सर्गविशेष इति। 'प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत्' (ΑΒ. 3. 33) इत्यत्र खण्डेऽर्थ. स्पष्ट उक्तः At. आधत्ते SKN आदधाति। ददातीत्यर्थः।...एवं द्यावापृथिवीभ्यामन्तरिक्षेण चावकाशदानेनानुगृह्यमाणान्येतान्यस्मदादीनि भूतान्युत्पद्यन्त इत्येतदनेन मन्त्रेण मन्त्रदृशा ख्यापितम् Dur

२. ०क्ल० D. M.

३ The passage beginning with पार्थिवैर्धातुभिः and ending with प्रादुर्भवतीति is omitted by P

अध्यात्मपक्षे तु—अत्र हृदयस्थे देहादिप्रापके जगद्योनावीश्वरे बहिर्निर्गतरूपादिभिर्निर्गतश्चतुर्मुखस्थानीयः पिता तृतीयजन्मदातृत्वेन ममायं पितेति शिष्यैर्भावितो ब्रह्मविद्याचार्यो ब्रह्मा, अनुरूपमन्तस्तत्त्वं गर्भमधात्। अन्तर्भावितोऽत्र ध्यर्थः। आधापितवानधारयत्। अस्खलितमचीकरद्वा। आरोपितवान्वा।...अनेन पिण्डब्रह्माण्डयोर्जीवपरयोश्चैक्यं सूचितम्। देहोऽपि ब्रह्माण्डः At. द्यौर्मे पिता पाता वा पालयिता वा जनयिता वा। नाभिरत्र बन्धुर्मे माता पृथिवी महतीयम्। बन्धुः सम्बन्धनात्। नाभिः सन्नहनात्। नाभ्या सन्नद्धा गर्भा जायन्त इत्याहुः। एतस्मादेव ज्ञातीन् सनाभय इत्याचक्षते। सम्बन्धव इति च। ज्ञातिः सञ्जानात्। उत्तानयोश्चम्बोर्योनिरन्तः। उत्तान उत्तानः। ऊर्ध्वतानो वा। तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्या N.4 21; SKN. II. 260

४ VM. ignores आ and also अत्र if दिवि and तत्र are not taken as its explanation.

५. The passage beginning with पृच्छामि and ending with पितेति is omitted by P

६ यजमानोऽध्वर्युं पृच्छति Mah. अध्वर्यु यजमानः पृच्छति U. ७. हे अध्वर्यो! पृथिव्याः...अवधिभूतम् Mah. उत्कृष्टाम् Sy. परमात्मरूपमीशम् At.

८ पर्यन्तम् Mah. काष्ठाम् Sy. निवर्तकम् At. ९. ०स्या M.

१०. पृथिव्या देव्या महत्या मायायाः At.

११ यस्मिन्स्थले Mah. यत्र सर्वा पृथिवी समाप्यते तत्पृच्छामि Sy. परमात्यन्तिक तथा पृच्छामि यत्र कारणे सति At यत्र सर्वा पृथिवी समाप्ता BB.

१२. भूतजातस्य Mah, Sy. प्रपञ्चस्य At.

१३ नाभिः कारणं तवपि पृच्छामि Mah. सन्नाहो बन्धनम् Sy. बाहनं बन्धनमविशेषेण तत्कारणं पृच्छामि At. नहनम् U. यत्र प्रतिबद्धं सर्वं जीवति स नाभिः। 'नहो भश्च' U 571-570. [नहो भश्च U. 4 125. Ujjvaladatta; नहो भ च 4.137. Nārāyana; नहो नभ च 4.135. Svetavanavāsin.] इतीङ्प्रत्ययः BB.

[1] विद्यत इति द्वितीयः प्रश्न । पृच्छामि । [2] [3] त्वा । [4] वर्षितुः । [5] कालाश्वस्य । [6] [7] किं रेत इति । पृच्छामि । [8] [9] [10] वाचः । परमम् । व्योम, क्वेय सर्वा वाग् वर्तत इति ।

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥३५॥

[11] [12] [13] इयं वेदिः । यद्यपि क्व सन्धिता भवति पृथिवी न स देशो दर्शयितु शक्यते, मन्त्रेण [14]

---

१. यत्र सर्वं सन्नद्धं भवति तमित्यर्थः Sy. महामायायाः साधारण्याज्जगद्वैचित्र्यजनकमसाधारण कारण पृच्छामीत्यर्थः At. अथ तत्र प्रतिष्ठितां भुवनस्य नाभिं पृच्छामि BB.

२. अहं पृच्छामि । द्विकर्मकः Mah हे यजमान !...प्रश्नं करोमि Sy जीवरूपेण परमात्मदृष्टिरहं त्वा...पृच्छामि At. हे ब्रह्मंस्त्वा पृच्छामि BB

३. त्वाम् Mah , Sy., At भवन्तम् U. त्वाम् BB. ४. सेक्तुः Mah., U वर्षकस्य Sy. देहेन्द्रियादिस्वामिनो जीवस्य At. वृष्णो वर्षितुः BB.

५. व्याप्तस्यादित्यस्य । 'असौ वादित्यो वृषाश्व.' (TA 5.3.5) इति तैत्तिरीयकम् Sy. अश्व इन्द्रियम् । 'इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्' (Kath. U. 3.4.) इति श्रुते, तच्चेहान्तर मन सर्वेन्द्रियाण्यश्नुते व्याप्नोति । बलवत्त्वाच्च वेगवत्त्वाच्च । तस्याश्वस्य मनसः At. व्यापकस्य BB. ६. क P

७. वीर्यम् Mah तस्य रेतो रेतोवत्कारण तत्किमिति Sy. रयणम् । उदकनामैतत् (Ngh.1.12.) आप्यायकमश्वं स्वमनसश्चेष्टकं चेतनं पृच्छामीत्यर्थः At. हेतुं च पृच्छामि तस्य... किं हेतो यतः सर्वं जायते BB.

८. वाच्यास्त्रयीलक्षणायाः Mah. सर्वस्य वाग्जातस्य Sy. वेदात् At. अथ तच्च पृच्छामि वाचो वेदात्मिकाया ऋगादेस्तस्य रेतसो विधात्र्याः BB.

९ उत्कृष्टम् Mah. निरतिशयम् Sy. परमं दूर परं ब्रह्मेति केचित् At प्रकृष्टम् BB.

१०. स्थानं त्वां पृच्छामि Mah. स्थानं सर्वस्य वचसः कारणमेतत्प्रश्नचतुष्टयं पृच्छामि Sy. विशेषेणावितृ रक्षकं पृच्छामि । अवितृ चेत्कथं वाचः परम निर्गुण, वाचः परम निर्गुण चेत्कथमवितृ । ... यतो निर्गुणशसन संसारापनेतृ (अतः) पृच्छामि At व्यवनं स्थानम् U. रक्षास्थानं सर्गप्रतिसर्गनिबन्धन व्योमेति । विपूर्वादवतेर्मन्प्रत्ययः । 'ज्वरत्वरस्रव्यविमवाम्०' (pā 6.4.20.) इत्यादिनोठि गुण. BB. This stanza= YV. 23.61; TS. 7.4.18.2.

११ अध्वर्युर्यजमानं प्रत्याह । इयम् Mah. इय ब्रह्मवित्सु प्रसिद्धा At.

१२ उत्तरवेदि पृथिव्याः परोऽन्तोऽवधिः । वेदेः सर्वपृथिवीरूपत्वादित्यर्थः Mah. पृथिव्या प्रथनवत्या भूम्याः परोऽन्तः... पर्यवसानमियं वेदिः । नहि वेद्यतिरिक्ता भूमिरस्ति । 'एतावती वै पृथिवी यावती वेदिः' (TS.2.6.4.) इति श्रुतेः Sy. वेदिर्ब्रह्मानुभूतिः पर प्रात्यन्तिकोऽन्तो निवर्तको हेतुः पृथिव्या मायायाः At. इयं वेदिः परोऽन्तः पृथिव्या । वेदिर्हि सर्वा पृथिवीरूपा भवति U. १३. स्त्रैण P.

परिगृहीतायां वेद्यां सन्निधानात् तत्र सर्वा सन्तिष्ठते। अयं यज्ञ इति।

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति मैत्रायणीब्राह्मण भवति। क्व देवदत्तो भवतीति पृच्छतोऽयं देवदत्त इत्युत्तरं सङ्गच्छते। अन्ये तु पठन्ति 'पृच्छामि त्वा भुवनस्य नाभिम्' इति। 'ब्रह्मणे वाचः परमं व्योम' इत्यादित्यं सर्वस्या एव वाचः स्थानमाह।

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥३६॥

सप्तार्धगर्भा। सप्त, आदित्यरश्मयः। अग्रप्रदेशेषु भुवनस्य।

---

१ भुवनस्य नाभिः कारणम्। अयं यज्ञोऽश्वमेधो भुवनस्य प्राणिजातस्य नाभिः कारणम्। 'यज्ञाद्वै प्रजाः प्रजायन्ते' (SB 4.4.2.9) इति श्रुतेः Mah. अथ यज्ञो भुवनस्य भूतजातस्य नाभिः सन्नहनम्। तत्रैव वृष्ट्यादिसर्वफलोत्पत्तेः सर्वप्राणिना बन्धकत्वात् Sy तथाऽयं सर्ववादिप्रसिद्धो यज्ञोऽजहल्लक्षणया धर्माधर्मसंस्कारात्मकपुण्यपापराशिर्भुवनस्य प्रपञ्चस्याऽविश्लेषकारकोऽसाधारणो हेतुः At अयं च यज्ञो भुवनस्य नाभिर्नहनम् U.

२ Maitr U 6.37., Manu.III 76.

३. अथ is omitted by P D वृष्णोऽश्वस्य रेतोऽयं सोमः सोमलताऽश्वस्य वीर्याज्जातेत्यर्थः Mah अथ वृष्णो वर्षकस्यादित्यस्य रेतोऽयं सोमो रसात्मकः। अग्नौ हुतः सोमरस आदित्यं प्राप्य वृष्ट्यादिफलं जनयति Sy. तथायं प्रसिद्धः सोमो जगदीश्वरो जीवमनःप्रेरको वृष्णो जीवस्य योऽश्वो मनस्तस्य रेतः प्रेरकः At. अयं च सोमश्चन्द्रमा लता सोमो वा वृष्णः सेक्तुरश्वस्य रेतः U. ४. अपि is omitted by P.D. ५. Omitted by M.

६. TS. 7.4.18.2.

७. ब्राह्मयं P. अयं ब्रह्मा ऋत्विग् वाचस्त्रयीरूपायाः परमं व्योम स्थानम्। ब्रह्मणस्त्रिवेदसंयोगादित्यर्थः Mah. अथ ब्रह्मा प्रजापतिरेव वाचो मन्त्रादिरूपायाः परमं व्योम, उत्कृष्टं रक्षकं स्थानम्। तत्रैवोत्पत्तेस्तत्रैव पर्यवसानाच्च Sy ब्रह्मा ब्रह्मीभूतश्चतुर्मुखो विष्णुर्वा 'आचार्यो ब्रह्मणो मूर्त्तिः' (Manu.2.226) इति श्रुतेः (स्मृतेः)। भृगुशप्तत्वाद् ब्रह्मणो विष्णुशिववत्साक्षात्पूज्यत्वाभावाद् गुरुरूपेण पूज्यत्वाच्चायं प्राकृतो ब्रह्मा ब्रह्मविद्यागुरुरेव वाचो वेदात्परमं दूरं व्योम परमन्तर्ब्रह्म परमार्थतः। शिष्यभाग्यवशाच्च विशेषेणावितृ संसारापनेतृ च At. अथ च ब्रह्मा ऋत्विग् वाचः परमं व्योम व्यवनं स्थानं त्रिवेदयोगात् U ८. This stanza= YV. 23.62. VM. ignores भुवनस्य। नाभिः। अयम्। सोमः।

९. ०र्भा P.D.M. १०. सर्पणस्वभावाः सप्तसङ्ख्या वा रश्मयः Sy. सप्त ... अर्धकार्या अर्धकारणरूपाः At.

११. प्रकृतयो विकृतयश्चेत्यर्थः At.

१२. गृहप्र० M. १३. लोकस्य Sy. षोडशकलस्य विकारस्य At.

कारणमुदकम्। गर्भिता। विष्णो=आदित्यस्य। तिष्ठन्ति। योजनेन। विविधे कर्मणि। ते। कर्मभि पुरुषं संयोजयन्ति। मनसा च। प्राज्ञा। परितो भवनशीला.। सर्वत एव। भवन्ति।

न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥३७॥

न वि जानामि। न। विजानामि। यद्यप्यहम्। इदम्।

---

१. ०णभूतमु० M. रेतः सारं, वृष्टिप्रदत्वेन रेतोभूतास्तादृशा रश्मय Sv. रेत कारणम् At.

२. संवत्सरस्यार्धे गर्भं गर्भस्थानीयमुदक धारयमाणा। यद्वा ब्रह्माण्डस्यार्धे मध्येऽन्तरिक्षे गर्भवद् वर्तमाना Sv.

३. व्यापकस्यादित्यस्य Sy. प्रकृतिविकारस्य पुरुषस्य...विष्णाति स्नुह्याति, स्निह्याति, विश्नोत्यज्ञानलक्षण विष नुदतीति, वेवेष्टीति, नोदनाद्विशनीत्यादिधातुभ्यो विष्णुशब्दः At.

४. वर्तन्ते Sy. प्रवर्तन्ते। चेतनाऽसहायजडाना प्रवृत्त्यनुपपत्तेः At. ५ प्रदेशेन Sy आत्मनैव At ६. जगद्धारणव्यापारे Sy. विरुद्धधर्मवत्याम् At

७ उक्ताश्चतुर्विंशतितत्त्वात्मका पदार्था At ८. प्रज्ञाभि. Sv. धीयमानैरतिनश्वरैर्धर्माधर्मसंस्कारै. At

९. जगदुपकारः कर्तव्य इति बुद्धया च Sv ते त्वया मनसा चेतसा च युक्ता At

१०. प्र० M. यस्मादेव तस्मात् ...त एव विपश्चितो बुद्धियुक्ताः Sy विपश्चितोऽपि पुरुषान् At. ११. सर्वत्र व्याप्ताश्च Sy. परिभवनधर्मा At

१२. सर्वत.। द्वितीयार्थे तसि। विश्वम् Sv. विश्वतः, त्यब्लोपे पञ्चमीयम्। सर्वशास्त्राणि (अधिगत्य) विज्ञापयन् (त)

१३. परितो भावयन्ति। कृत्स्न जगद्व्याप्नुवन्तीत्यर्थ Sv. परिभवन्ति समारयन्ति At.

१४. यद्वा सप्तार्धगर्भा। सप्त महदहङ्कारौ, पञ्च तन्मात्राणीति मिलित्वा सप्तसङ्ख्यानि तत्त्वानि। अर्धगर्भा अविकृतिरूपा। विकाराश्रयाया मूलप्रकृतेः प्रकृतिविकृतेरुदासीनस्यात्मनश्चोत्पन्न—त्वादर्धांशेन प्रपञ्चाकारेण परिणामादर्धगर्भाः। पुरुषाश्रयाविक्रियत्वादित्यभिप्राय। अत एव तेषां प्रकृतिविकृतित्वम्। यस्मादेव तस्माद् भुवनस्य रेतः कारणम्। कारणभूतानि तान्येव विष्णोर्व्याप्तस्य पुरुषस्य विधर्मणि प्रदिशा प्रदेशेन तिष्ठन्ति। इतरत्समानम् Sy. VM ignores ते। परि

१५. कीदृश. परिभुव कथं च तन्निवृत्तिरित्यत्रोच्यते। महाभाग्ययोगाद्दीर्घतमा एव तत्स्वरूप एव भूत्वाऽऽह At. संसारे परिवर्तमानस्य गर्भवासजन्मजराव्याधिमरणदुःखाभिभवनिमित्तस्यानुज्ञानाभावमोक्षमप्राप्तवतो दीर्घतमसः परिवेदना SKN. दीर्घतमस आर्षम् Dur.

१६. विविच्य नाज्ञासिषम् Sy. जानन्नपि विशेषेण न वेद्मि At नैतदहं विस्पष्टं जानामि Dur. अथापि परिवेदना कस्माच्चिद्भावात् ... न विजानामि यदिवेदमस्मि N.7.3

१७ यदपि Sy. यदीये सत्त्वचित्ते गृहीत्वा यदि वा चिदिदानीमाभाति At. यदि वेति विकल्पश्रुतेः। यद्विवाऽतो व्यतिरिक्त इति शेषः SNK. अथवा Dur.

१८. इदं विश्वम् Sy. इदं जगत् At. इद शरीरमात्रकमेव। ... अथवेदमिति करणनिर्देशः। यद्विवा विकाररूपम् SKN. कारणं परं ब्रह्माख्यम्। अथवेदं तत्कार्यं द्वैतमस्मीति Dur.

[1]अस्मि [2]प्रकृतेः पर.। [3]विषयपरेण [4]मनसा। [5]सम्यग्बद्ध.। [6]अन्तर्हित.। [7]चरामि।
[8]यदा पुन.। सर्वस्य सत्यभूतस्य। प्रथम [9]जनयिता जगत स्रष्टाऽदित्य.। मा प्रति।

---

१. कृत्स्नः प्रपञ्चोऽप्यहमेवास्मि। नामरूपांशमपरमार्थं त्यक्त्वा सर्वत्रानुगतोऽस्ति भाति प्रियमिति योऽयं सच्चिदानन्दाकारोऽस्ति सोऽहमस्मीति न विजानामि। ...परं शास्त्रजनितमिदमहमस्मीति ज्ञानं जातम्। अविवेक्यहमित्यर्थः। कार्यकारणयोरभेदात् कृत्स्नप्रपञ्चस्यापि ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपञ्चजातमपि स्वस्वरूपमेव भवति। 'इद सर्वं यदयमात्मा' Nrs. U 5 'ब्रह्मैवेदं सर्वम्', Nrs. U 4 'आत्मैवेदं सर्वम्', Chhā. U. 7 25.2 'स ऐक्षत बहु स्या प्रजायेय' Chhā U. 6 2.3 इत्यादिश्रुतिभ्य एकविज्ञानेन सर्वविज्ञानस्य प्रतिज्ञानात्। 'तदनन्यत्वमारम्भणशब्दादिभ्य' (Ved. S.2 1 14) इत्याद्युपपत्तिभिश्च प्रपञ्चस्य ब्रह्मानन्यत्व सिद्धम्। यद्वा। इवशब्द उपमार्थः। यदिव यदापरोक्ष्यज्ञानं सर्वैकात्म्यरूपमानुभविकमस्ति तदिव तद्वदेवाहमस्मि। इद सर्वमहमस्मीति ज्ञान मे जातम्। अपि त्वेतद्दार्ष्टान्तिकभूतम्। आनुभविकं सार्वात्म्यं यदस्ति तन्न विजानामि न प्राप्तोऽस्मि। शास्त्रजनितं सार्वात्म्यं जातं न त्वानुभविकमित्यर्थ. Sy. अहं च यदिवास्मि तन्न विजानामि At

२ मनसा युक्तो भावनासहिष्णुना बहिर्मुखेन विक्षिप्तेन चेतसा युक्तः Sy. मनसा सङ्कल्पविकल्पात्मना पुण्यपापसंस्कारहेतुना At. अविद्यायोगिना मनसा SKN. अनेकैः सन्देहग्रन्थिभिर्मनसा, उभे अपि द्वैताद्वैते Dur.

३. अविद्याकामकर्मभिः सम्यग्बद्धो वेष्टितः Sy. सम्यग्बद्धः At. अज्ञानेन सम्यग्बद्धः SKN. अविद्यया सम्बद्धश्च Dur.

४. यतोऽहं निष्पः। अन्तर्हितनामैतत्। अन्तर्हितो मूढचित्तः। चित्तप्रत्यक्प्रवणताभावेन परिच्छिन्न इत्यर्थः Sy. श्रुत्यादिभिर्निर्णीतोऽप्यविद्ययाऽऽच्छादितोऽन्तर्हितोऽहम्। 'निष्पं... निर्णीतान्तर्हितनामधेयानि' (Ngh. 3 25.) At. अन्तर्हितः SKN. अनयोः कार्यकारणयोर्द्वैताद्वैतयोरन्तरा वर्तमानो निष्पोऽन्तर्हितः Dur.

५ ०तश्चास्मि M. सञ्चरामि संसारे। अथवा मनसा सम्बद्धश्चरामि। इन्द्रियपरवश एव सन् संसारे दुःखमनुभवामि। न सार्वात्म्य जानामीति परिदेवते।... बहिर्मुखचेतसः स्वरूपापरिज्ञानजनितं दुःखमन्यत्र श्रूयते, 'पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्' (Kath. U 2.4.1.) इति Sy. ततश्चराम्यूर्ध्वाधोमध्ये चरामि। विषयानुपभुञ्जे वा At. चरामि संसारे SKN गच्छामीत्यर्थः Dur.

६ यदा काले At. यस्मिन्काले SKN. एव सति यदा Dur.

७. परमार्थस्य परस्य ब्रह्मणः Sy. ब्रह्मणः सम्बन्धिन्याः At. सत्यस्य, सर्वत्र वा गतस्यागतस्यात्मनः। षष्ठीभूतेः सम्बन्धिनी ग्रहीतृ (त्री) इत्यर्थः SKN. भगवत आदित्यस्य स्वभूता, तस्य हि प्रकृष्टा बुद्धिः प्रहीणसर्वसंशया तया सर्वमिदमसंशय परिज्ञाय किमहं कारणसतत्त्व उत द्वैतसतत्त्व इति Dur.

८. प्रथमोत्पन्नेवः। प्रथमोत्पन्नश्चित्तप्रत्यक्प्रवणजनितोऽनुभवः Sy. ब्राह्मणाः सनकादिसमाश्च At. तत्त्वोत्पत्तौ प्रथमजातत्वात्प्रथमजा बुद्धिः सा SKN. बुद्धिः, सा हि सर्वेन्द्रियेभ्यः प्रथमं जायते Dur.

[1]आजगाम। ततोऽनन्तरम्[2]। एव। [3]अस्या. सर्वस्या। [4]वाच। [5]भजनीय ब्रह्म। [6]अश्नुव इति ज्ञातात्मस्वरूप [7]आहेति।

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् ॥३८॥

[8]अपाङ् प्राङ्। [9]अमरणधर्मा। मरणधर्मणा[10]। समानस्थानो जीव[11]। [12]अन्नेन सह। [13]धार्यमाण।

---

१. यदा मागन्, आगमिष्यति तदा ... स यदा मा मा प्राप्नोति Sy. मा प्रति ... आगच्छन्तः At.
मा माम्, आगन्, आगमिष्यति ममोत्पद्यत इत्यर्थः SKN.
मामागच्छेत् Dur

२. ०ननर० P. अव्यवधानेन Sy. तदनन्तरमेव At.
आदित् पदपूरण· SKN.

३. ऐकात्म्यप्रतिपादिकायाः Sy. प्रकृताया ब्रह्मविद्यारूपिण्याः At. कृत्स्नप्राज्ञताया· Dur.

४. उपनिषद्वाचो यदिवेदमस्मीत्युक्तायां वा Sy. श्रुते· At
यदेतिश्रुतेस्तदेत्यध्याहार्यम्। तदा वाच ऋग्यजुःसामलक्षणाया· SKN.

५. भजनीयं शब्दब्रह्मणा व्याप्तव्य परं ब्रह्मपदम् Sy.
उपनिषल्लक्षणं भाग भजनीय परमात्मन SKN.

६. अव D. प्राप्नोमि। चित्तस्य बहिर्मुखतां परित्यज्यान्तर्मुखतैव दुःसम्पादा। सा यदा स्यात्तदानीमेव स्वरूप द्रष्टुं सुशक भवति पश्चाद्विलम्बाभावात्। यथा गिरिशिखरात्पतन्पाषाणोऽविलम्बेन पतति तद्वत् Sy.
प्राप्तवानस्मि At.
प्राप्स्यामि, मोक्षं वा यास्यामीत्यभिप्राय. SKN.
अहम्· ·अश्नुयाम्। यदियं कृत्स्ना वागभिवदति तत्सर्वमहमाप्नुयामित्यर्थः Dur.

७ आहरेति M. N 7.3; SKN. III. 19

८ अवाड् P तत्राह जीवन्मुक्तलक्षणम् At.

९ अमरणधर्माऽयमात्मा Sv. स्वयं न म्रियते कारणदेहच्छेदेपि विशीर्यमाणे लिङ्गदेहेऽपि स्थूलदेहानुवृत्ते· At.

१०. ०र्म P D. मरणधर्मणा भूतात्मना देहेन Sy स्थूलदेहेन At

११. यत्र परिच्छेदको देहोऽस्ति तत्र सर्वत्र सोऽयमपि तिष्ठन्नित्यर्थः। यद्वा समानोत्पत्तिः। सहवासेन स्वस्मिन्नप्युत्पत्तिरुपचर्यते। एवम्भूतः सन् Sy. ससस्कारः सस्कारोऽपि कारणत्वाद्योनिरुक्तः। यद्वा सयोनिरिव कदाचिद् गृहस्थाश्रमसहित इव। उपलक्षणत्वाद्वर्णाश्रमधर्मवानिव At.

१२. अन्नोपलक्षिततद्भोगेन Sy. स्वधया ब्रह्मविद्यया। न ब्रह्मविद्यावतः पुण्यपापसम्बन्धः। स्वया ब्रह्मविद्यया धीयते, अथवा स्वं दधातीति स्वधः परमात्मा तं याति प्रापयति At.

१३. यद्वा स्वधाशब्देनान्नमयं शरीरं लक्ष्यते तेन गृहीतः सन् Sy.
सम्बद्धः At.

अपाङ्[1]। प्राङ्[2] च। गच्छति[3], आदित्यो भूत्वा दिवि प्राङ् जीवो भूत्वा पुरुषेऽपाङ्[4]। तावि[5]मौ। नित्यौ[6]। विष्वगञ्चनौ[7]। विविध च देवमनुष्यादिषु गच्छन्तौ[8] भवत[9]। तयोरन्यमादित्यम्[10]। सर्वे निश्चिन्वन्ति[11] प्रत्यक्ष पश्यन्त.। न। निचिक्यु[12]। अन्य प्रकृतिससृष्टं घृतमिव पयसि निगूढमिति।

ऋचो अक्षरे[13] परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥३९॥

ऋचो अक्षरे। अथादित्यस्य यद् वाचकमक्षर तत् स्तौति

---

१. अवाङ् P अशुक्लं कर्म कृत्वाऽधो गच्छति Sy. अप निकृष्टमञ्चतीति, क्वचिदपकृष्टमधर्मशील इव लक्ष्यते At.

२. ऊर्ध्वं स्वर्गादिलोक प्राप्नोति। परमात्मैव सूक्ष्मशरीरोपाधिक सन्नानाविधकर्म कृत्वा, तद्भोगाय जीवसञ्ज्ञा लब्ध्वा शरीरत्रयेण सम्बद्धो लोकान्तरेषु सञ्चरति स्थूलसूक्ष्मोभयशरीरपरिग्रहेण लोके गुणत्रयान्वित सन् परिभ्रमति। तथा च श्रूयते 'गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता। स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभि' (Śve U 5.7) इति Sy. क्वचित् प्रकृष्ट धर्ममाचरन्निव लक्ष्यते At

३. तथाप्यस्य न पुण्यपापसम्बन्ध एत्यपगच्छति AT.

४. ०धो० P.D

५. ०वाङ् P.

६. तौ भूतात्मकत्वात्मानौ Sy. ननु जीवन्मुक्तस्थितिरुक्ता न जीवन्मुक्तलक्षणम्। तत्राह तानि प्रसिद्धानि At.

७. अविभागेन सर्वदा वर्तमानौ। यद्वा सूक्ष्मशरीरपक्षे सर्वदा सहवास उपपद्यते स्थूलशरीरपक्षेऽपि सात्त्विकजातेस्तत्कारणानां भूतसूक्ष्माणां सद्भावात्तत्र शरीरसम्बन्ध उपपद्यते Sy.
पुन पुनर्भवामि (नि?) छन्दसि शरीराणि At

८. ०ञ्ज० M इह लोके सर्वत्र गमनौ Sy. लोकगतिना At.

९. तत्तत्फलोपभोगाय सर्वत्र लोकान्तरेषु गच्छन्तौ वर्तेते Sy.
विशिष्टात्मज्ञानेन च्छेत्ता . . . एव जीवन्मुक्त At

१०. तत्र नरा अन्य भूतात्मानम् Sy. कञ्चन जीवन्मुक्तम् At

११. नितरा विशेषेण पश्यन्ति जानन्ति Sy. जना लिङ्गैर्निचिक्युरजानन् At.

१२. अपर देहवच्छायातिरिक्तं न निचिक्युर्न जानन्ति। केचन पामरा देहव्यतिरिक्तं न जानन्ति। केचन विवेकिनः कर्तृत्वभोक्तृत्वोपेतो देहातिरिक्तः कश्चिदस्तीत्यनुमिमते। न केऽपि देहत्रयव्यतिरिक्तमात्मान जानन्ति। अतो दुर्लभमात्मज्ञानमित्यर्थ Sy. अन्यं न निचिक्युर्नाजानन् At.

१३. स्तौमि M. पूर्वमन्त्रे देहात्मजीवात्मानावुक्तौ। तयोरन्यस्य जीवात्मनः पारमार्थिकं रूपमस्ति तदत्रोच्यते Sy. किं तद्विशिष्टमात्मज्ञानं तत्रोत्तरम् At.

यस्मादक्षरणस्वभावात् सर्वा ऋचो विनिर्गता.।

१. अक्षरेऽदृश्यादिगुणके क्षरणरहितेऽनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि। अक्षरशब्दस्य ब्रह्मवाचकत्वम् 'एतद्वै तदक्षरस्य प्रशासने गार्गि' (Brh.U.3.8.) 'यया तदक्षरमधिगम्यते' (Mu. U. 1.1.5.) 'येनाक्षरं पुरुषं वेद सत्यम्' (Mu. U. 1.2.13.) इत्यादिश्रुतिषु प्रसिद्धम्। ऋगक्षरयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। सर्वैर्वेदैः खलु ब्रह्माधिगम्यते। 'तं त्वौपनिषदं पुरुषं पृच्छामि' (Brh U.3.9.26) इत्यादिश्रुतेः। ननूपनिषद्भागाना तथास्तु, इतरेषा तु कथं ब्रह्मविषयत्वमित्युच्यते। यद्यपीतरभागानां यागादिविषयत्वं तथापि बुद्धिशुद्धयुत्पादनद्वारा वेदनसाधनत्वेन ब्रह्मविषयत्वं भविष्यति। 'वेदानुवचनेन ब्राह्मणा विविदिषन्ति' (Brh U 4 4 22.) इत्यादिश्रुतेः। तदेव विशेष्यते। परम उत्कृष्टे निरतिशये, व्योमन् व्योमनि व्योमसदृशे। अलेपत्वनीरूपत्वव्यापित्वादिसादृश्येन व्योमेत्युक्तम्। यद्वा विशेषेण सर्वस्य रक्षके। निरधिष्ठा न कस्यचिदस्ति ? स्वाध्यस्तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात्। तादृशे तत्त्वे सर्वमध्यस्तमित्यर्थः Sy.

अश्नुते व्याप्नोति विषयानित्यक्षरं, तस्मिन्नक्षरे जीवात्मनि। परमीयत इति परमं तस्मिंस्तत्पदार्थे। व्योमन् व्यापके। वाक्यार्थे ब्रह्मात्मैक्ये, वाक्यार्थे व्यापके, असिपदार्थ इत्येके। एव त्रिधैव वेदा इति। कर्मकाण्डविषया वेदास्त्वंपदार्थविषयाः। सगुणेशविषया-वेदास्तत्पदार्थविषया.। वेदान्तास्तु ब्रह्मात्मैक्यपरा एव। सर्वेऽपि वेदा ब्रह्मात्मैक्यविषया इति ज्ञात्वा ब्रह्मात्मैक्यावधारणं विशिष्टात्मज्ञानम् At. एतदक्षरं, परमं चेदं व्योम स्थानम्। अन्यादिनानादेवतानां मन्त्राणां सर्वस्याश्च त्रय्या विद्यायास्तदध्ययनस्य चोङ्कारपूर्वकत्वात्। अथवा परमेदतः (परमेतज्जगतः)। कथम्। वि ... मोतत्वात् (विविधं जगतामोतत्वात्)। इदं प्रणवाख्यं ब्रह्म जगतः कारणमित्युपनिषत्सु वर्णितम्। तस्य किलोमित्येतस्य ब्रह्मणः प्रथमायां मात्रायां पृथिव्यग्निर्ऋग्वेदः पृथिवीनिवासिनो जना इत्येतत्। द्वितीयायां मात्रायामन्तरिक्षं वायुर्यजूंषि, अन्तरिक्षनिवासिनो जना इत्येतत्। तृतीयायां द्यौरादित्यः सामानि द्युनिवासिनो जना इत्येतत्। तेनेदं जगतः पर व्योम। अथवा परम व्योम मृत्योर्बिभ्यतां देवानां, तदेतत्परस्मिन् पादे वक्ष्यते। तस्मिन्नेवंरूपे परमे व्योमन्, लुक् सप्तम्याः SKN. विविधमस्मिञ्छब्दजातमोतमिति व्योम तस्मिन्। तिसृषु मात्रासु, अकारोकारमकारलक्षणासूपशान्तासु यदवशिष्यते तदक्षरं परमं व्योम। अपरमाकाशमपेक्ष्य तत्पर व्योम। शब्दसामान्यमभिव्यक्तमित्यभिप्रायः Dur.

२ अत्र ऋक्शब्देन ऋक्प्रधानभूताः साङ्गापरविद्यात्मकाश्चत्वारो वेदा उच्यन्ते। ऋगादीनामपरविद्यात्व मुण्डके श्रूयते। 'द्वे विद्ये वेदितव्ये' इति प्रतिज्ञाय 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः' (Mu.U. 1.1.5.) इत्यादिना। तस्याः सम्बन्धिनि Sy. अजहल्लक्षणयाऽत्र ऋग्वेदादयो वेदाः At. अस्यामृचि शाकपूणेस्तावन्मतेनोङ्कारं कृत्वा, ऋचामध्ययनप्रारम्भाच्छास्त्रानुवचनादिष्वृगन्ते प्रणवस्य योगादृचः सम्बन्धि SKN. ओङ्कारमृते नाङ्गार्थयन्ति, तस्याः Dur.

१ २ ३ ४ ५ ६
यस्मिंश्च । सर्व एव । देवा ऋक्षु दृश्यमाना अन्ये च । वर्तन्ते । यः । तदक्षरम् । न । वेत्ति
७ ८ ९ १० ११ १२ १३ १४ १५
सः । किम् । ऋचा । करिष्यति । ये । एव । तद् । विदु. । ते । इमे । नक्षत्ररूपेण दिवि, आसत

१. पुनस्तदेव विशेष्यते । यस्मिन्परमात्मनि Sy. यस्मिंस्त्रेधा स्थित आत्मनि At.

२. सर्वे देवाः Sy. वेदा इन्द्रियदेवाः । ईशत्वाप्त्याऽधिकारिका अन्तरिक्षाविस्था नगा देवाश्च । वैराजाश्चिन्मया देवाश्च At.

३. निषीदन्ति । आश्रित्य तिष्ठन्ति तस्मिन् । यद्वा । उक्तलक्षणे वस्तुन्यृगुपलक्षिताः सर्वे साङ्गा वेदाः पर्यवसिता इत्यर्थ. Sy. अधि, उपर्युपरि विशिष्टाः सर्वेऽपि निषण्णा अन्तर्भूता इति काण्डत्रयविषया वेदा ब्रह्मविषया एव At. तत्र छन्दोगानामुपनिषदीतिहास· पठ्यते । 'देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्या प्राविशंस्ते छन्दोभिराच्छादयंस्तच्छन्दसाञ्छन्दस्त्वम् । तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेव पर्यपश्यदृचि साम्नि यजुषि । ते नु विस्त्वोर्ध्वा ऋच· साम्नो यजुषः स्वरमेव प्राविशन् । यदा वा ऋचमाप्नोति, ओमित्येव स्वरत्येव सामैव यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभय तत्प्रविश्य देवा अमृता अभया अभवन्' (Chhā.U.1 4.4) इति । तदेतदिहोच्यते यस्मिन्देवा. सर्वे मृत्योर्बिभ्यतोऽधिनिषण्णा प्रविष्टा इत्यर्थः । अथवा ऋगादीनामपि, अध्ययनमोङ्कारपूर्वकत्वाद्गादय· सर्वे मन्त्रा अत्र निषण्णा· । तेन च तेषां या देवतास्ता अपि तद्द्वारेणात्र निषण्णा इत्येतदभिप्रेत्यैतदुच्यते SKN. ऋगादिषु ये देवास्ते मन्त्रद्वारेणाक्षरेनिषण्णाः । तस्य शब्दकारणत्वात् Dur. ४. यो मर्त्यः Sy. यस्तु पुरुषः At. ५. तादृशं देवादीनां स्वरूपलाभास्पदं कृत्स्नवेदतात्पर्यप्रतिपाद्यं यद्वस्तु Sy. तद्ब्रह्म At. देवरूपमक्षरम् SKN. अनया विभूत्याक्षरम् Dur.

६. न जानाति Sy. ७. स मर्त्यः Sy. सः, ताद्रूप्याप्राप्तेः SKN. ८. तिम् P.

९. पूर्वोक्तेन ऋगादिशब्दजालेन Sy. ऋगादिवेदैः At. ऋगादिभिर्मन्त्रैः Dur.

१०. वेदनसाधनेन वेदेन वेद्यमविदित्वा किं साधयतीत्यर्थः । प्रयोजनाभावात्सर्वस्यापि वेदस्य नैष्फल्यादिति भावः । अथवा योऽक्षरमविदित्वा कर्मणां कर्ता भवति यागादीननुतिष्ठति तेन किञ्चिदपि कर्म कृतं न भवतीत्यर्थः Sy. केनोपायेनात्मानं संसारादुद्धरिष्यति At यस्तन्नाक्षरात्मना पश्यति Dur. ११. इच्छब्दस्तुशब्दस्यार्थे, ये तु SKN. १२. तत्त्वम् Sy तद् ब्रह्म At. १३. जानन्ति Sy. विदन्ति At य एतदेवं विद्वानक्षरं प्रणौति । एतदेवाक्षरं स्वरममतमभयं प्रविशति SKN. १४ त एवेमे ज्ञातारः Sy. त इमे दृश्यमाना जीवन्त एव At. ते हि Dur.

१५. सम्यक्तिष्ठन्ति । अपुनरावृत्त्या स्वरूपेऽवस्थानं समासनम् । यद्वा ये विदुरिद् ये जानन्त्येव नानुतिष्ठन्ति । इच्छब्दोऽवधारणे । त इमे त एव समासते । गवामयनाविसहस्रसंवत्सरसत्रपर्यन्तानि सहोपयन्ति । सहार्थे संशब्दः । सत्राद्यधिकाना यागानामभावात्तेषामपि फलमेतज्ज्ञानेनैव प्राप्त भवतीत्यर्थः । कर्तृणां बहुत्वाद् बहुवचननिर्देशः Sy. सम्यगासते । समासनं मुक्तिः At तत्प्रविश्य 'यदमृतास्तदमृतो भवति' (Cf. Chhā. U. 1.4.5. यदमृता देवास्तदमृतो भवति) इति पूर्वस्येतिहासस्योपसंहारश्रुतेस्ताद्रूप्याप्त्या प्रणवविग्रहात्मानमनुप्रविश्य ब्रह्मणः साम्यमापन्ना विद्वांस इमे समासते । समित्येकीभावे, तेन सहैकीभूता आसते SKN.

तत्परिज्ञानास्ताद्रूप्यमुपगताः प्रणवविग्रहमात्मानमनुप्रविश्य समीकृता निर्वान्ति शान्तार्चिष इवानला इति Dur.

ओमिति प्रतिपद्यते (न्ते)। "एतद्वै यजुस्त्रयी विद्या प्रत्येषा वागेतत् परममक्षरम्।" तदेतद् ऋचाऽभ्युक्तम् 'ऋचो अक्षरे परमे व्योमन्'" इति ब्राह्मणम्।

---

१. आमि० D
२. ०स्त्रियं P. D
३. ०द्या P.
४ TA 2 11 1
५. ०द्युक्तम् P.
६. ०चोक्ष० D
७. TA 2 11 1. अन्ये त्वन्यथा वर्णयन्ति। ऋचः, ऋगर्चनीयमादित्यमण्डलमृगादिमयं वा। 'ऋग्भिः पूर्वाह्णे दिवि देव', (TB.3 12 9 1) 'आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचः' (Mahānār U 12 2) इत्यादिश्रुते। तस्य सम्बन्धिन्यक्षरे परमे व्योमन्नित्युक्तलक्षणे ब्रह्मणि 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' (Chā. U 1 6 6) इत्यादिश्रुत्युक्तस्वरूपे यस्मिन् सर्वे देवा द्योतमाना रश्मयो निषेदुर्वर्तन्ते। य एतन्न वेद स केवलया ऋचा किं करिष्यति। ये जानन्ति भावयन्ति त एव विद्वांस समासते। भूम्या सुखेन रोगादिरहिता भोगिन. सन्तश्चिरकालं जीवन्ति। अपरे प्रकारान्तरेण प्रतिपादयन्ति। ऋचोऽक्षरे, ऋगुपलक्षितसर्ववेदसम्बन्धिन्यक्षरे प्रणवरूप ओङ्कारेऽविनाशिनि सर्ववेदेषु व्याप्ते वा। प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते—"तान्वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत्तदेतदोमिति' (AB 5 32) इति। परमे निरतिशये। नहि प्रणवादधिकं किञ्चिन्मन्त्रजातमस्ति, त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात्। 'यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव' (Mā.U.1.) 'ओमिति ब्रह्म' (TA.7 8) इत्यादिश्रुतेः वेदानां प्रणवस्य स्थानप्रतिनिधिभाव सम्बन्धः। 'य ऋचोऽधीते' इत्याद्युपक्रम्य 'यः प्रणवमधीते स सर्वमधीत ओमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरम्' (TA.2 11.4) इत्यादिश्रुतेः। यस्मिन् विश्वे सर्वे देवा अधि निषेदुः। प्रणवस्य सर्वमन्त्रात्मकत्वान्मन्त्रेषु सर्वदेवतानां निवासात्सर्वदेवनिवासत्वम्। ब्रह्माधिष्ठानत्वाद्वा ब्रह्मणि सर्वदेवानां निवासात्। शिष्टमविशिष्टम्।...अपरे त्वपरथा वर्णयन्ति। ऋचः। ऋगर्चनीयो जीव। तस्य सम्बन्धिन्यक्षरेऽविनाशे व्याप्ते वा परमात्मनीत्यर्थः। अत एव जीवापेक्षया परम उत्कृष्टे निरुपाधिके व्योमन् विशेषेण सर्वाधिष्ठानत्वेन रक्षके व्योमसदृशे वा। यस्मिन्परमात्मनि देवा गमनवन्तो व्यवहरन्तो वेन्द्रियसञ्ज्ञका विश्वे सर्वेऽपि, अधिनिषेदुर्निषीदन्ति, आश्रित्य वर्तन्ते। यस्तन्न वेद न जानात्युपाध्यशपरित्यागे तदेव स्वरूपमिति न पश्यति स्थूलो जनः किमृचा करिष्यति। केवलेन जीवेन जीवभावेन किं फलं प्राप्स्यति। जननमरणादिक्लेशस्यात्यागादिति भावः। ये तत्तत्त्व विदुस्त इत्यादि सिद्धम् Sv. 'ऋचोऽक्षरे परमे व्यवने। यस्मिन् देवा अधिनिषण्णाः सर्वे। यस्तन्न वेद किं स ऋचा करिष्यति। य इत् तद्विदु.। त इमे समासते। इति विदुष उपविशति। कनमतवेनदक्षरम्। ओमित्येषा वागिति शाकपूणिः। ऋचश्च ह्याक्षरे परमे व्यवने धीयन्ते नानादेवतेषु च मन्त्रेषु। 'एतद्ध वा एतदक्षरं यत्सर्वा त्रयी विद्या प्रतिप्रति' इति च ब्राह्मणम् N.13.10; SKN. IV. 153.
८. VM. ignores परमे। व्योमन्

सुयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥४०॥

[1]सुयवसात्[2]। अथ सर्वस्या एव वाच स्तुति, गोरूपा हि वागित्युक्तम्। शोभनस्य यवस्यात्री[3]। भगवती[4]। हि[5]। अभव[6]। अथ = इदानीम्[7]। वयम्[8]। भगवन्त[9]। स्याम[10]। अद्धि[11]। तृणम्[12]। अहन्तव्ये[13]। सर्वदा[14]। पिब च[15]। शुद्धम्[16]।

---

१. ०सान् P.

२. शोभनयवसस्य तृणादिकस्यात्री सती Sy. साधु यवसं सत्कर्माभिविषयीकरोतीति सूयवसत् At शोभनं यवस सुयवसम्। साहितिको दीर्घ । किं तत्? रश्म्युपहृतमुदक, तस्यान्त्री सुयवसादिनी SKN. शोभन यवसमुदकमध्यात्मीकृत्य सूर्यात् Dur

३ भग इति धननाम। सर्वभंजनीयप्रभूतक्षीरादिधनवती Sy तनो भगवत्येव भविष्यति। ईश्वरार्पित कर्म स्यादित्यर्थ At. भगं धन तेनैव रश्म्युपहृतेनोदकाख्येन धनेन धनवती SKN. तेन, उदकेनोदकवती Dur.

४ हिः पूरण. प्रसिद्धौ वा। लोके यवसादिभक्षणेन क्षीरादिसमृद्धि प्रसिद्धा Sy. हिशब्दः पदपूरण. SKN.

५. भव Sy., SKN. भो बुद्धे! अतिक्लेशात्मकतुच्छफलत्वेनात्युग्रत्वाच्च कर्म त्याज्यम्। यथा पातित्य न भवति तथा। कर्म त्यक्तुं न शक्नोषि चेत्सत्कर्मविषयिणी भूयाः At.

६. अनन्तरमेव Sy., At., SKN. पुनरिदानीम् Dur.
The *Padapāṭha* reads अथो as a single word and does not analyse it into अथ and उ. VM. merely paraphrases it by अथ. This means VM. takes अथो as a combination of अथ and उ

७ यजमाना अपि Sy तेनैव त्वत्प्रवृत्तेन धनेन वयमपि SKN त्वयि भगवत्यां वयमपि त्वदुत्सृष्टेनोदकेन Dur.

८ ०न्त P D.M. प्रभूतेन धनेन तद्वन्तः Sy. शुद्धान्त करणा At धनवन्त. SKN., Dur. ९. भवेम SKN.

१० द्धि P. भक्षय Sy. ईश्वररूपत्वेनाद्धि विषयीकुरु At भक्षय च सञ्चूर्णय खादेत्यर्थ. SKN. सञ्चूर्णय Dur.

११ तृणपर्यन्त जगत् At. किम्? तृणं तर्दनीय मेघम् SKN. मेघं, तृद्यतेऽसाविति तृणस्तम् Dur.

१२ गोनामैतत्। अहननीये हे गौ. Sy. भो अघहन्त्रि, अहन्तव्ये At. माध्यमिके वाक् SKN. माध्यमिका वागुच्यते Dur.

१३. अर्थकवार पूर्वमुक्तमिदानीं सर्वदा कर्तव्यमिति प्रार्थयते।... विश्वकाल सर्वदा Sy. पशुभ्यो रात्रौ दीयमाना सांसारिकप्रकृतिका दानी भवति तत्स्थानीया विश्वखण्डनीयाम् At. छान्दसत्वाद्विश्वशब्दादपि दानीम्। सर्वदा SKN. यथाकालम् Dur.

१४ आस्वादय At.

१५. निर्मलम् Sy. निरवद्यमुद्गतानन्दं ब्रह्मरसम् At.
अकलुषम् SKN., Dur.

१ २ ३ ४
उदकम्। इतस्तत आचरन्तीति।

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥४१॥

५ ६ ७ ८ ९ १०
गौरीर्मिमाय। गौरी। निर्मिमाय। उदकानि। कुर्वती। सा। क्वचिदेकपदी भवति

---

१. 'उदकमिति सुखनाम' इति शाकपूणिः। यद्वा कं सुखमकं दुःखम्। उद्गतमकं यस्मात्तदुदकं सुखरूप ब्रह्म। ... यद्वा काद् दुःखाद् उद्गतमुदकम् At. रश्म्युपहृतम्. हे अघ्न्ये घर्मधुग् विश्ववानी सर्वदा पिब च शुद्धमकलुषितमुदकम् SKN. सूर्यरश्म्युपहृतम् Dur.

२. सर्वतो निर्गच्छन्ती Sy.
लक्षयन्ती At.
आभिमुख्येन मर्यादया वा चरन्ती गव्यूतौ SKN
आसेवन्ती. सर्वतो मध्यस्थाने चरन्ती Dur.

३. यद्यप्यनयर्चा वाश्यमानायै होमधेनवे पयसं दोयते तथाप्यध्यात्मव्याख्याया न सा रीतिरादर्तव्येत्यवोचाम। तद्विनियोगदशायामेव तथाविधस्योक्तत्वात् At. 'सुयवसादिनी भगवती हि भव। अथेदानी वयं भगवन्तः स्याम। अद्धि तृणमघ्न्ये. सर्वदा पिब च शुद्धमुदकमाचरन्ती N. 11.44, SKN IV 90

४. VM ignores उ

५. नन्वनेकेषा ब्रह्मशब्दादिनामनेकथा प्रतिपादनप्रकाराः सन्ति तत्र कीदृशः प्रामाणिकः प्रकारः कीदृशो न? इत्युच्यते। अद्वैतपर्यवसायी स सर्वोऽपि प्रामाणिक एवेत्यभिप्रेत्याह At.

६. ऽरं DM. गरणशीला माध्यमिका वाक् Sy. गौरं शुद्धं ब्रह्म तत्परा श्रुतिर्गौरी At. मध्यमस्थाना SKN.

७. शब्दयति Sy. प्रतिपादयति At.
निर्मिमीत इत्यर्थः। किम्? सामर्थ्याज्जगत् SKN
सर्वमिद निर्मिमीते Dur.

८ किं कुर्वती? सलिलानि वृष्टयुदकानि Sy. बहुनामैतत्, (Ngh 3.1.) बहूनि वस्तूनि। यद्वा सलिलानि स्वयं प्रतिपादितान्यपि सन्ति लीलानि सम्यग्ज्ञाननिवर्त्यानि। यद्वा सस्तत्पदार्थो, लिस्त्वम्पदार्थो, लम्, असिपदार्थः, तान्युदकानि तत्त्वानि At
किं कुर्वती? उच्यते, वृष्टिलक्षणानि सलिलानि SKN.

९ ०र्वती P.D. सम्यक् सम्पादयित्री Sy. तत्कुर्वती। एकं तत्त्व प्रमिनयन्त्येकस्मिन्स्तत्त्वे विलापयन्ती सती At.
करोतिकर्मायं, कुर्वती ददतीत्यर्थः SKN
कुर्वती, उदकपूर्वकत्वात्सर्वनिर्माणस्य Dur.

१०. एकपादोपेता, एकाधिष्ठाना मेघे वर्तमाना गमनसाधनेन वायुनैकपदी वा Sy. पद्यते ज्ञायत इति पादो विषयः। ... एकः पादो विषयः प्रतिपाद्यो यस्याः। एकमेव ब्रह्म प्रतिपादयन्तीत्यर्थः At.
पदमाश्रयो वृष्टिकर्मणि सहकारिकारणम्। एकं पदमाश्रयः सहकारिकारणमस्याः सा। केनैकेन? मध्यमेनैकपदीत्युच्यते SKN.
मध्यमेन महैकत्वमापन्ना Dur.

लोके। द्विपदी[१] त्रिपदी[२]। चतुष्पदी[३] च। अन्ततो[४] नवपदी। सेय[५] बह्वक्षरा[६]। भवन्ती[७]। स्वस्मिन्[८] स्थाने वर्तमाना। यास्कस्त्वाह—"एकपदी मध्यमेन। द्विपदी मध्यमेन चादित्येन च[१०]। चतुष्पदी दिग्भि.। अष्टापदी दिग्भिश्चावान्तरदिग्भिश्च। नवपदी ताभिरादित्येन च[११] बहूदका[१२] परमे

---

१. मेघान्तरिक्षाख्यद्वयधिष्ठाना । आदित्यो वा द्वितीयः Sy. तत्त्वंपदार्थविषयत्वेन द्विपदीत्यपरे ।...इहारभ्य वक्ष्यमाणाः पक्षाः पूर्वपूर्वपक्षाशक्तविषयाः। एकपदी द्विपदीत्यन्ये At.
द्वाभ्यां सहकारिकारणाभ्या मध्यमेन चादित्येन द्विपदी SKN.

२. त्रिपदीत्यन्ये । तत्त्वमसिपदार्थविषयत्वात् At.

३ पादचतुष्टयोपेता। दिक्चतुष्टयाधिष्ठाना Sy. सा गौरी चतुष्पदीत्यपरे। विश्वतैजसप्राज्ञतुरीयविषयत्वात् । एकपदीति चतुष्पदीति पञ्चपदीत्यन्ये। विश्वतैजसप्राज्ञतुरीयेश्वरविषयत्वात्। द्विपदी चतुष्पदी षट्पदीत्यन्ये धातुषट्कममीक्षणात्। एकपदी द्विपदी चतुष्पदी सप्तपदीति केचित्। धातुपञ्चकजीवेश्वरविषयत्वात् At. चतसृभिर्दिग्भि । दिशोऽप्यवकाशदानेन सहकारिकारणत्व प्रपद्यन्ते SKN. चतुष्पदी दिग्भिरनपेक्ष्येन्द्रादित्यौ Dur.

४. अथाष्टापदी, विदिगपेक्षयाऽष्टपादोपेताऽष्टाधिष्ठाना, नवपदी, उपरिदिगपेक्षया सूर्येण वा नवदिगधिष्ठाना Sy. अष्टापदी, अष्टमूर्त्तिविषयत्वात् । नवपदी, अष्टमूर्तिनिर्गुणविषयत्वात् At. अष्टापदी दिग्भिश्च । नवपदी, आदित्यमध्यमयोरन्यतरेण SKN.

५. गौरी At.

६. अपरिमितवचनोऽयम् । अपरिमितव्याप्तियुक्ता बहुव्यापनशीलोदकवतीत्यर्थः Sy. अनेन क्रमेण सहस्राक्षरा, सहस्रमर्थानां प्रतिपादकान्यक्षराणि पदानि यस्याः सा तथोक्ता, एवम्भूता श्रुतिः At.
सहस्रमिति बहुनाम, अक्षरमित्युदकनाम। बहूदकेत्यर्थः SKN.

७ ०ती M. ति P.D. एवम्भूता Sy. एवमनेकधा बभूवुषी भवति At.
एकपद्यात्मना भवन्ती। यद्यद् वृष्टिकर्मणि सहकारिकारण यदधीनं वृष्टिकर्म यत्र वा तत्सर्वमाश्रयन्तीत्यर्थः SKN.

८ उदकाश्रयत्वेनोत्कृष्टे Sy. आत्मनि At. उत्कृष्टे SKN

९ अन्तरिक्षे Sy. व्यापके । विशेषेणाविद्याया श्रोतर्यपनेतरि विशेषेण रक्षके वा ब्रह्मण्येकस्मिन्नेव तात्पर्यवती कर्तव्या At. अन्तरिक्षनाम। लुक् सप्तम्या.। व्योमन्यन्तरिक्षे । सप्तमीश्रुतेः स्थितेति शेषः SKN विभक्तानां भूतानां यत्परममवनमेकम् । सर्वभावानामविभक्त एक आत्मा । यस्तदात्मनैव भूतानां सलिलनिर्माणद्वारेण सर्वमिद निर्मिमीते Dur.

१०. Omitted by P.M.

११. दिग्भिश्चावान्तरदिग्भिश्चादित्येन N. 11. 40.

१२. N. adds सहस्राक्षरा before बहूदका

स्थाने" इति।[२]

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः।
ततः क्षरत्यक्षरं तद्विश्वमुपं जीवति ॥४२॥

तस्याः समुद्राः[४]। तस्या वाचः। उदकानि। अधिविक्षरन्ति[६]। तेन वृष्टेनोदकेन।

---

१. व्यवने N.
केचिदेवमाहुः। गौरीर्मिमाय सलिलानि तक्षती शब्दब्रह्मात्मिका वाङ् मिमाय माति। प्रसिद्धार्थे धातु। प्रतिष्ठितानि घटादिद्रव्याणि तक्षती तत्तद्वाचकत्वेन निष्पादयन्ती। एकपदी, अव्याकृतत्वेनैकप्रतिष्ठाना, एकरूपा वाऽऽत्मना। द्विपदी सुप्तिङ्भेदेन पादद्वयवती। चतुष्पदी नामाख्यातोपसर्गनिपातभेदेन। अष्टापदी, आमन्त्रितसहिताष्टभेदेनाष्टपदी। नवपदी, बभूवुषी साध्यर्यरुक्तैरष्टभिर्नवपदी। अथवा सनाभिकेषूर.कण्ठादिषु नवसु पदेषु भवन्ती, पश्चाद् बहुविधाभिव्यक्तिमुपेयुषी परमे व्योमन्नुत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षराऽनेकाकारेण व्याप्ताऽनेकध्वनिप्रकारा भवतीत्यर्थः Sy. गौरीर्मिमाय। सलिलानि तक्षती कुर्वती। एकपदी मध्यमेन। द्विपदी मध्यमेन चादित्येन च। चतुष्पदी दिग्भिः। अष्टापदी दिग्भिश्चावान्तरदिग्भिश्च। नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च। सहस्राक्षरा बृहदका। परमे व्यवने N.11.40; SKN IV 86

२. VM. ignores अष्टापदी

३. ननु सर्वासा श्रुतीना ब्रह्मपरत्वे पुण्यपापविषयश्रुत्यभावेन पुण्यपापाभाव. स्यात्। पुण्यपापाभावे तन्मूलकसंस्कारवन्मोक्षाभावः स्यात्तत्रेदमुत्तरम् At.

४. ०वं M. उक्तायां गो· सकाशात् Sy. ब्रह्मविषयाया गौर्याः सम्बन्धिन्याः At. तस्या गौर्याः। अधि, उपरि SKN. अलिङ्गो मन्त्र इति चेत्? तस्या इत्येतदेव लिङ्गमन्वादिश्यते सम्बन्धाबुद्धोत्पत्तस्माद्यालिङ्ग. Dur.

५. वृष्टघुदकसमुन्दनाधिकरणभूता मेघाः Sy. समुद्रा अवान्तरवाचः।... 'तस्याः समुद्रा इति वाचः समुद्रा.' इत्यनुक्रमणिका (KSA. 1. 164.: 11. 8.) समुद्रा इति वाच इत्यर्थ.। तस्या अक्षरमित्यापः। सा प्रस्तारपङ्क्तिः। तस्याः समुद्रा इति ऋगेव। समुद्रवन्त्यर्थानिति च समुद्राः। समुद्रवन्त्याप एम्य इति च। इति वाचः। तथा मुदमानन्द राति ददातीति मुद्रा ब्रह्मविद्येति च, तत्सहितास्तदेकवाक्यतां गता अवान्तरवाचः समुद्राः। ब्रह्मविद्यायां महातात्पर्यवती गौरी At. समुद्रेत्यन्तरिक्षनाम। तात्स्थ्याच्च ताच्छब्द्यम्। समुद्रस्था· समुन्दनकारिणो वा मेघाः SKN. अधि सकाशात् समुद्रा मेघाः Dur.

६. अगवि P. अधि, अधिकं प्रभूतमुदकं विक्षरन्ति विविधं क्षरन्ति Sy. ता वाचोऽधि, अधिकं धर्माधर्मात्मकं वस्तु, विधया विधिप्रतिषेधात्मकरीत्या क्षरन्त्युपलक्षयन्ति बोधयन्ति। यथा हि वत्सपायने तात्पर्यवत्योऽपि धेनवः प्रसङ्गात्स्वामिभ्योऽपि क्षीरं समर्पयन्ति तथेत्यर्थः At. विविधं क्षरन्त्युदकम् SKN. वर्षन्ति Dur.

७. उदकेन Sy. श्रुत्युपक्षिप्तधर्मांशिना At. क्षरितेन SKN.

सर्वा.[1] । दिशः[2] । जीवन्ति[3] । तदेवाह—तत.[4] । क्षरति[5] । उदकम् । तत्[6] । सर्वाणि भूतानि[7] । उपजीवन्तीति[8] ।[9]

शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥४३॥

शकमयम्[10] । आदित्य पशुरासीत् तेनायजस्तदानी तस्य पशो पाकार्थमग्नि शकैर्देवा. प्राज्वालयस्तस्याग्ने· शकमयम्[10] । धूमम् । समीपे[11] । अपश्यन्[12] मेघभूतम् । शौनक[13] —"वाच. समुद्रा

---

१. ब्राह्मणाद्वयश्चतस्रो जातयः । जातिमतामिह लक्षणा At.

२. प्रशब्दो वीत्यर्थः । विविशश्चतस्रो दिशश्च । अथवा प्रकृष्टा विशो मुख्याश्चतस्रः । तत्स्थेषु तान्छब्दयम् । तत्स्थाः पुरुषाः Sy.
प्रदेशितस्य विधिप्रतिषेधाद्यात्मकरीत्या शास्त्रस्य योग्याः At.
प्रकृष्टा दिशश्चतस्रः । दिङ्निवासिषु च भूतेषु जीवत्सु दिशः SKN.
दिक्प्रतिदिङ्निवासीनि भूतानि Dur.

३. जीवीभूय प्रयतन्ते । जीवा इवाचरन्ति । परमार्थतो मिथ्यात्वात् At.
जीवन्तीत्युच्यते, तेन चैतत् सकृदेव भवति SKN.
तेन जीवन्ति Dur.

४ ततः पश्चात् Sy. ब्राह्मणाद्याचरितधर्मादिः At. पुनः पुन. प्रतिसंवत्सरं तत एव Dur.

५. ०न्ति D.M. सस्याद्विकमुत्पादयतीत्यर्थः Sy.
वर्षासु पतति At.
क्षरति प्रतिवर्षम् SKN.
क्षरत्युदकं मेघद्वारेण Dur.

६. सस्याद्विकम् Sy.

७. विश्वं जगत् Sy.
स्थावरजङ्गमात्मकं जगत् At.
सर्वं जगत् SKN.
भूतजातम् Dur.

८. उपेत्य स्वीकृत्य जीवति निर्वहति । अतो जगद्धात्री भवतीत्यर्थः At. एवं सैव सर्वोदकेशाना गौरीत्यभिप्रायः Dur.

९. तस्याः समुद्रा अधिविक्षरन्ति । वर्षन्ति मेघाः । तेन जीवन्ति दिगाश्रयाणि भूतानि । तत. क्षरत्यक्षरमुदकम् । तत्सर्वाणि भूतान्युपजीवन्ति N.11.41; SKN. IV. 87

१० शकृन्मय शुष्कगोमयसम्भूतम् Sy.
नानाशक्तिमयं धूमं धूमसदृशमावरकाज्ञानमेश्वरम् At.

११. नातिदूरे Sy. दूरतो गतं तद्विषये कुण्ठितशक्तिकम् At.

१२. दृष्टवानस्मि । दिवा धूमस्य दूरे दृश्यमानत्वात् स एव दर्शनविषयतयोक्तः Sy. पश्यामि । अत्रेयं वेदान्तसम्प्रदायस्थितिः । ईशमाया, एका नित्याऽनादिर्व्यापिका च । तच्छाया जीवमूलाख्या माया अनादयोऽनन्ताश्च । ज्ञाननाश्यस्वाज्ञाने सति ज्ञानिनं प्रतीशमाया कुण्ठितशक्तिर्भवति न नश्यति । सर्वमुक्तिप्रसङ्गात्सूर्यसमीपराज्यभावबद्रज्जुसमीपस्थसर्पाभाववच्च मुक्तं प्रति सर्वमायानामभावः At.

१३. शौनको P.D.

अधि वि क्षरन्ति, आपोऽक्षरं मेघ एवात्र धूम." इति। स च धूम उभयोः पार्श्वयोर्ज्वालायुक्तस्य। अवमस्य। अग्नेः। परस्ताद् भवति। तस्मिन्नग्नावुक्षाणम्। पृश्निम्। अपचन्त। देवाः। तानि। पूर्वयुगजातानि। धर्माणीति।

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम्।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥४४॥

त्रयः केशिनः। त्रय। रश्मियुक्ता। काले काले। अभिविपश्यन्ति धूमेनाग्निः केशी

---

१. ०न्त्या M. २. ०क्षं P.D.
३. ०योर्ज्वा० P. व्याप्तिमता Sy. सर्वत्र प्रसृतेन ब्रह्मणा At.
४. एना अनेनावरेण निकृष्टेन धूमेन Sy. एना प्रत्यक्षादिप्रमाणसिद्धेनानेनावरेण जीवराशिना सह स्थितं धूमं महावाक्यार्थधिया At.
५. तत्कारणभूतमग्निमपश्यम्। अहं यजमान इत्यर्थः Sy. परो विगलितावित्थोऽहम् At. ६. फलस्य सेक्तारम् Sy. गोपयसोक्ष्यमाणं सिच्यमानम् At
७. शुक्लवर्णम्। प्राश्नुतेऽनेन फलमिति, स्वयं प्राश्नुत इति वा पृश्निर्वल्लीरूपः सोमस्तम् Sy. क्षोप्साविषय सगुणरूप कर्म च।...अजहल्लक्षणयाऽत्र पशुपुरोडाशादेरपि ग्रह'। 'पृश्नि स्वर्गनामैतत्' (Ngh. 1. 4) साधने साध्योपचार'। ...पृश्नि स्वर्गविहेतु काम्यसोमादिकम् At.
८. अत्र धात्वर्थानादरेण तिङ्प्रत्यय' करोत्यर्थ'। स च क्रियासामान्यवचनोऽत्रोचित्यात्। अभिषवेण सम्पादितवन्त इत्यर्थः Sv. धातूनामनेकार्थत्वात् संस्कुर्वन्ति At. ९. विविधेरणकुशला ऋत्विजः Sy. वैदिका ऋग्वेदादीन्, विशेषेण .. ईरयन्ति, पठन्ति At
१०. तत्साधनानि Sy. अत्यन्तोत्कृष्टानि। यज्ञक्रियाभावाभित्यर्थनैमित्तिकरूपाणिAt.
११. देवास्तानि पूर्व युग० P. प्रथमानि प्रतमानि प्रकृष्टानि फलपर्यवसायीनि Sy. ज्ञानस्य पूर्वसाधनानि साधारणानि At.
१२. अनुष्ठानानि . . . आसन्सम्पादितान्यभवन्। यद्वा सोम उक्षाभवत् पूर्वं त देवाः शकृतापचन्। यज्ञार्थं तद्भूयो धूमो मेघ आसीत्तदुच्यते। तत्परत्वेन वा मन्त्रो व्याख्येयो विचक्षणैः Sy. पूर्वोक्तानि सोमादीनि धर्मसाधनानि... चासन् भवन्ति At.
१३. VM ignores एना। आसन्
१४. अग्न्यादित्यवायवः Sy. त्रयो देवा अग्निर्वायु सूर्यश्च At. य एते त्रयः... अग्निवायुसूर्याः Dur.
१५. केशस्थानीयप्रकृष्टरश्मियुक्ताः Sy. दीप्तय। तत्स्थानस्था देवता वा केशास्तद्वन्तो भूम्यन्तरिक्षस्वर्गस्थाः, पार्थिवाः सर्वे देवा अग्नावन्तर्भवन्तीत्यग्निरित्युच्यते। एवमन्तरिक्षस्था देवा वायौ। एव स्वर्गस्था देवाः सूर्ये। एवमग्निवायुसूर्याः At.
१६ काले, कालनिमित्तम्।... यदा नाम च, एकेषामृतावृतौ क्रियमाणत्वाद्वा ऋतवो यज्ञाः। ऋतुथा यज्ञनिमित्तम् At.
ऋतुशब्दः कालवचनः। थाशब्दो वीप्सायाम्। ऋतावृतौ स्वस्मिन्स्वस्मिन्काले स्वेन स्वेनोपकारेण SKN. यथाकालम् Dur. १७. विविधलक्षणां भूमि पश्यन्ति Sy. दीप्यन्ते स्वकार्यं कुर्वन्ति At. जगद् वि चक्षतेऽभिपश्यन्त्यनुगृह्णन्तीत्यर्थः SKN. स्वकर्माधिकारयुक्तेनानुग्रहेण लोकमनुगृह्णन्ति Dur.

रजसा वायु[10]। संवत्सरे[1]। वपते[2]। एकः[3]। एषामित्यग्निः पृथिवी वहति[4]। सर्वम्[5]। एकः[6]। विपश्यति[7]। कर्मभिरादित्य.[8]। गतिः[9]। एकस्य[10]। दृश्यते[11]। न[12]। रूपं मध्यमस्येति[13]।

---

१. संवत्सरेऽतीते सति Sy. अग्निर्ऋतुः संवत्सर इत्युक्तं संवत्सरमध्ये... ऋतुद्वयमृतुद्वयमिति च विश्लिष्टोक्तिः At. ग्रीष्मकाले पृथिव्या रोमस्थानीयानि तृणानि SKN.

२. पवते M. दाहेन केशस्थानीयौषधिवनस्पत्यादिकच्छ्रेदनं नापितकार्यं करोति Sy. वसन्तग्रीष्मयोर्वह्त्युपरि पतितं तृणादिकम्। तृणदाहदग्धा भूमिरधिकमोषध्यादिकं जनयति At. दाहेन वपते दहतीत्यर्थ.। अग्नेश्च वपनं मन्त्रान्तरेऽपि प्रसिद्धम् SKN. दहतीत्यर्थः। तथा हि सा कर्मण्या सम्पद्यते Dur.

३. अग्निः Sy., At.
वाडवरूपोऽग्निः SKN.
पृथिवीस्थानोऽग्निः Dur.

४. एषां मध्ये Sy.
एषां त्रयाणा मध्ये At.
तेषामेषाम् SKN.

५. सम् M. सर्वं जगत् Sy. विश्वं जलात्मकम् At.

६. अन्य आदित्यः Sy. सूर्यः At. आदित्यः SKN.

७. सर्वतः पश्यति Sy. अभि, अध्यात्ममन्तरस्थं प्रकाशते। अध्यात्मपरवाक्याभ्यासेन फलाधिक्यम्।...अथ महावाक्यस्याकर्षणेन अष्टे दर्शयति। हेमन्तशिशिरयोस्तदानीमेवौषध्यादिपरिपाकदर्शनाद्ऊष्माधिक्यापाताच्च At. अभिविपश्यत्यनुगृह्णाति SKN., Dur.

८. स्वकीयैः, प्रकाशवृष्ट्यादिकर्मभिः Sy. स्वव्यापारैः स्वप्रज्ञाभिर्वा देवत्रयान्वितमेतत्पदम् At. केन? शचीभिः। कर्मनामेदं, प्रकाशनरसादानादिभिः कर्मभिरित्यर्थः SKN स्वाधिकारयुक्तैः कर्मभि. Dur

९ प्रावृट्शरदोस्तु भ्राजिश्शब्द एव At.

१०. वायोः Sy., At , SKN.

११. दृश्यते सर्वं. Sy. न दृश्यते At.
तृणपर्णधूल्यादिचालनेनानुमानेनार्थापत्या वा . . . दृश्यत उपलभ्यते SKN.
रजसोद्भूतेन पार्थिवेनोदकेन वा दृश्यते Dur.

१२. न रूपमप्रत्यक्षत्वात्। स्पर्शशब्दधृतिकम्पलिङ्गंगम्यत इति हि न्यायविदो वदन्ति Sy.
नैव रूपमस्य दृश्यते At.

१३. त्रयः केशिन ऋतुथा विचक्षते। काले कालेऽभिविपश्यन्ति। संवत्सरे वपत एक एषाम्। इत्यग्निः पृथिवीं वहति। सर्वमेकोऽभिविपश्यति कर्मभिरादित्यः। गतिरेकस्य दृश्यते न रूपं मध्यमस्य N.12. 27; SKN. IV. 125

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥४५॥

चत्वारि[1] वाक्[1]। चत्वारि[2]। वाच[2]। परिमितानि[3]। पदानि[4] चतुर्धा बुद्ध्या[5] विभागात्[6] पदशब्द[6]। तानि[7] सर्वाण्येव पदानि[8]। जानन्ति[9]। ब्राह्मणा[9]। ये। विद्वासो[10] वेदविद[10]। ततश्च गुहायाम्[11]। निहितानि[12]। त्रीणि[13] पदानि[13]। न चालयन्त्यात्मान[14], न प्रयुज्यन्ते[15] लौकिकैरमनीषिभिः। तुरीयमेव[16] पदम्[17]। मनुष्याः[18]।

---

१. नन्वेवं देवतासद्भावे सत्युपासितप्रसन्नीकृतदैवतस्याधीतवेदस्य, श्रुतव्याकरणमीमांसाद्वयव्युत्पन्नपदपदार्थस्याचार्यं विनापि ब्रह्मज्ञानमुत्पत्स्यत इत्याचार्येणाल, तत्राह At. दीर्घतमा वाचस्तत्त्वमाह SKN.

२. वाचः कृत्स्नायाः Sy.
वाचो वेदस्य At.

३. ०ता M. लोके या वागस्ति सा चतुर्विधा विभक्तेत्यर्थः Sy.
गणितानि At.
अव्यक्तपरिमाणानि SKN.

४. पद्यन्त इति पदानि विषयाः At इयती वाक्। तदेतद्भेदेन हि चत्वारि वाचः परिमितानि पदानि न पञ्चमम्। कतमानि तानि? ओङ्कारमहाव्याहृतयश्चेत्यादीनि SKN.
न पञ्चमं पदमस्ति Dur.

५. बुध्या P. D.

६. ०न् P.

७. पदानि Sy.
तानि सर्वाणि At., SKN.

८. कात्स्न्येन ... विदन्ति At.

९. वेदविदः Sy.
वेदाः At.

१०. मनस ईषिणो मेधाविनः Sy.
न सर्वे ब्राह्मणाः किन्तु ये मनीषिणो, ये गुरुप्रसादजनितज्ञानवन्तः At.
मेधाविनः SKN.
किं सर्वे? ये ... मेधाविनः Dur.

११ गुरुरहितानान्तु गुहा गुहायां महापुरुषबुद्धौ At.
लुप्तसप्तम्याः। सामर्थ्यात्लुप्तोपमं चेदम्। गुहायामिव SKN.

१२. निहितस्तदानी P. स्थापितानि Sy.
निलीनानि गुप्तानि At.

१३. तेषां मध्ये त्रीणि Sy.
यस्मात्तेषां चतुर्णां पदानाम् ... त्रीणि SKN. तेषां च पुनः पदानाम् ... त्रीणि Dur.

१४. चल० P. न चेष्टन्ते प्रकाशन्त इत्यर्थः Sy. नात्मानं प्रकाशयन्ति, नैव वा प्रकाशन्ते At.
इगिर्गत्यर्थः। न गमयन्तीत्यर्थः SKN.
न प्रख्यापयन्ति Dur.

१५. प्रयुंजन्ते P. प्रयुञ्जते M.

१६. चतुर्थम् SKN.
तद्धि त्वरितमिव निर्गतं भवति त्रिभ्यः Dur.

१७. पादं M. पदम् Sy.
भागम् At.
भागम्। एकपदम् Dur.

१८. अज्ञास्तज्ज्ञाश्च Sy.
गुरुरहिताः At.

[1] [2]
वदन्ति ।

१. व्यक्तमुच्चारयन्ति व्यवहरन्ति Sy. प्रतिपादयन्ति। अयं भावः। तुरीयप्राज्ञतैजसविश्वाः प्रत्येकं मनसा चतुर्भागीकरणीयाः। तानि गुरुमन्तः कात्स्न्येन विदन्ति गुरुरहिताः प्राज्ञा अपि भागत्रयं न विदन्त्येव। तेषां स तत्र चतुर्भागमात्रं प्रकाशतेऽतो गुरुमन्त एव वेदतात्पर्यज्ञाः। अन्यस्त्वाह। तुरीयं प्राज्ञतैजसान्य चतुर्थं मनुष्या वदन्तीति। अपर आह। परा, पश्यन्ती, मध्यमा, वैखरीति। मनुष्या वैखरीमेव वदन्तीति। नामाख्यातोपसर्गनिपातेषु चतुर्थं भागं वदन्तीत्यपरे। एवं धर्मार्थकाममोक्षेष्वित्यन्ये At. परिज्ञानार्थं वदन्ति Dur

२. कानि तानि चत्वारीत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति, सर्ववैदिकवाग्जालस्य सङ्ग्रहरूपा भूरादयस्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयसारत्वात्तासां व्याहृतीनामेव सारसङ्ग्रहभूतत्वादकाराद्यात्मकस्य प्रणवस्येति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमितेति केचन वेदवादिनो वदन्ति। अपरे व्याकरणमतानुसारिणो नामाख्यातोपसर्गनिपातभेदेन। क्रियाप्रधानमाख्यातम्। द्रव्यप्रधानं नाम। प्रागुपसृज्यत आख्यातपदस्येत्युपसर्गः प्रादिः। उच्चावचेष्वर्थेषु निपतनान्निपातः, अपि तु चेत्यादिः। एतेष्वेव सर्वा वाक् परिमितेत्यखण्डायाः कृत्स्नाया वाचश्चतुर्धा व्याकृतत्वात्। 'वाग्वै पराच्यव्याकृतावदत् तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते' (TS.6.4.7.3.) इति श्रुतेः। अन्ये तु याज्ञिका मन्त्रः कल्पो ब्राह्मणं, चतुर्थी लौकिकीति। याज्ञिकैः समाख्यातोऽनुष्ठेयार्थप्रकाशको वेदभागो मन्त्रः। मन्त्रविधानप्रतिपादको वेदभागः 'इति मन्त्राः कल्पोऽत ऊर्ध्वम्' (TA.1.31.2.) इत्यादिनोक्तः कल्पः। मन्त्रतात्पर्यार्थप्रकाशको वेदभागो ब्राह्मणम्। भोगविषया, गामानयेत्यादिरूपा व्यावहारिकी। एष्वेव सर्वा वाङ् नियमितेति याज्ञिकाः। ऋग्यजुःसामानि, चतुर्थी व्यावहारिकीति नैरुक्ताः। सर्पाणां वाग्वयसां क्षुद्रसरीसृपस्य च चतुर्थी व्यावहारिकीत्यैतिहासिकाः। पशुषु तृणवेषु मृगेष्वात्मनि चेत्यात्मवादिनः। अपरे मातृकाः प्रकारान्तरेण प्रतिपादयन्ति। परा, पश्यन्ती, मध्यमा, वैखरीति चत्वारीति। एकैव नादात्मिका वाङ् मूलाधारादुदिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात्। सैव हृदयगामिनी पश्यन्तीत्युच्यते। योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षा प्राप्ता मध्यमेत्युच्यते। मध्ये हृदयाख्य उदीयमानत्वान्मध्यमायाः। अथ यदा सैव वक्त्रे स्थिता तालुओष्ठादिव्यापारेण बहिर्निगच्छति तदा वैखरीत्युच्यते। एवं चत्वारि वाच पदानि परिमितानि। मनीषिणो मनसःस्वामिनः स्वाधीनमनस्का ब्राह्मणा रवाख्यस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः परादिचत्वारि पदानि विदुर्जानन्ति। तेषु मध्ये त्रीणि परादीनि गुहा निहितानि हृदयान्तर्वर्तित्वात्। तुरीयं तु पदं वैखरीसञ्ज्ञकं मनुष्याः सर्वे वदन्ति। व्याकरणप्रसिद्धनामाख्यातादिपक्षे मनीषिणो ब्राह्मणाः प्रकृतिप्रत्ययादिविभागज्ञा वाग्योगविदस्तानि पदानि जानन्ति। अवाग्योगविदः पामरा वाचो वाङ्म-

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गुरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥४६॥

इन्द्रं मित्रम्। अथापि ब्राह्मण भवति "अग्नि. सर्वा देवताः।" इति। तस्येव[१] भूयसे निर्वचनाय। इन्द्रादीश्च[२]। अग्निम्[३]। आहु[४]। अथो[५]। दिव्य.[६]। स.[७]। सुपतनः[८]।

यस्य तुरीयं चतुर्थं भागं वदन्ति व्यवहरन्ति। अर्थप्रकाशनाय प्रयुञ्जते Sy. 'चत्वारि वाच. परिमितानि पदानि। तानि विदुर्ब्राह्मणा ये मेधाविन'। गुहायां त्रीणि निहितानि नार्थं वेदयन्ते। गुहा गूहतेः। तुरीय त्वरते.। कतमानि तानि चत्वारि पदानि। ओङ्कारो महाव्याहृतयश्चेत्यार्षम्। नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा.। मन्त्र. कल्पो ब्राह्मण चतुर्थी व्यावहारिकीति याज्ञिकाः। ऋचो यजूषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ता। सर्पाणा वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके। पशुषु तृणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादाः। अथापि ब्राह्मणं भवति 'सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्या साग्नौ सा रथन्तरे। याऽन्तरिक्षे सा वायौ सा वामदेव्ये। या दिवि साऽऽदित्ये सा बृहति सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधु.। तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणाम्' इति N.13.9; SKN. IV. 151. VM. ignores वाचः

१. AB. 2.3; TB. 1 4.4 10.
२. तस्येवं D.M.
३. इन्द्रा-दींश्च M. अमुमादित्यमैश्वर्ययविशिष्टमिन्द्रमाहुः। तथा मित्रं प्रमीतेर्मरणात् त्रातारमहरभिमानिनमेतन्नामकं देवं तमाहुः। वरुणं पापस्य निवारकं राज्यभिमानिन देवमाहु. Sy. तर्हि द्वैतापत्तिरित्याशङ्क्याह एकंव देवता परमात्मा सर्वदेवता। एकस्यैव नानानामग्रहणीत्युच्यते . . . इन्धतीतीन्द्रः 'इदि परमैश्वर्ये' मितो हिंसायास्त्रायत इति मित्रः। एव वृणुत इति वरुणः At. इन्द्र मित्रं वरुण च SKN. इत्येतैरभिधानै. Dur.
४. अङ्गनादिगुणविशिष्टमेतन्नामकमाहुः Sy. अग्नि परेशमाहु.। अग्निशब्दोऽत्र नेत्राग्निमतो रुद्रस्य वाचकः . . . अङ्गं नयतीत्यग्निः। 'अगि गतौ' 'णीञ् प्रापणे' गत्यर्था ज्ञानार्था.At. अग्निमाहुः SKN.
५. अग्निशब्देन ब्रुवन्तीत्यर्थः SKN. आहुस्तत्त्वविदः Dur.
६. अपि चायम् Sy. तथा At. अथशब्दश्चार्थे SKN. अपि च योऽयम् Dur.
७. दिवि भवः Sy. दिव्य. सूर्यः . . . दिवि महापुरुषबुद्धौ द्योतनवत्या भवो दिव्यः At. परस्तात्तच्छब्दाध्युतेर्यच्छब्दाध्याहारः . . . यश्चाय दिव्यो दिवि भवः SKN. दिवि जायते Dur.
८. Omitted by P.D. सोऽप्ययमेव Sy. स परेश. At. द्वितीयार्थे तु प्रथमा। तं चाग्निमाहुरिति सम्बन्धः SKN. अयमपि स एवाग्निरित्याहुः Dur.
९. शोभनो मोक्षपक्षः सुपर्णः At. रश्मिनामैतत्। अन्तर्णीतमत्वर्थः। सुपर्णवानित्यर्थः। शोभनं वा पतनं गमनं यस्य स सुपतनः सुपर्णं आदित्यः SKN.

गरणवानादित्यश्च[1]। एकमेव[2]। सन्तमग्निम्[3]। बहुशरीरपरिग्रहाद् बहुधा[4]। वदन्ति[5]। अग्निमेव[6]। यमम्[7]। मातरिश्वानञ्च[8]। आहुः[9][10]।

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥४७॥

कृष्णं नियानम्[11]। कृष्णम्[11]।

---

१. पक्षवान्वा। एतन्नामको यः पक्ष्यस्ति Sy. संसारमोक्षाभ्यां गरुडूधां गरुत्मान् At. गरुद् गरण, भौमानां रसानां रश्मिभिर्गरणेन तद्वान्...गरितेत्यर्थः। अथवा गुर्वात्मा सन् गरुत्मान् SKN. स्तुतिभिस्तद्वान्। रसाना वा गरिताऽऽदित्यः Dur.

२. कथमेकस्य नानात्वमित्युच्यते। अमुमेवादित्यमेकमेव वस्तुतः सन्तम् Sy. एक सद् ब्रह्म At. परेऽर्धर्चे भिन्न वाक्यम्। किञ्चैक सत् कारणमात्मात्म्यं वस्तु SKN कि बहुना, इममेवाग्निमेकम्...अनन्यत्वेन पश्यन्त· Dur.

३. बहुशरीर is omitted by P

४. विप्रा मेधाविनो देवतातत्त्वविदो बहुधा Sy. ब्राह्मणत्वाद्यभिमानिनो यज्ञादिसिद्धये बहुधाभिधानेन At. विप्रा मेधाविनो बहुधा बहुभिः प्रकारैः SKN. आत्मविदो बहुधा Dur.

५. तत्तत्कार्यकरणेनेन्द्राद्यात्मानं वदन्ति। 'एकैव वा महानात्मा देवता स सूर्य इत्याचक्षते' इत्युक्तत्वात् Sy. इन्द्रादिरूपेणाहुः। योजनान्तरे तु विप्रा मेधाविनस्तत्त्वविदस्त्विन्द्रादिरूपे बहुधा सद् ब्रह्मैकमाहुः At. वदन्ति। अग्निं यमं मातरिश्वानमाहुरिति प्रदर्शनमात्रं चेदम्। सर्वैर्हि शब्दैस्तेन विकारात्मनाऽवस्थितः कारणात्मैवोच्यते। एवमस्या ऋचः पूर्वार्धर्चं इन्द्रादयोऽग्निशब्देनोच्यन्त इत्येतदाह SKN.

६. तमेव वृष्ट्यादिकारणं वैद्युताग्निम् Sy. रोदयतीति रुद्रः, स 'एवाग्रणीत्वादग्निः At. ७. यं M.
नियन्तारम् Sy. यमयतीति यमः At.

८. अन्तरिक्षे श्वसन्तं वायुमाहुः Sy. येन रुष्टेन मातरि मायायां क्षिप्तो जीवः श्वेव भवति स मातरिश्वा At. एवमाद्यैश्चाभिधानैः Dur.

९ सूर्यस्य ब्रह्मणोऽनन्यत्वेन सार्वात्म्यमुक्तं भवति। अत्र ये केचित् 'अग्निः सर्वा देवताः' (AB. 2.3.) इत्यादिश्रुतितोऽयमेवाग्निरुत्तरे अपि ज्योतिषी इति मत्वाऽग्नेरेव सार्वात्म्यप्रतिपादकोऽयं मन्त्र इति वदन्ति। तत्पक्षे प्रथमोऽग्निशब्द उद्देश्यः। तमग्निमुद्दिश्येन्द्राद्यात्मकत्वकथनम् Sy. इममेवाग्निं महान्तमात्मानं बहुधा मेधाविनो वदन्ति। इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम्। दिव्यो दिविजः। गरुत्मान् गरणवान्। गुर्वात्मा महात्मेति वा N.7.18; SKN. III. 80.

१०. VM. ignores विप्राः

११. कृष्णवर्णम् Sy. भक्तस्वरूपादिकमाह कृष्णं विष्णुं सगुणं ब्रह्म At. कृष्णवर्णं देवतानां रात्रित्वेन स्मरणान्मेघनीलत्वाच्च SKN.

[1]नियमनं रात्रिः। आदित्यस्य हरयः सुपर्णा=[2]हरणा आदित्यरश्मयः 'यदा खलु वाऽसावादित्यो [3]न्यङ्[4]रश्मिभि. पर्यावर्ततेऽथ वर्षति', इति ब्राह्मणम्। [5]ततश्चादित्यस्यात्मनो [6]विविधं नियमनं नीचैर्गमन वा दक्षिणायने भवतीति, दक्षिणायन कृष्णं [7]नियानमुच्यते तस्य च कार्ष्ण्यं मेघान्धकारावृतत्वात्त प्रत्यादित्यरश्मय । [8]अप । [9]वसाना [10]आत्मन्यासञ्जयन्त.। [11]दिवम्। [12]उत्पतन्ति।

---

१. नियमेन गच्छन्तं मेघम् Sy. नियमेन भक्तैर्यातव्यम् At. नियमेन यानं प्रायणमस्मिन्सर्वप्राणिनामिति यानशब्दो नियमनवचनः। स दक्षिणायने द्रष्टव्यो विशेषणसम्बन्धेन कृष्णत्वेन सम्बन्धात्। प्रथमा द्वितीया वा सप्तम्यर्थे द्रष्टव्या। कृष्णेऽयने दक्षिणायन इत्यर्थः। त आववृत्रन्नित्येतेन वाऽस्य सम्बन्धः SKN. कि पुनस्तत्कृष्णम्।... निर्गति. (निर्यान्ति) निर्गच्छन्त्येतदिति नियानं वर्त्म पन्थाः। तच्च पुनरेतत्... द्वे ह्यस्यायने, शुक्लं चोत्तरं, कृष्णं च दक्षिण, सा हि दंवी रात्रिरभिप्रेता, ततो ब्रवीति रात्रिरादित्यस्य ज्योतिष.। स एष भगवानादित्यो यदा जगदनुग्रहाय गर्भमुदकमात्मन्याधित्सुरुत्तरायणं प्रतिपद्यते तदैते Dur.

२. उदकस्य हर्तारः Sy. हर्तारो रसानाम् SKN. रसहरणाः Dur.

३. शोभनपतना रश्मयः Sy. सुपर्णं गरुडसमानजातिकमारूढाः सुपर्णमारोहन्तीति At. रश्मयः SKN. तस्य रश्मयः Dur.

४. ०त्योऽन्यङ् M.

५. TS. 2.4.10; cf. KS. 11.10; N. 7.24.

६. तथा चादित्येस्या० D. ०दित्येस्या० M.

७. विधा D.M.

८. P. adds दक्षिणायने भवतीति after भवतीति

९. नियामन० M.

१०. उदकानि ... अन्तर्भावितण्यर्थत्वाद् द्विकर्मकत्वम्। यद्वा कृष्णं नियानं नियमनं रात्रिः। देवानां हि रात्रिर्दक्षिणायन, तत्प्रति। तस्मिन्वर्षकाल इत्यर्थः Sy. आप इत्यन्तरिक्षनाम (Ngh 1.3.) अन्तरिक्षसमं सूक्ष्मवस्त्रम् At. अपो वस्त्रस्थानीयाः SKN.

११. ०श्मयो वोऽव० M. वसनाः P.वासयन्तो मेघेषु। अद्भिर्मेघान्पूरयन्त इत्यर्थः Sy. परिदधानाः At. आत्मन्यासजन्तः SKN सर्वस्मादस्माल्लोकात् ... आत्मन्याच्छादयन्त आददानाः Dur.

१२ ०नात्म० D.

१३. ०सज० D.

१४. एवं कुर्वन्तो दिवं द्युलोकं तदाश्रितमादित्यं वोद्दिश्य Sy.
स्वर्गम् At
द्योतनवन्तमेतमादित्यं प्रति Dur.

१५. उत्प० P. ऊर्ध्वं गच्छन्ति Sy. त उन्मुच्य त्यक्त्वा पतन्ति पृथिवीं प्राप्नुवन्ति At. उत्पतन्ति परस्तात्तच्छब्दमध्याहृत्येर्यच्छब्दमध्याहारः। ये SKN. तदुदकं निधित्समानास्तस्मिन् गर्भत्वेन स एष आदित्य उत्तरायणं मासैः षड्भिराहितोदकगर्भः सम्पद्यते Dur.

अत्र यास्कः—'ते यदामुतोऽर्वाञ्चः पर्यावर्तन्ते सहस्थानात्। उदकस्यादित्यात्। अथ। घृतेनोदकेन। पृथिवी। व्युद्यते' इति।

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत।
तस्मिन्त्साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः ॥४८॥

द्वादश प्रधयः। तस्मिंश्चक्रे द्वादश। प्रधयो भवन्ति मासा। त्रीणि। नभ्यफलकान्यृतव।

१. रश्मयः Sy., Dur. विष्णवो भूत्वा सारूप्यादिना समानतां प्राप्ताः सुपर्णास्ते विष्ण्वादिलोकं प्राप्ताः At.

२. आवर्तन्ते, अर्वाञ्च आगच्छन्ति Sy आवर्तन्ते At.
ते कृष्णनियाने . . . आववर्तन्ते (आवर्तन्ते) SKN. स एष परिक्तोदकगर्भो दक्षिण वर्त्म प्रतिपद्यमानो नभस्यान्मासात्प्रभृति प्रसूयते। तदिदमुच्यते त आववृत्रन् Dur

३. सदनादुदकस्य स्थानात् Sy. लोकान् At. स्थानात् SKN

४. आदित्यमण्डलात् Sy. तस्य ऋतस्य विष्ण्वादेः सगुणब्रह्मण. At. उदकस्य, आदित्यमण्डलादित्यर्थ. SKN
अमुष्मादादित्यात् Dur

५. अनन्तरमेव यदाऽर्वाग् गच्छन्ति तदानीमेव Sy.
आगमनसमकालमेव At
आच्छदोऽथेत्यस्यार्थे, इच्चेति, अनन्तर च SKN.
तदाद्युत्सिसमनन्तरमेव Dur.

६. विद्युते P. विविधं क्लिद्यते Sy. विशेषेणोद्यत आर्द्रीक्रियते। 'उन्दी क्लेदने' परस्मात्लोकाद् भुवमागच्छन्ति। मेघीभूयोदकीभूय वृष्टिरूपेण भुवमार्द्रयित्वौषधिवनस्पत्यादिरूपं प्राप्य तद्रूपेण पुरुषं प्राप्य स्त्रियो जठराज्जायन्ते At.
स्विद्यत इत्यर्थ. SKN. विविधमुद्यते Dur.

७ कृष्ण निरयण रात्रिः। आदित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयः। ते यदामुतोऽर्वाञ्चः पर्यावर्तन्ते। सहस्थानादुदकस्यादित्यात्। अथ घृतेनोदकेन पृथिवी व्युद्यते। घृतमित्युदकनाम। जिघर्तेः मिश्वतिकर्मणः N 7.24; SKN. III 98. VM. ignores इत्

८. कस्मिं० M. एकमद्वितीयं, चक्र क्रमणस्वभाव सवत्सराख्य चक्रमाश्रिताः Sy. कालचक्रं वर्णयन्ति . . . तैरारब्धमेकं सवत्सरात्मकं कालचक्रम् At

९ एतत्सङ्ख्याका Sy.

१०. वध० P. परिधय. प्रहिता वर्तन्ते Sy. प्रधीयन्त इत्यरा मासात्मकाः At.

११. मास M. तत्स्थानीया द्वादश मासाः Sy.

१२. त्रिसङ्ख्याकानि Sy तस्य च . . . तिस्रः At.

१३. नह्य० M. नाभ्य० P. नाभ्याश्रयाणि फलकानि तत्स्थानीयानि Sy.
नाभयः। ऋतुद्वन्द्वेन नाभिः। 'षड्वृतुः संवत्सर.' (SB. 1.2.5.12.) इति श्रुतेः At.

१४. ग्रीष्मवर्षाहेमन्ताख्यान्याश्रितानि। यथा सूर्यरथचक्रस्य द्वादश परिधयो नाभ्यर्हाणि त्रीणि फलकानि सन्ति तद्वत् कालचक्रस्यापि Sy.

तच्चक्रम्[1]। कः[2]। वेद[3] तस्य लक्षणम्। तस्मिन्[4]। त्रीणि[5] शतानि। षष्टि[6]। च[7]। अतिक्रमणस्वभावाः। शङ्कव[8]। अर्पिता[9] इत्यहोरात्राभिप्रायम्[10]। समुच्चयार्थीयो नकार[11]।

यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥४९॥

यस्ते स्तनः। पुनश्च वाच स्तौति—

---

१. तत्कालचक्रम् At

२. कोऽपि महान् Sy. को ब्रह्मा को वा पुरुषः At.

३. जानाति Sy., At.

४. तस्मिंश्चक्रे साकं सह शङ्कवो न शङ्कव इव ...तस्मिन्नपि सवत्सरचक्रे Sy तस्मिन् कालचक्रे, साक सहभवा अन्योन्यानुबद्धाः At.

५. त्रिंशता, एतत्सङ्ख्याका Sy

६. नशब्दश्चार्थे। षष्टिश्च Sy त्रिंशता षष्टिश्चेत्येवं सङ्ख्याताः At

७. ०णस्यभा० M. एकश्चलशब्दो द्विर्भावप्राप्तः। चलाः। चलनस्वभावानीत्यर्थः Sy.
न चला अव्यभिचारिणः At

८. अरा अरस्थानीयान्यहानि .'षष्टिश्च ह वै त्रीणि च शतानि सवत्सरस्याहानि' (ŚB 9 1 1.43) Sy.
सूक्ष्मा अराः शङ्कवः कीलाः At

९. अर्पितानि Sy अर्पिताः, कीलक इव चक्रे निखचिताः। अनेन त्रिविधं भूतपञ्चकमित्युक्तम्। माससंवत्सरकर्तृरूप कालचक्रे प्रवर्तकत्वात्तदात्मकमित्युक्तम्। अधिभूतमेतद् भवति At

१०. ०राज्यभि० M.

११. समुच्चीयो M. अत्र पुरस्तादुपचारोऽपि नशब्दः सामर्थ्यादुपमार्थीयः Sy.

१२. अधिदैवम्—मासा एव प्रधयः। संवत्सरश्चक्रम्। ऋतवो नाभयः। षष्ट्यधिकं त्रिशतं सूक्ष्मा अरास्तु दिवसा रात्रयो वा। तत्सन्धयः पूर्वे वा परे वा। अध्यात्मन्तु—प्रधीयन्ते प्रधानानि स्वीक्रियन्त इति प्रधयो मनोबुद्धिसहितानीन्द्रियाणि द्वादशारस्थानानि। तैरारब्धं चक्रं प्राणान्तःकरणात्मकमेकं लिङ्गशरीरं, सर्वयोनिषु भेदाभावादेकाशस्य चक्रसदृशत्वाच्चक्रम्। तस्य तिस्रो नाभयोऽवस्थाः। अवस्थात्रयं स्वप्ना(दय)इत्युक्ताः। नचैतच्चक्रं भ्रमणादुपरमतीत्याह। क उ तद् ब्रह्म चिकेत वेत्ति क एव पुमान्। नच ब्रह्मज्ञानादृते तन्निवृत्तिः। ब्रह्मज्ञानं तु दुर्लभम्। तस्मिँल्लिङ्गशरीरे आश्रितं साक सहभावि स्थूलशरीरम्। तत्र च स्थूलदेहे त्रीणि शतानि षष्टिश्च शङ्कव इव स्थिता अरा अस्थिरूपा अर्पिता अन्तर्निहिता आधारस्तम्भसमानाः। तेन चञ्चला न। अतिदृढाः। अन्ये तु त्रिशत षष्टिमज्जान इत्याहुः। परेऽस्थिसन्धय इत्याहुः At. इति मासानाम्। मासा मानात्। प्रधिः प्रहितो भवति N.4.27.

१३. VM. ignores एकम्। उ। साकम्। न

य॑। ते॑। उरसि शिश्यान॑। स्तन॑। य॑। सुम्न भावयति। येन च। विश्वान्येव। वरणीयानि धनानि। पुष्यसि। य.। वसूनि लम्भयन्। रत्नान्यपि प्रयच्छति।

---

१. तव Mah. तव सम्बन्धी Sy. भो वाग्रूपिणि सरस्वति वेदविद्ये तव At., U.

२. शिष्या न M. शेत इति शशयः। ... सुप्त इवास्तेऽन्यैरनुपभुक्तत्वात् Mah., U. शयानस्तव देहे वर्तमानः Sy शयानोऽविद्वान्तो जीवः। तत्प्रधान वाक्यमपि लक्षणया शशय इत्युच्यते At.

३. जातावेकवचनमित्यर्थः। ... स्तन इव स्तनः Mah स्तनवच्छ्रुत्यानीयाना प्राणिनामाप्यायनकारी लौकिकवैदिकशब्दरूपः स्तन. Sy. कुचोऽमृतस्रावक ... शब्दात्मकः ... यत्र परमात्मानुवादेन प्रत्यगात्मैवोच्यते तद्वाक्य सरस्वत्याः स्तनस्थानीयम् At.

४ मयः सुख भावयति प्रापयति सर्वभूतानामिति मयोभूः Mah. रसास्वादिनो सुखस्य भावयिता Sy. यश्च तृतीयः स्तनो मयोभूः सुखरूपः परमात्मा तत्प्रधानं वाक्यमपि लक्षणया मयोभूः। यत्र जीवात्मानुवादेन परमात्मोच्यते तद्वाक्यं देवरूपं सरस्वत्या द्वितीयस्तनस्थानीयम् At. मयः सुखं भावयति सर्वभूतानाम् U.

५. स्तनेन Mah., Sy. अथ नदीरूपिणी सरस्वती। भो नदीरूपिणि सरस्वति, ते तव सम्बन्धिना स्तनेनामृतस्रावकेण येन At.

६. वरणीयानि वस्तूनि Mah. अभिमतरूपाणि धनानि Sy. वारि भवानि व्रीह्यादिधान्यानीति At.

७. त्वं पुष्यसि पुष्णासि Mah. पुष्यसि भोक्तृभ्यः Sy. पोषयसि,... प्राणिधान्याद्युत्पत्तिहेतुः स प्रवाहो नदीरूपः सरस्वत्याः स्तनस्थानीयस्तं स्तनं धातवे धातु ममात्मानं पालयितुं कुरु सम्पादय। एवं सरस्वत्युदकसाध्यसस्यादिसमृद्धिर्याचिता At.

८ वसु धनं विन्दति वेत्ति वा वसुवित् Mah. वसूना वासयितृणा धनानां वेत्ता लब्धा वेदयिता वा Sy भो देवतारूपिणि सर्वदेवमयि सरस्वति प्रसीद।... वसु वसनाच्छादनकर्तारौ जीवेश्वरौ वेदयति ज्ञापयति, अन्तर्भावितोऽत्र ण्यर्थः। विदितब्रह्मविद्याचार्यो हि देवतारूपिण्याः सर्वदेवतारूपायाः सरस्वत्याः स्तनस्थानीयः, कः परमानन्दरूपः। भो सरस्वति तं तव स्तनमिह धातवे सम्पादय At. यश्च वसु विन्दति U.

९. रत्नानि दधाति रत्नधा रमणीयानां धनाना धारयिता Mah बहुविधरमणीयरसानां धारयिता Sy. तथा यश्च द्वितीयस्तनो रत्नधा रत्नानामुत्पादकः पालकश्च यः सरस्वत्याः प्रवाहविशेषः समुद्रप्रविष्ट समुद्रोदकेन संसृज्यमानस्वज्जलं प्राप्य प्रसूतः। शशयो वेदगुहाशयः तद्गम्यफलभूत इति यावत् मयोभू रत्नप्रभवः। मय इत्यन्ननाम। सर्वप्राणिभूदिति यावत्। येन विश्वा सर्वाणि वार्याणि वरणीयानि ब्रह्मादीनि पुष्यसि पालयसि। यो रत्नानि जनयति तं ते तव स्तनं धातवे सम्पादय At.

शोभनधनः। तं मेघाख्य स्तनम्। इह। सरस्वति! पानाय।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥५०॥

यज्ञेन यज्ञम्। 'अग्नि पशुरासीत् तमालभन्त तेनायजन्त' इति ब्राह्मणम्।

---

१. सुष्ठु ददातीति सुदत्रो दाता। धनवानन्यो दातुं न शक्नोति, त्वत्स्तनस्तु धनवान् दाता चेत्यन्येभ्य आधिक्यम् Mah. यः स्तनः सुदत्रः शोभनदान। ... अत्रासकृच्छब्दश्रवणं स्तनस्यातिप्रशस्तत्वज्ञापनार्थम् Sy. सुख ददातीति सुदद्धर्मो धर्मवान्। मतुपोऽलुक्। सुदतस्त्रायत इति सुदत्र ईश्वरः At. कल्याणवानः। धनवानपि सन् कश्चिन्नोत्सहते दातुमत एव भिक्ष्यते U. सुदत्रः कल्याणदान. N.6.14. २ आख्य P. त स्तनम् Mah, At, U. न तादृश सर्वप्राण्युपकारकं सूक्तमयं स्तनम् Sy.

३. अस्मिन्स्थाने Mah. अस्मिन्कर्मणीदानीं वा Sy. इह जीवात्मनि देशे काले च At. ४. ०ती P D.

५. पानार्थमकः कुरु। मम पानाय प्रयच्छेत्यर्थ. Mah. अस्माभिर्धातुं पातुं पानाय कः कुरु Sy. अस्मत्पोषणाय कः कुरु सम्पादय At. पानाय, अक. कुरु U

६. VM. ignores कः
The third pāda of this stanza occurs as the second and the second as the third in the YV. 38.5. Further in the YV., the words उर्वन्तरिक्षमन्वेमि are added to th. stanza of the RV.

७. देवाः प्रजापतिप्राणरूपाः, यज्ञेन यथोक्तेन मानसेन सङ्कल्पेन Mah. देवा व्यवहर्तारो यजमाना यज्ञेन निर्मथ्याग्निना Sy. काम्यकर्मणा At. यथेन्द्रादयो देवा यज्ञेन ज्योतिष्टोमाख्येन U यज्ञसाधनत्वान्निर्मन्थ्योऽग्निरुच्यते। यज्ञसाधनभूतेन निर्मन्थ्येन ... अथवा यज्ञेनेति यज्ञसाधनत्वात्पशुभूतोऽग्निरुच्यते, तथा चाग्नेः पशुत्वे ब्राह्मणवादो दर्शित ... तेन यज्ञेन यज्ञसाधनभूतपशवग्निना SKN. इज्यत इति यज्ञोऽग्निः। 'यजयाच०' (Pa.3.3.90) इति नङ्प्रत्ययः। तेन ... देवा ऋत्विजः BB. स्थावरजङ्गमभावमापन्नेन हविर्भूतेन .. देवा दैवभाविन· Dur.

८ यज्ञस्वरूपं प्रजापतिम् Mah. होमसाधनमाहवनीयम् Sy. यष्टव्यमीश्वरम् At. यज्ञपुरुषं वासुदेवम् U. यज्ञसाधनभूतमेवाग्निमाहवनीयम् ... यज्ञसाधनमेवाग्निं देवताभूतमयजन्त, इष्टवन्तः SKN इतरमग्निम् BB अग्निमेव सर्वदेवताभूतमादित्यादिप्रनाडिकया महान्तमात्मानम् Dur

९ तमाय० D. पूजितवन्तः Mah. अनुष्ठानाय संयोजितवन्त इत्यर्थः। 'अग्निं मथित्वा प्रहरति तेनैवाग्नय आतिष्ठ्यं क्रियते (TS. 6.2.1.7.) इति हि तैत्तिरीयकम् Sy. यजन्ति ते देवा भवन्ति स्वर्गे देवीप्यमानाः At. विधिनाऽयजन्त U. निर्मन्थ्यमग्निमाहवनीये हुतवन्त इत्यर्थः SKN. यजन्ते BB.

तानि । धर्माणि । पूर्वेयुगीयानि । आसन् । ते । ह । नाकम् । महिमान । सेवन्ते । यस्मिन् नाके । पूर्वे ।

१. तस्मात्पूजनात् तानि प्रसिद्धानि Mah. तानि निष्कामत्वेनात्यन्तोत्कृष्टानि, यच्छब्दरहितस्तच्छब्दोऽत्यन्तोत्कृष्टवाची At. यतस्तानि यजनरूपाणि U.

२. जगद्रूपविकाराणां धारकाणि Mah. अग्निसाधनानि कर्माणि Sy. धर्मसाधनानि यज्ञादीनि At. कर्माणि SKN., BB कर्माणि तथाविधज्ञानयुक्तानि Dur.

३. मुख्यानि भूतानि Mah. प्रथम इति मुख्यनाम । प्रतमानि प्रकृष्टतमानि Sy ज्ञानस्य यज्ञस्य प्रथमानि पूर्वसाधनानि At. चिरन्तनानि SKN मुख्यानि BB., Dur.

४. आह P. एतावता सृष्टिप्रतिपादकसूक्तभागार्थ उक्तः Mah फलप्रसवसमर्थान्यभवन्नित्यर्थः Sy. भवन्ति At. आसन् । न केनचिदिदानीमेव प्रवर्तितानि SKN हिंसारहितान्यभावयन् । 'बहुलमन्यत्रापि०' (U. 2.25) इति णिलुक् BB महदात्मभावापत्तये तैरपि क्रियन्त इत्यर्थः Dur.

५. अथोपासनतत्फलानुवादभागार्थः सङ्गृह्यते Mah ते च यजमानाः Sy. ब्रह्मविद्यापि द्विधा सगुणा निर्गुणा च । अत्र निर्गुणायाः फलमिदम् । तेऽप्यन्तोत्कृष्टा ह एव At. के ? देवा दातारो हविषां यजमानाः . . . . हशब्दश्चार्थे, ते च SKN. ये स्वेवं कुर्वन्ति त एव BB.

६. नकं D. तं नाकं विराट्प्राप्तिरूपं स्वर्गं ह एव Mah. नास्मिन्नकमस्तीति नाकः स्वर्गस्तम् Sy. नाकं सुखम् । अकं दुःखम् । अत्र द्वौ नञावतिशायिनं प्रकृतमर्थमाहुरिति नाकमानन्दरूपम् At. स्वर्गम् U. नाकमिति साधारणनाम, दिवश्चादित्यस्य च, तेन नाकं दिवमादित्यं वेत्यर्थः SKN. तमेव नाकं महान्तमात्मानमेकान्तसुखम् Dur.

७. तदुपासका महात्मानः Mah. माहात्म्ययुक्ताः Sy. महान्तः, उपदिष्टमहावाक्यो महच्छब्देन कथ्यत इति वचनादुपदिष्टमहावाक्याज्जीवन्मुक्ताः सन्तः At महाभाग्ययुक्ताः U महिमा महत्त्वम् । लुप्तमत्वर्थश्चायम् । महत्त्ववन्तो महान्त इत्यर्थ. SKN. महिमवन्तः । मत्वर्थीयो लुप्यते BB. तानि कृत्वा नियमेनैवानन्यभावित्वात्तत्फलस्य महिमानस्तदानुपूर्व्येण जातमहदात्मभावाः सन्तः Dur.

८ समवयन्ति प्राप्नुवन्ति Mah. सङ्गताः Sy. तेषां समवाये समवयन्ति । परमानन्दात्मका भवन्तीत्यर्थः At. सेवितवन्तः प्राप्तवन्त इत्यर्थः SKN. तस्माद्वयमप्येतेन कर्मणा तद्धन सत्रेमहीति BB तद्भावमेव त आपेदिरे Dur.

९. यस्मिन्विराट्प्राप्तिरूपे नाके Mah. यस्मिन् नाके Sy. अगुणब्रह्मविद्याफलम् । यत्र ब्रह्मलोके At. यत्र यस्मिन् नाके SKN. किं त एव ? नेत्युच्यते . . . शब्दार्थोपदेशनित्यत्वाद्यत्र Dur.

१०. पुरातनाः Mah. पूर्वतनाः Sy. पूर्वे ब्रह्मादयः सन्ति At. प्रथमे U. पूर्वे सर्वतः प्रथमे SKN. पूर्वे च पूर्वतरे च Dur.

साध्या१। भवन्ति२। देवाः३।

समानमेतदुदकमुच्चैत्यव चाहभिः ।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥५१॥

समानमेतत्१। एकमेव२। इदम्३। उदकं पश्वोषध्यात्मना परिणतमस्माल्लोकादमुं लोकम्४।

---

१. विराडुपाधिसाधकाः Mah. साधना यज्ञादिसाधनवन्तः कर्मदेवा इत्यर्थः। ते Sy. तत्र साध्या आध्यात्मसगुणध्यानेन सह वर्तमाना. सगुणब्रह्मज्ञाः At. सुराः U. नैरुक्तानां साध्या रश्मय उच्यन्ते, तदाह द्युस्थानो रश्मिर्देवगणः SKN. साधका यजमानाः। साधयतेः 'अचो यत्' (Pa. 3.1.97.) इति कर्तरि यत्, णिलोपः BB. ज्ञानकर्मसमुच्चयकारिणः Dur.
This stanza=YV. 31. 16.= TS. 3.5.11.5.

२. तिष्ठन्ति Mah. निवसन्ति ते सचन्त। तस्मादिदानीमपि मनुष्यैरेव कर्तव्यमित्यर्थः Sy. भवन्त्यपुनरावृत्ता. At विद्यन्ते U. इदानीमपि तत्र विद्यन्ते BB सन्ति, जज्ञुरित्यर्थः Dur.

३. तेजसा देदीप्यमानाः U. देवीभूता BB

४. यद्वा देवा इदानीं देवभागमापन्ना पूर्वं यज्ञेनाग्निना पशुभूतेन यज्ञं यष्टव्यमग्निमयजन्त पूजितवन्तः। अग्नेरेव मूर्तिभेदेन देवत्वं च पशुत्वं च द्रष्टव्यम्। 'अग्निः पशुरासीत्तमालभन्त तेनायजन्त' इति श्रुतेः। शिष्टं पूर्ववत्। यत्र यस्मिन् स्वर्गे निमित्तभूते सति पूर्वं पूर्वतनाः साध्या देवाः साधनाश्छन्दोऽभिमानिनः। आदित्या अङ्गिरसश्च साध्या देवा उच्यन्ते। 'छन्दांसि वै साध्या देवास्तेऽग्रेऽग्निनाग्निमयजन्त ते स्वर्गं लोकमायन्नादित्याश्चैवैहासन्नङ्गिरसश्च तेऽग्रेऽग्निनाग्निमयजन्त ते स्वर्गं लोकमायन्' (AB. 1.16.) इति ब्राह्मणम्। एते देवाः स्वर्गे सन्ति भवन्ति स्वर्गप्राप्ता इत्यर्थः। यद्वा यज्ञेन ज्ञानादियज्ञेन यत्र विष्णुमयजन्त पूजयन्ति। ते नाकं विष्णुलोकं महानुभावाः सचन्त सङ्गच्छन्ते यत्र पूर्वे साध्यादयो देवाः सन्ति तत्स्थानम् Sy. एवं योगिनोऽपि। दीपनाद् देवा यज्ञेन समाधिना नारायणाख्यं ज्ञानरूपमयजन्त। यतस्तानि समाधिरूपाणि धर्माणि प्रथमान्यासंस्ते तु नाकं सनकादीनां स्थानं गच्छन्ति। ये तु योगिनो महिमानो जन्मान्तरैर्निर्धूतगुणाश्शुद्धास्ते नारायणाख्यं पुरुषमाविशन्ति मुक्तिं गच्छन्तीत्यर्थः U. ऐतिहासिका. पूर्वं देवयुगमिति। पूर्वोक्तदेवसमूह इत्यर्थः। तदा च ऋगेवं व्याख्येया। मानुषावस्थाया यज्ञेन यज्ञमयजन्त देवत्वाय साध्याः, ते ह नाक प्रपेदिर इत्यर्थः। यत्र तेभ्यः पूर्वे प्राप्ता अन्ये साध्या देवा इति SKN. 'यज्ञेन यज्ञमयजन्त देवाः,। अग्निनाऽग्निमयजन्त देवा। 'अग्निः पशुरासीत् तमालभन्त तेनायजन्त' इति च ब्राह्मणम्। 'तानि धर्माणि प्रथमान्यासन्' 'ते ह नाकं महिमानः' समसेवन्त। 'यत्र पूर्वे साध्याः सन्ति देवाः' साधनाः। द्युस्थानो देवगण इति नैरुक्ताः। पूर्वं देवयुगमित्याख्यानम् N.12.41; SKN. IV. 141

५. एकरूपमित्यर्थः Sy. देशकालावौ समानमपि At. समानमेव SKN.

६. प्रसिद्धम् Sy. एतद् ब्रह्म At.

७. उदकाद् दुःखाबुद्गतमपि At. उदकत्वेनाविशिष्टम् Dur. ८. पश्वोष० M.

उत्[1]। च[2]। गच्छति[3]। तत इह स्वरूपेण गच्छति[4]। अहोरात्रैरेतदेवोक्तम्[5]। भूमिं[6] प्रत्यक्षेणोदकेन[7]। पराभवसतवसो[8] विद्युन्महस इत्याद्या.[9]? सप्त पर्जन्याः[10]। प्रीणयन्ति[11]। दिवम्[12]। जिन्वन्ति[13]। अग्नयः परोक्षेण हविष्ट्वमापन्नेनेति[14]।

---

१. ऊर्ध्वम् Sy., SKN., Dur. देवतादित्वम् At. २. अनुभवति At.

३. अवाङ्मुखं च गच्छति . . . रश्मिनाडयैव भूमिं प्राप्नोति Sy. नीचैरपि मर्त्यं मनुष्यादिरूपमनुभवति च At. अव च शब्दावघोभावे। अध एति, पततीत्यर्थः SKN पुनश्चाहोभिरेवावाङेति। दक्षिणोत्तरायणयोर्व्यावृत्तिभिः प्रतिसंवत्सरमहान्यभिप्रेतानि। तदेतदेकमेवोदकं पर्यायेणोत्तरायणदक्षिणायनयोर्जगद्यात्रासिद्धये तदुदेति चावैति वर्षकर्मभावेन Dur.

४. कैश्चिदहोभिर्ग्रीष्मकालेन Sy. ग्रहीयमानैर्धर्मसंस्कारैरिन्द्रियैः प्राणैश्चोपहितजीवभूत सत् At. अहभिश्छान्दसत्वाद् वर्णलोपः। तृतीया च सप्तम्यर्थे, अहस्सु। उदगयने यान्यहानि तेष्वूर्ध्वं गच्छति दक्षिणायने यानि तेष्वध SKN अहोभिर्निमित्तभूतैः Dur

५. उदकसंस्थायेन सस्याद्युत्पादनद्वारा भूमिष्ठान् Sy एवमनुभाव्य जीवो यदा मनुष्यतां प्राप्तस्तदा कर्माधिकारी जगद्यात्रां प्रवर्तयेत्। अन्यथा जगज्जननदोषः स्यादित्याह भूमिं मनुष्यादिसहिताम् At. अत्रोत्तरेणार्धचेन सहैकवाक्यतायै योग्यविभक्तियुक्तौ यत्तदावध्याहार्यौ। येनोदकेन वृष्टिरूपतामापन्नेन भूमिं भूलोकम् SKN.

६. पराहवस्त्वतवसो M. पराभवततवसो P.

७. ०न्मयस P.D.

८. प्रीणयितारो मेघाः Sy. हविषा जुष्टा इन्द्रसूर्यादयश्च ये देवास्ते At. प्राजंयितारो रसानां माध्यमिका देवगणाः SKN. प्राजंयितारो रसानां माध्यमिका देवगणा वर्षामिमुतो मुञ्चन्तः Dur.

९. प्रीणयन्ति वृष्ट्यादिना At. प्रीणयन्तीत्यर्थः SKN. तर्पयन्त्योषध्युत्पत्तये, एवं तावदवाङेति Dur.

१०. द्युलोकस्थान्देवान् Sy. देवादिसहितं द्युलोकम् At द्युलोकम् SKN. अथ पुनरूर्ध्वं कथमेति? इत्यत आह. . .परमं सूक्ष्म देवोपभोगयोग्य द्यां प्रति Dur.

११ प्रीणयन्ति Sy हविर्दानेन स्वर्गस्थान्देवांस्तर्पयन्तीत्यर्थः At. तत्परिणामत्वात्तद्रूपतामापन्नेन तेनैवोदकेन . . . जिन्वन्ति प्रीणयन्त्यग्नयः। 'इतः प्रदानं देवा उपजिन्वन्त्यमुतो मनुष्याः' इति श्रुतेः SKN यथैवामुतो वर्षेणेमां पर्जन्या जिन्वन्ति, तथैवाहुतिप्रभवेण वर्षेण दिवं जिन्वन्त्यग्नयः। आहुतयो ह्याग्नौ प्रक्षिप्तास्तेन दग्धास्ताः स्वार्चिभिः कृत्वोदकभावमापाद्य . . . वर्षभावेनोत्क्षीयन्ते तद् (द्यु) लोकनिवासिना तृप्तये। ततस्त इह पुनर्वर्षं प्रकल्पयन्ति Dur. जिन्वतिः प्रीतिकर्मा N. 7. 23.

१२. आहवनीयाद्या. स्वे हुत आहुत्या Sy. यजमानेन भूस्थेन समञ्चिता भूस्था अग्न्यादयः At. एवं च सुतरामयमपि च वर्षवान्। आहुतिमूलत्वात्सर्वस्य वर्षस्य। . . . तत्र यदभूद्वर्षकर्मभावान्मध्यम इति तदेतदवशेषिकं मध्यमस्य वैश्वानरत्वेन लक्षणम् Dur.

१३. N. 7. 23.; SKN. III. 96.

दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् ।
अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥५२॥

दिव्यं सुपर्णम्[1]। अन्ते चादित्य स्तौति—दिवि भवम्। सुपतनम्[2]। आपो यत्र वसन्ति सोऽपा गर्भस्तम्[3]। दर्शयितारम्[4]। ओषधीनाम्[5]। अभिपतन सर्वानेव[6]। वृष्टिभि[7]। प्रीणयन्तम्[8]। त सरस्वन्तम्[9]। रक्षणाय। जोहवीमि[10], यद्वेय[11] सरस्वत स्तुतिर्माध्यमिका सरस्वती सूक्ते स्तुता सरस्वाश्च स्तूयत इति[12]।

I.165.

कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः ।
कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥१॥

कया शुभा। अगस्त्यस्येन्द्रमरुता (च) सवाद[14]।

---

१. स्वर्गिण कर्मफलभोक्तारम् At
२. शोभनगमनम्। वायसं गमनशीलम्। बृहन्तं महान्तम् Sy. सुपर्णमारोहयतीति, णिजचौ। सुपर्णवाहनादिरूढविष्ण्वादिलोकार्थं सगुणोपासकं स्वर्गिणं च कर्मविद्याभ्या भ्रष्ट, नीचकर्मकरणेन च वायसयोनिं प्राप्त तथा बृहन्तं ब्रह्मरूपिणमात्मानं च At.
३. ०र्भस्थ P.D. वृष्टयुदकानां गर्भवदुत्पादकम् Sy. अप्प्रमुखसूक्ष्मभूतेन्द्रियाणामापगाना गर्भं कार्यं लिङ्गदेहिनम् At.
४. दर्शनाय। दर्शयन्तमित्यर्थ.। यद्वा। ओषधीनां गर्भं दर्शतमिति पृथग् विशेषणम् Sy. दर्शनं ज्ञान च At.
५. ओषधीः Sy. इमा. स्वामिन्यः पोषिका यस्यास्तां स्थूलां तनुं च At.
६. आनुकूल्येन Sy. सर्वत आपो यत्र गच्छन्ति सोऽभीपः समुद्रान्तःस्थितभूप्रदेशः... समीप इवाचरन्तीति क्विप्। संसाराधित्वादधीप इवाचरतोऽप्यतिसंसारिणो जीवान् At.
७ ज्ञानामृतरसवृष्टिभि. At.
८. जगत्प्रीणयन्तम्। यद्वा। अभीपतोऽभिगमनवतः सलिलाधारांस्तटाकादींस्तर्पयन्तमथवा, अभिगन्ताहम् Sy. तर्पयन्ति At.
९ उदकवन्तम्। सर इत्युदकनाम। वेवं सूर्यं वा Sy. ज्ञानवन्तं गुरुम् At.
१०. पुनः पुनराह्वयामि Sy. प्रोक्तवानस्मि . .दित्यादयोऽत्र सूक्ते मयोक्ता इति At.
११. यद्येय M
१२. स्तत P
१३ VM. ignores वायसम्। बृहन्तम् Ms. D. puts the figure ॥१६४॥ here to indicate the end of one hundred and sixtyfourth hymn. No Such number is given in p. and M.
१४. ०वने P. अत्रेन्द्रमरुत्संवादरूपे सर्वत्र प्राणजीवात्मपरतयापि योजनीयम् Sy.

समागच्छन्मरुद्भिस्तु[1] चरन् व्योम्नि शतक्रतु[2]।
दृष्ट्वा तुष्टाव तानिन्द्रस्ते चैनं मरुतोऽब्रुवन् ॥
तेषामगस्त्य. संवादं तपसा वेद तत्त्वत[3]।
स तानभिजगामाशु निरुप्यैन्द्र[4] हविस्तदा ॥
मरुतश्चापि तुष्टाव सूक्तैस्तन्विति[5] नु त्रिभि[6] ॥ इति शौनक. ॥

केन[7]। शोभनेन[8]। समानवयस्का[9]। सनीडा=एकस्मिन्नन्तरिक्षे प्रादुर्भवन्तः। साधारणेन[10]। मरुतः। सम्भूय[11]। मेहन्ति[12] कथ यजमानै[13] स्तुता[14] वर्ष[15] कुर्वन्तीत्यर्थ। तदेवाह—कया[16]। स्तुत्या[17]। कुतश्च[18]। प्रादुर्भूता[19]। इमे[20]। स्वकीय बलम्[21]। पूजयन्ति[22]। वर्षितार[23]। यजमानाना धनेच्छयेति[24]।

कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त।
स्येनाँइव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥२॥

कस्य ब्रह्माणि। कस्य[25]। स्तोत्राणि[26]। सेवन्ते[27]। तरुणा[28]। को वा[29]। एनान्[30]। अध्वरे[31]। आव-

---

१. ०च्छ... मरुद्भिश्चरन् M
२. ० ०रू० P. D.
३. ०स्तदिति P.D M.
४. Cf. BD. IV. 46cd, 47, 48
५. इन्द्रवाक्यम्। कैरपि Sy.
६. दुर्ज्ञेयया शोभया... यद्वा शुचित्युदकनाम। उक्तरूपया शुभा, उदकेन Sy.
७. ०ळा P. ०ला M. समानस्थाना एते Sy.
८. सर्वेषामेकरूपया महत्या युक्ताः Sy.
९. सम्यक् Sy.
१०. लोकम्... सिञ्चन्ति। मिहिसमानार्थो मिमिक्षतिधातुः। यद्वा मां युद्धादिषु प्रवर्तमानं सम्मिमिक्षुः Sy.
११. यजमानैः स्तुताः is missing in M.
१२. वर्षिकं P.
१३. अनिश्चेयया Sy.
१४. मत्या Sy.
१५. कुतो देशात् Sy.
१६. आगताः Sy.
१७. तदर्थमेते मरुतः Sy.
१८. बलं वृष्टिप्रदानजनितम् Sy.
१९. जगति कुर्वन्ति। यद्वा मम बलं वर्धयन्तीत्यर्थः। 'मरुतो हैनं नाजहुः' (AB.3.20.) इति श्रुतेः Sy.
२०. ०च्छतेति M. वसूयया... धनेच्छया। यद्वा वसवो वासयितारो वा Sy.
२१. महाभागस्य Sy.
२२. परिवृढानि हवींषि Sy.
२३. नित्यतरुणा महानुभावा मरुतः Sy.
२४. कश्च महान् Sy.
२५. स्वकीये यागे Sy.
२६. यागान्तरेभ्यो निवर्तयति Sy.

तंयति। [१] [२]ह्येनानिव शीभ्रम्। अन्तरिक्षेण। गच्छतः। [३]केन। महता। [४]मनसा। [५]वयमेनान्मरुतो [६]रमयामः।

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं ते इत्था।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥३॥

[७]कुतस्त्वम्। इत्थमिन्द्रेणोक्ता [८]मरुत ऊचु—[९]कुतो देशात्। त्वम्। इन्द्र! महान्। [१०]सन्। एक एव। [११]गच्छसि। [१२]सता पते! [१३]किम्। तव। [१४]इत्थमस्माभिर्विधेयम्। त्वमस्माभि[१५]सङ्गच्छमान.। [१६]शोभनैर्वाक्यैः। [१७]सम्पृच्छसे। [१८]तत्र ब्रूहि। हरिव.! [१९]अस्माकम्। [२०]तत्। [२१]यत्। [२२]तव। [२३]अस्मासु [२४]कार्यम्। [२५]

---

१. दुर्निग्रहत्वे दृष्टान्तमाह ... शंसनीयगमनानेतन्नामकान् पक्षिणः Sy.
२. ०वि P.
३. तत्प्रीतिसाधनेन Sy.
४. मननवता स्तोत्रेण Sy.
५. प ... यमेनां M. ०मेन P.
६. रमेमहि Sy.
७. इन्द्रं प्रति मरुद्वाक्यम् Mah. इन्द्रमरुत्संवादे मरुतामेतद्वाक्यम् U.
८. दे P. क्व Mah. कुतः कारणात् Sy. कस्माद्धेतो· U.
९. कीदृशस्त्वम्? ... महित. पूज्यः। ... यद्वा मह उत्सवोऽस्यास्तीति मही, एव माहिनः। स्वार्थेऽण् Mah. महनीयः पूजनीयः Sy. महनीयः सर्वस्य पूज्यः सन् U.
१०. असहायः Mah. असहायः सन् Sy., U.
११. यद्वा कुत्र यासि Sy. शत्रून् ... यासि U.
१२. श्रुतिस्मृत्युक्ताचाररताः सन्तस्तेषां पते Mah. सता पालक Sy. श्रुतिस्मृत्यनुष्ठानरतानां पालयितः U.
१३. गमने को हेतुः किं प्रयोजनम् Mah. किं त्वमवमेव, किं न कोऽप्यनुचरोऽस्ति Sy. किं च ते तव ... प्रयोजनमस्ति येनैकाकी यासि U.
१४. इत्थम्भूतम् U.
१५. सम्यग् गच्छन् सन् Mah. अस्माभिः सङ्गच्छमान· Sy.
१६ शोभनैर्वचनैः .. शोभन्ते तानि शुभानानि Mah शोभमानैर्वचनैः Sy. शोभनैर्वचोभि. U.
१७. कतमः पन्था इति लोकान्पृच्छस्येकाकित्वात् Mah. समीचीनं पृच्छसि Sy. सम्पृच्छसे कतमः पन्था इति U.
१८ ब्रूयाः U.
१९. हरयोऽश्वा अस्य सन्तीति हरिवान् ... इन्द्र! Mah. हरिभ्या तद्वन्निन्द्र! Sy. हरिवन् U
२०. अस्मभ्यम् Sy.
२१. एकाकिगमनकारणम् Mah. तत्कारणम् U.
२२ यतो हेतोः Mah. यद् वक्तुमिष्टतममस्ति Sy. यद् व्यावृत्तिकारणम् U.
२३. त्वदीया वयमिति हेतोर्वक्तव्यमित्यर्थः Mah.
२४. वयम् Mah. अस्मासु वर्तते U.
२५. In the YV., the words महाँ इन्द्रो य ओजसा कदाचन स्तरीरसि कदा चन प्रयुच्छसि are added to the stanza of the RV.

ब्रह्माणि मे मतयः शं सुतासः शुष्मं इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥४॥

ब्रह्माणि[1]। न किञ्चिन्ममान्येन विधेयमस्तीत्यभिप्रायेणेन्द्र आह—स्तोत्रशस्त्राणि[2]। मम[3]। पूजकानि[4]। सुखकरा[5]। सोमा[6]। मया[7]। विसृष्ट[8]। वज्र[9]। शोषको भूत्वा[10]। गच्छति[11]। तथा मत्तः सर्वेऽपेक्षित[12] प्रार्थयन्ते[13]। कामयन्ते च माम्[14]। उक्थानि[15]। हरी च[16]। इमौ[17]। तान्युक्थानि[18]। प्रति[19]।

---

१. ०न्येन न P इन्द्रो मरुतः सहचरानाह Mah. अथैवं तैः पृष्टोऽनया चतुर्थ्येन्द्रः प्रत्याह Sy. इन्द्रमरुत्संवाद इन्द्रस्य द्वैतवाक्यम् U.

२. मन्त्रवाक्यात्मकानि स्तुतिवचांसि, हवींषि वा सोमाज्यादीनि Mah सर्वाणि कर्माणि हवींषि वा Sy. स्तुतयो हवींषि वा U.

३. मम स्वभूतानि। चोदनावाक्येऽग्न्यादिदेवतान्तरसम्बन्धेन प्रतीयमानान्यपि सर्वदेवताप्राणात्मनो ममेन्द्रस्यैव तानीति भावः Mah. मम स्वभूतानि Sy.

४. मननयुक्ताः स्तुतयोऽपि Mah. स्तुतयश्च ... यद्वा मे मतयो बुद्धयस्तेष्वेव वर्तन्त इति शेषः Sy. मतीः U.

५. मम सुखोत्पादिका अतो यज्ञे गन्तव्यमिति भावः Mah. सुखकार्या. Sy. श सुखम् U.

६. अभिषुताः सोमाः Sy., U.

७. मदीया मदर्या एवातो यज्ञं प्रति गन्तव्यमित्यर्थः Sy. मम U.

८. प्रकर्षेण धृतः Mah.
प्रभृतः सन् Sy.
प्रहृतः सोमाभिषवनिमित्तम् U.

९. अत्ति भक्षयति रिपूनित्यद्रिः Mah. शत्रूणां भक्षको वज्रः Sy.
अद्रिर्ग्रावा U.

१०. शोषयति शत्रूनिति शुष्मः। अत एव गमने राक्षसाद्युपद्रवो नास्तीत्यर्थः Mah मध्ये राक्षसादिबाधपरिहाराय ... बलनामैतत्। बलवान् Sy. बलमियर्ति U.

११. गच्छत्येव लक्ष्यं प्रति। न प्रतिहन्यत इत्यर्थ. Mah. गच्छत्येव लक्ष्यं प्रति नच निवर्तते Sy.
अर्पयति। उद्गमयति U.

१२. मामेव Sy.
मदीयमागमनम् U.

१३. यजमानाः Mah., Sy., U.

१४. न केवलं हविरादीनां मदीयत्वेन गन्तव्यमपि तु ... प्रार्थयन्ते Mah. न केवलं हविरादीनां मदीयत्वमेवापि तु ... प्रार्थयन्ते Sy. इच्छन्ति U.

१५. Omitted by P. 'हर्यतिः प्रेप्साकर्मा' (N.7.17) इति यास्कः Mah. मामेव शंसन्तीत्यर्थः Sy.
प्रतिकामयन्ते U.

१६. मसाम् P.

१७. यानि ... स्तोत्रशस्त्राणि Mah.
शस्त्राणि Sy.
इमानीन्द्रः शृणोत्विति U.

१८. नोऽस्माकम् ... अश्वौ Mah. नोऽस्मदीयौ ... इमावश्वौ Sy.

१९. तानि गन्तव्यानि हविरादीनि Sy. तानि स्थानानि U.

२०. ०त्थानि M.

२१. यज्ञाभिमुखम् Mah. अभिप्राप्तुम् Sy. नोऽस्मान् ... आभिमुख्येन U,

१ २
मा। वहतः।

अतो वयमन्तमेभिर्युजानाः स्वश्चित्रेभिस्तन्वः शुम्भमानाः।
महोभिरेताँ उप युज्महे न्विन्द्रं स्वधामनु हि नो बभूथ ॥५॥

३ ४ ५ ६ ७ ८
अतो वयम्। अस्मादेव कारणात्। वयम्। अन्तिकतमे। सयुज्जाना। शत्रुभि स्वबलैश्च। आत्मशरीराणि। १० अलङ्कुर्वाणा। ११ वले। १२ एताञ्छत्रून्। १३ सयोजयाम। क्षिप्रम्। यस्मात्। १४ १५ १६ १७ १८
त्वमिन्द्र! अस्माकम्। बलम्। अनुभवसि बलवतामस्माक साहाय्य करोषीति।

क्व स्या वो मरुतः स्वधासीद्यन्मामेकं समधत्ताहिहत्ये।
अहं ह्युग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः ॥६॥

क्व स्या वः। अमृष्यमाण इन्द्र आह—

१९ २० २१ २२ २३ २४
यदा यूयम्। माम्। एकमेव। अहिहनने। समधत्त। तदानीं युष्माकम्। मरुत!
२५ २६ २७ २८ २९
तत्। वीर्यम्। क्व। आसीन्न इदानी दृष्टम्। अहमेव। हि। उद्गूर्ण। महान्। बलवान्।

---

१. माम् Mah., Sy., U
२. प्रापयतः। अत एवास्माभिर्गन्तव्यमिति भावः। यद्वार्थान्तरम् —ब्रह्माणि मतयः सुताः सोमा, प्रहूतोऽद्रिः सोमाभिषवग्रावा, शुष्मः सुखरूप एतत्सर्वं मम शं सुखमियति। अर्पयति। उद्गमयति। णिजन्तभूतः। समानमन्यत् Mah. अभिमतदेशं प्रापयतः। अत एव शीघ्र गच्छामि। युष्माभिरपि तत्प्राप्तु गन्तव्यमित्यर्थः। अतोऽसहाय इति मन्तव्यमिति भावः Sy. प्रापयतः U.
३. एवमुक्ता मरुतस्तमेवं ब्रुवते Sy.
४. त्वं यस्मादेवं करोष्यतः कारणात् Sy.
५. वयमपि Sy. ६. युक्ताः सन्तः Sy
७. अश्वैः Sy. ८. कीदृशैः ?... स्वायत्तबलैः Sy. ९. ०भि...आ० M
१०. दीप्यन्तः। हर्षं प्राप्नुवाना इत्यर्थः Sy.
११. तेजोभिः।...यद्वा महोभिः स्वमहत्त्वेन युक्ता वयम् Sy.
१२. गन्तून् (गन्तून्) Sy.
१३. तव(त्वया) साकं हविरादि स्वीकुर्महे इत्यर्थः Sy. १४. इन्द्राद् P. हे इन्द्र त्वमपि Sy. १५. अस्मत्सम्बन्धि Sy.
१६. उदकं बलं वा Sy.
१७. अस्मत्सृष्टोदकजन्यं हविरनुभवसि खलु। हिशब्दः परस्परोपकार्योपकारिभावप्रसिद्धिद्योतनार्थः Sy.
१८. माहाव M.
१९. या स्वधा Sy. २०. असहायम् Sy.
२१. वृष्ट्यर्थं मेघहननकर्मणि वृत्रवधे वा Sy.
२२. सहितमभूत्। समासीदिति सम्बन्धः Sy.
२३. दानीं M. सा स्वधा Sy.
२४. युष्माकं सम्बन्धि Sy.
२५. तदुदकं बलं वा Sy.
२६. नैवासीदित्यर्थः। अस्माकमुदकं त्वमनुभवसीति ब्रूथ Sy.
२७. असहायस्य कथमिति मतं सेत्स्यतीत्यत आह। अहम्...खलु Sy.
२८. उद्गूर्णबलः Sy.
२९. महत्त्वोपेतोऽस्मि Sy.

१ २ ३ ४
विश्वम्। शत्रुम्। प्रहारैः। अनामयम्।

भूरिं चकर्थ युज्येभिरस्मे समानेभिर्वृषमन् पौंस्येभिः।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम ॥७॥

५ ६
भूरि चकर्थ। अनया मरुत इन्द्रेण साम्यमापादयन्ति—बहूनि कर्माणि। कृतवानसि।
८ ९ १० ११ १२ १३ १४ १५
सहायभूतैः। अस्माभि। साधारणैः। वृषभ! वीर्ये। वय च बहूनि। कुर्मः। बलवत्तम! इन्द्र!
१६ १७ १८ १९ २०
कर्मणा। यदि। कामयामहे। मरुतो वयम्।

---

१. यस्मादतिबलोऽहं तस्माद्विश्वस्य कृत्स्नस्य Sy. २. शत्रोर्मेघस्य। शत्रुरेवायम्। कर्मणि षष्ठी। सर्वं शत्रुसङ्घम् Sy.

३. वधरूपैश्शोधनैः। वधकौशलैरित्यर्थः। यद्वा वध इति वज्रनाम।... वज्रस्यासनैः क्षेपणप्रकारैः Sy.

४. अनामयम्। अन्तर्भावितण्यर्थोऽयम्। वशीकरोमीत्यर्थः Sy.

५. अथैवमुक्ता इन्द्र पुनराहु Sy. इन्द्रमरुत्संवाद इन्द्रं मरुत आहुः SKN. इन्द्रमरुत्संवादे मरुतामार्षम् Dur.

६. प्रभूतम् Sy. बहु वृत्रवधादिकर्म SKN. बहु कर्म तस्मिंस्तस्मिन्सङ्ग्रामे Dur

७. कृतवानसि सत्यमेव Sy. त्वम्.. कृतवान् SKN.

८. अस्माभिर्युक्तैः Sy. तस्तु.. युज्यमानत्वाद् युज्याः सहाया उच्यन्ते, युज्यैः सहायैः SKN. तत्पुनरस्माभिरेव संयुक्तः। नैकाकीत्यर्थः Dur

९. अस्माकम् Sy. युज्येभिरित्यनेन सम्बन्धाद् 'अस्मे' इत्यस्य 'अस्माभिः' इति तृतीयया विपरिणाम उपपद्यते Dur. अस्माभिरित्यर्थः N. 6.7. १०. समानैः Sy. समानैस्त्वया...केन गुणेन समानैः? उच्यते SKN. ११. ऋषभ P. ०यभ M. वर्षितः Sy., SKN.

१२. पुंसः कर्मभिः सामर्थ्यैरेव चकर्थ। नत्वेक एवेत्यर्थः Sy. बलनामैतत्। बलैः समानबलैरस्माभिरित्यर्थः SKN.

१३. वयम्...त्वत्कृतादपि प्रभूतानि कर्माणि Sy. विनापि त्वया केवला एव बहूनि कर्माणि SKN. बहूनि कर्माणि Dur.

१४. कृतवन्तः स्म Sy. कृतवन्तः SKN.

१५ शव इति बलनाम Sy. हे अतिशयेन बलवन्निन्द्र SKN. हे बलिष्ठ Dur.

१६. क्रतुना कर्मणा Sy. कर्मणा न वाङ्मात्रेण SKN. न केवल वाङ्मात्रेणैतद् वूमः। किं तर्हि कर्मणैवैतत्सम्पादयामः Dur.

१७ यद् वृष्ट्यादिकम् Sy. व्यत्ययेनैकवचनं बहुवचनस्य स्थाने, यानि SKN. यद्यत् Dur. १८. तानि त्वत्तोऽप्यधिकानीत्यर्थः Sy. कामितवन्तो यानि नोऽरोचन्तेत्यर्थः SKN.

१९ यतो वयं मरुतः। छान्दसमनुदात्तत्वम्। एतेन स्वमहत्त्वं स्थापित भवति।... अथवेन्द्रस्येवं वाक्यम्। हे मरुतो यद् यस्यैव तत्तस्यैव भवतु। तद्ध्येह च यूयं च सहैव क्रत्वा कर्मणा यद्वशाम यद् वृष्टिकर्म कामयामहे तस्मादुदकं समानमेवेत्यर्थः। एवं मरुत इति निघातस्वरस्य व्याख्यानम् Sy.; SKN. II. 412.

२०. VM. ignores हि। N. 6.7. quotes the second pāda only.

वधीं[1] वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहमेता मनवे विश्वश्चन्द्राः सुगा अपश्चकर वज्रबाहुः ॥८॥

वधीं वृत्रम् । समानतामप्यसहमान[1] इन्द्र आह—

मरुत ! मदीयेनैवेन्द्रियेण भवता[2] प्रत्यक्षमहमेव । वृत्रम् । हतवानस्मि । स्वेन । क्रोधेन[3] । महान्[4] । भूत[5] । तथा वृत्र हत्वा, अहम् । एता[6] । मनुष्येभ्य[7] । सर्वस्य[8] ह्लादयित्री[9] । अपः । शोभनगमना[10] । कृतवानस्मि[11] । वज्रबाहु[12] ।

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥९॥

अनुत्तम् । मरुत सम्प्रतिपद्यन्ते—

मघवन्[13] ! तव । अनुत्न[14] शत्रुजातम् । न किञ्चिदस्ति[15] । आकार[16] आश्चर्ये । न[17] । त्वत्सदृश[18] । कश्चिदस्ति । देवतासु[19] । ज्ञायमान[20] । नच । जायमान[21] । जातो वा ।

---

१. समानकामव्यस० M इदानीमिन्द्र आह Sy. २. ०ता P.
३. कोपेन Sy. ४. बलवान् Sy.
५. सम्पन्नः Sy. ६. अतः P. D.
७. मनोरथाय Sy.
८. सर्वाह्लादका Sy.
९. अपो वृष्ट्युदकानि Sy.
१०. सुगमनाः । सर्वत्र नद्यादिषु गमनशीला Sy. ११. चकार Sy
१२. हुम् M. यतोऽहं वज्रबाहुः । अनेन सहायनैरपेक्ष्यमुक्तं भवति Sy.
१३. एवमिन्द्रेणोक्ता मरुतः प्रत्याहु·...हे मघवन्धनवन्निन्द्र Mah इदानी ते मरुतो हर्षेण प्रत्याहुः...हे मघवन् Sy धनवन् U.
१४ तमानु० P. D. M न केनापि नुत्तं नाशितं महाभाग्यमिति शेषः Mah. त्वया...अप्रेरितम् Sy. 'णुद् प्रेरणे'... अप्रच्युतस्वभावं महाभाग्यम् U.
१५. नु निश्चये । नकिर्नं कोऽपि त्वन्महाभाग्यनाश इति शेषः Mah. नैवास्ति । नु निश्चये । त्वया यदुक्तं तत्सत्यमित्यर्थः Sy. न वा कश्चित्प्रच्यावको महाभागस्य U.
१६. ०रं M. आ इति स्मरणे, स्मृतवन्तो वयम् Mah., Sy. आ आस्ते U.
१७. न केवलं तवैश्वर्यमात्रं किन्तु सर्वज्ञत्वमपीत्याह न त्वेति, वतुरत्र सादृश्ये Mah. त्वावास्त्वत्सदृशः Sy. मतुप् सादृश्यार्थे । न त्वत्सदृशोऽस्ति U.
१८ देवो नास्ति । स्वार्थे तल् Mah. जयोपायवेदिता...देवो नास्ति Sy. देवः U.
१९. विद्वान्...विदे. ज्ञानन् । नित्त्वादाद्युदात्तः Mah. विद्वान्, व्यत्ययेन ज्ञानच् Sy. सर्वज्ञ इत्यर्थः U.
२०. तानि कर्माणि जायमानो वर्तमानः Mah. न जायमानो नशते U.
२१. जाये P. भूतपूर्वश्च देवमनुष्येषु कश्चित् Mah. जातो वा कश्चिद्देवो मर्त्यो वा Sy. न च जातस्तानि करिष्यति U,

व्याप्नोति[1]। यानि[2]। कार्याणि[3]। कुरुषे[4] त्वम्। प्रवृद्धः[5]।

एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान्कृणवै मनीषा।
अहं ह्युग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥१०॥

एकस्य चित्[6]। एकस्य चित्=अमहायस्य, एव[7]। मम। अप्रतिहतम्[8]। अस्तु। वीर्यम्[9]। यानि कार्याणि[10]। क्षिप्रम्। धृष्टोऽहम्[11]। प्रज्ञया[12]। कर्तुमिच्छामि[13]। तेषु, अहम्[14]। उद्गूर्ण[15]। मरुत.! सर्वस्य वेदिता[16]। यानि वसूनि। प्रतिगच्छामि[17]। इन्द्रोऽहम्[18]। एव। तेषाम्[19]। ईश्वरो भवामि[20]।

अमन्दन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र।
इन्द्राय वृष्णे सुमखाय मह्यं मरुत्वे तनूभिः ॥११॥

अमन्दन्मा[21]। मरुत ! भवदीयोऽय स्तोम[22]। माम्[23]। अमन्दत्[24]। अस्मिन्मङ्गमे[25]। यत्।

---

१. न नशते न व्याप्नोति। न करोतीत्यर्थ.। नशतिर्व्याप्तिकर्मा Mah. तानि...न व्याप्नोति।...नान्यस्त्वच्चेष्टितानुकार्ये-वेत्यर्थः Sy. नशिर्व्याप्त्यर्थश्छन्दसि। व्याप्नोति U.

२. कर्माणि वृत्रवधादीनि Mah. वृत्रवधादीनि Sy.

३. न च करिष्यति। उत्पत्स्यमान इति शेषः।....कालत्रये त्वादृशो नास्तीत्यर्थः। अतो यज्ञेशस्त्वम् Mah कर्तव्यानि Sy.

४. करोषि व्यत्ययेन लोट् Mah. करोषीति लकारव्यत्ययः U.

५. As the word प्रवृद्ध, in the vedic stanza, is in the voc., the reading प्रवृद्ध is suggested for प्रवृद्धः। प्रकर्षेण वृद्ध, पुराण-पुरुष Mah. अतिबल ! हे प्रवृद्ध U.

६. VM. ignores नु। न This stanza=VS. 33.79.

७. इदानीमिन्द्र आह...एकस्यैव Sy.

८. सर्वत्र गमनशीलम् Sy.

९. बलमस्तु। यद्वा बलमेकस्यैवास्तु Sy.

१०. कर्माणि Sv.

११. धर्षितवानहम् Sy.

१२. मनीषया मनस इषया Sy.

१३. कर्तुं शक्नुवानि ? (शक्नवानि) Sy.

१४. अहं खलु, उग्र उद्गूर्णबलः Sy.

१५. वेदनावान् Sy.

१६. अवगच्छामि Sy.

१७. अहमेव...ईश्वर एव सन् Sy.

१८. ०हमेते० M. १९. अथवा विद्वानोऽहं यानि च्यवं यान्युद्दिश्य गच्छेयमेषामीशे। यतोऽहमिन्द्रोऽतः शक्त इत्यर्थः Sy.

२०. VM. ignores हि

२१. इदमपीन्द्रवाक्यम् Sy.

२२. ०म P. स्तोत्रम् Sy.

२३. Omitted by P.D.

२४. मन्दद् P. मादयति मोदयते वा Sy.

२५. अस्मिन्मुदकोत्पादनविषये Sy.

मे[१]। स्तोत्रम्[२]। श्रोतव्यम्[३]। नेतारः[४]। यूय कृतवन्तः[५]। इन्द्राय[६]। वृष्णे[७]। शोभनयशाय[८]। मह्यम्[९]। सख्ये[१०]। सखाय[११]। शरीरभूताय[१२]। शरीरै[१३]।

एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥१२॥

एवेदेते[१४]। एवम्। एव। एते[१५]। माम्। प्रति। दीव्यन्त[१६]। अनिन्दनीयम्[१७]। यश[१८]। अन्नानि[१९]। च। धारयन्त[२०]। सम्यङ् मा दृष्ट्वा[२१]। मरुत[२२]। दीप्तवर्णा। पूर्वमपि मां युद्धे प्रविष्टम्। छादितवन्त[२३]। सम्प्रति। च। आच्छादयत मा परिवार्य तिष्ठत[२४]।

को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः।
मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥१३॥

को न्वत्र[२५]। अगस्त्यवचनम्—

---

१. मम Sy.
२. परिवृढमेघधारणादिरूपम् ... स्वप्रभूत स्तोत्रं वा। 'अनुत्तमा ते' (RV. I 165 9ᵃ) इत्यादिकम् Sy.
३. ०व्यो P सर्वैः श्रोतव्यम् Sy.
४. कृतवन्तः Sy.
५. परमैश्वर्यगुणकाय Sy.
६. अभिमतवर्षित्रे Sy.
७. शोभनयागाय Sy. ८. मम Sy.
९. युष्माभि. समानख्यानाय Sy.
१०. ०य P.D.
११. ०रं भू० M. मदीयशरीरपोषाय भवतु। यद्वा तनूभिरस्मच्छरीरभूतैर्युष्माभिः कृतं मह्यमेवास्तित्यर्थः Sy.
१२. अनेकशरीररूपेताय Sy.
१३. ०त P. यूयम् Sy.
१४. मद्विषये सम्प्रीयमाणा मां ख्यापयन्तो वा Sy.
१५. अनन्तिकस्थम् Sy.
१६. कीर्तिम् Sy.
१७. अनानि P.
१८. आ इति चार्थे Sy.
१९. यद्वा, अनेद्य इति प्रशस्यनाम। प्रशस्यं यशोऽस्मत्तो दधाना अस्माभिर्वा धार्यमाणाः Sy.
२०. सम्यक् प्रकाशय Sy.
२१. चन्द्रमिति हिरण्यनाम। सुवर्णवर्णा यूयम् Sy.
२२. नूनं निश्चयम्...यशोभिराच्छादितवन्तः Sy.
२३. आच्छादयथ च। मां प्रति सर्वदा रोचमाना मय्येव कीर्तिमन्नं च दधाना मत्कृतैः कर्मभिरमिव स्तुतेत्यर्थः Sy.
२४. ०तः M.
२५. अगस्त्यस्येन्द्रमरुतां संवादे सूक्ते कयाशुभीयेऽगस्त्यस्यार्थम् SKN. इन्द्रागस्त्यमरुतां संवादः। तत्रेय(द)मगस्त्यस्यार्थम् Dur.

१ २ ३ ४ ५ ६ ७ ८
क.। नु। अस्मिँल्लोके। मरुत·! व । पूजयितु समर्थ.। प्रतिगच्छत। सखीन्। प्रति।
९ १० ११ १२ १३ १४ १५
सखाय:। धनानि। प्रतिगमयन्त·। चित्रा यूयम्। एषाम्। मदीयानाम्। स्तोत्राणाम्। ज्ञातार.।
भवत।

आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा।
ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥१४॥

१६ १७ १८ १९
आ यद्दुवस्यात्। योऽयमगस्त्य। दुव आभिमुख्येन कर्तुमिच्छति। स्वामिपूजनाय।

---

१. मर्त्यः Sy., SKN अन्यः Dur
२. खलु Sy. नु इति पादपूरण· SKN.
३. अत्र लोके Sy. काल आगते SKN. एतस्मिञ्जगति Dur.
४. युष्मान् Sy., SKN.
५. पूजयति Sy. 'मह पूजायाम्' अत्यर्थं पूजयति ... न कश्चिदपीत्यभिप्राय. SKN. पुन. पुन. पूजयति यथार्हम्। न कश्चिदित्यभिप्राय: Dur
६. ०थ: M. गच्छन Sy. एतज्ज्ञात्वा ... प्रेत्येष उपेत्येतस्य स्थान उपयातास्मानेव SKN. आयात Dur
७. हविष्प्रदानेन सखिभूतान्यजमानान् Sy. सखीन् SKN , Dur
८. आभिमुख्येन प्राप्तुम् Sy. आप्तुम् SKN. आभिमुख्येन Dur
९. सर्वस्य सखिवत्प्रियकारिण. सन्त: Sy. मम स्तुत्येत्यर्थ: SKN यत एवमतो मरुतो ब्रवीमि। हे सखाय: ! Dur.
१०. मननीयानि धनानि Sy. उपगम्य च ... मन्यतेरर्चतिकर्मण एतद्रूपम्। मननानि स्तोत्राणि SKN. मननानि स्वानि चेतांसि Dur.
११. सम्पूर्णं प्रापयन्त: Sy. अपि धात्वर्थानुवादी, वातयतिश्च गमयतेरर्थे, गमयन्त आत्मानं प्रतिपादयन्त: स्तूयमाना अस्माभिरिति शेष: SKN. अस्मान्प्रति निगमयन्त: Dur.
१२. चायनीया यूयम् Sy. चायनीया: SKN. चित्राणि Dur.
१३ मम स्वभूतानाम् SKN
१४. अवितयानाम् Sy यज्ञानाम् SKN. एषां यज्ञानाम् Dur
१५ ०रो M के ? उच्यते। नवेदा व्यत्ययेनात्रैकवचनं नवेदस:। नवेदा इत्येतच्च मेधाविनामान्यत्र। इह त्वेषां भूतेत्यस्य के भवाम ? इत्येवमाकाङ्क्षत्वात्प्रत्यक्षकृतत्वाच्च मन्त्रस्य मेधाविनाम्न: स तोऽस्यामन्त्रितत्वप्रसङ्गादामन्त्रितस्य च सतो निघातप्रसङ्गान्न मेधाविनामेवम्। किं तर्हि ? तद् न, न वेत्ति वेत्येवेत्येतस्मिन्नर्थे वर्तते। कुत एतत् ? निपातनात्। वैयाकरणा हि . नवेदाशब्दं न न वेत्ति, वेत्येवेत्येतस्मिन्नर्थे निपातयन्तीति। द्वौ प्रतिषेधौ प्रकृतं गमयत: । न न वेत्ति कारणम्। वेदना चानुभव:। एषा भवतामनुभवितार इत्यर्थ: SKN. प्रापयितार:... मेधाविन इत्यर्थ: Dur. N. 4.7.; SKN. II. 215.
१६. युष्मत्परिचरणार्हात् स्तोत्रात्, तेन स्तोत्रेण Sy.
१७. यय्म० M. येयम० P. D.
१८. दुप P.
१९. परिचरणाय पर्याप्ता Sy.

दासादिः कारुः[1]। इव। यदा वाज्रस्य[2] मानभवस्य कुम्भयोनेरगस्त्यस्य। मेधा[3]। अस्मान्[4]। आचक्र इति बुद्धिर्भवति तदानीमेव। सुष्ठु। आवर्तत[5]। हे मरुत.! मेधाविनमेनम्[6]। प्रति[7]। इमानि। स्तोत्राणि[8]। युष्माकम्[9]। स्तोता। उच्चारयति[10][11][12]।

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१५॥

एष वः[13][14]। एतत्। व.। स्तोत्रम्। इय च। गीरित्युक्थमाह[15]। मन्दारो मदनात्, मन्दनकुशल, मान्दार्यस्य[16]। मानभवस्य[17]। स्तोतु[18]। ते यूयमागच्छत[19]। शरीराय[20]। अन्नेन सह[21]। कान्तिम्।

---

१. कर्त्री स्तुतिकुशला Sy.
२. माननीयस्य विदुषः Sy.
३. बुद्धिः Sy.
४. न इति सम्प्रत्यर्थे। इदानीन्तनान् Sy.
५. आभिमुख्येन करोति प्राप्नोतीत्यर्थः। यद्वा षष्ठीबहुवचन इदं रूपम्। दुवस्यानां परिचरणार्हाणा दुवसे परिचरणायेत्यर्थः Sy.
६. ओ इति निपातद्वयसमुदायरूप एको निपातः। आङित्याभिमुख्येन। उकारोऽवधारणे। आवर्तध्वमेव Sy.
७. यजमानं मामगस्त्यम् Sy.
८. आभिमुख्येन प्राप्तुम् Sy
९. परिवृढानि कर्माण्युद्दिश्य Sy.
१०. युष्मान् Sy.
११. अर्चति। यस्मादेवं तस्मादावर्तध्वमित्यर्थः Sy.
१२. VM. ignores उ
१३. एषः Mah., U. इदानीं क्रियमाणप्रकारम् Sy.
१४. वै M. युष्मभ्यम्। युष्मदर्थं वर्तत इति शेषः Mah. युष्मदर्थं युष्मत्प्रीणनाय भवन्त्विस्यर्थः Sy. युष्माकम् U.
१५. सत्या च प्रिया च Mah. स्तुतिरूपा वागपि वो युष्मदर्थाय Sy. सत्या च U.
१६. मन्दार्यमानस्य D. किंभूतस्य कारोः ?... मां ममेति स्वस्वामिसम्बन्धं वारयतीति मान्दार्यस्तस्य वीतरागस्येत्यर्थः। यद्वा मां वारयतीत्येव यः शत्रूणां प्रत्ययमावधाति स मान्दार्यः। यद्वा मन्दारः कल्पवृक्षस्तत्तुल्यो मान्दार्यस्तस्य। अथ कामपूरस्येत्यर्थः Mah यस्मादेवं तस्मान्मान्दार्यस्य स्तुतिविशेषैर्मन्दयितुः स्तुतिभिर्मदस्य प्रेरयितुर्वा Sy. मम मान्दार्यस्यर्षेर्ममेति स्वस्वामिसम्बन्धं वृणातीति मान्दार्यः। यद्वा मां वारयति मां हतीत्येवं यः सपत्नानां प्रत्ययमावधाति स मान्दार्यस्तस्य मम च U.
१७. मानार्हस्य Mah. वरप्रदानादिना माननीयस्य Sy. मानार्हस्य U.
१८. कर्तुर्यजमानस्य Mah. स्तोतुः Sy. कर्तुस्तं स्तोमं तां च गिरमुपभुज्य U.
१९. आगमयत M. यासीरन्निति वचनव्यत्ययः U.
२०. सर्वदा शरीरस्थित्यर्थमित्यर्थः। अस्मच्छरीरं वृद्धीकर्तुमिति भावः Mah. शरीराय, तत्पोषायेत्यर्थः Sy. सशरीरस्थित्यर्थम् U.
२१. अन्नेन निमित्तेन Mah. इच्छया Sy. अन्नेन निमित्तभूतेनाहूयमानाः U.

आयुर्वा[1]। लभेमहि[2] वयम्। अन्नम्। बलं च। क्षिप्रदानमिति[3]।

अष्टकस्य द्वितीयस्य तृतीय व्याकरोदिति।

अध्याय वेङ्कटार्यस्य तनयो माधवाह्वय[4] ॥

॥ अथ द्वितीयेऽष्टके चतुर्थोऽध्यायः[5] ॥

अध्यायं "तत्तु वो[6]चाम" व्याचिख्यासति माधवः।

प्रदर्शयँल्लिङो वृत्तिं बहुष्वर्थेषु लिङ्[7] स्मृतः ॥१॥

कर्तव्यताप्रतीतिस्तु सर्वेष्वर्थेषु विद्यते।

विध्यादय[8]· काकुभेदात् षड् भवन्तीति पण्डिताः ॥२॥

"न दुरुक्ताय स्पृहयेत्[9]" "गृणी[10]यात्" इति चापरम्।

विधावुदाहरन्त्येतौ प्रेषणं विधिरुच्यते ॥३॥

निमन्त्रणामन्त्रणयोर्भेदमाह पतञ्जलिः।

एवं तर्हि नियोगत. कर्तव्यं तन्निमन्त्रणम्[11] ॥४॥

---

१. किमर्थम्। वया वयसाम्। आमि टिलोप आर्षः। बाल्ययौवनस्थाविराणां वयसा सम्बन्धिन्यं Mah. वयमपि Sy. वयो वृद्धीकर्तुम् U.

२. जीवितदातृ बलमन्नं च वयं प्राप्नुयामेति प्रार्थना Mah. एतत्सर्वं विद्याम। युष्मास्वागतेषु यज्ञसम्पूर्त्येष्टयाविद्वारा लभेमहि Sy. विद्यां लभेमहि U.

३. जीवयतीति जीरदानुस्तम् Mah. जयशीलदानम् Sy.
जीवितदातृकर्म च U.
This stanza=VS. 34. 48.

४. Ms D. puts the figure ॥१६५॥ here to indicate the end of one hundred and sixtyfifth hymn. No such number is given in P. and M.

५. Omitted by P. D.

६. D. repeats लिङ् लिङ्।

७. ०ये P. D. RV. I. 41. 9ᵉ.

८. वृणी० P. D. M. RV. X. 117. 5ᵃ.

९. विदावु M.

१०. तत् is omitted by P. D.

आमन्त्रणं[1] कामचारस्तत्र[2] नाकुर्वतो भयम्[3] ।
अधीष्टं नाम सत्कारपूर्वं[4] व्यापारणं[5] विदुः ॥५॥

दृश्यन्ते बहवोऽस्माभिः[6] प्रार्थनाविषया लिङः[7] ।
"तयोरिदवसा वयम्[8]" "संयुज्याव[9] सनिभ्य[10] आ" ॥६॥
"विद्युर्मे[11] अस्य देवा इन्द्रो[12] विद्यात् सह ऋषिभिः" ।
"अवैनं राजा वरुणो[13]" "अन्तर्निहिताः केतवः[14] स्युः" ॥७॥

विधीयते चाशिषि लिङ्[15]डाशीर्धर्मं[16] प्रयोक्तरि ।
"मयोभुवा[17] सुप्रणीती[18]" "भूयाम[19] वाजदाव्नाम्[20]" ॥८॥
हेतुहेतुमतोर्लिङ् स्याद्[21] "यदिन्द्राहं यथा[22]"ति सः ।
अधीष्टस्योदाहरणम् "उतो न उत्पुपूर्याः[23]" ॥९॥

"अद्या मुरीय[24]" लिङ्[25]न्यं विध्यादिषु न कश्चन ।
"अप्यृ[26] नु पत्नी[27]" इति च दृश्यतेऽन्या[28] विधा तथा ॥१०॥

---

१. ०णे R. omitted by P.
२. ना is missing in M.
३. भवम् M. R. ४. पूर्व्यां M.
५. ०णं M ६ ०स्माकं M
७. RV. I 17.6ª. ८. Omitted by P. ९. नसिभ्य M.
१०. Omitted by M. RV VIII. 62.11ᵇ.
११. आविद्युन्मे M. विद्युन्मे D.
१२. ०र्षि० M. RV. I 23.24ᶜ-ᵈ.
१३. RV. I.24.13ᶜ.
१४. RV. I.24.7ᵈ. I have separated the two quotations. This separation gives one syllable in the 4th pāda too many.
१५. ०ङा० D. M. ०ङ् आ० P.
१६ ०मः M. ०धर्मप्रयोक्तरि is suggested for ०धर्मः प्रयोक्तरि
१७. ०नि P. D. RV. V.42.18ᵇ.
१८. ०म्नाम् M. RV. I.17.4ᶜ.
१९. ०ङ स्यात् P. २०. RV. VIII.14 1ª. २१. ०णं मतो M.
२२. RV. V.6.9ᶜ. उल्पु० P.
२३. RV. VII.104.15ª.
२४. ०ङ० M. ०ङ् द्वयं P. D.
२५. आर्य्यू M.
२६. वतीः P. RV. I.179.1ª.
२७. Omitted by P. D.
२८. ०न्यविषः R.

एवम्प्रकारा बहवो लिङ्गोऽस्माभिः प्रदर्शिताः[1]।
सन्ति चान्येऽपि बहवः पश्येत्ताँश्चापि पण्डितः[2] ॥ ११॥

I.166.

तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे[3]।
एधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥१॥

तन्नु वोचाम। मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वामतीवरे कुम्भे रेतोऽपतत् ततोऽगस्त्यवसिष्ठावजायेताम्[4]। अथागस्त्यार्षम्[5]। तत्[6]। क्षिप्रम्[7]। वोचाम[8]। वेगवते[9]। मनुष्येषु जाताय[10]। प्रत्नम्[11]। महत्त्वम्[12]। मेघस्य[13]। लिङ्गाय मारुताय गणाय[14]। वर्धनेनेव[15]। हे मरुत[16]! गमने[17]। बहुस्वना[18]! युद्धेनेव[19]। शक्ता योद्धार[20]। बलानि[21]। कुरुथ[22]।

नित्यं न सूनुं मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः।
नर्धन्ति रुद्रा अवसा नमस्विनं न मर्धन्ति स्वतवसो हविष्कृतम् ॥२॥

नित्यं न सूनुम्[23]। औरसम्[24]। इव। पुत्रम्[25]। उदकम्[26]। धारयन्तः[27]। उपक्रीडन्ति।

---

१. ०शि० P.
२. ०ताः D.
३. ०रीकु० M.
४. ०ष्ठा म(व)जा० M. ०ता D.
५. अथ is omitted by P. D.
६. तादृशं प्रसिद्धम् Sy.
७. ब्रूमः Sy.
८. वेगते P. राभस्ययुक्ताय Sy.
९. वेद्यां प्रादुर्भावाय वेद्यां सन्निधानायेत्यर्थः Sy.
१०. पूर्वं पूरकं पूर्वतनं वा Sy.
११. माहात्म्यम् Sy.
१२. फलस्य वर्षितुर्यज्ञस्य Sy.
१३. प्रज्ञानाय। वायुप्रेरणेन मेघागमनं प्रसिद्धम् Sy.
१४. म० D.
१५. Omitted by P. D.
१६. ऐधानि, एधःसम्बन्धीनि तेजांसीव Sy.
१७. हे गमने मरुतः P. यामनि यागगमने प्रस्तुते सति Sy.
१८. गमनसंरम्भेण प्रभूतध्वनियुक्ताः Sy.
१९. तत्र दृष्टान्तः।...युद्धेन तत्तद्युद्धनिमित्तं यथा तविषाणि कुरुथ तद्वत् Sy.
२०. सर्वमपि कर्तुं शक्ता यूयम् Sy.
२१. सामर्थ्यानि Sy.
२२. ०थः D. कुरुत, तत्स्तुम इत्यर्थः Sy.
२३. प्रियम् Sy.
२४. पुत्रम् Sy.
२५. ०त्रं मदकं M. मधुरं हविः Sy.
२६. ध० D. ०न्तं P. धारयन्तो मरुतः Sy.
२७. उपेत्य क्रीडन्ति विहरन्ति Sy.

क्रीडनशीलाः[1]। यज्ञेषु[2]। वृक्षादीनां घर्षणशीलाः[3]। व्याप्नुवन्ति। रुद्रपुत्राः[4]। रक्षणेन[5]। हविष्मन्तम्[6]। न। हिंसन्ति[7]। स्वभूतबलाः[8]। यजमानम्[9]।

यस्मा ऊमासो अमृता अरांसत रायस्पोषं च हविषा ददाशुषे ।
उक्षन्त्यस्मै मरुतो हिताइव पुरू रजांसि पयसा मयोभुवः ॥३॥

यस्मा ऊमासः[10]। यस्मै[11]। रक्षितारः[12]। अमृताः। धनस्य। पोषम्[13]। प्रायच्छन्[14]। हविषा। दानं कुर्वते[15]। तस्मा एतच्च कुर्वन्तीति चकारस्यान्वयः[16]। सिञ्चन्ति[17]। अस्मै[18]। मरुतः। मित्राणीव[19]। बहूनि[20]। उदकानि। उदकेन[21]। सुखस्य भावयितारः।

आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् ।
भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयताष्वृष्टिषु ॥४॥

आ ये रजांसि। ये[24]। लोकान्। स्वबलैः[25]। समगमयन्[26]। हे मरुतः[27]। वः। ते गमनशीलाः प्रत्यक्षाः[28] मरुतः। युष्माभिर्नियताः[29]। अन्तरिक्षे प्राध्रजन्[30]=गन्तुं प्रवृत्ताः[31] आसन्[32]। ततो बिभ्यति[33]।

---

१. यागेषु Sy.
२. रक्षःप्रभृतीनाम् Sy.
३. घर्षकाः सन्तः Sy.
४. रुद्रपुत्रा मरुतोऽपि रुद्रा उच्यन्ते जन्यजनकयोरभेदात्। मरुतां रुद्रपुत्रत्वं पुराणेषु तपसा तुष्टौ पार्वतीपरमेश्वरौ मरुतः पुत्रत्वेन स्वीचक्रतुरिति प्रसिद्धम् Sy.
५. तर्पणेन वा निमित्तभूतेन Sy.
६. नमस्कारोपलक्षितस्तोत्रोपेतम् Sy
७. न सङ्ग्रामयन्ति न क्लेशयन्तीत्यर्थः Sy.
८. स्वायत्तबला मरुतः Sy.
९. ०नः M. हविषः कर्तारं प्रदातारं यजमानम् Sy.
१०. यजमानाय Sy. ११. अवितारः Sy.
१२. अमरणधर्माणः Sy.
१३. पुष्टिम्। चशब्दात्पशवादिपुष्टिम् Sy.
१४. रासतिर्दानार्थः Sy.
१५. हविषा प्रीताः Sy.
१६. सोमादिहविर्वत्तवते Sy.
१७. ०स्याद्वयः M.
१८. सस्याद्युत्पत्त्यर्थम् ... सिञ्चन्ति Sy.
१९. यजमानाय Sy.
२०. हिताचरणाः सखाय इव सन्तः Sy
२१ प्रभूत यथा भवति तथा Sy.
२२ लोकान् Sy.
२३. उवदकेन P.
२४. हे मरुतो युष्मत्सम्बन्धिनो य एवास एवा अश्ववविशेषाः Sy.
२५ ०लैः D. स्वकीयैर्बलैर्वृष्टिप्रदानादिरूपैः Sy. २६. सर्वत आवृण्वन्ति Sy.
२७. वन्ते P. ते वो युष्माकम् Sy.
२८. एवासोऽश्वाः Sy.
२९. ०क्षपा० M.
३०. स्वयमेव सारथिना विनैव युक्ताः Sy.
३१. प्राध्र० P. प्राद्रुजन् M.
३२. प्रकर्षेण गच्छन्ति व्याप्नुवन्ति Sy.
३३. आसते M. ३४. आ M.
३५. बिभ्यति पतनात् Sy.

सर्वाणि। भूतानि। गृहाश्च। चित्ररूपम्। भवताम्। आगमनम्। उद्यतेषु। भवतामायुधेषु।

यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः।
विश्वो वो अज्मन्भयते वनस्पतिः रथीयन्तीव प्र जिहीत ओषधिः ॥५॥

यत् त्वेषयामाः। यदा। दीप्तगमना। शब्दयन्ति। शिलोच्चयान्मेघान् वा यदा। वा। दिव। पृष्ठभूत मेघम्। मनुष्यहिता। प्राच्यावयन्। तदा। युष्माकम्। गमने। सर्व। वनस्पति.। बिभेति। गच्छन्त रथ गच्छन्तीव। प्रगच्छति। ओषधिर्यथा गच्छता रथेन विविक्ता भवन्ति।

यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥६॥

यूयं न उग्राः। यूयम्। अस्माकम्। उद्गूर्णा। सुमत्या। अक्षतगणा। अस्मदीया

---

१. भूतजातानि Sy.
२. च is omitted by P सर्वाणि हर्म्याणि च Sy.
३. चायनीय आश्चर्यभूत इत्यर्थः Sy.
४. युष्मदागमनात् Sy.
५. प्रकर्षेणोद्यतासु सतीषु। अथवा भीतौ दृष्टान्तः। ऋष्टिषु प्रयतासु सतीषु। लुप्तोपमेयम्। आयुधेषूद्यतेषु यथा जना बिभ्यति तद्वद्युष्मदागमनाद् बिभ्यतीत्यर्थः Sy.
६. युद्धस्थासु हेतिषु Sy.
७. य P. D. M.
८. प्रदीप्तगमनाः Sy.
९. नादयन्ति Sy.
१०. पर्वतो गिरेर्गह्वराणि Sy.
११. पूरकान्मेघान्वा Sy.
१२. अथवा Sy.
१३. विद्योतनात्मकस्यान्तरिक्षस्य Sy.
१४. घुषुभू० P. उपरिभागम् Sy.
१५. ०हिता M. नरेभ्यो हिताः Sy.
१६. ०यं M. गच्छन्ति तदा Sy.
१७. युष्मत्सम्बन्धिनि Sy.
१८ गमने निमित्तभूते सति Sy.
१९. वनस्य पालयिता वृक्षसमूहः Sy.
२० ०न्ति व P ०ति इव M.
२१ ०न्ति M. प्रकर्षेण गच्छति। स्वस्थानादितस्ततश्चलतीत्यर्थः Sy.
२२. ०धीर्य० P. प्रियङ्गुव्रीह्यादिः Sy.
२३. रथे P. D.
२४. तत्र दृष्टान्त. ।.... रथमात्मन इच्छन्ती स्त्री। रथारूढेत्यर्थः। तादृशी स्त्रीव। सा यथा चलति तद्वत् Sy. भवति is suggested for भवन्ति
२५. उद्गूर्णबला मरुतो यूयम् Sy. अप्रसह्याः क्रूरा वा शत्रुषु मरुतः SKN. II. 495.
२६. शोभनचेतसा Sy.
शोभनेन चित्तेनानुग्रहपरेण SKN.
शोभनेन प्रज्ञानेन Dur.
२७. अहिंसितसङ्घाः सन्तः Sy. ग्रामाः सङ्घाता उच्यन्ते, वणिग्ग्रामादिदर्शनाद्वे अहिंसितसङ्घाताः SKN. अनुपहिंसितसङ्घाताः Dur.

भोगविषयां सुमतिम्[१]। पूरयत[२]। यदा[३]। युष्माकम्[४]। आयुधम्[५]। क्रकचाकारम्[६]। मेघान्[७] विलिखति[८]। यथा हिंसासाधनभूता[९]। स्वधिति[१०]। पशून्[११]। हिनस्त्येव रुदन्तीति[१२]।

प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः।
अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥७॥

प्र स्कम्भदेष्णाः[१३]। प्रार्चयन्ति[१४]। श्रद्दधते[१५] धारकदानाः[१६]। अविभ्रंशितयजमानधनाः[१७]। अल-

---

१. शोभनबुद्धिम् Sy. शोभनां बुद्धिम्। मन्यतेर्वाऽर्चतिकर्मणो मतिः स्तुतिस्ताम् SKN. शोभनां मतिम् Dur.

२. पालयत पूरयत वा SKN. प्रीणयत वा Dur

३. यत्र यस्मिन्काले Sy. केन? उच्यते। यत्र, निमित्तार्थे एषा सप्तमी, प्रयोजनस्य च निमित्तत्वेन विवक्षा। यस्मिन्निमित्ते यदर्थमित्यर्थः SKN
केन पुनः पूरयत कुतो वा पूरयतेति, यत्र यस्मिन्मेघे Dur.

४. युष्मत्सम्बन्धिनी Sy. युष्माकं स्वभूता SKN.

५. हेतिः Sy. वज्रनामैवम्। वज्रनाम्नामायुधमात्रवचनत्वादिह शतघ्न्या वर्तते, शतघ्नी SKN. आयुधं क्षिप्तम् .. एवमत्रार्थाविरोधादायुध क्रिविर्वतीशब्देनोच्यत इत्युपपद्यते Dur.

६. क्रकचारं P. D. विक्षेपणशीलदन्ती Sy. विकर्तनदन्ती SKN. विकर्तनसमर्थैर्वन्तैर्या रदति Dur. क्रिविर्वती विकर्तनदन्ती N.6.30.

७. मेघान् is suggested for मेघान्। SNP मेघसंस्थायम् Sy. कम्? सामर्थ्यान्मेघम् SNK तमेव मेघम् Dur.

८. लिखति SKN विलिखति विदारयति वा वर्षार्थम् Dur. ९. तथा M.

१०. हिंसायां वृष्टान्तः। सुधिता सुहिता सुष्ठु प्रेरिता, बर्हणा हतिस्तत्साधना हेतिर्वा यथा रिणाति तद्वत् Sy. कथमिव? ... सुधितिरिव क्षुधिना क्षुरिका वाऽनायासेनेत्यर्थः। बर्हणा महता वधेनेति शेषः। केन निमित्तेन रवति। तेनोदकेन SKN. स्वधित्या बर्हणा परिवृद्धया हिंसया Dur.

११ कथं पुनर्या रवति? यथा पशोरङ्गानि स्वधित्या बर्हणा पृथक् करोति Dur.

१२. रेषति हिनस्ति। वायौ वाति सति पशवः शीर्यन्त इति प्रसिद्धम् Sy. रिणातिर्गतिकर्माऽयं गच्छति च तमनुप्रविशतीत्यर्थः SKN. निरिणाति पृथक्करोति Dur.

१३. एवं यस्मिन्मेघे विद्युदस्ता रवति, ततः प्रभ्रष्टेनोदकेन सुमतिमस्माकं पिपर्तनेति Dur रदतीति is suggested for रुदन्तीति। N. 6. 30. quotes the third pāda only.

१४. स्तभ० P.

१५. ०ष्णा D. M.

१६. प्रायच्छन्ति P. पूजयन्ति। स्तुत्यादिना सम्भावयन्तीत्यर्थः Sy.

१७. प्रकर्षेण स्तम्भितदानाः। अविरतदाना इत्यर्थः Sy. धारितदानाः is suggested

१८. अपिभ्रं० D. अभ्रष्टहविराधिधनाः। राध इति धननाम Sy.

१९. अवमा० P.

मातर्दनाः=शत्रूणामतिशयेन हिंसितार[1] । यज्ञेषु[2]। सुष्टुता[3] । स्तोत्रम्[4]। सोमपानाय[5]। वीरस्य[6]। पुरातनानि[7]। वीर्याणि[8]। जानन्ति।

शतभुजिभिस्तमभिहुतेरघात्पूर्भी रक्षता मरुतो यमावत ।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥८॥

शतभुजिभिः[9]। शतगुणै[10]। भवता शरीरैः[11]। त यजमानम्। अभिहिंसकात्[12]। दारिद्र्यात्[13]। रक्षत[14]। मरुत[15] ! यम्। रक्षतेति[16] ?। यम्। जनम्। उद्गूर्णा[17] ! बलवन्त[18] ! महान्त[19] ! रक्षथ[20]। पुत्रस्य[21]। पुष्टिनिमित्तम्[22]। स्तुतेस्तमिति।

विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता ।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥९॥

विश्वानि भद्रा[23]। सर्वाणि। भद्राणि[24]। मरुत[25] ! रथेषु। युष्माक दृश्यन्ते।

---

१. ०ता M M. adds अतः after हिंसितार०।
नकारस्य स्थाने लकार. । अनातृणास अतर्दनरहिता.। अथवा। अल पर्याप्त-मातर्दनाश्शत्रूणाम्। यद्वा। अलमत्यर्थं दातारः फलानामेवरूपा. Sy.

२. यागेषु Sy.

३. अर्चनीयमिन्द्रं स्वसखीभूतम् Sy.

४. मावनसाधनस्य सोमस्य पीतये पानाय Sy

५. M. adds चेन्द्रस्य after वीरस्य।
तस्येन्द्रस्य महत्त्व कथं जानन्तीत्यत आह। ते मरुतो वीरस्य विविधं शत्रूणामीरकस्येन्द्रस्य Sy

६. प्रतमानि मुख्यानि Sy.

७. पुंस्त्वानि वृत्रवधादिरूपाणि Sy.

८. शतमित्यपरिमितनाम । असङ्ख्यात-भोगवद्भिः Sy.

९. पालनैर्जेतव्यैश्शत्रूणां नगरैर्वा Sy.

१०. ०का P. अभिभवकारणात्कुटिलस्वभावात् Sy. ११. पापात् Sy.

१२. पालयत Sy.

१३. Omitted by P. D. यूयम् Sy.

१४ P. reads रक्षय त for रक्षत।
मरुत० ! यम्।
यं जनम्... अरक्षत Sy. अरक्षत is suggested for रक्षतेति ?

१५. उद्गूर्णतेजसः Sy.

१६ वेगवन्तो वा Sy.

१७. महन्नामैतत्। महान्तः। रपणीयाश्शब्दा रपाः । ते येषां ते रप्शिनः । विविधा रप्शिनः स्तोतारो येषां ते तथोक्ता हे तादृशा यूयम् Sy.

१८. पाथ रक्षथ Sy.

१९. तनयस्य। उपलक्षणमेतत् पुत्रादीनाम् Sy.

२०. पोषेषु निमित्तभूतेषु Sy.

२१. अभिशंसनात् । यमेवं कुरुथ तं रक्षतेति शेषः। पाप-क्षयाद्यनिष्टपरिहारेण पुत्रादि-पोषरूपेष्टप्राप्त्या च रक्षथेत्यर्थः Sy.

२२. द्रा P.

२३. कल्याणानि भोगयोग्यानि द्रव्याणि, अस्मभ्यं प्रदेयानि फलानि वाऽऽहितानि Sy.

२४. युष्मत्सम्बन्धिरथेषु रंहणसाधनेषु Sy.

परस्परस्पर्धयेव[1] भवद्भि[2]। बलानि च। आहितानि। यथा[3] अंसेषु[4] भवन्ति[5]। वः केचित् ते च सामर्थ्यात्, ऋष्टय[6]। प्रगत[7] पन्था यैस्तेषु[8] पत्सु। चक्राकाराण्यायुधानि निहितानि। युष्माकम्[9]। अक्ष[10]। चक्राणि। यजमानाना[11] समीपे[12]। वर्तयति।

भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अञ्जयः।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥१०॥

भूरीणि भद्रा। बहूनि[13]। कल्याणानि[14]। नृहितेषु[15]। बाहुषु भवतामायुधानि[16]। वक्षस्सु[17] च। रुक्ममया[18] दीप्तत्वात्। वेगवत्य इव। अञ्जय[19] =कवचानि[20]। तथा शोधकेषु[21]। अंसेषु[22]। अधि[23]। एता[24]। तीक्ष्णाग्रा ऋष्टयो भवन्ति। पक्षिण[25] इव। पक्षान्[26]। एवविधा श्रिय[27]। मरुतो विधारयन्ति[28]।

---

१. ०ये P. M. बलाधिक्यात्परस्परस्पर्धाविषयाणि Sy.
२. अंसेषूक्तलक्षणान्यायुधानि वाऽऽहितानि Sy.
३. तथा M
४. तदुपलक्षितभुजेष्वपि। आकारोऽप्यर्थे Sy
५. भवति P.
६. प्रगताः पन्थानो येषु विश्रामस्थानेषु तानि प्रपथानि तेषु Sy.
७. खाद्यानि भक्ष्याण्याहितानि। यद्वा प्रगतः पन्था यैस्तेषु पादाग्रेषु खादयः स्थिरा आभरणविशेषा आहिताः Sy.
८. युष्मत्सम्बन्धी Sy.
९. तत्रोपनिबद्धानि चक्राणि Sy.
१०. तेषां परिसरे Sy.
११. विशेषेण वर्तते। न कदाचिदपि चक्रेषु संलग्नो भवतीत्यर्थः। यस्मादेवं देवयजनगमनसाधनानि सन्ति तस्माच्छीघ्रमागच्छतम्? (त) इत्यभिप्रायः Sy.
१२. V. M. ignores आ। वि
१३. प्रभूतानि Sy.
१४. धनानि स्तोतृभ्यो दातुम् Sy.
१५ नरेभ्यो हितेषु Sy.
१६. भुजेषु Sy.
१७. उरःस्थलेषु Sy.
१८ रुक्मयया: P. सुवर्णरत्नादिनिर्मितान्याभरणानि Sy.
१९ राभस्ययुक्तानि कान्तिमन्ति वा Sy.
२०. अजयः M.
२१. व्यक्तानि Sy.
२२. वज्रसदृशेष्वायुधेषु Sy.
२३. अंशेषु M. भुजमूलेषु Sy.
२४. अमधि P. अधि सप्तम्यर्थानुवादी Sy.
२५. शुक्लवर्णा मालाः Sy.
२६. क्षुरधाराः Sy.
२७. इति M.
२८. एवमेते मरुतः Sy.
२९. सर्वाङ्गेषु श्रियो लक्ष्मीरनुक्रमेण Sy.
३०. विविधं धारयन्ति Sy.
३१. V. M. ignores अनु

महान्तो महा विभ्वो विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इन्द्रे मरुतः परिष्टुभः ॥११॥

महान्तः । महत्त्वेन । महान्तः । विभोरपि । विभवः । तथा दूरेदृशः । तथा ये । दिवि भवा सूर्यादय । इव । आच्छादकैस्तेजोभि । ते मरुत । मदनशीला । शोभनवाच । शब्दयितारः । अस्यै । इन्द्रे च । आत्मान सयोजयन्त । परित शब्दस्य कर्तार ।

तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।
इन्द्रश्चन त्यजसा वि हुणाति तज्जनाय यस्मै सुकृते अरांध्वम् ॥१२॥

तद्वः सुजाताः । तत् । व । शोभनजनना । मरुत । महत्त्वम् । अविच्छिन्नम् । युष्माकम् । दानम् । भूमेरिव च । धारणव्रतम् । इन्द्र । न । क्रोधेन । विरुणद्धि । तत् । यजमानाय ।

---

१. प्रभावातिशयेन Sy.
२ माहात्म्योपेताः Sy.
३. विभवो व्याप्ताः Sy.
४. विविधैश्वर्यवन्तः Sy.
५. दूरे दृश्यमानाः प्रकाशमानाः Sy.
६. ०शस्था P.
७. ये मरुतः Sy.
८. दूरदर्शने दृष्टान्तः । . . . दिवि भवा देवाः Sy.
९. स्तृ, इति नक्षत्रनाम । . . . स्तृभिः स्वपुण्यकभूतैस्तेजपुञ्जैर्नक्षत्रैर्यथा दूरे दृश्यमाना भवन्ति तद्वत् Sy. ऋक्षाः स्तृभिरिति नक्षत्राणाम् N.3.20.
१०. भावनाः Sy.
११. शोभनजिह्वाः Sy.
१२. प्रियवचना इत्यर्थः । अत एव सुजिह्वा इत्युक्तम् Sy.
१३. सम्यङ् मिश्रयितारः । इन्द्रसहायिन इत्यर्थः । 'मरुतो हैनं नाजहुः, (AB. 3.20) इति श्रुतेः Sy.
१४. परिः P. परितः परितः M.
१५. परिस्तोभयुक्ताः स्तुतिभिर्युक्ताः । एवं महाभागा ये मरुतः सन्ति तेऽस्मद्यज्ञमागच्छन्तीति शेषः Sy.
१६. तादृक् खलु Sy.
१७. युष्मदीयम् Sy.
१८. ननानां D.
१९. अत्यायतमविच्छिन्नम् । प्रकृष्टोपकारीत्यर्थः Sy
२०. वृष्टयादिरूपम् Sy.
२१. दीर्घत्वे दृष्टान्तः । . . . अदीनाया देवमातुर्भूम्या वा Sy.
२२. व्रतमिति कर्मनाम । तद्यथा दीर्घमतिविस्तृतं तद्वत् Sy.
२३ इन्द्रोऽपि Sy.
२४. चनेत्ययं यद्यपि निपातद्वयसमुदायरूप एको निपातस्तथाप्यवयवविभागेन चशब्दः समुच्चये नशब्दो निषेधेऽधिगन्तव्यः Sy. २५. त्यागेन Sy.
२६. न विहुरति कौटिल्यं न करोति . . . युष्मद्धनादित्यागमिन्द्रत्यागोऽपि नातिक्रामतीत्यर्थः । यद्वा यस्मै तद्धनमराध्वं तमिन्द्रोऽपि न कुटिलयति । न निषेधयति । किन्त्वनुमोदयतीत्यर्थः Sy.

यस्मै[1]। शोभनकृते[2]। यूयं[3] धनं[4] प्रयच्छथ[5]।

तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसमृतासु आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥१३॥

तद्वो जामित्वम्[6]। तत्[7]। युष्माकम्। ज्ञातेयम्[8]। मरुत[9]! पूर्वस्मिन्[10]। काले। यद्यूयम्[11]। बहु[12]। आशसन यजमानानाम्[13]। हे अमृता[14]! रथा[15]। अनेन। कर्मणा। मनुष्याय। क्षिप्रत्वं[16] समेत्य[17]। क्षेपणादिभि कर्मभि[18]। सह[19]। नेतारो[20] मरुत[21]। आभिमुख्येन। ज्ञायन्ते[22] प्रादुर्भवन्ति शीघ्रम्।

येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्याम् ॥१४॥

येन दीर्घम्[23]। येन। चिरकालम्। हे मरुत[24]! वर्धेमहि[25]। युष्मदृत्तेन[26]। बहुना धनेन[27]। हे

---

१. Omitted by P. D.
२. शोभनयागादिकर्त्रे यजमानाय Sy.
३. हे मरुतः!
४. यदभिमतं धनम् Sy.
५. ० च्छत P.
६. ०त्वां P.
७. तत्खलु प्रसिद्धमित्यर्थः Sy.
८. ज्ञातोऽयं M. बन्धुत्वमस्मद्विषयप्रेमाधिक्यम् Sy.
९. उत्कृष्टे महति Sy.
१०. युगशब्द· कालोपलक्षकः। ... कालेऽतीतेऽपि वर्तत इति शेषः Sy.
११. यस्मात् Sy.
१२. बहु P. प्रभूतं यथा भवति तथा आवत रक्षथ तस्माद्युष्मत्कृतं जामित्वमविनाशीत्यर्थः Sy.
१३. अस्माभिः क्रियमाणां स्तुतिम् Sy.
१४. अमरणधर्माणः Sy.
१५ रथेन M.
रक्षथ is suggested for रथाः
१६. अनयाऽनुग्रहात्मिकया Sy.
१७ बुद्धया Sy.
१८ स्तोत्रे यष्ट्रे वाऽस्मदादये Sy.
१९ ०प्रं त्वं D.
२०. कीर्तिं स्तुतिं वा रक्षित्वा Sy.
२१ सम्भूय Sy.
२२ नेतारः सन्तः Sy.
२३ सर्वतो जानीथ Sy.
२४ येन दीर्घम् is omitted by P. D.
२५ आयत सत्त्रादिरूपं कर्म Sy.
२६. प्रवर्धयामः Sy.
२७. युष्मत्सम्बन्धिना Sy.
२८. यद्यप्येतद्बहुनामसु पठितं तथापि यद् बहु तन्महदपि भवतीत्यत्र महदित्यर्थे गृह्यते। महता युष्मदभिगमनेनैवज्ञेन वा Sy.

क्षिप्राः[1] ! यच्च[2]। युद्धे समुपस्थिते। तदीया जना.। आतन्वन्ति[3]। तत्। एतैः[4]। यज्ञै[5]। अभिमतम्[6]। प्राप्तवानिति[7]।

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१५॥

एष वः[10]।[11]

I.167.

सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः ॥१॥

सहस्रम्[12]। इन्द्र[13]! अस्मद्विषयाणि[14]। त्वदीयानि[15]। सहस्रम्[16]। रक्षणानि। सहस्र च।

---

१. वेगवन्तः ! Sy.
२. येन चाभिगमनेनैषणेन वा Sy.
३. सङ्ग्रामे Sy. ४. अस्मदीयाः Sy.
५. सर्वतो विस्तारयन्ति। स्वसामर्थ्यं सङ्ग्रामं जयन्तीत्यर्थ. Sy.
६. इदानीं क्रियमाणैः Sy.
७. स्तोत्रादिरूपैः पूजनैः Sy.
८. एषणं गमनम् Sy.
९. ० वा ... M. आभिमुख्येनाशया व्याप्नुयाम् Sy. प्राप्नुयामि० is suggested for प्राप्तवानि०
१०. अथ मन्त्रस्तुतीयाध्यायान्ते व्याख्यात। सूक्तोपक्रमप्रभृति क्रियमाणां स्तुतिं मरुद्भ्यः समर्प्य स्वाभीष्टमाशास्ते। हे मरुतः ! एष स्तोम इदानीं कृतं स्तोत्रं, वो युष्माकं युष्मदर्थमित्यर्थः। तथेयं गीः स्तुतिरूपा वागपि वो युष्माकम्। कस्य सम्बन्धीदमिति तदुच्यते। मान्दार्यस्य मन्यतेरीयतेश्च मान्दार्यः स्तुतिं प्रेरयत.। मान्यस्य माननार्हस्य। कारोः स्तोतृनामैतत्। स्तोतुः सम्बन्धि। यद्वा। एतत्पदत्रयमुत्तरत्र सम्बध्यते। उक्तलक्षणस्तोतुः। इषा, इच्छया कामनया। तन्वे युष्मच्छरीरवृद्ध्यै, स्तुत्या हि शरीरं वर्धते। आयासीष्ट, अभिगच्छतु स्तुतिः। वयां वयं च, इषमन्न, वृजनं बलं, जीरदानुं चिरकालजीवनं च विद्याम लभेमहि Sy.
११. This stanza is identical with RV. I 165.15. and has already been explained by VM. Ms. D puts the figure ॥१६६॥ here to indicate the end of one hundred and sixtysixth hymn. No such number is given in P. and M.
१२. ०यानि P.D. अस्मभ्यम्। उपयन्त्विति सर्वत्र योज्यम् Sy. १३. तव Sy.
१४. M. reads न्द्रास्मद्विषयाणि त्वदीयानि सहस्रम् for सहस्रम्। इन्द्र ! अस्मद्विषयाणि। त्वदीयानि।
सहस्रम्। अपरिमिता इत्यर्थः Sy.
१५. रक्षाप्रकाराः Sy.
१६. बहूनि त्वदीयानि Sy.

अश्वानि। हरिव[२]: ! उद्गूर्णतमानि। सहस्रम्। धनानि च। अस्मान् मादयितुम्। सहस्रसङ्ख्याकानि। बलानि। अस्मान्। उपगच्छन्तु। आद्येन्द्री।

आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः।
अध यदेषां नियुतः परमाः समुद्रस्य चिद्बुनयन्त पारे ॥२॥

आ नोऽवोभिः। आयान्तु। अस्मान्। अभिरक्षणैः सह। मरुतः। श्रेष्ठतमैः। महादीप्तिभिः। धनैः। सुप्रज्ञाः। अध। यत्। एषाम्। अश्वाः। उत्तमाः। अन्तरिक्षस्य। पर्यन्ते। रमन्ते ताश्चायान्त्विति।

मिम्यक्ष येषु सुधिता घृताची हिरण्ययनिर्णिगुपरा न ऋष्टिः।
गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥३॥

मिम्यक्ष। सङ्गता। येषु। तीक्ष्णधारत्वात् सुष्ठु निधानयोग्या। उदकमञ्चन्ती। हिरण्य-

---

१. इष एषणीयाः Sv.
२. हरी इन्द्रस्याश्वौ, ताभ्या तद्वन्निन्द्र ! Sy
३. अत्यन्तं गूर्णानि Sy.
४. ०र्ण...स० M
अपरिमितानि Sy.
५. मणिमुक्तादीनि Sy.
६. अस्मान्मादयितु यानि सन्ति तानि Sy.
७. गमनवन्तश्चतुष्पादूपा. पशवोऽपि Sv.
८. समीपं प्राप्नुवन्तु Sy.
९. ०यन्तु P
आगच्छन्तु Sy.
१०. अच्छ, आभिमुख्येन रक्षणैः सहिता Sy.
११. ०तं M.
१२. प्रशस्यतमैः Sy.
१३. मणिमुक्ताविधनैश्च सहिताः Sy.
१४. वाशब्दः समुच्चये Sy.
१५. मायेति प्रज्ञानाम । शोभनप्रज्ञा एव मरुतः Sy.
१६. अथ P. आगमने कथमेषां सामर्थ्यमित्यत आह।...अथ Sv.
१७. यस्मात् Sy. याः is suggested for यत्
१८ मरुताम् Sy.
१९ नियुत एतन्नामकाः. . .अश्वाः Sy.
२०. उत्कृष्टाः Sy.
२१. चिच्छब्दोऽप्यर्थे । समुद्रस्यापि Sy.
२२ परस्मिंस्तीरे Sy.
२३. धनधारणं वहनं कुर्वन्ति Sy.
२४ तस्माद्रक्षणैर्धनैश्चायान्त्वित्यर्थः Sy.
२५. VM. ignores अच्छा। चित्
२६. म्यक्षतिर्गतिकर्मा । सङ्गताऽभूत् । मेघपङ्क्तिर्विद्युतावुभे अपि सङ्गते इत्यर्थः Sy.
२७. मरुत्सु Sy.
२८. सुष्ठु निहिता सुष्ठु हिता वा लोके Sy.
२९. ०ञ्चति M. ०ञ्चती P. D. घृतं क्षरणशीलमुदकमञ्चन्ती Sy.
३०. हितरमणीयरूपा । निर्णिगिति रूपनाम Sy.

रूपा। दृषदुपलयो[1] उपला[2]। इव। दीर्घा ऋष्टि[3]: सेयम्। अपवरकादौ[4] च। चरन्ती। मनुष्यस्य[5]। इव। स्त्री दुर्धर्षा[6] भवति। पर्षद्युक्ता[7]। यज्ञभवा[8]। वाक्। यथा[9]। यज्ञेन सङ्गता तद्वदृष्टिर्मरुद्भि: सङ्गतेति।

परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः।
न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ॥४॥

परा[10] शुभ्राः। परमया[11]। शोभमाना[12]। गमनस्वभावा[13]। युवत्या[14] वाचा। मरुत। सङ्गच्छन्ते[15] बहव। यथा साधारण्या[16] कयाचन स्त्रिया धूर्ता[17]। घोरा[18] अप्येते। न। द्यावापृथिव्यौ[19]। कदाचिदप्यपनुदन्ति[20]। वर्धयन्त[21] यजमानम्। सख्याय[22]। सेवन्ते[23]। देवा[24]।

---

१. मेघमाला Sy.
२. इ P.
३ एवंरूपा ऋष्टिर्विद्युदाख्यायुधविशेषो वा Sy.
४. उप० D. मेघपङ्क्तिर्विद्युच्चोभे दृष्टान्तेन विशेष्येते। गुहा निगूढा गुहाया वाऽन्तरिक्षे Sy.
५. तत्र दृष्टान्तः। ... मनुष्यस्य परिवृढादेः Sy.
६. महिषीवत्। सा यथा सुवेषाऽन्तःपुर एव मध्ये चरति तद्वत् Sy.
७. दुर्धा M.
८ वर्ष० M. सभा जनसङ्घस्तद्वती। वर्षकाल आविर्भवन्तीत्यर्थः Sy.
९. तत्र दृष्टान्तः। ... विदथो यज्ञः। तदर्हतीति विदथ्या प्रैषस्तोत्रादिरूपा वाक्। सा यथा यज्ञसभां प्राप्याविर्भवति तद्वत्। यद्वा विदथ्या वेदनार्हा विवदमानयोर्वाक्। सा यथा सभावती तद्वत्। सैवंरूपा येषु मिम्यक्ष ते मरुतो देवयजनमागच्छन्त्वित्यर्थः Sy.
१०. यता P.
११. प्रकर्षेण Sy.
१२. शोभनालङ्काराः Sy.
१३. अभिगन्तारः Sy.
१४. मिश्रणशीलया विद्युता Sy
१५. मिञ्चन्त्युदकसंस्त्यायम् Sy.
१६. ०णा D. यथा लोके साधारण्या स्त्रिया Sy.
१७. सङ्गता युवानो रेतो मुञ्चन्ति तद्वत् Sy.
१८. घूरा M. एव कुर्वन्तो घोरा अतिवृष्टिप्रदानेन भयङ्करास्ते Sy.
१९. द्यावापृथिवीवचनो रोदसीशब्दः सर्वत्रानुदात्तः। अत्र तु व्यत्ययेनान्तोदात्तत्वमिति द्रष्टव्यम्। यद्वा रोदसा शब्देन रोदनस्वभावो रुद्रः। तस्य स्त्री रोदसीति केचिदाहुः। अपरे तु मरुतां स्त्रियो रोदसीति नामधेयमित्याहुः। अयमेव पक्षो युक्त उत्तरत्रैवं व्यवहारात्। तत्पक्षे रोदसी रोदस्याम्... तस्यां प्रियं धनं मुञ्चन्ति Sy.
२०. अपनोदनं वर्धनरूपं तिरस्कारं न कुर्वन्ति Sy.
२१. वर्धयन्तं P. D. वृद्धिम् Sy.
२२. सं० P. सख्यायं च M.
२३. द्यावापृथिवीपक्षे सख्याय जगतां सखिभावाय तयोर्वृद्धिं कुर्वन्तीत्यर्थः Sy.
२४. मोदयितारो मादयितारो वा मरुतः Sy.

जोषद्यदीमसुर्यो सचध्यै विषितस्तुका रोदसी नृमणाः ।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥५॥

जोषद्यदीम्[१]। सेवते[२]। यदा[३]। एन मरुद्गणम्[४]। असुराणा हन्त्री[५]। सचितुम्[६]। विश्लिष्ट-जघना। रुद्रपत्नी[७]=वाङ् माध्यमिका[८]। यस्या[९] नृषु[१०] मनोऽनुकम्प्येषु सा। तदानी सूर्येव[११]। विधत[१२] सोमस्य मरुद्गणस्य। रथम्[१३]। आजगाम[१४]। दीप्तावयवा। आदित्यस्य[१५]। इव[१६]। अभिगन्त-व्या[१७] दीप्ति ।

आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम् ।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥६॥

आस्थापयन्त[१८]। अथ ता युवति वाचम्[१९]। युवानो[२०] मरुत[२१]। आस्थापयन्त[२२]। यज्ञेषु[२३]। पज्रकु-

---

१. ०न्ते P. D.
२. यत् P.
३. मरुत्सङ्घम् Sy.
४. Omitted by P D. कीदृशी सा ? ... असुराः क्षेप्तारो मरुतस्तेषां स्वभूता Sy.
५. सेवितु M किमर्थम् ? ... सङ्गमनार्थम् Sy.
६. विष्ट० P. पिष्ट० D विशिष्टकेश-सङ्घा विप्रकीर्णकेशसङ्घा वा सम्भोगव-शेन Sy.
७. मरुत्पत्नी विद्युद्रूपतन्नामिकेयमपि Sy.
८. वाक् मध्यमिका वाड् मध्यमिका P. वाक् माध्यमिका वाड् माध्यमिका D.
९. यस्य P. D.
१०. नृषु नेतृषु मरुत्सु मननवती मनुष्येषु वा वृष्टिप्रदानमनोयुक्ता Sy.
११. सूर्ये च P. केव ? विधतः सूर्यस्य रथं त्वेषप्रतीका ... सूर्यपत्नीव । यद्वा सूर्यस्य दुहिताऽश्विनो रथमिव सा यथाऽऽरोहति तद्वत् Sy.
१२. परिचरतो मरुत्सङ्घस्य Sy.
१३. आगच्छति व्याप्नोति । यागदेशं गन्तु रथमारुह्य वा यज्ञभागच्छति Sy.
१४. दीप्तोपक्रमा दीप्तावयवा । ईदृशी देवी Sy.
१५. आगमने दृष्टान्तः । ... अन्तरिक्षा-दित्ययोः साधारणोऽयं नभश्शब्दः । 'नभ इति षट् साधारणानि' (Ngh.1.4) इत्युक्तत्वात् । अत्रादित्यवचनस्तस्य Sy.
१६. एव M
१७. ०व्य M. गतिरिव । सा यथा शीघ्रा तद्वत् Sy.
१८. आस्थावयन्ते P.
१९. ०ती D. मिश्रयन्तीं नित्यतरुणीं वा विद्युद्रूपां रोदस्यां स्त्रियम् Sy.
२०. Omitted by P. D.
२१. मिश्रयन्तो नित्यतरुणा वा Sy.
२२. आस्थापयन्ति । देवतात्वेन रथे धारयन्ति Sy.
२३. यज्ञे P. D. यागेषु निमित्तभूतेषु Sy.
२४. वज्र० P. M. पशुकु० D. पज्रो बलं तद्वतीम् Sy.

लजाताम्[1]। उदके[2]। नियमेन[3] मिश्रिताम्। अथ प्रत्यक्षः—होता[4]। यत्[5]। वः[6]। मरुतः! हविष्मान्[7]। गायत्रम्[8]। गायति। सुतसोम[9]। परिचरैस्तस्मिन्नाग्निमारुते शस्त्रे तत्र हि पावीरवी शस्यते[10]।

प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति।
सचा यदीं वृषमणो अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥७॥

प्र तं विवक्मि[11]। प्रवचीमि[12]। त महिमानम्। य। एषाम्। मरुताम्। स्तोतृभिः प्रवाच्यः[13]। महिमा[14]। सत्यभूत[15]। विद्यते। सखा। यत्[16]। एनान्[17]। रेतोवर्षणपरमना[18]। अहयुर्भवेत्[19], अहमस्मीति मानादहयुरित्युच्यते स[20]। स्थिराणि धनानि। सुभगा[22]। च[23]। जाया[24]। मरुता प्रसादात् वहते[25] येन महिम्ना तमिति।

पान्ति मित्रावरुणावद्याच्चयंत ईमर्यमो अप्रशस्तान्।
उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥८॥

पान्ति मित्रावरुणौ[26]। रक्षन्ति मरुत.। मित्रावरुणौ[27]। अवद्याद्यथाऽहोरात्रयोर्बाधा न भवति[28]

---

१. D. adds तां before उदके।
शोभते दीप्यत इति शुबुदकम्। वृष्टचुदकार्थं, शुभे रथ इति वा योज्यम् Sy.
२. नियमेन मिश्रयन्तीम् Sy.
३. मत्वर्थो लुप्यते। अर्चनसाधनमन्त्रोपेतः स्तोता वा Sy.
४. यदा Sy.
५. युष्मान् Sy.
६. प्रवेयाज्याविहविर्युक्तः Sy.
७. गातव्यं स्तोत्रम् Sy.
८. गायति। तदेत्यर्थः Sy.
९. होमायाभिषुतसोमोऽयं यजमानः Sy.
१०. प० P.
११. विवक्षि P.
१२. प्रवक्ष्मि, वर्णयामि Sy.
१३. सर्वैः स्तुत्यः Sy.
१४. महत्त्वातिशयः Sy.
१५. अवाप्योऽमोघः Sy.
१६. कथमेषां महिमा प्राप्त इत्युच्यते... यस्मात् Sy.
१७. एतेषा सम्बन्धिनी रोदसी Sy.
१८. वृष्ट्यादिवर्षणमनस्का Sy.
१९. ०यु भ० P. ०युवभ० D. M. अहङ्कारवती। जगदुपकारकर्त्री न कदाचिदस्तीत्यहङ्कारः Sy.
२०. याना० P. D. यानव० M.
२१. अत्यन्तमविनश्वरेदृशी देवी Sy.
२२. शोभनभाग्योपेताः Sy.
२३. चिदिति पूजायाम् Sy.
२४. जननशीलाः प्रजा वृष्टचुत्पत्तीर्वा Sy.
२५. यह० P. धारयति। वृष्टौ सत्यां सर्वे प्राणिन उत्पद्यन्ते। यस्मादेवं तस्मान्महिमाऽस्ति Sy.
२६. तं महिमानं स्तौमीत्यर्थः Sy.
२७. हे मरुतो युष्मत्सम्बन्धिनो देवा मित्रावरुणावहोरात्र्यभिमानिदेवौ Sy.
२८. अद्यात् P. गर्ह्यावयवानुष्ठानाज्जगत्पक्षे व्यवहारप्रतिबन्धरूपात् Sy.

तथा कुर्वन्तिः। मरुद्भि. प्रहितोऽर्यमा प्रातः। इमान्। राक्षसान्। बाधते। अपिच। व्यवन्ते। स्थिराणि। उदकान्यन्तरिक्षात्। मरुतः! यो वो दत्तवरणीयधनः। सः। वर्धते।

नहीं नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः।
ते धृष्णुना शवसा शूशुवांसोऽणो न द्वेषो धृषता परि ष्ठुः ॥९॥

नहीं नु वः। हे मरुतो। ये अस्माकम्। अन्तिके दृश्यन्ते। ये वा दूराद् वर्तन्त उभयेऽपि। भवताम्। न। बलस्य। अन्तम्। अपि। गच्छन्ति। तेऽमी। धर्षकेण। बलेन। वर्धमाना। उदकम्। इव। द्वेष्टॄञ्छत्रूनपि। तेन धृषता बलेन। परितिष्ठन्ति।

वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये।
वयं पुरा महि च नो अनु द्यून्तन्नः ऋभुक्षा नरामनु ष्यात् ॥१०॥

वयमद्य। *व्यवहारार्थं निष्ठन्नस्त यन्तमादित्यमनयोपतिष्ठेतेत्युक्तम्—*वयम्। अद्य।

---

१. प्रहियः P.
२. अर्यमा उ इति निपातसमुदायात्मकमेक पदम्... अर्यमापि। एते त्रयोऽपि Sy
३. अमुं लोक यज्ञं वा Sy.
४. एतेषामप्रशस्तान्क्षीणानपि पदार्थान् Sy.
५. ० ने M. घातयन्ति नाशयन्ति Sy.
६. उशब्दोऽपिशब्दार्थः Sy.
७. व्यावयन्ति वैते 'अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति' इति श्रुतेः। यद्वा। अच्युतानि ध्रुवाणि धनानि व्यवन्ते Sy.
८. एतैः प्रेरितानि... अच्युतान्यस्त्रावीण्यत एव ध्रुवाण्यविचलानि Sy.
९. मेघस्थोदकानि Sy.
१०. अयं कालः Sy. ११. युष्मदीयः Sy.
१२. प्रदेयजलः खण्डितमेघो वा Sy.
१३. सं D.
१४. यदा ववृधे वर्धते तदा मित्रादयो देवा युष्मदनुकूलव्यापारेण जगद्रक्षन्तीत्यर्थः। यद्वा वार्तिवारो दत्तवरणीयहविर्लक्षणधनो यजमानो हे मरुत इमेनान्युष्मान्ववृधे वर्धयति यदा तदेत्यर्थः Sy.
१५. हि P.
१६. हे... स्मा० M. अस्मासु मध्ये Sy.
१७. दूरादपि। यद्वा। चिविति कुत्सायाम्। अत्यन्तदूरात् Sy.
१८. एकेऽपि Sy.
१९. युष्माकं सम्बन्धिनः Sy.
२०. अवसानम् Sy.
२१. नैव खलु प्राप्नुवन्ति। सन्निधावसन्निधौ च न प्राप्नुवन्तीत्यर्थः Sy.
२२. अथ परोक्षे प्राप्तबलत्वमाह। ते खलु मरुतः Sy. २३. ०न P.
२४. तत्र दृष्टान्तः ... यथोदकं स्वविरोधि रजआदिकमभिभवति तद्वत्। यस्मादेवं तस्माच्छवसोऽन्तं नापुः Sy.
२५. अत एव...पराभिभावकेन सामर्थ्येन Sy.
२६. परिभवन्ति। वशीकुर्वन्ति Sy.
२७. VM. ignores नु
२८. ०ष्ठते० P. M. ०परिति० D.
२९. यष्टारः Sy.
३०. अस्मिन्दिने Sy.

इन्द्रस्य[1]। प्रियतमाः[2]। स्पर्धमाने[3] मनुष्य[4] उत्तरमुक्तवन्त.[5]। तथा[6] श्वश्च[7]। वोचेमहि[8]। वयम्[9]। पुरा[10] चोक्तवन्तः[11]। सर्वेषु[12] दिवसेषु[13]। महत्त्वम्[14]। एव[15]। अस्माकमस्तु[16]। तद् वचनम्[17]। नेतृणाम्[18]। अस्माकम्[19]। महानिन्द्रः[20]। अनुभवतु[21] मरुता प्रसादादिति[22]।

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥११॥

एष वः स्तोमः[23]।

I.168.

यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे।
आ वोऽर्वाचः सुविताय रोदस्योर्महे वंवृत्यामवसे सुवृक्तिभिः ॥१॥

यज्ञायज्ञा[24] वः[25]। यज्ञे यज्ञे[26]। युष्माकम्[27]। समानाकारा भवति[28]। त्वरणा, छान्दसो भू[29] स्वः?।

---

१. देवस्य Sy.
२. प्रियतमा भवेम। यद्वा प्रियतमा वयमिन्द्रस्य महत्त्वम् Sy.
३. सह मर्या मर्त्या ऋत्विजो यस्मिन्स समर्यो यज्ञस्तस्मिन्। सङ्ग्रामे वा Sy
४. ०मुक्तमुवः P.
५. श्वश्च M. परस्मिन्यहनि दिने Sy.
६. स्तोतुं समर्था भूयास्म Sy.
७ पूर्वस्मिन्नतीते कालेऽपि Sy.
८. M. adds. च after सर्वेषु ।
९. दिवसान्, अनु प्रतिदिवसमित्यर्थः। अतीत आगामिनि च दिवसे सर्वदा वोचेमहि Sy.
१०. महद् बलम् Sy.
११. अस्मदर्थम् Sy.
१२. तस्मात् Sy. १३. मनुष्याणां मध्ये Sy.
१४. अस्मान् Sy.
१५. महन्नामैतत्। 'ऋभुक्षा उक्षा' (Ngh. 3.3.) इति तन्नामसु पाठान्महानिन्द्रः Sy.
१६. अनु is omitted by P.D. अनुकूलमभिमतप्रदो वा भवतु Sy.
१७. एष वः स्तोम· गतम् M. एकादशी व्याख्याता Sy.
This stanza is identical with RV. I. 165.15; 166.15; and has already been explained by VM. Ms. D. puts the figure ॥१६७॥ here to indicate the end of one hundred and sixtyseventh hymn. No such number is given in P. and M.
१८. Omitted by M.
१९. सर्वेष्वपि यज्ञेषु Sy.
२०. समीकृतिर्न्यूनाधिकाभावलक्षणा Sy.
२१. ०णात् M. त्वरमाणा सम्भ्रमाना भवति ।... तत्तद्यागावसर आगत्य हविः स्वीकृत्य वैकल्यपरिहारेण समं कुरुथेत्यर्थः Sy. 'तुर्वणिस्तूर्णवणिः N.6.14.
२२. भू P.D.

सर्वाणि कर्माणि[1]। धारय[2]। यूयम्। देवकामाः[3]। युष्मान्[4]। इतोमुखान्[5]। द्यावापृथिव्योः सकाशात्[6]। अभ्युदयार्थम्[7]। आवर्तयामि। महते। रक्षणाय[8]। स्तोत्रैः[9]।

वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ॥२॥

वव्रासो[10] न[11]। कूपा[12]। इव। ये। स्वस्मादेव[13] जायमाना[14] भवन्त। सर्वम्[15]। अन्नम्[16]। अभ्यजायन्त[17]। सवृद्धय[18] वृक्षादीना कम्पयितार। कूपसाम्य वर्षणान्ते[19]। सहस्रसङ्ख्या[20]। अपाम्। ऊर्मयः[21]। इव। श्रेणिश आगच्छन्ति। ते, आस्येन[22]। वन्द्या। बहुक्षीरा[23] गाव[24]। इव[25]। सेक्तार[26] उदकानाम्।

सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते।
एषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥३॥

सोमासः[27]। सोमा[28]। इव। ये[29] मरुत[30]। सुता। सम्पूर्णलता[31] सुखा भवन्ति। हृत्सु[32]। पीताः[33]।

---

१. Omitted by P.D. युष्मत्सम्बन्धिवृष्टिप्रदानादिरूपं सर्वं कर्म Sy.
२. धारयथ धारयध्वे वा। देवार्थहविराद्युत्पादनाय वृष्टिं कुरुथेत्यर्थ Sy. धारयथ is suggested for धारय
३. देवतामाः M. देवान्प्रापयितार एव सन्तः Sy.
४. यस्मादेवं कुरुथ तस्मात्तो युष्मान् Sy.
५. ०मुख्यां M. अस्मदभिमुखान् Sy.
६. सुष्ठु व्याप्ताय Sy.
७. रक्षणाय प्रीणनाय वा Sy.
८. कैः साधनैः?...शोभनावर्जनैः स्तोत्रैः Sy.
९. VM. ignores उ
१०. वव्रासः D. वव्रासः P.
११. वव्रिरिति रूपनाम। रूपवन्त इव। ते यथा प्रकृष्टा लक्ष्यन्ते तद्वत्। यद्वा। अरूपा अपि सरूपा इव Sy.
१२. स्वयमेव स्वस्माद्वा जायमानाः। अनन्यहेतुका इत्यर्थः Sy. १३. यजमानोदका M.
१४. स्वर्गं च Sy. १५. अन्नं हविर्लक्षणमन्नसाधनं सस्यादिकं वा Sy.
१६. अभिलक्ष्य प्रादुर्भवन्ति Sy.
१७. कम्पनशीलाः सन्ति ते Sy.
१८. वर्षाणां ते D.M. १९. सहस्रसम्मिताः Sy. २०. ते वृष्टान्तमुखेन श्रूयन्ते... उदकानाम् Sy. २१. Omitted dy P. २२. समीप एव Sy.
२३. ०र P. बहुक्षीरादिप्रदत्वेन स्तुत्याः Sy.
२४. ०व P. २५. Omitted by P.
२६. वृष्टचुदकस्य सेक्तारः। तादृशा मरुतः प्रादुर्भवन्तीत्यन्वयः Sy.
२७. ० मासः P. D. यथा वल्लीरूपाः सोमा अभिषवात्पूर्वमाप्यायनेन तृप्तावयवाः सन्तः पश्चात्सुता अभिषुता रसभूताः Sy.
२८. ते P.D. २९. Omitted by P.D.
३०. अभिषुताः Sy. ३१. ०ता P. D. तर्पितावयवाः Sy. ३२. ०ति M.
३३. पातृणां हृदयेषु Sy. ३४. पीताः सन्तः Sy.

सुराः[1]। इव च[2]। आसते[3]। अंसेषु। एषाम्। संरम्भिणी[4] सकामा स्त्रीव। ऋष्टिरारब्धाऽऽसीत्[5]। हस्तेषु[6]। खादधायुधम्[7]। खड्गः[8]। च[9]। सह[10]। निहितावितिः[11]।

अव॒ स्वयु॑क्ता॒ दिव॒ आ वृथा॑ ययु॒रम॑र्त्याः॒ कश॑या॒ चोद॑त॒ त्मना॑।
अरे॑णवस्तुविजा॒ता अ॑चुच्यवु॒र्दृळ्हा॑नि चिन्म॒रुतो॒ भ्राज॑दृष्टयः ॥४॥

अव स्वयुक्ताः। दिवसेनैव[12] युक्ता[13] मरुत । अनायासेन[14]। अधस्तात्[15]। आगता[16] । हे अमर्त्याः! भवताम्[17], अश्वाजन्या[18]। आत्मनैव[19]। अश्वाश्चोदयत[20]। रेणुर्वाजिता[21] । बहुजनना[22]। च्यावयन्ति[23]। दृढानि[24]। अपि। मरुतः। दीप्तायुधा[25]।

को वो॑ऽन्तर्म॒रुत ऋ॒ष्टिवि॑द्युतो॒ रेज॑ति॒ त्मना॒ हन्वे॑व जि॒ह्वया॑।
ध॒न्व॒च्युत॑ इ॒षां न यामं॑नि पुरु॒प्रैषा॑ अहन्यो॒३॒॑ नैत॑शः ॥५॥

को वोऽन्तः। क[26]। युष्माकम्[27]। मध्ये[28]। मरुत ! ऋष्ट्या[29] विद्योतमाना ! हन्वोरिव। जिह्वेतिच्छन्दोऽनुविधानार्थमन्यत्रापि विभक्तिव्यत्यय ऋगन्तेषु दृष्टो यथा—

"उर्दूपथुरश्विना[30] वन्दनाय"

---

१. सुताः P. परिचरन्त इव Sy.
२. यद्वा प्राणादिरूपेण शरीरे स्थिता दुवस परिचरन्त इव गमनादिचेष्टाः कुर्वन्त आसते Sy.
३. युवतमांसालम्बिनी योषिदिव Sy.
४. ऋषिः M. अवलम्बने सामर्थ्याच्छक्त्याख्यायुधविशेषो भुजलक्ष्मीर्वा Sy
५. आरेभ आश्लिष्यति Sy.
६. हषु P.
७. हस्तत्राणकः Sy.
८. कर्तनी च खड्गलता च Sy.
९. परस्परसमुच्चयार्थाश्चकाराः Sy.
१०. Omitted by P. D.
११. सन्धीयते, सम्यग्धृता भवति ।...ये मरुत उक्तरूपास्त आविर्भवन्तीत्यर्थः Sy.
१२. VM. ignores च
१३. द्युलोकात् Sy.
१४. स्वैर्युक्ताः परस्परं संयुक्ताः स्वेन धनेन वा युक्ताः सन्तः Sy.
१५. अवाङ्मुखम् Sy.
१६ आगच्छन्ति Sy.
१७. यूयम् Sy.
१८. वाङ्नामैतत् । वाचा स्तुतिरूपया Sy.
१९. स्वयमेव Sy.
२०. प्रेरयत । स्तोतुमिति शेषः Sy.
२१. ते च ...अपापाः Sy.
२२. बहुयज्ञेषु प्रादुर्भूताः Sy.
२३. चालयन्ति Sy.
२४. दृढान्यपि पर्वतानि Sy.
२५. दीप्ता एवम्भूताः सन्तः Sy.
२६. पुमान् Sy.
२७. युष्मासु Sy.
२८. मध्ये स्थित्वा Sy.
२९. मेघभेदनायुधविशेषेण विद्योतमानाः Sy.
३०. उवूह० D.M. उमूह० P. RV. I. 117. 5. d

यथा हन्वोर्मध्ये जिह्वा विचलति तद्वच्चलति स नूनमिन्द्रः। अन्तरिक्षे च्यवमानाः! अन्नानाम्। इव। गमनार्थं गच्छत यस्मादागमनानन्तरमन्नानि प्रादुर्भवन्तीति। बहुप्रसवाः! अहनि भव। इव। श्वेतवर्ण आदित्यः।

क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय।
यच्चयावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ॥६॥

कः स्विदस्य। यस्मिन्नन्तरिक्षे। यूय गच्छथ। तत्र वाऽसहायानीव तृणानि। अनायासेन संहतं वृक्षादिकम्। च्यावयथ। तत्र दीप्तम्। उदकवन्त मेघम्। वज्रेण। पातयथ। तस्यास्य भवतां विषेयस्य। अन्तरिक्षस्य। महत। क्व। परम्पारम्। क्व वा। अवरम्। हे मरुतः!

सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिंष्वती।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥७॥

सातिर्न वः। दानम्। न। युष्माकम्। रोगयुक्तम्। अभ्युदययुक्तम्। दीप्तम्। विशि-

---

१. चालने वृष्टान्तः।... द्विवचनस्याकारः। हनू इव, तौ यथा रसनया चाल्येते तद्वत् Sy. २. वि is omitted by P
३. चालयति प्रेरयति Sy.
४. धन्वञ्छब्दोऽन्तरिक्षस्य वचनः। तेन तत्स्थमुदकं लक्ष्यते। उदकस्राविणो मेघा इव ते यथाऽऽकाङ्क्ष्यन्ते तथा युष्मानन्नादिप्राप्तये Sy.
५. यद्यप्येवं तथापि... अन्नानां तत्साधनानां सस्यानाम् Sy.
६. प्राप्तौ समृद्धयर्थम् Sy.
७. बहुविधं फलमिच्छन्यजमानः स्तोत्रैर्बहुप्रकारमाकारयतीत्यर्थः Sy.
८. अह्नि भवः Sy.
९. अश्व इव। स यथा शिक्षकेण नानाप्रकारं प्राप्यते तद्वत् Sy.
१०. उदके निमित्तभूते सति Sy.
११. आगच्छत Sy.
१२. त्र M. यत्र is suggested for तत्र
१३. विथुराणि शिथिलानि तृणानीव Sy.
१४. एकीभूतम् Sy.
१५ Missing in M. उदकम् Sy.
१६ व्याव० M. स्वस्थानाच्चालयथ तदा Sy.
१७. वृष्ट्युदकस्य लोकस्य वा Sy.
१८. कुत्रास्तीति। नास्तीत्यर्थः Sy.
१९. परावर P. अन्तम् Sy.
२०. आद्यन्तं न कोऽपि जानातीत्यर्थः Sy.
२१. अपरम् M. अवाङ्भाग आविश्च Sy.
२२. VM. ignores स्वित् and वि
२३. सम्भक्तिः...युष्मत्सम्भजनं यथा प्रशस्तगुणं तद्वद् वो रातिर्बृष्ट्यादिविषया Sy.
२४. इव Sy. २५. युष्माकं सम्बन्धिनी Sy.
२६. अमात्यवती, इन्द्राविसहायवती। यथा 'राजेवामवान्' (RV. IV. 4.1.) इत्यत्रामशब्दोऽमात्यवचनस्तद्वत्। यद्वा वः सातिः संविभक्तिर्नामवती रोगवती न भवति किन्तु Sy.
२७. सुखवती Sy. २८. दीप्ता Sy.

[1]ष्टोदकम्। मरुतः! भूयो भूयः प्रादुर्भावात्पेषणवत्। तदेवाह—[2]भद्रम्। वः। दानम्। [3]प्रयच्छत। उदारस्य। इव। दक्षिणा। [4]पृथुवेगा च। असुराणा [5]स्वभूता। [6]सेनेव, [7]जिगीषनकर्मा।

प्रति॑ ष्टोभन्ति॒ सिन्ध॑वः॒ पवि॑भ्यो॒ यदु॒ग्रियां॑ वाच॒मुदी॒रय॑न्ति।
अव॑ स्मयन्त विद्यु॒तः पृथि॒व्यां यदी॑ घृ॒तं मरु॑तः॒ प्रुष्णु॑वन्ति ॥८॥

[10]प्रति ष्टोभन्ति। [11]युष्माकमायुधेभ्य.। [12]प्रतिचलन्ति। [13]आप.। यदा। [14]अभ्र्याम्। [15]वाचम्। [16]उदीरयन्ति। [17]पृथिवी लक्षीकृत्य। [18]विद्युतश्च। [19]अवस्मयन्त=हसन्ति। [20]यदि। [21]उदकम्। [22]मरुत। [23]सिञ्चन्ति।

असू॑त पृ॒श्निर्म॑हते॒ रणा॑य॒ त्वेष॑मयासां॒ मरु॑ता॒मनी॑कम्।
ते सं॒प्स॒रासो॒ऽजन॑यन्ताभ्व॒मादित्स्व॒धामि॑षि॒रं पर्य॑पश्यन् ॥९॥

[24]असूत [25]पृश्निः। मरुता माता [26]पृश्नि। [27]महते। रणाय। दीप्तम्। [28]गमनशीलानाम्। मरु-

---

१. परिपक्वफला Sy.
२. पो० P. वेष० M. पेषणवती कृषीवलैः कर्षणवती। वृष्टौ सत्या कर्षन्तीति प्रसिद्धम्। स्वविरोधिपेषणवती वा Sy.
३. भन्दनीया स्तुत्या Sy.
४. ०तु D. अप्र० M. दातुर्धनिकस्य Sy.
५. दक्षिणेव तद्वत्समृद्धिकरी Sy.
६. पृथुजवा शीघ्रगामिनी Sy.
७. असुरस्य स्वभूता Sy.
८. सर्वानभिभवन्ती शक्तिरिव। सा यथान्येभ्योऽपहृत्यान्यस्मै दातुं समर्था तद्वदियमपि मेघस्थमुदकमपहृत्य जगतो दातुं शक्तेत्यर्थः। ईदृशी रातिरस्मभ्यमस्त्विति भावः Sy. ९. विजिर्या० M.
१०. प्रतिष्टो भवन्ति M.
११. मरुत्सम्बन्धिवज्रेभ्यः Sy.
१२. ०चवन्ति P.
१३. स्यन्दनशीला आपः Sy.
१४. अभ्यां M. अभ्रभवाम् Sy.
१५. शब्दं स्तनितलक्षणम् Sy.
१६. उच्चारयन्ति वज्राणि Sy.
१७. पृथिव्यामन्तरिक्षे। पृथिवीत्यन्तरिक्षनाम। 'पृथिवी भूः' (Ngh. I.3.) इति तन्नामसूक्तत्वात्...पृथिव्यामित्येतदुत्तरत्र वा योज्यम्।...पृथिव्या भूम्याम् Sy.
१८. ०द्य० D. विद्योतमानास्तडितः Sy.
१९ अरव P. अवाङ्मुखम् Sy.
२०. स्मयन्ते...प्रकाशन्ते Sy.
२१ यदा Sy.
२२. क्षरदुदकम् Sy.
२३. प्रुष्णन्ति सिञ्चन्ति। प्रुषेः क्र्यादिकस्य व्यत्ययेन श्नुः। यदैवं तदेत्यर्थः Sy.
२४. ०ति P. २५. ०श्नि P.
२६. मरुन्माता नानावर्णा। 'पृश्नियै वै पयसो मरुतो जाताः' (TS.2.2.11.4.) 'पृश्नेः पुत्रा उपमासः' (RV.V.58.5.) इत्यादिश्रुतेः। तामेवान्तरिक्षदेवतां केचिदाहुः सा देवी Sy.
२७. सङ्ग्रामाय मेघजयायेत्यर्थः Sy.
२८. गन्तृणाम् Sy.

ताम्। सङ्घम्[1]। असूत[2]। ते[3]। समानरूपाः[4], हिंसाकर्मा वा स्पृणोति[5]। उदकम्[6]। जनयन्ति[7]। तदनन्तरम्। एव। मनुष्या[8]. सर्वमेषणीयमन्नम्[9]। पृथिव्याः[10] परितः[11] पश्यन्ति[12]।[13]

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१०॥

[एष वः स्तोमः।][14]

I.169.

महश्चित्त्वमिन्द्र यत एतान्महश्चिदसि त्यजसो वरूता।
स नो बोधो मरुतां चिकित्वान्त्सुम्ना वनुष्व तव हि प्रेष्ठा ॥१॥

महश्चित्[15]। इन्द्र। महतो[16] मरुत। एतान्[17]। त्व नियच्छसि[18]। महत। असि। त्यागस्य[18]। सम्भक्ता[19]। स[20]। अस्मभ्यम्। विधात[21]। मरुताम्। प्राज्ञस्त्वम्[22]। सुखानि[23]। मे देहि[24]

---

१. समूहमेकोनपञ्चाशत्सङ्ख्याकम् Sy.
२. उत्पादितवती Sy.
३. ते च मरुतः Sy. ४. समानशीलाः P
५. पा M. हिंसका वा मेघानाम् Sy.
६. मेघम् Sy. ७. उत्पादितवन्तः Sy.
८. सर्वे जना Sy. ९. सर्वैरेष्टव्याम् Sy.
१०. अन्नं सस्यादिसमृद्धिलक्षणम् Sy.
११. ० व्यां D. पृथिवीं is suggested as acc. should be used with परितः
१२. परिपश्यन्ति Sy.
१३. Ms. D. puts the figure ॥१६८॥ here to indicate the end of one hundred and sixtyeighth hymn. No such number is given in P. and M.
१४. दशमी व्याख्याता Sy. This stanza is identical with RV. I. 165. 15; 166. 15; 167. 11. and is explained by VM. on P. 362. The mss. do not write the *pratika* of this stanza here and omit it altogether as it has already occurred thrice.
१५. यतः कारणात् ... महतोऽपि सामर्थ्यातिशयवत्त्वात् Sy.
१६. ०ता M. मरुतः Sy.
१७. निरपेक्षेणापि स्नेहान्न त्यजसीति शेषःSy.
१८. अतः कारणान्महश्चिदसि। चिदिति पादपूरणः। महतोऽपि ... त्यागात्। यद्वा। एतत् क्रोधनाम। क्रोधाद्वा Sy.
१९. वरिता रक्षिता. . .यद्वा मरुतोऽपि त्यागाद् वृष्ट्यादिविषयाद् वारयितासि Sy.
२०. स तादृशस्त्वम् Sy.
२१. ० तं M.
२२. ० ज्ञाः P. चेतनावान्। अस्मदनुग्रहविषयज्ञानोपेतः सन् Sy.
२३. मरुद्वायत्तानि वृष्ट्यादिरूपाणि Sy.
२४. Omitted by P.

सन्ति हि[1]। तव। प्रियतमानि सुखानि[2]।

अयुज्रन्त इन्द्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा[3]।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥२॥

अयुज्रन्[4] ते। युक्ता आसन्[5]। मरुतः। इन्द्र[6]! परिपूर्णकर्षणाः[7]। ज्ञातारः[8]। त्यजन्तो धनानि[9]। मर्त्येषु[10]। मरुतामेषाम्। सेना। दीप्यमाना[11]। सर्वसेचनस्य[12]। युद्धस्य[13]। भजने[14]।

अभ्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति[15]।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि ॥३॥

अभ्यक्[16] सा ते। अभ्यक्[17]। तत्[18]। तव। आयुधम्[19]। अस्मदर्थं त्वयि ततश्च तत्साहाय्यात्[20]।

---

१. खलु। ... हिशब्दः ... प्रसिद्ध्यर्थः Sy.
२. VM ignores चित्। चित्।
३. आ० M. पूर्वमन्त्रे मरुतामिन्द्रसाहाय्यमुक्तम्। अत्रेन्द्रस्य मरुत्साहाय्यमुच्यते Sy.
४. युज्यन्ते। त्वया युक्ता भवन्तीत्यर्थः Sy.
५. ०र्णकर्मणा P. कीदृशास्ते। ... विश्वकृष्टयो रक्ष्यत्वेन सर्वजनवन्तः Sy.
६. जानानाः Sy.
७. निश्शेषेणोदकस्य सेक्तृन्मेघान् Sy
८. ० नी P.
९. मान्येषु P. मर्त्यार्थम् Sy.
१०. हासं कुर्वती हर्षयुक्ता भवति Sy.
११. सुखसेक्तुः Sy.
१२. प्रकृष्टधनवतो वृत्राविसङ्ग्रामस्य ... यद्वा सुखेन सिह्यते जलं यस्मिंस्तादृशस्य प्रधनस्य प्रकृष्टोदकाख्यधनसाधनस्य सङ्ग्रामस्य सातौ। मेघभेदनायेति यावत् Sy.
१३. लाभे जये निमित्तभूते सति Sy.
१४. येषामीदृशी सेनास्ति ते मरुतोऽयुज्रन्निति सम्बन्धः Sy.
१५. अमक् P.
१६. प्राप्नोति मेघसमीपे Sy. तच्छब्दश्रुतेर्यच्छब्दोऽभ्यगित्येतत्सम्बन्धी, अध्याहार्यः। यां क्षिप्तां सतीम् ... यां प्रतीयं गता यां प्रतीत्येवं सर्वत्र शत्रवो मन्यन्ते। या वा नित्यं शत्रून्प्रत्यभिगता सहभूता वा SKN. आभिमुख्येन मेघमञ्चिता त्वया क्षिप्ता भवति Dur. 'अमाक्तेति वा। अभ्यक्तेति' N. 6.15. quotes first pāda only.
१७. सा प्रसिद्धा Sy.
१८. तव स्वभूता SKN. आत्मनस्तव या स्वभूता Dur.
१९. वज्राख्यायुधविशेषः Sy. शक्तिकाऽऽयुधविशेषः SKN. एवंलक्षणां शक्तिम् Dur.
२०. अस्मद्वृष्ट्यर्थम् Sy. अस्मान् प्रति SKN.
२१. ततश्च D. एवं च सति Sy. अथ तदा Dur.
२२. तत् is omitted by P. तवनु विवृत्सयैव Dur.

मरुतः[१]। पुराणम्[२]। उदकम्[३]। प्रेरयन्ति[४]। अग्निः[५]। इव[६]। अतसे[७]। शुशुक्वान्[८] ज्वालाः[९]। आपः[१०]। इव सर्वे मनुष्याः[११]। धारयन्ति[१२]। अन्नानि[१३]।

त्वं तू नं इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम्[१४]।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पीपयन्त वाजैः ॥४॥

त्वं तू नः[१४]। त्व हि[१५]। क्षिप्रम्। इन्द्र! अस्मभ्यम्[१६]। त्वदीयम्। रयिम्[१७]। देहि[१८]। यथा

---

१. मरुतोऽपि Sy. मरुतश्च SKN.

२. 'सनेम्यह्नाय' (Ngh. 3.27.) इति षट् पुराणनामानीत्युक्तत्वात्सनेमीति पुराणनाम। पुराणं चिरकालं सङ्गृहीतम् Sy. पुराणनामैतत् SKN. चिरन्तनम् Dur.

३. अम्बमित्युदकनाम । वृष्टयुदकम् SKN. बहूदकम् Dur.

४. क्षिपन्ति वर्षन्तीत्यर्थः Sy. 'जुन गतौ' सामर्थ्यान्ज्वान्तर्णीतण्यर्थो द्रष्टव्यः। गमयन्ति SKN. इह पातव्यमिति स्वान्यायुधानि मेघविदारणाय गमयन्ति Dur.

५. वृष्टधा सस्यादिसमृद्धौ सत्याम्.... हि स्म, इति पूरणे। अग्निरपि Sy. हिस्मौ पादपूरणौ ... यथाऽग्निः. दीप्यते SKN.

६. चिदुपमायाम् SKN.

७. सन्तते कर्मणि निमित्तभूते सति Sy. शुष्के काष्ठे SKN. काष्ठे Dur.

८. ० क्वा P. D. M. दीप्यमानो वर्तते Sy. तद्वत् त्वं शुशुक्वान् वंद्युतात्मना दीप्यसे इत्यर्थः SKN. सर्वेषामेवायुधानां मध्ये भावत्कैव शक्तिरग्निरिव काष्ठे देदीप्यमान एतस्मिन्मेघ आस्ते Dur. ९. आपः D. M. आप इव यथा च नादेया आपः SKN. यथा च नादेया आपः Dur.

१०. द्विपार्श्वस्थोदकवान्पर्वताद्विद्वीपः। तं यथाऽऽपो धारयन्ति तद्वत्। यद्वा। आयुधमेवोच्यते। वज्राख्यायुधविशेषोऽतसे काष्ठसमूहे, शुशुक्वान्दीपयन्नग्निश्चित्। चिच्छब्द उपमार्थे। 'दधि चिदित्युपमार्थे' (N. 1.4.) इति यास्केनोपमार्थस्योक्तत्वात्। काष्ठे ज्वलन्नग्निरिव तद्वद्दीप्तो वर्तते। एतदेव दीप्तत्वमपेक्ष्य सेत्युक्तम्। एवं च सत्यापो द्वीपमिव वृष्टयुदकानि प्रयांसि सस्याद्यन्नानि दधति धारयन्ति। एतत्सर्वं महानुभावस्येन्द्रस्य ऋष्टेः सामर्थ्यमितीन्द्रस्य स्तुतिः Sy. द्वीपं मध्यस्थस्थलम् SKN. द्वीपं परिवार्यात्मानं धारयन्ति Dur.

११. ददति वा यजमानाः Sy. एवं सर्वतस्त्वा परिवार्य दधति धारयन्ति SKN. एवमेतानि मेघ्यानि... महत्त्वावृष्टेस्तानि मज्जयितुमशक्नुवन्ति द्वीपमिव परिवार्य धारयन्ति Dur.

१२. चरुपुरोडाशादीनि हवींषि Sy. उदकनामैतद्, उदकानि मेघहननकाले SKN. उदकानि Dur.; SKN. II. 440

१३. VM. ignores इन्द्र। हि। स्म द्वीपम्

१४. नू P. १५. तुरवधारणे, त्वमेव Sy

१६. त्वद्दानयोग्यम् Sy.

१७. गवादिधनम् Sy.

१८. यस्मादितरेभ्योऽपि त्वमेव बहुप्रदोऽतिमहद्धनं देहीत्यर्थः Sy.

यजमाना[१] बलवत्तमया[२]। दक्षिणया[३] सह[४]। धनं[५] प्रयच्छन्ति[६]। या[७]। स्तुतयः[८]। त्वाम्[९]। अकामयन्त[१०]। गन्तारम्[११]। ताः[१२] स्तोतार[१३] पयसा[१४]। स्तनम्[१५]। इव[१६]। अन्नं[१७]। पूरयन्ति[१८]।

त्वे रायं इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ॥५॥

त्वे[१९] रायः[२०]। त्वयि स्थितानि। धनानि। अयजमानस्य बाधकानि[२१] भवन्ति। प्रणेतारश्च[२२]। कस्य। चित्[२३]। यज्ञमिच्छतस्तव स्वभूता[२४]। ते। मरुत[२५]। अस्मान्। सुष्ठु। सुखयन्तु। ये। स्म[२६]। देवा[२७]। शीघ्रम्[२८]। यजमानेषु गमनमिच्छन्तीव कामान्प्रदातुम्[२९]।

---

१. वयं तु ... ओजस्वितमया परिक्रमणार्हया Sy.
२. समृद्धिसाधनया गवादिलक्षणया ऋत्विजमिव Sy.
३. दातारं त्वाम् Sy.
४. प्रीणयाम इति शेषः। यद्वा दक्षिणाशब्दो देयद्रव्यसामान्यवचनः। रातिशब्दो बन्धुवचनः। हिरण्यादिसारवद्द्रव्यप्रदानेन बन्धुं यथा वशीकुर्वन्ति तद्वत् त्वा वशीकुर्म इत्यर्थः Sy.
५. येऽस्मदीयाः Sy.
६. स्तोतारः Sy.
७. ते, कर्मणि षष्ठी। ... त्वाम् Sy.
८. कामयन्ते, अस्तुवन्। याः स्तुतयस्त्वामेवाकामयन्तेति वा योजना Sy.
९. ०तारः D. धौतयुवक्षेपिष्ठस्य शीघ्रवरप्रदस्य ... (कर्मणि षष्ठी) ...वायुम् Sy.
१०. तां P.
११. तत्र दृष्टान्तः। मधुरस्य स्तन्यस्य लाभाय। वाजैः सारवद्भिरन्नविशेषैः Sy.
१२. तं यथाऽऽप्याययन्ति तद्वत् Sy.
१३. ०न्नं P. हविर्लक्षणैरन्नैः Sy.
१४. वयं त्वां बहुकृतप्रदानाय स्तुत्या हविषाऽऽप्याययामः। त्वं तु दातव्यत्वेन प्रसिद्धं धनं सर्वदा देहीत्यर्थः Sy.
१५. VM. ignores च
१६. तव Sy.
१७. धनविशेषाः Sy.
१८. अतिशयेन प्रीणयितारः। तुष्यतेस्तोषः। ... यद्वा रायो रातयो बन्धवो बन्धुभूताः सखिभूता मरुतस्तोशतमाः। तोशतिर्वधकर्मा। 'नितोशयति निबर्हयति' (Ngh. 2. 19.) इति तन्नामसु पाठात्। तोशतमा हिंसितृतमा अवर्षकाणां मेघानाम् Sy. १९. प्रकर्षेण निर्वोढारः Sy.
२०. अपि Sy.
२१. ऋतमिति यज्ञनाम। ... यज्ञेच्छोर्यजमानस्य Sy.
२२. खलु Sy.
२३. देव P. द्योतनशीला मरुतः Sy.
२४. पुरा पूर्वं ... यज्ञागमनमिच्छन्तीव त आगत्य मृळयन्तु Sy.
२५. VM. ignores इन्द्र

प्रति॒ प्र या॑हीन्द्र मी॒ळ्हुषो॒ नॄन्म॒हः पार्थि॑वे॒ सद॑ने यतस्व ।
अध॒ यदे॑षां पृथु॒बुध्ना॑स॒ एता॑स्ती॒र्थे नार्यः॑ पौंस्या॑नि त॒स्थुः ॥६॥

प्रति प्र याहि । कामैर्यजमानान् सेक्तॄन् । मरुत । प्रति । इन्द्र । गच्छ । अथ तैः सह महास्त्वम् । पार्थिवे । लोके । गच्छ । यस्मात् । तव गमनध्यानानन्तरमेव । मरुताम् । पृथुमूलावबद्धा नियुतश्च । एताः । तव गमनाय स्वबलानि । अधितिष्ठन्ति । यथा । स्वामी । युद्धे । बलानि तद्वदिति ।

प्रति॑ घो॒राणा॒मेता॑नाम॒यासां॑ मरु॒तां शृ॒ण्व आय॑ताम॒पब्दिः॑ ।
ये मर्त्यं॑ पृतना॒यन्त॒मूमै॑र्ऋ॒णावा॑नं॒ न पत॑यन्त॒ सर्गैः॑ ॥७॥

प्रति घोराणाम् । घोररूपाणाम् । एतवर्णानाम् । गच्छताम् । आगच्छता च । शब्दं ।

---

१. उदकसेक्तॄन् Sy.
२. जगन्नेतॄन् नराकारान्वा ।... मेघानां वृत्ररूपेण नराकारत्वं युक्तम् Sy.
३. अभिगच्छ Sy.
४. महंस्त्वम् M.
महतो मेघान् Sy.
५. पृथिवीत्यन्तरिक्षनाम Sy.
६. तत्सम्बन्धिनि स्थाने Sy.
७. प्रयत्नं कुरु । तैः सह युद्धयस्वेत्यर्थः । यद्वा हविष्प्रदातॄन्कर्मनिर्वाहिकान् महतो यजमानान्प्रति गच्छ, गत्वा च पार्थिवे सदने देवयजने यतस्व । यत्नं कुरु हविर्भोजनाय Sy.
८. यदा Sy.
९. ०नं ध्या० M.
१०. अध, अपि Sy.
११. एषां त्वत्साहाय्यकारिणां मरुतां सम्बन्धिनः Sy.
१२. ०बुद्धाः M. विस्तीर्णमूलाः Sy.
१३. ०श्चेताः P. D. M. पृथद्वर्णा गन्तारो वाऽश्वाः Sy.
१४. अरेशत्रोः Sy.
१५. ०ला...ति० M. तिष्ठन्ति । मेघानाक्रमन्ते । यद्वा । एषां मरुतां पृथुबुध्नासो बृहन्मूला एताः कृष्णवर्णा मेघास्तिष्ठन्ति । तत्र दृष्टान्तः । अर्योऽरणीयस्य स्वामिनः पौंस्यानि बलानि तीर्थे न राजवीथ्यां यथा तिष्ठन्ति तद्वत् Sy.
१६. युद्धमार्गे Sy.
१७. स्वब० M.
१८. द्यदिति M.
१९. हे इन्द्र ते सम्बन्धिनां घोराणां भयानकानां शब्दायमानानां वा Sy.
२०. एकव० M.
२१. अयमानानां गमनशीलानाम् Sy.
२२. आगन्तॄणां मरुताम् Sy.
२३. उप गुर्वादिसमीपे गम्यते ज्ञायत उपपद्यत इति बोपब्दिर्वाक् Sy.

प्रतिश्रूयते[1]। मरुताम्[2]। ये[3]। मारकमिन्द्रम्[4]। पृतनामिच्छन्तम्[5]। रक्षणै[6]। अभिगच्छन्ति[7]। ऋणिनम्[8]। इव। अर्थविसर्गौ[9]।

त्वं मानेभ्य इन्द्र विश्वजन्या[10] रदा[11] मरुद्भिः शुरुधो[12] गोअग्राः[13]।
स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम् ॥८॥

त्वं मानेभ्यः[14]। त्वम्। मानपुत्रेभ्य[15]। इन्द्र। विश्वजनहितया[16]। विलिख[17] ऋष्ट्या[18]। मरुद्भिः सह। अपः[19]। पशुमुखा[20]। स्तूयमानै[21]। मरुद्भि[22]। त्व स्तूयसे[23]। देवेति[24]।

I.170.

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति ॥१॥

न नूनमस्ति। 'अगस्त्य इन्द्राय हविर्निरुप्य मरुद्भिश्च सम्प्रदित्साञ्चकार स[25] इन्द्र एत्य परिदेवयाञ्चक्रे[26]'।

---

१. श्रूयते। कर्मणि कर्तृप्रत्ययः Sy.
२. मरुतः Sy.
३. मारस्सह महास्त्वं पार्थिवे लोके गच्छ यस्मात्तव गमनध्यानानन्तरमेव मरुतां प्रतिमूलावबद्धा नियुतश्चेतास्तव गमनाय स्वबलान्यधितिष्ठन्ति यथा स्वामी युद्धे बलानि तद्वदिति P. इन्द्रं रक्षणैः etc is omitted by P.
मरणधर्माणम् Sy. ४. पृतनामात्मन इच्छन्तं वैरिणं मेघं वा Sy.
५. स्वरक्षणैः, उदकनिग(र्ग)मनसाधनैर्वा Sy. ६. पातयन्ति। तेषामेव ध्वनिः श्रूयत इत्यर्थः Sy.
७. पातने दृष्टान्तः... अधमर्वैरिणमिव। तं यथा पीडयित्वा तदीयं धनमपहरन्ति तद्वत्। एवं महानुभावा मरुतस्तवानुगा इतीन्द्रस्य स्तुतिः Sy. ८. सृष्टैः स्वकीयप्रहारविशेषैः Sy. ९. मानार्थम्। चित्तेनेत्यर्थः। तादर्थ्ये चतुर्थी Sy.
१०. विश्वे प्राणिन उत्पादनीया यस्य तादृशस्त्वं सर्वजनहितशक्त्या वा Sy.
११. विदारय Sy. १२. मष्टया M.
१३. अपा M. शोकस्य रोधयित्रीः शोषिकाः Sy. १४. गर्जितमुदकं वाऽग्रे पुरतो यासा ता मेघपङ्क्तीः Sy.
१५. अन्यैर्मरुदादिभिर्ऋत्विग्भिर्वा Sy.
१६ उभयत्र कर्मणि कर्तृप्रत्ययः Sy.
१७. द्योतमान त्वम्...विद्यामेत्ययं व्याख्यातः Sy. १८. VM. ignores विद्याम etc
Ms. D puts the figure ॥१६९॥ here to indicate the end of one hundred and sixtyninth hymn. No such number is given in P. and M.
१९. P. adds ह after सः।
२०. परिदेवनप्रकारः प्रतिपाद्यते। इन्द्र आह Sy. N. 1.5.

[1]'नूनमिति विचिकित्सितार्थं'। 'न। नूनम्। [2]अस्त्यद्यतनम्। [3]नो [4]एव। [5]श्वस्तनम्'। कः। तत्। जानाति। [6]यत्। अभूतम्=भविष्यत्, [7]यद्धस्तस्थं [8]भवति तदेव [9]विश्वसनीयं भवति। [10]अन्यस्य। [11]चित्तम्। [12]अभिसञ्चारि। [13]अपिच। [14]आध्यानमपि। [15]विनश्यति। [16]

---

१. न्नूनमिति M. नूनमत्र विचिकित्सार्थे Sy. निश्चयेन SKN.

२. नूनमिति विचिकित्सार्थीयो भाषायाम्। N. 1.5.
अद्यतनं यदस्ति तत्। ... अत्र, अद्येति यद्यपि नास्ति तथाप्युत्तरवाक्ये श्व इति दर्शनादत्र, अद्येति गम्यते Sy.

३. तो P. नास्ति, अद्य मम हविरिति वाक्यशेषः SKN. विचार्यम्... ममैतत्तावदद्यतनं हविर्मम नास्तीति। नकारं वृष्ट्वाऽद्यतनशब्दोऽध्याहृत आचार्येण। प्रतिषेधे हि सति प्रतिषेध्येनावश्यं भवितव्यमिति। एते च मन्त्रैकदेशा एव सन्तोऽध्याहाराः पदातिरेकादध्ययनकाले नाधीयन्ते। ते स्वर्थनिर्वचनकाले प्रकाशयितव्याः Dur.

४. उशब्दोऽवधारणे Sy. नापि SKN.

५. N. 1.6. श्वस्तनमपि नैव नास्ति। अद्य यथाऽस्मदर्थं निरुप्तमस्मभ्यं नास्ति किल श्वः कथं लप्स्यत इति भावः Sy. अथापि स्याच्छ्वस्तनं भविष्यति। नो श्वः। इदं तावदस्मदर्थमेव निरुप्तं सदस्मत्तो व्यापन्नमय श्वस्तने का प्रत्याशा Dur.

६. यदस्ति Sy.

७. अन्यस्मै निरुप्यान्यस्मै दत्तमिति... वैपरीत्यं तत्... यद्वा यदद्भुतं भावि कार्यं यदस्ति तत्को वेद। अद्य श्वो वा लभ्यत इत्याशा न कार्येत्युक्तं भवति Sy. अभूतमिवासीदित्यर्थः SKN. को हि नाम तद्वेद जानाति यदद्भुतमनुत्पन्नं कस्य भविष्यतीति मम वाऽन्यस्य वेति Dur.

८. यर्धस्तत्स्थं M.

९. विश्वजनीयं P. D. विश्वजननीयं M.

१०. अस्य M. कस्मात्? उच्यते। यस्मादन्यस्य SKN. कस्मात्पुनर्न विज्ञायते। अतो यस्मादन्यस्य Dur.

११. मानसं जानातीति शेषः Sy.

१२. सर्वतः सञ्चारि Sy. अभिसञ्चरणस्वभावक चलमित्यर्थः SKN. सञ्चरणशीलमनवस्थितमित्यभिप्रायः Dur.

१३. आपि P. अवि M. उत शब्दोऽप्यर्थे। अधीतशब्दाच्च परो द्रष्टव्यः SKN. उत, अपि, अथेतिच्छन्दसि समानार्थाः Dur. १४. आध्यामतपि P. चिन्तितमपि न वृश्यं किमु सकृत्स्मृतम् Sy. आध्यातमपि मयाऽद्यतनं हविः SKN. एतदद्यतन हविराध्यातमभिप्रेतं सन्मया ममेदमित्येव Dur.

१५. 'वर्तमानसामीप्ये वर्तमानवद्वा' (Pa. 3.3.131.) इति भूते लट्। विनष्टं मह्य न दत्तमित्यर्थः SKN. तथापि विनश्यत्येव। अन्यस्मै प्रदीयते। तत्रैवं सति श्वस्तनमस्माकं भविष्यतीति कुत एतदिति समस्तार्थः Dur.

१६. न नूनमस्त्यद्यतनम्। नो एव श्वस्तनम्। अद्यास्मिन्द्यवि। द्युरित्यह्नो नामधेयम्। द्योतत इति सतः। श्व उपाशंसनीयः कालः। ह्यो हीनः कालः। कस्तद्वेद यदद्भुतम्। कस्तद्वेद यदभूतम्। इदमपीतरदद्भुतमभूतमिव। अन्यस्य चित्तम्। अभिसञ्चरेण्यमभिसञ्चारि। अन्यो नानेयः। चित्तं चेततेः। उताधीतं विनश्यतीति। (अप्याध्यातं विनश्यति) आध्यातमभिप्रेतम् N. 1.6; SKN. I. 66

किं नं इन्द्र जिघांससि भ्रातरो मरुतस्त्वं ।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥२॥

किं न इन्द्र । अगस्त्य इन्द्रमाह—किम् । अस्मान् । इन्द्र । त्वं जिघांससि । मरुतोऽमी । भ्रातर । तव भवन्ति । तैं । त्वमेकीभव । साधुना मार्गेण । मा । अस्मान् । सङ्ग्रामेन । हिंसी ।

शौनक.—

कि न इत्यब्रवीदिन्द्रमगस्त्यो भ्रातरस्तव ॥
मरुद्भिः सम्प्रकल्पस्व वधीर्मा न शतक्रतो !

किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे ।
विद्मा हि ते तथा मनोऽस्मभ्यमिन्न दित्ससि ॥३॥

किं नो भ्रात· । इन्द्र आह 'कि न ' इति निगदव्याख्यानम् । 'किं नो भ्रातरिति त्वस्यामिन्द्रो मान्यमुपालभत्' इति शौनक ।

अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः । तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥४॥

अरं कृण्वन्तु । शौनक—"अगस्त्यस्त्वरमित्यृग्भ्या क्रुद्धमिन्द्र प्रशामयत्" इति ।

---

१. ०स्त्यम् P. इदमगस्त्यवाक्यम् Sy.
२. अनपराधिनः Sy.
३ इन्द्रं P. ४. हन्तुमिच्छसि Sy.
५. कथमवध्यत्वमित्यत आह-मरुतस्तव भ्रातर., त्वया भोगप्रदानेन भरणीया इत्यर्थः । अतो वयमवध्या इत्युक्त भवति । मरुतामिन्द्रभ्रातृत्वमेकस्मिन्नेवादितिगर्भ उत्पन्नत्वात् । सा चोत्पत्ति. पुराणेषु प्रसिद्धा Sy.
६. सन्तु भ्रातरस्ततश्च किमित्यत आह.. तैर्मरुद्भिः सह Sy.
७. कल्पय हविर्भागं तैः सह युद्धं वा Sy.
८. साधुत्वम् Sy. ९. सङ्ग्रामे Sy.
१०. यद्वा लुप्तो दृष्टान्तः । सङ्ग्रामे यथा विरोधिनं हंसि न तथास्मानिति Sy.
११. शम्नको P.
१२ BD. IV. 51,c-d 52.a-b.
१३. इदमिन्द्रवाक्यम् । हे भ्रातर्हे अगस्त्य ! हविष्प्रदानवरप्रदानाभ्यां परस्परोपकारकत्वाद् भ्रातृत्वम् । तादृशस्त्वं, सखा सन्नस्मद्धितकार्यपि सन्, नोऽस्मान् किमतिमन्यसे कस्मादपराधावतिक्रम्य मनुषे । अपलपसि । नायमपलापः किन्तु तथ्यमेवेति चेदुच्यते, गन्तव्यं ते तव, मनो मानसं, यथा यथावस्तु, विद्मो जानीमः । कथं जानीथेत्युच्यते, अस्मभ्यमिन्न दित्ससि, अस्मदर्थं निरूपतमस्मभ्यं दातुं नेच्छस्येव । इवेवार्थे Sy. १४. ०गतो व्या० P.
१५. BD. IV. 52 c-d.
१६. इदमिन्द्रवाक्यम् । अपरेऽगस्त्यवाक्यमाहुः Sy. १७. ०स्त्वमि त्यृ० M. ०त्यस्यां क्षुध्य० BD. IV. 53a-b

शीघ्रमृत्विजः[1]। वेदिम्[2]। अलङ्कृण्वन्तु[3]। समिन्धतां[4] च। अग्निम्[5]। आहवनीये[6] तस्मिन्। हविषश्च[7]। प्रज्ञापनं[8] भवत्यासन्नस्य। यज्ञम्। तुभ्यम्। तनवावहै[9,10]।

त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः।
इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥५॥

त्वमीशिषे[11]। त्वम्। ईशिषे[12]। वसुपते[13]! वसूनाम्। त्वम्। मित्राणाम्[14]। मित्रपते[15]! धातृतमः[16]। इन्द्र! त्वमेव[17]। मरुद्भिः[18]। प्रथम संवाद कुरु[19]। तदनन्तरम्[20]। काले[21]। हवींषि[22]। प्रकर्षेण भुङ्क्ष्वेति[23,24]।

I.171.1

प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम्।
रराणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान् ॥१॥

प्रति व एना।

---

१. हे ऋत्विजो यूयमगस्त्योऽङ्गीकृतवास्तस्मात् Sy.
२. सम्मार्जनपर्युक्षणादिना परिचरन्तु Sy.
३. समिद्धतं M. इध्मप्रक्षेपेण प्रज्वालयन्तु Sy. ४. पुरः पुरस्तादग्निमाहवनीयादिकम् Sy. ५. अग्नौ Sy.
६. अमरणलक्षणस्य देवत्वस्य Sy. च seems to be unnecessary
७. प्रज्ञापकम् Sy.
८. ते त्वदीयं त्वं चाहं च Sy.
९. ०महै P.D. अगस्त्यवाक्यपक्षे शिष्टमविशिष्टम्। तत्र वेद्याममृतस्य तत्साधनस्य हविषो वा चेतनं प्रज्ञापनमासादन कुरुत। आवां पत्नीयजमानावध्वर्युयजमानौ वा हे इन्द्र ते त्वदर्थं यज्ञ तनवावहै Sy.
१०. VM. ignores पुरः
११. इदमगस्त्यवाक्यम् Sy.
१२. त्वम्। ईशिषे is omitted by M. ईश्वरो भवसि सर्वस्य Sy.
१३. अतिप्रभूतानां पुरोडाशाज्याविधनानां स्वामिन् हे इन्द्र।...वृत्र्यवृत्तिभ्यां बहुत्वं नित्यसम्बन्धश्च प्रतिपाद्यते। यद्वा हे वसुपते वसूनामीशिष इति योजना। द्वितीयो वसुशब्दोऽनुवादो वा Sy.
१४. इन्द्राणा P. १५. मित्रवते P.M. अस्मदादिमित्रस्य नित्यं पालकेन्द्र Sy.
१६. शातृ P. सर्वस्यातिशयेन धारकोऽसि Sy.
१७ उक्तमहिमस्? (०मा) त्वम् Sy.
१८. तैः साकम् Sy.
१९. कुरुत D. सम्यक्कृतमिति वदस्व Sy.
२०. अपि च Sy. २१. ऋतावृतौ। उपलक्षणमेतत्कालस्य। तत्तद्यागकाले Sy.
२२. आज्यचर्वादीनि Sy.
२३. इति is omitted by M.
२४. Ms. D. puts the figure ॥१७०॥ here to indicate the end of one hundred and seventieth hymn. No such number is given in P. and M.

'प्रादात् संवननं कृत्वा तेभ्य एव च तद्धविः ॥
सुते चकार सोमे च तानिन्द्रः[1] सोमपीथिनः[4]।
तस्माद् विद्या[5] निपातेन ऐन्द्रेषु मरुतः स्तुतान् ॥
प्रीतात्मा पुनरेवर्षिस्तास्तुष्टाव पुनः[6] पृथक्।
मरुतः प्रति सूक्ताभ्यामिन्द्र षड्भि परैस्तु सः ॥'[7] इत्युक्तम्।

प्रत्येमि[8]। युष्मान्। अहम्। अनेन। नमस्कारेण[9]। सुवचनेन[10]। याचे[11]। शोभमाना[12] मतिम्। शीघ्रगामिनाम्[13]। हे मरुत! रममाणेन[14] तदर्थम्। मदीयाभि स्तुतिभि[15]। युष्मदीय क्रोधम्[16]। निधत्त त्यजत[17]। अथ गमनार्थं विमुचध्वम्[18]। अश्वान्।

एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्धवासः ॥२॥

एष वः। एष[19]। युष्माकम्[20]। स्तोम। अन्नवान्[21]। मया हृदयेन[22]। अन्यूनानतिरिक्त कृत[23]। मया मनसा[24]। धार्यते[25]। तथा सति इम स्तोत्रम्[26]। उपागच्छत[27]। मनसा[28]। सेवमाना[29]। यूयम्।

---

१. Omitted by D. ऽथ BD.
२. तानीन्द्रः P. D
३. ०न्द्र M.
४. ०पीथनः M.
५. विद्यान्नि० BD.
६. पृथक् BD.
७. BD. IV. 53[c-d],54,55.
८. अभिगच्छामि Sy.
९. केन साधनेन ? नमसा नमस्कारेण हविषा वा। नम इत्यन्ननाम Sy.
१०. सव० D. शोभनवचनेन स्तुतिरूपेण Sy.
११. इन्द्रस्यैव पुनर्हविष्प्रदानादिद याच्यते Sy.
१२. शोभानां P. शोभनमतिमनुग्रहबुद्धिम् Sy.
१३. त्वरमाणानां शत्रूणां हिंसकाना वा युष्माकम् Sy.
१४. रममाणेन मनसेत्यम्भूताः सन्तः Sy.
१५. ०ति (भिः) M. वेष्टितव्याभिः स्तुतिभिः Sy.
१६. क्रोधनामैतत्। क्रोधं युष्मदभिक्रमजनितम् Sy.
१७. निकृष्ट धारयत, त्यजतेत्यर्थः Sy.
१८. ०मना ... वि० M. रथेभ्यो वियोजयत। क्रोधात्पुनर्गमनं मा कुरुतेत्यर्थः Sy.
१९. इदानीं क्रियमाणप्रकारः Sy
२०. युष्मदर्थ इत्यर्थः Sy.
२१. कीदृशोऽयम् ? ... नम इत्यन्ननाम। हविर्लक्षणान्नवान्। न केवलं स्तुतिमात्रं भक्षणाय हविरपि युष्माकमित्यर्थः Sy.
२२. युष्मन्निवेदनबुद्धया Sy.
२३. सम्पादितस्तादृशः स्तोमः Sy.
२४. मनसा, अस्मदनुग्रहवता चित्तेन Sy.
२५. धार्यताम् Sy.
२६. एनां स्तुतिं तद्धविश्च Sy.
२७. ०तं M. उपागच्छतैव। मा विलम्बं कुरुत Sy.
२८. आदरया बुद्धया Sy.
२९. ०यम M.

हि[1]। भवथ। अन्नस्य[2]। वर्धयितारः[3]।

स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शंभविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥३॥

स्तुतासः[4]। स्तुता.[5]। मरुत । अस्मान्। सुखयन्तु। अपिच। स्तुत.[6]। मघवा[7]। सुखस्य भावयितृतम[8]। कमिपर्याय कुमि[9], ऊर्ध्वानि[10]। सन्तु[11]। अस्माकम्। कमनीयानि[12]। अरण्यानि[13]। सर्वेष्वपि[14]। अहस्सु[15]। हे मरुत ! भवता गमनेच्छास्तु[16]।

अस्मादहं तविषादीषमाणः इन्द्राद्भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥४॥

अस्मादहम्[17]। अस्मात्[18]। प्रवृद्धात्[19]। इन्द्रात्[20]। अहम्। भयात्[21]। पलायमान[22]। हे मरुत.[23]! कम्पमान[24]। तथा सति युष्मभ्यम्। हव्यानि[25]। प्रथम सुसस्कृतानि[26]। आसन्[27]। तानि वय भीत्या। दूरे[28]। कृतवन्तः। सुखयत। अस्मानस्वाधीनान्[29]।

---

१. खलु Sy.
२. अन्नस्य हवीरूपस्य Sy.
३. अतो गन्तव्यमेव। इत् पूरणः Sy.
४. VM. ignores मरुतः। देवाः। इत्
५. Omitted by P. D.
६. स्तुताः सन्तः Sy.
७. मघमिति धननाम। अस्मद्दातव्यबहुधनेन तद्वानिन्द्रः Sy
८. सुतस्य P.
९. सुखस्य भावयितृतमः सन्नस्मान् मृळयतु Sy.
१०. कमिवप० D.
११. उन्नतानि, उपर्युपरि श्रिया यशसा वोत्कृष्टानि Sy.
१२. जिगीषा जेतुमिष्टानि जेतव्यानि च सन्त्विति वा योज्यम्। एवं कृत्वा मरुत इन्द्रश्च सुखयन्त्वित्यर्थः Sy.
१३. काम्यानि स्पृहणीयानि Sy.
१४. सर्वैः सम्भजनीयानि Sy.
१५. सर्वाणि Sy.
१६. दिवसानि (सः) Sy.
१७ नम० M.
जिगातेर्गतिकर्मणो जिगीषा। जिगीषितव्यानि प्राप्तव्यानि, उत्तरत्रानुभूयमानानि Sy
१८. प्रसिद्धात् Sy.
१९. बलवतः Sy.
२०. तत्सकाशात् Sy.
२१. भीत्या Sy.
२२. पुरतः स्थातुमशक्तः Sy.
२३. हे मरुतः शृणुत Sy.
२४. वेपमानश्चाभवम् Sy.
२५. यानि ... हवींषि Sy.
२६. सस्कृतानि Sy.
२७. तान्येव Sy.
२८. इन्द्रभयात् Sy.
२९. ०नात् P.M. अतो नोऽस्माननपराधिनः Sy.

येन् मानासश्चितयन्त उ॒ग्रा व्युष्टिषु॒ शव॑सा॒ शश्व॑तीनाम् ।
स नो॒ म॒रुद्भि॑र्वृषभ॒ श्रवो॑ धा उ॒ग्र उ॒ग्रेभि॒: स्थवि॑रः सहो॒दाः ॥५॥

येन मानासः । येनेन्द्रेण । प्रज्ञापकाः । रश्मयोऽर्थान् । उषसाम् । व्युष्टिषु । वेगेन । प्रज्ञापयन्ति । स त्वम् । अस्मभ्यम् । मरुद्भि सह । वर्षित.! अन्नम् । देहि । उद्गूर्णः । उद्गूर्ण । स्थविर । बलस्य दाता ।

त्वं पा॑हीन्द्र सहीयसो नृ॒न्भवा॑ म॒रुद्भि॒रव॑याताहेळाः ।
सु॒प्र॒के॒तेभि॑: मासहि॒र्दधा॑नो वि॒द्यामे॑षं वृ॒जनं॑ जी॒रदा॑नुम् ॥६॥

त्वं पाहीन्द्र । त्वम् । रक्ष । इन्द्र ! अभिभवितॄन् । नेतॄन्मरुत । भव च । मरुद्भि. सह । अपगतक्रोध । शोभनप्रज्ञानै । अभिमतानि प्रयच्छन् । शत्रूणामभिभविता ।

---

१. ०को P. D. M. मान्यास्त्वयाऽभिमानिता वा Sy.
२. ०योत्थान् D.M.
३. नित्यानां बह्वीनामुषसाम् Sy.
४. प्रकाशेषु सत्सु Sy.
५. बलभूतेन त्वयाऽनुगृहीताः Sy.
६. चेतयन्ते । प्राणिना स्वस्वव्यवहाराय प्रज्ञापयन्ति । ऐन्द्रयां दिशि तेनैवानुगृहीता उषसो रश्मय उद्गच्छन्तीति प्रसिद्धम् Sy.
७. तादृशः Sy.
८. सहितः Sy.
९. वर्षितरिन्द्र ! Sy.
१०. ०तातोन्नं P. ०तारोन्नं D. ०तरं नं M. सर्वत्र श्रूयमाणमन्नम् Sy.
११. धेहि, स्थापय । देहीत्यर्थः Sy.
१२. उद्गूर्णबलः Sy.
१३. कीदृशैर्मरद्भिः । ... क्रूरबलैः Sy.
१४. पुरातनः Sy.
१५. पराभिभवसामर्थ्यं बलं सहस्तस्य दाता ... एवम्महानुभावोऽन्नं देहि Sy.
१६. सहस्वितमांस्त्वदनुग्रहेणातिप्रवृद्धबलान् Sy.
१७. मनुष्यानस्मान् मरुतो वा Sy.
१८. साकम् Sy.
१९. अवग० D. आग० M. अपगतमन्युर्भव । मरुत्सु वा तथा भव Sy.
२०. अभिभवितानि P.D. अस्मवभिमतस्य Sy.
२१. धारयिता भवेति शेषः Sy.
२२. V.M. ignores विद्याम etc. Ms. D. puts the figure ॥१७१॥ here to indicate the end of one hundred and seventyfirst hymn. No such number is given in P. and M.

I.172.

चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः । मरुतो अहिभानवः ॥१॥

चित्रो वः । हे[1] सुदानाः[2] ! वः । चित्रम्[3] । यानमिह । अस्तु[4] । रक्षणार्थम्[5] । मरुतः ! आहन्तृदीप्तयः[6] !

आरे सा वः सुदानवो मरुत ऋज्रती शरुः । आरे अश्मा यमस्यथ ॥२॥

आरे सा वः[7] । युष्मान् । अलङ्कुर्वती[8] । हिंसित्री[9] ऋष्टिः । दूरे[10] भवतु । तथा, अश्मा[11] च । यम् । यूयं क्षिपथेति[12] ।

तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः ।
ऊर्ध्वासः कर्त जीवसे ॥३॥

तृणस्कन्दस्य[13] । तृणस्कन्दस्य राज्ञः । विशोऽस्मच्छत्रुभूतान्[14] । बाधध्वम्[15] । सुदानाः[16] !

---

१. P. begins गायत्साम गायति साम हिंस ह ।
न केवलमागमनमेव चित्रं किन्तु हे सुदानवः शोभनदानाः Sy.

२. ०दान वः P. D. युष्माकम् Sy.

३. चायनीयः पूज्य आश्चर्यभूतो वा Sy.

४. अस्मद्यज्ञागमः Sy.

५. P. adds रक्षणास्तु after अस्तु भवतु Sy.

६. ऊत्यै रक्षणायेष्टतर्पणाय वा युक्तश्च भवतु । त्वदागमनं शीघ्रमस्तु । अभिमतप्रदं चास्त्वित्यर्थः Sy.

७. अहीयमानप्रकाशाः, युष्माकं सम्बन्धी चित्रः स आगमः Sy.

८. हे सुदानवः शोभनदाना मरुतो वो युष्माकं सम्बन्धिनी Sy.

९. ०न्ति P. प्रसाधयन्ती स्वतेजसा स्वात्मानमलङ्कुर्वती प्रसिद्धिं प्राप्नुवाना वा सा प्रसिद्धा Sy.

१०. हिंसिका Sy.

११. दूरनामैतत् । दूरे भवतु, मां न प्राप्नोतु । यद्वा । आरेशब्द आराच्छब्दपर्यायः । स च दूरे समीपे च वर्तते । अत्र समीपवचनः । यमस्मत्तोऽन्यमस्यथ तं वैरिणमस्माकमुपलोपमः कठिन आयुधविशेष आरे समीपं प्राप्नोतु Sy.

१२. ०स्मा (श्मा) M. व्यापक आयुधविशेषः Sy.

१३. VM. ignores सा । सुदानवः । मरुतः and explains आरे once only.

१४. Omitted by P. तृणवच्चलनस्वभावस्य शुष्यमाणस्य वा मम Sy.

१५. पुत्रभृत्यादिरूपाः प्रजाः Sy.
०च्छत्रुभूताः is suggested for ०च्छत्रुभूतान्

१६. ०धस्व M. नु क्षिप्रम्...परिवर्जयत । बाधापरिहारेण रक्षत । यद्वा । उक्तलक्षणकालस्यासुरविशेषस्य वा प्रजाः परिवर्जयत Sy.

१७. शोभनदानाः Sy.

ऊर्ध्वान्। अस्मान्। कृणुत। जीवनाय।[1] [2]

I.173.

गायत्साम नभन्यं[1] यथा वेरर्चाम तद्वावृधानं स्वर्वत्।
गावो धेनवो बृहिंष्यदंघ्रा आ यत्सद्मानं दिव्यं विवासान् ॥१॥

गायत् साम। गायति।[3] साम।[4] हिंसनसाधनम्। 'साम वै रक्षोहा' इति ब्राह्मणम्।[5] यथा।[6] जानात्युद्गाता[7] वय च।[8] तदनुशसने[9] नाम।[10] वर्धमानम्।[11] शोभनयुक्तम्।[12] गाव.।[13] प्रीणयित्र्य।[14] यज्ञे।[15] अनुपहिंसिता[16] हविष्प्रदानेन। यदा। दिवि भवम्।[17] सद्मानमिन्द्र,[18] सीदन्ति यस्मिन्देवास्तम्।[19] परिचरन्ति[20] तदानी गायन्तीति।[21]

---

१. चिरजीवनाय Sy.

२. VM. ignores नु। परि Ms. D. puts the figure ॥१७२॥ here to indicate the end of one hundred and seventysecond hymn. No such number is given in P. and M.

३. गायत्युद्गाता Sy.

४. गायत् साम। गायति। साम is omitted by P. तादृशं साम Sy.

५. नसा० P. नभन्यं नभस्यं नभसि भवं नभोव्यापिनं, हिंसकं वा राक्षसादिकस्य। नभतिर्वधकर्मा। 'नभते, अर्दयति' (Ngh.2.19) इति वधकर्मसु गणनात् Sy.

६. सामक्षणो वेति P. ०क्षोवेति D. TA. 5.9.4.

७. येन प्रकारेण Sy.

८. वेत्सि Sy.

९. जातान्वुगतां P. जातात्यु० D.

१०. तथाऽर्चाम पूजयाम शंसामेत्यर्थः। स्तुतमनुशंसतीति न्यायात्। यद्वा तदुक्तलक्षणं साम वावृधानं सर्वत्र यथा भवति तथाऽर्चाम Sy.

११. दनु० P. तस्माद्यतः स्तौति ततः कारणात् Sy. ०शसनम् is suggested for ०शंसने

१२ फलभूतेन स्वर्गेण तद्वच्छब्दस्त्रम् Sy.

१३. दोरध्र्यः Sy.

१४. यजे P. यज्ञैः M.

१५. अपहि० M. अहिंसिताः Sy.

१६. इन्द्रं त्वाम् Sy.

१७. सम्मानमि० P. D. समानमि० M.

१८. सीदन्तम् Sy.

१९. विवासतिः परिचरणकर्मा। आगत्य परिचरन्ति क्षीरं दुहन्ति तथाऽर्चाम Sy.

२०. गायती० is suggested for गायन्ती०

२१. VM. ignores अर्चाम। आ।

अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात् ।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः ॥२॥

अर्चद् वृषा । अर्चति । इन्द्रं । मरुद्भिः । स्वभूतसोमहविष्कैः । मृगः । इव । अशनपरः । यदि । अत्यन्तम् । उद्युक्तो भवेत् । प्रभरते च । मदयिता । स्तुतीनाम् । हे उद्गूर्ण ! होता । मिथुनानि याज्यां चानुवाक्या च । यजनकुशलः । मनुष्यः ।

नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥३॥

नक्षद्धोता । परित । व्याप्नोति । होता । सम्मितानि । देवयजनानि, यत्र यत्र कार्यं तत्र गच्छन् । अथेन्द्रः शरदः । गर्भमुदकम् । पृथिव्याः । आहरति ।

---

१. अर्चित P. अर्चन्ति D. अर्चयतीन्द्रम् । यद्वा वृषा फलस्य वर्षिताऽयमिन्द्र उक्तलक्षणैरध्वर्व्वादिभिरर्च्यते Sy.
२. हविषां वर्षिताऽयं यजमानः Sy.
३. वर्षकैर्हविष्प्रदातृभिरध्वर्व्वादिभिर्विशिष्टः सन् Sy.
४. ०कै P. स्वायत्तेद्धहविष्कैः । यद्वा स्वयम्प्राप्तेन्धकं हव्यं येषां तादृशैः Sy.
५. हरिणादिरिवायमिन्द्रोऽश्नोऽशनशीलः सन् Sy. ६. अशान० P. व्यापकः पानाद्यर्थं धावन् Sy.
७. यत् D. यस्मादेवं तस्मादर्चति । यद्वा । अयमिन्द्रो यद् यथाऽश्नो मृग इवाति जुगुर्याद् भक्षयेत्तथाऽर्चतीत्यर्थः Sy.
८. अत्यर्थम् Sy.
९. उद्युङ्क्ते हविर्भक्षणाय । यथा मृगः क्षुत्पिपासार्दितः शीघ्रमुद्युङ्क्ते तथाऽयमिन्द्रोऽपि Sy.
१०. प्रकर्षेण सम्पादयति, तस्मादर्चतीत्यर्थः Sy. ११. ०तैव M.
१२. स्तुतियुक्तः Sy.
१३. मननं स्तोत्रमिच्छतां देवानाम् Sy.
१४. हृ M.
१५. इद्गूर्ण M.
१६. एतन्नामक ऋत्विक् Sy.
१७. युग्मरूपाणि याज्यापुरोनुवाक्यादीनि मिथुनौ वा जायापतिरूपः सन् Sy.
१८. यु० P.
१९. यागनिष्पादकः सन् Sy.
२०. परि यन् परितो गच्छन् Sy.
२१. होमनिष्पादकोऽयमग्निः Sy.
२२. ०ता P. परिमितानि Sy.
२३. ०यजमानानि M. सदनानि गार्हपत्यादिस्थानानि Sy.
२४. कार्यं. D.
२५. P. adds तत्र कार्यं before तत्र ।
२६. शदः P. व्याप्य च ... संवत्सरसम्बन्धिनम् Sy.
२७. गर्भस्थानीयमन्नं हविर्लक्षणम् Sy.
२८. भूम्याश्च सम्बन्धिनम् Sy.
२९. स्वीकरोति । सम्भरति वा । संवत्सरपर्यन्तं वर्धितं भूम्यामुत्पन्नमित्यर्थः । यद्वा संवत्सरसम्बन्धिनं वसन्ताविकाले ज्योतिष्टोमादिषु दीयमानं पार्थिवं हविर्भरत् । 'वसन्ते वसन्ते ज्योतिषा यजेत' इति श्रुतेः Sy.

शब्दायन्[1]। अश्वः[2]। नीयमानः[3]। रुवन्निव च[4]। गौरिन्द्रः शब्दं कुर्वन् भवति[5]। तस्य वाक्[6]। द्यावापृथिव्योः[7]। अन्तः[8]। दूतः[9]। इव। चरति[10] गर्जितलक्षणा।

ता कर्माषतरासु प्र च्यौत्नानि देवयन्तो भरन्ते ।
जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥४॥

ता कर्म[11]। तानि। कुर्म[12]। अभिलषिततराणि[13]। इन्द्राय[14]। प्रभरन्ते[15]। बलकराणि[16]। ऋत्विजो[17] हवींषि। सेवतामुभयान्यपि। इन्द्र। दर्शनीयवर्चा[18]। अश्विनाविव[19]। रथे तिष्ठन्[20]। सुखकर[21]।

तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।
प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहन्ता ॥५॥

तमु ष्टुहि[22]। तम्। एव। स्तुहि। इन्द्रम्। य[23]। युद्धेषु गच्छति। यश्च। शृणाति[24] शत्रुम्। धनवान्[25]। यश्च। रथे तिष्ठति। यश्च, अभिमुखान्[26]। अपि। शत्रून् अत्यन्त युद्धचति[27](ते)।

---

१. शब्दायमान. is suggested. लुप्तोपममेतत्। अश्व इव क्रन्दति हर्षातिशयात् Sy. २. ईशः P.
३. निय० P. नयन्निन्द्राय हविर्भरम् Sy
४. नीय ... गौ० M. गन्ता, उद्वृत्तो वृष इव Sy.
५. रौति, शब्दायते Sy.
६. वाभ्या P. वा M. स्तूयमान. स्तुवन्वा देवान् Sy.
७. द्यावा० M. रोदस्योः Sy.
८. मध्ये, रोदस्योरन्तरा Sy.
९. वार्ताहरो दूत इव Sy.
१०. चरति गच्छति। हविःस्वीकाराय पृथिवीं तत्प्रापणाय द्युलोकं च परिभ्रमतीत्यर्थः Sy. ११. कर्मा P.
१२. सम्पादयामः Sy.
१३. अर्षतराणि व्याप्ततराणि वा हवींषि Sy.
१४. इन्द्रया P. इन्द्राय तदर्थम् Sy.
१५. प्रकर्षेण सम्पादयन्ति। तद्वद्वयमपि सम्पादयाम इत्यर्थः Sy.
१६. च्यावयितॄणि दृढानि स्तोत्राणि कर्माणि स्वकीयानि सामर्थ्यानि वा Sy.
१७. ऋत्विजः P. देवानात्मन इच्छन्तो यजमानाः Sy.
१८ अस्मत्कृतं स्तोत्रादि कर्म Sy.
१९. ०यमच्चा M. दर्शनीयतेजाः शत्रूपक्षयणबलो वा Sy.
२०. नासत्याविव ... तौ हि द्यावापृथिव्यात्मानौ, ताविव Sy.
२१. रथे वर्तमान एवम्भूतः सन् Sy.
२२. सुगम्यः सुखेन गन्तुं शक्यः Sy.
२३. हे होतः स्तुतिं कुरु Sy.
२४. यः खलु सत्वाऽतिप्रभूतबलः। यद्वा सत्वा साधकः शत्रूणाम् Sy.
२५. शौर्योपेतः Sy.
२६. बलवानन्नवान्वा Sy.
२७. रथे वर्तमानः Sy.
२८. प्रत्यभिमुखम् Sy.
२९. योद्धुमपि Sy.
३०. योद्धृतमः Sy.

१ २ ३ ४ ५
वर्षणवान्। वारकस्य। अपि। तमसः। वारयिता।

प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये न भूमा।
सं विव्य इन्द्रो वृजनं न भूमा भतिं स्वधावाँ ओपशमिव द्याम् ॥६॥

११ ७ ८ ९ १०
प्र यदित्था। प्रकर्षेण। विद्यते। यत्। इत्थम्। महत्त्वेन। मनुष्येभ्यस्तेज। तस्मै तेजसे।
११ १२ १३ १४ १५
द्यावापृथिवी। सञ्चरणस्थाने। न। आलम्बत ? तेन तेजसेन्द्र। भूमिम्। आच्छादयति। यथा।
१६ १७ १८
बलं सेनालक्षण निष्क्रान्तम्। बिभर्ति। अन्नवानिन्द्र। सदश ? इव। दिवम्, स्थूणा वोपश.।

समत्सु त्वा शूर सतामुराणं प्रपथिन्तमं परितंसयध्यै।
सजोषस इन्द्रं मदे चोणीः सूरिं चिद्ये अनुमदन्ति वाजैः ॥७॥

२० २१ २२ २३ २४ २५
समत्सु त्वा। समत्सु। त्वा। शूर। सताम्। बहुकुर्वाणम्। अतिशयेन प्रकृष्टमार्ग

---

१. घर्ष० M. वृषाणो वर्षितारो वज्रादयस्तद्वान्। 'वृषा ते वज्र उत ते वृषा रथः' (RV. II.16.6.) इति हि निगम· Sy.
२. आवरकस्यापि Sy.
३. मेघादेः Sy.
४. ०तः M. विशेषेण घातकः। यस्मादेवं महानुभावस्तस्मात्स्तुहि Sy.
५. VM. ignores ह।
६. प्रभवति। ईष्टे स्वर्गादिप्रदानेन रक्षितुम् Sy.
७. M. adds इदम् after यत्; य इन्द्रः Sy. ८. स्वैश्वर्येण Sy.
९. नेतृभ्यः कर्मनिर्वाहकेभ्यो यजमानेभ्यः Sy.
१०. अस्मै रक्षकायेन्द्राय Sy.
११. द्यावापृथिव्यौ Sy.
१२. कक्ष्यते सती सञ्चाराय Sy.
१३. अलम्भवतः is suggested. नालं न पर्याप्ते। जगतोऽधीशस्येन्द्रस्य सञ्चारायाल्पत्वाद् द्यावापृथिव्यौ न पर्याप्ते इत्यर्थः। सृष्टावपि स्रष्टुर्महिम्नोऽधिकत्वादिति भावः Sy.
१४. भूमिं भूतानि वा Sy.
१५. तद्यथाऽऽवृणोति तथाऽयमपि स्वतेजसा सं विव्ये सम्यगावृणोति लोकत्रयम् Sy.
१६. लक्षणं is omitted by P.
वृजेः कर्तनार्थस्येदं रूपम्। तविव Sy.
१७. वृष्टिलक्षणोदकवान्वा Sy.
१८. संदशः D.
ईषदुपशेत इत्योपशं भ्रूङ्गं तद्वृषभ इव। यद्वा परस्पर समीपे वर्तमानं क्षित्यन्तरिक्षाख्य लोकद्वयमोपश तविव द्यां बिभर्त्ति। लोकत्रयमपि बिभर्त्तीत्यर्थः Sy.
१९. ०णावोवशः P.
२०. सङ्ग्रामेषु Sy.
२१. त्वामेवाश्रित्य वर्तमानानाम् Sy.
२२. शौर्योपेतेन्द्र ! Sy.
२३. प्राणिनाम् Sy.
२४. उरूण्यतिप्रभूतानि बलादीनि कुर्वाणम् Sy.
२५. प्रकृष्टमार्गतमं सुकृतिनामुत्तममार्गभूतम् Sy.

जिगमिषुम्[1]। शत्रूणां परितंसनाय=परिषेषणाय[2]। सोमेन मदयितुम्[3]। ईश्वरम्[4]। प्रजाः[5]। ऐकमत्यं[6] गता भवन्ति। य एनम्[7]। प्राज्ञम्[8]। अप्नैः[9]। च। तर्पयन्ति ताश्चानुमन्यते[10]?।

एवा हि ते शं सवना समुद्र आपो यत्ता आसु मदन्ति देवीः।
विश्वा ते अनु जोष्या भूदगौः सूरींश्चिद्यदि धिषा वेषि जनान् ॥८॥

एवा हि ते[11]। समुद्रे[12] सति। त्रीण्यपि सवनानि[13]। एवम्। प्रजाना[14] शङ्कराणि[15] भवन्ति। यत्[16]। त्वदीया[17]। इमा आप[18]। देव्यस्त्वया विसृष्टा। आसु नदीषु[19]। मदन्ति[20]। स त्व यदि। प्राज्ञान्[21]। अस्मान्। प्रज्ञया[22]। गच्छसि[23]। तत सर्वा[24]। ते[25]। वाक्[26]। सेव्या[27]। अनन्तरमेव[28]। भवति।

---

१. ०षुः P. इन्द्रं शत्रूणां वारकम् Sy.
२. परिषेष० P. परिषवणाय M. अवतसीकर्तुं भूषणीकर्तुम्। भूषयितुं वा निमित्तेऽर्थे Sy.
३. तव मदार्थं च Sy.
४ क्षोण्यो विश· परिजना मरुत· प्रयतन्ते Sy.
५. शता D. सह सेवमानाः समानप्रीतयो वा Sy.
६. प्रज्ञाम् M.
७. बलैः Sy.
८. अनुकूल मादयन्ति सङ्ग्रामे मरुतस्तमेव स्वामिन कृत्वा मादयन्ति हर्षयन्तीत्यर्थ.। यद्वा ये यजमाना वाजैर्हविर्भिर्मादयन्ति ते समानप्रीतियुक्तास्तव मनुष्यभूता ऋत्विजो यजमानभूताः प्रजाः समत्सु सहमादनस्थानेषु यागेषूक्तलक्षणविशिष्टं त्वामेव पूजयितुं तव मा (म) दाय च प्रयतन्ते Sy.
९. ०नुमद्यते P.
१०. एवं हि सति Sy.
११. तव सम्बन्धीनि Sy.
१२. उदकसमुद्रवणापादानभूतेऽन्तरिक्षे Sy.
१३. सूयते सोमोऽत्रेति सवनानि सोमयागाः Sy.
१४. व्रजा ० P.
१५. सुखकरा भवन्ति Sy.
१६. य D. यदि Sy.
१७. इव M D.
१८. द्योतमानाः Sy.
१९ प्रजासु निमित्तभूतासु Sy.
२० ते त्वा मदन्ति मादयन्ति। अन्तर्भावितण्यर्थोऽयम्। यदा प्राण्युपकारार्थं वर्षणाय त्वा प्रेरयन्ति वृष्टयुदकानि तदा खलु तव सोमयागाः सुखकरा भवन्ति। यज्ञसाधनवृष्टिप्रदानेन यागान्निर्वर्तयेत्यर्थः Sy.
२१. स्तोत्रादिप्रेरयितृन् स्तोतृजनानपि Sy.
२२. धिषणया प्रज्ञया वृष्टिप्रदानरूपेण कर्मणा वा Sy.
२३. कामयसे तदा सर्वापि स्तुतिस्त्वदर्था भवति Sy.
२४. त्वाम् Sy.
२५. वात् P. स्तोत्रशस्त्ररूपा वाक् Sy.
२६. जोषणार्हा प्रीणयित्री Sy.
२७. अनुक्रमेण Sy.
२८. VM. ignores हि। ते। चित्

असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः ।
असद्यथा न इन्द्रो वन्दनेष्ठास्तुरो न कर्म नयमान उक्था ॥९॥

असाम। अननेन्द्रेण वयम्। यथा। शोभनसखाय। भवेम। यथा वा शोभनाभीष्टाः। नराणाम्। इव। उदाराणा स्तोत्रैर्दरिद्रा। यथा। भवेत्। इन्द्र। अस्माकम्। वन्दनेष्ठाः। क्षिप्रकारीव पुरुष। लौकिक कर्म। उक्थानि। प्रापयन्नात्मानमुत्तरत्र सम्बन्ध.।

विष्पर्धसो नरां न शंसैरस्माकासदिन्द्रो वज्रहस्तः ।
मित्रायुवो न पूर्पति सुशिष्टौ मध्यायुव उप शिक्षन्ति यज्ञैः ॥१०॥

विष्पर्धसः। यथा। नराम्। स्तुतिभि। नरोऽन्यो विगतस्पर्धो भवति। एवमस्माक विस्पर्ध.। भवतु। इन्द्र। वज्रहस्त। यथा। रक्षक मित्रमिच्छन्त.। पुरा पालयितार राजानम्। असाधूनां शासनार्थमिच्छन्ति। एव मध्यकामा इन्द्र प्रत्यात्मानम्। उपशिक्षन्ति वशीकुर्वन्ति। यज्ञै.। मध्यो मदनाद् रक्षकमिच्छन्त इति।

---

१. इन, ईश्वर, इन्द्र ! Sy.
२. शोभनत्वद्रूपसहायवन्तः Sy.
३. भूयास्म Sy.
४. शोभनाभ्येषणाः Sy.
५. राजादीनाम् Sy.
६. शंसनैरिव। स्तुतिभिर्यथा मनुष्याः शोभनाभीष्टा भवन्ति तद्वत् Sy.
७. ०त्रैरिन्द्रः P.D.
८. इदानीं परोक्षेणाह। नोऽस्मभ्यम् Sy.
९. ०ष्टाः P.M. अस्मत्स्तुतौ वर्तमानः सन् Sy.
१०. त्वरमाण इव Sy.
११. उत्था० M. उक्थैः शस्त्रैः Sy.
१२. फलं प्रापयन्, स्तुत्या तुष्टः सन्नस्मदीयेन कर्मणा फलप्रापयिता ... हे ऋत्विजस्तथा कुरुतेति शेषः Sy.
१३. ०रा M. नेतृणा मध्ये सस्पर्धान्नरान् Sy.
१४. यथा विस्पर्धसः कुर्वन्ति सखिभूतास्तद्वत् Sy.
१५. ०क P. सखायो वयं तं तथा कुर्मः Sy.
१६. विविस्पर्धा M. ०र्धा D. P. विस्पर्धम् Sy.
१७. अनुकूलो भवतु Sy.
१८. विरोधिशिक्षणाय सर्वदा वज्रधारी Sy.
१९. मित्रेच्छवो हितैषिण इव Sy.
२०. पुरः स्वामिनम् Sy.
२१. सुशासने वर्तमानम् Sy.
२२. यथाऽभिमतदानेन पूजयन्ति तथा Sy.
२३. अस्माकं श्रियां यशसां च मध्येऽवस्थितिं कामयमाना अध्वर्यवादयः Sy.
२४. उपेत्य यजन्ते। शिक्षतिर्दानकर्मा Sy.
२५. यज्ञसाधनैर्हविःस्तोत्रादिभिः Sy.

यज्ञो हि ष्मेन्द्रं कश्चिदन्धञ्जुहुराणश्चिन्मनसा परियन् ।
तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ॥११॥

यज्ञो हि। श्रद्धयाऽनुष्ठीयमान. क.। चित्। एव। यज्ञो भवति। इन्द्रम्। वर्धयन्। पुन पुनराह्वयन्। अपि। मनसा। परिचरन्नपि कश्चिदेव वर्धयतीन्द्रम्। तीर्थस्थितम्। आत्मीय गृहम्। प्राप्तुम्। ततृषाण दूरस्थम्। दीर्घं। अध्वा। यथा। न। आकृणोति। एव साधयितारमिन्द्र न कश्चिदप्यभिमुख करोति य कश्चिदेव भाग्ययुक्त आकरोति यथा गमने प्रवृत्तो य कश्चिदेव गृह गच्छति तद्वदिति। तीर्थशब्द. स्वावासवचन । प्रथमो नकार उपमार्थीय ।

मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥१२॥

मो षू ण। इन्द्र। अस्माकम्। एषु। सङ्ग्रामेषु। अन्यैर्देवै.।

---

१. यज्ञवान्, यज्ञानुष्ठायी Sy.
२ इन्द्रं यज्ञेन वर्धयतीत्यर्थः Sy
३. कुटिलगतिस्तु कश्चित् Sy.
४. मनसा केवलेन Sy.
५. परितो गच्छल्लौकिकविषयादिकं ध्यायन्वर्तते। यद्वा परि( ) वर्जनार्थः। वर्जयित्वा गच्छन्निवं प्राप्नोति Sy.
६. तत्र दृष्टान्त.। तीर्थे प्रसिद्धे मार्गे Sy.
७. पानीयादिकं सदनम् Sy.
८. आभिमुख्येन समीपे वर्तमानम् Sy.
९. ततृणा P. Missing in M. पिपासायुक्तं यथाऽविलम्बेन प्रीणाति स यथा तत्सदनमागच्छतीत्यर्थः। तद्वद्यज्ञेन कश्चित्पुमानिन्द्रमभिगच्छतीति Sy.
१०. कुटिलस्य दृष्टान्तः । ... वक्रत्वेनातिदूरः Sy. ११. मार्ग इव। स यथा Sv.
१२. फलं पानीयादिरूपं फलार्थिनं वा पुरुषम् Sy. १३. ०न्द्र M.
१४. अर्वाक्करोति, नीचैः करोति । वर्जयतीत्यर्थः । तस्माद्यज्ञमार्गमजानानो वक्रो दूरे परिभ्रमति नेन्द्रं तर्पयति। तद्विलक्षणस्तु वर्जयत्येव Sy.
१५. The Passage beginning with न कश्चिदप्यभिमुखं and ending with भाग्ययुक्तः is missing in M.
१६. ० शब्द P.
१७. VM. ignores स्म।
१८. मो इति निषेधार्थः Mah. मो इत्ययं निपातः प्रतिषेधार्थीयः पुरस्ताद्याख्यातस्य भवति। यस्यार्थं प्रतिषेधयति। नचाख्यातं विद्यते, अतः श्रुत्युक्तमध्याह्रियते U. मो इति प्रतिषेधे। निपातसमुदायो वा। सामर्थ्याल्लभ्या क्रिया; तस्या एव निषेधसम्भवात् । अस्त्विति वक्ष्यमाणत्वाच्च BB. १९. देवनादिगुणक ! BB.
२०. नोऽस्मान्, मे (मा) विनाशयेति शेषः Mah. अस्मान् Sy. अस्माकं प्रजाः U. अस्मान् BB. २१. एषूपस्थितेषु Sy.
२२. सङ्ग्रामेषु वर्तमानः Mah., U. वृष्टयर्थं मेघजयेषु Sy. सङ्ग्रामेषु प्रवृत्तिः BB.
२३. त्वया सह सख्यं प्राप्तैर्मरुद्गणकैर्देवैः सहितस्त्वम् Mah. मरुदादिभिः सह Sy. मरुद्भिः सहितः U.

१ २ ३ ४ ५ ६ ७ ८ ९ १०
शोभनम्। मा भूत्। अस्ति। हि। ते। बलवन्! शत्रूणामवयजनं नाशनम्। महतः। मीढुषः।
११ १२ १३ १४ १५ १६ १७ १८
यव्या=मिश्रयित्री। हविष्मतः। मरुतश्च। स्तौति। अस्माक वागिति।

---

१. सुशब्दो विनाशभावस्य सौष्ठवं ब्रूते Mah. सु इत्यनर्थक· U. सु सुष्ठु समीचीनमेव। सुष्ठु मा भूदिति वा।... शोभनमेतदिति BB.

२. तथा सति विनाशलेशो मा भूदित्यर्थः सम्पद्यते Mah. मो षु मैव त्याक्षीरिति शेषः। मरुत्सहितो युध्यस्वेत्यर्थः Sy. मा विमन्थीः, मा हिंसीः U. पृत्सु मा कार्षीः। ...'सुञः' इति सोष्पत्वम्। 'अन्येषामपि दृश्यते' इति दीर्घत्वम्। 'नश्च धातुस्थोरुषुभ्यः' इति नसो णत्वम् BB.

३. विद्यत एव Mah. क उपकार इति चेत्। उपकृत्य हि प्रत्युपकारः प्रार्थ्यते। अस्ति हि...स्मेत्यनर्थकः U. पादादित्वादस्तीति न निहन्यते BB.

४. खलु Mah., Sy. यस्मात् U.

५. तव Mah., Sy. तव विषये U. तव प्रसादात् BB.

६. 'शुष्ममिति बलनाम' (Ngh. 2. 9.) Mah., U., BB.

७. अपयानं P. अवयानं D अवयुतो यागः पृथग्भागोऽस्ति।...अवपूर्वस्य यजतेरेतद्रूपम् Mah. अवयुज्य पृथक्कृत्य यजनं हविर्भागोऽस्ति। मरुद्भ्यः पृथगप्यस्ति हविर्भागः। केवलं मरुद्भ्य एव दीयते नास्मभ्यमतः कथं योत्स्यामीति न मन्तव्यमित्यर्थः Sy. अवयुतो यागः पृथग्भागस्तद्योगी U. करम्भपात्रयागोऽस्तु। अवयजनमवयाः। 'अवेर्यजः' इति ण्विः। छान्दसोऽल्यविकारः। सोर्वा डावेश· BB.

८. यद्वा, अवयाः शत्रूणां वर्जनाय गन्ता वज्रोऽस्ति ते Sy. वरुणपाशानामवयजनं विनाशहेतुरस्त्विति यावत् BB.

९. महश्चित् पूजा खलु। तस्य यथोक्तपूजोपेतस्य तवास्मासु कृपालुत्वं युक्तमिति भावः Mah. महतोऽपि Sy. महतश्चित् U.

१०. 'मिह् सेचने' धातुः। वृष्टिप्रदत्वेन सेक्तुः Mah. हविष्प्रदातुः Sy. सेक्तुर्वरुणस्य वर्षयितुर्वा U. सेक्तुः सम्बन्धिनीयमिष्टिः।...दाश्वानादौ मीढ्वानिति निपातित· BB.

११. यस्य M. यस्माद्यव्या यवमात्रसदृशी, अतिस्वल्पेति यावत्। शाखादित्वादिवार्थे यः BB.

१२. यवमयैः करम्भपात्रैर्निष्पन्ना होमक्रिया Mah. यस्य मम यव्या फलेनेन्द्रेण वा सह मिश्रयन्ती Sy. यद्वा इयमेवेष्टिस्तव प्रसादान्महती यव्या यावयित्री वरुणपाशानां पृथक्करणसमर्थेति यावत्। छान्दसो यः BB.

१३. हविर्योग्यस्य तव Mah. प्रदेयहविर्युक्तस्य Sy. चरुमतो मम BB.

१४. भवतः सखीन् Mah. यद्वा, एतत्पदद्वयं मरुतां विशेषणम्।...मीढुषः सेक्तॄन् हविष्मतो दत्तहविषा तद्वतो मरुतः Sy. तव स्वभूताः सञ्जातास्त्वदनुग्रहात् U.

१५. नमस्करोति। नमो मरुद्भ्य इत्येवमाकारायाः स्तुतेर्नमस्काररूपत्वात्। मरुद्विषयनमस्कारेणापि तुष्टस्य तव कृपैव युक्तेत्यर्थः Mah. 'यदि अभिवादनस्तुत्योः,' स्तौति U.

१६. अस्मदीया Mah..

१७. स्तुतिरूपा वाक् Mah. स्तुतिशस्त्रादिरूपा वाक् Sy. वाक् स्तोतृणाम् U.

१८. VM. ignores उ। स्म। चित्। यस्य This stanza=YV. 3.46.
=TS. 1.8.3.1.

एष स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः ।
आ नो वहत्याः सुवितायं देव विद्यामेषं वृजनं जीरदानुम् ॥१३॥

एष स्तोमः । एषः[1] । स्तोमः[2] । इन्द्र[3] ! त्वत्प्रीत्यर्थम्[4] । अस्माभि कृतः । एतेन स्तोत्रेण[5] । अस्मान्[6] । मार्गम्[7] । लम्भय[8] । आवर्तय[9] । अस्मान् । पुनः पुनरभ्युदयार्थम्[10][11] ।

I.174.

त्वं राजेन्द्र ये चं देवा रक्षा नृन्पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥१॥

त्वं राजेन्द्र । ये मनुष्याणामधिपतय[12] । देवा[13] । तेषामपि त्वम् । इन्द्र ! राजा[14] भवसि रक्ष[15] । मानुषान्[16] । अस्मांश्च[17] । पाहि[18] । बलवन् ! त्वम्[19] । सता पाता[20] । धनवान् । अस्माकम् । तारक[21] । त्वम् । सत्यकर्मा[22] । आच्छादयिता तेजसा[23][24] । वीर्यस्य च दाता ।

---

१. इदानीमुच्चारितप्रकारः Sy.
२. स्तोत्रविशेषः Sy.
३. हरिभ्यां तद्वन्निन्द्र ! Sy.
४. त्वदर्थम् Sy. ५. गमनेन वा Sy.
६. अस्मदीयम् Sy.
७. देवयजनमार्गम् Sy.
८. ०यत P. विदस्व Sy.
९. विदित्वा च ... आवर्तस्व । अस्मद्यागं प्रत्यागच्छ Sy.
१०. सुहिताय शोभनगमनाय वा Sy.
११. VM. ignores हरिवः । देव । and विद्याम etc.
Ms. D. puts the figure ॥१७३॥ here to indicate the end of one hundred and seventythird hymn. No such number is given in P. and M.
१२ ये देवा मरुदादयः सन्ति तेषामपि विशेषेण Sy.
१३. अधिपतिः सर्वस्य जगतः Sy.
१४. पालय Sy. १५. मनुष्यान् M.
१६ कर्मनेतॄन् यजमानान् Sy.
१७. विशेषतोऽस्मानपि रक्ष Sy.
१८. शत्रूणा निरसितः Sy.
१९. सतां सत. कर्मफलस्य वा पाता Sy.
२०. तारयिता पापात् Sy.
२१. सत्योऽबाध्यः सत्यफलो वा Sy.
२२. स्वतेजसा सर्वं छादयन्, वसूनि वा कुर्वन् स्तोतृभ्यः Sy.
२३. सहसो बलस्य दाता भवेति शेषः Sy.
२४. VM. ignores one त्वम्

दनो विशं इन्द्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ।
ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः ॥२॥

दनो[1] विशः । शरन्नाम्नोऽसुरस्य । यदा[2] । सप्त[3] । पुर[4] । दारितवानसि[5] । जगतः शर्मणे[6] । तदानी[7] तदीयान्[8] मृध्रवाच[9] परुषवचनान्[10] । मनुष्यान्[11] । खण्डितवानसि[12] । हे अनवद्य[13]! नदी[14] । अप[15] । त्वमृणो[16] । यूने[17] । भवद्भक्ताय पुरुकुत्साय[18] । शत्रुम्[19] ।

---

१. दशन्ना० P. शारदीः प्रत्यग्राः । यद्वा । एतत्संवत्सरलक्षणकम् । संवत्सरपर्यन्तं वृद्धीकृता अपि Sy शरदि भवाः SKN. शरत्कालोत्थाः संवत्सरोत्था वा । सवत्सरोऽपि हि शरदित्युच्यते 'स जीव शरदः शतम्' इति लिङ्गात् Dur.

२. व्यत्ययेन नपुंसक पुंल्लिङ्गस्थाने यस्मादर्थे वा यत् । यस्माद्वा SKN. यस्मात्त्वम् Dur.

३. एतत्सङ्ख्याकाः Sy. सप्तसङ्ख्याकामेव, (का एवम्) SKN. सप्ता Dur.

४. पुरीः Sy. मेघपुरः Dur.

५. अदारयः । पुरुषव्यत्ययः Sy. दृणातेश्छान्दसमेतद्रूपम् । दारितवानसि दारयसि वा SKN. त्वं दारयसि Dur.

६. सुखं यथा भवति तथा Sy. शर्म सुखं, (अ) क्लेशेन ये(या इ)त्यर्थः SKN सुखमिच्छज्जनानाम् Dur.

७. ० या P. M. तदीयाः Sy.

८. मृध्रा० P. मृद्ध० M हे इन्द्र त्वं वृत्रसम्बन्ध्यसुराणां पुरभेदनसमये .. मर्षणवचनाः Sy. मृध्रशब्दो मृदुवचनः । मृदुवचश्च मृदुवाग् वचनात् क्विबिति शेषः SKN. मृदुवाचः Dur

९. पुरुषवचानान् P.

१०. प्रजाः Sy. अस्माकं विशो मनुष्यान् SKN.

११. अवमयः । इमेरिद रूपम् । यद्वा वर्णव्यत्ययः । नदः । अनदोऽशब्दयोऽसुरप्रजाः, अतिभयङ्करशब्दमकरोः Sy. दानमनसः सामर्थ्यादस्य भाष्यकारः, (उदा)जहार SKN. दानमनस एवैतानस्मभ्यम् Dur 'दानमनसो नो मनुष्यानिन्द्र मृदुवाचः कुरु' N. 6.31.

१२. तथा कृत्वा हे अनवद्य कातरत्वानिन्दावन् हे इन्द्र Sy. अनवद्याः प्रशस्याः SKN. अनवद्यार्णा अनवद्योदकास्ताः पुरः Dur.

१३. नमीः P. अरणशीलाः Sy. अर्णा नदीनामैतत् । नदीं प्रति SKN.

१४. अवस्त्वम् P M. तदीयदुर्गस्थानान्युदकाश्रयाणि तटाकादीन् Sy. वृष्टिलक्षणाः SKN.

१५ अगमयः प्रावर्तय. । भरन्नान्यकरोः Sy. त्रिदायंच ऋणोः, ऋणातेर्गतिकर्मणोऽर्तेर्वा रूपं गमयसि प्रापयसि SKN. अपगमितवानसीमं लोकं प्रति ।... स्वभाव एवैष तव लोकाननुग्रहीतुमित्यभिप्रायः Dur

१६ नित्यतरुणाय, तदर्थम् Sy. 'यु मिश्रणे' मिश्रयित्रे च हविर्भिः स्तुतिभिश्च देवानाम् SKN. यौतिः स्तुत्यर्थः स्तोत्रे यजमानाय Dur.

१७. पुरुषकु० P. एवमुपद्रुत्य ... एतन्नाम्ने राज्ञे Sy. कर्ता स्तोमानां कुत्सम्बन्धः, (कुत्ससम्बन्धी) बह्वीनां स्तुतीनां कर्त्रे यजमानाय SKN. बहुस्तुतिकर्त्रे Dur.

१८. वृत्रमेतन्नामकमसुरम् Sy. धननामेदम् SKN. धनम् Dur.

वशमनय.। "दानमनसो नो मनुष्यानिन्द्र मृदुवाच. कुर्वन्ति" इति यास्कः।

अजा वृतं इन्द्र शूरपत्नीदयौं च येभिः पुरुहूत नूनम्।
रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥३॥

अजा वृत.। गच्छ। परिवृत। इन्द्र! दासपत्नी =अप। द्याम्। च गच्छ। येभिर्गच्छद्भिर्मरुद्भि. सह। पुरुहूत! सम्प्रति। स त्व वृष्ट्युत्पादनेन रक्ष। दवाग्निम्। शोपरहितम्। तूर्णगमनम्। यथा। सिहस्तूर्ण गच्छत्येवमग्निश्च। यजमानगृहे। देवाना कर्माणि। वासयितुमिति।

---

१. असाधयः। अहनः। अयमैतिहासिकः पक्ष· Sy. 'राध साध ससिद्धौ'। संराधयसि ददासीत्यर्थः SKN. सम्पादितवानसीत्यर्थः। यत एवमुपकारे प्रवृत्तो भवान् स्तोतृणामन्येषा च जनाना, तस्माद् ब्रूमोऽस्माकमप्येतान्मृदुवाचः कुरु मनुष्यानिति Dur.

२. निरुक्तरूढया तु हे इन्द्र मृध्रवाचो विशो मर्षणध्वनियुक्ता वृष्टिरूपाः प्रजा वनोऽवमयः। अशब्दयो वा। अवर्षय इत्यर्थः। कदा, यद्यदा सप्त पुरः शारदीर्दर्त् सर्पणस्वभावान्प्रत्यग्रान् वृष्टया जगत्पूरकान्मेघानदारयस्तदेत्यर्थः, तथा कृत्वा हे अनवद्य, अर्णा अरणस्वभावा अप ऋणोरगमयः प्रावर्तयः कुल्यादिरूपेण। अनन्तर यूने पुरुकुत्साय वृत्र मुख्य मेघ रन्धीरसाधयोऽहनः Sy.

३. एवमत्र 'वनः' इत्यस्मिन्पदे वकारे 'दानमनसः' इत्येतान्यक्षराण्यध्याहृतानि भाष्यकारेण। 'न' कारश्चास्मद्योगे विभज्योवाहृतः। तथार्थोपपत्तिदर्शनात् Dur.

४. N. reads कुरु instead of कुर्वन्ति; SKN. II. 498.

५. VM. ignores इन्द्र

६ गच्छ जेतुम् Sy.

७ वर्तन्त आस्विति वृतोऽसुरपुरीः। यद्वा। शूरा यजमानास्तैः पालिता वृतो वेदिभूमीः Sy.

८. अप M शूरै रक्षोभिः पालिताः Sy.

९. नूनमवश्यमज Sy.

१०. एभिः M. किं त्वमेक एव। न।...मरुदादिभिरनुगतोऽसि तै. सहितः सन् Sy.

११. सन्न M..

१२. बहुभिर्बहुधा वाऽऽहूतेन्द्र!

१३ ०ल्पा० P. १४. रक्षस्वैव Sy.

१५ वैद्युत होमाधारं वाऽग्निम् Sy.

१६. आशोषयितारमशान्तं वा Sy.

१७ रक्षणे वृष्टान्तः। सिह इव, स यथा स्वाश्रयभूतं वन गजाद्युपद्रवपरिहारेण रक्षति तद्वत्। असुरपुरभङ्गगमने वा दृष्टान्तः। सिहो यथा निर्भयो विरोधिमृगान्हन्तुं धावति तद्वत् Sy.

१८. गृहे Sy.

१९. कर्माणि कुर्वन् Sy.

२०. वस्तुम्। यद्वा वासयितुं स्थापयितुं, कारयितुमित्यर्थः। यज्ञद्विट्सु हतेष्वग्नौ सुस्थिरे सति यागाद्यनुष्ठानपरः स्यास्यामीत्यर्थः Sy.

२१. VM. ignores उ।

शेषन्नु त इन्द्र सस्मिन्योनौ प्रशस्तये पवीरवस्य महा ।
सृजदर्णांस्यव यद्युधा गास्तिष्ठद्धरी धृषता मृष्ट वाजान् ॥४॥

शेषन् नु। शेरताम्। क्षिप्रम्। इन्द्र! स्वकीये। स्थाने। अभ्युदयार्थम्। तव। आयुधस्य। महत्त्वेन। अवासृजत्। यत्। अगन्तृणि, उदकानि। युद्धेनेन्द्रस्तदा। अश्वौ। अधितिष्ठति। तथा स्वबलेन प्रगल्भेन। शत्रुबलानि। परिमार्ष्टि।

वह कुत्समिन्द्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
प्र सूरश्चक्रं बृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥५॥

वह कुत्सम्। वह। कुत्स प्रति। इन्द्र! यस्मिन्। कामयसे गन्तुम्। सन्ततगमनमिच्छन्तौ। ऋजु गच्छत.?। तवाश्वौ। सूर्यस्य। रथचक्रम्। प्रबृहतात्। सङ्ग्रामे, इन्द्र। अभियातु च

---

१. शेषं M. २. व्यत्ययेन परस्मैपदम् Sy
३. सर्वस्मिन् समाने वा Sy.
४. स्वकीये स्थानेऽन्तरिक्षे वा। योनिरन्तरिक्षम् Sy.
५. किमर्थम्? ... प्रशसनाय त्वत्स्तुतये। त्वन्महिमज्ञापनायेत्यर्थः Sy.
६. ते शत्रव. Sy.
७. किं सेवनादिसाधनेन, इत्याह। ... कुलिशस्य कुलिशशब्दस्य वा Sy.
८. महिम्ना। त्वद्वज्रप्रहारेण हता मेघाः शत्रवो वा तत्रैव शेरते, निपातेन पलायन्त इत्यर्थः Sy.
९. अवासृजः। अवाङ्मुखमपातयः। पुरुषव्यत्ययः Sy. १०. यदा Sy.
११. गा, गच्छसि Sy.
१२. ०अगन्तृज्जृदकानि M.
१३. प्रहरणसाधनेनायुधेन युद्धेन वा Sy.
१४. तदर्थं हरी अश्वौ Sy.
१५. इधि० P. अध्यतिष्ठः। अत्रापि पुरुषव्यत्ययः। यद्वा। यदा हरी अधितिष्ठसि तदाऽवासृजः Sy. १६. यथा P.
१७. वर्षकेण सामर्थ्येन Sy.
१८. प्रगद्भेन P.D.
१९. अर्थवं कृत्वा वाजानन्नानि सस्यादिलक्षणानि Sy.
२०. शोधय प्रवर्धयेत्यर्थः Sy.
२१. वह कुत्सम् is omitted by M.
२२. प्रस्थापय Sy.
२३. एतन्नामानमृषिं प्राप्तम् Sy.
२४. व्रति M.
२५ यस्मिन् हविषि निमित्तभूते सति Sy.
२६. कुत्सम् ... तर्पयसे वा हविरादिकम् Sy.
२७. सस्तितवगम० P. 'स्यूमकम्' (Ngh. 3.6.) इति सुखनाम, तदिच्छन्तौ सततगामिनौ वा Sy.
२८. ऋज्रे ग० P. ऋजू ग० D. ऋजुगामिनौ Sy. गच्छन्तौ is suggested for गच्छतः
२९. वातस्य वायोः समानवेगौ ... तदीयावश्वौ Sy.
३०. तदर्थं सूरः प्रेरकः सूर्यः Sy.
३१. स्वमण्डलं स्वरथचक्रं वा Sy.
३२. बृहता P. ऊर्ध्वं गमयतु प्रकाशयतु Sy.
३३. आसन्ने देशे Sy.

शत्रून् स्पर्धमानान्[१]। इन्द्रो वज्रबाहुः[२ ३]।

जघन्वाँ इन्द्र मित्रेरूञ्चोदप्रवृद्धो हरिवो अदाशून्।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यम् ॥६॥

जघन्वान्[४]। हतवानसि। इन्द्र! आत्मनो मित्राणा प्रेरयितॄन्[५]। प्रवृद्धचोदनस्त्वम्[६]। हरिव[७]! अदानशीलानयजमानान्[८]। ये। प्रपश्यन्ति[९]। पुत्रपौत्रै सह। अन्नस्य[१०]। प्रेरयितारम्[११]। त्वया। धनाप्रदानेन हिंसिता[१२]। पुत्रपौत्रान्[१३]। वहमाना[१४]। "य. खलु वै ददाति सोऽर्यमा" इति ब्राह्मणम्[१५]। एतदेव तेषा हननम्[१६ १७]।

रपत्कविरिन्द्रार्कसातौ त्वां दासायोपबर्हणीं कः।
करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत् ॥७॥

रपत्[१८] कविः[१९]। अस्तौत्[२०] त्वाम्। उशना[२१]। अन्नभजननिमित्तम्। तस्मै क्षीणाय[२२] त्वम्।

---

१. सङ्ग्रामं कुर्वत. शत्रून् Sy.
२. ०हुम् M.
अयमिन्द्रः Sy.
३. VM. ignores वातस्य
४. मित्राणा यजमानानामीरयितॄन्बाधकान्, तद्वैरिणां मित्रत्वं गच्छतो वा Sy.
५. चोदनैः स्तोत्रैः प्रवृद्धः सन् Sy.
६. M.adds प्रवृद्धनोदनः before त्वम्।
७ हरिभ्यां तद्वंस्त्वम् Sy.
८. अदन० D.
अदातॄन् Sy.
९. पश्यन्ति ते नराः Sy.
१०. अस्य P.D.
मनुष्यस्याध्वम्वदिहंविलक्षणान्नस्य वा Sy.
११. दातारं त्वाम् Sy.
१२. M. adds उदारं before त्वया।
१३. ०नेन...सिताः M. क्षिप्रा हविष्प्रदाने Sy.
१४. कुलस्यापातयितारं पुत्रम् Sy.
१५. ये सन्ति ते प्र पश्यन्। यद्वा। येऽर्यमणं त्वां पश्यन्ति त एवं भवन्ति। यद्वा। ये नरा अर्यमणं य कञ्चिद्दातारं पश्यन् पश्यन्तस्त्वामयजन्त, आर्योमनुष्यस्य सचा सहायभूतास्त्वया शूर्ताः क्षिप्ता वर्जिता अपत्यं पुत्र वहमाना ये सन्ति ताञ्जघन्वान् भवेत्यर्थः Sy.
१६. एतत् is omitted by P.
१७. हनन P.
१८. रवत् P.
१९. रपत् कविः। अस्तौत् is omitted by M.
स्तौति। यद्वा। एतन्नामर्षी रपदस्तौदन्नार्थम्। तस्यातिप्रभूतमन्नं प्रादा इत्यर्थः Sy.
२०. क्रान्तदर्शी, अनूचानो वा होता Sy.
२१. अर्चनीयस्यान्नस्य लाभे निमित्तभूते सति Sy.
२२. प्राप्युपक्षपयित्रेऽसुराय Sy.

पृथिवीम्[१]। वर्धयित्रीम्[२]। कृतवानसि[३]। तथा तिस्रो भूमी:[४]। चित्रदाना:[५]। करोति[६]। तथा दुर्योणाख्ये देशे[७]। कुयवाचनामानमसुरम्[८]। युद्धे[९]। हिंसितवान्[१०]। इन्द्र:[११][१२]।

सना ता त इन्द्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः ।
भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥८॥

सना ता ते[१३]। इन्द्र[१४]! ते[१५]। सनातनानि[१६]। तानि धनानि[१७]। नूतना: स्तोतार[१८]। प्राप्नुवन्ति[१९]। सोढवानसि[२०]। अविरणस्य[२१]। बर्ह्वी[२२]। हिंसा[२३], नभतिर्हिंसाकर्मा[२४]। असुरपुराणि[२५]। इव[२६]। आसुरी[२७]। हिंसा:[२८]। भिन्नवान्[२९]। तथा हिंसकस्य[३०]। असुरस्य[३१] वधार्थम्[३२]। आत्मीयमायुधमत्यन्त नमितवानसि[३३]।

---

१. भूमिम् Sy.
२. शय्याम् Sy.
३. अकरोः। हत्वा भूमावपातय इत्यर्थः Sy.
४. दार्शिकपाशुकसौमिकरूपा भूमीः क्षित्यन्तरिक्षद्युरूपा वा भूमीः Sy.
५. दानेन देयैर्धनैर्वा चायनीयाः Sy.
६. यद्वा तिस्रोऽयोरजतहिरण्ययमया. पुरोर्दानुचित्राः खण्डनेन चित्रा अकरोत् Sy.
७. (त)था M.
८. दुष्टयोनौ स्थाने । एतन्नामकस्य राज्ञः प्रीत्यर्थं वा Sy.
९. कुत्सित शब्दायन्तमेतन्नामानमसुरम् Sy.
१०. सङ्ग्रामे Sy.
११. धनवानयमिन्द्रः Sy.
१२. VM. ignores इन्द्र
१३. तव सम्बन्धीनि Sy.
१४. सदातनानि नित्यानि Sy.
१५. शौर्याणि Sy.
१६. ०रं M. नवतरा इदानीन्तना ऋषयः Sy.
१७. आगच्छन्ति स्तुतिव्याजेन प्राप्नुवन्तीत्यर्थः Sy.
१८. अभ्यभवः Sy.
१९. अविगतरणाय सङ्ग्रामनाशनाय Sy.
२०. बर्ह्वी M.
२१. नभेर्हिंसार्थात्क्विप् । तदन्तस्येदं रूपम् । ता हिंसाः Sy.
२२ न भवति हि० M.
२३. तदर्थं भिदो भेतुर्घातिकाः, अदेवीरासुरीः पुरो न पुरीरपि Sy.
२४. नशब्दश्चार्थे Sy.
२५. ०री M.
२६. विदारितवानसि । पुरुषव्यत्ययः Sy.
२७. हिंसकस्यासुरस्य Sy.
२८. अस्तुत्यस्य Sy.
२९. वज्रम् Sy.
३०. अनुकूलमकरोः। यद्वा। हे इन्द्र सना नित्यं तत्तत्काले ते तव सम्बन्धिन्यस्ता तानि । लिङ्व्यत्ययः । ताः पूर्वीः पुरातन्य आपो नव्या नूत्नाः स्तुत्याः सत्य आगुरागच्छन्ति। किमर्थम् ? अविरणाय, अविरमणाय प्राणिनामविनाशाय। तदर्थं नभो हिंसकान् बन्धकान्वा मेघान्सहः मर्षणमकरोः। किञ्चादेवीः पुरोऽवर्षणेनादेवनशीलानुदकपुटबन्धान् भिनद् भिन्नानकरोः। तथाऽदेवस्यादेवनशीलस्य पीयोः प्रतिकूलस्य वृत्रस्य वधर्वज्रं ननमोऽनमयः Sy.

त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥९॥

त्वं धुनिः । त्वम् । कम्पयिता । कम्पयित्री । अप । मेघेभ्यो विद्धवानसि । नद्य । इव । निर्गच्छन्ती । यदा त्वम् । तुर्वशम् । यदु च समुद्रमध्यस्थौ । समुद्रम् । प्रकर्षेण । अतिनयसि तदा नौ । अविनाशेन । पारयेति ।

त्वमस्माकमिन्द्र विश्वधा स्या अवृकतमो नरां नृपाता ।
स नो विश्वासां स्पृधां संहोदा विद्यामेषं वृजनं जीरदानुम् ॥१०॥

त्वमस्माकम् । त्वम् । अस्माकम् । इन्द्र । सर्वकालम् । अस्तेनतम । नृणा च । पाता । भव । स त्वम् । विश्वासाम् । स्पर्धमानाना सेनानाम् । बलस्य खण्डयिता भव ।

---

१. कम्पयिता शत्रूणामसि Sy.

२ कम्पनोपेनतरङ्गवतीः । अथवा धुनिर्नाम जलप्रतिरोधकार्यसुरः । स एव प्रतिबन्धकतया यासां तादृशीः Sy.

३. अगमयः । भूमावपातयः Sy.

४. तत्र दृष्टान्तः । ...नदीनामैतत् । सरणवतीर्नदीरिव तद्वत्सन्तता इत्यर्थः Sy. नदीः is suggested

५. ०च्छति P. ०च्छती D.
प्रवहन्तीः Sy.

६. ०स्थो P. उभावपि राजर्षी Sy.

७. अतिक्रम्य पूरयस्युदकं तदानीम् Sy.

८. तौ is suggested for नौ ।

९. अविनाशम् Sy.

१०. वारयेति P. अपालयः सम्पूर्णजलवर्षणेन Sy.

११. VM. ignores इन्द्र । शूर

१२. विश्वस्मिन्नपि काले विश्वप्रकारैर्वा Sy.

१३. यद्वा दातृतम इत्यर्थः Sy.

१४. नृ० P. अस्मदीयाना पुत्रभृत्यादिरूपाणां बहूनां मनुष्याणाम् । ... अपरो नृशब्दोऽनुवाद Sy.

१५ वाना M.
सर्वदा रक्षको भव Sy.

१६. सर्वासाम् Sy.

१७. स्पर्धानिमित्तानामस्मत्सेनानाम् Sy.

१८. तामामर्थाय बलस्य दाता भव Sy.

१९. VM. ignores नः and विद्याम etc.
Ms. D. puts the figure ॥१७४॥ here to indicate the end of one hundred and seventyfourth hymn. No such number is given in P and M.

I.175.

मत्स्यपायि॑ ते॒ महः॑ पात्र॑स्येव हरिवो मत्स॒रो मदः॑ ।
वृषा॑ ते वृष्ण॒ इन्दु॑र्वा॒जी स॑हस्रसा॒तमः॑ ॥१॥

मत्स्यपायि[1]। माद्यस्व[2]। पीतः[3]। त्वया[4]। महान्[5]। मद[6]=सोम.। मधुपानपात्रस्य[7] सम्बन्धी[8]। हरिव[9]! मत्सर[10] सुरादिवरस[11]?। पुमान्[12]। त्वया[13]। पुसा[14]। सोम[15]। बलवान्[16]। बहूनां वीराणामतिशयेन सम्भक्ता[17]। [18]

आ नः॑ ते गन्तु मत्स॒रो वृषा॒ मदो॒ वरे॑ण्यः ।
स॒हावाँ॑ इन्द्र सान॒सिः पृ॑तना॒षाळम॑र्त्यः ॥२॥

आ नस्ते[20]। अस्माकमय सोम[21]। तव। आगच्छतु[22]। तर्पयिता[23]। वर्षिता[24]। सोम.। वरणीय.[25]। शत्रूणा सहनवान्[26]। इन्द्र! सम्भजनशील[27]। सेनाना सोढा[28]। अमरणधर्मा।

---

१. मत्सपायी P. मत्स्यपायी D.
२. माद्यस्व M. यतः पिबस्यतो मत्सि माद्यसि मादयस्व वा। पात्रे यथा सोमः पूर्यते तथाऽत्यधिकं पिब पीत्वा च मादयस्वेत्यर्थ. Sy.
३. पीयते। आशंसाया विवक्षितत्वाद्भूतवत्प्रयोगः Sy.
४. त्वयं M. तृतीयार्थे षष्ठी। यद्वा पात्रस्येव ते तव स्वभूतो महो महान्त्सोम इति वा योजना Sy.
५. महान् पूज्योऽयं सोमः Sy.
६. महान् (मदयिता वर्षिता सोमो वरणीयः शत्रूणां सहनवानिन्द्र संभजनशीलस्सेनानां सोढा मरणधर्मा) मदः P.
७. तर्पयिता Sy.
८. तत्पात्रेणेव सोमपात्रेण यथा धार्यते सोमस्तत्सदृशेन Sy. ९. ०न्धि P.
१०. हरिभ्यां तद्वन्निन्द्र! Sy.
११. ०राः M. मदसाधनः Sy.
१२. ०वसः P. सुदिरिवरसं M. सुरादिरसः is suggested.
१३. वर्षिता Sy.
१४. तुभ्यम्। चतुर्थ्यर्थे षष्ठी Sy.
१५. अभिमतवर्षित्रे Sy.
१६. क्लेदयिता, आह्लादकारीत्यर्थः Sy.
१७. अन्नवान्। अन्नवा (का)र्यतृप्तिसद्भावादन्नवानित्युच्यते Sy.
१८. ०क्ताः M. अपरिमितदातृतमः। सहस्रपुरुषसम्भजनपर्याप्तशक्त्यतिशयो वा, एवम्महानुभावः सोमः सम्पादितः। तं पिबेत्यर्थः Sy.
१९. VM. ignores इव
२०. अस्मदीयः Sy. २१. त्वाम् Sy.
२२. मर्षणसाधनः Sy. २३. कीदृशोऽयम्? वृषा वर्षकः Sy. २४. तर्पयिता Sy.
२५. सहायवान् सहसा बलेन तद्वान्वा Sy.
२६. सम्भजनीयः Sy.
२७. शत्रुसेनाया अभिभविता Sy.
२८. अविनाशी। ईदृशः सोमस्त्वामागच्छतु। यद्वा। उत्तरार्द्धं इन्द्रपरतया व्याख्येयः। हे इन्द्र सहावान्, अस्मद्दत्तसोमसहायवान् बलवान्वा। सानसिरस्माभिः सम्भजनीयः पूतनाषाडमर्त्यश्च भवसि Sy.

त्वं हि शूरः सनिता चोदयो मनुषो रथम् ।
सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥३॥

त्वं हि शूरः । त्वम् । हि । शूरः । सङ्ग्राम सम्भक्ता । चोदितवानसि । मनो. पुरः । रथम् ।
सङ्ग्रामे सहनवान् । अयजमानम् । त स्वशत्रुम् । दग्धवानसि । आममिव । पात्रम् । अग्निना ।

मुषाय सूर्यं कवे चक्रमीशान ओजसा । वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥४॥

मुषाय । द्विकर्मको मुष्णाति, बलेन । सूर्यं देवम् । सर्वेश्वरस्त्वम् । रथचक्रम् । अमुष्णाः ।
प्रापय । शुष्णवधार्थम् । आत्मीय वज्रम् । तथा कुत्समृषि प्रति । वातसमै । अश्वैर्गच्छ ।

शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
वत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥५॥

शुष्मिन्तमः । शत्रूणा शोषयितृतम । तव । मद । अतिशयेन धनयुक्तम् । च । कर्म ।

---

१. खलु Sy. २. शौर्योपेतः Sy.
३. दातासि Sy.
४. मोदि० P. प्रेरय Sy.
५. अतो मनुषो मनुष्यस्य मे Sy
६. रंहणं स्पन्दनं मनोरथं वा स्वर्गगमनसाधनं यज्ञाख्य रथं वा Sy.
७. ०नवाद् M. सोमसहायवान् बलवान्वा भूत्वा Sy.
८. अकर्माणमननुष्ठायिनम् Sy.
९. उपक्षपयितारम् Sy.
१०. वह । . . . यागाधिकारी सन् यो न यजते तं वहेत्यर्थः Sy.
११. किमिव ? . . . अग्निः . . . स्वाधारं पात्रविशेषमिव Sy.
१२. दीप्त्या ज्वालया Sy.
१३. ०ज्णतिः M. १४. हे कवे क्रान्तदर्शिन्निन्द्र . . . सामर्थ्यातिशयेन Sy.
१५. सूर्यस्य . . . षष्ठ्येकवचनस्य द्वितीयैकवचनादेशः । तत्सम्बन्धि Sy.
१६. समर्थः सन् Sy. १७. चक्रमेकम् Sy.
१८. पूर्वं सूर्यरथस्य चक्रद्वयमस्ति (मासीत्) एकमिन्द्रो मुमुष इतीतिहासः Sy.
१९ अवहः शुष्णं हन्तुं वज्रमधारयः । यद्वा शुष्णवधाय वज्रमवहः Sv.
२०. एतन्नामकायासुराय तद्वधार्थम् । द्वितीयार्थे वा चतुर्थी । शुष्णं हन्तुमित्यर्थः Sy.
२१. कर्तनसाधनम् । . . . कुत्सं महर्षिमगमः शुष्णासुरधन कुत्सायादा इत्यर्थः . . . 'त्वं कुत्सं शुष्णहत्येष्वाविथ' (RV.I.51.6.) 'कुत्साय शुष्णमशुषम्' (RV. IV. 16. 12) इत्यादीति Sy.
२२. वायुवेगैर्बाश्वैर्युक्तः सन् . . . तं च हत्वा तदीयैर्वायुवेगैः Sy.
२३. अश्वैस्तदुपलक्षितैस्तदीयैर्धनैः Sy.
२४. VM. ignores कवे
२५. ०न्तः P. २६. बलवत्तमः Sy.
२७. सोमपानजनितः Sy.
२८. मतोऽति० M. मतोदाति० P.
२९. अतिशयेनान्नवान्यशोवान्वा Sy.
३०. अपिच Sy. ३१. व्यापारोऽस्मदर्थः Sy.

ताविमौ, अवन्ते[१] ? हन्तारौ[१]। धनस्य लम्भयितारौ[२]। पूजयेस्त्वम्[३]। अश्वयोः[४] सम्भक्तृतमः[५]।

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥६॥

यथा पूर्वेभ्यः[६]। यथा। मधुच्छन्द प्रभृतिभ्य। स्तोतृभ्य.। त्वमिन्द्र! तृष्यते[७] जनाय। सुखकरमन्नमिव[८]। उदकानि[९]। इव च। त्व बभूविथ[१०]। तादृशी मदीयाम्। वाचम्[११]। प्रति। त्वाम्[११]। अत्यन्तमाह्वयामि[१२]।

I.176.

मत्सि[१३] नो वस्यइष्टय इन्द्रमिन्दो वृषा विश।
ऋघायमाण इन्वसि शत्रुमन्ति न विन्दसि ॥१॥

मत्सि[१४]। माद्य[१४]। अस्माकम्[१५]। अभ्युदयार्थमिन्द्र[१६]! त्व च सोम[१६]! इन्द्रम्। आविश।

---

१. वृत्रघातिनौ Sy. वृत्रस्य is suggested for अवन्तेः

२. धनस्य परिचरणस्य वा वेदयितारौ लम्भयितारौ तव मदकृतू Sy.

३. अनुज्ञातवानसि। शत्रुघातिनौ धनदातारौ च स्यातामित्यनुग्रहमकरोरित्यर्थः Sy.

४. अश्वोपलक्षितबहुधनदास्त्वम् Sy.

५. VM. ignores हि

६. पुरातनेभ्यः Sy.

७. तत्र वृष्टान्तः।...तृषार्तस्य Sy.

८. मयः सुखम्। सुखस्वरूपमिव Sy.

९. उदकानि यथा सुखकराणीति तद्वत् Sy.

१०. बहुथ P. बुभूथ M. अभवः। तद्वत् स्तोतृभ्योऽस्मभ्यं सुखो भव Sy.

११. तस्मात्ताम् Sy.

१२. त्वत्प्रीतिकरीं प्रसिद्धां स्तुतिम् Sy.

१३. तृप्यम् Sy.

१४. पुनः पुनः करोमि। यद्वा। तां निविदभन् 'तृतीयार्थे' (P 1 4 85.) इत्यनोः कर्मप्रवचनीयत्वम्। तया स्तुत्या त्वां जोहवीमि पुनः पुनराह्वायामि Sy.

१५ VM. ignores विद्याम etc. Ms. D. puts the figure ॥१७५॥ here to indicate the end of one hundred and seventyfifth hymn. No such number is given in P. and M.

१६. मादयस्व Sy.

१७. वसीयसो धनस्य प्राप्तय उक्तलक्षणाय यागाय वा Sy.

१८. तदर्थं त्वमेव...वृषा कामानां वर्षिता Sy.

१९. क्लेदयितः सोम! Sy.

सपत्नान्[1] बाधमानः[2]। गच्छसि[3]। शत्रुं[4] च। अन्तिके। न[5]। लभसे[6] कञ्चन[7]।

तस्मिन्ना वेशया गिरो य एकश्चर्षणीनाम्[8]।
अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ॥२॥

तस्मिन्ना वेशय। तस्मिन्[9]। स्तुती[10]। आवेशय[11]। प्रधान.। मनुष्याणाम्[12]। यम्[13]। लक्षीकृत्य[14]। वर्षत्ययमिति बुद्ध्वा[15]। अन्नम्[16]। उप्यते[17]। स यवम्[18]। इव। पुन[19]. पुनरकृषन्[20]। बलीवर्दो भवति, बलीवर्दे हि सति बीजान्यावपन्ति[21]।

यस्य विश्वानि हस्तयोः पञ्च क्षितीनां वसु[22]।
स्पाशयस्व यो अस्मध्रुग्दिव्येवाशनिर्जहि ॥३॥

यस्य विश्वानि। यस्य[23]। विश्वानि[24]। धनानि[25]। हस्तयोर्निवसन्ति[26]। पञ्चानाम्[27]।

---

१. सोमेन्द्र...सप० M. अथ तथा पीत सन् ...शत्रून् Sy.
२. हिंसयन् Sy. ३. व्याप्नोषि Sy.
४. शत्रून् P.
५ यतः शत्रवस्त्वत्सामर्थ्येन पलायिता अतो न विन्दसि। यद्वा, उत्तरार्ध इन्द्रपरतया व्याख्येयः। हे इन्द्र त्वं त सोम पीत्वा ऋघायमाणः सन्निन्वसि। अन्तिके शत्रु न विन्दसि Sy.
६. कञ्चन is missing in M.
७. VM. ignores वृषा
८. हे अन्तरात्मन् होतर्वा तस्मिन्प्रसिद्ध इन्द्रे Sy. ९. स्तुतिरूपा वाचः Sy.
१०. स्थापय। तं स्तुहीत्यर्थः Sy.
११. The passage beginning with तस्मिन्नावेशय and ending with प्रधानः is missing in M. एक एव स्थानीयः Sy
१२. य इन्द्रः...ज्ञानवतां मनुष्याणाम् Sy.
१३. य M. १४. यमेवेन्द्रमनु Sy.
१५. स चेन्द्रो वृषा वर्षकः सन् Sy.
१६. हविर्लक्षणमन्नम् Sy.
१७. दीयत इत्यर्थः Sy.
१८. यवमिव पक्व यव यथा Sy.
१९. अन्नमपि...पुनः M.
२०. ०नरवृषन् M पुनः कृषन् is suggested. क्रमेणाददते कर्षकास्तद्वदादत्ते। यद्वा। अनु स्वधाऽन्नसाधनं व्रीह्यादिकमुप्यते भूमौ। यस्येन्द्रस्य वृष्टिरूपमनुग्रहमपेक्ष्योप्यत इत्यर्थः। स च वृषा वृष्टेर्वर्षिता स इन्द्रो यवं न यवमिव सर्वबीजमपि चर्कृषत् पुनः पुनः करोत्यङ्कुरयति। हविःसाधनत्वप्राशस्त्यमपेक्ष्य यवशब्दः प्रयुक्तः। एवम्महानुभाव इन्द्रे गिर आ वेशयेति Sy.
२१. बलीवर्दो भवे P.
२२. VM. ignores यः
२३ इन्द्रस्य Sy.
२४. यस्य। विश्वानि is omitted by M. सर्वाणि Sy.
२५. वसूनि Sy. २६. धृतानि भवन्ति Sy.
२७. देवा मनुष्याः पितरः पशवः पक्षिणश्चेति पञ्चजनाः। चत्वारो वर्णा निषादपञ्चमाः पञ्चजना इत्यन्ये Sy.

क्षितीनामर्थाय स त्वम्। यः। अस्मभ्यं द्रोग्धा। तं बुध्यस्व बुद्ध्वा च। दिवि भवा। अशनिरिव। तं जहि।

असुन्वन्तं समं जहि दूणाशं यो न ते मयः।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ॥४॥

असुन्वन्तम्। अयजमानम्। सर्वं जगत्। नाशय। नाशयितुमशक्यम्। यः। नः। तेः। सुखं करोति। अस्मभ्यम्। अस्य। धनम्। देहि। तव स्तोता। हि। वहते धनम्।

आवो यस्य द्विबर्हसोऽर्केषु सानुषगसत्।
आजाविन्द्रस्येन्दो प्रावो वाजेषु वाजिनम् ॥५॥

आवो यस्य। यस्येन्द्रस्य। द्विगुणवर्हणस्य बलवत। स्तोत्रेषु। य सानुषङ्ग। भवति तम्। इन्दो! त्व रक्षसि। तथाऽस्येन्द्रस्य। यो हविष्मान् भवति तम्। युद्धे। बलेषु।

---

१. क्षियन्ति निवसन्ति गच्छन्ति वा क्षितयो मनुष्याः पञ्चानां मनुष्याणा प्रीणयितृणि Sy.
२. दोग्धि M. द्रुह्यति Sy.
३. Omitted by M.
४. बाधस्व Sy.
५. बुध्वा P. D.
६. नदिवि M. ७. अशनिर्भूत्वा Sy.
८. अस्मद्द्वेष्टृन् Sy.
९. सोमाभिषवमकुर्वाणम्। त्वामयजन्तमित्यर्थः Sy.
१०. अयं सर्वानुदात्तः सर्वशब्दपर्यायः। अयष्टृन्सर्वान्। यद्वा। सममेकोद्योगेनाविशेषेण वा जहि Sy.
११. जनं M.
१२. दुःखेन नाशनीयम् Sy.
१३. ये P. D. M.
१४. न भवति Sy.
१५. तव सुखहेतुः Sy.
१६. मय इति सुखनाम Sy.
१७ यो होमेन स्तुत्या वा न प्रीणाति तं जहि Sy.
१८. 'दद् दाने' इत्यस्माद् व्यत्ययेन परस्मैपदम्। छान्दसः शपो लुक् Sy.
१९. चिदेवार्थे Sy.
२०. तवते P. प्राप्नोति Sy.
२१. आपो P.
२२ इन्दो सोम! तव यस्य Sy.
२३. स्तोत्रहवीरूपद्विविधपरिवृढकर्मवतो यजमानस्य Sy.
२४. मन्त्रेषु Sy. २५. सातत्यम् Sy.
२६. भवेत् Sy.
२७. यजमानम् Sy. २८. इन्दो M.
२९. तर्पयसि वा। यद्वा कर्मणि षष्ठी। यं द्वयोः स्थानयोः परिवृढ यमिन्द्रं हे इन्दो यदार्केषु सानुषगसद् भवेस्तदावोऽरक्षः, अतर्पयो वा Sy. ३०. तस्यैव Sy.
३१. तथाभवन्तं तमिन्द्रम् Sy.
३२. सङ्ग्रामे Sy.
३३. अन्नेषु वा निमित्तभूतेषु Sy.

प्रकर्षेण[1] रक्षसि।

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥६॥[2]

I.177.

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः।
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ् ॥१॥

आ चर्षणिप्राः। मनुष्याणां पूरयिता[3]। वर्षिता[4] च। तेषाम्[5]। राजा[6] च। पुरुहूत[7]। इन्द्र[8]। स्तुत[9] सन्। अन्नमिच्छन्[10]। अन्नेन सह। मदभिमुखम्[11]। उपायाहि[12]। वृषणौ[13]। अश्वौ। स्वरथे युक्त्वा[14]। इतोमुख[15]।

ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इन्द्र सोमे ॥२॥

ये ते वृषणः। ये[16]। तव[17]। इन्द्र[18]। वर्षितारः[19]। वर्षितु[20]। मन्त्रेण[21] रथे युज्यमाना[22]। कामाना[23]

---

१. प्रकर्षेणारक्षः। पानसमये तर्पयित्वा सङ्ग्रामसमये बलवर्धनेन जयप्राप्तशत्रुधनतर्पणेन वाऽरक्ष इत्यर्थः Sy.
Ms. D. puts the figure॥१७६॥ here to indicate the end of one hundred and seventy-sixth hymn. No such number is given in P. and M.

२. This stanza is identical with RV. I. 175. 6. As it has already been explained, it is left uncommented here by VM.

३. अयमिन्द्रः... वर्षणयो मनुष्याः। तेषां धनादिना प्रीणयिता Sy.

४. Omitted by P. D. कामानां वर्षिता Sy. ५. जनानां सर्वेषाम्... तथा कृष्टीनाम्। मनुष्यनामैतत्। मनुष्याणाम् Sy. ६. स्वामी Sy.

७. बहुभिराहूतः Sy. ८. ईदृश इन्द्रोऽस्मानाजानात्वागच्छतु वा Sy.

९. उत्तरार्धः परोक्षवादः। हे इन्द्र स्तुतोऽस्माभिः Sy.

१०. हविर्लक्षणान्नमिच्छन् Sy.

११. अस्मद्रक्षणेन तर्पणेन वा युक्तः सन् Sy.

१२. मदमुख P. मदभिमुखमञ्चन् Sy.

१३. ०पया० D. आगच्छ Sy.

१४. वर्षकौ युवानौ Sy.

१५. योजयित्वा Sy.

१६. अस्मदभिमुखम् Sy.

१७. VM. ignores कृष्टीनाम्

१८. ये सन्ति Sy. १९. तव सम्बन्धिनः Sy.

२०. ०रौ M. वर्षका युवानो वर्षणवन्तो वा Sy. २१. ०तुं P. अेष्ठाः Sy.

२२. परिवृढेन मन्त्रेण Sy.

२३. रथेन P. रथैः M. २४. ०ना D.

वर्षितृरथाः[1]। अश्वाः[2]। शिष्टं स्पष्टम्[3]।

आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि[4]।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोपं मद्रिक्[6] ॥३॥

आ तिष्ठ[4]। परिषिक्तानि[5]। मधूनि मधुसदृशाः[6] सुतस्य सोमस्य ग्रहा[7]। परित पात्रेषु सिक्ता इति। प्रवान् मार्ग[8]. प्रवणः[9], शिष्ट स्पष्टम्[10]।

अयं यज्ञो देवया अयं मियेधं इमा ब्रह्माण्ययमिन्द्र सोमः[14]।
स्तीर्णं बर्हिरा तु शक्र[17] प्र याहि पिबा निषद्य वि मुचा हरी[18] इह ॥४॥

अयं यज्ञः[11]। त्वदर्थं तायमान[11]। यज्ञ[11]। देवान् प्रति गच्छन्[12]। अयम्[13]। तथा पशु[14], एवमुत्तरत्रापि[15]। इद च[16] विस्तीर्णमस्माभि[17]। बर्हि[18]।

---

१. वर्षणरथवन्तः। तत्र नियुक्ता इत्यर्थः Sy.
२. ईदृशाः . . . अश्वाः Sy.
३. तानातिष्ठ, आश्रय, आरोह। तेभिस्तैरर्वाङ् अस्मदभिमुखमायाहि, आगच्छ। वयं च हे इन्द्र सोमे सुते सति त्वा त्वां हवामह आह्वयामः Sy.
४. हे इन्द्र त्वं रथमातिष्ठ, आश्रय यज्ञगमनार्थम्। कीदृशं रथम्? वृषण वर्षक कामानाम्। किमर्थमिति चेदुच्यते। ते त्वदर्थं वृषा वर्षकः सोमः सुतोऽभिषुतः Sy.
५. परितः सिक्तानि सम्पादितानि। यद्वा मधूनि मधुराः सोमरसाश्चमसेषु पूरिता. Sy. ६. मधुराणि घृतक्षीरादीनि Sy.
७. गृहा. M. संग्रहाः P. आगमनप्रकार उच्यते। हे वृषभ वर्षकेन्द्र! वृषभ्यां वर्षकाभ्यां हरिभ्या युक्त्वा रथं योजयित्वा क्षितीनां कर्मसु निवसतां यजमानानामस्माकमनुग्रहाय। क्षितीनां वृषभेति वा योज्यम् Sy.
८. प्रवता वेगवता रथेन Sy.
९. ०ण P. १०. मद्रिङ् मदभिमुखमञ्चन्मदाभिमुख्येनोपयाहि Sy.
११. नाय० P.
१२ अहर्गणेषु मध्येष्वहस्सु हारियोजनग्रहस्य याज्या 'अग्निष्टोमोऽत्यग्निष्टोमः' इति खण्डे सूत्रितम्। 'अयं यज्ञो देवया अयं मियेध इतीतरेषु' (ASS. 6.11.) इति। हे इन्द्र! अयं यज्ञो देवया देवान् गच्छन् भवति Sy.
१३ M. adds अयं after तथा।
१४ तथाऽय यज्ञो मियेध. । मेधः पशुः । 'पशुर्वै मेधः' (AB. II 6.) इति हि श्रुतिः Sy.
१५. ०रेव (शिष्टं स्पष्टं) मुत्तर० P. इमा, इमानि ब्रह्माणि मन्त्राः। अयं सुतः सोमः Sy. १६. आसनायास्तृताः Sy.
१७. दर्भाः। एते पदार्थास्त्वदुचिता एवं (व) सम्पादिताः Sy.
१८. हे शक्र, इन्द्र तु पुनः किमित्युक्ते, आ प्र याहि प्रकर्षेण शीघ्रमागच्छ। आगत्य च निषद्य बर्हिष्युपविश्य पिब सोमम्। तदर्थमिहास्मिन्नेवयजने हरी अश्वौ विमुच वियोजय। छान्दसो नुमभावः Sy.
१९. VM. ignores आ तु etc.

ओ सुष्टुत इन्द्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम् ॥५॥

ओ सुष्टुतः । इन्द्र ! सुष्ठु मया स्तुतस्त्वम् । मान्यस्य । कारोः । इमानि ब्रह्माणि । उपयाहि रक्षणार्थम् । इन्द्र स्तुवन्तो वयम् । वासम् । लभेमहि ।

I.178.

यद्ध स्या त इन्द्र श्रुष्टिरस्ति ययां बभ्रुथ जरितृभ्यं ऊती ।
मा नः कामं महयन्तमा धग्विश्वा ते अश्यां पर्यापं आयोः ॥१॥

यद्ध स्या । इन्द्र ! यत् । खलु । ते । क्षिप्रता । इयम् । विद्यते । यया । भवसि । स्तोतृभ्य । रक्षायै । तस्मात् त्वम्, अस्माकम् । कामम् । वर्धमानम् । मा । आधाक्षी । विश्वानि । त्वदीयानि । कर्माणि । पर्यश्यामहम् । गन्तु, आप इति दीर्घश्छान्दस ।

---

१. ०त त्व P. स्तत्र त्वम् M. अस्माभिः सम्यक् स्तुतः सन्नर्वाङस्मदभिमुखम् Sy.
२. मन्यस्य P. किमुद्दिश्य ... माननीयस्य Sy.
३. तारोरि०M स्तोतुर्होतुः कर्तुर्यजमानस्य वा Sy.
४. मन्त्रान् Sy.
५. उपलक्ष्य Sy.
६. आयाहि, आगच्छैव । मा विलम्बय Sy.
७. स्तुवन्तोऽभिमत शब्दयन्तो वा वयम् । अवसा त्वद्रक्षणेन रक्षिता. सन्त· Sy.
८. वस्तुं सुखेन सस्यातुमर्हनि वा सर्वेष्वहस्सु, अन्नादिकम् Sy.
९. VM. ignores ओ। अर्वाङ्। अवसा। विद्याम etc. Ms. D. puts the figure ॥१७७॥ here to indicate the end of one hundred and seventyseventh hymn. No such number is given in P and M.
१०. या Sy. या is suggested for यत्
११. प्रसिद्धा Sy.
१२. तव Sy.
१३ सर्वत्र श्रूयमाणा समृद्धिः Sy.
१४. असौ Sy.
१५. ययौ M.
१६. समर्थो भवसि Sy.
१७. ऊत्यै रक्षणाय Sy.
१८ तस्मा P.
१९. अभीष्टम् Sy.
२०. अस्मान्महतः कुर्वाणम् Sy.
२१. सर्वाणि भोगजातानि Sy.
२२ तव सम्बन्धीनि Sy.
२३. आप्तव्यानि । यद्वा विश्वाः सर्वा आप आप्ताः श्रुतयः Sy.
२४. पश्याम्य० D. परितो व्याप्नुयाम् Sy.
२५. मनुष्यस्योचिताः Sy.
२६. आव P.M.
२७. M. repeats दीर्घः दीर्घः ।

न घा राजेन्द्र आ दभन्नो या नु स्वसारा कृणवन्त योनौ ।
आपश्चिदस्मै सुतुका अवेषन्नगन्म इन्द्रः सख्या वयश्च ॥२॥

न घा राजा[1] । राजा सन् । इन्द्रः । अस्माकं[2] तानि । न । आभिमुख्येन[3] । हिनस्तु[4] स्वस्या-
नागमनेन । यानि[5] कर्माणि । द्यौ[6] च पृथिवी च । स्थाने[7] । कृण्वन्ति[8], कर्मभिर्हि[9] द्यावापृथिव्यो-[10]
र्धारण भवति । वसतीवरीलक्षणा[11] आप[12] । च । अस्मै[13] प्रीतये । शोभनसोमापत्याः[14] । व्याप्नुवन्तु[15] ।
सोऽयमिन्द्रः । अस्माकम्[16] । सख्यानि । गच्छतु[17] । हविर्लक्षणमन्नम्[18] । च[19] ।

जेता नृभिरिन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुषं उपाक उद्यन्ता गिरो यदि च त्मना भूत् ॥३॥

जेता । मरुद्भिः[20] सह । इन्द्र[21] । शूर[22] । युद्धेषु[23] । शत्रून्[24] जयति[25] । याचमानस्य[26] । स्तोतु ।
आह्वान च । शृणोति[27] । स रथम्[28] । यजमानस्य[29] । समीपे[30] । प्रभरति[31] । तस्य । स्तुतीश्च । उद्य-
च्छति[32] । यदि[33] । चेदिन्द्र[34] । स्वयमेव[35] । इह भवति[36] ।

---

१. अयं राजा राजमान ईश्वरो वा Sv.
२. अस्मदीयानि कर्माणि Sy.
३. सर्वतः Sy. ४. हिंस्यात् Sy
५. वृष्ट्याविरूपाणि Sy.
६. परस्परं स्वसृभूते स्वयंसरणभूते अहोरात्रे । नुः पूरणः Sy.
७. स्वकीये स्थाने Sy.
८. द्विवचनस्थाने बहुवचनम् । कुरुतः 'कृवि हिंसाकरणयोश्च' । ..तानीन्द्रोऽप्यनुजानात्वित्यर्थः । स्वसृभूतावध्वर्युयजमानौ वा कुरुतः । यद्वा स्वसारोऽङ्गुलयो योनौ फलोत्पादनस्थाने यज्ञे यानि कृतवन्तस्तानीति योज्यम् Sy.
९. ०भिर्वि M.
१०. व्यो P. ११. वसन्तीपरी० M.
१२. अप्कार्याणि हवींषि Sy.
१३. इन्द्राय Sy. अस्य प्रीतये or प्रीत्यै is suggested for अस्मै प्रीतये
१४. शोभनबलहेतूनि Sy.
१५. व्याप्नुवन्ति Sy.
१६. अस्मभ्यम् Sy. १७. गमयतु Sy.
१८. प्रभूतमन्न च Sy.
१९. VM. ignores च । नु
२०. सङ्ग्रामनेतृभिर्मरुद्भिः सहितः सन् Sy.
२१. इन्द्र M. अयमिन्द्रः Sy.
२२. विक्रान्तः सन् Sy.
२३. सङ्ग्रामेषु Sy. २४. शत्रुं M.
२५. जयशील. शत्रूणाम् Sy.
२६. त्वदनुग्रहं याचमानस्य Sy.
२७. श्रोता भवति Sy.
२८ हविर्वत्तवतो यजमानस्य Sy.
२९. समीपनामैतत् । समीप एव यागदेशे Sy.
३०. सम्यक् प्रभरन् भवति ... यदा स्तुतिं श्रोतुमिच्छति तदा स्वयमेव शीघ्रं रथं धावयित्वा यागं प्राप्नोतीत्यर्थः Sy.
३१. स्तुतिरूपाणि वचांसि स्तोतुन्वा Sy.
३२. उच्छ्रयिता Sy. ३३. यदा Sy.
३४. च P. ३५. इन्द्र P.
३६. ०मेवह P. आत्मना, अनन्यप्रेरित एव Sy.
३७. भवेत् Sy.

एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।
समर्य इषा स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥४॥

एवा[1] नृभिः[2]। एवम्। मरुद्भिः[3] सह। इन्द्रः[4]। शोभनस्य यशस इच्छया[5]। सोमलक्षणस्यान्नस्य[6]। प्रकर्षेण खादिता। मैत्री कुर्वतः[7] शत्रून्[8]। अभिभवति[9]। विविधवाचि[10]। सङ्ग्रामे। शत्रूणामेषणशील[11]. सन्[12]। वीरैः स्तूयते[13]। सत्यस्य कर्मण[14]. कर्ता। यजमानस्य[15]। शंसनीय[16]।

त्वया वयं मघवन्निन्द्र शत्रूननभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ॥५॥

त्वा[17] वयम्। त्वया[18]। वयम्। मघवन्[19]! इन्द्र! शत्रून्[20]। महत[21]। अभिमन्यमानान्। अभिभवेम[22]। त्व[23] रक्षक[24]। त्वम्। एव। अस्माकम्। वर्धनाय[25]। भव[26]।

I. 179.

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥१॥

पूर्वीः। शौनक —

---

१. M. adds अयं after एवम्। एवमेव पूर्वं यथा तथैव Sy.
२. कर्मनिर्वाहकैर्यजमानैर्वर्तमम् Sy.
३. अयमिन्द्रः Sy.
४. शोभनान्नेच्छया, अन्नेच्छुर्वा Sy.
५. हविर्लक्षणमन्नम् Sy.
६. सहायवतोऽपि यजमानस्य शत्रून् Sy
७. शत्रू P.
८. Omitted by P. यद्वा नृभिर्वृष्टिनेतृभिर्मरुद्भिः सहितोऽयमिन्द्रः सुश्रवस्या प्रख्यादः सन्नेवमेव मित्रिण ऋत्विग्रूपमित्रवतो यजमानस्यार्थे तवभिमतायाभि भूत्। अभीत्यनर्थकः। भवति। आभिमुख्येन वा भवति, तस्य हविः स्वीकृत्य तवभिमताय भवतीत्यर्थः Sy.
९. विविधवाचाची P. अथ तथाभूतः सन् विवाचि विविधपरस्परास्फालनध्वनियुक्ते Sy.
१०. विविधस्तोत्रशस्त्रध्वनियुक्ते समर्ये मर्त्ययुक्ते यज्ञे वा तन्निमित्तम् Sy.
११. शत्रुणाम् M.
१२. हविर्लक्षणमन्नं च Sy.
१३. स्तौति Sy.
१४. फलानां सत्यकारी Sy.
१५. शंसकः सन् Sy. १६. सहायेन Sy.
१७. यजमानाः Sy. १८. धनवन्! Sy.
१९. शत्रू P. २०. अतिबलान् Sy.
२१. अवज्ञान् मन्यमानान् Sy.
२२. अभिभवितारो भवेम Sy.
२३. त्वमेव Sy. २४. अस्माक रक्षकः Sy.
२५. ०ना D. धनादिवर्धनाय Sy.
२६. VM. ignores विद्याम etc.

ऋतुस्नातामृषिर्भार्यां लोपामुद्रां यशस्विनीम् ।
उपजल्पितुमारेभे रह सयोगकाम्यया ॥
ताभ्या सा त्वब्रवीदृग्भ्या पूर्वीरिति चिकीर्षत ।
रिरमुस्तामथागस्त्य उत्तराभ्यामतोषयत् ॥
विदित्वा तपसा सर्वं तयोर्भाव रिरसतो ।
उक्त्वैन कृतवानस्मि ब्रह्मचार्युत्तमे जगौ ॥

बह्वी । अहम् । शरद । तपसा श्रममाणा । रात्री । अहानि । उषसश्च । गमयन्त्य-भवम् । तत्र हस्तपादादीनाम् । शोभाम् । जरिमा । नाशयति । अपि । इदानीम् । पत्नी । पुमास । गच्छेरन्, इत्यृषिपत्न्या विलपितम् ।

ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि ।
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥२॥

ये चिद्धि । ये । चित् । हि । पुरातना । तप स्पृश । आसन् । साकम् । देवैश्च प्रत्यक्ष-

---

१. ऋतौ BD.
२. उपजाल्पितुमा० D.
३. तु ब्र० M.
४. श्रुत्वैनः BD.
५. ० र्युक्तमे M. ०र्यंत्तमे P
६. BD. IV. 57-59.
७. पुरातनान् Sy.
८. हे अगस्त्य ! अहं लोपामुद्रा Sy.
९. असङ्ख्यातान् संवत्सरान् Sy.
१०. अद्यतनकालपर्यन्त बहुसवत्सर कात्स्न्येन त्वच्छुश्रूषया . . . श्रान्ताभूवम् Sy.
११. उषःकालाश्च । सर्वत्रात्यन्तकालसयोगे द्वितीया Sy.
१२. तथा देहं जरयन्तीः Sy.
१३. ०वन् M.
१४. अङ्गानाम् Sy.
१५. शोभनां P. शोभा M. सौन्दर्यम् Sy.
१६. इदानीन्तु . . . जरा Sy.
१७. नशयति P. D. नशपति M. हिनस्ति । एवमपि नानुगृह्णासीत्यर्थः Sy.
१८ अपि सम्भावनायाम् । उ इत्यवधारणे । नु इति वितर्के Sy.
१९ इदनीः P. इदानीमपि किं सम्भावनीयम् Sy.
२० लोके हि . . . स्त्रियः Sy.
२१ सेक्तारः पुरुषाः Sy.
२२. छेरन् P. गच्छरन् M. गच्छेयुः सम्भोगं कुर्युः । अतो मा किमित्यवमन्यसे । इदानीमपि वा सम्भावयेत्यर्थः Sy. गच्छेयुः is suggested for गच्छेरन्
२३. ०षिः प० P. इत्यृषिरित्यृषिप० M.
२४ VM. ignores उ
२५. ये महत्तपो यज्ञ वाऽनुतिष्ठन्ति ये च देववाक्यानि देवस्मृतिरूपाणि वदन्ति Sy.
२६. अपि Sy. २७. तु Sy.
२८. तवस्पृ० M. सत्यस्थापयितारो व्याप्नुवाना महर्षयः Sy.
२९. साक P. सह Sy.

दृष्टैः। ब्रह्मवाद्यानि। अवदन्। ते। च। अवसिताः। नहि। अन्तम्। गतास्तपसा। तथा सति
पत्न्यः। पुम्भि। सङ्गच्छेरन्।

न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव।
जयावेदत्नं शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव ॥३॥

न मृषा श्रान्तम्। न। व्यर्थम्। तप। यस्मात्। रक्षन्ति। देवा, आवा पुत्रानुत्पाद्य।
सर्वान्। एव। शत्रून्। अभिभवेव। जयाव। एव च। अस्मिन्तपसि। बहुनयप्रकारम्। सङ्-
ग्रामम्। यदा। अभिमुखौ। मिथुनीभूतौ। स्वाभिमुख्येनाभ्यजाव।

नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित्।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥४॥

नदस्य मा। स्तोतुर्ऋषे। मम। निरुन्धानस्येन्द्रियम्। काम। आगमत्। इत। आगत।

---

१. ब्रह्मवद्यानि is suggested for ब्रह्मवाद्यानि। सत्यवाक्यानि Sy.
२. वदन्ति Sy.
३ व P. D. चिदप्यर्थे Sy.
४ अवक्षिपन्ति रेतः। स्यतिरुपसृष्टो विमोचने वर्तते Sy.
५. ब्रह्मचर्यविरन्तम् Sy.
६. प्राप्नुवन्। ब्रह्मचर्यमनिधिद्धर्तुकालगमनमपि कुर्वन्तोत्यर्थः Sy.
७. पत्न्यश्च तपस्यमानाः (तपस्यन्त्य) Sy.
८. भोगवर्षकैः पतिभिः सह Sy.
९. उ नु इति पूरणौ। सङ्गच्छेरन्। अतस्त्वं कथं मां नानुभवसीत्यर्थः Sy.
१०. VM. ignores उ। नु
११. भो पत्नि! त्वया मया च न मृषा श्रान्तं, व्यर्थं नैव Sy.
१२. तमः M. खिन्नभावाभ्याम् Sy.
१३. तपोभिः प्रीता देवाः Sy.
१४. ० नुत्पा० P.
१५. सर्वाः Sy.
१६. अपि P.
१७ ०भवाव M. अभितो व्याप्नुयाव Sy.
१८. यजाप M. जयलक्षणं सुरतसङ्ग्रामं वा जयाव Sy.
१९ अस्मिन्संसारे Sy.
२० अपरिमितभोगप्राप्तिसाधनम् Sy.
२१. प्राप्ति परस्परम् Sy.
२२ यस्मात् Sy.
२३ सम्यक् परस्परं गच्छन्तौ प्रजयन्तौ वा Sy.
२४. मिथुनौ स्त्रीपुरुषरूपौ सन्तौ Sy.
२५. ०भ्जाव M. त्वं चाहमपि परस्परमभिजयावेत्येव तयोक्तं सम्भोगं सम्भावयामास Sy.
२६ स्तोतः M. हे जाये नदस्य नदनस्य जपशब्दयितुर्जपाध्ययनकर्तुः Sy.
२७. उक्तलक्षण माम् Sy.
२८. निरुन्धानमस्येन्द्रिय M. रेतोनिरोद्धुर्ब्रह्मचर्यमास्थितस्य। उभे कर्मणि षष्ठ्यौ Sy.
२९. त्वत्सङ्गमनिमित्तात् Sy.
३०. सर्वत उत्पन्नः। यद्वा। इत एतल्लोकजनितादमुतो लोकान्तरजनिताद्वा कुतश्चिन्निमित्तात्कामात् Sy.

अमुतो वा। अज्ञाताद् देशात्, इत इत्यात्मनो निर्देशः, अमुत इति पत्न्याः। लोपामुद्रा। भर्तारम्। आकर्षति। घृष्टम्। अघृष्टा। पिबति। श्वसन्तम्।

इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥५॥

इमं नु। इमम्। सोमम्। इदानीमान्तात्। यावदवकाश जठरेषु। पीतम्। पररहस्यदर्शन-प्रायश्चित्तार्थं स्तौमि। यत्। सर्वतो वयम्। पापम्। चकृम। तत्र। अस्मान् पापविनाशनेन

---

१. वसन्तादिकालात् Sy.
२. कुतश्चित्कारणात् Sy.
३. दृशात P.
४. आइ० M.
५. इयं लोपामुद्रा Sy.
६. रेतसः प्रवर्तकं माम् Sy.
७. ०न्ती P. नितरां गच्छतु Sy.
८. धीमन्तं नियमादविचलितम् Sy.
९. कातरैषा योषित् Sy.
१०. उपभुङ्क्ताम् Sy.
११. इचस० M.
महाप्राणं महाबलम् Sy.
१२. ऋषिर्नंदो भवति। नदतेः स्तुतिकर्मणः। ... नदनस्य मा रुधतः काम आगमत्। संरुद्धप्रजननस्य ब्रह्मचारिणः। इत्यृषि-पुत्र्या विलपितं वेदयन्ते N.5.2.
VM. ignores निः
१३. M. adds नु after इमम्। अहमन्ते-वासी नु क्षिप्रमेतत्सम्भाषणप्रणवा (श्र-वणा) नन्तरमेव Sy. अगस्त्यलोपा-मुद्राब्रह्मचारिसंवादे ब्रह्मचारिणः—इमं नु पदपूरण एवार्थे वा। इममेव सो-मम् SKN. अगस्त्यलोपामुद्रासंवादेऽन्ते-वासी ब्रह्मचारी, इमां सौमीं बृहती-मपश्यत्—इममह सोमम् Dur.
१४ अन्तिके सन्निकृष्टे स्थितमिति शेषः SKN. अन्तिकेऽवस्थितम् Dur. मन्तिकात् is suggested for मान्तात्
१५. हृदयेषु, आश्मी (त्मी) येषु Sy. कथम-सावन्तिकस्थ इत्याह ... हृदये SKN. स्व एव हृदयेऽवस्थितमुपब्रुवे Dur.
१६ स्वीकृतं सोमम् Sy.
पीतं सन्तम् SKN.
नच बहिरन्तिकेऽवस्थितमुपब्रुवे किन्त-हि, पीत सन्तम् Dur.
१७. ०त्तास्तम् P.
१८. उपेत्य मनसा प्राप्य प्रार्थयते (र्थये) Sy. उपगम्य मनसा ब्रवीमि SKN. उपगम्य चेतसा ब्रुवे Dur.
१९ किमुच्यते ? ... सर्वतः सर्वप्रकारम् SKN., Dur.
२०. गुर्वोः कामप्रलापश्रवणविषयपापम् Sy. पापम् SKN., Dur.
२१ कृतवन्तो वयम् Sy., Dur. कृतवन्तो वयं बुद्धिपूर्वमबुद्धिपूर्वं वा SKN.
२२. चकृतमत्रा० M. तस्मादागसः स सोमः Sy. तवयं सोमः Dur.

सोमः सुखयतु। बहुकामः। हि। मनुष्यः पररहस्यानि चावशः पश्यति।

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥६॥

अगस्त्यः। वानप्रस्थविधिनाऽगस्त्यो मूलादानार्थम्। खनित्रैः। पृथिवी खनमानो गृहस्थवत्। प्रजादिक च। इच्छन्। उभौ। इमावाकारौ। अयमपि। उग्रः। पुपोष। आयुराशास्त इत्यादिकाश्चाऽऽशिष। देवेषु। यथार्था। प्राप्तवान्।

---

१. सु सम्यङ् मृळतु सुखयतु। पापजनितदुःखं मा करोत्वित्यर्थः Sy. 'मृळ सुखने' सुष्ठु सुखं करोतु, नाशयतु बन्धम्। विपाकं (पं) करोत्वित्यर्थः SKN. सुमृळतु सुष्ठु सुखविधिपरिणामं करोतु Dur.

२. बहुकामनावान्। अल्पेनैव कर्मणा बहुकामानाकलयति। यस्मादेव तस्मात्परिहरेदित्यर्थः। यद्वा पापमवर्जनीयतया प्राप्यत इत्याह पुरुकामो हि खलु मर्त्यः कामहतः सन् कामेन निरुद्ध एव वर्तते। अतस्तयोक्तस्तेकोऽयुक्तः। तच्छब्दश्रवणदोषोऽपि प्रामादिकः, अस्माकं प्राप्तेन सोमेन परिहर्तव्य इत्यर्थः। यद्वाऽयं मन्त्रश्चन्द्रपरो व्याख्येयो मनसोऽभिमानित्वाच्च तस्य पापस्यापि मनस्येव सम्भावितत्वात्। अस्मिन्पक्षे हृत्सु पीतं हृदयस्थितमित्यर्थः। शिष्ट स्पष्टम् Sy. यस्माद् बहुकामो मनुष्यः। तं च काम पापेनावष्टब्धो न शक्नोति प्राप्तुमिति SKN. बहुकामो हि मर्त्यः Dur. पुलुकामः पुरुकामः N.6.4.

३. महत्पापमनुभुज्य(भूय)मानं प्रार्थनया कथं लुप्यत इत्यत आह हि यस्मात् Sy. तस्मादेवमुच्यते ... हिशब्दो यस्मादर्थे SKN. किं कारणम्? इतो यस्मात् Dur.

४. स बहुकामत्वान्मनुष्यस्वाभाव्यादवश्यमागः करोति। तदयं पीतः सोमः शमयत्वित्यभिप्रायः Dur.

५ VM. ignores नु। सु N.6.4.; SKN. II. 399.

६. अयमगस्त्यो मद्गुरुः Sy.

७. मूलानार्थं P.

८. फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः Sy.

९. फलमभिमतमुत्पादयन् Sy.

१०. प्रजां प्रकर्षेण पुनः पुनर्जायमानमपत्यं कुलस्यापतनसाधनं पुत्रादिकं बलञ्च Sy.

११. ऐच्छन् D. इच्छमानः सन्। यद्वा प्रजां भृत्यादिरूपां चेच्छन् Sy.

१२ M. reads चेन्नु भाविमालाकारौ for च। इच्छन्। उभाविमौ। आकारौ। वर्णनीयावाकारौ कामं च तपश्च Sy.

१३ अतीन्द्रियद्रष्टा महानुभावः Sy.

१४. उद्गूर्णः संसारे सञ्चरन्नपापः सन् Sy.

१५. ०स्त ... शिषे M.

१६. देवेभ्यः Sy. १७. यतोऽयं महानुभावस्तस्मादस्मान्यातीत्यर्थः Sy.

Ms. D. puts the figure ॥१७९॥ here to indicate the end of one hundred and seventyninth hymn. No such number is given in P. and M.

I.180.

युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।
हिरण्यया वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥१॥

युवो रजांसि। अश्विनौ ! युवयो[1]। यदा। रथ[1]। उदकानि[2]। परित.। सञ्चरति[3]। तदानी तांस्तांल्लोकान्[4]। सुयमा.[5]। अश्वाश्च[6] सञ्चरन्ति। तथा हिरण्मया[7]। पानसाधनभूताः[8] पात्र्यो मधुपूर्णाः[9]। युवयोरथ[10]। उज्ज्वलन्ति[11]। युवा मधुसदृश[12] सोमम्[13]। पिबन्तौ[14]। उषसः[15]। सेवेथे[16]।

युवमत्यस्यावं नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।
स्वसा यद्वां विश्वगूर्ती भरात्ति वाजायेट्टे मधुपाविषे च ॥२॥

युवमत्यस्य। युवम्[17]। अननशीलस्यादित्यस्य[18]। अधस्तात्[19]। व्याप्नुथो[20] गच्छथ। विविध-पतनस्य[21]। नृहितस्य। प्रकर्षेण यष्टव्यस्यादित्यस्य[22]। स्वसोषा[23]। यदा। वाम्[24]। विश्वैराहूयमानौ

---

१. The passage beginning with अश्विनौ and ending with रथः is missing in M.
२. अरणीयानभिमतदेशान् Sy.
३. परिगच्छेत् परितो गच्छति वा ।.. दीयतिर्गतिकर्मा। 'दीयति तकति' (Ngh.2.14.) इति तत्कर्मसु पाठात् Sy.
४. तदेत्यर्थः Sy.
५. रञ्जकांल्लोकान् Sy.
६. शोभननियमनाः । लोकत्रयसञ्चारिण इत्यर्थः Sy.
७. रथवोढारः Sy.
८. वक्त्रा रथनेमयो वा Sy.
९. ०भूता...पा० M.
१०. यद्वा हिरण्ययानि पवयो मधुपात्राणि वां युवाभ्यामर्थाय Sy.
११. रथागमनकाले वां युवयोः Sy.
१२. उज्व० P.D. प्रुष्णन्त्यभिमतम् Sy.
१३. यस्मादेवं तस्माद्युवाम् Sy.
१४. मधुनो मधुसदृशस्य Sy.
१५. सोमरसस्य । कर्मणि षष्ठी । रसमोसम् Sy.
१६. आस्वादयन्तौ Sy.
१७. उषःसम्बन्धिनि काले Sy.
१८. यज्ञं सङ्गच्छेथे । अत्र क्रमो न विवक्षितः । उषःकाल एवागत्य मधुरं सोमरस पिबतमित्यर्थः Sy.
१९. VM. ignores वाम्
२०. युवाम् Sy.
२१. सततसञ्चारिणः Sy.
२२. अवस्तात्तदुदयात्पूर्वम् Sy.
२३. ०प्नुतो M. व्याप्नुथो देवयजनं गन्तुम् Sy.
२४. विविधगमनस्य विचित्रगमनस्य वा Sy.
२५. मनुष्याणां हितस्य Sy.
२६. प्रकर्षेण पूज्यस्य । एतानि कर्मणि षष्ठ्यन्तानि । उक्तरूपं रथम् Sy.
२७. स्वसृस्थानीया स्वयंसारिणी वोषाः Sy.
२८. युवयोः Sy.
२९. सर्वस्तुत्यौ सर्ववोढ्गूर्णौ वा Sy.

पृथिवी प्रति भरति। यदा च वा बलाय च। अन्नाय। च। सोमपौ! स्तौति।

युवं पयं उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः।
अन्तर्यद्वनिनो वामृतप्वे ह्वारो न शुचिर्यजते हविष्मान् ॥३॥

युवं पयः। युवम्। पय। गवि। अधत्तम्। पक्वम्। आमायाम्। ऊधःप्रदेशे। बहु। गो, पुरातन वा तस्यास्तदिद शयवे कृतम्। यदा। हे सत्यरूपौ! वाम्। वनिन=वृक्षस्य। अन्त=अरण्यमध्ये। स्तेन। इव छन्न। शुचि शयुर्नामापि। यजते स्म। हविष्मान्, अभिशस्यमानः स्तेनोऽरण्ये यजते।

युवं ह धर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे।
तद्वां नरावश्विना पश्वइष्टौ रथ्येव चक्रा प्रति यन्ति मध्वः ॥४॥

युवं ह। युवम्। खलु। दीप्तमग्निम्। उदकवन्तम्। अत्रयेऽसुरैरग्नौ प्रक्षिप्ताय।

---

१. पोषते(ति) त्वदागमनाय प्रभातं करोति Sy. २. गमनाय वा Sy.
३. प्रभूताय Sy.
४. मधुरस्य सोमरसस्य पातारौ युवाम् Sy.
५ यजमानः...स्तौति तदा रथं प्राप्नुथ इत्यर्थः Sy.
६ VM. ignores यत्
७. हे अश्विनौ...युवाम् Sy. ८. गव्यं P गोनामैतत्। भोगोत्साविण्यां गवि Sy.
९. धत्तम् P. अधारयतं स्थापितवन्तौ Sy.
१०. परिपक्वं भोगयोग्यम् Sy.
११. अपक्वायाम् Sy.
१२. अवस्तादधारयतम्। गवि क्षीरमुत्पाद्य पुनर्भोगाय पृथक्कृतवन्तावित्यर्थः Sy.
१३. पूर्वभवं तत्रैवोत्पन्नम् Sy.
१४. गोः सम्बन्धि वृग्धम् Sy.
१५. तस्याः is omitted by P.
१६. कृत P. D.
१७. यदा P. D. यस्मात् Sy.
१८. सत्यस्वरूपौ यज्ञियहविर्भक्षयितारौ वा हे अश्विनौ Sy. १९. ०ने P. D.
२०. उदकवत उदकोपलक्षितहविष्मतो यज्ञस्य Sy. २१. मध्ये Sy.
२२. तत्र दृष्टान्तः। वनिनो वनसम्बन्धिवृक्षसमूहस्यान्तर्मध्ये ह्वारो न चोर इव। स यथा जागरूको वर्तते तथा यजमानोऽपीत्यर्थः Sy.
२३. शुद्धो यजमानः Sy.
२४. पूजयति युवां तस्मादेवमकुरुतम्। यद्वा यदैव यजमानः करोति तदेत्यर्थः Sy.
२५. ष्म P.D. २६. प्रदेयहविषा तद्वान् Sy.
२७. अत्रेतिहासमाहुः। प्रवर्ग्येण प्रचरन्तमत्रिं राक्षसास्तप्ते घर्मेऽपातयन्। स च तप्यमानोऽश्विनौ तुष्टाव। तौ च स्तुत्या हृष्टमनसावरक्षतामिति। अपरे, अग्नौ क्षिप्तमपालयतामित्याहुरिति Sy.
२८. हे अश्विनौ...युवाम् Sy.
२९. दीप्तं प्रवर्ग्यम् Sy.
३०. पयोघृतरूपाभ्यां मधुभ्यां तद्वन्तम् Sy.
३१. अत्रये M. एतन्नाम्ने महर्षये Sy.

उदकानि। तटः[1]। इव। अवारयेथाम्[2]। वामिच्छते[3], अस्मिन्नाश्चर्ये[4] कृते सति। नेतारौ[5]! अश्विनौ! देवैर्वाम्[6]। पशोर्यागः[7] कल्पितः। तथा तदानीं रथ्यायाम्[8]। चक्राणि[9]। इव। सोमाश्च मधुसदृशाः[10]। प्रतियन्ति[11]।

आ वां दानाय वृतीय दस्रा गोरोहेण तौग्र्यो न जिह्वेः।
अपः क्षोणी संचते माहिना वां जूर्णो वामच्छुरंहसो यजत्रा ॥५॥

आ वां दानाय। आवर्तयामि[12]। वाम्[13]। दानाय[14]। दर्शनीयौ[15]! यथा। उदकस्य। ओघेन समुद्रमध्ये च म्रियमाण[16]। भुज्युर्वामाजुहाव। जीर्ण[17]। अन्तरिक्षम्[18]। द्यावापृथिव्यौ[19] च।

---

१. तदः P.D. क्षोदांसि क्षोद्यमानानि Sy.
२. अपारं यथा M. अवारयतम्। औष्ण्यं शैत्यसुखं कृतवन्तौ। तप्तघर्मसकाशाद् भ(र) क्षितवन्तावित्यर्थः। यद्वा। अत्रये क्षोदः। उदकनामैतत्। तत्स्थं शैत्यं लक्ष्यते। अपः क्षोदो न। अप इति षष्ठ्यर्थे द्वितीया। उदकानां शैत्यं यथा भवति तद्वत्। पक्षान्तरे तु घर्मं दीप्तमग्निं मधुमन्तं कृत्वाऽवृणीत सुखयतमित्यर्थः। तथा च मन्त्रान्तरम्—'तप्तं घर्ममो-ष्यावन्तमत्रये' (RV. I. 112.7.) इति Sy. ३. सौख्यमिच्छते Sy.
४. यस्मादेवं तस्मात् Sy. तस्मिन्ना० is suggested for अस्मिन्ना०
५. नराकारौ वा Sy.
६. ०र्वां P. युवाभ्याम् Sv.
७. पशुरित्यग्नेर्नाम। 'अग्निः पशुरासीत्' (TS.5.7.26.1.) इत्यादिश्रुतेः। यद्वा पशुप्रियत्वात्पशुरित्युच्यते। तस्याग्ने-रिष्टिर्भवति। अग्नौ यागः सर्वो युष्मदर्थं प्रवर्तत इत्यर्थः। यद्वा। पशुसाध्यो यागो युवाभ्यां प्रवर्तत इति शेषः। 'आश्विनं बभ्रुललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' (TS.2.1.10.1.) इत्या-दिमाप्यश्विभ्यां पशुर्विहितः Sy.
८. रथ्यानां P. ९. तत्र दृष्टान्तः। रथ्येव चक्रा रथसम्बन्धीनि चक्रा चक्राणीव। तानि यथा प्रवणदेशमभिगच्छन्ति तद्वत् Sy. १०. मधुसदृशा. सोमरसा अपि Sy.
११ युवाभ्याम् (युवाम्) प्रति यन्ति, अभि-गच्छन्ति Sy. १२ आवर्तयामि यागदे-शम्। वृतेरन्तर्भावितण्यर्थस्येव रूपम् Sy.
१३ युवयोः Sy. १४ अस्मदभिमताय युवा-भ्यां वाहयितुम् Sy. १५. शत्रूणामुपक्ष-पयितारावश्विनौ Sy. १६. केन साधने-नेति तदुच्यते। गोः स्तुतिरूपाया वाचः Sy. १७. वहनेन साधनेन। यद्वा। आवर्तनकाल उच्यते। गोर्गन्त्र्या उषसो वहनेन Sy. १८. ०ध्येऽपह्नियः M.
१९ तुग्राख्यस्य राज्ञः पुत्रो भुज्युरिव। स यथा शत्रुभिः सन्ताड्य समुद्रे पातितो युवां परितोष्य स्वोद्धाराय स्वसमीपमानयत तद्वदित्यर्थः। इयमाख्यायिका 'तुग्रो ह भुज्युम्' (RV. I. 116 3), 'भुज्यु-महंमः पिपृथः' (RV. X 65.12), 'नासत्या भुज्युम्' (RV I. 116 4) इत्यादिषु प्रसिद्धा च। किमाश्चर्यमह-मावर्तयामीति Sy.
२०. जीर्णा M. जीर्णो जयशीलो वा Sy.
२१. अप इत्यन्तरिक्षनाम (Ngh. 1.3.)
२२. 'क्षोणीति पृथिवीनाम (Ngh.1.1.) द्यावापृथिव्यावपि Sy.

सेवते[1]। महत्त्वेन[2]। युवयो रथः। तथा यष्टव्यौ[3]! वाम्। सम्भक्तुमिच्छन्[4]। अवर्ते[5]. ?। जीर्णो[6] भवति।

नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम्।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥६॥

नि यद्युवेथे। हे शोभनदानौ[7]! यदा वर्षार्थम्[8]। नियुत.=वायोरश्वा[9]। युवा निमिश्रयथः[10]। तदानीमग्नौ[11]। उपसृजथ। पृथिवी बहुनो दात्रीम्[12]। प्रीणयति[13] च। व्याप्नोति[14] च वाम्। वात[15]। इव। स्तोत्रैः स्तोता[16]। अथ महत्त्वाय। आदत्ते[17] च। भवद्दत्तमन्न चादत्ते। सुकर्मा[18]। इव कर्षक।

वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान्।
अधा चिद्धि ष्माश्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम् ॥७॥

वयं चिद्धि[19]। वयम्। अपि। वाम्। स्तोतार[20]। सत्यवचना.[21]। स्तुम[22]। युवयोर्हि स्तोता[23]।

---

१. सेवते प्रत्येकम्। यद्वा वां माहिना यजमानो द्यावापृथिव्यौ सचते Sy.
२. माहात्म्येन युवयो. प्रसादेन सर्वोपकारिण्याविति ख्याति सर्वप्रदेशव्यापित्व वा Sy.
३. ०क्तुञ्छन् P. अक्षुश्चिरकालव्याप्तो दीर्घजीवी भूयात्। यद्वा हे यजत्रा वा प्रसादाज्जूर्णो जीर्णो यजमानोऽहसो दुरितस्य हन्त्रीरप उक्तलक्षणानि सोमरसरूपाण्युदकानि क्षोणी क्षोण्याम्। सप्तम्यर्थे प्रगृह्यम्। भूम्यां चिरकालमक्षुर्व्याप्त· सन् माहिना माहात्म्येन सचते। द्वितीयो वामित्ययमादरार्थः Sy.
४. अवर्ते P. अवत्ते M. अंहसः पापाज्जरालक्षणात्प्रमुच्य Sy.
५. (युवयोः) प्रसादादयमृषिर्जूर्णो जरया जीर्णाङ्गः सन् Sy.
६. अश्विनौ! Sy.
७. ०त्थि P.
८. अश्वान् Sy.
९. निमश्र० M. नियुञ्जाथे। नियोजयथः। ताभिरस्मद्यज्ञागमनाय सयुक्तौ भवथः Sy.
१०. तदा Sy.
११. तत्कारणैरुदकैर्वा Sy.
१२. बहुना धात्रीम् Sy.
१३. तर्पयतु Sy.
१४. व्याप्नोतु। कामयता वा Sy.
१५. वायुरिव तद्वत्क्षिप्रम् Sy.
१६. एव च मति सूरिः स्तोता, अयं यजमानः Sy.
१७. स्वीकरोति। . . . अद्वा . . . स्वीकृत्य स्वमहत्त्वाय युवामेव तर्पयत्वित्यर्थः Sy.
१८. अतिप्रशस्तोष्मादिकर्मवानिव Sy.
१९. हि is omitted by M.
२०. तव स्तोतारः Sy.
२१. सत्यफलाः सन्तः Sy.
२२. विविधं स्तुमः Sy.
२३. पणाधारो द्रोणकलशः Sy.

हितयुक्तो भवति। अथ। अश्विनौ! अनिन्द्यौ! रक्षथः। वर्षितारौ! अन्तिकस्थवेवं स्तोतारम्।

युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ।
अगस्त्यो नरां नृषु प्रशस्तः कारांधुनीव चितयत्सहस्रैः ॥८॥

युवां चित्। हे अश्विनौ! युवाम्। दिवसेषु। अशन्या दीप्तिरहितत्वाद् विगतरुद्रभावस्य। वर्षस्य। सम्भजनार्थम्। अगस्त्य। मनुष्याणाम्। नेतृषु देवेषु। प्रशस्यमान स्तौति। यथा। शङ्खस्य ध्माता रौपुराश ऋषि। स्तोत्रसहस्रै। अचेतयत् तद्वच्च चेतयति।

प्र यद्वहेथे महिना रथस्य प्र स्यन्द्रा याथो मनुषो न होता।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥९॥

प्र यद्वहेथे। रथस्य। महत्त्वेन। यदा। युवा प्राप्नुथ। तदा स्यन्दनशीलौ! प्रयाथश्च।

---

१. स्थापितरसवानासीत्। यद्वा पणिर्वणिग्लुब्धकोऽयष्टा हितवान्नियतधनो धनाढ्योऽप्ययष्टा वि वियुज्यताम्। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः Sy.
२. अपि च। विद् हि ष्म एते त्रयः पूरणा Sy
३. प्रशस्यनामैतत्। हे प्रशस्यौ! Sy.
४. सोमं पिबथः। यद्वा। अन्तिके वर्तमानं देवान्प्राप्नुवानं सोममिति योज्यम् Sy.
५. हे कामानां वर्षितारौ! युवाम् Sy
६. ०कास्य० M. देवानामन्तिके Sy.
७. VM. ignores हि। वि। चित्। हि। स्म। हि। स्म
८. M. adds हि after चित्।
९. चिद्धि स्म इति त्रयः पूरणाः। अनुद्यून् प्रतिदिनम् Sy. १०. अनन्या M
११. विशिष्टोष्णरूपदुःखद्रावणस्य विविधरोक्यमाणद्रवणवतो वा Sy.
१२. वृष्टयुदकसंस्त्यायस्य Sy.
१३. लाभे निमित्तभूते सति Sy.
१४. एतन्नामा महर्षिः Sy.
१५ मनुष्यान् P D नेतृणां कर्मनिर्वाहकाणां मनुष्याणाम् Sy.
१६. येषु तादृशा मनुष्याः सन्ति तेषु Sy.
१७ प्रशस्ततरोऽयम् Sy.
१८. चेतयति। स्तुत्या प्रबोधयति Sy.
१९ तत्र दृष्टान्तः... काराशब्दः। तस्य धूनयितोत्पादयिता शङ्खादिः स इव। यद्वा। एतदप्यगस्त्यविशेषणम्। कारः शब्दयिता होत्रादिस्तस्य धुनिः कम्पयिता प्रेरक इव। इवेति सम्प्रत्यर्थे Sy. अस्त्युपमार्थस्य सम्प्रत्यर्थे प्रयोगः N.7.31.
२०. पुरां M. २१. अपरिमितैः स्तोत्रैः Sy.
२२. VM. ignores चित्। हि। स्म
२३. गमनसाधनस्य Sy. २४. यस्मात् Sy.
२५ ०थ P. धारयथो यज्ञम्। यद्वा। रथस्य स्वर्गगमनसाधनस्य यागस्य धुरं वहथः Sy. २६. स्यन्दनशीलौ युवाम् Sy.
२७. प्रयात्यश्च P. प्रयात्यश्च D.M. गच्छथः स्वस्थानं यज्ञारम्भ आगच्छथो यज्ञसमाप्तौ पुनर्गच्छथश्च Sy.

यथा। मनुष्यस्य[1]। होता[2] यज्ञादावागतो यज्ञान्ते गच्छति। दत्तम्[3]। स्तोतृभ्यः[4]। अपि। च। शोभ-
नाश्वसख्यम्[5]। नासत्यौ[6]! धनस्य[7] सम्भक्तारः[8]। वयं स्याम[9]।

तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम्।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् ॥१०॥

तं वां रथम्। तम्। युवयो[10]। रथम्। वयम्[11]। इदानीम्[12]। आह्वयामः[13]। स्तोमैः[14]।
अश्विनौ[15]! अभ्युदयाय[16]। स्तोतव्यम्[17]। अक्षतचक्रधारम्[18]। परिगच्छन्तम्[19]। द्याम्[20]।

I.181.

कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम्।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥१॥

कदु प्रेष्ठौ[21]। कदा[22]। खलु स कालो भवति। प्रियतमौ युवाम्[23]। अन्नानाम्[24]। रयीणां[25] चार्थम्।
अध्वरमिच्छन्तौ[26]। यदा[27] युवाम्। अपामिति कर्मणि षष्ठी[28], अप[29]। उन्निनीथ[30]। अयम्[31]। युवयो[32]।

---

१. ०ष्य M. तत्र वृष्टान्तः। ... मनुष्यस्य यजमानस्य Sy.
२. यथा यज्ञप्रारम्भ आगच्छति कर्मणि निवृत्ते पुनरपगच्छति तद्वत् Sy.
३. दत्त P. धारयतं फलम् Sy.
४. आगमनसमये सूरिभ्यः स्तोतृभ्यः Sy.
५. ०संख्यम् P. ०नाश्च संख्य D. ०नाश्च-सख्यं M. शोभनाश्वसमूहं धत्तम् Sy.
६. सत्सु भवौ सत्यौ। न असत्यौ नासत्यौ हे तादृशौ! Sy.
७. त्वदनुग्रहात् ... धनसमवायिनः Sy.
८. स्यामः M. भवेम Sy.
९. VM. ignores प्र
१०. युवयोः सम्बन्धिनं शीघ्रगमनेन स्तुत्यम् Sy. ११. अगस्त्याः Sy. १२. अस्मिन्स्तुत्येऽहनि Sy. १३. आह्वयेम Sy.
१४. केन साधनेनेत्युच्यते ... स्तोत्रैः Sy.
१५. किमर्थम्? ... सुष्ठु प्राप्तये Sy.
१६. कीदृशम्? नव्यं स्तुत्यं नूतनं वा Sy.
१७. अहिंसितचक्रवलयम् Sy.
१८. परितो गच्छन्तम् Sy.
१९. द्यावात् M. द्युलोकस्य Sy.
२०. VM ignores विद्याम etc. Ms. D. puts the figure ॥१८०॥ here to indicate the end of one hundred and eighteth hymn No such number is given in P. and M.
२१. प्रेष्टा M.
२२. तदा M. कदा भविष्यति Sy.
२३. प्रियतमौ वां युवाम् Sy.
२४ इष्यमाणानामन्नानाम् Sy.
२५. धनानाम्। कर्मणि षष्ठयौ। अन्नानि धनानि च। उन्निनीथ ऊर्ध्वं प्रापयथः Sy.
२६. अध्वरं पारयितुमिच्छन्तौ युवाम् Sy.
२७. तदा M. २८. अपामपामिव M.
२९. वृष्टयुदकानां वृष्टयुदकानि च Sy.
३०. उत्कृष्टमधः प्रापयथः। इति यत्तत् कदा Sy. ३१. अस्माभिरनुष्ठीयमानः Sy.
३२. युवयोरेव Sy.

यज्ञः[1]। प्रशस्तिम्[2]। अकृत[3]। धनानां दातारौ[4]! रक्षितारौ[5]! जनानाम्।

आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥२॥

आ वामश्वासः[6]। वाम्, एवविधा युवयो[7]। अश्वा[8]। इह। आवहन्तु[9]। उदकस्य रक्षितार[10]:[11]। वातवेगा[12]। दिवि भवा[13]। अतनशीला[14]। मनोवेगा[15]। वर्षितार[16]:[17]। कान्तपृष्ठाः[18]। प्रभव[19]।

आ वां रथोऽवनिर्न प्रवत्वान्त्सुप्रवंन्धुरः सुवितायं गम्याः।
वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या यः ॥३॥

आ वां रथः[20]। युवयो। रथ। पृथिवी[21]। इव। विस्तीर्णविकाश। प्रसृप्तफलकासङ्घाट[22]। अभ्युदयाय[23]। गच्छतु[24]। हे मेघस्याधिष्ठातारौ[25]! मनसोऽपि[26]। वेगवान्[27]। युवयोर्गमनावसरेऽह्न पूर्वं[28] इत्युपतिष्ठन्[29]। यष्टव्य[30]। यो भवति[31]। स्तुत्यौ[32]!

---

१. यज्ञम् Sy.
२. प्रशंसां स्तुतिम् Sy.
३. करोति। यज्ञे शंसनीयानि शस्त्राणि युवामेव प्रशंसन्तीत्यर्थः Sy.
४. यस्मादेवं तस्माद् हे वसुधिती वसुनो धनस्य धातारौ वस्तव्यकर्माणौ Sy.
५. हे जनानामवितारावुक्तलक्षणौ युवा कदाऽज्ञानां धनानां च दातारौ भवथ इति Sy.
६. एवि० P.D. शोभनाश्वयुक्तौ वां युवां Sy. ७. युष्मदीयाः Sy.
८. अस्मिन्यज्ञे Sy.
९. प्रापयन्तु Sy.
१०. अवशिष्टान्यश्वविशेषणानि। कीदृशास्ते शुचय. शुद्धाः दीप्ता वा। पयस्पा वृष्टयुदकस्य पातारः Sy.
११. ०रौ P. १२. वायुवेगाः Sy.
१३. अनशीलाः P.
१४. मनोजवाः Sy.
१५. वर्षका युवान इत्यर्थः Sy.
१६ वपुष्मन्त इत्यर्थः Sy
१७ स्वयमेव राजमानाः। ईदृशा भवन्तु Sy.
१८. VM. ignores शुचयः। अश्विना।
१९. पूर्वमन्त्रेऽश्वव्याजेनाश्विनोरागमनमुक्तम्। अनेन रथव्याजेनोच्यते Sy.
२०. भूमिरिव Sy.
२१. अत्यन्तविस्तारवान् Sy.
२२ ०टे M. विस्तीर्णपुरोभागः Sy.
२३. शोभनफलाय Sy.
२४. अस्मद्यज्ञमागच्छतु। पुरुषव्ययः Sy.
२५. वर्षकस्याश्वस्य Sy.
२६. स्वरथाधिष्ठानौ! Sy.
२७. मनोवेगवानित्यर्थः Sy.
२८. अहङ्कारपूर्वो मनस्वी वाऽभ्युदारः Sy.
२९. ०तिन् P. D. उपतिष्ठमानः is suggested for उपतिष्ठन्
३०. ईदृशो रथ आगच्छतु Sy.
३१. अस्ति सः Sy.
३२. उद्यतस्थानार्हौ Sy.
३३. VM. ignores आ

इहेहं जाता समवावशीतामरेपसा तन्वा नामभिः स्वैः ।
जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे ॥४॥

इहेह । अत्रात्र । प्रादुर्भूतौ । सह कामयेताम् । पापेनालिप्यमानया । तन्वा । नामभिश्च । स्वैः=दक्षा अश्विनावित्यादिभि । जयशील ।

१. उभाभ्यामिहशब्दाभ्यां मध्यमोत्तमस्थाने उच्येते । तयोः Sy. इहेहेति वीप्सादिर्वचनेनान्तरिक्षं द्यौश्च निर्दिश्यते । इह चान्तरिक्ष इह च विवि SKN इह च मध्यस्थान इह च द्युस्थाने Dur.

२. सम्भूतौ । चन्द्रसूर्यरूपेणेति यावत् Sy. जातौ भवन्तौ SKN.
सूर्याचन्द्रमसावित्येके N 12 1.

३ सम्यग्वा Sy सम्यगत्यर्थम् SKN

४ अका० M पुनः पुनः स्तूयेथे कामयेथां वा यज्ञम् । पुरुषव्यत्ययः Sy. पुनः पुनर्वाञ्छते (शस्येते) स्तूयेते इत्यर्थ. SKN संस्तूयेथे Dur. कामयेथाम् is suggested for कामयेताम्

५. अपापौ । आथर्वणस्य गुरोः शिरश्छेदनादिना पापलेपरहितावित्ति भाव Sy. रेपः पापम्, अपापया SKN. अपापया Dur

६. शरीरेण शरीरसौन्दर्येण निमित्तेन Sy. अपापेन स्वेन शरीरेण SKN. यथासङ्कल्पं कृतया Dur.

७. स्वीयैर्माहात्म्यविशिष्टैः Sy. परमनाश्रित्य यानि स्वस्तुतिनिमित्तानि तैः Dur

८. वद्गौ M.

९. इतादिभिः M. अश्विनौ नासत्यावित्यादिभिरपि । रमणीयशरीरवत्त्वान्महिमोपेतनामवत्त्वाच्च हेतोः संस्तूयेथे इत्यर्थः । यद्वा । अरेपसा तन्वेति योज्यम् । उक्तप्रकारेण गुरुशिरश्छेदावप्यपापेन शरीरेण तादृङ्महत्त्वख्यापनेनेति यावत् Sy. अश्विनौ नासत्यौ दक्षादित्येवमादिभिश्च SKN.

१०. ०लौ M किञ्च वां युवयोरन्य एको मध्यमस्यान्तरिक्षस्य पुत्रस्थानीयः सोमो जिष्णुर्जयशीलः सुमखस्य शोभनयज्ञस्य सूरिः प्रेरयिता सन्, ऊहे वहति विश्वं जगद्धारयति, चन्द्रात्मनस्तस्योदये सति ह्योषधिवनस्पत्यादयो वर्धन्ते । अन्योऽपर उत्तमस्थानो दिवो द्युलोकस्य पुत्रः पुत्रस्थानीय आदित्यः सुभगः शोभनरश्मिरूपधनः, ऊहे वहति । कृत्स्नमेवं पृथग् जगन्निर्वाहको महानुभावौ युवां सह स्तूयेथे Sy. जिष्णुर्जयशीलो वां युवयोरन्य एको मध्यमः सुमखस्य सुमहतोऽपि शत्रुबलस्य, सूरिः सुष्ठ्वीरयिता, दिवोऽन्यः ... अन्यस्तु सुभग. सुधन उत्तमः पुत्रः । ऊहे कर्मणि प्रथमपुरुषैकवचनस्य स्थाने व्यत्ययेन कर्तर्युत्तमैकवचनमेतत् । ऊह्यते वितर्तेः साहचर्यात् । अथवा वहेरेतद्रूपम् । ऊह्यते रथेन स्वैरश्वैर्वायुना वोढव्यास्तमयाय SKN नित्यमेव जेता युवयोरन्यः ... सुमहतो बलस्येरयिता शत्रुषु, स च नान्यो मध्यस्थानाविति मध्यमो मध्यस्थानः... . सुभगः सुधनः, ऊह ऊह्यते वायुनाऽऽदित्यो नित्यम् । स च नान्यः सूर्यादित्येवमत्रापि मध्यमोत्तमाविति Dur. इह चेह च जातौ संस्तूयेथे । पापेनालिप्यमानया तन्वा । नामभिश्च स्वैः । जिष्णुर्वामन्यः । सुमहतो बलस्येरयिता मध्यमः । दिवोऽन्यः सुभगः पुत्र ऊह्यत आदित्यः N.12.3; SKN. IV. 99

११. VM. ignores वाम् । अन्यः etc.

प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।
हरी अन्यस्य पीपयन्त वाजैर्मध्ना रजांस्यश्विना वि घोषैः ॥५॥

प्र वां निचेरुः । युवाम् । लोकान् व्यथितारौ भवथ. । गर्जितशब्दैः । वायुघोषैश्च ।

प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।
एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥६॥

प्र वां शरद्वान् । युवयो । विशरणवान् । वृषभ । इव । पर्वतादीनामभिभविता वायुः । यज्ञमुखे स्थितानि । अन्नानि । प्रचरति । मादकं सोमम् । इच्छन् । अथाऽऽदित्यस्य ।

---

१. हे अश्विना अश्विनौ वां युवयोर्मध्येऽन्यस्यैकस्य ककुहः श्रेष्ठः पिशङ्गरूपो हिरण्यरूपः पीतवर्णो वा बहुभिरक्षाद्यवयवैर्निरूप्यमाणो वा रथो वशान्, अनु कामाननुलक्ष्य यथाकामम् । अस्मद्यज्ञागमनेच्छयेत्यर्थः । यद्वा । वशान्स्वाधीनाः ककुहो दिशो दिगन्तरालानुक्रमेण नीचैरुच्चैश्चरन् स्वस्थानाद्देवयजनमुखं गच्छन् । सदनान्यस्मद्यागगृहाणि । प्र गम्याः प्रकर्षेण गच्छतु । पुरुषव्यत्ययः । अत्र यद्यप्यन्यस्येति नोक्तं तथाप्युत्तरवाक्ये तथोक्तत्वादत्रापि लभ्यते । अन्यस्य युवयोरन्यतमस्य, हरी अश्वौ Sy.

२. युवा (मन्नानां रयीणाञ्चार्थमध्वरमिच्छन्तौ) लोकान् P. रजांसि लोकाः । अत्र लोकशब्दो जनवाचकः । ते यजमानरूपा जना इत्यर्थः । ते च Sy.

३. ०यथिता० D. प्रमथनेनालोडनेन निष्पादितैः Sy.

४. भवेथः P.

५. अग्नेरामिक्षादिरूपैः Sy.

६. स्तुतिभिश्चाह्वानादिशब्दविशिष्टैर्वा पीपयन्त आप्याययन्ति Sy.

७. VM. ignores प्र । निचेरुः । etc.

८. हे अश्विनौ युवयोरन्यतमो मध्यमस्थानः Sy.

९. शरणवान् मेघवृक्षपर्णादीनां विशरणवान् । अथवा बहुसंवत्सरः पूर्वतनो नित्य इत्यर्थः Sy.

१०. वर्षितेवेन्द्रः स इव Sy.

११. शत्रूणाम् Sy.

१२. निस्सारयिता सन् Sy.

१३. ०मुखेऽस्ति तानि M. बह्वीः पुरातनीर्वा Sy.

१४. सस्यादीन्युद्दिश्य Sy.

१५. प्रकर्षेण गच्छति । मध्यमस्थानश्चन्द्र इति पक्षे शरद्वाञ्छरत्कालवान् । तस्मिन्नृतौ हि चन्द्रः प्रसन्नो भवति, तेन च तृणगुल्मौषध्यादीनि वर्धन्ते Sy

१६. स किमर्थमेवं करोतीत्युच्यते । . . . मधुनो मधुसदृशस्य हविषः । कर्मणि षष्ठी Sy.

१७. हविरिच्छन् । तदर्थमेवं करोति Sy.

१८. उत्तमादित्यस्य Sy.

गमनशीलैः[1]। तत्प्रेरितैरग्नैः[2]। मनुष्या वर्धन्ते[3]। प्राप्नुवत्य[4]। दिवि स्थिताः[5]। नदनशीला आपः[6]। युवयो. प्रसादादस्मान्[7]। आगच्छन्तु[8]।

असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरन्ती ।
उपस्तुताववतं नाधमानं यामन्नयामञ्छृणुतं हवं मे ॥७॥

असर्जि[9]। सृष्टा[10]। युवयो[11]। वृद्धा[12]। स्तोत्रा मया[13]। स्तुति.[14]। बाधे सञ्जाते[15]। अश्विनौ! त्रेधा[16]। क्षरन्ती[17], उच्चनीचमध्यमैस्त्रिप्रकारत्व त्रैस्वर्येण क्षरन्ती[18]। मया, उपस्तुतौ युवाम्[19]। याचमानम्[20]। रक्षतम्[21]। गमने च[22]। आगमने च[23]। शृणुतम्[24]। स्तोत्रम्[25]। मे।

उत स्या वां रुशंतो वप्ससो गीस्त्रिबर्हिषि सदंसि पिन्वते नृन् ।
वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥८॥

उत स्या वाम्[26]। अपिच। एषा। युवयो.। उज्ज्वलस्य[27]। रूपस्य[28]। स्तुति.[29]। त्रिभिर्बर्हिषो[30] बर्हिभि स्तीर्णायाम्[31]। वेद्याम्[32]। आप्याययति[33]। मनुष्यान्[34]। वर्षिता[35]। युवयो. सम्बन्धी[36]।

---

१. कामैर्गमनैर्वा निमित्तभूतैः Sy.
२. हविर्भिः Sy.
३. यजमानाः Sy.
४. आप्याययन्ति Sy.
५. तुष्टेन तेन प्रेरिता वेधन्तीर्व्याप्नुवन्तीः (न्त्यः) Sy.
६ उन्नता उत्तीराः Sy.
७. नदन्नशी० M. नद्यो न नदनशीला यथा Sy. ८. अस्मदर्थम् Sy.
९. आ is omitted by P. आगच्छन्ति Sy. १०. सृज्यते Sy.
११. कीदृशी सा। स्थविरा, अत्यन्तस्थिरा नित्या वेदमयी Sy.
१२. वेधसा विधातारौ Sy.
१३. ०ति P. D. M. स्तुतिरूपा वाक् Sy.
१४. वृद्धे स्थैर्ये निमित्तभूते सति Sy.
१५. ०ने M.
१६. मन्त्राद्विभेदेन त्रिप्रकारा Sy.
१७. ०न्ति M. युवां गच्छन्ती। ईदृशी स्तुतिः कृतेत्यर्थः Sy.
१८ ०र्य० P. १९. रक्षन्ति P.
२०. ०वा P. उपस्तुतौ सन्तौ Sy.
२१. अभिमतफलं याचमानम् Sy.
२२. तर्पयतं वा Sy.
२३. वा M.
२४. ग० P.
२५. वा M. २६. आह्वानम् Sy.
२७. उज्व० P. D. दीप्तस्य Sy.
२८. रूपस्यैव वपुषो वा ख्यापयित्री Sy.
२९. ०ति P. स्तुतिवाक् Sy.
३०. त्रिधान्वास्तीर्णबर्हिष्के Sy.
३१. बघो P. D. ०र्हिषो M.
३२ यागसदने Sy.
३३. आयति P. D. आप्याययतु वोचितप्रदानादिना Sy.
३४. कर्मनेतृनस्मान् Sy.
३५. वर्षकः सन् Sy.
३६. ०न्धि P. युवयोः स्वभूतः Sy.

मेघः[1]। हे वर्षितारौ[2]! प्याययति[3]। बहुक्षीराया गोः[4]। इवोषः[5]। पृथिव्याः सेके[6]। मनुष्यान्[7]। अन्नानि प्रयच्छन्[8]।

युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हुविष्मान्[9]।
हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम् ॥१॥

युवां पूषेव[10]। विश्वस्य धर्ता[11]। पूषेव[12]। युवा भवथ[13]। तथा वां यजमान[14]। अग्निम्[15]। उषसञ्च। न। स्तौति[16]। यस्मात्[17]। अहमाह्वयामि[18]। परिचर्यया सह[19]। स्तुवन् भवामि[20]। ततो विद्यामेति[21]।

I.182.

अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः।
धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥१॥

अभूविदम्[22]। उषस्यपामभूत्[23]। इदम्[24]। प्रज्ञानम्[25]। हे मनुष्या मत्समीपे सुष्ठु वा।

---

१. सेक्ता जलदः प्रदानविशेषो वा Sy
२. मेघः। हे वर्षितारौ is missing in M. वर्षितारौ कामानाम् Sy
३. आप्याययति Sy.
४. आप्यायने वृष्टान्तः। गोर्न सेक उदकसेक इव शान्तनात् सेक उदकस्येव। तद्यथाऽऽप्याययति तद्वत्यर्थः। यद्वा नेति सम्प्रत्यर्थे। गोरुदकस्य सेके निमित्तभूते सति पीपायेति सम्बन्धः Sy.
५. मनुष्येभ्यः is suggested for मनुष्यान्
६. The passage beginning with ऊधः and ending with प्रयच्छन् is missing in M.
७. हे अश्विनौ युवां पुरन्धिर्बहुप्रज्ञः Sy.
८. The passage beginning with युवां and ending with पूषेव is omitted by M. पोषक इव Sy. ९. भवतः M.
१०. हविर्युक्तः Sy. ११. अग्निमुषसं च यथा तथा युवामपि। प्रातरनुवाकाश्विनशस्त्रयोराश्विनकतुवदाग्नेयोस्तयोरपि सद्भावादिति भावः Sy.
१२ The passage beginning with यजमानः and ending with स्तौति is missing in M. यद्वा पुरन्धिर्बहूना धारयित्री पूषेव पृथिवीव। द्वितीयार्थे प्रथमा। ता यथा स्तौति तद्वत्। Sy. १३. यदा Sy.
१४ वरिवस्यया परिचर्यया युक्तः Sy.
१५. स्तोता स्तौति तदा यजमानोऽपि जरत इत्यर्थः Sy. १६. तो P. D.
१७. विद्येति P. D. १८. VM. ignores अश्विना। वाम्। विद्याम etc. Ms. D. puts the figure ॥१८१॥ here to indicate the end of one hundred and eightyfirst hymn. No such number is given in P. and M.
१९. कृण्वस्य वाम् M. ०स्यवाम् P.
२०. उत्पन्नम् Sy.
२१. अस्माकमिदम् Sy.

भवत[1]। अश्विनोरय[2] वर्षणवान्[3]। रथ[4] आजगाम। स्तुत[5]। हे मनीषिण.[6]! कर्मणां[7] तर्पयितारौ। स्तोतव्यौ[8]। विश्पलाछिन्नजङ्घाक्षभ्या[9] वासिता?[10] दिव[11]। पुत्रौ[12]। शोभनकर्मण[13]। शोभनकर्माणौ[14]।

इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा।
पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना ॥२॥

इन्द्रतमा[15]। ईश्वरतमौ[16]। हि[17]। स्तोतव्यौ[18]। गन्तृतमौ[19]। दर्शनीयौ[20]। अतिशयेन[21] रथं[22] नेतारौ[23]। मधुपूर्णम्[24]। रथम्[25]। वहेथे[26]। मधुन[27]। आचितम्[28]। शिष्ट स्पष्टम्।

---

१. तत्स्थावश्विनौ ... ओ इति निपातद्वयसमुदायात्मक एको निपात. । सुष्ठ्वाभूषत, अभिमुखा भवत स्तोतुम् Sy.
२. अश्विनोः सम्बन्धी Sy.
३. अभिमतवर्षणवान् Sy.
४ गमनसाधनो रथः Sy.
५. आगत इति शेष. Sv.
६ अस्तु P स्तु D स्तुहे M तादृशौ महानुभावावश्विनौ मदत। अन्तर्भावितण्यर्थोऽयम्। मदयत सम्भावयत Sy.
७. मनस्विनौ मेधाविन ऋत्विज Sy.
८ ०र्मणः M. अश्विनौ विशेष्येते। सुकृते सुष्ठु कृतवते मह्यम् ... कर्मणो बुद्धेर्वा प्रीणयितारौ Sy.
९ धिषणार्हौ स्तुत्यौ Sy.
१० विशां प्रजानामस्माकं पालयितृधनौ, विश्पलाख्यायाश्छिन्नजङ्घाया हिरण्मयजङ्घाप्रदानेन तथाभूतौ 'सद्यो जङ्घामायसीं विश्पलायै' (RV. I 116. 15) इत्यादिनिगमः Sy.
११ विभृलाहिनजङ्घाक्षभ्यां पासीता M.
१२. आदित्यस्य Sy.
१३. नप्तारौ नपातयितारौ वा Sy.
१४. Omitted by P.D.
दीप्तकर्मणावीदृशावश्विनौ मदत Sy.
१५. VM ignores ओ
१६ ०मो M हे अश्विनौ युवाम् ... ईश्वरतमौ Sy.
१७ खलु। एवं प्रतिविशेषणं हिः सम्बन्ध्यः Sv
१८ स्तुत्यर्हौ Sy
१९ मरुद्वद्वेगगामिनौ। मितरागिणौ मितराविणौ वा Sy
२० उपक्षपयितारौ शत्रूणाम् Sy.
२१. अतिशयकर्माणौ Sy.
२२ रथार्हौ रथवन्तौ। रथीतमा रथिनो नेतारस्तेषा श्रेष्ठौ, 'रथीरध्वराणाम्' (RV VIII 11 2) इति नेतृपरतया व्याख्यातत्वात्। ईदृशौ युवाम् Sy.
२३ ०थने० M.
२४ पूर्णं पूरितम् Sy
२५ हवेथे P. नयथः। तेनोक्तगुणविशिष्टेन रथेन हे अश्विना अश्विनावुक्तगुणविशिष्टौ सन्तौ उप याथो यज्ञमभिप्राप्नुथ. Sy.
२६. मधुसदृशस्योदकस्यामृतस्य वा Sy.
२७ सर्वतः सन्नद्धं रथम् Sy.
२८. VM. ignores दंसिष्ठा। रथ्या। तेन। दाश्वांसम्। etc.

किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते ।
अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे ॥३॥

किमत्र[1] दस्रा[2]। किम्। अस्मिन्नहोतरि[3]। कृणुथः। कि च तस्मिन्। आसाथे[4]। जनः[5]। य। कः। चित्। अहोता। भवद्भ्या गमनेन पूज्यते[6]। तस्मात् तमतिक्रमिष्टम्[7]। हिंसतं च[8]। तस्यासुरस्य[9]। प्राणम्[10]। ज्योति[11]। विप्राय[12]। कृणुतम्[13]। स्तुतिमिच्छते[14]।

जम्भयंतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यंश्विना ।
वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥४॥

जम्भयतम्[15]। अश्विनौ! अभित। शब्दयत[16]। शुन[17]। जम्भयो कुरुतम्[18]। हत च। सङ्ग्रामस्य[19] कर्तॄन् हिंसकान्[20]। एवञ्जातीयकानि। कर्तुं जानीथ[21]। स्नोतु[22]। सर्वां वाचम्[23]। रत्नवतीम्[24]। कृतम्[25]। उभौ सहितौ। मम[26]। आशसनम्[27]। रक्षतम्[28]।

---

१. हे दस्रा उपक्षपयितारौ युवाम् Sy
२. अस्मिन्मनुष्ये Sy
३. कुरुथः । हविषोऽभावादिति भावः Sy
४. आशयाथे P. आशाथे D.M. तत्रैव . किं तिष्ठथः Sy.
५. जन्मवान् Sy.
६. यज्ञार्थहवीरहित Sy.
७. पूज्यते स्वयं न युष्मान् पूजयति Sy.
८. जनम् Sy.
९. ०ष्टा P. पराभूय तिष्ठतम् Sy.
१०. अहिंसिष्टम् । अनीनशतम् Sy.
११. मस्य P.
१२. न केवलमतिक्रममात्रं किन्तु पणेर्वणिग्भूतस्य लुब्धकस्यायष्टुस्तस्य Sy.
१३. ०ण D.
१४. युष्मद्यजनविषयज्ञानम् Sy.
१५. विद्राय P. मेधाविने Sy.
१६. कृतम् Sy.
१७. वचसः स्तोत्रकर्मणः युवाभ्यामिच्छते मह्यम् Sy.
१८. VM. ignores दस्रा
१९ निन्दितं शब्दयतोऽस्मान्हन्तुमागच्छतो वा Sy.
२०. इवसदृशान् Sy.
२१. ०योव M. नाशयतम् Sy.
२२. मारयतम् Sy.
२३. तेषां सङ्ग्रामान् सङ्ग्रामं कुर्वतो वा Sy.
२४ अभवज्जाती ० M. तानि हननोपायान् Sy.
२५. युष्मान् स्तोतुः Sy.
२६. तां तां स्तुतिलक्षणां वाचम् Sy.
२७. सर्वामपि स्तुतिं रमणीयफलवतीम् Sy.
२८. कुरुतम् Sy.
२९. मवम् P. हे नासत्या सत्यभूतौ युवाम् ... मम भवीयाम् Sy.
३०. स्तुतिम् Sy.
३१. VM. ignores नासत्या

युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम् ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥५॥

युवमेतम् । युवाम् । एतम् । कृतवन्तौ । उदकेषु । प्लवसाधनम् । युष्मदीयम् । पक्षयुक्तम् । तुग्रपुत्राय । येन प्लवेन । देवान् युवाम् । मनसा । प्रत्युद्वहथु, युवामपि तेन प्लवेन । सुपतने । महतः । उदकात् । यज्ञम्प्रति पेतथु ।

अवविद्धं तौग्र्यमप्स्वन्तरनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ॥६॥

अवविद्धम् । अपाम् । मध्ये । पित्राऽपविद्धम् । तुग्रपुत्रम् । अनालम्भने । अन्धकारे । समुद्रमध्ये प्रक्षिप्तम् । चतस्र । नाव । जठरस्य । पर्याप्ता विस्तीर्णोदरा । अश्विभ्याम् ।

---

१. युवा० D. तौग्र्यो भुज्यू राजा समुद्रवर्ती ससेनः परचक्रं प्रमथितुं प्रस्थितः। तं प्रतीपबलान्यागत्यापातयन्। स च प्रसादफलकरावश्विनौ स्तुत्वा स्वात्मानं ररक्षेत्ययमितिहासो बहुधा पूर्वं प्रपञ्चितः Sy.
२. ०त P.
३. कं सुखकरं चक्रथुः। ... यद्वा कमिति पूरणः। तस्य जलसञ्चारिरथस्य सहायभूतान् बहून् रथादीनकुरुतमित्यर्थः Sy. अयमर्थस्तु 'तमूहथुर्नौभिः' (RV.I. 116.3.), 'चतस्रो नावः' (RV.I. 182.6.), 'त्रिभी रथैः' (RV.I.116. 4.) इत्यादिमन्त्रान्तरेषु प्रसिद्धः
४. समुद्रोदकेषु Sy.
५. प्रसिद्धं प्लुतिसाधनं प्लवं नावम् Sy.
६. आत्मन्वन्तं वाहर्षवन्तम् Sy.
७. पक्षवद्गतिसाधनरथवन्तम् Sy.
८. तु उ० M. तुग्रनाम्नो राज्ञः पुत्राय भुज्युनाम्ने राज्ञे Sy.
९. प्लवने M. युष्मद्दत्तेन प्लवेन Sy.
१०. देवेषु मध्ये Sy.
११. M. adds प्रजं after मनसा। अनुग्रहयुक्तया बुद्धया । येन मनसेति वा योज्यम् Sy.
१२. ०थु D. निर्गमनं कुरुथः Sy.
१३. शोभनपतनं यथा भवति सुपतनौ वा युवाम् Sy. सुपतनौ is suggested for सुपतने
१४ उदकनामैतत् Sy.
१५. यज्ज P.
१६. पेदथुः P. तदधः पतथ उत्तरीतुम् Sy.
१७. VM. ignores कम्
१८. अपवि० P. D. M.
१९. अवपि शुद्ध M. अवस्ताच्छत्रुभिः पातितम् Sy.
२०. तु उग्र० M. भुज्युम् Sy.
२१. अनालम्बन आलम्बनरहिते Sy.
२२. तमोवत्तमः । दृष्टिश्वासादिप्रतिबन्धके जलमध्ये Sy.
२३. प्रकर्षेण पीडितम् Sy.
२४. जठरवदुदकधारकस्य मध्ये Sy.
२५. जुष्टाः सेविताः । यद्वा । कर्मणि षष्ठी । जठरं प्राप्ताः । अन्तर्जलं प्रविष्टाः Sy.

प्रेषिता[1]। समुद्रमध्यादुत्पारयन्ति[2]।

कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत्।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम् ॥७॥

कः[3] स्विद् वृक्षः[4]। उदकस्य। मध्ये[5]। क[6] स[7]। वृक्ष[8]। निष्ठित[9]। य वृक्षम्। भुज्यु[10]। अश्विनौ स्तुवन्[11]। परिष्वक्तवानिति नावमभिप्रेत्याह[12]। अवसन्न स भुज्युस्तदानीमेव यस्या नाव. पर्णानि[13]। आरब्धवान्[14]। शीघ्र गच्छन्[15]। मृगस्येव लोमानि[16]। तमथ, अश्विनौ[17] उदूहथु[18]। श्रोमत-कुलजाताय[19] पित्रे[20]।

तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन्।
अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥८॥

तद्वां नरा। हे नेतारौ[21] नासत्यौ[22] तत्[23]। युवयो[24]। सन्निधाने[25]। भवतु[26]। यत्। स्तोत्रम्[27]। वाम्[28]। कुम्भभवा[29]। उक्तवन्त[30]। यदद्य[31]। सोमार्हात्[32]। यज्ञादुत्थित तद्वा

---

१ ० ता D. अश्विभ्यामिषिता. Sy.
२. उत्पा० P. उत्तारयन्ति प्रापयन्ति Sy
३ क P. D. M.
४. कश्चिदनुग्राहकः Sy.
५. वृक्षविकारो रथः। विकारे प्रकृतिशब्द'। यद्वा। सस्तवाभिप्रायमेतत्। स्तोत्राख्यो वृक्ष इत्यर्थः Sy.
६. कीदृशो रथः ?... निश्चल वर्तमान' Sy.
७. ०क्ष M.
८. तुग्रपुत्रो भुज्युः Sy
९. स्तुन्वन् P. D. M याचमान Sy.
१०. परिष्वक्तमकरोत् Sy
११. पर्णानीव, तानि यथाऽऽलम्बनाय प्रभवन्ति तद्वत् Sy.
१२. आलम्बनाय Sy.
१३. आलम्बने दृष्टान्त'। पतरोः पतनशीलस्य Sy.
१४. मार्जयितुः शोधयितुर्हिंसादेः Sy.
१५. ०थु P. उद् ऊहथुरूर्ध्वं प्रापयथ.। स्तुतिपक्षे स्तोत्राख्य वृक्षमाश्रितवन्तं तमूहथुरित्यर्थ Sy.
१६. श्रोत्रमथकूल० M. कीर्तिमत्त्वाय Sy.
१७ VM. ignores स्वित्। कम्
१८ नेतारौ कर्मणो नराकारौ वा Sy.
१९ असत्यरहितौ सत्यफलौ वा Sy.
२०. तादृशं स्तोत्रम् Sy.
२१. युवाम् Sy.
२२ अनुकूलं भवतु, अनुभवतु वा वाम् Sy.
२३ वां प्रति Sy.
२४. पूजावन्तोऽस्मदीया होत्रादयः Sy.
२५. अकुर्वंस्तद् वामनु ष्यात् Sy.
२६. हे अश्विनौ, अद्यास्मिन् प्रधानयागदिने Sy.
२७. ०हूत् P. अस्माद्, अस्माभिः क्रियमाणात्... सोमयागसम्पादकात् Sy.
२८. यज्ञानत् P. सदसः सम्बन्धिनः Sy.

मनुष्यादिति ।

I.183.

तं युञ्जाथां मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस्त्रिचक्रः ।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥१॥

तं युञ्जाथाम्[1]। त रथम्[2]। युञ्जाथाम्[3]। मनसोऽपि[4]। य.[5]। जववान्[6]। त्रिफलकास-ड्घाट.[7]। वर्षिनारी[8]। त्रिचक्र[9]। येन[10]। उपगच्छथ[11]। यजमानगृहम्[12]। तेन त्रिफलकेन[13]। यज्ञेषु पतथ.[14]। पक्षी[15]। इव[16]। पर्णै[17]।

सुवृद्रथो वर्तते यन्नभि त्वां यत्तिष्ठथः क्रतुमन्तानु पृक्षे ।
वपुर्वपुष्या संचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥२॥

सुवृद्रथः[18]। सुवर्तन[19]। रथ[20]। वर्तते[21]। गच्छन्[22]। पृथिवीम्[23]। प्रति[24]। यदा[25]। कर्मवन्तौ[26] युवाम्[27]।

---

१. ०ष्यादि M. आ इत्यप्यर्थे । अस्माभिर्यजमानैरद्य क्रियमाणादपि स्तोत्रात् प्रीणयतमिति Sy.

२. VM. ignores अस्मात् and आ etc.
Ms. D. puts the figure ॥१८२॥ here to indicate the end of one hundred and eightysecond hymn. No such number is given in P. and M.

३. वक्ष्यमाणगुणविशिष्टम् Sy.

४. ०थाः M. योजयतम् Sy.

५. ०वि M.

६. रथः Sy. ७. जवत्तः M.

८. त्रिप्रकारसारथिस्थानः । बन्धुर रथिनः स्थानमित्याहुः । 'आ याह्या वाङुप बन्धुरेष्ठाः' (RV. 3.43.1.) इत्यादिमन्त्रान्तरात् Sy.

९. वर्षकौ कामानां युवाम् Sy.

१०. चक्रत्रितयोपेत. Sy.

११. रथेन Sy.

१२. शोभनसोमाख्यकर्मवतो यजमानस्य दुरोणम्, गृहनामैतत् । यागगृहम् Sy.

१३. त्रिप्रकारस्थानोपेतेन सुवर्णरजतताम्रधातुत्रयोपेतेन वा रथेन Sy.

१४. ०कोनषूपतमः M.
पतथो गच्छथः Sy.

१५. गमने दृष्टान्तः ।...पक्षी पक्षौर्यथा शीघ्रमप्रयत्नेन गच्छति तद्वदुक्तलक्षणेन रथेन Sy.

१६. पर्णः D. वर्णः M.

१७. VM. ignores यः

१८. शोभनवर्तनः शोभनचक्रपरिभ्रमणः Sy.

१९. हे अश्विनौ युवयो रथ. Sy.

२०. गच्छति Sy.

२१. देवयजनभूमिम् Sy.

२२. यं रथम् Sy.

२३. कर्मन्तौ M. सङ्कल्पवन्तौ कर्मवन्तौ वा Sy.

तमधितिष्ठथ.[1]। अन्नाय[2]। अनुर्लक्षणे[3]। युवयोर्वपुः[4]। वपुषे योग्या[5]। इयम्[6]। स्तुतिः[7]। सेवताम्। युवां दिव[8]। दुहित्रा[9]। उषसा[10] सह प्रादुर्भवन्त्या। सचेथे[11] यजमानम्।

आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान्।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥३॥

आ तिष्ठतम्[12]। आतिष्ठनम्। शोभनावर्तम्[13]। य[14]। वाम्[15]। रथ। कर्माणि[16]। अनुवर्तते ते? यजमानदत्तैर्हविर्भिस्तद्वान्[17]। येन[18]। नासत्यौ[19]! अन्न[20] कर्तुम्[21]। मार्गम्[22]। याथः[23]। पुत्राय[24]। पित्रे[25]। च[26]।

मा वां वृको मा वृकीरा दधर्न्मा परि वर्क्तमुत मातिं धक्तम्।
अयं वां भागो निहित इयं गीर्दस्राविमे वां निधयो मधूनाम् ॥४॥

मा वां वृकः[27]। मत्समीप गच्छन्तौ वृको[28] वृकी[28] च, आदित्यश्चोषाश्च[29]। मा। अभूदथवा[30]

---

१. आश्रयथः। तादृशो रथो देवयजन प्रत्यागत इत्यर्थः Sy.
२. अन्ननामैतत्। हविषि निमित्तभूते सति Sy.
३. अनु अधीत्यर्थे Sy.
४. Omitted by P. D.
५. ०षो P. युष्मद्वपुषि हिता शरीरवर्धनी Sy.
६. इदानीं क्रियमाणप्रकारा Sy.
७. स्तुतिरूपा वाक् Sy.
८. द्युलोकस्याऽऽदित्यस्य वा Sy.
९. दुहितृस्थानीयया Sy.
१०. उषोदेवतया Sy.
११. सचेते M. यज्ञं सङ्गच्छेथे। उषस्याश्विनयोः समानकालत्वादिति भावः Sy.
१२. आश्रयतम् Sy.
१३. शोभनावस्तनम् M. शोभनवर्तनं रथम् Sy.
१४. ये P.D.
१५. युवाम् Sy.
१६. कर्मणि P.D.
१७. ०त्ते M.
१८. षष्ठ्यर्थे प्रथमा। हविष्मतो यजमानस्य। ...यद्वा यजमानाय दत्तहविषा तद्वान् Sy.
१९. रथेन Sy.
२०. हे नरा नेतारौ वा हे नासत्या असत्यरहितौ युवाम् Sy.
२१. यज्ञ प्राप्तुमिच्छन्नमिति शेषः Sy.
२२. मार्गा P. तेन रथेन वर्तिः गृहनामैतत्। यजमानस्य यज्ञगृहम् Sy.
२३. यथा M.
२४. पुत्रलाभाय Sy.
२५. आत्मन आत्महिताय च Sy.
२६. VM. ignores नरा
२७. ०कौ D. वां युवयोरनुग्रहादिति शेषः। वृको हिंसकोऽरण्यश्वादिः Sy.
२८. वृक्यो हिंसिका अन्या अपि Sy.
२९. ०षा M.
३०. वचनव्यत्ययः। धर्षणं मा कार्षुः। युवामेव वा मा दधर्षीदिति वा योज्यम् Sy. अभिभूताम् is suggested for अभूत

लौकिकावेव वृकौ। तथा सति मा। अस्मान् परिवर्जयतम्। मा। च। अतीत्य अस्मान्, अन्यस्मै दत्तम्। अयम्। युवयोः। भागः। निहितः। इयं च। युवयोः स्तुतिः। हे दर्शनीयौ! इमे। वाम्। सोमानाम्। पात्राणि।

युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान्।
दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योपं यातम् ॥५॥

युवा गोतमः। हे दस्रौ! गोतम। यजमान। रक्षणार्थम्। युवामेव। हवते। तथा पुरुमीळ्हः। अत्रिश्च। तौ युवाम्, उपदिष्टाम्। दिशम्। इव। अकुटिलेन मार्गेण। सारथिः। मदीयम्। आह्वानम्। उपागच्छतम्।

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥

अतारिष्म। रात्रिकृतस्य। तमसः। पारम्। वयमतारिष्म, व्युष्टा रात्रिरित्यर्थः। तथा

---

१. माम् Sy.
२. परितो मा वर्जयतम् Sy.
३. अपि च Sy.
४. अतिक्रम्य Sy.
५. युवयोरर्थाय Sy.
६. भजनीयो हविरंशः Sy.
७. स्तुतिरूपा वागपि निहितेति शेषः Sy.
८. शत्रूणामुपक्षपयितारावश्विनौ! Sy.
९. इमानि is suggested for इमे। इमानि Sy.
१०. युवाभ्याम् Sy.
११. सोमरसानाम् Sy.
१२. निधानानि स्थापितानि Sy.
१३. VM. ignores वाम्
१४. ० वा P.
१५. रक्षणाय युष्मत्तर्पणाय वा Sy.
१६. आह्वयति। एवमहमप्याह्वयामि Sy.
१७. वृकमी० P.
१८. महर्षयश्च, एतेष्वेकैको हविष्मान् सन् Sy.
१९ फलमाधनाह्वाने दृष्टान्तः...गन्तव्यामभिमतां दिशम्प्रति यथा तथा वामपि। यथाऽध्वगामी स्वगन्तव्यस्य शीघ्रगमनाय मार्गज्ञमृजुगामिनमाह्वयति तद्वत्। यद्वा। ऋजूयेव। इवशब्द एवार्थे। गन्ता ऋजुनैव मार्गेणेष्टा दिशमिव तथा युष्मत्प्रीणनेन मार्गेण स्वाभिमतं फलं प्राप्नोति Sy.
२०. कु० P.D. द्वितीयाया आकारः। ऋजुगामिनं मार्गज्ञम् Sy.
२१. ०थि P.M. उपगन्ता, उपगन्तुकामः Sy. २२. मम Sy.
२३. ०नाम् P. आह्वानमालक्ष्य Sy.
२४. उपगच्छतम् Sy.
२५. VM. ignores नासत्या
२६. तमनहेतोः श्रेयःप्रतिबन्धरूपस्य दुःखस्य Sy. २७. पर्यन्तभूमिम् Sy.
२८. ० यं करिष्म M. उत्तीर्णाः स्मः Sy.

युवयोः[1]। स्तोमः[2]। काले[3] प्रत्यधायि[4]। ततः, आयातम्[5]। इह[6]। पथिभिः[7]। देवयानैः[8]।

व्याख्यत्पौत्रश्चिन्तयन्त्यास्तुरीयं माधवाह्वयः[9]।
अध्याय वेङ्कटसुतो द्वितीयाष्टकगोचरम्[10]॥[11]

अथ द्वितीयेऽष्टके पञ्चमोऽध्यायः[12]।

"ता वामद्य[13] तावंपूर्वं[14]" व्याचिख्यासति माधवः।
लोटः प्रदर्शयन् वृत्तिं लेटश्च[15] तदनन्तरम्॥

लोट्लेटावपि[16] विध्यादौ स्मृतौ यत्र लिङा विधिः।
"अजीतं[17] परि[18] वृङ्धि[19] नो[20]" विधिराशीश्च याचनम्॥

"नाहमतो[21] निर्यं[22]" ति लोटः सर्वे विधायकाः।
वचनव्यक्तिभेदस्तु वाक्यसंयोगतः कृतः॥

"समुच्चयेऽन्यतरस्याम्"[23]स्योदाहरणं विदुः।
"प्रेह्यभीहि[24] धृष्णुहि[25]"ति शत्रुष्वित्थं करोति सः॥

---

१. युवयोः प्रसादात् Sy.
२. ० म M. स्तोत्रम् Sy.
३. अकारीत्यर्थः Sy.
४. युवाम्...आगच्छतम् Sy.
५. अस्मद्यज्ञे Sy. ६. मार्गैः Sy.
७. देवगन्तव्यैः Sy. VM. ignores अश्विना। विद्याम etc.
८. व्याख्यातं पुत्र ० P.
९. ० श्चित ० P. १०. वं ० P.
११. Ms. D. puts the figure ॥१८३॥ here to indicate the end of one hundred and eightythird hymn. No such number is given in P. and M.
१२. Omitted by P. D.
१३. RV. I. 184.1ª.
१४. ० यद् P. १५. लोत्वतनं तमं P.
१६. लोट्लोटा ० P. लेट्लोटा ० M.
१७. ० जि ० M.
१८. वृद्धि D. वृद्धी M. वृन्धि R.
१९. RV. VI. 75.12ª.
२०. ० राश्व P.
२१. RV. IV. 18.2ª.
२२. लोकः D.M. लेटकः P.
२३. ० मन्योर्वा ० P. D. Pª. 3.4.3.
२४. प्रेह्यजिहि D. २५. सृष्णुही ० D. सृष्णुधीति P. RV. I. 80.3ª.

दृश्यन्ते बहवो लेटः प्रार्थनाविषया इह ।

"स देवाँ[1] एह[2] वक्षति" "यक्षं[3]च्च प्रिप्रयं[4]च्च नः"

त्रिमूर्धानं[5] सप्तरश्मिम्" अयं लेट् स्याद्विधायकः[6] ।[7]

अथापि वर्तमानेर्थे "यो यजाति यजात इत्[10]" ॥

"अग्निना[11] रयिमश्नवत्[12]"बहवः सन्ति तादृशाः ।

"आ घा गमद्यदि श्रवत्[13]"हेतुहेतुमतोरिमौ ॥

वाक्यार्थानुगुणं लोटो लेटश्चार्थं प्रदर्शयेत् ।

व्युत्पत्त्यर्थमिमाः काश्चिदृचोऽस्माभिः प्रदर्शिताः ॥इति॥

I.184.

ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥१॥

ता वामद्य । अगस्त्य[14], तौ । युवाम् । वयम्[15], अद्य[16] । आह्वयाम[17] । तावेव[18] । श्वश्च[19] । व्युच्छ-

---

१. ए D. P.
२. RV. I. 1.2[c].
३. यक्षम्य P. D.
४. विप्र ० M. ० यच्छ P.
५. RV. VIII. 39 9[c].
६. RV. I. 146. 1[a].
७. ० रश्मयः ० रश्मय ....
८. स्यद् D.
९. लेट् स्याद् विधायकः is missing in M.
१०. यो यजा जात उत् M. RV. VIII. 31.1[a].
११. ०मश्नुवत् P. मश्नवत् D. RV.I.1.3[a].
१२. P. adds समन्वयो नासत्यौ before बहवः ।
१३. आघानमत्यति अ० D. The passage beginning with अग्निना and ending with श्रवत् is omitted by M. RV.I. 30.8[a].
१४. तौ रक्षकत्वेन प्रसिद्धौ Sy.
१५. अस्मिन् यागविने Sy.
१६. आह्वयाम इत्याशीः Sy.
१७. तौ युवां हुवेम Sy.
१८. श्वश्च P.M. अपरस्मिन्नपि दिने । ... अपरमित्येतदपरस्मिन्नित्यर्थे समभिव्याहारात् । 'अद्या चं नो मृळयतापरं चं' (RV. II. 29.2.) इत्यादिमन्त्रान्तरे तथा दर्शनाच्च । अपरयागं प्रत्यपीति वा Sy.

[1]त्याम्। [2]उषसि। भवतोः काले [3]वोढा। [4]स्तोत्रे, एकवचनबहुवचनयोः पादभेदात् समन्वयः। नास[5]त्यौ! [6]क्व। अपि [7]गूढदेशे। [8]वर्तमानौ। स्तोमानां [9]स्वामी। [10]दिवः। [11]पुत्रौ। [12]शोभनदानाय यजमानाय।

अस्मे ऊ षु वृषणा मादयेथामुत्पणीहितमर्म्या मदन्ता।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥२॥

[13]अस्मे ऊ षु। अस्मासु। एव। हे [14]वृषणौ! सुष्ठु। मादयेथाम्। [15]असुराश्च। [16]उद्धतम्। [17]सोमोर्म्या। [18]माद्यन्तौ। स्तोत्राणामभिमुखवचनैः। [19]मयाऽभिलषितम्। शृणुतम्। हे नरौ! [20]युवाम्। [21]स्तुतीनाम्। [22]एष्टारौ। कर्मणश्च तासा [23]निचेतारौ। [24]श्रुत्कर्णौ।

---

१. तमो विवासयन्त्यां सत्याम् Sy
२. उषोदेवतायाम्। . . उषःकाले हि प्रातरनुवाकाश्विनशस्त्रे प्रयुज्येते। उक्ते काले Sy.
३. ०ढाः P.D.M. वह्निः स्तुतेर्वोढा Sv.
४. शस्त्रैर्हुवेमेति सम्बन्धः। अत्राख्यातं पदमेकवचनतया नेतव्यम्। वह्नयर्थशब्दौ वा बहुवचनत्वेन नेतव्यौ। अथवा वाक्यद्वयम्। यस्माद् वह्नियों होता, उक्तगुणकौ युवां शंसति तस्माद्वयं यजमानास्तौ युवामाह्वयाम इति Sy.
५. ०नाय बहु० P.
६. पाठ० D. वाद M.
७. असत्यरहितौ Sy. ८. कुत्रचित् Sy.
९. देशे Sy. १०. वर्तमानौ युवाम् Sy.
११. ईरयिता स्तुतेरीश्वरो वा, ईदृशोऽह होता Sy. १२. द्युलोकस्य Sy.
१३. नपातयितारौ नप्तृस्थानीयौ वा Sy.
१४. अत्यर्थं शोभनहविर्दात्रे यजमानाय तवर्थं तौ युवाम् Sy. १५. अस्म D. अस्माP.
१६. ०णा M. कामानां वर्षकावश्विनौ युवाम् Sy.
१७. तृप्यतम्। अस्मभ्यं तर्पयतमभिमतम् Sy.
१८. वणिजो मुख्यकानयष्टून् Sy.
१९ उन्मूल्य हतं नाशयतम् Sy.
२०. ०म्या P. कीदृशौ युवाम्? ऊर्म्या, रात्रिनामैतत्। रात्रौ, मदन्ता माद्यन्तौ। यद्वा। ऊर्मिरिति सोमनाम। 'ऊर्मिर्यस्ते पवित्र आ' (RV. IX.64.11.) इत्यादिषु तथा प्रयोगात् Sv.
२१. माद्यंस्तौ P. मां M. अस्मदीयेन सोमेन मदन्तौ तादृशौ युवाम् Sy.
२२. ० नै P. आभिमुख्यकरैर्निर्मलवेदवाक्यैरचिताः Sy.
२३. मुमाभि० P. मम Sy.
२४ नेतारौ युवा खलु Sy.
२५ कर्मणि षष्ठी। मननसाधनाः स्तुतीः Sy.
२६. ०ती रेष्टा० P. ०तीं रेष्टा D. अन्वेष्टारावस्मत्स्तुतीनाम् Sy.
२७. कर्णश्च तास्ताभिमेतारौ P. लब्धानां तासां सञ्चयकर्तारौ। निरित्येष समिस्येतस्य स्थाने। यस्मादेवंविधौ तस्माच्छृणुतमिति Sy.
२८. The passage beginning with स्तोत्राणां and ending with श्रुत्कर्णौ is omitted by M. कर्णैराकर्णनसाधनैः श्रोत्रैः Sy.
२९. VM. ignores च

श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥३॥

श्रिये[6] पूषन्[1]। पूषस्त्वया। सूर्याया[3]। वहतुम्[4]। सोम[5] राजान प्रति श्रयितुम्[6]। इमौ देवौ[7]। इषुरिव[8] कृतौ शीघ्रगामिनाम्। उच्यन्ते[9]। वाम्[10]। स्तुतय[11]। अन्तरिक्षविषये[12]। जाता[13], तत्रत्यैर्हि कर्मभिरेतयो स्तुतिर्भवति। युगानि=क्षणानि। जीर्णानीव[14]। रात्र[15]। भूरे., व्युच्छति[16] न वेति हि सन्देह[17], अश्विनो. स्तुति[18]।

---

१. सविता सूर्यो दुहितर सूर्यास्थां प्रदातुमना देवानाहूय सामर्थ्यसमीक्षणायाऽऽज परिकल्प्य य इमं जेष्यति स एता कन्यकामृक्सहस्रक्लृप्तं स्तोत्रं च लभत इत्यकल्पयत् । तमग्निः प्रथममजयत् । तमनु, अश्विनावपि जित्वाऽग्नि प्रधृष्य ऋक्सहस्रं कन्यकां चालभेताम् । तत इन्द्र उषाश्चाजयताम् । तौ च तैरन्यादिभिः प्रार्थितौ स्वशस्त्रस्य कञ्चित् कञ्चिद्भाग तेभ्यः परिकल्प्य सूर्यां स्वरथेऽधारयतामित्यर्थमितिहासो ब्राह्मणे 'प्रजापतिर्वै सोमाय राज्ञे' (AB.4.7.) इत्यत्रास्नातोऽस्माभि. प्रथमाष्टमे 'आ वां पतित्वं सख्याय' (RV.I.119.5) इत्यत्र प्रपञ्चितः Sy.

२. हे पूषन् पोषक सूर्य । एतच्चन्द्रस्याप्युपलक्षणं सूर्याचन्द्रमसोरेवाश्विस्वात्। 'सूर्याचन्द्रमसावित्येके' (N.12.1.) इति यास्केनोक्तत्वात् । अतः पूषन्नित्युक्ते हे पोषकावश्विनावित्युक्त भवति । हे पोषकौ हे नासत्या असत्यरहितौ Sy.

३. एतन्नामिकायाः सवितुः पुत्र्याः । कर्मणि षष्ठी । सूर्याम् Sy.

४. The passage beginning with श्रिये and ending with वहतुं is omitted by M. रथे धारयितुम् । आजिमुदजयतामित्यर्थः Sy.

५. सोमा M.

६. श्रिये श्रेयसे शस्त्रस्य कन्यायाश्च लाभायेत्यर्थः Sy.

७. देवौ युवाम् Sy.

८. इष्टुरि० M. इवशब्द एवार्थे । आजिधावनाय, इषुवच्छीघ्रमुद्गामिनौ कृतावेव सन्तौ Sy.

९. वच्यन्ते होत्रादिभिः । युवामेव शस्त्रगतमन्त्रैर्यागकाले च स्तुवन्तीत्यर्थः Sy.

१०. वां प्रति Sy.

११. ककुहा. शस्त्ररूपाः स्तुतयः Sy.

१२. यस्मादेव तस्मादप्सु . . . कर्मसु Sy.

१३. सम्पादिता. Sy.

१४. जीर्णानि युगानीव । इवशब्दः सम्प्रत्यर्थः । पुरातना यागकाला यथा तद्वदद्यतना अपीत्यर्थः । पूर्वकाले यथा युवामेव स्तुवान्ति तद्वदिदानीमपीति तात्पर्यम् Sy.

१५. ०त्रे M. वरुणस्य फलप्रतिबन्धकपापनिवारकस्य यागस्य सिद्ध्यर्थं तत्सम्बन्धिन्यः Sy.

१६. दूरे D. अविच्छिन्नप्रवाहस्य Sy.

१७. प्युच्छति D.

१८. ०हे P. D.

१९. Omitted by D.

२०. VM. ignores नासत्या

अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥४॥

अस्मे सा वाम् । अस्मासु । सा । वाम् । हे मदयितारौ ! राति=दानम् । अस्तु । स्तोम प्रति । आगच्छतम् । मान्यस्य । स्तोतुः । यस्मात् । वाम् । अस्मेच्छया । हे शोभनदानौ ! सुवीर्यार्थञ्च । अमी मनुष्याः । अनुमदन्ति । स्पष्टोत्तरव्याख्या, अन्तिमा ।

एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥५॥

एष वां स्तोमः ।

---

१. सेवा M.
२. अस्माकम् Sy.
३. प्रसिद्धा Sy.
४. सेवां M. अस्मासु । सा । वाम् is omitted by P. युवयोः सम्बन्धिनी Sy.
५. मधुपूर्णपात्रयुक्तावश्विनौ ! Sy.
६. भवतु Sy.
७. स्तुतिम् Sy.
८. प्रीणयतम् Sy.
९. तदर्थं मान्यस्य माननीयस्य Sy.
१०. स्तोतुरगस्त्यस्य Sy.
११. युवाम् Sy.
१२. कीर्तेरस्य वेच्छया Sy.
१३. शोभनफलदानौ ! Sy.
१४. यजमानाय शोभनबलाय वा Sy.
१५. ऋत्विग्रूपाः Sy.
१६. अनुक्रमेण माद्यन्ति युवाभ्यां सह स्वयं वा Sy.
१७. स्पष्टोत्तरव्याख्यान्तिमा D. स्पष्टा अन्तरव्याख्या अन्तिमा M.
१८. Ms. D. puts the figure ॥१८४॥ here to indicate the end of one hundred and eightyfourth hymn. No such number is given in P. and M.
१९. Stanza no. 5 has not been previously explained as it occurs here for the first time.
The remark of VM. स्पष्टोत्तरव्याख्या seems to refer to this stanza and shows that in his opinion it did not stand in need of any explanation. हे अश्विनौ हे मघवाना हविर्लक्षणान्नवन्तौ । वां युवाभ्याम् । एष स्तोमः स्तोत्रम् । सुवृक्ति सुष्ठु पापवर्जनं यथा भवति तथा यद्वा सुसमाप्ति, अकारि कृतः । कीदृशोऽयम् ? मानेभिर्मानैर्हविष्प्रदानरूपैः सहितः, हे नासत्या असत्यरहितौ युवाम् । अगस्त्य एतन्नाम्नि महर्षौ मयि । मदन्ता माद्यन्तौ सन्तौ । वर्तिर्गृहं यज्ञसम्बन्धि यातं प्राप्नुतम् । किमर्थम् ? तनयाय पुत्रादिलाभाय त्मने, आत्मने च हिताय Sy.

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥

I.185.

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥१॥

कतरा। कतरा। पूर्वा। कतरा। अपरा। अनयोर्द्यावापृथिव्यो । कथं वा। जाते।
हे मेधाविन्! एते जानाति। सर्वम्। आत्मनैव। धारयत । यत्। ह। नाम किञ्चिदस्ति।

---

१. The stanza is identical with RV. I. 183.6. and has already been explained See also VM.'s remark :—स्पष्टा . अन्तिमा २. अगस्त्यस्यार्षम्। स हि पूर्वमेव ससाररूपे दृष्टवमवोचत् SKN. स्वयमेव तावद्वितर्कयन्नुत्पन्नसंशयो मन्त्रदृग् ब्रवीति Dur.

३. पूर्वमुत्पन्ना Sy. पूर्वकाला SKN.

४. पश्चाद्भाविनी। एवम्पौर्वापर्यप्रश्न Sy. अपरकाला SKN.

५. अवरायो० P. एनयोर्द्यावापृथिव्योर्मध्ये ... उभयोरविनाभावेन सहैव वर्तमानत्वादिति भावः Sy. अनयोर्द्यावापृथिव्योर्मध्ये SKN. नहि पौर्वापर्यमनयो. स्फुट लक्षयितु शक्यते Dur.

६. केन हेतुना Sy. केन प्रकारेण Dur.

७. किमनयोरुत्पादनमित्यर्थ· Sy. कथं वा जाते एवं महापरिमाणे SKN. एते जाते स्याताम् । किं पौर्वापर्येण, उत युगपद् भवेताम् Dur.

८. कान्तदर्शिनोऽतीन्द्रियज्ञाः। यूयं वदत Sy. मेधाविन ऋषयः SKN.

९. जानति M. को विवेद पौर्वापर्यं कारणं च विशेषेण विविच्य वा जानाति। न केनापि ज्ञायत इत्यर्थः Sy. क एतद्विवेद वेत्ति जानाति, अहं तावत्तं जानामीत्यभिप्रायः SKN कश्चिदपि विस्पष्टं न जानाति । अहन्त्वेतावच्छक्नुयामागमाद् वक्तुम्—"तस्मादुदभूतस्य हिरण्मयस्याण्डस्यैते शकले" इति। एवमाह "ते अण्डकपाले रजत च सुवर्णं चाभवताम्। तद्यद् रजत सेय पृथिवी, यत्सुवर्णं सा द्यौ" (Chā U 3.19 1,2.) इति नेन ज्ञायते युगपदेवैते उत्पन्ने स्यातामिति Dur. १०. कृत्स्नमपि जगदविशेषेण Sy. सर्वं प्राणिजातम् SKN.

११. अन्यनैरपेक्ष्येणैव Sy. आत्मना SKN. आत्मनैव Dur.

१२ ०ते P. एते ... धारयतः SKN.

१३. यस्मात् ... हेतोः Sy. तादर्थ्यायाश्चतुर्थ्या लुग्भवति पदपूरणः। यस्मै प्रयोजनायेति शेषः SKN यदर्थम् Dur.

१४. खलु Sy. १५. प्रसिद्धम् Sy. एनयोर्नाम ... उत्पत्तिः । यदर्थमेते उत्पन्ने इत्यर्थः SKN. अनयोर्नाम नमनम्। यस्माद् भूतग्रामधारणार्थमेते नते विपरिणामत्वेन, तत्सर्वमेते बिभृतः Dur.

१६. यद्वा । यद्ध नाम यत्किञ्चित्पदार्थजातमस्ति विश्वं तत्सर्वमात्मना बिभृतः । अनेन यत्कारणं ब्रूमस्तदप्याभ्यामेव श्रियत इति कारणाभावः प्रतिपादितः Sy.

विवर्तते वै, अनयोर्मध्ये। अहोरात्रे। चक्रयुक्ते। इव।

भूरिं द्वे अचरन्ती चरन्तं पदन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥२॥

भूरिं द्वे। पृथुम्। द्यावापृथिवी। स्वस्थाने स्थिते। चरन्तम्। पादयुक्तम्। आदित्यम्। स्वयमपदी। धारयत। औरसम्। इव। पुत्रम्। पित्रोः। उपस्थे वर्तमानम्। द्यावापृथिवी। अस्मान्। महतो भयात्। रक्षतम्।

अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥३॥

अनेहः। अनुपद्रवम्। दानम्। अदिते। अप्रस्खलितम्। ह्वयामि। सुखयुक्तम्।

---

१. विविधं यतेते SKN. विपर्ययेण वर्तेते Dur. २. नयो० P. एतयोर्मध्य इति शेषः SKN. एनयोरेवान्तर्भूते Du.
३. उत्तरेण पौर्वापर्याभाव उच्यते। अहनी एते द्यावापृथिव्यौ Sy.
४. ०युंक्त P. चक्रे इत्यर्थः। चक्रे च ते युक्ते च चक्रयुक्ते च। परिवर्तमानसामान्यादहोरात्रे उच्येते SKN. चक्रयुगलमिवावियोगेन सयुक्ते। सम्बद्धे इत्यर्थः Dur.
५. इ D. M. अनेन मन्त्रेण द्यावापृथिव्योर्महिमानं महाभाग्यं मन्त्रदृगाचष्टे Dur. कतरा पूर्वा कतरा परेनयोः। कथ जाते। कवयः क एने विजानाति। सर्वमात्मना बिभृतो यद्ध। एनयोः कर्म। विवर्तेते चैनयोः। अहनी अहोरात्रे। चक्रियेव चक्रयुक्ते इवेति। द्यावापृथिव्योर्महिमानमाचष्ट आचष्टे N.3.22; SKN. II.193. VM. ignores कः। वि
६. बहुतरम् Sy. ७. द्वे एवंते द्यावापृथिव्यौ Sy. ८. अविचले Sy.
९. गर्भवदाश्रितं कृत्स्नं प्राणिजातम् Sy.
१०. स्वयं पादरहिते Sy.
११. अनयोर्मध्ये खलु सर्वं जगत्क्षेमेण वर्तते Sy.
१२. धारणे दृष्टान्तः।...नित्य ध्रुवमात्मजम् Sy. १३. पुत्रमिव यथा स्नेहेन वर्धयन्तौ धारयन्तौ मातापितरौ तद्वत् Sy.
१४. मातापित्रोः Sy.
१५. उत्सङ्गे वर्तमानम् Sy.
१६ अथ प्रत्यक्षेणाह। हे . द्यावापृथिव्यौ। इतरेतरापेक्षया द्वित्वमुभयोः Sy.
१७. अस्मा P. १८. भयहेतोः पापात्। ...यद्वा। अभ्वात्, अभ्वं महत्। अत्यर्थमित्यर्थः। अभ्वेति महन्नाम Sy.
१९. पालयतम् Sy. २०. अपापं दुःखरहितं सुखात्मकम् Sy. २१. धनम् Sy.
२२. अभितेः M. एतदन्तरिक्षस्याप्युपलक्षणम्। अखण्डनीयायाः पृथिव्यास्तादृशस्यान्तरिक्षस्य च सम्बन्धि Sy.
२३. अप्रस्तुतितम् P. अप्रस्तुलितम् D. अनरणम्। अक्षीणमित्यर्थः Sy.
२४. आह्वयामि स्पृहयामीत्यर्थः Sy.
२५. सर्वतः फलभूतेन स्वर्गेण तद्वत् Sy.

हिंसारहितम्[1]। अन्नयुक्तम्[2]। तद् दानम्[3]। द्यावापृथिव्यौ! स्तोत्रे[4]। प्रादुर्भावयतम्[5]।

अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥४॥

अतप्यमाने[6]। केनचिदप्यबध्यमाने[7]। रक्षणेन[8]। सर्वान्[9] रक्षन्त्यौ[10]। वयमनु स्याम[11]। द्यावापृथिव्यौ[12]। ययो[13] सर्वे देवा एव पुत्रास्ते अपि[14]। अह्नाम्[15]। उभे। उभयेभिरहोरात्रैः[16]। देवानां भोगसाधने[17] भवत[18] इति।

संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥५॥

सङ्गच्छमाने[19]। परस्परं सङ्गच्छमाने।

---

१. अहिंसितम् Sy. २. अन्नवत्। ईदृशं धनं हुवे Sy. ३. Omitted by D.
४. अस्माभिः काङ्क्षितमुक्तलक्षणं धनम् Sy. ५. स्तोत्रे यजमानाय Sv.
६. ०भायतम् M. उत्पादयतम् Sy.
७. VM. ignores द्यावा etc.
८. अमध्यमाने P. ०मान M. अतप्यमाने अनीश्वरे। तपेरैश्वर्यकर्मण इदं रूपम्। यद्वा, अतप्यमाने अन्यैरपीडयमाने Sv.
९. स्वतोऽधिकेन केनचित्कृतेनावनेन समृद्धया... अवसा, अन्नेन Sy.
१०. तर्पयन्त्यौ Sy.
११. वयं मनुष्या मा P. ०वयं मनुष्याम D. तदर्थं युवामनु स्याम, अनुभवेम Sy
१२. आद्युदात्तस्तु 'अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे' इत्यादौ सर्वत्र द्यावापृथिवीवचनः। अस्याद्युदात्तत्वाद् द्यावापृथिवीवचन एव न रुद्रपत्नीवचनः। तथा च पदकारेण द्विवचनत्वं प्रदर्शितमिति। कर्मणा वा दानेन प्रशस्यताऽस्य दर्शितेति। भाष्यकारस्तु देवपत्नीप्रकरणानुविधानेन पदकारमनपेक्ष्य रोदसीशब्दं रुद्रपत्नीवचनमुदाजहार N. 12. 46; SKN. IV. 146.
१३ यो यः P. D. १४. हि P.D.
१५ ०स्तो० P. देवा व्यवहर्तारो मनुष्याः पुत्रस्थानीया ययोस्तादृश्यौ। लोकद्वयस्था मनुष्याश्च देवाश्च तदुपजीव्यत्वात्पुत्रा इत्युच्यन्ते, ईदृश्यौ Sy. १६. ०स्तेम व्यह्नाम् M. एतद्रात्रेरप्युपलक्षणम्। ..अह्ना रात्रीणां च सम्बन्धिभिः Sy.
१७ येभि० D. उभयेतिर० M. उभयविधैः शीतोष्णादिरूपैर्विलक्षणैर्धर्मैर्मिनमित्तभूतैः, तेषां लाभायेत्यर्थः Sy.
१८. द्योतमानानाम् Sy. १९. भव P.
२०. VM. ignores द्यावा etc.
२१. परस्परमुपकारित्वेन सह युज्यमाने। वृष्टिहविषोश्च परस्परमुपकार्योपकारकभावः। यद्वा पूर्वं संसृष्टे एव सत्यौ पश्चाद्वियुज्य वृष्टिहविषी अकुर्वत्यौ पश्चान्मनुष्यैः प्रार्थितैर्देवैर्विवाहिते सत्यौ सङ्गते अभूतामित्याहुः। अयमर्थः 'द्यावापृथिवी सहास्ताम्' (TB. I. 1.3.2.) इत्यादिब्राह्मणे समाम्नातः Sy.

युवती[1]। सङ्गतान्ते[2]। मात्रापित्रोः[3]। उत्सङ्गे[4] वर्तमाने। स्वसारौ[5]। कन्यके[6]। भुवनस्य[7]। नाभिमादित्यम्[8]। अभिजिघ्रन्ती[9][10]।

उर्वी सदनी बृहती ऋतेन हुवे देवानामवसा जनित्री[11]।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥६॥

उर्वी सदनी[11]। विस्तीर्णे[12]। स्थानभूते। उच्छ्रिते[13]। स्तोत्रेण[14]। हुवे[15]। देवानाम्[16]। अन्नेन[17]। जनयित्र्यौ[18]। धारयतः[19]। ये। उदकम्[20]। शोभनाङ्गम्[21]।

उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन्।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥७॥

उर्वी पृथ्वी[22]। महती[23]। विस्तीर्णे[24]। बहुना पर्याप्ते[25]। दूरे ययो पर्यन्तस्ते[26]। अहमुपस्तौमि[27]।

---

१. ०ति P.D. नित्यतरुण्यौ मिथुनयन्त्यौ वा सर्वेषु भावेषु Sy.
२. ०तास्ते P.D.M. समानान्तिके समानपर्यन्ते वा Sy. ३. सर्वस्य पितृस्थानीययोः पालकयोस्तयोः Sy.
४. उपसंगे P. उत्सङ्गे स्थितम् Sy.
५. स्वरामौ P. परस्परं स्वमृते Sy.
६. जामी बन्धुभूते। प्रजापतेः सकाशात् सहोत्पन्नत्वात्परस्परं जामित्वम्। तथा च निगमौ–'दिवं च पृथिवी चान्तरिक्षमथो स्वः' (RV. X 190.3) 'यतो द्यावापृथिवी निष्टतक्षुः' (RV X.31.7.) इति Sy.
७. भूतजातस्य Sy.
८. बन्धकमुदकम् Sy.
९. अभिजघ्नन्ती D.M. अभिजघ्नन्ति P. अभिघ्राणं कुर्वत्यौ स्पृशन्त्यौ। 'समानमेतदुदकम्' (RV. I.164.51.) इत्याद्यिमन्त्रवर्णाद्युभयोरुदकप्रदत्वं प्रसिद्धम्। ईदृश्यौ नो रक्षतम् Sy.
१०. VM. ignores द्यावा etc.
११. नि D.
१२. सदनाधारभूते Sy.
१३. ०त P.D.M. महत्यौ महानुभावे Sy
१४. यज्ञेन च निमित्तभूतेन Sy.
१५ जुवे P.D. आह्वयामि। देवानां हविरर्थम्। अस्मद्यज्ञायेत्यर्थः Sy.
१६ उपलक्षणमेतत्। देवमनुष्यादीनाम् Sy.
१७ अन्ने P. अवसा प्रीत्या निमित्तेन... वृष्टयादेर्देवानामवसा तर्पणेन निमित्तेन Sy.
१८. वृष्टिसस्ययोर्जनित्र्यौ Sy.
१९. ते युवामाह्वयामि Sy
२०. ०नाग P.D.M. शोभनरूपे Sy. शोभनाङ्गे is suggested for शोभनाङ्गम्
२१. VM. ignores द्यावा etc.
२२. महत्यौ Sy. महत्यौ is suggested for महती
२३. पृथिव्यौ Sy.
२४. अनेकप्रकारेण प्रथमाने, बह्वाकारे Sy.
२५. ०न्तस्थे P. विप्रकृष्टान्तदेशे अपारे इत्यर्थः Sy.
२६. उपेत्य ब्रवीमि स्तौमीत्यर्थः Sy.

हविषा। अस्मिन्। यज्ञे। धारयेते। ये मनुष्यान्। सुधने। शोभनप्रतरणे।

देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥८॥

देवान् वा यत्। यज्ञाननुष्ठानादनृतवचनाच्च देवान्। वा। यद् वयम्। कत्। चित्। आग। कृतवन्तः। सखायम्। वा मनुष्यम्। सदा। एव। जामातरम्। वा। एनत्। स्तोत्रलक्षण कर्माङ्गसाम। एषाम्। अवयानम्। भवतु।

उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम्।
भूरिं चिदर्यः सुदास्त्वरायेषा मदन्त इषयेम देवाः ॥९॥

उभा शंसा। मनुष्यभवौ। प्रत्यक्षपरोक्षशंसौ। माम्। रक्षताम्। उभयपक्षस्थौ। मार्गौ च। माम्। अन्नेन। सेवेताम्। बहु। अपि धनम्। उदारो मह्यं प्रयच्छतु। अतिशयेन सुष्ठु हवि·

---

१. नमःसाधनेन स्तोत्रेण Sy.
२ दधाते विश्वं जगत् ते युवामुप ब्रुवे स्तौमि Sy.
३. सुधाने M. शोभनभाग्ये Sy.
४. ०प्रकरणे P. शोभनदाने Sy.
५. VM. ignores द्यावा etc.
६. ०दनुष्ठाननृत० P.M. ०दनुष्ठा० D अयागलक्षणम् Sv. ७. देवान्प्रति Sv
८. वंपाद् P. वाद D. वया M.
९. अपराधं तत्तद्यागकाले Sv.
१०. प्रियं मित्रं वा प्रति Sy.
११. ०य वो P. १२. सर्वदा Sy.
१३. जाः पुंस्त्यस्तासां पतिं जामातरं वा जायापतिं प्रति दोषारोपणकलहोत्पादनादिरूपं यत्सर्वदैव चकृम Sy.
१४. वाह हि तत् P. D. युष्मत्स्तुतिरूपमिदं कर्म Sy. १५. ०णक० P.
१६. ०मेषाम् P. D. M. उक्तरूपाणां पापानामपगमं कर्तुम् Sy.
१७. अपयापनम् P.M. अवयावनम् D.
१८. भूयाद्, भवतु।...अत्र सर्वत्र प्रकारान्तरेण .रक्षतं रक्षतमिति प्रार्थनं तयोरश्विन्यादिवदनेन सम्भवादुचितमेव। तस्मात्स्वस्थान एव स्थिते अनुकूले भवतमित्येवं प्रार्थ्यते Sv.
१९. VM. ignores द्यावा etc.
२०. ०सौ P. २१. नरेभ्यो हितौ Sy.
२२. द्यावापृथिव्योरुभयोर्विषयौ, उभावपि शंसौ ईदृश्यावुभयाश्रये स्तुती Sy.
२३. अविष्टां रक्षताम्...यद्वा द्यावापृथिव्यभिमानिदेवयोरेव शंसशब्देनाभिधानात् पुंल्लिङ्गता Sv. २४. ऊती रक्षिके द्यावापृथिव्यौ Sy. २५. रक्षणेन Sy.
२६. सेवताम् P. यद्वा प्राणेभ्यो हितकरौ, उभावैहिकामुष्मिकविषयौ शंसौ मामविष्टां प्राप्नुताम्। तथा, उभे अपि, ऊती तयोः सम्बन्धिन्योरभिमानिदेवतयोरवसा, अस्मत्तर्पणेन निमित्तेन सचेताम् Sy.
२७. चित् पूजायाम्। अभिपूजितम् Sy.
२८. स्तोतारो वयम् Sy.

प्रयच्छते[1] वयम्। अन्नेन[2]। मदन्तः[3]। दरिद्राणामिषं कुर्वीमहि[4] द्यावापृथिव्योः[5] प्रसादेन। देवाः[6]!

ऋतं दिवे[7] तदवोचं[8] पृथिव्या अभिश्रावाय[9] प्रथमं[10] सुमेधाः[11]।
पातामवद्याद्दुरितादभीके पिता माता च[12] रक्षतामवोभिः[13] ॥१०॥

ऋतं दिवे[14]। द्यावापृथिव्यो[15]। अभिश्रवणार्थम्। तदिदम्[16]। सुमेधा[17]। स्तोत्रम्। अवोचम्[18]। पूर्वमेव। ते मा पाताम्[19]। अवद्यात्[20]। दुरिताच्च[21]। सङ्ग्रामे[22]। पिता द्यौ[23]। माता। च[24] पृथिवी[25]। रक्षतां माम्[26]। रक्षणै[27]।

इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम्[28]।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥११॥

इदं द्यावापृथिवी[29]। हे द्यावापृथिवी[30]! इदम्[31]। सत्यम्[32]। अस्तु[33]। पित[34]! मातश्च[35]। यत्[36]। इह[37]। वाम्[38]। अहं याचे[39]। भवत च[40]। देवानाम्[41]। आसन्ने[42]। रक्षणै[43]।

---

१. अतिशयेन शोभनदातृत्वाय।... यद्वा। अयं इति षष्ठ्या रूपम्। ईश्वराद्राजादेरपि सुदास्तरायेत्यर्थः Sy.
२. अन्नेन सोमलक्षणेन Sy
३. मादयन्तः सन्तः Sy.
४. इच्छेम Sy.
५. द्यावापृथिव्योरन्तर्भूताः सर्वेऽपि देवा Sy
६. ०वो M. ७. दिवे द्युदेवतायै, पृथिव्यै पृथिवीदेवतायै Sy.
८. अभितः सर्वतः श्रवणाय Sy.
९. तत्प्रीतिकरम् Sy. १०. तदिनं P.
११. शोभनप्रज्ञोऽहम् Sv. १२. ब्रवीमि Sv.
१३. प्रथमं, मुख्यनामैतत्। प्रतमं प्रकृष्टतमम् Sy. १४. रक्षताम् Sv.
१५. ०द्या M. निन्दिताद् दुःखप्रापकात् Sy.
१६. ०ना D.M. अंहसः सकाशात् Sy.
१७. Omitted by P. D.
१८. अन्तिकनामैतत्। समीप एव Sy.
१९. पालको द्युलोकः Sv.
२०. Omitted by P. D.
२१. मस्यादेर्निर्मात्री पृथिवी Sy.
२२ पालयताम् Sy. २३. अभिमततर्पणैः Sv २४. द्यावापृथिव्यो! Sy.
२५. अस्माभिः क्रियमाणं स्तोत्रम् Sy.
२६ अवितथम् Sv.
२७ भवतु। फलवद् भवत्वित्यर्थः Sv.
२८. द्यौः! Sv. २९. हे मातः पृथिवि! Sv. ३०. स्तोत्रम् Sy.
३१. अस्मिन् यज्ञे Sv. ३२. युवां प्रति Sy.
३३. उपेत्य ब्रवीमि तत्सत्यमस्तु Sv.
३४. स्तोतृणामस्माकम् Sv.
३५. ०न्नै P.D. अन्तिकनामैतत्। नित्यसन्निहिते युवाम् Sy.
३६. तर्पणैर्युक्ते Sy.
३७. VM. ignores विद्याम etc. Ms. D. puts the figure ॥१८५॥ here to indicate the end of one hundred and eighty-fifth hymn. No such number is given in P. and M.

I.186.

आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥१॥

आ[1] न[2] इळाभिः[3] । आगच्छ त्वम्[4] । अस्मान्[5] । अग्ने[6] । यज्ञे[7] । शोभनशसनम्[8] । यथा विश्वे[9] यस्य प्रेष्या नरा विश्वान्[10] वा य प्रत्युत[11] । सविता[12] । देव । अपिच[13] । यथा प्रेरयिता वैश्वानर[14] । हे युवान[15] । अस्मान्[16] । यूय च मादयथ[17] । विश्वम्[18] । जगत्[19] । अभिप्राप्तौ[20] । प्रज्ञया तथा गच्छथ[21] ।

---

१. ग D.
२. इला० D. इडा० P.
३. आगच्छतु Mah., Sy. आ एतु U.
४. अस्माकम् Mah. अस्मदीये Sy.
५. P. adds च after अग्ने: । यथा सर्वे, इडां भक्षयन्ति तथा एत्वित्यर्थः Mah. प्रदेयै रत्नैः सह । यद्वा इडाभिः । तदाश्रितेषु ताच्छब्द्यम् । भूमिस्थानाभिर्देवताभिः सह Sy.
इडाभिः करणभूताभिः U.
६. यज्ञगृहे Mah.
७. कथम् । इडाभिः सुशस्ति यथा स्यात्तथा, इडाभक्षणेन शोभना शस्तिः शसन प्रशसा यस्या क्रियायां तथा... यद्वा सुशस्ति, विभक्तिलोपः । कीदृशे यज्ञगृहे सुशस्ति सुशस्तौ, इडाभि शोभनप्रशसायुक्ते Mah. सुपो लुक् । सुशस्तिभि. शोभनशसनैः स्तुतिभिः Sy. अविभक्तिको निर्देशः । सुशस्तिभिश्च शोभनैः शंसनैश्च करणभूतैः U.
८. विश्वनरहितकारी Mah. सर्वप्राणिहितकार्यग्निः Sy.
९. विविश्वान् P.
१०. व P. D.
११. प्रेरक आदित्यश्च देवः Sy. सविता च देवः U.
१२. अपि निश्चितम् Mah. अपिः सम्भावनायाम् । अपि अस्मान् Sy. अपि तथा तेन प्रकारेण माद्यत यथेष्टम् U.
१३ येन प्रकारेण Mah, U.
१४. एव सूर्यमुक्त्वा देवानाह हे युवानो जरारहिता देवा. ! Mah. नित्यतरुणा यज्ञस्य मिश्रयितारो वा यूयम् Sy. युवानः सर्वकर्मक्षमा अविपरिणामिनो वा U.
१५. नोऽस्माकम् Mah. नोऽस्मान् Sy. अस्माक गृहे U.
१६ 'मद तृप्तौ' तृप्यथ... मत्सय । अन्तर्भूतण्यर्थः । तर्पयथ । यथा भवद्भिस्तृप्तिः क्रियते तथाऽस्मत्प्रजास्तर्पणीया इत्यर्थः Mah. मादयथ Sy. माद्यथ तृप्यथ U.
१७ सर्वम् Mah.
१८. जगद् गन्तृ जङ्गमं पुत्रगवादिकम् Mah. जगत् । एतत्स्थावरस्याप्युपलक्षणम् । यद्वा कृत्स्न प्रपञ्चं मत्सथ तथाऽस्मानपि । यद्वा जगच्छब्दो यजमानरूपमनुष्यवाची । सर्वानपि यजमानान् यथा मत्सथ तथेत्यर्थः Sy. विश्वं जगदुद्धराम इति कृत्वा U.
१९. अभिपतन आगमनकाले Mah. अभिपतनीयेऽस्मद्यज्ञे Sy. अभिपतनकाले प्राप्ते U.
२०. मनीषया बुद्धया Mah. मनस ईशितृत्वेन स्वेच्छयेत्यर्थः Sy. मनीषयेति विभक्तिव्यत्ययः । मनस इच्छया U.
२१. गच्छतं P. D.
This stanza=YV. 33.34.

आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
शृण्वन्यथा नो विश्वे बृघासः करन्त्सुषाहा विथुरं न शर्धः ॥२॥

आ नो विश्वे । आगच्छन्तु । अस्मान् । विश्वे । देवा । शत्रूणामास्कन्दितारः । मित्रादय । सङ्गताः । त इमे यथा । अस्माकम् । अभवन् । विश्वे । वर्धयितार । तथाऽस्माक शत्रूणां बलम् । असहायम् । इव । पराभूता । कुर्वन्तु ।

प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥३॥

प्रेष्ठं वः । प्रियतमम् । त्वाम् । अतिथिम् । स्तौमि । अग्निम् । स्तुतिभि । तूर्णसम्भजन । पुत्रपौत्रयुक्त. । भवति । यथा । अस्माकम् । वरुण । शोभनकीर्तन. । तथा च कुरु स्तुहि ? अन्नानि च । अस्मानतिनयनि । अरीणामाह्वाना । वरुण प्राज्ञ ।

---

१. अस्माकं यज्ञम् Sy.
२. सर्वे Sy.
३. अस्क० M.
आक्रमितारो वा Sy.
४. मित्राय P. मित्रोऽर्यमा वरुणश्च त्रयोऽपि Sy.
५. स्वं गताः P.
समानप्रीतयः सन्तः Sy.
६. अभव P.D M. भवेयुः Sy.
७. अस्मदीयम् Sy.
८. सुष्ठु शत्रूणामभिभवेन Sy.
९. अन्नम् Sy.
१०. हीन यथा Sy.
११. ०कं... मिव M.
१२. ०ता P.D. पराभूतं is suggested for पराभूना.।
१३. यथा न कुर्युस्तथाऽऽगच्छन्तु Sy.
१४. सर्वेषामाह्वातृत्वाद्धविर्वहनाच्चाग्निर्देवानां प्रियतमस्तम् Sy.
१५. त्वम् D. वो युष्माकम् Sy.
१६. स्तौमि M.D. गृणे स्तौमि। व्यत्ययेन मध्यमः Sy.
१७. शसनै. स्तुतिभिः Sy.
१८. प्रियतम... भजनः M. शीघ्रं सम्भक्ता Sy.
१९. युष्माभिः सह प्रीयमाणः । यद्वा । एते अग्निविशेषणे। यस्तुर्वणिः शीघ्र यज्ञस्य सम्भक्ता सजोषा युष्माभिः सह प्रीयमाणस्तमग्नि गृणीषे Sy.
२०. येन प्रकारेण Sy.
२१. एतन्नामको देवः Sy.
२२ शोभनकीर्तिमान् ।... 'सुकीर्ति भिक्षे वरुणस्य भूरेः' (RV. II. 1. 28.) इत्यादिमन्त्रवर्णेषु वरुणात् सुकीर्तिरेवैषणीया Sy.
२३. कुरुतं च M. कुरुञ्च P.D.
२४. पूरयेत् तथा तमपि स्तुम इत्यर्थः Sy.
२५. अरिष्वदातृषु सदा शङ्कितः । अरीणां हननायोद्युक्तो वा Sy.
२६. अयं वरुणः Sy.
२७. प्रेरयिता Sy.

उप॑ व॒ एषे॒ नम॑सा जिगी॒षोषा॒सानक्ता॑ सु॒दुघे॑व धे॒नुः ।
स॒मा॒ने अ॑हन्वि॒मिमा॑नो॒ अर्कं॑ वि॒षुरू॑पे॒ पय॑सि॒ सस्मि॒न्नूध॑न् ॥४॥

उप व एषे । हे देवा युष्मान् । शत्रुविजिगीषयाऽहम् । अन्नेन । उपगच्छामि । अहोरात्रे । शोभनदोहना । धेनुः । इव भवतः । एकस्मिन् । अहनि । विविधरूपम् । अन्नम् । उत्पादयन् । नानारूपे । उदके । समाने । ऊधनि मेघे देवस्तोत्रेणोत्पादयन् ।

उ॒त नोऽहि॑र्बु॒ध्यो॑३ मयः॑क॒रः शिशुं॒ न पि॒प्युषी॑व वेति॒ सिन्धुः॑ ।
येन॒ नपा॑तमपां जु॒नाम॑ मनो॒जुवो॒ वृष॑णो॒ यं व॑हन्ति ॥५॥

उत नः । अपिच । अस्माकम् । अन्तरिक्षभवः । मेघः । सुखम् । करोतु । शिशुम् । इव । आप्याययन्ती माता । सरस्वती । अस्मानागच्छति । यस्माद् वयम् । अपाम् । नपात देवम् ।

---

१. Omitted by P
२. युष्माकम् Sy.
३. पापानां जिगीषया Sy.
४. हविषा नमस्कारेण वा Sy
५. उप उपेत्य . . . एषे, इच्छामि । 'इष गतौ' इत्यस्य वा, ईषतेर्वा गत्याद्यर्थस्य लिटि, उत्तमैकवचन इवं रूपम् । भजामि Sy.
६. अहनि रात्रौ च । यद्वा । अहोरात्रदेवते अपि अभिगच्छामि Sy.
७. ०हा M.
८. गतौ दृष्टान्तः । . . . सुदोग्ध्री धेनुर्यथा दोहाय दोग्धुर्गृहमागच्छति तद्वत् Sy
९. षष्ठेऽहनि । एकस्मिन्नेवाहनि सर्वदैव वेत्यर्थः । एकस्मिन्नेवाहनि समान ऊधस्युत्पन्ने नानारूपे पयसि त्वदर्थं हविर्मिमान उपगच्छामीत्यर्थः । यद्वा सस्मिन् सर्वस्मिन्नूधसि फलाख्यक्षीरोत्पादके यज्ञे निमित्तभूते सति विषुरूपे पयसि नानारूपे सोमलक्षणोदकेऽर्कमन्नसाधनं स्तोत्रं विमिमानोऽहं युष्मानभिगच्छामि Sy.
१०. ०धं रू० P. D.
११. अर्चनीयमन्नं चरुपुरोडाशादिकम् Sy.
१२ उत्पा० P. विविधं मिमानः Sy.
१३. पयसि क्षीरघृतादिके Sy.
१४ ऊधस्युत्पन्ने Sv.
१५ ०णोत्पा० P.
१६ अथ P.
१७ स एव बुध्न्यः । बुध्न बन्धकमन्तरिक्षम् । तदर्हतीति बुध्न्योऽन्तरिक्षचारी, एतन्नामको देवः Sy.
१८ अहिः, अन्तरिक्षगामी अहन्ता वाऽहीनो वा, अहन्यमानो वैतन्नामको देवः Sy.
१९ शिशिम् P.
२०. इवशब्द एवार्थः पूरणो वा Sy.
२१. ० प्यायन्ति P. ०प्याययन्ति D. तत्र दृष्टान्तः । यथा शिशुं प्याययन्ती गौर्गच्छति तद्वत् Sy.
२२. सिन्धुर्नाम नदी Sy
२३. अस्मान् रसेनाऽऽप्याययन्ती Sy.
२४. आगच्छ M. आगच्छतु Sy.
२५ उदकानामपातमितारं वर्षकमेतन्नामकं यद्वा, उदकानां नप्तारं तृतीयं पुत्रम् । अद्भ्य ओषधिवनस्पतयस्तेभ्योऽग्निरिति नप्तृत्वम् । तादृशमग्निम् Sy.

अभिगच्छामः । मनोवेगाः । अश्वाः । यम् । वहन्ति ।

उत नं ईं त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां नं इह गम्याः ॥६॥

उत न ईम् । अपिच । अस्मान् । त्वष्टा । अभ्यागच्छतु । शोभनम् । देवैः । प्रातः ? ।
सहितः । वृत्रहा । इन्द्रश्च । पूरयिता मनुष्याणाम् । वृद्धतमः । नराम् । अस्माकम् । इह । आगच्छतु ।

उत नं ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥७॥

उत न ईम् । अपिच । अस्माकम् । स्तुतयः । व्याप्तयोजनाः । वत्सम् । इव । गावः ।
तरुणमिन्द्रम् । लिहन्ति, आश्रयन्ते । तम् । एनम् । स्तुतयः । जनयित्र्यः । पत्न्यः । इव पतीन् ।
नेतृणा स्तुतयः । जिघ्रन्ति । अन्तसुगन्धम् ।

---

१. स्तुतिभिः सङ्गच्छेम (हि) । जु इति सौत्रो धातुर्गत्यर्थः Sy. २. वर्षका मेघा अश्वाः Sy. ३. देवम् Sy.
४. वहन्ति स सुखं करोतु Sy.
५. Omitted by P. ईम्, इदानीमिम यज्ञं वा Sy. ६. त्वष्टा देवोऽपि Sy.
७. ०च्छत M. अच्छ अभिप्राप्तुम् ... आ गच्छतु Sy.
८. स्मत् सहार्थे प्राशस्त्ये वा वर्तते । अत्र प्रशंसायाम् । प्रशस्त यथा तथा Sy.
९. स्तोतृभिर्ऋत्विग्भिः Sy.
१०. वृतः D. अभिगन्तव्ये यज्ञे निमित्तभूते सति Sy.
११. समानप्रीतिर्भवत्विति शेषः Sy.
१२. वृत्रघाती Sy.
१३. कामंस्तेषां पूरकः Sy.
१४. चर्षणयो मनुष्या यजमानाः Sy.
१५. बृहतमो महत्तमः Sy.
१६. नरा(णा)म् M. नृणाम् Sy.
१७. अस्मिन्कर्मणि Sy.
१८. उक्तगुणोपेतः सन् ... आगच्छतु Sy.
१९. VM. ignores ईम्
२०. ई P. ईम् एनम् Sy.
२१. अस्मद्बुद्धयः Sy.
२२. अश्वसमानप्राप्तयः Sy.
२३. तत्र दृष्टान्तः ... शिशुं न शिशुमिव वत्समिव त यथा लिहन्ति तद्वत् Sy.
२४. द्रोग्ध्र्यो धेनवः Sy.
२५. नित्ययुवानमिन्द्रम् Sy.
२६. आस्वादयन्ति Sy.
२७. स्तुवन्तीत्यर्थः Sy.
२८. तमेव Sy. २९. एन P.
३०. फलस्योत्पादयित्र्यः Sy.
३१ तत्र दृष्टान्तः । जनयो न, उत्पादयित्र्य. पत्नीः पत्न्यः पतिमिव Sy.
३२. पतिं M.
३३. नराणां यजमानानाम् Sy.
३४. व्याप्नुवन्ति । नसतिर्व्याप्तिकर्मा Sy.
३५. ०सुन्धम् P. अतिशयेन सुरभिम् Sy. अतिसुगन्धिम् is suggested for अन्तसुगन्धम्
३६. VM. ignores ईम्

उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥८॥

उत न ईम् । अपि च । अस्माकम् । मरुत । प्रवृद्धसेना । शोभनम् । द्यावापृथिवी । समनसः सन्त. । अधितिष्ठन्तु । पृषद्वर्णाश्वा । गन्तार. । इव । रथाः । हिंसितृणामसितार । मित्रयुक्ता । इवेतरेतरं सङ्गमनात् । मरुतो देवा. ।

प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥९॥

प्र नु यदेषाम् । प्रज्ञायते । यदा । मरुताम् । महिमा । क्षिप्रम् । अथ प्रयुञ्जते । स्तुतीः । शोभनप्रवृत्ती । यथा तदेना ? सुदिने । इव । मेघ । सर्वम् पार्थिवम्, हरिणम् । वर्षणेन, आदहन्ति

---

१ ईं P. इदानीम् । एन यागं वा Sy.
२ अस्मदीयम् Sy. ३. प्रवृद्धबलाः Sy.
४. स्मत्, सह अपि Sy.
५ रोदस्योर्द्यावापृथिव्योः सकाशात् । यद्वा रोदस्यावपि गच्छताम् Sy.
६. समनः M. समानः P. समानमनस्का Sy.
७. अधिषून्तु D. सन्तौ धिष्ठन्तु P. सदन्तु गच्छन्तु Sy.
८ ०र्णा अ० P. D. 'पृषत्यो मरुताम्' (Ngh. 1.15.) इति यास्कः Sy.
९. यथैव नमनस्वभावाः Sy.
१०. रथा रंहणस्वभावा रथवन्तो वा । मत्वर्थो लुप्यते । यद्वा । अवनयो रक्षका रथा इव स्थिताः Sy.
११. रिशाः शत्रवस्तेषामसितारः Sy.
१२ मैत्रीयुक्ताः Sy.
१३. व्यवहर्तार ऋत्विज इव । यद्वा । मैत्रीयुक्ता अन्ये देवा यथा गच्छन्ति तद्वत् Sy.
१४. VM. ignores ईम्
१५. यद्वा । एषां महत्त्वेन युक्ता नराश्चिकित्रे जानन्त्यनुष्ठेयम् Sy.
१६. यस्मात् Sy.
१७. महिमा वृष्टिलक्षणः Sy.
१८. नु इति पूरणः Sy.
१९ ० प्र P. D.
२०. ततस्ते ज्ञातार.... प्रयुञ्जते Sy
२१. ० ति P. D. प्रयोगान् Sy.
२२. र्भोप्र० D. सुवृक्ति, सुपो लुक् । सुष्टुतीनाम् Sy.
२३. यथायदेना P. यथाय यथेना M. अथ । यदा । एषाम् । suggested for यथातदेनां
२४ तत्र दृष्टान्तः । सुदिने मेघावरणादिरहिते दिने Sy
२५ शरुः, अन्धकारहिंसकः प्रकाश इव । स यथा सर्वमावृणोति तथा मरुत्सेनाऽवृष्ट्या सर्वमूषरं करोति । यद्वा । मरुन्महिमा वृष्टिर्भवति । तदा सस्यादिसमृद्धौ सत्यां प्रयोगं कुर्वन्ति यदा यजन्ति तदा मरुत्सेनाः सर्वां महीमुन्दन्तीत्येवं महानुभावा मरुत इति तेषां स्तुतिः Sy.
२६ अध, अथ प्रयोगानन्तरं, यद् यस्मात् ... विश्वं सर्वं भुवनम् Sy.
२७. इवरीण D. इवरिण P. ऊषरप्रदेशम् Sy.
२८. यथा तथा सर्वतः.... उत्पादयन्ति Sy.

सेनास्तदा च प्रयुञ्जत इति ।

प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥१०॥

प्रो अश्विनौ । मनुष्या यूयम्, अश्विनौ । युष्माक रक्षणाय । प्रकृणुध्वम् । प्र च । पूषणम् । स्वबला मरुत. । च । सन्ति तानपि प्रकृणुध्वम् । अशत्रुः । विष्णु । वात । महानिन्द्रश्च । तानिमान् सर्वान् देवान् । सुखार्थम् । आवर्तयाम ।

इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः ।
नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ॥११॥

इयं सा वः । हे यष्टव्या देवा ! युष्माकम् । अस्मासु । इद स्तुतिलक्षण कर्म । सा । इयम् । अपिपूरणी, अस्माकम् । भूयात् । सादनी । च । येयम् । देवेषु । आभिमुख्येन । गच्छति । वसूयु. ।

---

१. वृष्टयुत्पादकाः Sy.
२. VM. ignores ते
३. ०ना P.D.
४. हे ऋत्विजः ! Sy.
५. एतन्नामकौ देवावुद्दिश्य Sy.
६. अस्मद्रक्षणाय Sy.
७. स्तुतिं प्रकर्षेण कृणुध्वम् Sy
८. पोषकमेतन्नामकं देवमप्यवसे प्रकर्षेण स्तुतिं कृणुध्वम् Sy.
९. ०लान् P. स्वायत्तबलाः Sy.
१०. तावन्ति नपि P.D.
११. चकृ० D. चकृ० P.
१२. के ते ? अद्वेषो द्वेषरहितः । ... प्रथमम-नाहूतोऽपि न कुप्यतीति वक्तुमद्वेष इत्युक्तम् Sy
१३. व्याप्त एतन्नामको देवः Sy.
१४. सर्वत्र सञ्चारी वायुः Sy.
१५. पतिरिन्द्रश्च । एतानपि प्र कृणुध्वम् Sy.
१६. अतोऽहं स्वायत्तबलान् सर्वानपि Sy.
१७. सुखाय Sy. १८. अच्छ, आभिमुख्येन ... स्तोत्रैरभिवर्तयेयम् Sy.
१९ VM. ignores उ
२० ०व्य P. D.
२१ युष्मत्सम्बन्धिनी Sy.
२२ अस्माकम् Sy.
२३. अस्माविदं P. इयं प्रसिद्धा Sy.
२४ दीप्तिः Sy.
२५ कर्मपू० M. सर्वदा चेष्टयित्री Sy.
२६. वूयात् P. भवतु Sy.
२७ निवासवती Sy.
२८ या दीधितिः Sy.
२९. अभि० D. नियमेन प्रयत्नं करोति । तानपि प्रकाशयितुं सैव भूयात् Sy.
३०. ०यु P.D. वस्तूयुः M. वसुमती Sy.
३१ VM. ignores च and विद्याम etc.
Ms. D. puts the figure ॥१८६॥ here to indicate the end of one hundred and eightysixth hymn. No such number is given in P. and M.

I.187.

पितुं नु स्तोषं महो धर्माणं तविषीम् ।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥१॥

पितुं[1] नु[2]। अन्नस्तुति—अन्नम्[3]। स्तौमि[4]। महत[5]। धारयितारम्[6]। बलस्य[7]। यस्य[8]। बलेन[9]। त्रित[10]=त्रिस्थान इन्द्र[11]। वृत्रम्[12]। विपर्वाणम्[13]। व्यावर्तयत्[14]।

---

१. पितुः D. यार० P.

२ क्षिप्रम् Sy., SKN नूरनर्थकः U.

३. पालकमन्नम् Sy. परस्ताद्यच्छब्दश्रुतेस्तच्छब्दाध्याहारः। त पितुमन्नम् SKN. अन्नमहम् Dur

४. को हि नाम तन्न स्तूयादस्मादृते त्रिलोकाधिपतिरपीन्द्रः किञ्चिदप्यशक्तः कर्तुमित्यभिप्रायः Dur.

५ महान्तम् Sy., SKN.

६. सर्वस्य धारकम्। ... यद्वा महतो लोकस्य धारकम् Sy.

७ तविष्या बलस्य ..तविषीति बलनाम। बिभक्तिव्यत्ययः । अन्नेनैव बलोत्पत्तेः Mah. बलात्मकम् Sy. तवतेर्वृद्धिकर्मणः, बलस्य U. बलनामैतत्। षष्ठ्यर्थे द्वितीया ... तवतेर्वृद्ध्यर्थस्य तवस्तविष इति महन्नामनी SKN. तद्धि सर्ववस्तुभ्यो ज्यायः Dur.

८. पितोः Mah. अन्नस्य Sy. यस्येत्यन्नस्यापदेशसम्बन्धलक्षणा च षष्ठी। यस्यान्नस्य सम्बन्धिना SKN.

९. सामर्थ्येन Sy.
बलेन यत्कृतेनेत्यर्थः SKN.
बलेन बलाधिपतिरपीन्द्रः Dur.

१०. ०तं D.

११. ०नं D. त्रिस्तीर्णतमः अत्यात्कीर्तित्रिषु क्षित्यादिस्थानेषु तायमानोऽपीन्द्रः Sy. त्रिस्थानत्वं च वाग्व्यात्मना बलकृतिरूपेण वा सवनसम्बन्धेन वा SKN त्रिषु स्थानेष्वप्रतिहतप्रभावः Dur.

१२. दैत्यम् Mah. शत्रुं मेघं वा SKN. मेघम् Dur.

१३. विपर्याणम् M. गतसन्धिबन्धनं कृत्वा ... विगतानि पर्वाणि यस्य तम् Mah. विच्छिन्नसन्धिकम् Sy. विगतपर्वाणं विश्लिष्टावयवसम्बन्धिन, कृत्वेति शेषः SKN. विगतसन्धिबन्धनं कृत्वा Dur.

१४. ०यर्तयत् P. प्यर्तयत् D विविधमर्दितवान्। इन्द्रेण वृत्रोऽत्र बलेनैव हत इत्यर्थः Mah. हिंसितवान् Sy. विविधं मर्दितवान् U पूर्वो विशब्दोऽर्दयतिना वधकर्मणा सम्बद्ध्यते ... विविधं हतवान् हन्ति वा SKN. विविधमर्दयत्यपुनरावृत्तये Dur.

१५. पितुरित्यन्ननाम। पातेर्वा। पिबतेर्वा। प्यायतेर्वा। तस्यैषा भवति..तं पितुं स्तौमि महतो धारयितारं बलस्य। तविषीति बलनाम। तवतेः(वा) वृद्धिकर्मणः। यस्य त्रित ओजसा बलेन। त्रितस्त्रिस्थान इन्द्रो वृत्रं विपर्वाणं व्यर्दयति N.9.25; SKN.III.164. VM. ignores नु This stanza=YV.34.7.

स्वादो॑ पितो॒ मधो॑ पितो व॒यं त्वा॑ वव्रुमहे । अ॒स्माक॑मवि॒ता भ॑व ॥२॥

स्वादो॑[1] पितो॑[2] ।

उप॑ नः पितवा॒ चर॑ शि॒वः शि॒वाभि॑रू॒तिभिः॑ ।
मयो॑भुरद्विषे॒ण्यः सखा॑ सु॒शेवो॒ अद्व॑याः ॥३॥

उप॑[3] न॒ः पितो॑[4] । हे पितो॑[5] अस्मान् । उपागच्छ[6] । शिवकर॑[7] । कल्याणैः[8] । रक्षणै॑ । सुखस्य भावयिता[9] । द्वेष्यजनवर्जित॑ । सखा[10] । सुसुख[11] । अमायावी[12] ।

तव॒ त्ये पि॑तो॒ रसा॒ रजां॑स्यनु॒ विष्ठि॑ताः । दि॒वि वाता॑इव श्रि॒ताः ॥४॥

तव त्ये[13] । तव[14] । ते[15] । अन्न[16] रसान्[17] । अनुतिष्ठन्ति[18] । यथा[19] । अन्तरिक्षे[20] । वाता[21] । तिष्ठन्ति व्याप्ता[22] ।

---

१. हे स्वादो, आस्वादनीय ! पितो पालक ! मधो माधुर्योपेत ! पितो हे पानसाधनान्न ! वयं त्वा त्वां वव्रुमहे सेवामहे । अत्र सर्वत्राननुदात्तानां पूर्वस्यासामान्यवचनत्वेनानिघातत्वम् । अनुदात्तानां तु विशेषवचनत्वान्निघातत्वम् । असकृत्पितुशब्दश्रवणं तस्य प्राशस्त्यज्ञापनार्थम् । हे पितो ! अस्माकमविता तर्पयिता भव Sy. This stanza is not commented on by VM. The commentary of Sy. is therefore added here in full for facility of interpretation.

२. ०तोः P. D. Omitted by M.

३. ०तः M.

४. आगच्छ Sy.

५. यतस्त्वं शिवो मङ्गलः Sy.

६. अतः शिवाभिर्मङ्गलयुक्ताभिः Sy.

७. अद्वेष्यरतः प्रियरत इत्यर्थः Sy.

८. सुखा D. सखिवत्प्रियकारी Sy.

९. अत एव सुष्ठु सुखकरः Sy.

१०. ०वी D द्वयरहित उक्तगुण एव, नतु तद्विपरीतो भवेत्यर्थः । अथवा दृष्टान्तवादोऽयम् । सुशेवोऽद्वया मनःकर्मविसंवादरहितः सखा मयोभुरद्वेष्यश्च भवति तद्वत्त्वमपि भवेत्यर्थः Sy.

११. त्वत्सम्बन्धिनः Sy.

१२. ते स्वाद्वम्लादि षट् Sy.

१३. रजांसि लोकाँल्लोकस्थानार्थान् Sy. रसाः । लोकान् is suggested for रसान्

१४. आनुकूल्येन Sy.

१५. विविधं स्थिताः Sy.

१६. विविधस्थितौ दृष्टान्तः । . . . द्युलोके Sy.

१७. पाताः D. वायवः Sy.

१८. ०प्तां D. प्ता P. ते यथा व्याप्तास्तद्वत् Sy.

१९. VM. *ignores* वि

तव॒ त्ये पि॑तो॒ ददं॑तस्तवं॒ स्वादि॑ष्ट॒ ते पि॑तो।
प्र स्वा॒नासो॒ रसा॑नां तुवि॒ग्रीवा॑इवेरते ॥५॥

तव त्ये पितो[1]। हे स्वादुतम[2]! अमी[3]। त्वाम्[4]। ददतो[5] भवन्ति, पूरणभूयिष्ठो द्वितीयः पाद.[6]। तथा रसानाम्[7]। स्वदितार[8]। अनेककण्ठा.[9]। इव[10]। बह्वीर्वाच[11] प्रेरयन्त्येककण्ठा अपिच[12]।

त्वे पि॑तो म॒हां॑नां दे॒वानां॒ मनो॑ हि॒तम् ।
अकारि॒ चारु॑ के॒तुना॒ तवा॒हिमव॑सावधीत् ॥६॥

त्वे पितो[13]। हे पितो! त्वयि। महतामपि[14]। देवानाम्[15]। मन[16]। निहितम्[17]। अकारि। चारु। प्रज्ञानेन[18]। तव। रक्षणेन। इन्द्रश्च, अहिम्[19]। अवधीत्[20]।

---

१. ०तोः D. Omitted by M. हे पितो पालकाग्न !

२. ते त्वदर्थिनो नरास्तव भोक्तारो भवन्तीति शेषः Sy.

३. तव त्वदनुग्रहात् ते त्वाम् (तुभ्यम्) Sy.

४. दतः M. प्रयच्छन्तो भवन्ति । यद्वा ते पितो इत्यादरार्थम् । अभ्यासे 'हि भूयांसनर्यं मन्यन्ते' Sy.

५. सनां P. D. M. स्वादुम्लावीनां वर्णाम् Sy.

६. स्वेदिता D. स्वेदितार P. स्वादयितारो भक्षयितार एव Sy.

७. तुवीति बहुनाम । प्रवृद्धग्रीवा एव Sy.

८. इवशब्द एवकारार्थः पूरणो वा Sy.

९. प्रकर्षेण गच्छन्ति सञ्चरन्ति ... भूलोकेऽस्तार एव वृद्धाङ्गा भवन्तीति प्रसिद्धम् । अनशने हि ग्रीवा अधो लम्बन्ते । यद्वा तव रसानामत्तारोऽसङ्ख्यातग्रीवा इव भवन्ति रसानां बाहुल्यादिति भावः । एवं बहुरसोपेतमन्नमिति तस्य स्तुतिः Sy.

१०. अपि अपि चं D.

११. VM. ignores तव । पितो

१२. ० तः M.

१३ ० तः M.

१४ पूज्याना महतां वा Sy.

१५ इन्द्रादीनाम् Sy.

१६. अन्नः P. 'अन्नमयं हि सोम्य मनः' (Chā. U. 6.5.4.) इति श्रुतेः Sy.

१७. नितम् P.

१८. कृतम् । अमृतमपि विहाय त्वय्येव वर्तते Sy.

१९. समीचीनेन Sy.

२०. त्वत्कृतेन प्रज्ञानलक्षणेन ... अथवा त्वत्केतुना जगद्रक्षणेन निमित्तेनेति योज्यम् Sy.

२१. मेघं वृत्रं वा Sy.

२२. हतवानिन्द्रः । ... जगद्रक्षणार्थं हीन्द्रेणाहिर्भिद्यते Sy.

यद॒दो पि॑तो॒ अज॑गन्वि॒वस्व॒ पर्व॑तानाम् ।
अत्रा॑ चि॒न्नो मधो॑ पि॒तोऽरं॑ भ॒क्षाय॑ गम्याः ॥७॥

यदद॑: । हे पीयमानसोमाऽन्न ! यद्यपि । इदम् । त्वमितो गच्छसि । यद्यपि च पर्वतानाम् । विवासनमाच्छादनं करोषि तथापि । अत्र । च । अस्माकम् । मादयितः ! भक्षणाय । अल यथा । तथा गम्या, सशेषं गन्तव्यमित्यर्थः ।

यद॒पामोष॑धीनां परि॒शमा॑रि॒शामहे । वाता॑पे पीव॒ इद्भ॑व ॥८॥

यदपाम् । अद्भ्य. । ओषधीभ्यश्च । यं सार । परिशेते त—त्वाम् । यदा वयमास्वादयाम । तदा हे अन्न ! त्वमस्माकमाप्यायकम् । एव । भव, असुरस्य वा भक्षितस्यान्नत्वकरणमिल्वलभ्रातु. ।

यत्ते॑ सोम॒ गवा॑शिरो॒ यवा॑शिरो॒ भजा॑महे । वाता॑पे पीव॒ इद्भ॑व ॥९॥

यत् ते सोम । हे सोम ! यस्मात् । तव । पयोमिश्रित वा तत् । भजामहे ।

---

१. वीय० M. हे पितो अन्न त्वाम् Sy.
२. सोमां न M. ३. यदा Sy.
४. प्रसिद्धं तदुदकम् Sy.
५. ०मिदः P. ६. अगमद् गच्छेत् Sy.
७. मेघानां सम्बन्धि Sy.
८. ०माप्नुनं P. विवस्व, सुपो लुक् । अन्त्यलोपश्छान्दसः । विवासनवता विद्युद्रूपप्रकाशनवतां, विबोधनमुदकलक्षणम् । धनवतां वा Sy.
९. अस्मिन्काले Sy. १०. अस्मान् Sy.
११. ०ता P. माधुर्योपेतान्न !
१२. भक्षण P. D. M.
१३. त्वं नोऽस्मानरम्, अलं सम्पूर्णम् Sy.
१४. गच्छ सन्निहितो भव Sy.
१५. VM. ignores पितो
१६. अपामोषधीनां सम्बन्धि Sy.
१७. येन Sy.
१८. परिशेषं परितः सुखकरमन्नम् Sy.
१९. त्वा P. D. २०. भक्षयामः Sy.
२१. तेनान्नोदकसारेण Sy.
२२. हे वाताप ! वातेन प्राणेनाप्नोति स्वनिर्वाहमिति वातेनाप्यायत इति वा वातापि शरीरम् । हे शरीर, त्वम् Sy.
२३. अप्य० D. आप्यायित एव Sy.
२४. अन्नोदकाभ्यां शरीरवृद्धिः प्रसिद्धा । यद्वा यद्यप्यपामोषधीनां परिशं लेशमास्वादयामस्तथापि हे वाताप वातवत्सर्वव्यापक पितो त्वमल्पमपि पीवः पीवानेव भव Sy.
२५ ०मिललभ्रा० P. २६. ०मः P. D.
२७ ये M. पूर्वमन्नसामान्येन स्तुत्वेदानीं सोमलक्षणमन्नं स्तौति Sy.
२८ P. and D. read सोयमस्मात् for सोम यस्मात्, यमंशम् Sy.
२९. गोविकारक्षीराद्याश्रयणद्रव्यं, यवाशिरो यवविकाराश्रयणद्रव्यम् Sy.
३०. सेवामहे । तेन हे वाताप शरीर ! पीवो भव Sy. ३१. VM. ignores यवाशिरः । वाताप etc.

करम्भ ओषधे भव पीवो वृक्क उदारथिः । वातापे पीव इद्भव ॥१०॥

करम्भः[1]। मन्थं संयुतं करम्भ इत्याचक्षते। स[2] त्वमोषधे! भवास्माकमेवम्[3]। अस्थ्यन्तर्गतमज्जा पीवः[4]। पिण्डाकारो वृक्कः[5]। उदारथिरवगन्तव्य[6]।

तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥११॥

तं त्वा वयम्[7]। तम्[8]। त्वा[9]। वयम्[10]। अग्न[11]! स्वादुनर्मर्वचोभि[12] स्तुवन्तः[13]। गावः। इव। हव्यानि स्वादुनमानि स्तोत्राणि। प्रेरयन्[14]। देवानां प्रीत्यर्थम्[15]। त्वाम्। तं सह माद्यन्तम्[16]। अस्मभ्यं च[17]। त्वा। सधमादम्[18]।

I 188

समिद्धो अद्य राजसि देवो देवैः सहस्रजित् । दूतो हव्या कविर्वह ॥१॥

समिद्धः[19]। स्पष्टम्[20]।

---

१. मन्थसंयुत M.
२. सा D यः करम्भादिरूप. सक्तुपिण्डोऽस्ति तदात्मक हे ओषधे! Sy.
३. ०स्मामेवम् P ०स्मास्वेवम् D
४. अस्थ्यन्तर्गता म० M अथस्यन्तर्ग वा मजा P. अस्थ्यन्तर्गता मजा D. पीवः स्थाल्यवान् Sy.
५. व्याधेर्वर्जयिता Sy. ६. ऊर्ध्वगमनसाधनः। इन्द्रियाणामुद्दीपयिता भव Sy
७. VM. ignores वातापे etc.
८. तादृशं स्तुतम् Sy. ९ त्वा महानुभावम् Sy. १०. सोमरूप! Sy
११. स्य दूतं म्मं. P. १२. स्तुतिवाग्भिः Sy. १३. तत्र दृष्टान्तः। गावो न हव्या, गाव इव हवींष्युत्पादयन्ति तथा त्वत्सकाशात्सोम सुषूदिम Sy.
१४. आरयामो रसान् Sy. १५. किमर्थं कीदृशं चेति चेदुच्यते। देवेभ्य इन्द्रादिभ्यस्तदर्थम् Sy. १६. तं स्व महाद्यन्तः P. तेषां (तैः) सह मादयितारम् Sy.
१७. तुभ्यं P. D. अस्मदर्थमपि Sy.
१८. न केवलं देवेभ्य एव किन्तु सधमादम्, अस्माभिः सह मादयितार हुतशेषरूपम् Sy
१९. P adds अग्ने after समिद्धः। हे अग्ने! देवैर्व्यवहर्तृभिर्ऋत्विग्भिः समिद्धः सम्यग्दीपितो, देवोऽत एव देदीप्यमानः। समिद्धर्वा देवैः सहितः समिद्धः सन्, अद्यास्मिन्यागदिने, राजसि, ईशिषे। हे सहस्रजित् सहस्रस्य धनस्यैतत्सङ्ख्याकाना शत्रूणा वा जेत.! दूतो देवानां दूतस्त्वद्यज्ञादिवार्ताहर आह्वाता वा। 'अग्निर्देवाना दूत आसीत्' (TS 2.5.8.5.) इति श्रुतेः। कवि. क्रान्तदर्शी। ईदृशस्त्वं, हव्या अस्मदीयानि हवींषि। वह देवेभ्यः प्रापय Sy. समिद्धो अद्य राजसि is quoted and described: (एषा ऋक् तनूनपाद्वती) वसिष्ठादिव्यतिरिक्ताना तनूनपाद्याजिनाम्। सर्वेषु प्रत्यृचमेता देवताः। तथा चाह 'सर्वत्र प्रथिताभ्यः स्वस्य' इत्यादि सिद्धम् SKN. III.142 २०. ०ष्टः D. P.

तनूनपाद्घृतं यते मध्वा यज्ञः समज्यते । दधत्सहस्रिणीरिषः ॥२॥

तनूनपात्[1]। हे तनूनपात्[1] ! यज्ञम्[2]। गच्छते[3] त्वया। आज्येन[4]। हवि.[5]। समज्यते। प्रयच्छन्[6]। सहस्रसङ्ख्याकानि[7]। अन्नानि[8] च त्वम्।

आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान् ।
अग्ने सहस्रसा असि ॥३॥

आजुह्वानः[9]। आहूयमान.। अस्माकम्[10]। स्तोतव्य[11]। देवान्। आवह[12]। यज्ञार्हान्[13]। अग्ने[14] त्वम्। सहस्राणा[15] दाता। भवसि।

प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् । यत्रादित्या विराजथ ॥४॥

प्राचीनम्[16]। प्रागग्रम्[17]। बर्हि[18]। बलेनानेन[19]। तदेव वीरयुक्तम्[20]। अस्तृणन्[21]। यस्मिन्[22]। देवा[23] यूयम्। विराजथ[24]।

विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः । दुरो घृतान्यक्षरन् ॥५॥

विराट्[25]। नानाजातीयमनुष्यपरिवृतानि द्वाराणि भवन्ति तत्र क्वचित् विराडुच्यते[26]।

---

१. यज्ञशरीरस्य नपातयिता। यद्वा। आपोऽत्र तन्व उच्यन्त इत्युक्तत्वादपां नपातयिता तासां नप्ता वा। अद्भ्य ओषधय ओषधीभ्योऽग्निरिति नप्तृत्वम् Sy.
२. ऋतं यज्ञम् Sy.
३. अनुतिष्ठते यजमानाय तदभिमतार्थम् Sy.
४. जज्यत P. ज्यज्येन D. मधुरेणाज्यसोमादिद्रव्येण Sy. ५. यज्ञः पूज्यः। यज्ञनिर्वाहकत्वाद्वा यज्ञ ईदृशोऽग्निः Sy.
६. यजमानेभ्यो धारयन् Sy.
७. सहस्रसहस्रसं० M. एतत्सङ्ख्याकान् Sy. ८. कतम् M.
९. अस्माभिराहूयमानः सन् Sy.
१०. अस्मदर्थम् Sy.
११. अस्माभिः स्तुत्य इज्नामकस्त्वम् Sy.
१२. ०नां वह M.
१३. यज्ञार्हं P. D. यज्ञभाजः Sy.
१४. त्वने P. येन D.
१५. ज्ञ P.
१६. अपरिमितधनस्य दातासि Sy.
१७. प्राग्रं P. १८. बर्हिः D.
१९. मन्त्रलक्षणबलेनोपेता ऋत्विजः Sy.
२०. ०नानेकदेव M.
२१. सहस्रसङ्ख्याका वीराः शत्रूणां विशेषेणेरयितारो देवा यस्य तत्तादृक्। यद्वा। अपरिमितवीराः पुत्रादयो येन तादृक् Sy.
२२. आच्छादयन् Sy.
२३. यस्मिन्बर्हिषि Sy.
२४. अदितेः पुत्रा यूयम् Sy.
२५. विविधं राजध्वे तद् बर्हिरस्तृणन् Sy.
२६. वीरा D. विरा P.
२७. ०जातिवयमनुष्य० P.
२८. विशेषेण राजन्त इति व्यत्ययेनैकवचनम् Sy.

सम्राड्[1]च्यते राजद्वारम्। एवं बह्वीरित्यादिष्वपि द्रष्टव्यम्। बह्वीः[2]। भूयसीरिति[3] मनुष्यपरिवृता उच्यन्ते। एवंविधा द्वारः[4]। अस्माकमुदकानि[5]। क्षरन्तु[6]।

सुरुक्मे[7] हि सुपेशसाधि श्रिया विराजतः। उषासावेह सीदताम् ॥६॥

सुरुक्मे[8]। शोभनरुक्माभरणे। हि[9]। मासले[10]। उषासानक्ते[11]। शोभया[12]। अधिविराजतः[13]। ते इह[14]। आसीदताम्[15]।

प्रथमा[16] हि सुवाचसा होतारा दैव्या कवी[17]। यज्ञं नो यक्षतामिमम् ॥७॥

प्रथमा[18]। पूर्वौ[19]। हि[20]। सुवचसौ[21]। दैव्यौ[22]। होतारौ[23]। कवी भवत[24]। तथा सति, इमम्[25]। यज्ञम्। यक्षताम्[26]।

भारतीळे[27] सरस्वति या वः सर्वा उपब्रुवे। ता नश्चोदयत श्रिये ॥८॥

भारती[28]। उत्तरा निगदसिद्धा।

---

१. सम्यगिति पूज्यतरं राजमानाः। अत्रापि व्यत्ययेनैकवचनम् Sy.
२. विभ्यो विविधं भवित्र्यः। प्रभ्वी प्रभ्वयः प्रकर्षेण भवित्र्यः बह्वीर्बहुधः Sy.
३ लोकप्रसिद्धसङ्ख्याभिश्च भूयस्यश्च Sy.
४. दूरः P.D. यज्ञगृहद्वार. सन्ति ताः Sy.
५. Omitted by P. D. ०धा... मुदकानि M. ... प्राण्युपकारार्थम् Sy.
६. रक्षन्तु P. D. क्षरन्ति। यद्वा। बह्वीर्भूयसीरित्येते सङ्ख्यावचने। शिष्टानि तासां नामधेयानि Sy. ७. ०क्म P.
८. ०रुग्भा० D. शोभनदीप्ताभरणे प्रसिद्धे Sy. ९. हियोगादनिघातः Sy.
१०. मांस P. शोभनरूपे ईदृश्यावहोरात्रदेवते Sy ११ तादृश्यावुषसौ, एतद्व्रात्रेरप्युपलक्षणम्। उषःशब्दो दिवसस्योपलक्षकः Sy. १२. सौन्दर्येण Sy.
१३. शोभयति वि० M. अधिकम् Sy.
१४. विशेषेण दीप्येते Sy.
१५. M. reads ततश्च ते उषासानक्ते for ते। रात्रिरुषाश्चोभे Sy.
१६. त इ० P. D. अस्मिन्दिने Sy.
१७. आगत्य तिष्ठनामागच्छतां वा Sy.
१८. प्रथमः P. प्रथमाः D. M. adds हि after प्रथमा।
१९. मुख्यनामैतत्। प्रतमौ प्रकृष्टतमौ Sy.
२०. हिः प्रसिद्धौ Sy. २१. प्रियवचनौ Sy.
२२. देवाहौ Sy. २३. देवानामाह्वातारौ होमनिष्पादकौ वा Sy. २४. मेधाविनावेतौ Sy. २५. भतः D. २६. नोऽस्मदीयमिमम् Sy. २७. यजतां गच्छतां वा Sy. २८. VM. ignores नः
२९ हे भारति! भरत आदित्यः। तस्य सम्बन्धिनी भारती तादृशि द्युलोकदेवते हे इळे भूदेवि। हे सरस्वति, सरो वायुरुदकं वा तद्वति, अन्तरिक्षदेवते तादृशि देवि! एताः क्षित्यादिदेवताः। एतास्तिस्रः आदित्यप्रभावविशेषरूपा इत्याहुः। यास्तिस्रः सर्वा वो युष्मानुपब्रुव उपेत्य स्तौमि। ता यूयं नोऽस्मान् श्रिये सम्पदे चोदयत प्रेरयत Sy.

त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे । तेषां नः स्फातिमा यज ॥९॥

त्वष्टा रूपाणि[1] । त्वष्टा[2] । रूपाणि[3] । हि[4] । प्रभु[5] । द्विपदश्चतुष्पदश्च[6] । पशून्प्रति[7] । सयोजयति[8] । त्वष्टः[9] ! तेषा[10] पशूनाम् । वृद्धिम् । अस्मभ्यम्[11] । देहि[12] ।

उप त्मन्या वनस्पते पाथो देवेभ्यः सृज । अग्निर्हव्यानि सिष्वदत् ॥१०॥

उप त्मन्या[13] । उपसृज[14] । वनस्पते[15] ! त्वमात्मनैव । अन्नम्[16] । देवेभ्य[17] । अग्नि[18] । हव्यानि[19] । स्वादूनि कृतवान्[20] ।

पुरोगा अग्निर्देवनां गायत्रेण समज्यते । स्वाहाकृतीषु रोचते ॥११॥

पुरोगाः[21] । पुरो गन्ता[22] । अग्नि[23] । देवानाम् । गायत्रमाम्ना[24] । आच्छाद्यते[25] । स्वाहाकृतीषु[26] । रोचते[27] ।

---

१. यज्ञसाधनपात्राभिमानी देवः Sy.
२. योनौ सृष्टानि रेतांसि रूपाणि कर्तुम् Sy.
३. हिशब्दः श्रुत्यन्तरप्रसिद्धिद्योतनार्थः । 'यावच्छो वै रेतसः सिक्तस्य', 'त्वष्टा रूपाणि विकरोति' (TS. 1. 5. 9. 1-2) इति श्रुतेः Sy.
४. ०भु D. स देवः Sy.
५. ०दश्चतु० D. सर्वानपि Sy.
६. अस्मदीयान् गवादिकान् Sy.
७ सम्यगनक्ति व्यक्तीकरोति Sy.
८. ०ष्टा P. D.
९. अथ प्रत्यक्षः । तेषामक्तानाम् Sy.
१०. अस्मदर्थम् Sy.
११. सर्वतः पूजय कुर्वित्यर्थः Sy. VM. ignores आ
१२. उत्पादय । यूपाभावे पशुनियोजनाभावेन हविषोऽभावात् Sy.
१३. यूपाभिमानिदेव ! Sy.
१४. पशुरूपमन्नम् Sy
१५. अग्न्यादिभ्यः Sy.
१६. त्वयि, एवं कृतवति सति ... हवींषि Sy.
१७. स्वदयतु स्वादूकरोतु Sy.
१८. असुरयुद्धं प्रति पुरोगामी । यद्वा देवानां मध्ये यज्ञम्प्रति, अग्निरेव पुरोगामी । अत एवाग्रणीत्वादेवाग्निशब्दो निष्पन्नः Sy. 'अग्निः कस्मात् । अग्रणीर्भवति N 7. 14.
१९ तादृशोऽयम् Sv.
२०. एतदुपलक्षितेन मन्त्रेण Sy.
२१ ०म्ना छा० P. सम्यग् लक्ष्यते Sy.
२२. ० ति० D. स्वाहाकारेषु सत्सु हविष्षु दीयमानेषु Sy.
२३. अत्यर्थं दीप्यते । एताः प्रयाजदेवता यज्ञावयवाभिमानिन्यः । तद्द्वारा यज्ञ एव स्तूयत इति केषाञ्चिन्मतम् । अग्नेरेव नामान्तरमित्यन्ये Sy.
Ms. D puts the figure ॥१८८॥ here to indicate the end of one hundred and eightyeighth hymn. No such number is given in P. and M.

I.189.

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान्विश्वा॑नि देव व॒युना॑नि वि॒द्वान् ।
यु॒यो॒ध्य॑स्मज्जु॒हु॒रा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑उक्तिं विधेम ॥१॥

अग्ने नय। [१]अग्ने! [२]नय। [३]शोभनेन मार्गेण। [४]धनाय। [५]अस्मान्। [६]विश्वानि। [७]देव! [८]प्रज्ञानानि। [९]जानन्। [१०]पृथक् कुरु। [११]अस्मत्त। [१२]कुटिलत्वमाचत्। [१३]एन। [१४]भूयिष्ठम्। [१५]नमोवचनम्।

---

१. अज्ञानादिगुणविशिष्ट! Sy. हे भगवन्नग्ने! U. २. अग्ने। नय is omitted by P. प्रापय Mah., U.

३. शोभमानेन मार्गेण Mah., U. शास्त्राविरुद्धेन। 'परादिश्छन्दसि' इत्युत्तरपदाद्युदात्तत्वं 'आद्युदात्तं द्व्यच्छन्दसि' इति तु न भवति। अन्तोदात्तत्वात्पथिच्छब्दस्य। ऋत्वादिर्वा द्रष्टव्य.। 'न पूजनात्' इति समासान्तप्रतिषेध। ईदृशेन मार्गेणास्मान्नय BB

४. यज्ञफलाय Mah, U गन्तव्याय स्वर्गादिधनाय। द्वितीयार्थे वा चतुर्थी। प्रापणीयं रयिं प्रति S\ हविर्लक्षणाय। तदीयहविस्सम्पादनयोग्या यथा वयं भवामस्तथा कुर्वित्यर्थः BB.

५. अनुष्ठातॄन् Mah. यतो विद्वानतस्त्वमस्मान् Sy.

६. सर्वाणि Mah., Sy., U.

७. द्योतमान! Sy. दानादिगुणयुक्त U.

८. मार्गान् ज्ञानानि वा Mah प्रज्ञानानि। अनेनैतदनुष्ठितमिदं प्रायणीयम् Sy. प्रकृष्टज्ञानानि U. ज्ञानान्यभिप्रायान्। 'अजियमिशीड्भ्यश्च' इत्यजेरुनन्प्रत्ययः। 'अजेर्व्यघञपोः' इति वीभावश्च BB.

९. जानानस्त्वम् Mah. यदेतज्ज्ञानमस्ति तद्विद्वानित्यर्थः Sy. नहि ते विज्ञानशक्तीनां प्रमाणमस्तीत्यभिप्रायः U.

१०. पृथक् कुर्वन् P. पृथु कुर्वन् D. 'यु मिश्रणामिश्रणयोः' Mah. 'यु पृथग्भावे' U. अपनय। यौतिः पृथग्भावे। लोटि 'बहुलं छन्दसि' इति शपः श्लुः। 'वा छन्दसि' इत्यपित्त्वाभावेनाङित्त्वात् 'अङितश्च' इति घिभावः BB.

११. अनुष्ठातृभ्यः Mah. मत्तः U.

१२. हूर्च्छितुं कुटिलीकर्तुमिच्छतीति जुहुराणम्। अभिलषितक्रियाप्रतिबन्धकमित्यर्थः Mah. कुटिलकारि Sy. हूर्च्छितुमिच्छति U. कुटिलस्वभावम्। 'हूर्च्छा कौटिल्ये' इत्यस्मात् 'हूर्च्छेस्सनो लुक् छलोपश्च' इत्यानच्प्रत्ययः। हूर्च्छितुमिच्छति जुहुराणम्। यद्वा 'हृ प्रसह्यकरणे' जुहोत्यादिक, तस्मात्ताच्छीलिके चानशि शपः श्लुः। 'बहुल छन्दसि' इत्युत्वम् BB. ०माचरत् is suggested for ०माचत्

१३. आचतेनः M पापम् Mah. पापं फलप्रतिबन्धरूपम् Sy. अभिलषितक्रियाप्रतिबन्धि यत्पापम् U. पाप दर्शपूर्णमासातिपत्तिलक्षणम् BB.

१४. बहुलतमाम् Mah. अतिप्रवृद्धाम् Sy. बहुतमाम् U. १५. हविषां वचनं, याज्यापुरोनुवाक्यालक्षणाम्...नम इत्यन्नाम। यद्वा। नमस्कारविषयामुक्तिसम्पादयाम Mah. नमस्कारोक्तिं स्तुतिम् Sy. 'वच परिभाषणे' अस्य स्त्रियां क्तिन्। उक्तिर्भणनम्। नमसा हविर्लक्षणेन। पुरोनुवाक्यायाज्यावचनं नमउक्तिस्तां नमउक्तिम् U. नमस्कारोक्तिम्। नमस आद्युदात्तत्वम् BB.

तव[1]। कुर्मः[2]।

अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥२॥

अग्ने त्वम्[3]। अग्ने[4] त्वम्[5]। पारय[6]। स्तुतय[7]। अस्मान्[8]। कल्याणै[9]। दुर्गाणि। अतिपारय[10]। सर्वाणि। त्वमेवास्माकम्[11]। विस्तीर्णम्[12]। पुरम्[13]। भव[14]। विस्तीर्णा[15]। च[16]। पृथिवी भव च[17]। पुत्राय

---

१. तुभ्यम् BB.

२. करवाम Mah. परिचरेम, कुर्मः Sy. दधातिः करोत्यर्थः। करवाम U. क्रियास्म। 'विध विधाने' BB.
This stanza=YV. 5.36.; TS. 1.1.14.3.

३. अग्ने। त्वम् is omitted by P.

४. कर्म समापय्यातिपारय, अतिक्रामय Sy. 'अन्येषामपि दृश्यते' इति सहिताया दीर्घत्वम् BB.

५. स्तुत्यः is suggested for स्तुतयः। नव्यो नवतरः स्तुत्यो वा त्वम् Sy. नव एव नव्यः 'वस्वपसोकर्कविक्षेमवचोनिष्केवलोक्थजनपूर्वनवसूरमर्तयविष्ठेभ्यश्छन्दसि स्वार्थे यट्वक्तव्यः' इति स्वार्थे यत्प्रत्ययः। 'यतो नाव' इत्याद्युदात्तत्वम्। नव्यो अस्मानिनि 'प्रकृत्यान्तःपादमव्यपरे' इति प्रकृतिभावः BB.

६. यागानुष्ठातॄन् Sy.

७. केन साधनेन। स्वस्तिभिः, अस्तिरभिपूजितः। सुशब्दः शोभनवचनः। अत्यन्तं पूजितैर्यज्ञादिसाधनैः Sy. शोभनैर्मार्गैः, दुर्गातिक्रमणोपायभूतैः। 'अस गतौ' 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच्। 'तितुत्र०' इतीट्प्रतिषेधः। कृदुत्तरपदप्रकृतिस्वरत्वम् BB.

८. दुर्गमनानि पापानि। अनतिक्रमणीयानि दुरितान्यानि Sy. दुःखेन गच्छन्ति येषु तानि दुर्गाणि, विध्यपराधलक्षणानि पापानि। 'सुदुरोरधिकरणे' इति गमेर्डः, कृदुत्तरपदप्रकृतिस्वरत्वम् BB.

९. तान्यतिक्रम्यास्मान्पारय।...'पार तीर कर्मसमाप्तौ'। अविकलकर्मणः कुरु BB.

१०. विश्वानि। 'शेश्छन्दसि बहुलम्' इति लोपः BB.

११. अस्माकं तत्र वसताम् Sy.

१२. पृथुतरा Sy. विस्तीर्णा महावकाशा, अविकलकर्मफलोपभोगयोग्या भवत्विति शेषः। पृथुशब्दः कुप्रत्ययान्तत्वादन्तोदात्तः। 'ओतो गुणवचनात्' इति ङीप्, 'उदात्तयणो हल्पूर्वात्' इति नद्या उदात्तत्वम् BB.

१३. पुरी अपि।...पूरिति जात्येकवचनम् Sy. नगरी निवासस्थानम् BB.

१४. भवत्विति शेषः।...पुराण्यपि भवन्त्वित्यर्थः Sy.

१५. बहुतरा भवतु Sy. बहुला भवतु, बहुभिर्धनधान्यपश्वादिभिस्तृप्ती भवतु। सिध्मादिलक्षणो लच्। यद्वा बहूनामर्थानां लात्री, आदात्री, उत्पादयित्री भवतु, लातेः 'आतोऽनुपसर्गे कः' इति कः BB.

१६. चशब्दो वक्ष्यमाणेन सह समुच्चयार्थः Sy.

१७. पृथ्वी, अपि Sy. मेदिनी। स एव स्वरः BB. १८. च is unnecessary.

१९. तोकायापत्याय।...तोकशब्दोऽपत्यसामान्यवचनः Sy.
अस्मदीयायापत्याय BB.

च[1]। तत्पुत्राय च। शं[2] च। योश्च[3]।

अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः।
पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥३॥

अग्ने त्वमस्मत्[4]। अग्ने। त्वम्। अस्मत्त[5]। रोगान्। पृथक् कुरु रक्षसो वा[6]। येऽग्निना[7] मनुष्या[8] न रक्ष्यन्ते[9]। ते रोगैः अभिभूता[10] भवन्ति। पुनरपि मुमूर्षुभ्यः[11][12]। अस्मभ्यम्[13]। अभ्युदयाय[14]। देव[15]! सर्वैः। देवैः[16] सह। इमा पृथिवीम्[17]। कुरु[18]। यष्टव्य[19]!

पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान्।
मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं संहस्रः ॥४॥

पाहि नः[20]। रक्ष। अस्मान्। अग्ने! तेजोभिः[21]। अजस्रैः[22]। अपिच। प्रियायाम्[23]। उत्तर-

---

१. तनयाय पुत्राय। ... तनयशब्दः पुत्रवचनः Sy. तस्यापत्यायास्मत्पौत्राय BB
२. शं सुखम् Sy. शमयिता रोगाणां भव। शमेर्ण्यन्तात्क्विप्। मिता ह्रस्वः, 'णेरनिटि' इति णिलोपः BB.
३. योश्चं D. योः, मिश्रयिता भव। यद्वा रोगाणां शमनं भयानां यावनं च भव कुर्वित्यर्थः Sy. यापयिता पृथक्कर्ताऽऽगामिना भयानामस्मदीयजनसकाशादपनेता च भव। यौतेः 'अन्येभ्योऽपि दृश्यन्ते' इति क्विप्। 'ओतो णित्' इति बहुलवचनान्न भवति। 'षष्ठ्यर्थे चतुर्थी वक्तव्या' इति वा 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति वा चतुर्थ्यर्थो। तोकं तनय च रक्षितुं श योश्च भव। 'द्व्यचोऽतस्तिङः' इति संहितायामस्य दीर्घत्वम् BB.
This stanza=TS.1.1.14 4.
४. ०स्मन् D.
५. व्यावर्तय Sy.
६. याः Sy.
७. येनिना D.
८. प्रजाः Sy.
९. क्षन्ते P. D. अपालिताः Sy.
१०. अभिमिमतेऽस्मान्। यच्छब्दाध्याहारादनिघातः। ता युयोधि। यद्वा ता अनग्नित्राः पापिन्यः कृष्टयः प्रजा अभ्यमन्त। त्वयाऽभ्यमितुमभितो रोगैः प्रापयितुमर्हन्ति। वयन्तु न तादृशा अतोऽस्मत्तो वियोजयेत्यर्थः Sy.
११. न केवलं वियोगमात्रमपि तु पुनः पुनरिदं कर्तव्यम् Sy.
१२. मुमूषुभ्यां P.
१३. अस्मदर्थम् Sy.
१४. शोभनफलाय Sy.
१५. द्योतमानाग्ने! Sy
१६. अमरणधर्मभिरन्यैर्यष्टव्यैर्देवैः सह Sy.
१७ देवयजनलक्षणाम् Sy.
१८. आगच्छेति शेषः Sy.
१९. ०व्यः P. D. ०व्य M.
२०. पालय Sy.
२१. पालनप्रकारैः Sy.
२२. अनवरतैरविच्छिन्नैः Sy.
२३. प्रियाम् P.D. M. तव प्रियभूते Sy.
२४. यागगृहे Sy.

वेद्याम्[1]। दीप्तः। तव। स्तोतारम्। युवतम! मा। भयम्। गच्छतु[2]। अद्य च[3]। श्वश्च। बलवन्[4]!

मा नो अग्नेऽवं सृजो अघायाविष्यवे रिपवे दुच्छुनायै।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥५॥

मा नो अग्ने। मा। अस्मान्। अग्ने! प्रयच्छ[5]। आहन्त्रे[6]। योऽध्वन्यागतानपि न मुञ्चति[7] सोऽविष्यु, विलेपनाद् रिपु, दुर्वृद्धिर्दुच्छुना, तस्मै। दन्तयुक्ताय[10]। दशनं कुर्वते[11]। मा[12]। परा दा[13]। मा च। भक्षणं कुर्वते[14]। हिंसित्रे[15] च। बलवन्[16]!

वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथम्।
विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥६॥

वि घ त्वावान्[17]।

---

१. आ सर्वतः शुशुक्वान् दीप्यमानो भवेति शेषः Sy.
२. मा लभतां, माऽऽप्नोतु Sy.
३. श्वश्च D. अपरस्मिन्काले।...अपरमदन्यं वा मा विवत् Sy.
४. बलवान् P.M.
५. VM. ignores आ। मा
६. प्रेच्छय M. मा त्याक्षीः। तवधीन मा कुर्वित्यर्थः Sy.
७. हिंसकाय Sy.
८. ०ध्वान्यागतानवि P.
९. सा विष्टघुविलेपनाद्रिपुर्दुर्बुद्धिर्दुश्चना तस्मा D. सो विष्टघुविलेपन.... वृद्धिर्दुच्छुना तस्मात् M. अविष्यवे, अविष्यतिरक्षिकर्मा। अग्नेच्छवे। दुच्छुनायै, शुनं सुखम्। दुष्टसुखकारिणे, दुःखकारिण इत्यर्थः। तस्मै रिपवे Sy.
१०. दत्त P. D. तथा नोऽस्मान्...दन्तवते Sy.
११. खादते सर्पाद्यर्थे माऽवसृजः Sy.
१२. पि P.
१३. पराभूतं मा देहि सर्वथा न देहीत्यर्थः Sy.
१४. क्षणं P D. अदन्तकाय भुङ्क्तादिभिर्घातिने Sy.
१५. रिषते हिंसकाय तस्कररक्षसादये Sy.
१६. ०वान् P. सहस्विन् Sy.
१७. VM. ignores नः
१८. VM. does not comment on this stanza, although it has not been explained before. हे ऋतजात यज्ञार्थमुत्पन्नाग्ने! वरूथं वरणीय त्वा, तन्वे शरीरपोषाय गृणानः स्तुवन्। त्वावान्, त्वया देवतया तद्वान् जनो वि घ यंसद् विमुञ्चति खल्वात्मानम्। कस्मात्सकाशात्? रिरिक्षोर्हिंसितुमिच्छोश्चोरादेः सकाशात्। उत वाऽथवा निनित्सोर्निन्वितुमिच्छतः। हे देव! अभिह्रुतामाभिमुख्येन कुटिलं कुर्वतां द्विषां, विष्पड् विशेषेण बाधकोऽसि हि। अतस्त्वदनुग्रहार्थं जनो वि यंसत् Sy.

त्वं ताँ अग्न उभयान्वि विद्वान्वेषिं प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥७॥

त्वं तान्[1]। मायाविनोऽमाय[2]विनः। जानन्। विविच्य[3]। अभिगच्छसि[4]। प्राप्तौ[5]। यष्टव्य[6]! यजमानस्य। तथा त्वम्, अभिप्राप्तौ[7]। यजमानाय[8]। हविर्वहनायानुशासनीय[9]। भवसि[10]। परिचरणीय[11]। ऋत्विग्भिरसुरैश्च[12]। न[13]। आक्रान्त[14]।

अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥८॥

अवोचाम[15]। अग्नेराभिमुख्यानि वक्तव्यानि[16] स्तोत्रवचनानि। वयमवोचाम[17]। अग्नौ[18]। कुम्भसूनु। शत्रुषु[19] सहस्कुर्वति[20]। अग्नौ स्तोत्रमुवाच। वयम्, दृश्यमानैर्मन्त्रैः[21]। धनसहस्रम्[22]। लभेमहि, अग्नेर्वा तेजोभि[23]।

---

१. तान् यष्टॄन् Sy.
२. P. and D. read मायाविनश्च for मायाविनोऽमायाविनश्च। अयष्टॄंश्च Sy.
३ कामयसे यष्टॄन् Sy.
४. सन्निहित एव काले Sy.
५ ० व्यं M. ० व्या D.
६. मनुष्यान् Sy.
७. अभिप्राप्तकालेऽभिगमनवति यज्ञे वा Sy.
८. मनवे, षष्ठ्यर्थे चतुर्थी। मनुष्यस्य यजमानस्य Sy.
९. ० नास D.M. हविर्वहनास P.
१०. शिक्षणीयः Sy.
११. भव। इदं कुरु, इदं कुर्विति विधेयो भव Sy.
१२. ०णीवः D.M. शोधयिता यजमानः Sy.
१३. कामयमानैर्ऋत्विग्भिः Sy.
१४. इव Sy.
१५. आक्रमिता त्वम् Sy.
१६. VM. ignores त्वम्। तान्। अग्ने
१७. ०रभि० P.
१८. नियमपूर्वकानि वचांसि स्तोत्ररूपाणि Sy.
१९. ब्रूमः Sy.
२०. अनाग्नौ P.
२१. कंभ० D. मीयत इति मानो मन्त्रः। तस्य सूनुरग्निः मन्त्रेणोत्पाद्यमानत्वात्। सप्तम्यर्थे प्रथमा। मानस्य सूनौ Sy.
२२. शशत्रु० D.
२३. शत्रूणामभिभवतरि Sy.
२४. एभिः Sy.
२५. अतीन्द्रियार्थप्रकाशकैर्मन्त्रैः. साधनैः Sy.
२६. अपरिमित धनम् Sy.
२७. सम्भजेमहि Sy.
२८. ०मह्याढनमित्येवमध्वर्यूणां हविष उद्यतिमनुजानाति होतश्च श्लोकं यच्छति ग्नेर्वा M.
२९. VM. ignores विद्याम etc. Ms. D. puts the figure ॥१८९॥ here to indicate the end of one hundred and eightyninth hymn. No such number is given in P. and M.

I.190.

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥१॥

अनर्वाणम्[1] । अप्रत्यृनम् । वृषभम्[2] । मोदनजिह्वम्[3] । बृहस्पतिम्[4] । वर्धय[5] । स्तुत्यम्[6] । मन्त्रैः[7] । सुरुच[8] । यस्य बृहस्पते[9] । देवाः[10] । गाथाना प्रेरयितु[11] कारो[12] । मनुष्याश्च[13] । आशृण्वन्ति[14] । स्तूयमानस्य[15],

---

१. अगन्तारम् । स्तोतुरधीनमित्यर्थः Sy. अगतमन्यं प्रत्याश्रिततयाऽपराधयमित्यर्थः SKN. स्वेन महिम्ना युक्तम् । अप्रतिगतं कञ्चिदन्यं प्रत्यधीनत्वेन Dur.

२. ०भ M. अपां फलानां वर्षितारम् Sy. वर्षितारम् SKN., Dur.

३. ०ह्व M. मादकवाचम् Sy. मन्द्रयतिरर्चतिकर्मा । जिह्वेति वाङ्नाम । मन्द्रा जिह्वा वाग्यस्य स मन्द्रजिह्वस्तं स्तुत्यवाचमित्यर्थः । मोदनवाचं वा । सर्वे हि बृहस्पतेः स्तनयित्नुलक्षणां वाचमुपश्रुत्य मोदयन्ते SKN. हर्षकरो हि तस्य जनानां स्तनयित्नुघोषः । 'जिह्वा घोषः' (Ngh. 1.11.) इति हि वाङ्नामसु पठितम् Dur.

४. मन्त्रस्य पालयितारमेतन्नामकं देवम् Sy. अत एवंगुणं बृहस्पतिम् SKN.

५. अवर्ध० P. D प्रवृद्धं कुरु Sy. स्तुहि, अन्तरात्मन् SKN.

६. स्तुभ्यं P. D. तुभ्यं M. नवतरं स्तुत्यं वा तम् Sy. कीदृशं बृहस्पतिम् ? ... नवनीयं स्तुत्यम् SKN.

७. अर्चनसाधनैर्मन्त्रैः Sy. स्तुतिरूपैः SKN.

८. सुरोच P. शोभनदीप्तेः Sy. विद्युद्रूपतया सुदीप्तः SKN. सुदीप्तिमन्तः Dur.

९. ०ते P. कर्मणि षष्ठ्यः । रोचमानं स्तूयमानम् Sy.

१०. व्यवहर्तारः Sy.

११. गाधाना P. D. गाढानां M. गाथेति वाङ्नाम । स्तुतिवचसो नेतारः Sy. यस्य बृहस्पतेः किमुच्यते । ... गाथेति वाङ्नाम सा चार्थसामर्थ्यात् स्तनयित्नुलक्षणा, तां दर्शयति प्रेरयति गाथान्यः स्तनित इत्यर्थः ... अथवा गाथाः स्तुतयस्तासां नेता बृहस्पतिर्गाथानीः कुत एतत् ? पुरोहितत्वात् । 'बृहस्पतिर्हि (०र्हं वै AB) देवानां पुरोहित (AB. does not read आसीत्) आसीत्' (AB 8.26.) इति श्रुतेः । तस्य गाथान्यः SKN.
स्तुतिप्रापणार्हाः Dur.

१२ कारो P. D. करो M.

१३. मनुष्या होत्रादयः । यद्वा नवमानस्य स्तुवानस्य यजमानस्य सम्बन्धिनस्ते ... पुरा त बृहस्पति वर्धय Sy. नच केवल मनुष्या देवा मनुष्याश्च SKN.

१४. आश्रावयन्ति Sy. आभिमुख्येनाकर्णयन्ति SKN. आभिमुख्येन स्थित्वा शृण्वन्त्यादरेण Dur.

१५. कर्मणि कर्तृप्रत्ययः Sy. तनतेः शब्दकर्मणश्छान्दसमेतद्रूपम् । स्तनयित्नुलक्षणं शब्दं कुर्वतः । ... नवमानस्य स्तुवत इत्येवमितिहासदर्शनेन व्याख्येयम् SKN. नवो हि मानस्तस्य, अहन्यहन्यनया स्तुत्या स्तुत्यस्य भवति तेनासौ नवमानस्तस्य । अथवा नवमानस्य प्रशासत इत्यर्थः Dur.

अन्येषु[1] तु देवेषु स्तूयमानेषु न देवाः शृण्वन्ति[2]।

तमृत्विया[3] उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि।
बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥२॥

तमृत्विया[3]। बृहस्पतिरुद्गातृणाम्।

उपस्तुतिं[4] नमस उद्यतिं[5] च श्लोकं यंसत्सवितेव[6] प्र बाहू।
अस्य क्रत्वाहन्यो[7] यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥३॥

उपस्तुतिम्[4]। प्रयच्छति स्तुध्वमित्येवमध्वर्यूणाम्। हविषः[6]। उद्यतिमनुजानानि। होतुश्च[8]।

---

१. Omitted by P.

२. अथवाऽयमन्यो मन्त्रार्थः. स्यादेतिहासिकपक्षेण—मन्द्रजिह्वः, हर्षकरी हि जिह्वा तस्य स्तुतिः। गाथानी. स एव पौरोहित्येन गाथा स्तुतीर्नयति देवान्प्रति। स एव च सुरोचनः। तस्यैव च नवमानस्य स्तुवतो देवा आशृण्वन्ति मर्ताश्चDur अनर्वमप्रत्यृतमन्यस्मिन्। वृषभं मन्द्रजिह्वं मन्वनजिह्वं मोदनजिह्वमिति वा। बृहस्पतिं वर्धय नव्यमर्करचंनीयैः स्तोमैः. N. 6.23; SKN. II. 474.

३. VM. does not comment on this stanza although it has not been explained before. तं बृहस्पतिमृत्विया वर्षर्तुसम्बन्धिन्यो वाचो माध्यमिका उपसचन्ते समीपे सेवन्ते। यः सर्गो न उदकस्य स्रष्टापि। नशब्दोऽप्यर्थे। देवयतां देवानिच्छतां यजमानानामसर्जि फलम्। यद्वा देवं तमिच्छता मनुष्याणामसर्जि सृष्टवान्वृष्टचुदकम्। यद्वा, ऋत्वियाः प्राप्तकालीना वाचो होत्रादिप्रेरिता वाच उपसचन्ते तं यः सर्गो न उदकमृष्टिरिव। सः, स एव बृहस्पतिः। अञ्जो हि व्यञ्जकः खलु। तस्मिन्वर्षति सर्वे व्यक्ता भवन्ति। अत एव विभ्वा विभुर्व्याप्तो मातरिश्वा वृष्टिनिर्मातर्यन्तरिक्षे चेष्टमानो वायुसदृशो वा। वरांसि वरणीयानि वृष्ट्यादिफलानि सम्पादयन्। ऋते, उदके निमित्तभूते सति समभवत् सम्भूतः। अथवा। अञ्जो यज्ञियानां पदार्थानां व्यञ्जको मातरिश्वा फलस्य निर्मातरि यज्ञे श्वसिता वर्तमानः स बृहस्पतिर्ऋते यज्ञे निमित्तभूते सति वरांसि वरणीयानि हवींष्यिच्छन् विभ्वा विभुः समभवत् Sy.

४. प्रयच्छ is suggested for प्रयच्छति

५. तुद्धमि० P. स्तुद्धमि० D.

६. ०षा P. अयं बृहस्पतिरुपस्तुतिं यजमानेनोपेत्य क्रियमाणां स्तुतिं, नमसो हविर्लक्षणस्यान्नस्य Sy.

७. उद्यत्रम् P. उद्धारं च Sy.

८. होतश्च P.

श्लोकम्[1]। यच्छति[2]। सवितेव[3] चोद्यन्[4] प्रसवाय। बाहू[5]। प्रेरयति[6]। योऽस्मिल्लोके[7]। शत्रूणामहन्तव्यः[8]। भवति सः[9]। अस्य[10]। प्रज्ञानेन[11] तथा भवति, सोऽयम्। मृग.[12]। इव[13]। भयङ्करः[14]। राक्षसवर्जितः। वृद्धिमान्[15]।

अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥४॥

अस्य श्लोकः[16]। अस्य। स्तोत्रम्। देवेषु[17]। वर्तते[18]। पृथिव्या च। सोऽयम्, अश्व[19]। इव। भ्रातृव्यं प्रयच्छति[20]। आजाया ?[21] भर्ता स्तोतार बिभर्तीति वा। विविधप्रज्ञान[22]। मृगाणा हननाय। व्याधानाम्[23], इव। आयुधानि[24]। यस्येमा[25] वाच[26]। बृहस्पते। अहन्तव्यमायान्[27]। द्योतमानान् राक्षसान्। अभियन्ति[28][29]।

---

१. अन्यो यो मन्त्रविशेषोऽस्ति त च Sy.
२. प्रकर्षेण यतते स्वीकर्तुम्। यजमानो वा तत्सर्वं प्रयच्छत्यस्मै Sy.
३. तत्र दृष्टान्तः। सवितेव सूर्य इव, स यथा स्तोत्रादिकं स्वीकरोति तद्वत्। यजमानप्रदानपक्षे सविता सर्वस्य प्रसविता सूर्य इव। स यथा बाहुभ्यः प्रकाशादि प्रयच्छति तद्वत् Sy.
४. ०द्यत् D. M.
५. वा बाहू P. बाहुभ्या यजमानोऽप्योत्यर्थ Sy.
६. या P. यः सूर्यः Sy.
७. अस्ति D. M.
८. अह्नि साधु. Sy.
९. बृहस्पते. Sy.
१०. कर्मणा सामर्थ्येन Sy.
११. मृग इव ... सिहादिरिव Sy.
१२. भयजनकः ... भीमो भयहेतुः Sy.
१३. स्वविरोधिरक्षोरहिनस्य Sy.
१४. बलवान् परिभ्रमतीति शेषः। यस्य माहात्म्येन मन्त्राभिमानिनो बृहस्पतेः सामर्थ्यान्मन्वेहाद्यसुराञ्जित्वाऽतितेजस्वी भवति। तादृशो महानुभावो यजमानदत्तं हविरादिक स्वीकरोतीत्यर्थः Sy.
१५. बृहस्पतेः Sy.
१६. स्तुत्यात्मिका कीर्तिर्गर्जितवाग्वा Sy.
१७. द्योतमाने द्युलोके Sy.
१८. गच्छति व्याप्नोति Sy.
१९. सोमयश्च P. यो बृहस्पतिरत्यो न, अतनशील आदित्य इव Sy.
२०. नियच्छति फलम् Sy.
२१. पूजित हविरादिकं वधानः Sy.
२२ चिवम प्रज्ञान. P. वाविध० M. विविधं चेतयिता प्राणिनां विशिष्टप्रज्ञायुक्तो वा Sy.
२३ मृगाणां हन्तुमन्विष्यताम् Sy.
२४. आयुधानीव Sy.
२५. P. D. read येमाः for यस्य। इमाः।
२६. हिंस्राण्यायुधानि यन्ति गच्छन्ति च Sy.
२७. ० मानान् P. आगत्य हन्त्र्योऽन्तरिक्षचारिण्यो वा माया येषां वृत्रादीनां तानसुरान् Sy.
२८. दिवसान् Sy.
२९. तान्यायुधानि, अभिलक्षयन्ति च। उपसर्गश्रुतेर्योगक्रियाव्याहारः Sy.
३०. VM. ignores च

ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।
न दूढ्ये३ अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥५॥

ये त्वा । ये । त्वा । देव ! अजवालमिव । मन्यमाना । साधुम् । पापा । जनमुपजीवन्ति ।
वलिन । न । दुर्बुद्धिभ्यस्तेभ्य । धन नत् । अनुत्रमेण । ददासि । किन्नु त हिंसकम् । चयसे । एव,

---

१. यजमानाः Dur.
२. त्वां M. त्वाम् Sy., Dur.
३. Omitted by P. बृहस्पते ! Sy. दानादिगुणयुक्त ! Dur
४. अजपाल० D. अजपाल० is suggested for अजवाल० उस्रियेति गोनाम। कुत्सितामल्पक्षीरोत्स्राविणीं गां जीर्णमनड्वाहं वा Sy. उस्राविणं भोगानाम्। ...अथवा ...उस्रियाशब्दो गोनाम । छान्दसोऽयं यकारस्य ककारादेशः । गौणश्चायमत्र गौर्वाहीक इति यथा । उस्रिकं गां गोसदृशं मूर्खं मन्यमाना इत्यर्थः SKN
५. ऋजुरय वराको न मुधैव भागान्ददातीत्येवं मन्यमाना इत्यर्थः SKN. दातैव केवलं भोगानामयमार्जवेन, न प्रत्युपकारार्थीत्येव मन्यमानाः Dur.
६. कल्याणम् Sy. भन्दनीय स्तुत्यम् Dur
७. वाचा P. पापबुद्धयोऽल्पाः Sy अप्रत्युपचिकीर्षवः Dur ८. धनम् P D
९. उपेत्य प्राणन्ति, अल्प याचन्त इत्यर्थ. Sy. उपजीवन्त्येव केवलं न यजन्ते न स्तुतिं वदन्ति च SKN. उपजीवन्त्येव केवल न क्रियया प्रत्युपकारं कुर्वन्ति Dur
१०. हविर्लक्षणान्नवन्तः पापेन जीर्णा वा नराः Sy. प्राजिनधना ईश्वराः सन्त इत्यर्थः SKN. प्राजितधनाः सन्तो न दरिद्राः Dur. ११. दुर्धिये । वचनव्यत्ययः । दुर्बुद्धिभ्यः Sy. व्यत्ययेनात्रैकवचनम्। पापबुद्धिभ्यः SKN. दुर्धीभ्यः पापबुद्धिभ्यः स्वार्थप्रधानेभ्यः Dur.
१२. ०द्धिद्यः P. यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। तेभ्यः SKN. तेभ्य एवंलक्षणेभ्यः Dur. १३. वाम वननीयं धनम् Sy. प्रशस्यं धनम् SKN., Dur.
१४ अनुकूलम् Sy. आनुपूर्व्येण SKN.
१५ न वितरसि Sy. ददासि त्वम् SKN.
१६ कियन्तु P त्रि (कि)न्तु M. किं तर्हि SKN किं तर्हि यस्तादृशो जनः Dur.
१७. सोमपानशील सोमेन यष्टार महाफलरिप्सुम् Sv पीयतिहिंसतिकर्मा । अत्रापि व्यत्ययेनैकवचनम् । पियारं देवाना हिंसकान् हिंस्यान्वा। पीयतिहिंसार्थं 'पीयति त्वो अनु त्वो गृणाति' (RV I.147 2.) इति यथा SKN. देवाहंसिता स्वभोगप्रधानो न यष्टा देवाना तम् Dur·
१८ चसे P गच्छस्येवानुगृहीतुम्। 'चय गतौ' इत्यस्येद रूपम् । यद्वा । हे बृहस्पते पियारं हिंसकम् । पीयतेर्हिंसाकर्मण इदं रूपम् । तं प्राणिहिंसक चयस इत् । हंस्येव Sy. चातयसि त्व तान् SKN. नाशयसि । य एव श्रद्दधानो यष्टा, तस्मै देवान्यजतेऽनुददासि वामं, यस्मात्त्वमेवं करोषि, तस्मान्न ते पापबुद्धयस्त्वां सम्यक् पश्यन्तीत्यभिप्रायः । यो हि दुर्बुद्धिर्देवपियारुस्तस्य किमन्यच्चातनादृते स्यात्। चात्य एवासौ। तस्मात् 'चयसे' इत्येष शब्दः 'चातयतिर्नाशने' इत्येवमवस्थापिते नाशनार्थो भवतीत्युपपद्यते । ... लोकेऽपि च प्रसिद्धं देशादुच्चातित इति Dur.
१९. इविति पूरणः SKN.

चयतिर्वधकर्मा ।[१] [२]

सुप्रैतुः[३] सूयवसो[४] न पन्था दुर्नियन्तुः[५] परिप्रीतो[६] न मित्रः[७] ।
अनर्वाणो[८] अभि ये चक्षते[९] नोऽपीवृता[१०] अपोर्णुवन्तो[११] अस्थुः[१२] ॥६॥

सुप्रैतु[१३]। सुष्ठु प्रकर्षेण गन्तव्य[१४]। शोभनयवस[१५]। इव। मार्ग[१६]। दुर्नियमश्च[१७] शत्रूणाम्। त्यक्तप्रीति[१८]। इव। मित्र[१९]। बृहस्पते! ये[२०]। अस्मान्। अभिपश्यन्ति[२१] ते नश्चा[२२] ? तिष्ठन्तु, अवरूढा[२३]। तथा, अपकुण्ठिताश्चेत्[२४]। अपोर्णुवन्तस्तिष्ठन्तु[२५]। 'क्रीते सोमे पौर्ण[२६]' इत्यादि ब्राह्मणम्।

सं यं स्तुभोऽवनयो[२७] न यन्ति समुद्रं[२८] न स्रवतो[२९] रोधचक्राः[३०] ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च[३१] गृध्रः[३२] ॥७॥

संयम्[३३]। यम्। स्तुतय[३४]। ग्रामसिव[३५]। मार्गा[३६]। सयन्ति। समुद्रम्। इव च। स्रवन्त्य।

---

१. चरति व० P D M बृहस्पते यच्चातयसि देवपीयुम् । पोयतिर्हिंसाकर्मा N 4.25; SKN. II 271
२. VM. ignores बृहस्पते
३. ०तु P. D.
४. हन्तव्य. P D सुष्ठु गन्तुर्मनुष्यस्य Sy
५. शोभनान्नस्य Sy.
६. सुष्ठु यज्ञमार्गगामिन· सूयवसः पन्था इव सुखकारी भवेत्यर्थ· Sv.
७. दुःखेन नियमितू राज्ञ· Sy
८. सर्वप्रकारेण सन्तुष्टो द्वेषाविरहित· Sv.
९. एव M.
१०. सुहृन्मन्त्रीव । स यथा दुर्नयान्निवर्तयति तद्वत् त्वमपि तथाऽस्मभ्यं कुर्वित्यर्थ. । सखिवदमार्गान्निवर्त्य मार्गे यज्ञाविरूपे योजयित्वा तत्रापि फलप्रदो भवेत्यर्थ. Sy.
११. नराः Sy.
१२. आभिमुख्येन चक्षते बोधयन्ति ते Sy.
१३. तेनश्चा M. केनश्चा P. ऽनश्चाः is suggested for नश्चा
१४. अनर्वाणोऽपापाः Sy.
१५. अवगुण्ठिता० is suggested for अवकुण्ठिता० अज्ञानेनावृता अपि Sy.
१६. अकुठिताश्चेत् P ०ताश्चत् D.
१७. एवोर्णवोन्तः P. अपोर्णपन्तः D. अपोऽर्णवन्त. M. अपगतावरणवन्तो ज्ञानवन्तः Sy.
१८. यद्वा । अनर्वाणस्त्वामप्राप्नुवन्तो येऽस्मद्विरोधिनो नोऽस्मानभि चक्षतेऽभिवदन्ति निन्दन्ति तेऽपीवृता आच्छादिता रक्षिता अपि, अपोर्णुवन्तोऽपगतरक्षणा भवन्ति Sy. १९. पीते P
२०. पोर्ण M. सोमे राजनि क्रीते AB. 1.27; 6.3.
२१. व P. D.
२२. य P. D. बृहस्पतिम् Sy.
२३. ०ये M. स्तोत्राणि Sy.
२४. यथा स्वामिनं कर्म प्रति वा Sy.
२५. सर्वा अवनयो भूमयो मनुष्याः Sy.
२६. सङ्गच्छन्ति(न्ते) तद्वत् Sy.

१ २ ३ ४ ५ ६ ७
नद्यः । सः । प्राज्ञ॑ । द्यावापृथिव्योरन्तर्वर्तमानः । उभयम् । पश्यति । बृहस्पति॑ । तरति । च ।
८
उदकानि । काङ्क्षिता शत्रुधनानाम् ।

एवा मह॒स्तुवि॑जातस्तुवि॑ष्मान्बृह॒स्पति॑र्वृष॒भो धा॑यि दे॒वः ।
स नः॑ स्तु॒तो वी॒रव॑द्धातु गोम॒द्विद्या॑मे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥८॥

९ १० ११ १२ १३ १४ १५ १६ १७
एवा मह॑ः । एवम् । महान् । बहुजनन । वृद्धिमान् । बृहस्पति । वृषभ । अन्तरिक्षे निहित ।
१८ १९ २० २१ २२ २३
देव. । स. । न । स्तुत । वीरवत् । गोमच्च धनम् । प्रयच्छतु ।

I.191

कङ्॑तो न कङ्॒तोऽर्थो॑ सतीनकङ्॑कतः ।
द्वावि॑ति प्लुपी॒ इति॒ न्य॑दृष्टा॒ अलिप्सत ॥१॥

कङ्कतः । शौनक —

२४
बृहस्पतेरनर्वाण कङ्कतोपनिपत्परम् ।
२५ २६
अपा तृणाना सूर्यस्य केचिदेना स्तुति विदु ॥

---

१. रोधचक्रा नवीनामंतत् । रोधनशीलानि चक्राणि यासु तास्तादृश्य॰ कूल क्रममाणा वा, स्रवतः स्रवन्त्यो नद्यो यथा यन्ति तद्वत् सर्वा अपि स्तुतयो यमेव प्राप्नुवन्ति Sy
२. बृहस्पतिः Sy.
३ वक्ष्यमाणाभिज्ञः Sy.
४. मध्ये स्थित्वा Sy
५. ० नम् P.D
६. करोतीत्यर्थ॰ Sy.
७. तरणं जलाभिवृद्धिम् Sv
८. गर्धनशीलो वृष्टिमाकाङ्क्षमाणः Sy
९. एव P.D.
१०. महा P.D.
११. एवं स्तुतिप्रकारेण Sy.
१२. महत् P.
१३. बह्वर्थमुत्पन्नः Sy.
१४. बलवान् Sy.
१५. ०ति P.
१६. वृद्धि ... वृ० M.
अपा वर्धिता Sv
१७. ०ते P. धीयते स्तूयत इत्यर्थः Sy.
१८ अस्माकम् Sv
१९ पुत्राद्युपेतम् Sv.
२०. गोभिर्युक्तं फलम् Sy
२१. गोमप्य धन P.
२२. करोत्वित्यर्थः Sy.
२३. VM. ignores विद्याम etc. Ms. D. puts the figure ॥१९०॥ here to indicate the end of one hundred and nintieth hymn. No such number is given in P. and M.
२४. ०रथर्वाणं D. ०रर्वाणं M.
२५. तृनां P. तृ० D.
२६. Missing in M.

ददर्श तदगस्त्यो हि विषघ्न विषशङ्कया ।
अदृष्टास्थो नष्टरूप सूक्तस्यान्त्योऽत्र तु द्वच ॥

कङ्कतशब्दो 'यत्सीमन्तु कङ्कतस्ते' इति दर्शनाद् विलेखकवचन., किं कङ्कत । उताहो न। कङ्कत । अपिवा । उदकज कश्चन कङ्कतमपोऽपि कङ्कतो भवति विलेखनात्। कृतस्ते ? द्वौ। इमौ दन्तौ भवत शरीरस्थौ । मम दाहकौ च तौ । ततश्च मामदृष्टा: प्रच्छन्नचारिण. सर्पा एव। न्यलिप्सत, नतु पुन. कण्टकेन कृत्तोऽहमिति ।

अदृष्टान्हन्त्यायत्यथो हन्ति परायती ।
अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥२॥

अदृष्टान् । सर्पान् । हन्ति । काचिदागच्छन्ती, ओषधिवीर्यवत्तमा । अथापरा । दष्टशरीरे परागच्छन्ती मध्यमा । अथो । अल्पवीर्याऽहन्यमाना । हन्ति । दृषदुपलयो., अथापरा ।

---

१. विघ्न P. २. ऽकतु P D.M
३. दृच: M. ४. BD IV. 93, 64
५. कुतस्त M. TB. 2 7.13.7.
६. M. adds अयं after किम् ।
७. अल्पविष: कश्चित् Sy.
८. इहाते M. ९ Omitted by M.
१०. तद्विपरीतोऽनल्पविषो महोरगादि: । तकतेर्गत्यर्थस्य वर्णव्यत्ययेन कङ्कत इति सरन् भवति Sy.
११. ०कञ्ज: P. सतीनमित्युदकनाम । 'सतीन गहनम्' (Ngh.1.12.) इति तन्नामसु पाठात् । उदकचारी, अल्पविषवान् कश्चिद् दुन्दुभादि: Sy.
१२. कंकत: सर्वोऽपि P. M.
१३. कृतं ते P. M. १४. अल्पविषमहाविषभेदेन जलस्थलभेदेन वा द्विप्रकाराविति Sy. १५. प्लोषणाविति। प्रकारद्वैविध्यदाहकत्वयो: प्रतिपादनाय, इतिकारद्वयम् Sy. १६. शततश्च M.
१७. अदृश्यमानरूपा एतत्सञ्ज्ञकाश्च केचिद्विषधरा एवमुक्तप्रकारा ये सन्ति ते नूनम् Sy. १८. एवा P.
१९ न्यालिस्पत P. माम्... विशेषेण लिम्पन्ति । सर्वाण्यङ्गानि विषमावृणोति । केनैव कृतमिति न ज्ञायत इति भाव: Sy
२०. कण्डके D. कण्टके P.
२१. ०त्तो हरति M. ०त्तो भवति P.
२२. अनेन विषघ्न्योषधि: स्तूयते Sy.
२३. अदृश्यमानान् विषधरान् Sy.
२४. हिनस्ति Sy. २५. विषवष्टस्य सकाशमागच्छन्ती विषनिर्हरणसाधनौषधि: Sy.
२६. एषधी: D. ०धिवी० M. काश्चिदागत्यस्तेषासीर्वी० P.
२७. वाया० P. अपि च Sy.
२८. ०न्ति P. सम्मार्जनसमयेऽर्वाक् प्रवृत्ता। हन्ति नाशयति जलचरविषधरान् Sy.
२९. अपिच Sy. ३०. ०र्या: P. D.
३१. अवहन्यमाना is suggested for अहन्यमाना। कर्मणि कर्तृप्रत्यय:, अवहन्यमानौषधि: स्वगन्धेन Sy.
३२. हन्ति बहुविषयान्। यद्वा काचिदोषधिर्वज्रकान्मारयत्येव Sy. ३३. ०पयो: P.

शारीरं पिष्यमाणा[1]। विषं पिनष्टि[2]।

शरासः कुशरासो दर्भासः सैर्या उत।
मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥३॥

शरासः[3]। शरादयस्तीक्ष्णपत्रा ओषधिविशेषा[4]। अदृष्टाः सर्पाः[5]। त इमे सर्वे[6]। सह[7]। मा न्यलिप्सतेति[8] दाहातिशयादाह[9]।

नि गावो गोष्ठे असदन्नि मृगासो अविक्षत।
नि केतवो जनानां न्यदृष्टा अलिप्सत ॥४॥

नि गावः[10]। प्रदोषवेलायां स्वापार्थं गाव[11]। गोष्ठे[12]। न्यषदन्[13]। तथा मृगाश्च[14]। न्यविक्षत[15]। तथा सुषुप्सूना[16] जनानाम्[17]। प्रज्ञानानि चोपरमन्ति[18]। अस्यां वेलायां सर्पाः[19]। बिलादुत्थाय[20] विषेण मामलिम्पन्[21]।

---

१. पेषणकर्त्री वृषत्पिष्यमाणा ओषधिः Sy.
२ पिषम् P.
३. चूर्णीकरोत्यल्पविषान्। अथवा सर्वेषु वाक्येष्वविशेषेण सर्वविषकारिणा नाश उक्तः Sy.
४. VM. ignores हन्ति
५. अन्यांश्च विषहेतूनाह—शरासः शरा वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषाः। कुशरासः कुत्सितशरा अन्तश्छिद्राः शरसदृशास्तृणविशेषाः। दर्भासो दर्भाः कुशाः। सैर्यास्तटाकादिप्रान्तोद्भवास्तृणविशेषा अग्रववाला इति प्रसिद्धाः। मौञ्जा मुञ्जाः प्रसिद्धाः। वैरिणा वीरणप्रकाराः। एतेषु वर्तमानाः Sy.
६. तीक्ष्णवर्तक्षिणपत्राः P.
०पात्रा M.
७. आप० D.
८. उक्तरूपाः Sy.
९. सर्वान्ति M.
१०. विषधराः Sy.
११. साकं मिलित्वा Sy.
१२. निलिम्पन्ति स्म Sy.
१३. न्यलप्सन्त कि दाहातिशयादाहः P.
० शयाः यदाह D. ० प्सतेति शयादाह M.
१४. गाहः P.
१५. निषीदन्ति Sy.
१६. निविष्टाः। स्वस्वस्थान उपरताः Sy.
१७. सुष्ठुप्सूनां M.
१८. प्राणिनाम् Sy.
१९. उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। नीचान्यभवन् Sy.
२०. एतेऽस्मिन्समये Sy.
२१. अदृश्यमानरूपाः सन्तः Sy.
२२. बलादु० D.
२३. निलिम्पन्ति विशेषेण Sy.

एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्कराइव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥५॥

एत[1] उ त्ये[2] । अपिच[3] । अमी[4] । रात्रिमुखं[5] प्रति । दृश्यन्ते[6] । चोरा इव । तेऽमी । सर्वैरदृष्टाः[7] । स्वयं सूक्ष्मेण चक्षुषा दृष्टविश्वजना[8] यूय प्रतिबुद्धा । स्थ[9] ।

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।
अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥६॥

द्यौर्वः[10] । 'ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु । तेभ्यः सर्पेभ्यो[12] नमः[11]' इति मन्त्रः । यूयमेवविधाभिजना[14] । यथासुखम्[16] । तिष्ठथ[17] । सञ्चरत[18] च[15] । शोभनम्[19] ।

---

१. इ M.
२. अमि D.
एते ते सर्पाः Sy.
३. रात्रिषु मुख्यं D.
रात्रिमुख्यं P.
४. प्रतिदृश्यन्ते रात्रौ श्वासादिलिङ्गेन । यद्वा । ते रात्रौ हन्तारो दिवा एते प्रतिदृश्यन्ते Sy.
५. तत्र दृष्टान्तः । . . . रात्रिर्दोषा । रात्रिं प्रति तमसाभिभूतासु रात्रिषु तस्करा इव हिंसकाश्चौरा दृश्यन्ते यथा तद्वत् Sy.
६. कीदृशास्ते ? अदृष्टा अपरिदृश्यमानाः Sy.
७. विश्वं दृष्टं यैस्ते तादृशाः प्रतिदृश्यन्ते Sy.
८. अतो हे नराः ! Sy.
९. स्थः P. D. भवत Sy.
१०. Omitted by P. अतः परं विषचिकित्सा Sy.
११. ये वा रो० P. य वा रो० D. यो वो राच० M.
१२. सर्वेभ्यो D.
१३ VS 13.6.
१४. तत्र तावद् हे सर्पा वो युष्माकं द्यौः पिता, पृथिवी माता, सोमो भ्राता, अदितिर्देवमाता स्वसा । एवम्महानुभावा महोरगा अदृष्टा अन्यैरदृश्यरूपाः, स्वयन्तु विश्वदृष्टाः सर्वस्य द्रष्टारो यूयम् Sy.
१५ ० भिज० M.
१६. सु सुतरां कं सुखं यथा तथा Sy.
१७. तिष्ठत स्वस्वस्थाने । मां प्रति मा गच्छत Sy. तिष्ठत is suggested for तिष्ठथ
१८. सञ्चत P. D. ईरयत गच्छत । सोमशब्देन सोमाधारो द्युलोक उच्यते । पृथिव्यन्तरिक्षद्युस्थानस्थाः सर्पाः स्वस्वस्थानं प्राप्नुत । अस्मद्बाधां मा कुरुतेत्यर्थः Sy.
१९. Omitted by P. D.

ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।
अदंष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥७॥

ये अंस्याः। ये। असेन[1] प्रहरन्ति[2]। ये च। अङ्गै[3]। यै[4] वा। पुच्छाग्रै[5]। ये वा। दन्तैः[6] प्रकृन्तन्ति[7]। तेषां सर्वेषा किम्[8]। अस्मिन्[9] मनुष्ये कार्यम्। शीघ्रमस्मान्[10]। साकम्[11]। नितराम्[12]। उपक्षीणा भवत[13]।

उत्पुरस्तात्सूर्य एति विश्वदंष्टो अदृष्टहा ।
अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वांश्च यातुधान्यः ॥८॥

उत्पुरस्तात्। एभिर्मन्त्रैर्विभीषिका[14] क्रियते—हे सर्पा[15]! असौ सूर्य। पुरस्तात्[16]। उदेति। दृष्टसर्वजन[17]। सर्पाणा[18] हन्ता। सर्वानेव। सर्पान्[19]। विनाशयन्[20]। सर्वा। च। रात्रौ वर्तमाना हिंसानिलयभूता[21] यातुधानजाती[22]।

---

१. अंसो D.
२. वहन्ति P. अंस्या अंसार्हा अंसगा असे भवा अंसाभ्यां खादन्तो वा Sy.
३. अग्नौ P. अङ्गगा अङ्गेन शरीरेण हन्तारो वा सूतिकादयः Sy.
४. यैः M.
५. सूचीसदृशपुच्छरोमाणो वृश्चिकाद्या Sy.
६. दन्त्रै. P. M.
७. प्रकृन्ति P .D.M. प्रकृष्टविषाः प्रकृष्टगामिनो वा महोरगाः। अदृष्टा अदृश्यमानाः Sy.
८. यत्किञ्चित्सर्पजातमस्ति Sy.
९. अस्मिन् समीपे Sy.
१०. युष्माकं किमस्ति Sy.
११. अतो यूयं सर्वे साकं सह Sy
१२. नितरोमुपुक्षीणा P. मुञ्चतास्मान्। 'जसु मोक्षणे' दैवादिकः Sy.
१३. VM. ignores अदृष्टाः। च। सर्वे
१४. एव P.D.
१५. ०थित P. ०काः D.
१६ पूर्वस्या दिशि Sy.
१७. ०जन M. कीदृशः सः ? ... विश्वे द्रष्टव्या यस्य स तादृशः Sy.
१८. अदृष्टा विषविशेषा विषधरविशेषा वा तेषा हन्ता। यद्वा। अदृष्टमदर्शनमज्ञानमन्धकारस्तस्य हन्ता। सूर्य उदिते सर्वे विषधरा विषाणि वा पलायन्ते Sy.
१९. सर्वान् P. किं कुर्वन्नुवेतीति चेदुच्यते, सर्वान्...अदृष्टव्यान्विषराक्षसादीन् Sy.
२०. हिंसयन् Sy.
२१. ०निय० D.
२२. यतुधन० P. यातवो यातनास्तीव्रवेदनास्तासां धात्रीरुत्पादयित्रीर्महोरगी राक्षसीर्वा जम्भयन्पुरस्तादुदेति। अतोऽस्मतो नि जस्यतेति सम्बन्धः Sy.

उदप्पप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् ।
आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥९॥

उदप्पप्तत् । उत्पपात । असौ । सूर्यः । पुरूणि । व्याप्तानि रक्षांसि । हिंसन् । आदित्यः । उदयपर्वतेभ्यः ।

सूर्ये विषमा संजामि दृतिं सुरावतो गृहे ।
सो चिन्नु न मरति नो वयं मरामारे
अस्य योजनं हरिष्ठा मधुं त्वा मधुला चकार ॥१०॥

सूर्ये विषम् । सूर्येऽहम् । एनद् विषम् । आसजामि । यथा सुरार्थी दृतिम् । सुराकारगृहे प्रातरेवासजति । स च सूर्य । कदाचित् । अपि विषलिप्तोऽपि । न । म्रियते । तथैव वयमपि । न । म्रियेमहि । दूरे । विषस्य । योजनम् । इन्द्र करोतु । मधुरा सूर्ये दीप्ति सुषुम्णाख्या च

---

१. उदचप्तत् D. २. ऊर्ध्वं गच्छति । पततेर्लुङि पुमागमे रूपम् Sy.
३. पुरस्ताद् दृश्यमानः Sy.
४. सर्वस्य प्रेरक आदित्यः Sy.
५. प्रभूतम् Sy.
६. बहूनि विषाणि Sy.
७. विषोदकादीनामदनशीलः । विश्वदृष्टो विश्वं दृष्टं येन तादृशः । अदृष्टहा, अदृष्टानां विषविशेषाणां हन्ता । एवम्महानुभावः सूर्य ऊर्ध्वमारोहति । अतो विषशङ्का न कार्या Sy.
८. ०यसर्वतेभ्यः P. पर्ववद्भूय प्राणिभ्यस्तेषामुपकाराय Sy.
९. VM. ignores विश्वदृष्टः । अदृष्टहा
१०. 'आदित्यमण्डले चतुर्थेनाङ्गुलिना विषमादाय मधुकृत्य योजयित्वा निर्विषो भवेत्' इति यदेतद्विषविद्यायामुक्तं तदिदमत्रोच्यते Sy. ११. सर्वस्य प्रेरयितरि मधुविद्यारूपे सूर्यमण्डले Sy.
१२. विषावृतोऽगस्त्यः Sy.
१३. सूर्ये तमेतद् P.
१४. विषयम् M. आवृत्य वर्तमानम् Sy.
१५. सूर्ये ..आसक्तं करोमि Sy.
१६. तत्र दृष्टान्तः । ...चर्ममयं सुरापात्रमिव । यथा तत्कर्तुर्न दोषाय भवति तद्वद्विषमादित्यस्य न बाधकमित्यर्थः Sy.
१७. सुरात्वीदृतिमसुराकारग्रहे P. सुरा त्वीदृतिमसुराकारग्रहे D. सुरानिर्मातृसदने Sy. १८. ०तदेव P.
१९. पूज्यः स सूर्यः खलु Sy.
२०. य्यः P. २१. चित् पूजायाम् । नु प्रसिद्धौ Sy. २२. तथैपि P.
२३ तदनुग्रहात्तत्रैव विषस्य योजितत्वाद् वयमपि न म्रियामहे Sy
२४. दूर P. D. २५. प्रापणं चकार Sy.
२६. उभयोरमरणे कारणमाह—हरिष्ठाः । हरयोऽश्वाः । तेषु स्थित आदित्यः Sy.
२७. मधुना P. D. एषैव मधुला मधुवात्री निर्विषीकर्त्री मधुविद्या । यदेतदादित्यस्य विषयोजनं तेन चामृतीकरणं यदस्ति, एषा मधुविद्या Sy.
२८. Omitted by P. D.

चन्द्रमसमाप्याययन्ती । विष ! त्वा[1] । मधु[2] । करोतु ।

इयत्तिका शंकुन्तिका सका जघास ते विषम् ।
सो चित्सु न मरति नो वयं मरामारे
अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥११॥

इयत्तिका[3] । इयतत्येषा भवतीति । प्रादेशमात्रपरिमाणा शकुन्तिका[4] निर्दिशति पिण्डमात्रं वा ताम्रवर्णां[5] सर्पघातिनीम्[6] । ह्रस्वा सा[7] । तव[8] । सर्पविषम्[9] । भक्षयति[10] ।[11]

त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्यमक्षन् ।
ताश्चित्सु न मरन्ति नो वयं मरामारे
अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥१२॥

त्रिः सप्त । अथ तान्त्रिकाणा भणितिप्रकार, विषचटिका[12] विष्पुलिङ्गका[13] सङ्घीभूत्वा[14] सर्पानतिनिष्ठन्ति[15], एकविंशतिविष्पुलिङ्गका[16] । विषस्य[17] । अग्रम्[18] । अश्नन्ति[19] ।[20]

---

१. त्वाम् Sy. २. अमृतं चकार । विषस्य विषभावं दूरेऽपनोद्यामृतीचकारेति Sy
३. इत्तिका P
४. त seems to be unnecessary in इयतत्येषा । इयत्तां कुर्वाणा, इयत्तावती वा । बालेत्यर्थः Sy.
५. शशकु० M. शकुन्तः शकुनस्तस्य स्त्री, ता कपिञ्जलीमाहुः Sy.
६. ०न्ति M. निर्मिशति P. ७. ०वर्णां P
८ ता P. सा विषहन्त्रीति प्रसिद्धा Sy.
९ सर्व P. If सर्प is construed in the voc, the meaning will be improved—'O serpent! thy poison,' instead of 'thy serpent poison'
१०. भक्षति M. भक्षितवती । . . . सो चित् । सा उ इति निपातसमुदाय एकं पदम् । सापि शकुन्तिका न म्रियते नित्यप्रतिपक्षस्वाद्विषस्य । शिष्टं व्याख्यातचरम् । अनेन विद्यायां यद्हेहावृतं विषं तस्य शकुनेभ्य आदित्याय च प्रदानमस्तीत्युक्त भवति Sy.
११. VM ignores सो । चित् etc.
१२ दणितिप्र० P. १३ विषचभिकाः M.
१४. हवि'ष्फुलि० M. विष्फुलि० P.D. विविधा विष्पुलिङ्गकाः Sy.
१५ सघटिभूता P. संघटीभूता D. ०भूताः is suggested for ०भूत्वा
१६ न D १७. अतिष्ठन्ति P.
१८. एंविंशतिविष्फुलि० P. ओंविंशतिविष्फुलि० D. ०ष्फुलि० M. त्रिगुणिताः सप्तसङ्ख्याकाः । . . . सप्तसु जिह्वासु लोहितशुक्लकृष्णभेदेनैकविंशतिर्यासां ताः । यद्वा त्रिः सप्त, एकविंशतिभेदा विष्पुलिङ्गकाः सूक्ष्मचटकिका विषप्रतिपक्षभूताः Sy. १९. अस्मदावरकस्य Sy.
२०. विषं प्राग्रं P. विषस्याग्राम् D. विषस्याग्रम् M. पुष्यं पोषम् Sy.
२१. अदन्तु नाशयन्तु । ताश्च न मरन्ति न वयमपि । शिष्टमविशिष्टम् Sy.
२२. VM. ignores ताः etc.

नवानां नवतीनां विषस्य रोपुषीणाम् ।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥१३॥

नवानाम् । ओषधीनामेकोनशतम् । विषघ्नं भवति, रुपिश्छेदनकर्मा । तासां सर्वासामेवाहम् । नाम । अग्रभम्, इयमेवनाम्नीति ।

त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः ।
तास्ते विषं वि जभ्रिर उदकं कुम्भिनीरिव ॥१४॥

त्रिः सप्त । एकविंशति । मयूर्य । सप्त च । स्वय सरन्त्य । गङ्गाद्या नद्य । ता । ते । सर्पविषम् । विविधम् । हरन्ति । यथा । उदकम् । कुम्भवत्य स्त्रिय ।

इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना ।
ततो विषं प्र वावृते परांचीरनु संवतः ॥१५॥

इयत्तकः । इयत्प्रमाण । नकुल, स वेदानी यदि तव विष हन्ति तन । तकम्=अयुक्त-

---

१. न्नावानां P.
२. ०नं श० M. नवाधिकाना नवतिसङ्ख्याकानां नदीनाम् Sy.
३. पुनः कीदृशीनाम्? विषस्यास्मद्व्यापकस्य सर्वस्य विषस्य रोपुषीणा लोपयित्रीणा छेत्रीणाम् Sy.
४. रुवि० M. रुविच्छे० P. रुपिच्छे० D.
५. उक्तानां गङ्गादिनदीनाम् Sy.
६. गृह्णामि सङ्कीर्तयामि Sy.
७. ०वनाम्निति P. ० नम्नी० D इयमेव नाम्नि भवति इयमेव नाम्नीति M.
८. VM. ignores आरे etc.
९. एकविंशतिसङ्ख्याकाः Sy.
१०. मयूरस्त्रियः । ता विषकारिसर्पद्वेषिण्य इति प्रसिद्धाः, नागद्वेषिगरुडपक्षोद्भवत्वात् Sy.
११. एतत्सङ्ख्याकाः सर्पणस्वभावाः Sy.
१२. सरस्वत्यो P. D. M. स्वयमेव सरणाः Sy
१३ ऽङ्गगाद्या M. नदीनामेतत् । सुरगङ्गाद्याः प्रसिद्धा. सप्त नद्यः सन्ति ता· Sy.
१४. अभ्यः D. Omitted by P.
१५. हे वेह तव Sy.
१६ विशेषेण हरन्तु Sy.
१७. तत्र दृष्टान्तः । . . . कुम्भिन्यः कुम्भवत्यः कुम्भेन जलहारिण्य इव । ता यथा तद्धरन्ति तद्वन्नद्यो मयूर्यश्चातिप्रभूतं हरन्तु Sy. १८. ० त्य स्त्रियः P.
१९. इय० P. कुत्सितेयत्तोऽल्पप्रमाण इत्यर्थः Sy.
२०. कुं पृथ्वीं सुम्भति विलिखतीति सर्पाणां कुत्सितं सुम्भयिता निग्रहीता वा कुषुम्भको नकुलः । स ते विषं हरत्विति शेषः Sy.
२१. यदि न तथा स करोति Sy.
२२. तं (कं?)म् D.

कारिणम्[1]। अहम्, अश्मना। भिनद्मि[2] ततश्च[3] भीत स इहाऽऽगच्छति[4]। ततश्च। विषं हन्तुम्। उद्युक्तो[5] भवति। दूरस्थाः[6]। भूमीः[7]। प्रति[8]।

कुषुम्भकस्तदब्रवीद्गिरेः प्रवर्तमानकः।
वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥१६॥

कुषुम्भकः[9]। गिरे[10]। चरणार्थं प्रवर्तमान[11]। नकुल। तदिद[12] वचनम्। अब्रवीत्[13]। वृश्चिकस्य। विषम्[14]। अरस[15] भवति। अरसम्। वृश्चिक[16] ! ते। विषमिति।

---

१. कुत्सितं तं नकुलम् Sy.
२ विदारयामि। विषनिर्हरणप्रयोगे यावद्विषापगमं तं पाषाणानुघातमनुतिष्ठन्ति तद्विदः। तदिदमत्रोक्तम् Sy.
३ एवं प्रयोगे सति Sy.
४. ग० P. D. विषावृताद्देहाद्विषं प्रवर्तते निर्गच्छतु Sy.
५. ०क्तं P. D. M.
६. मूर० P.D. काः प्रति ? उच्यते। पराचीः परागञ्चनवतीरतिदूरगाः Sy
७. भूमिः P.D.M. संविभागवतीर्दिशः Sy.
८. अनु लक्षीकृत्य दिगन्तं प्रति गच्छतु न मां प्रति गच्छत्वित्यर्थः Sy.
९. कुण्ठकंभकः D. P. एव महानुभावेनागस्त्यमहर्षिणा, उच्यमाने सति Sy.
१०. गिरेः सकाशात् Sy.
११ प्रवृत्त० D. अतिशीघ्रमभिगच्छन् Sy.
१२. वचनम् is omitted by M. तद्वाक्यम् Sy.
१३ आचख्यौ Sy
१४ विम् P. D. एतद्विषम् Sy.
१५. असारं, बाधकं न भवतीत्यर्थः। तथा लोकेऽपि सर्पदष्टमपि कृम्यादिदंशनमेव, अतो न बाध इति हि वदन्ति। एवमभिवचनेन सोऽपि निर्विषोऽभवत् Sy.
१६. ० कस्य D. ० कि P. अथ तं वृश्चिकम्प्रति नकुल आह। हे वृश्चिक ! ते विषमरसम्, अतस्तमूर्षि किं करिष्यति तस्मात्परिहरेति। यदेवमवादीत्तदाप्रभृति वृश्चिकविषमसारमभवत् Sy.
Ms. D. puts the figure ॥१९१॥ here to indicate the end of one hundred and nintyfirst hymn. No such number is given in P. and M.

मुद्रक—पी० टोपा, इलाहाबाद लॉ जर्नल प्रेस, इलाहाबाद
प्रकाशक—मोतीलाल बनारसीदास, पञ्जाब सस्कृत बुक डिपो, लाहौर

APPENDIX I

The commentary of the Śatapatha-Brāhmana on such stanzas of the first *maṇḍala* of the Rgveda as occur in the Śuklayajurveda.

RV १ १७=YV ३ २२ -ŚB २ ३ ४ २८

अथ गार्हपत्यमभ्येति । स गार्हपत्यमुपतिष्ठतऽउप त्वाग्ने दिवे-दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसीति नम एवास्माऽएतत्करोति यथैनं न हिꣳस्यात् ।

RV १ १८, ४५ ४=YV ३ २३=ŚB. २ ३ ४ २९

राजन्तमध्वराणाम् । गोपामृतस्य दीदिवम् । वर्धमानꣳस्वे दमऽइति स्वं वै तऽइदं यन्मम तन्नो भूयो-भूय एव कुर्वित्येवैतदाह ॥

RV १ १९ YV ३ २४ ŚB २ ३ ४ ३०

स नः पितेव सूनवे । अग्ने सूपायनो भव । सचस्वा नः स्वस्तयऽइति यथा पिता पुत्राय सूपचरो नैवैनं कन चन हिनस्त्येवं नः सूपचर एधि मैव त्वा केन चन हिꣳसिष्मेत्येवैतदाह ॥

RV. १ २.४=YV. ७ ८=ŚB. ४.१ ३ १९

अथापगूह्य पुनरानयति । इन्द्रवायूऽइमे सुता उप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि । उपयामगृहीतोऽसि वायवऽइन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वेति सादयति स यदाह सजोषोभ्यां त्वेति यो वै वायुः स इन्द्रो य इन्द्रः स वायुस्तस्मादाहैष ते योनिः सजोषोभ्यां त्वेति ।

RV. १ ३.७=YV ७ ३३; ३३ ४७=ŚB. ४ ३.१.२७

अथातो गृह्णात्येव । ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वाꣳसो दाशुषः सुतम् । उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनि-र्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति ।

RV. १.६.१.=YV. २३.५=SB. १३.२.६.१

युञ्जन्ति ब्रध्नमरुषं चरन्तमिति । असौ वाऽआदित्यो ब्रध्नोऽरुषोऽमुमेवास्माऽआदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै ॥

RV. १.१०.३=YV. ८.३४=ŚB. ४.५.३.१०

अनया वा । युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिनऽइति ॥

RV. १.१०.१२=YV ५.२६=SB. ३ ६ १.२४

तत्परिश्रयन्ति । परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयऽइतीन्द्रो वै गिर्वा विशो गिरो विशैवैतत्क्षत्रं परिवृथ्हति तदिद् क्षत्रमुभयतो विशा परिवृढम् ॥

RV. १ ११.१=YV. १२ ५६; १५ ६१; १७ ६१=ŚB. ८.७.३.७; ६.२ ३.२०

इन्द्रं विश्वा अवीवृधन्निति । इन्द्रꣳहि सर्वाणि भूतानि वर्धयन्ति समुद्रव्यचसं गिर इति महिमानमस्यैतदाह रथीतमꣳ रथीनामिति रथितमो ह्येष रथिनां वाजानाꣳ सत्पतिं पतिमित्यन्नं वै वाजा अन्नानाꣳ सत्पतिं पतिमित्येतदुन्द्र्यानुष्टुभा निवपत्यैन्द्रꣳहि पुरीषं तदेतदर्धमग्नेर्यत्पुरीषमर्धमैष्टकम् ।

अथोपायन्ति । इन्द्रं विश्वा अवीवृधन्निति तस्योक्तो बन्धुर्देवन्हुर्यज्ञ आ च वक्षत्सुम्नन्हुर्यज्ञ आ च वक्षदिति देवन्हुश्चैव यज्ञः सुम्नन्हुश्च यक्षदग्निर्देवो देवाँ २॥ ऽआ च वक्षदिति यक्षच्चैवाग्निर्देवो देवानाꣳ च वहत्वित्येतत् ।

RV. १.१२.१०=YV. १७.६=ŚB. ६.१.२.३०

अभ्यात्मं पक्षपुच्छानि विकर्षति । अभ्यात्ममेव तच्छान्तिं धत्ते परस्तादर्वाक्परस्तादेव तदर्वाचीꣳ शान्तिं धत्तेऽग्ने पावक रोचिषेति दक्षिणं पक्षꣳ स नः पावक दीदिव इति पुच्छं पावकया यश्चितयन्त्या कृपेत्युत्तरं पावकं पावकमिति यद्वै शिवꣳ शान्तं तत्पावकꣳ शमयत्येवैनमेतत् ।

RV. १.१८.१,२,३=YV. ३.२८,२९,३०=ŚB. २.३.४.३५

अथान्तरेणाहवनीयं च गार्हपत्यं च। प्राङ्तिष्ठन्नग्निमीक्षमाणो जपति सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः॥ यो रेवान्योऽ-अमीवहा वसुवित्पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः॥ मा नः शꣳसो-अररुषो धूर्तिः प्रणङ्मर्त्यस्य। रक्षा णो ब्रह्मणस्पतऽइति।

RV. १. २२.३=YV ७.११=ŚB. ४.१.५.१७

अथातो गृह्णात्येव। या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम्। उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वेति सादयति तं वै मधुमत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति तद्यन्मधु-मत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति।

RV. १.२२.७=YV. ३०.४=ŚB. १०.२.६.६

तदेतदृचाभ्युक्तम्। विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसमिति तदेतत्सर्वमायुर्दीर्घमनन्तꣳ हि तद्यदिदमाहुर्दीर्घं तऽआयुरस्तु सर्वमायुरिहीत्येष ते लोक एतत्तेऽस्त्विति हैवैतत्।

RV. १.२२.१३=YV. ८ ३२; १३ ३२=ŚB. ४.५.२.१८, ७.५.१ १०

अथाङ्गारैरभिसमूहति। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिरिति॥

मही द्यौः पृथिवी च न इति। महती द्यौः पृथिवी च न इत्येतदिमं यज्ञं मिमिक्षतामितीमं यज्ञमवतामित्येतत्पिपृतां नो भरीमभिरिति बिभृतां नो भरीमभिरित्येतद्द्यावापृथिव्ययोत्तमयोपदधाति द्यावापृथिव्यो हि कूर्मः॥

RV. १.२२ १७=YV. ५.१५=ŚB ३.५ ३.१३; १२.४ १.४; ५

अथापरं चतुर्गृहीतमाज्यं गृहीत्वा। उपनिष्क्रामति दक्षिणया द्वारा पत्नीं निष्क्रामयन्ति स दक्षिणस्य हविर्धानस्य दक्षिणायां वर्तन्याꣳ हिरण्यं निधाय जुहोतीदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳ सुरे स्वाहेति सꣳ स्रवं पत्न्यै पाणावानयति साक्षस्य संतापमुपानक्ति देवश्रुतौ देवेष्वाघोषतमिति प्रयच्छति प्रतिप्रस्थात्रे स्रुचं चाज्यविलापनीं च पर्याणयन्ति पत्नीमुभौ जघनेनाग्नी॥

त्रयो ह त्वाव पशवोऽमेध्याः । दुर्वराह ऐडकः श्वा तेषां यद्यधिश्रितेऽग्निहोत्रेऽन्तरेण कश्चित्संचरेत्किं तत्र कर्म का प्रायश्चित्तिरिति तद्धैके गार्हपत्याद्भस्मोपहत्याहवनीयाग्निवपन्तो यन्तीदं विष्णुर्विचक्रमऽइत्येतयर्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यज्ञमनुसंतन्मो भस्मनास्य पदमपिवपाम इति वदन्तस्तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयादासाव्वाऽयं यजमानस्यावाप्सीत्प्रेप्रे परमासानावप्स्पते ज्येष्ठगृह्यꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ।

इत्थमेव कुर्यात् । उदस्थालीं वैवोदकमण्डलुं वादाय गार्हपत्यादग्रऽआहवनीयाग्निनयन्नियादिदं विष्णुर्विचक्रमऽइत्येतयैवर्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यज्ञमनुसंतनोति यद्वै यज्ञस्य रिष्टं यदशान्तमापो वै तस्य सर्वस्य शान्तिरद्भिरेवैनत्तच्छान्त्या शमयत्येतदेव तत्र कर्म ॥

RV. १२२ १६=YV ६४,१३३३ ŚB ३७११७;७५१२५

अथैवमभिपद्य वाचयति । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेति वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियद्विष्णोर्विजितिं पश्यतेत्येवैतदाह यदाह विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेतीन्द्रो वै यज्ञस्य देवता वैष्णवो यूपस्तꣳ सेन्द्रं करोति तस्मादाहेन्द्रस्य युज्यः सखेति ॥

विष्णोः कर्माणि पश्यतेति । वीर्यं वै कर्म विष्णोर्वीर्याणि पश्यतेत्येतद्यतो व्रतानि पस्पशऽइत्यन्नं वै व्रतं यतोऽन्नꣳ स्पाशयांचक्रऽइत्येतदिन्द्रस्य युज्यः सखेतीन्द्रस्य ह्येष युज्यः सखा द्विर्देवत्ययोपदधाति द्वे ह्युलूखलमुसले सकृत्सादयति समानं तत्करोति समानꣳ ह्येतदन्नमेव सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ।

RV. १.२२ २०=YV ६५ ŚB ३७.१ १८

अथ चषालमुदीचते । तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियत्तां विष्णोर्विजितिं पश्यतेत्येवैतदाह यदाह तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति ॥

RV. १.२३.१९=YV. ६.६.=ŚB. ५.१.४.६

सोऽभ्युक्षति । अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिन इत्यनेनापि देवीरापो यो व ऊर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेनायं वाजश्च सेदित्यन्नं वै वाजस्तेनायमन्नमुज्जयत्वित्येवैतदाह ।

RV. १.२४.८=YV ८.२३=ŚB ४.४.५.४

अथ वाचयति । उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउऽइति यथायमुरुरभयोऽनाष्टः सूर्याय पन्था एवं मेऽयमुरुरभयोऽनाष्टः पन्था अस्त्वित्येवैतदाह ॥

RV. १.२४.११=YV १८.४९, २१.२=ŚB ९.४.२.१७

तत्त्वा यामि ब्रह्मणा वन्दमान इति । तत्त्वा याचे ब्रह्मणा वन्दमान इत्येतत्तदाशास्ते यजमानो हविर्भिरिति तदयमाशास्ते यजमानो हविर्भिरित्येतदहेडमानो वरुणेह बोधीत्यक्रुध्यन्नो वरुणेह बोधीत्येतदुरुशꣳस मा न आयुः प्रमोषीरित्यात्मनः परिदां वदते ॥

RV १.२४.१५ YV १२.१२ ŚB ६.३.३.८

अथ शिक्यपाशं च रुक्मपाशं चोन्मुञ्चते । वारुणो वै पाशो वरुणपाशादेव तत्प्रमुच्यते वारुण्यर्चा स्वेनैव तदात्मना स्वया देवतया वरुणपाशात्प्रमुच्यतऽउदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथायेति यथैव यजुस्तथा बन्धुरथा वयमादित्य व्रते तवानागसोऽअदितये स्यामेतीयं वाऽअदितिरनागस्तुभ्यं चास्यै च स्यामेत्येतत् ॥

RV १.२५.१०—YV १०.२७.२०.२ - ŚB ५.४.४.५; १२.८.३.१०

अथान्तराꣳसेऽभिमृश्य जपति । निषसाद धृतव्रत इति धृतव्रतो वै राजा न वाऽएष सर्वस्माऽइव वदनाय न सर्वस्माऽइव कर्मणे यदेव साधु वदेद्यत्साधु कुर्यात्तस्मै वाऽएष च श्रोत्रियश्चेतौ ह वै द्वौ मनुष्येषु धृतव्रतौ तस्मादाह निषसाद धृतव्रत इति वरुणः पस्त्यास्वेति विशो वै पस्त्या विश्वेत्येवैतदाह साम्राज्याय सुक्रतुरिति राज्यायेत्येवैतदाह यदाह साम्राज्याय सुक्रतुरिति ॥

अथाधिरोहति। वारुण्यर्चा वरुणो वै देवानाꣳ राजा स्वयैवैनमेतद्देव-तयाभिषिञ्चति निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरिति॥

RV. १ २७.७=YV. ६ २९=ŚB ३.९.३ ३२

स यद्यग्निष्टोमः स्यात्। यदि प्रचरण्याꣳ सꣳस्रवः परिशिष्टोऽलꣳ होमाय स्यात्तं जुहुयाद्यद्यु नालꣳ होमाय स्यादपरं चतुर्गृहीतमाज्यं गृही-त्वा जुहोति यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः स्वाहेत्याग्नेय्या जुहोत्यग्निर्वाऽअग्निष्टोमस्तदग्नावग्निष्टोमं प्रतिष्ठापयति मर्त-वत्या पुरुषसंमितो वाऽअग्निष्टोम एवं जुहुयाद्यद्यग्निष्टोमः स्यात्।

RV. १.३० ७=YV ११ १४ =ŚB ६ ३ २ ४

अथाजम्। योगे-योगे तवस्तरं वाजे-वाजे हवामहऽइत्यन्नं वै वाजः कर्मणि-कर्मणि तवस्तरमन्नेऽन्ने हवामहऽइत्येतत्सखाय इन्द्रमूतयऽइतीन्द्रि-यवन्तमूतयऽइत्येतत्तदजे वीर्यं दधाति।

RV १ ३६ ९=YV ११ ३७- ŚB ६ ४ २ ९, १४ १.३.१५

सꣳसीदस्व महां २॥ ऽअमीति। इदमेवैतद्रेतः सिक्तꣳ सꣳसादयति तस्माद्योनौ रेतः सिक्तꣳ सꣳसीदति शोचस्व देववीतम इति दीप्यस्व देववीतम इत्येतद्धि धूममग्नेऽअरुषं मियेध्य सृज प्रशस्त दर्शतमिति यदा वा-एष समिध्यतऽर्थेष धूममरुषं विसृजते दर्शतमिति ददृशऽइव ह्येषः।

स यत्रैताꣳ होतान्वाह। सꣳसीदस्व महां २॥ ऽअमीति तदुभयतः आदीप्ता मौञ्जाः प्रलवा भवन्ति तानुपास्य तेषु प्रवृणक्ति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यचरत्तत एता ओषधयो जज्ञिरे तेनैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति।

RV १.३६.१३=YV. ११.४२—ŚB. ६.४ ३.१०

अथैनमित ऊर्ध्वं प्राञ्चं प्रगृह्णाति। असौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयतऽऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सवितेति यथैव युजुस्तथा बन्धु-रूर्ध्वो वाजस्य सनितेत्यूर्ध्वो वाऽएष तिष्ठन् वाजमन्नꣳ सनोति यदञ्जिभि-र्वाघद्भिर्विह्वयामहऽइति रश्मयो वाऽएतस्याञ्जयो वाघतस्तानेतदाह परोबाहु प्रगृह्णाति परोबाहु ह्येष इतोऽथैनमुपावहरति तमुपावहृत्योपरिनाभि धारयति तस्योपरि बन्धुः॥

RV. १.४०.३=YV. ३३.८६=SB. १४.१.२.१५; १४.२.२.१

अथोत्तरतः परिश्रितं भवति । तदभिप्रयन्तो जपन्ति प्रैतु ब्रह्मणस्पतिरित्येष वै ब्रह्मणस्पतिर्य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह प्रैतु ब्रह्मणस्पतिरिति प्र देव्येतु सूनृतेति देवी ह्येषा सूनृताच्छा वीरं नर्यं पङ्क्तिराधसमित्युपस्तौत्येवैनमेतन्महयत्येव देवा यज्ञं नयन्तु न इति सर्वानेवास्माऽएतद्देवानभिगोप्तॄन्करोति ।

स यत्रैताश्च होतान्वाह । प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृतेति तदध्वर्युः प्राङुदायन्वातनामानि जुहोत्येतद्वै देवा अबिभयुर्यद्वै न इममन्तरा रक्षाश्सि नाष्ट्रा न हन्युरिति तमेतत्पुरैवाहवनीयात्स्वाहाकारेणाजुहवुस्तश्च हुतमेव सन्तमग्नावजुहवुस्तथोऽएवैनमेष एतत्पुरैवाहवनीयात्स्वाहाकारेण जुहोति तश्च हुतमेव सन्तमग्नौ जुहोति ।

RV १.५०.१=YV ७.४१; ८.४१; ३३.३१=SB ४.३.४.६; ४.६.२.२

स जुहोति । उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यश्च स्वाहेत्येतया गायत्र्या गायत्री वाऽइयं पृथिवी सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ।

अथातो गृह्णात्येव । उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजायेति ।

RV. १.५०.३=YV ८.४०=SB ४.५.४.११

[1](अथातो गृह्णात्येव ।) अदृश्रमस्य केतवः । वि रश्मयो जनांश्च ॥ अनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजायेति ॥

---

[1] The sentence within brackets occurs in the beginning of the ninth *mantra*, after which two *mantras*, i.e., the tenth and the eleventh, are continuously cited, without a break. Thus this sentence seems to have a connection with the eleventh *mantra* also.

RV. १.५०.१०=YV. २०.२१; २७.१०; ३५.१४; ३८.२४=ŚB. १२.६.२. ८; १३.८.४.७; १४.३.१.२८

उद्वयं तमसस्परीति। पाप्मा वै तमः पाप्मानमेव तमोऽपहते स्वः पश्यन्त उत्तरमित्ययं वै लोकोऽद्धय उत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमꣳ स्वर्गऽएव लोकेऽन्ततः प्रतितिष्ठत्यनपेक्षमेत्याहवनीयमुपतिष्ठते।

उद्वयं तमसस्परीति। एतामृचं जपन्तो यन्ति तत्तमसः पितृलोकादादित्यं ज्योतिरभ्यायन्ति तेभ्य आगतेभ्य आञ्जनाभ्यञ्जने प्रयच्छन्त्येष ह मानुषोऽलङ्कारस्तेनैव तं मृत्युमन्तर्दधते।

अथ प्राङिवोदङ्ङुत्क्रामति। उद्वयं तमसस्परीति पाप्मा वै तमः पाप्मानमेव तमोऽपहते स्वः पश्यन्त उत्तरमित्ययं वै लोकोऽद्धय उत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमꣳ स्वर्गऽएव लोकेऽन्ततः प्रतितिष्ठत्यनपेक्षमेत्याहवनीये समिधमभ्यादधाति समिदसि तेजोऽसि तेजो मयि धेहीत्याशिषमेवैतदाशास्ते॥

RV. १.७४.१–YV ३.११=ŚB. २.३.४.१०

म आह। उपप्रयन्तोऽअध्वरमित्यध्वरो वै यज्ञ उपप्रयन्तो यज्ञमित्येवैतदाह मन्त्रं वोचेमाग्नयऽइति मन्त्रमु ह्यस्माऽएतद्वक्ष्यन्भवत्यारेऽअस्मे च शृण्वतऽइति यद्यप्यस्मदारकादस्यथ न एतच्छृण्ववैवमेवैतन्मन्यस्वेत्येवैतदाह॥

RV. १.८२.२,३=YV ३.५१,५२=ŚB २.६.१.३८

ऐन्द्रीभ्यामाहवनीयमुपतिष्ठन्ते। इन्द्रो ह्याहवनीयोऽच्छभमीमदन्त ह्यव प्रिया अधृषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥ सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि। प्र नूनं पूर्णबन्धुर स्तुतो यासि वशांऽअनु॥ योजा न्विन्द्र ते हरीऽइति।

RV. १.८४.३=YV. ८. ३३=SB. ४.५. ३.६

अथातो गृह्णात्येव । आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना । उपयामगृहीतोऽसीन्द्राय त्वा-षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिनऽइति ।

RV. १.८४.१६=YV. ६ ३७=SB. ३.६.४ २४

तत्रैतामपि वाचमुवाद । त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वच इति मर्त्यो ह्यैवैतद्ब्रवमुवाच त्वमेवेतो जनयितासि नान्यस्त्वदिति ॥

RV १.८६ १= YV ८.३१ SB ४ ५ २.१७

स हुर्त्वेव समिष्टयजूꣳषि । प्रथमावशान्तेष्वङ्गारेष्वेतꣳ सोष्णीषं गर्भ-मादत्ते तं प्राङ् तिष्ठन्जुहोति मारुत्यऽर्चा मरुतो यस्य हि क्षये पाथा दिवो विमहसः स सुगोपातमो जन इति न स्वाहाकरोत्यहुतादो वै देवानां मरुतो विडहुतमिवैतद्यदुस्वाहाकृतं देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ।

RV १ ८६ ६= YV २५ २२ SB. २.३ ३.६

तस्मादेतदृषिणाभ्यनूक्तꣳ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरिति पुत्रो ह्येष सन्त्स पुनः पिता भवत्येतन्नु तद्यस्मादग्नीऽआदधीत ॥

RV. १ ६० ६=YV. १३ २७=SB ७ ५.१ ४, १४. ६.३.११

मधु वाता ऋतायतऽइति । यां वै देवतामुगभ्यनूक्ता यां यजुः सैव देवता सर्क्सो देवता तद्यजुस्तद्धैतन्मध्वेवैष त्रिचो रसो वै मधु रसमेवास्मिन्नेतद्दधाति गायत्रीभिस्तिसृभिस्तस्योक्तो बन्धुः ॥

अथैनमाचामति । तत्सवितुर्वरेण्यम् । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः भूः स्वाहा ॥

RV. १.६०.७=YV. १३ २८=SB. १४ ६.३.१२

भर्गो देवस्य धीमहि । मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधु द्यौरस्तु नः पिता भुवः स्वाहा ।

RV. १.९०.८=YV. १३.२९=ŚB. १४.९.३.१३

धियो यो नः प्रचोदयात् । मधुमान्नो वनस्पतिर्मधुमां २॥ ऽअस्तु सूर्यः माध्वीर्गावो भवन्तु नः स्वः स्वाहेति सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य प्रक्षाल्य पाणी जघनेनाग्निं प्राक्शिराः संविशति ।

RV. १.९१ १६,१८; ९.३१ ४=YV. १२ ११२,११३ =ŚB. ७ ३ १ ४६

आप्यायस्व समेतु ते । विश्वतः सोम वृष्ण्यमिति रेतो वै वृष्ण्यमाप्यायस्व समेतु ते सर्वतः सोम रेत इत्येतद्ध्वा वाजस्य संगथऽइत्यन्ने वै वाजो भवान्नस्य संगथऽइत्येतत्सं ते पयाꣳसि समु यन्ति वाजा इति रसो वै पयोऽन्ने वाजाः सं ते रसाः समु यन्त्वन्नानीत्येतत्सं वृष्ण्यान्यभिमातिपाह इति सꣳरेताꣳसि पाप्मसह इत्येतदाप्यायमानोऽमृताय सोमेति प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृता दिवि श्रवाꣳस्युत्तमानि धिष्वेति चन्द्रमा वाऽअस्य दिवि श्रव उत्तमꣳ सु ह्येनममुष्मिल्लोके श्रावयति द्वाभ्यामाप्याययति गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ।

RV. १.९१ १९=YV. ४.३७=ŚB ३ ३.४ ३०

अथैनꣳशालां प्रपादयति । स प्रपादयन्वाचयति या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यानिति गृहा वै दुर्या गृहान्नः शिवः शान्तोऽपापकृत्प्रचरेत्येवैतदाह ॥

RV. १.९८ २=YV. १८ ७३ =ŚB. ९ ५.२ ६.

वैश्वानरो न ऊतये । पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यामिति वैश्वानरीभ्यां तृतीयाभ्यामेतद्वै देवा वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतद्यजमानो वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मैतत्कर्म कुरुते ।

RV. १.१०७.१=YV. ८.४; ३३.६८=ŚB. ४.३.५.१५

स गृह्णाति । यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वेति ।

RV. १.११२.२४=YV. ३४.२९=SB. १४.१.३.३३

स यत्रैताꣳ होतान्वाह । अग्नस्वतीमश्विना वाचमस्मेऽइति तदध्वर्युरुपोत्तिष्ठन्नाह रुचितो घर्म इति स यदि रुचितः स्याच्छ्रेयान्यजमानो भविष्यतीति विद्यादथ यद्यरुचितः पापीयान्भविष्यतीति विद्यादथ यदि नैव रुचितो नारुचितो नैव श्रेयान्न पापीयान्भविष्यतीति विद्याद्यथा न्वेव रुचितः स्यात्तथा धवितव्यः ॥

RV. १ ११५ १=YV ७ ४२; १३ ४६=SB. ४ ३ ४ १०; ७.५ २.२७

अथ द्वितीयां जुहोति । चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहेत्येतया त्रिष्टुभा लोकमेवैतयोपप्रैति ।

RV १ ११९ ११ YV. ७ १९ SB ४ २ २ ९

अथातो गृह्णात्येव । ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।

RV १ १४७ २=YV १२ ४२--SB ६ ८ २ ९

बोधा मेऽअस्य वचसो यविष्ठेति । बोध मेऽस्य वचसो यविष्ठेत्येतन्मꣳहिष्ठस्य प्रभृतस्य स्वधाव इति भूयिष्ठस्य प्रभृतस्य स्वधाव इत्येतत्पीयति त्वोऽअनु त्वो गृणातीति पीयत्येकोऽन्वेको गृणाति वन्दारुष्टे तन्वं वन्देऽअग्नऽइति वन्दिता तेऽहं तन्वं वन्देऽग्नऽइत्येतत्

RV. १ १५४ १--YV ५ १८- SB ३ ५ ३ २१

अथोत्तरेण पर्येत्याध्वर्युः । दक्षिणꣳ हविर्धानमुपस्तभ्नाति विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि । योऽअस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वेति मेथीमुपनिहन्तीतरतस्ततो यदु च मानुषे ॥

RV. १.१५४.२=YV. ५ २०=SB. ३.५.३.२३

अथ मध्यम् छदिरुपस्पृश्य वाचयति । प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि

विश्वेतीदꣳ हैवास्यैतच्छीर्षकपालं यदिदमुपरिष्टादधीव हेतत्त्रियन्त्यन्यानि शीर्षकपालानि तस्मादाहाधित्रियन्तीति ॥

RV १.१६२.१,१८=YV. २५.२४,४१=ŚB. १३.५.१ १८

[1]एतेऽउद्धृत्य । मा नो मित्रो वरुणो अर्यमायुरित्येतत्सूक्तमधिगावावपति चतुस्त्रिंशद्वाजिनो देवबन्धोरित्यु हैकऽएतां वङ्क्रीणां पुरस्ताद्दधति नेदनायतने प्रणवं दधामेत्यथो नेदेकवचनेन बहुवचनं व्यवायामेति न तथा कुर्यात्सार्धमेष सूक्तमावपेदुप प्रागाच्छसनं वाज्यर्वोप प्रागात्परमं यत्सधस्थमिति ॥

RV १.१६२.२१=YV २५.४४[2]=ŚB. १३.२.७.१२

न वाऽउऽएतन्म्रियसे न रिष्यसीति । प्रश्वासयत्येवैनं तद्देवाँऽइदेषि पथिभिः सुगेभिरिति देवयानानेवैनं पथो दर्शयति यत्रामते सुकृतो यत्र ते ययुरिति सुकृद्भिरेवैनꣳ सलोकं करोति तत्र त्वा देवः सविता दधात्विति सवितृदेवैनꣳ स्वर्गे लोके दधाति प्रजापतये त्वा जुष्टं प्रोक्षामीत्युपाꣳ श्वथोपगृह्णाति ॥

RV. १.१६३.१=YV २९.१२=ŚB १३.५.१.१७

यदक्रन्दः प्रथमं जायमान इति । त्रिः प्रथमया त्रिरुत्तमया ताः पञ्चदश सम्पद्यन्ते पञ्चदशो वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते तद्वै यजमानायैव वज्रः प्रदीयते योऽस्य स्तृत्यस्तꣳ स्तर्तवऽउप प्रागाच्छसनं वाज्यर्वोप प्रागात्परमं यत्सधस्थमिति ॥

RV १.१६३.१२,१३[3]=YV २९.२३,२४=ŚB १३.५.१.१७;१८

---

[1] This is the explanation of four stanzas, i.e. YV. २५.२४,४१, २९.२३,२४

[2] The first hemistich of this stanza occurs twice in the YV, i.e., 23.16. 25.44. In the ŚB., the stanza 23.16. *in toto* is explained.

[3] The commentary of the Śatapatha-Brāhmana on these two stanzas of the Rgveda has already been quoted above, on this page, Lines 16-19, and 4-8 respectively.

APPENDIX II

Extracts from the commentaries of Uvata and Mahīdhara on such stanzas of the first one hundred and twenty-one hymns of the first *Mandala* of the RV. as occur in the *Mādhyandinī* recension of the *Suklayajurveda*.

[1] RV.1.1.7 YV.3 22

उपेत्ययमुपसर्ग एममीत्यनेनाख्यातपदेन सह सम्बध्यते। इमसीति सिद्धे छन्दसि वर्तमानार्थे मम्। लिटि 'इदन्तोमसि' (पा० ७।१।४६) इति रूपम्। उपेम उपेयाम उपगच्छामः त्वाम्। हे अग्ने! अहन्यहनि। हे दोषावस्तः! दोषेति रात्रिनाम। 'वस निवासे' रात्र्यां वसनशीलो दोषावस्ता तस्य सम्बोधनं हे दोषावस्तः! 'अग्नौ ह वै देवाः' इत्युपक्रम्य 'तौ सङ्गृह्य रात्रिं प्रविवेश' इति यदनेनेतिहासेनोच्यते तदयं मन्त्रो दृष्ट्वाह दोषावस्तरिति। बुद्ध्या प्रोक्तम्। यतमनस्काः श्रद्धधाना वयम्। नमोभरन्तः। नम इत्यन्ननाम। अन्नं बिभ्रतः उप आ इमसीत्याख्यातपदं व्याख्यातमेव। [1]

'गार्हपत्यं गत्वोपतिष्ठत उप त्वेतीति' (का० ४।१२।७) तिस्रो गायत्र्य आग्नेय्यो मधुमच्छन्दोदृष्टाः। हे दोषावस्तः! हे अग्ने! दोषा रात्रिस्तस्यामपि वसति अजस्रं धार्यमाणत्वान्नोपशाम्यतीति दोषावस्ता। यद्वा अग्नौ हे देवाः! इत्युपक्रम्य तैः सङ्गृह्य रात्रिं प्रविवेशेतीतिहासेन अग्ने रात्रौ प्रवेश उक्तस्तमयं मन्त्र आह। हे दोषावस्तः! रात्रौ वसनशील! गार्हपत्य! प्रतिदिनं वयं यजमानाः, त्वां प्रत्यागच्छामः। इदन्तोमसि (पा० ७।१।४६)। किम्भूता वयम्? श्रद्धायुक्तया बुद्ध्या नमस्कारं सम्पादयन्तः। यद्वा नम इत्यन्ननाम (निघ० २।७।२१)। अन्नं हविर्बिभ्रतः। Mah.

---

[1] Yajurveda adds the words सꣳहितासि विश्वरूप्यूर्जामावि॑श गौपत्येन in the beginning, to the stanza of the RV.

RV.1.1.8; 45.4=YV.3.23

अस्मिन्मन्त्रे आख्यातं नाम्नातमतोऽधस्तनमन्त्रे यदाख्यातं तदनुवर्तते। दीप्यमानम्। यज्ञानां गोप्तारम्। सत्यस्य दीपयितारम्। अग्निसमीपे व्रतं गृहीत्वा सत्यं वदति तदभिप्रायमेतत्। वर्धमानं चातुर्मास्यपशुसोमैः। स्वकीये यज्ञगृहे। दम इति गृहनाम। दास्यन्ति हि गृहस्थाः। उप आ इमसीत्यनुवर्तते। U

क्रियापदमनुवर्तते। वयमीदृशमग्निमुपैमः। कीदृशम्? दीप्यमानम्। अध्वराणां गोपां गोपायतीति गोपास्तं यज्ञानां गोप्तारम्। सत्यवचनलक्षणस्य व्रतस्य दीपयितारम्। अग्निसमीपे व्रतं गृहीत्वा सत्यं वदतीत्याशयः। अस्मदीये गृहे वर्धमानं चातुर्मास्यसोमपश्वादिभिरभिवृद्धिं गच्छन्तम्। दाम्यन्ति गृहस्था यत्रेति दमो गृहम्। दिवेः किप्रत्ययो बाहुलकात्। लिड्वद्भावाद् द्वित्वम्। 'तुजादीनां दीर्घोऽभ्यासस्य' (पा० ६।१।७) इत्यभ्यासदीर्घः। देवयतीति दीदिविः। Mah

RV.1.1.9 YV 3.24

यस्त्वमुक्तगुणः सोऽस्माकं पिता इव पुत्राय हे भगवन्नग्ने! सुखोपगमनो भव। किञ्च सेवस्व अस्मान् स्वस्तये अविनाशाय। U

हे अग्ने! गार्हपत्य! स पूर्वोक्तगुणयुक्तस्त्वम्, अस्माकं सूपायनो भव। सुखेनोपेतुं शक्यः सूपायनः। सुष्ठूपप्राप्तुं शक्यो भव। तत्र दृष्टान्तः। यथा पुत्राय पिता भयं विना सुखेन प्राप्तुं शक्यः। किञ्च नोऽस्माकं क्षेमाय अनेन कर्मणा समवेतो भव। 'षच समवाये' इति धातुः। यद्वा सेवस्व। 'षच सेवने'। Mah.

[1] RV.1.2.4 YV 7.8., 33.56

द्वितीया पुरोरुक्। इन्द्रवायू। वायवी गायत्री। हे इन्द्रवायू! इमे अभिष्टुताः सोमा अतः कारणात् उप प्रयोभिरागतम्। उपेत्ययमुपसर्ग आगतमित्यनेन सम्बध्यते। उपगच्छतम्। प्रयःशब्दः 'इण् गतौ' इत्यस्य

---

[1] The YV. adds in both places उपयाम गृहीतोसि वायव इन्द्रवायुभ्यां त्वा। एष ते योनिः सजोषोभ्यां त्वा। to the stanza of the RV.

धातोः शतृप्रत्ययान्तस्य रूपम्। 'इणो यण्' (पा० ६।४।८१) इति यणादेशः। भिस्। ततस्तकारस्य छान्दसः सकारः। ततो रुत्वादि, ततः प्रपूर्वस्य प्रयोभिरिति सिध्यति। प्रयद्भिरश्वैः शीघ्रैरागच्छतम्। किञ्च। इन्दवो वामुशन्ति हि। हिशब्दो यस्मादर्थे। यस्मात्सोमा युवाम् उशन्ति। 'वश कान्तौ'। कामयन्ते। U.

'अपगृह्य पुनरिन्द्रवायू इतीति' (का० ६।६।६) एकवारमर्धमादाय पृथक्कृत्य पुनरैन्द्रवायवं गृह्णाति। ऐन्द्रवायवी गायत्री मधुच्छन्दोदृष्टा। उप यामेति यजुःसहितो मन्त्रः। हे इन्द्रवायू! युष्मदर्थे इमे सोमा अभिषुताः। प्रय इत्यन्ननाम। प्रयोभिः एतैः सोमरसरूपैरन्नैर्निमित्तैरुप समीपे युवामागच्छतम्। यद्वा प्रयःशब्द 'इण् गतौ' इति धातोः शतृप्रत्ययान्तस्य रूपम्। प्रयतीति प्रयन्। 'इणो यण्' (पा० ६।४।८१) तस्य भिसि परे तकारस्य छान्दसः सकारः, तस्य रुत्वादौ प्रयोभिरिति सिध्यति। प्रयोभिः प्रयद्भिः शीघ्रैरश्वैरागच्छतम्। हि यस्मादिन्दवः सोमा युवां कामयन्ते तस्मादागच्छतम् इत्यर्थः। Mah.

RV 1.27 YV 33.57

द्वे गायत्र्यौ मित्रमाह्वयामि। पूतस्य शुद्धस्य प्राणिन उद्धरणे दक्षं सोमम्। वरुणञ्च। हिंसकादिविनाशने शक्तिं कुर्वाणं हुवे। कीदृशः? धियं कर्म। घृताचीं येन कर्मणा घृतमञ्च्यते हूयते तत्कर्म। साधयन्तौ। नहि देवतामन्तरेण कर्मसिद्धिः। U.

द्वे मधुच्छन्दोदृष्टे गायत्र्यौ, आद्या लिङ्गोक्तदेवत्या। मित्रं वरुणं चाहम्, आह्वयामि। कीदृशम्? पूतदक्षं पूतं पवित्रं सदाचारं दक्षयति धनपुत्रादिभिर्वर्धयति तम्। 'दक्ष कम्यृद्ध्योः' (दक्ष वृद्धौ शीघ्रार्थे च धातुपाठः) इत्यस्माण्णिजन्तात्कर्मण्यण्। रिशादसम्। रिशन्ति हिंसन्ति रिशा दुष्टाः तान् समन्ताद्दसति नाशयति तम्। 'रिश हिंसायाम्' 'दस उपक्षये'। द्वयोर्विशेषणे। कीदृशावुभौ? धियं कर्म साधयन्तौ। कीदृशीं धियम्? घृताचीम् घृतमञ्च्यते हूयते यत्र ताम्। Mah.

[1]RV 1.3.3=YV.33.58

द्वयोरश्विनोरेकस्य दस्र इति नाम अपरस्य नासत्य इति। तत्रायं

---

[1] The YV. adds तं प्रत्नथायं वेनः at the end, to the stanza of the RV.

विभक्त्यर्थे आकारो विरूपैकशेषे वर्तते। 'गुणो यङ्लुकोः' (पा० ७।४।८२) इति च पाणिनिर्दर्शयति। हे दस्रौ! दर्शनीयौ! हे नासत्यौ! न असत्यौ सत्यावेव! 'न आप्नपात्' (पा० ६।३।७५) इति प्रकृतिभावः। युवाकवः युवां कामयमानाः अहमहमिकया मां पिबतं मां पिबतमिति। सुता अभिषुताः। प्रस्तीर्णबर्हिषः। यतः अतो ब्रवीमि आगच्छतम्। हे रुद्रवर्तनी! रुद्रस्येव वर्तनिर्ययोस्तौ तथोक्तौ रुद्रपन्थानौ। U.

आश्विनी द्वयोरश्विनोरेकस्य दस्र इति नामापरस्य नासत्य इति। हे दस्रौ! दर्शनीयौ! हे नासत्यौ! न असत्यौ!। सत्यवादिनावित्यर्थः। युवामागच्छतम्। यतः अभिषुताः सोमा इति शेषः। कीदृशाः सोमाः? युवां कामयन्ते ते युवाकवः मां पिबतमितीच्छन्तः। यद्वा युवन्ति अग्नौ मिश्रीभवन्ति युवाकवः 'कटिकुपिभ्यां काकुः' (उणा० ३।७६) इति बहुलग्रहणात्काकुप्रत्ययः। वृक्तबर्हिषः वृक्तं बर्हिर्यत्र ते। कीदृशौ युवाम्? रुद्रस्येव वर्तनिः पन्था ययोस्तौ रुद्रवद्गमनशीलौ। Mah

RV 1.34 YV 20 87

हे इन्द्र! आगच्छ, हे चित्रदीधिते! किं कारणम्? अभिषुताः इमे सोमाः। त्वायवः त्वां कामयमानाः। 'सुप आत्मनः क्यच्' (पा० ३।१।८) 'क्याच्छन्दसि' (पा० ३।२।१७०) इति त्वायव इति सिद्धम्। न चाभिषुता एव केवलम्। किन्तर्हि? अण्वीभिः स्तना पूतासः। अण्व्य इत्यङ्गुलिनाम। अङ्गुलीभिः तना च धनदानेन च पूताः पवित्रीकृताः। यद्वा तनाशब्देन दशापवित्रमभिधाय अङ्गुलीभिर्दशापवित्रेण च पूता इत्यर्थः। U.

मधुच्छन्दोदृष्टा इन्द्रदेवत्यास्तिस्रो गायत्र्यः। चित्रा नानाविधा भानवो दीप्तयो यस्य स चित्रभानुः। हे चित्रभानो! इन्द्र! त्वमायाहि आगच्छ। किमिति? इमे सोमा अभिषुताः। कीदृशा इमे? त्वां कामयन्ते त्वायवः। 'सुप आत्मनः क्यच्' (पा० ३।१।८) 'क्याच्छन्दसि' (पा० ३।२।१७०) इत्युप्रत्ययः। तथा अण्वीभिः अण्वीत्यङ्गुलिनाम। अङ्गुलीभिःतना दशापवित्रेण च पूतासः पूताः शोधिताः। तनाशब्दो दशापवित्रवाची। तृतीयैकवचनस्य पूर्वसवर्णः। शोधिताः सोमा इन्द्रोऽस्मान् पिबत्विति कामयन्ते। अतोऽत्रायाहीत्यर्थः। Mah.

RV.1.3.5=YV.20.88

हे इन्द्र ! आगच्छ । स्वकीयया बुद्धया प्रेषितः । अनन्यप्रेषित इत्यभिप्रायः । विप्रजूतः जूतिर्ग्रन्थिः प्रीतिर्वा । मेधाव्यनुगतः । अभिषुतवतो यजमानस्य यज्ञम् । किमित्यागन्तव्यमिति चेत् ? उप समीपे ब्रह्माणि हवींषि वर्तन्ते । उपपुरोडाशानृत्विजो वर्तन्त इत्यर्थः । वाघत इति ऋत्विङ्नामसु पठितम् । U.

हे इन्द्र ! स्वबुद्धया प्रेरितः सन्नायाहि । अनन्यप्रेरित आगच्छेत्यर्थः । कीदृशस्त्वम् ? विप्रजूतः । 'जु गतौ' विप्रैर्मेधाविभिरनुगतः सेवितः । किमित्यागन्तव्यमिति चेत् ? सुतावतः । छान्दसो दीर्घः । सोममभिषुतवतो यजमानस्य ब्रह्माणि हवींषि उप हविषां समीपे वाघतः ऋत्विजो वर्तन्त इति शेषः । वाघत इति ऋत्विङ्नामसु पठितम् । ऋत्विजो हविरादाय स्थिता वर्तन्त इत्यायाहीत्यर्थः । Mah

RV 1 3 6 YV 20 89

हे इन्द्र ! आगच्छ । तूतुजानः । तूतुजान इति क्षिप्रनाम । क्षिप्रं त्वरमाणः । कुत्र आगच्छ इति ? उपब्रह्माणि हवींषि । हे हरिवः ! हरी अश्वौ तद्वन् इन्द्र ! 'मतुवसो रुःसम्बुद्धौ' (पा० ८।३।१) इति रुत्वम् । एत्य च अभिषुते सोमे उदरेण धारयस्व । अस्माकं स्वभृतं चनः अन्नलक्षणम् । U.

हरी अश्वौ विद्येते यस्य स हरिवान् । 'मतुवसो रुःसम्बुद्धौ छन्दसि' (पा० ८।३।१) इति रुत्वम् । हे हरिवः ! अश्ववन् ! हे इन्द्र ! तूतुजानः त्वरमाणः सन् त्वं हवींषि प्रति आयाहि । तूतुजान इति क्षिप्रनाम । आगत्य सोमे अभिषुते सति अस्माकम् अन्नं सोमरूपं हविः उदरे धारय । 'धिं धारणे' व्यत्ययेन शपो लुकि द्वित्वं जुहोत्यादित्वादभ्यासस्यात्वं छान्दसम् । चन इत्यन्ननाम । Mah

[1] RV.1 3.7 – YV 7.33; 33 47

वैश्वदेवं गृह्णाति । ओमासः वैश्वदेवी गायत्री । हे ओमासः ! अवितारः !

---

[1] In 7.33. YV. adds उपयाम गृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः । at the end, to the stanza of the RV. A fragment ओमासश्चर्षणीधृतो of the Rgvedic stanza is borrowed by YV. 33.47.

तर्पयितारः ! तर्पणीयाः ! वा । चर्षणीधृतःचर्षणयो मनुष्यास्तान् धारयन्ति तैर्वा ध्रियन्ते चर्षणीधृतः । विश्वेदेवास आगत । हे विश्वेदेवाः ! ये यूयम् । ओमासः अवितारो रक्षितारः । चर्षणीनां मनुष्याणाम् । तेनोपकारेणावनीया वा तर्पणार्हा धारयितारश्च संवित्तिकर्तारः ते यूयम् । चेतसा दत्तवन्तः कृतसंकल्पा भूत्वा इदं नामास्माभिरस्मै देयमिति ततोऽस्य दाशुषः दत्तवतो यजमानस्यैतमभिषुतं सोमं पातुमागच्छत इत्येवमाशास्महे । हे विश्वेदेवाः ! इहागच्छत । कथम्भूताः ? दाश्वांसः, 'दाशृ दाने' दाश्वानिति निपात्यते । दत्तवन्तो यजमानस्य कामान् । किमर्थं पुरस्कृत्यागच्छत ? दाशुषः सुतं हवींषि दत्तवतो यजमानस्याभिषुतं सोमं पातुम् । U.

'वैश्वदेवं गृह्णाति शुक्रपात्रेण द्रोणकलशादन्वारब्धेवौमास इति (का० ६।१४।१) अध्वर्यौ यज्वना स्पृष्टेऽस्पृष्टे वा सति द्रोणकलशाच्छुक्रपात्रेण वैश्वदेवं ग्रहं गृह्णीयात् । वैश्वदेवी गायत्री मधुच्छन्दोदृष्टा । हे विश्वेदेवाः ! यूयमागच्छत । किम्भूता यूयम् ? ओमाः 'अवन्तीत्योमा रक्षितारः अवितारो वावनीया वा' (नि० १२।४०) इति यास्कोक्तेः । तर्पयितारस्तर्पणीया वा । अवतेर्मक्प्रत्ययः सम्प्रसारणञ्च । तथा चर्षणयो मनुष्यास्तान् धरन्ति पुष्णन्ति तैर्वा ध्रियन्ते ते चर्षणीधृतः । चर्षणिशब्दस्य संहितायां दीर्घः । अनिष्टनिरसनं रक्षणम् इष्टप्रापणं पोषणम् इत्यवनधरणयोर्भेदः । तथाभिषुतं सोमं दत्तवतो यजमानस्य फलं दत्तवन्तः । कामान् पूरयन्त इत्यर्थः । यद्वा सुतं सोमं पातुमिति शेषः । 'दाश्वान्'–(पा० ६।१।१२) इत्यादिना निपातः । Mah.

RV 1 3.10 – YV 20.84

पावयित्री । सरस्वती । अन्नैः । अन्नवती । अस्माकं यज्ञं कामयताम् । यो हि यदिच्छति स तत्प्रति गच्छति । धिया वसु धनं यस्याः सा धियावसुः । U

मधुच्छन्दोदृष्टाः सरस्वतीदेवत्यास्तिस्रो गायत्र्यः । सरस्वती अस्माकं यज्ञं कामयताम् । 'वश कान्तौ' यो हि यदिच्छति स तत्प्रति गच्छति । अस्मद्यज्ञं प्रत्यागच्छत्वित्यर्थः । कीदृशी सरस्वती ? पावका पावयित्री । पवनं पावः शोधनं घञ् पावं कायति कथयति पावका 'आतोऽनुपसर्गे कः' (पा० ३।२।३) । वाजैरन्नैः । वाजा अन्नानि विद्यन्ते यस्यां सा वाजिनी यज्ञक्रिया, वाजिनी विद्यते यस्याः सा वाजिनीवती यज्ञक्रियाधिष्ठात्री । धिया कर्मणा वसु धनं यस्याः सा धियावसुः । छान्दसस्तृतीयाया अलुक् । Mah.

RV.1.3.11 - YV.20.85

प्रेरयित्री। शोभनानामृतां वचसाम्। त्रयीलक्षणस्य वाग्विभवस्य चोदयित्रीत्यर्थः। चेतयमाना शोभनमतीनाम्। यज्ञं धारयति सरस्वती। U.

सरस्वती यज्ञं धारयति। कीदृशी? प्रियं सत्यं सूनृतम्। प्रियसत्यवचनानां वेदत्रयीशब्दानां प्रेरयित्री। 'चुद प्रेरणे' णिजन्तात्तृच् ततो ङीप्। शोभनानां बुद्धीनां चेतयन्ती प्रकटयन्ती। सुमतिदात्रीत्यर्थः। 'छन्दस्युभयथा' (पा० ३।४।११७) इति शपोऽप्यार्धधातुकत्वाण्णिचो लोपः। Mah.

RV 1.3 12 YV 20.86

या महत् अर्णः महान्तमुदकमित्यर्थः। सरस्वती प्रज्ञापयति। केन हेतुना? कर्मणा प्रज्ञया वा। मध्यस्थाना नदी वा। धियो बुद्धीः। सर्वाः सर्वप्राणिष्ववस्थिताः। विराजति। राजतिर्दीप्त्यर्थः, अन्तर्भावितण्यर्थश्च द्रष्टव्यः। विविधं दीपयति प्रकाशयति। तां वयं स्तुम इति शेषः। U

सरस्वती कर्मणा प्रज्ञया वा महदुदकं प्रज्ञापयति प्रेरयति। सर्वस्यां भूमौ वृष्टिं कारयतीत्यर्थः। किञ्च सर्वाः धियः सर्वप्राणिस्थाः बुद्धीः। विराजयति दीपयति। सर्वजन्तुबुद्धीः प्रकाशयति तां स्तुमः। Mah.

RV 1 6.1 YV 23.5

अश्वं युनक्ति। युञ्जन्ति ब्रध्नम्। अश्वोऽत्रादित्यवत् स्तूयते उत्तरोऽर्धर्चः प्रथमं व्याख्यायते। यस्य भासा रोचन्ते देदीप्यन्ते रोचनाः रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि। दिवि द्युलोके। तं रथे बध्नन्ति। कथम्भूतम्? ब्रध्नम् परिवृढम् आदित्यम्। अरोपणम्। गच्छन्तं वैदिककर्मसिद्ध्यर्थम्। के युञ्जन्ति? परितस्थुषः सर्वतः स्थिता ऋत्विग्यजमानाः। U

'युनक्त्येनं युञ्जन्ति ब्रध्नमिति' (का० २०।५।११) अश्वं रथे युनक्ति। मधुच्छन्दोदृष्टा आदित्यदेवत्या गायत्री। तस्थुषः। विभक्तेर्व्यत्ययः। तस्थिवांसः कर्मार्थं स्थिता ऋत्विजः ब्रध्नमादित्यं रथे योजयन्ति। अश्व आदित्यत्वेन स्तूयते। 'असौ वा आदित्यो ब्रध्नोऽरुषोऽमुमेवास्या आदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै' (१३।२।६।१) इति श्रुतेः। किम्भूतं ब्रध्नम्? अरुषम् रोषति क्रुध्यति रुषः 'इगुपध-' (पा० ३।१।१३५) इति कः। न रुषः अरुषः तं क्रोधरहितम्। परिचरन्तं वैदिककर्मसिद्ध्यर्थं सर्वत्र गच्छन्तम्। यस्य

ब्रध्नस्य रोचना। विभक्तिलोपः। दीप्तयो दिवि आकाशे रोचन्ते प्रकाशन्ते। यद्वा रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि ब्रध्नस्य भासा रोचन्ते 'तेजसां गोलकः सूर्यो नक्षत्राण्यम्बुगोलकाः' इति ज्योतिःशास्त्रोक्तेः। Mah.

RV.1.6.2 -YV 23.6

इतराश्वं युनक्ति। गायत्री। युञ्जन्ति रथे अस्याश्वमेधिकस्याश्वस्य काम्यौ कामसम्पादिनौ। न ह्येको रथं वोढुं शक्तः। हरी हरितवर्णावश्वौ हरिणौ वा वेगवन्तौ। विविधाः पक्षसः पक्षा ययोस्तौ विविधपक्षावस्थितौ। यद्वा विरिति शकुनिनाम वेतेर्गतिकर्मणः। वेः शकुनेरिव पक्षौ ययोस्तौ। शोणौ। शोणशब्दोऽत्र वर्णवचनः। रक्तो वर्णो धूम्रभासः शोण इत्युच्यते। प्रसहनौ। नृणां मनुष्याणां वोढारौ। U

'इतराँश्च युञ्जन्त्यस्येति' (का० २०।५।११) इतरान् त्रीन् अश्वान् रथे युनक्ति। गायत्री अश्वस्तुतिः। ऋत्विजो हरी अश्वौ रथे युञ्जन्ति। कीदृशौ ? अस्याश्वमेधिकाश्वस्य काम्यौ काम्येते तौ काम्यौ कामसम्पादिनौ न त्वेको वोढुं शक्त इति तौ काम्यौ। विपक्षमा-'पक्ष परिग्रहे' असुन्प्रत्ययः। पक्षयन्ति शरीरं गृह्णन्ति पक्षसः पक्षा विविधाः पक्षसः पक्षा ययोस्तौ विपक्षसौ। यद्वा विरिति शकुनिनाम "वेतेर्गतिकर्मणः" (निरु० २।६) इति यास्कः। वेः पक्षिण इव पक्षसो ययोस्तौ। शोणौ रक्तौ। धृष्णू प्रगल्भौ 'निधृषा प्रागल्भ्ये' कुप्रत्ययः। नृवाहसा नॄन् वहतस्तौ। वहेरसुन्प्रत्ययः। सर्वत्र विभक्तेराकारः। नृणां वोढारौ। Mah

RV.1.6.3 YV 29.37

इत उत्तरमश्वरक्षिणो योद्धारः युद्धोपकरणानि च स्तूयन्ते प्राग्नेय इति श्रुतेः। आग्नेयी गायत्री अनिरुक्ता। प्रज्ञानं कुर्वन्। न विद्यते केतु प्रज्ञानं यस्य तस्मै अकेतवे। पेशः सुवर्णं रूप्यं वा। मर्याः मर्यायेति विभक्तिव्यत्ययः मनुष्याय। अपेशसे न विद्यते पेशः यस्य तस्मै अविद्यमानसुवर्णाय। अविद्यमानरूप्याय वा पेशः कुर्वन्। समुषद्भिरजायथाः हे अग्ने ! उषद्भिः। 'उष दाहे' अग्निहोत्रादीनि कर्माणि कुर्वद्भिः। जायमानः सन् जन्मना जातेर्वा। वसतेर्वा कृतसम्प्रसारणस्यैतद्रूपम्। उषद्भिः अग्निं प्रति निवसद्भिः जायमानः सन् समजायथाः उत्पद्यसे। U.

अग्निदेवत्या गायत्री मधुच्छन्दोदृष्टा निरुक्ता। हे अग्ने! त्वमुषद्भिः कृत्वा अजायथाः उत्पन्नोऽसि। जनेर्लङि रूपम्। 'उष दाहे' उषन्ति हविर्दहन्ति ते उषन्तोऽग्निहोमकर्तारो यजमानाः। कीदृशस्त्वम्? अज्ञानाय मर्याय मनुष्याय ज्ञानं कुर्वन्। विभक्तिव्यत्ययः। नास्ति पेशः सुवर्णं यस्य स अपेशाः तस्मै अपेशसे मर्याय पेशः सुवर्णं कुर्वन्। Mah.

RV 1 9 1 YV 33 25

हे इन्द्र! आ इहि आगच्छ। एत्य च मत्सि, तृप्तिं कुरु, अध्यानीयस्य सोमलक्षणस्यान्नस्य स्वेनांशेन। ततोऽपि सर्वैः सोमयागकालैर्निमित्तभूतैः। आ इहि। यद्वा सर्वसवनगतैः सोमांशुभिः निमित्तभूतैः। कस्मात्पुनस्त्वमेवमस्माभिः प्रार्थ्यसे? इत्यत आह। यतो महानसि। अभ्येषणशीलश्च शत्रूणामभियष्टव्यो वा। ओजसा स्वकीयेन बलेन।[1]

मधुच्छन्दोदृष्टा गायत्री वैश्वदेवपुरोरुक् ओमास इत्यस्याः (७।३३) स्थाने। इन्द्र आ इहि। 'ओमाङोश्च' (पा० ६।१।९५) इति पररूपम्। हे इन्द्र! आगच्छ। आगत्य अन्धसान्नेन हविर्लक्षणेन। विश्वैः सर्वैः सोमांशुभिश्च। त्वं मत्सि तृप्यस्व। 'मद तृप्तौ' शपो लुक्। कीदृशः त्वम्? नेजमा महान् श्रेष्ठः। अभिष्टिः अभीज्यत इत्यभिष्टिः अभियष्टव्यः। पृषोदरादिः। Mah.

[1]RV 1 10 3 YV 8 34

द्वितीयो ग्रहणमन्त्रः। युक्ष्वा हि। 'युजिर् योगे' युङ्ग्धि। हि यस्मात् प्रलम्बकेसरौ हरितवर्णावश्वौ वर्षितारौ सेक्तारौ तरुणौ। कक्ष्या अश्वस्य संनाहरज्जुः। 'प्रा पूरणे' कक्ष्यां यावापूरयतः तावेवमुच्येते। तौ युक्त्वा रथे तमास्थाय। अथ समनन्तरमेव अस्माकं हे इन्द्र! सोमपानशीलः। स्तुतिलक्षणां वाचमुपश्रुत्य आगच्छास्मद्गृहम्।[1]

द्वितीयो ग्रहणमन्त्रः। इन्द्रदेवत्यानुष्टुब् मधुच्छन्दोदृष्टा। हे इन्द्र! हि निश्चितं हरितवर्णौ त्वदीयावश्वौ रथेन संयोजय। कीदृशौ हरी? प्रलम्बकेसरौ तथा वृषणौ 'वृष सेचने' वर्षितारौ सेक्तारौ तरुणौ। 'वा षपूर्वस्य निगमे'

---

[1] YV. adds उपयाम गृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने। at the end, to the stanza of the RV.

(पा० ६।४।६) इति दीर्घाभावः । तथा कक्षे भवः कक्ष्यः अश्वसञ्चाहरज्जुः, कक्ष्यं मध्यबन्धनं प्रातः पूरयतस्तौ कक्ष्यप्रौ स्थूलावयवावित्यर्थः । अथानन्तरं रथारोहणानन्तरं हे इन्द्र ! सोमपानं कुर्वन् अस्मदीयानामृग्यजुःसामलक्षणानां वाचामुपश्रवणं गच्छ प्राप्नुहि । अस्मद्गिरः शृण्वित्यर्थः । वाचं श्रुत्वास्मद्गृहमागच्छेत्यर्थः । Mah.

RV.1.10.12 YV.5.29

परिश्रयति । परि त्वा अनुष्टुबैन्द्री अनिरुक्ता । परिगृह्णन्तु त्वां हे गिर्वणः ! 'इन्द्रो वै गिर्वा' इति श्रुतिः । वाचः इमा ऋग्यजुःसामलक्षणाः । सर्वतः । कथम्भूतं त्वां परिगृह्णन्तु ? वृद्धा आयवो मनुष्या ऊरुलक्षणा यस्य स तथोक्तः । यद्वा वृद्धायुरिति समानाधिकरणः । वृद्धश्चायुश्च महामनुष्य इत्यर्थः । सवनक्रमेणानुबद्धा वाचः । किञ्च जुष्टा भवन्तु त्वां परिगृह्णानाः त्वया परिसेविता भवन्तु । प्रीतिकरा जुष्टयः । ।

'परि त्वेति परिवार्येति' (का० ८।६।१२) परितः कुड्यवदावरणं कृत्वेति सूत्रार्थः । ऐन्द्र्यनुष्टुबनिरुक्ता मधुच्छन्दोदृष्टा । गीर्भिः स्तुतिभिर्वननीयो भजनीयो गीर्वण इन्द्रः सदोऽभिमानी । हे इन्द्र ! स्तोत्रशस्त्ररूपा गिरः त्वां सर्वतः कटरूपेण परिगृह्णन्तु । किम्भूतं त्वाम् ? वृद्धायुं वृद्धा आयवो मनुष्या यजमानादयो मरुतो वा यस्य तम् । यद्वा वृद्धः श्रेष्ठश्चासावायुश्च तं महामनुष्यम् । किम्भूता गिरः ? अनु सवनक्रमेण वृद्धिर्यासां ताः शनैः प्रातःसवनं तत उच्चैर्माध्यन्दिनं सवनं तारस्वरेण तृतीयं सवनमिति क्रमः । किञ्च जुष्टयोऽस्मत्सेवास्तवजुष्टाः प्रियाः भवन्तु । 'जुषी प्रीतिसेवनयोः' जोषणं जुष्टिः । Mah.

RV 1 11 1 YV.12.56, 15.61

पुरीषं निवपति । इन्द्रं विश्वाः । ऐन्द्र्यनुष्टुप् । इन्द्रं सर्वाः स्तुतयः ऋग्यजुःसामलक्षणाः वर्धयन्ति । समुद्रमिव विविधायनं नानागतिम् अक्षोभ्यबलं वा । सर्वेषां रथिनां मध्ये युद्धलब्धातिशयम् । अन्नानां पतिं सतां च पतिम् । श्रुतिस्मृतिकर्मानुष्ठातारः सन्त उक्ताः । U.

'चात्वालदेशात्पुरीषं निवपतीन्द्रं विश्वा इति' (का० १७।१।१८) चात्वालस्थानात् मृदमानीय गार्हपत्यचितेरुपरि क्षिपति । इन्द्रदेवत्या मधुच्छन्दसुतजेतृदृष्टानुष्टुप् । सर्वाः स्तुतय ऋग्यजुःसामरूपा इन्द्रं वर्धयन्ति ।

कीदृशमिन्द्रम् ? समुद्रवद् व्यचो व्याप्तिर्यस्य तं समुद्रवद्व्यापकम् । विविधाञ्चनं नानागतिमित्यर्थः । अक्तोर्भ्यगतिं वा । रथयुक्तानां सर्वेषां मध्ये अत्यन्तं रथयुतं युद्धे लब्धातिशयमित्यर्थः । 'ईद्रथिनः' (पा० ८।२।१७) इति घे परे रथिन ईदादेशः । तथान्नानां स्वामिनं स्वधर्मवर्त्तिनां च प्रतिपालकम् । Mah.

RV.1.11.1 YV.17.61

निधायैनमतिक्रामन्ति चतसृभिः । इन्द्रं विश्वा इति व्याख्यातम् । U.

'निधायैनमतिक्रामन्तीन्द्रं विश्वा इति' (का० १८।३।२१) एनं पृश्न्यश्मानं क्वचिद् गुप्ते देशे स्थापयित्वा सर्वे चयनं प्रति गच्छन्ति इन्द्रं विश्वा इत्याद्यृक्चतुष्टयेनेत्यर्थः । व्याख्याता (अ० १२। क० ५६) । Mah.

[1] RV.1 12.10 YV.17 9

यस्त्वमुक्ताधिकारः सोऽस्माकं हे पावयितः ! दीप्तिमन् ! अग्ने ! देवान् इहावह । यज्ञस्य समीपम् । ततोऽनन्तरं हविश्च नः सम्बन्धि देवान् प्रापयेति शेषः । U

गायत्र्याग्नेयी मेधातिथिदृष्टा । हे पावयितः ! हे दीदिवः ! दीदेवेति दीदिवान् तत्सम्बुद्धौ हे दीदिवः ! दीप्तिमन् ! 'दिवु क्रीडादिषु' क्वसुप्रत्ययः, द्वित्वम् 'तुजादीनाम्' (पा० ६।१।७) इत्यभ्यासदीर्घः । 'लोपो व्योर्वलि' (पा० ६।१।६६) इति वलोपः । हे अग्ने ! देवानिह अस्माकं यज्ञे आनय । यज्ञसमीपे अस्माकं हविश्च देवान् प्रापय । Mah.

RV 1.14.3, 10.41.4 YV.33.45

तिस्रो गायत्र्यः । इन्द्रवायू बृहस्पतिम् । मित्रा मित्रमिति प्राप्ते आकारः । मित्रमग्निं पूषणं भगम् । आदित्यान् मारुतं च गणम् आह्वयामीति शेषः । U

मेधातिथिदृष्टे द्वे गायत्र्यौ । आद्या ऐन्द्रवायवस्य पुनर्ग्रहणे, द्वितीया मैत्रावरुणग्रहणे । इन्द्रवायू बृहस्पतिं मित्रा । विभक्तेराकारः । अग्निं पूषणं भगम् आदित्यान् मरुत्सम्बन्धिनं गणम् एतानाह्वयामि । Mah.

---

[1] The words अग्ने देवां इहा वह of RV. 1.12.3. occur in YV. 17.9 :—स नः पावक दीदिवोऽग्ने देवां इहा वह । उप यज्ञं हविश्च नः ॥

RV.1.14.10=YV.33.10

वैश्वदेवस्य । विश्वेभिः सोम्यम्, गायत्री । दैवैः सह सोमसम्बन्धि मधु हे अग्ने ! इन्द्रेण च सह वायुना च सह पिब । मित्रस्य नामभिः स्तुतः सन् । तदुक्तं 'त्वमग्ने वरुणो जायसे यस्त्वं मित्रो भवसि दस्म ईड्यः इति । U.

गायत्री मेधातिथिदृष्टा वैश्वदेवग्रहपुरोरुक् ओमासश्चर्षणीत्यस्याः (७।३३) स्थाने । हे अग्ने ! विश्वैर्देवैः इन्द्रेण वायुना च सह सोममयं मधु पिब । कीदृशस्त्वम् ? मित्रस्य नामभिः स्तुत इति शेषः । 'त्वमग्ने वरुणो जायसे यस्त्वं मित्रो भवसि दस्म ईड्यः' इति श्रुतेः । Mah

RV 1.15.3 YV 26.21

द्वे गायत्र्यौ ऋतुग्रहाणां याज्ये । नेष्टा स्वकीयामधिष्ठात्रीं देवतां ब्रवीति । स्तुहि यज्ञमस्मत्सम्बन्धिनम् । हे ग्रावः ! ग्राः पत्न्यः ता विद्यन्तेऽस्य स ग्रावान् तत्सम्बोधनं हे ग्रावः ! 'मतुवसो रुःसम्बुद्धौ छन्दसि' (पा० ८।३।१) इति रुत्वम् । हे नेष्टः ! पिब च कालेन सह । कस्मात्त्वमेवमुच्यसे इति चेत्? तत्राह । त्वं हि रत्नधा असि, यस्मात्त्वमेव रमणीयानां धनानां दातासि । U.

द्वे ऋतुदेवते गायत्र्यौ मेधातिथिदृष्टे ऋतुयागे नेष्टुर्याज्ये । ग्राः पत्न्योऽस्य सन्तीति ग्रावान् । 'तदस्यास्ति' (पा० ५।२।९४) इति मतुप् । 'मादुपधायाः'-(पा० ८।२।९) इति वत्वम् । तस्य सम्बोधनं हे ग्रावः ! पत्नीवन् ! हे नेष्टः ! अस्माकं यज्ञं स्तुहि । 'गृ शब्दे' क्र्यादित्वात् श्ना, 'ई हल्यघोः' (पा० ६।४।११३) इति तस्येकारः । 'ष्वादीनां ह्रस्वः' (पा० ७।३।८०) इति धातोर्ह्रस्वः । किञ्च देवेन सह पिब सोममिति शेषः । हि यस्मात् त्वं रत्नधा असि, रत्नानि दधाति ददाति रत्नधाः रमणीयधनानां दातासि । Mah.

[1]RV 1 15.9 -YV.26.22

ऋत्विज उच्यन्ते । अयमग्निर्धनस्य बलस्य वा दाता । पिपीषति पातुमिच्छति । पिबतेः[2] सनीकारः । सोममिति शेषः । एवञ्चेदतो ब्रवीमि । हे

---

[1] The words अश्विना पिबतं (पिबतां YV.) मधु of RV. 1. 15. 11. occur in YV. 20. 90.

[2] नेदं पिबते रूपम् तस्य तु पिपासतीति युक्तत्वात् ।

ऋत्विजः ! जुहुत च प्रतिष्ठत च कर्मसु । किञ्च नेष्ट्रियात् धृष्ण्यात् कालैः सह सोमं पुनःपुनः पिबत । U.

द्रविणस्शब्दः सान्तो धनवाची । द्रविणो धनं ददातीति द्रविणोदाः धनदाताग्निः । पिपीषति पातुमिच्छति सोममिति शेषः । 'पीङ् पाने' असाद्यैवादिकात्सन् प्रत्ययः । अतो हे ऋत्विजः ! यूयं जुहुत च प्रतिष्ठत च । 'तप्तनप्–' (पा० ७।१।४५) इति तबादेशः । कर्मस्वयुक्ता भवतेति शेषः । किञ्च नेष्टुरिदं नेष्ट्रम् । वृद्धयभाव आर्षः । नेष्टुर्धिष्ण्याद् देवैः सह सोमं प्रति गच्छत । 'इप् गतौ' दिवादित्वाच्छयन् लोट् । Mah.

RV.1.18.1 YV.3.28

अग्निमीक्षमाणो जपति । सोमानं स्वरणम् । ब्रह्मणस्पत्यो गायत्रस्तृचः बृहस्पतिरेव ब्रह्मणस्पतिः । हे ब्रह्मणस्पते ! सोमानम् । 'षूङ् अभिषवे' (प्राणिप्रसवे) (षुञ् अभिषवे) आतो मनिन्क्वनिब् वनिपः । 'अन्येभ्योपि दृश्यन्ते' (पा० ३।२।७५) इति मनिन् । सोतारं पातारमिति पर्यायाः । केषां सोतारम् ? सामर्थ्यात्सोमानाम् । स्वरणम् । 'स्वृ शब्दोपतापयोः' । शब्दयितारं सोतारं च सोमानां स्तोतारञ्च देवानाम् । कुरु धनप्रदानैः । कमिव ? कक्षीवन्तम् लुप्तोपममेतत्, कक्षीवन्तमिव ऋषिं दीर्घतमसः पुत्रम् । यः उशिजः पुत्रः, उशिक् माता अस्यासीत् । L

'सोमानमित्यनुदकं व्रतोपायनवत्' (का० ४।१२।१०) । व्रतेत्यपरेणाहवनीयं प्राङ् तिष्ठन्नवर्चं जपतीति सूत्रार्थः । सोमानं स्वरणं तृचो गायत्रो ब्रह्मणस्पतिदेवत्यस्तेनैव दृष्टः । अग्निमीक्षमाणस्य यजमानस्य जपे विनियुक्तः । हे वेदस्य पालक ! सोमानामभिषोतारम् । स्वरणं 'स्वृ शब्दोपतापयोः' शब्दयितारम् । कुरु । मामिति शेषः । सुनोतीति सोमा तम् । 'अन्येभ्योऽपि दृश्यन्ते' (पा० ३।२।७५) इति मनिन् । स्वरतीति स्वरणः नन्द्यादित्वात् ल्युः । सोमयागकर्तारं स्तुतिरूपशब्दयुक्तं च धनप्रदानैर्मां कुर्वित्यर्थः । तत्रोपमानमुच्यते । कक्षीवन्नामकमृषिं दीर्घतमःपुत्रं यथा सोमयागयुक्तं स्तुतियुक्तञ्च कृतवानसि तथा मां कुरु । उपमानद्योतक इवशब्दोऽत्र लुप्तो द्रष्टव्यः । कोऽसौ कक्षीवान् ? यः औशिजः उशिजः पुत्रः, उशिक् कक्षीवतो माता । Mah.

RV.1.18.2=YV.3.29

रै इति धननाम । यो ब्रह्मणस्पतिर्धनवान् । यश्च अमीवहा । अमीवा व्याधिः । व्याधेर्हन्ता । वसुनो धनस्य सारासारतां वेत्ति विदित्वा च यथायोग्यं स्तोतृभ्यो ददाति । पुष्टिवर्द्धनः । 'पुष् पुष्टौ' पुष्टेः पोषस्य वर्धयिता । स नः सिषक्तु । 'सिषक्ति सचते इति सेवमानस्य' । सोऽस्मान् सेवताम् । यस्त्वरणः अविलम्बकारी । यद्वा पुत्रः प्रार्थ्यते । हे ब्रह्मणस्पते ! यः पुत्रः धनवान् यश्च व्याधेर्हन्ता । ज्योतिःशास्त्राभिप्रायमेतत् । धनस्य च लब्धा पुष्टेश्च वर्धयिता । सोऽस्मान् पुत्रः सेवताम् । यः शीघ्रकारी । कालातिक्रमो हि प्रत्यग्रं कार्यरसं पिबतीत्याहुः । U.

यो ब्रह्मणस्पतिः धनवान् । यश्चामीवस्य रोगस्य हन्ता । 'अम रोगे' । 'अमेरीवः' । वसु धनं वेत्तीति वसुवित् । यश्च पोषणस्य वर्धयिता । यश्च तुरः 'तुर वेगे' 'इगुपधस्य' (पा० ३।१।१३५) इति कः । वेगवान् अविलम्बितकारी । स ब्रह्मणस्पतिर्नोऽस्मान् सिषक्तु सेवताम् । 'सिषक्ति सचते इति सेवमानस्य' (निरु० ३।२१) अथवा अनयर्चा पुत्रः प्रार्थ्यते । यः पुत्रो धनवान् यश्च व्याधेर्हन्ता जपादिना यो धनस्य लब्धा पुष्टेश्च वर्धयिता यः शीघ्रकारी तादृशः पुत्रोऽग्नेः प्रसादान्नोऽस्मान् सेवताम् । Mah

RV.1.18.3=YV.3.30

मा इत्यव्ययं प्रणगित्याख्यातेन सम्बध्यते । प्रपूर्वकस्य नशेर्व्याप्त्यर्थस्यैतद्रूपम् । मा व्याप्नोतु नः अस्मान् । शंसनं शंसोऽनिष्टचिन्तनम् । कस्य सम्बन्धि ? अररुषः । 'रा दाने' अस्य क्वसौ षष्ठ्यां ररुष इति भवति, तन्नञा प्रतिषिध्यते अररुषः अदातुः । अनुपभोग्यस्य शत्रोरित्यर्थः । धूर्तिः-हिंसा । ध्वरति धूर्वति इति वधकर्मसु पठितम्, मरणधर्मिणो मनुष्यस्य । मास्मान् व्याप्नोतु अररुषो मर्त्यस्य सम्बन्धि शंसनं धूर्त्तिश्चेति वाक्यार्थः । किञ्च रक्षा णः रक्ष नः गोपायास्मान् । हे ब्रह्मणस्पते ! U.

'रा दाने' इति धातोः क्वसुञन्तस्य षष्ठ्येकवचने ररुष इति रूपम् । ररौ इति ररिवाँस्तस्य ररुषः । दानं कृतवत इत्यर्थः । तस्य निषेधादररुष इति कदाचिदपि हविर्दानमकृतवत इत्यर्थः । तादृशस्य मनुष्यस्य शंसो धूर्तिश्च अस्मान् मा प्रणक् प्रकर्षेण व्याप्नोतु । नशिर्व्याप्त्यर्थः । यद्वा 'णश अदर्शने' मा प्रकर्षेण नाशयतु । शंसनं शंसोऽनिष्टचिन्तनम्' धूर्ति-

हिंसा। 'ध्वरति धूर्वति' (निघ० २।१९) इति वधकर्मसु पठितत्वात्। शत्रुकृतमनिष्टचिन्तनं शत्रुकृता हिंसा चास्मान् मा व्याप्नोत्वित्यर्थः। किञ्च हे ब्रह्मणस्पते! वेदस्य पालकाग्ने! अस्मान् रक्ष। 'द्व्यचोऽतस्तिङः' (पा० ६।३।१३५) इति संहितायां दीर्घः। णत्वं पूर्ववत्। Mah.

RV.1.18.6=YV.32.13

इत उत्तरं तिसृभिः कण्डिकाभिर्मेधा याच्यते श्रीश्च चतुर्थ्या। सदस-स्पतिम् सदसस्पतिर्देवता सदो यज्ञगृहं, तस्य पतिः तम्। अद्भुतं महान्तं अचिन्त्यशक्तिम्। प्रियमिन्द्रस्य कामसम्पत्करं कमनीयं वा धनमेधार्थिभिः। मनिं धनं मेधाम् अयासिषं याचे। द्विकर्मा चायं धातुः। U

इत उत्तरमृक्त्रये मेधा याच्यते। चतुर्थ्या श्रीर्याच्यते। प्रथमा गायत्री लिङ्गोक्तदेवता। अग्निं द्रव्यदानं बुद्धिं च याचे। द्विकर्मकः। कीदृशमग्निम्? सदसो यज्ञगृहस्य पालकम् अचिन्त्यशक्तिम् इन्द्रस्य प्रियं मित्रं कमनीयं धनमेधार्थिभिः। Mah.

[1] RV.1.22.3 =YV.7.11

आश्विनस्य पुरोरुक्। या वां कशा। गायत्री आश्विनी। हे आश्विनौ! या वां युवयोः कशा। कशेति वाङ्नाम। सा प्रकाशयति अर्थान्। मधु-ब्राह्मणोपनिषत् प्रशंसायुक्ता। सूनृतावती शोभना प्रिया ऋतावती सत्य-वती च या वाक् सा सूनृतावती। तया यज्ञं मिमिक्षतम्। 'मिह सेचने' सिञ्चतम्। अश्विनौ हि यज्ञे अध्वर्यू अत एवमुच्यते। U.

'आश्विनं गृह्णात्यन्वारब्धे वा या वामिति' (का० ६।७।८) यज-मानेऽन्वारब्धे वाश्विनं ग्रहं गृह्णाति। आश्विनी गायत्री मेधातिथिदृष्टा यजुरन्ता। हे अश्विना! अश्विदेवौ! युवयोर्या कशा, कशेति वाङ्नामसु पठितम्। काश-यति प्रकाशयति वाङ्मयमिति कशा वाक्। किम्भूता? मधुमती मधु ब्रह्म तद्वती मधुब्राह्मणोपनिषत्प्रशंसायुता। तथा सूनृतावती प्रियं सत्यं वचः सूनृतं तद्वती सत्यप्रियवचनोपेता। हे अश्विनौ! तया वाचास्मदीयं यज्ञं मिमिक्षतम्। 'मिह सेचने' सञ्चन्तः। सेक्तुमिच्छतम्। निष्पादयतमित्यर्थः। Mah.

---

[1] YV. adds उपयाम गृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा at the end to the stanza of the RV.

RV.1.22.5 - YV.22.10

हिरण्यपाणिमूतये हिरण्मयौ पाणी यस्य स हिरण्यपाणिः तम्। अवनाय। सवितारमाह्वयामि। किमिति ? यतः स सविता सर्वार्थदक्। महती च देवता स्थानं च ज्ञानकर्मसमुच्चयकारिणाम्। U.

मेधातिथिदृष्टा। अहं सवितारमाह्वयामि। किमर्थम् ? अवनाय। कीदृशं सवितारम् ? हिरण्यपाणिं हिरण्मयौ पाणी यस्य तम्। यतः स सविता चेतयिता सर्वज्ञः। देवता। स्थानं ज्ञानिनाम्। Mah

RV.1 22.7 YV 30.4

कर्मानुरूपेण विभक्तारम्। आह्वयामः। वासयितुः। चायनीयस्य। धनस्य आयुषश्च। सवितारम्। नृणां द्रष्टारम्। ये नरो यथा द्रष्टव्यास्तांस्तथा पश्यति। U.

वयं सवितारमाह्वयामः। किम्भूतम् ? वासयितुः नानाविधस्य धनस्य विभज्य दातारम्। नृणां द्रष्टारम् यथायोग्यम्। Mah

RV.1.22 9 YV 26 20

इत उत्तरं पञ्च नेष्टुर्याज्याः। आद्या गायत्री। देवानां पत्न्यः त्वष्टा च देवता। हे अग्ने ! देवानां पत्नीः इह अस्मिन् यज्ञे आगमय। कथम्भूताः ? कामयमाना अस्मान्। त्वष्टारञ्च उपावह। किमर्थम् ? सोमपानाय। U

अग्निदेवत्या गायत्री मेधातिथिदृष्टा। इतः पञ्च ऋचोऽग्निष्टोमे नेष्टुर्याज्याः। आद्या प्रातःसवने नेष्टृचमसयागे याज्या। हे अग्ने ! देवानां पत्नीः इह यज्ञे त्वमागमय। कीदृशीः पत्नीः ? हविः कामयमानाः। वशेः शत्रन्तात् 'उगितश्च' (पा० ४।१।६) इति ङीप्। किञ्च सोमपानाय त्वष्टारं देवं चोपावह। Mah

RV.1.22.13 YV 8.32, 13.32

अङ्गारैरभिसमृहति मही द्यौः द्यावापृथिव्यौ गायत्री। महती द्यौः पृथिवी च अस्माकमिमं यज्ञं मिमिक्षताम्। 'मिह सेचने'। सिञ्चतु स्वैः स्वैर्भागैः। बिभृताम् अस्मान्। भरणैः हिरण्यपशुधान्यादिभिः। U.

'मही द्यौरित्यङ्गारैरभ्यूहतीति' (का० २५।१०।१८) शामित्रे चितं गर्भमङ्गारैश्छादयेत्। द्यावापृथिवीदेवत्या गायत्री मेधातिथिदृष्टा। मही

महती द्यौः द्युलोकः पृथिवी भूलोकश्च अस्माकमिमं यज्ञं मिमिक्षताम् 'मिह सेचने' सञ्चन्तः। सेक्तुमिच्छताम्। स्वैः स्वैर्भागैः पूरयतामित्यर्थः। भरणैर्हिरण्यपशुधान्यादिभिः स्वैः स्वैर्भागैः अस्मदीयं गृहं पूरयताम्। Mah.

[1]RV.1.22.15 –YV.35.21; 36.13

पार्थिवी गायत्री। सुखरूपा। हे पृथिवि! अस्माकं भव अनृक्षरा च ऋक्षरः कण्टकः। अनृक्षरा अकण्टका। निवेशनी च साधुप्रतिष्ठाना। किञ्च प्रयच्छ च अस्माकं शरणम्। सर्वतः पृथुः। U

पृथिवीदेवत्या गायत्री मेधातिथिदृष्टा यजुरन्ता। अस्या अपि श्रौते विनियोगो नास्ति स्मार्ते स्वस्तरारोहणे शयने विनियोगः। तथाहि 'स्योना पृथिवि नो भवेति दक्षिणपार्श्वे प्राक्शिरसः संविशन्तीति' (पार० ३।२) हे पृथिवि! त्वम् अस्माकं सुखरूपा भव। किम्भूता त्वम्? ऋक्षरः कण्टकः। 'ऋच्छतेः कण्टकः कन्तपो वा कर्णतेर्वा कृन्ततेर्वा स्याद् गतिकर्मणः' (निरु० ९।३२) इति यास्कः। तद्ग्रहणं चौरदायादादिदुःखनिवृत्त्यर्थम्। न सन्ति ऋक्षराः कण्टका दुःखदायिनो यस्यां सा अनृक्षरा। तथा निवेशनी। निविशन्ति जना यस्यां सा निवेशनी साधुप्रतिष्ठाना। 'करणाधिकरणयोश्च' (पा० ३।३।११७) इति ल्युट्। तथा सप्रथाः प्रथनं प्रथः विस्तारः प्रथसा सह वर्त्तमाना सप्रथाः सर्वतः पृथुः। किञ्च अस्मभ्यं शर्म शरणं देहि। Mah.

RV.1.22.17 –YV.5.15

दक्षिणे वर्त्मनि हिरण्यं निधाय जुहोति। इदं विष्णुः। गायत्री वैष्णवी। इदं जगत् विष्णुर्विचक्रमे विक्रान्तवान्। सर्वप्राणिनो हि भूतेन्द्रियमनोजीवभावेन आविशतीति विष्णुः। किञ्च त्रेधा निदधे पदम्, पद्यते ज्ञायतेऽनेनेति पदम्। भूम्यन्तरिक्षद्युलोकेषु अग्निवायुसूर्यरूपेण त्रिधा निहितवान् पदम्। किञ्च समूढमस्य पाꣳसुरे। अस्यैव विष्णोरन्यत्पदान्तरं विज्ञानघनानन्दमजमद्वैतमक्षरमित्येवंलक्षणम्, समूढमन्तर्हितमविज्ञातमकृतात्मभिः। पांसुरे।

---

[1] YV. reads सप्रथाः for सप्रथः of the RV. and adds अप नः शोशुचदघम्, at the end, to the stanza of the RV.

लुप्तोपममेतत् । पांसुल इव प्रदेशे निहितं न दृश्यते तत्समूढमिति दृष्टव्यमिति वाक्यशेषः । तदुक्तम्-'तद् विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम्' इति । U.

'दक्षिणे वर्त्मनि दक्षिणस्यानसो हिरण्यं निधायाभिजुहोतीदं विष्णुरिति' (का० ८।३।३१) दक्षिणशकटसम्बन्धिदक्षिणचक्रमार्गे हिरण्यं निधाय तत्रैष होमः । विष्णुदेवत्या गायत्री मेधातिथिर्दृष्टा । विष्णुः त्रिविक्रमावतारं कृत्वा इदं विश्वं विचक्रमे विभज्य क्रमते स्म । तदेवाह । त्रेधा पदं निदधे भूमावेकं पदमन्तरिक्षे द्वितीयं दिवि तृतीयमिति क्रमादग्निवायुसूर्यरूपेणेत्यर्थः । पांसवो भूम्यादिलोकरूपा विद्यन्ते यस्य तत्पांसुरं तस्मिन् पांसुरे अस्य विष्णोः पदे समूढं सम्यगन्तर्भूतं विश्वमिति शेषः । यद्वायमर्थः । अस्य विष्णोः पदं पद्यते ज्ञायत इति पदमद्वैताख्यं स्वरूपं समूढमन्तर्हितमज्ञातमकृतात्मभिः । कस्मिन्निव ? पांसुरे इव, लुप्तोपमानम् । पांसुले रजस्वले प्रदेशे निहितं यथा न ज्ञायते तद्वत् । तदुक्तम् 'तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः' । (अध्या० ६।५) इति[1] । Mah.

RV.1 22 18, 8.12.27 YV.34 43

वैष्णव्यौ गायत्र्यौ द्वाभ्यामेकवाक्यम् । यः विष्णुः यज्ञः त्रीणि पदानि, विचक्रमे क्रान्तवान्, अग्निवाय्वादित्याख्यानि । गोपाः गोपायिता समस्तस्य जगतः । अदाभ्यः अनुपहिंस्यः । अतः अस्मादेव पदत्रयात्, धर्माणि । धर्मशब्द उभयलिङ्गः अर्धर्चादौ गणे पठितः । धर्मान् धारयन् । कर्मपर्यायो वा । अतः एभ्यः पदेभ्यः कर्माणि धारयन् U

वैष्णव्यौ गायत्र्यौ । द्वयोर्ऋचोरेकवाक्यम् । यो विष्णुः यज्ञः त्रीणि पदानि विचक्रमे विक्रान्तवान् । अग्निवाय्वादित्याख्यानि पदानि व्याप्तवान् । किम्भूतो विष्णुः ? गोपाः जगतो रक्षकः । अदाभ्यः अहिंस्यः । किं कुर्वन् ? अतः अस्मादेव पदत्रयात्, धर्माणि पुण्यानि कर्माणि धारयन् । धर्मशब्दो नपुंसकत्वे स्त्रियाम् । Mah.

RV.1.22 19 YV 6 4; 13 33

वाचयति । विष्णोः कर्माणि । द्वे गायत्र्यौ वैष्णव्यौ । हे ऋत्विजः !

---

[1] YV. adds the word स्वाहा to the stanza of the RV.

विष्णोः यज्ञस्य कर्माणि वीर्याणि पश्यत । यतः । तसिप्रकरणे आद्यादिभ्य उपसंख्यानं वक्तव्यम् । यतो यैर्वीर्यैः । व्रतानि । व्रतमिति कर्मनाम । आधानपशुसोमप्रभृतीनि कर्माणि । आत्मनि पस्पशे-'स्पश बन्धने' बद्धवान् । विष्णुर्हि अधिष्ठात्रो देवता यज्ञानाम् । यद्वा विष्णोर्वीर्याणि पश्यत । यैर्वीर्यैस्तानि व्रतानि कर्माणि अग्निवायुसूर्याणां स्वानि स्वान्यप्रमत्ताः एतानि कुरुतेत्येवं पस्पशे निबद्धवान् । किञ्च यश्च विष्णुः इन्द्रस्य सखा वृत्रवधादिषु कर्मसु । कथम्भूतः ? युज्यः 'युजिर् योगे' । योगार्हः अनुरूप इत्यर्थः । U.

'विष्णोः कर्माणीति वाचयति यूपमन्वारब्धमिति' (का० ६।३।१२) यूपं स्पृष्टवन्तं यजमानं वाचयेदिति सूत्रार्थः । द्वे वैष्णव्यौ गायत्र्यौ मेधातिथिदृष्टे । हे ऋत्विजः ! विष्णोः यज्ञाधिष्ठातुः कर्माणि सृष्टिसंहारादिचरितानि यूयं पश्यत । यतो यैः कर्मभिः व्रतानि भवदीयानि लौकिकवैदिककर्माणि पस्पशे बद्धवान् निर्मितवानित्यर्थः । 'स्पश बन्धने' । स विष्णुरिन्द्रस्य युज्यः वृत्रवधादिकर्मसु योज्योऽनुरूपः सखा मित्रम् । यद्वा विष्णोः यज्ञस्य कर्माणि वीर्याणि पश्यत यैर्वीर्यैः व्रतानि आधानपशुसोमादीनि कर्माणि पस्पशे आत्मनि बद्धवान् । यद्वा यैर्वीर्यैर्व्रतानि कर्माणि अग्निवायुसूर्याणां स्वानि स्वानि एतान्यप्रमत्ताः कुरुतेत्येवं पस्पशे निबद्धवान् । शिष्टं समानम् । Mah.

RV.1.22.19 – YV.13.33

उलूखलमुसले उपदधाति । विष्णोः कर्माणि । व्याख्यातम् । U.

'उलूखलमुसले स्वयमातृण्णामुत्तरेणाग्निमात्रे औदुम्बरं प्रादेशमात्रे चतुरस्रमुलूखलं मध्यसंगृहीतमूर्ध्वं वृत्तं दक्षिणमुलूखलाद्विष्णोः कर्माणीति' (का० १७।५।३) चतुष्कोणं सङ्कुचितं खातहीनमुदुम्बरतरुजमूर्ध्वमुलूखलं वृत्तं मुसलं ते उभे स्वयमातृण्णोत्तरे देशे तन्मध्याद्धस्तमात्रे तृतीये लोके विष्णोरिति मन्त्रेण-सहैवोपदधातीति सूत्रार्थः । व्याख्याता (६।४) ।

Mah.

RV.1.22.20 = YV.6.5

चषालमुदीच्यते । तद्विष्णोः । तदः प्रतियोगिनात्र पूर्वं यद्वृत्तेन भवितव्यम् । यद्विज्ञानघनबहुलमानन्दस्वभावञ्च तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः पण्डिताः वेदान्तज्ञानरहस्यविवृतसम्पुटाः । कथम्भूतं पदं पश्यन्ति ? दिवीव द्युलोकमध्यगतमिव । चक्षुः आदित्यमण्डलम् । आततं

विततं विस्तारितम् । चक्षुःशब्देनान्यत्रापि मण्डलमुच्यते । 'चक्षुर्मित्रस्य वरुणस्याग्नेः' 'तच्चक्षुर्देवहितम्' इति च । यद्वा धृत्रसम्बन्धो द्वितीयोऽर्धर्चः प्रथमः क्रियते । परमपदशब्देनादित्य उच्यते । इवश्चानर्थकः । तद्दिवि चक्षुरादित्याख्यं विततं तद्विष्णोः परमं पदं तृतीयं सदा पश्यन्ति पण्डिताः अधियज्ञविदः । U.

'तद्विष्णोरिति चषालमोक्षमाणमिति' (का० ६।३।१३) यूपकटकं प्रेक्षमाणं यजमानं वाचयेदिति सूत्रार्थः । सूरयः विद्वांसो वेदान्तपारगा विष्णोः तत्परमं पदं स्वरूपं सदा पश्यन्ति । कीदृशम् ? दिवि आकाशे निरावरणे चक्षुरिवाततं यद्वा यद् दिवि आकाशे चक्षुरादित्यमण्डलमाततं विस्तारितम् । इवोऽनर्थकः । चक्षुःशब्देनान्यत्रापि मण्डलमुच्यते 'चक्षुर्मित्रस्य वरुणस्य' (अ० ७ क० ४२) 'तच्चक्षुर्देवहितम्' (अ० ३६ क० २४) । Mah.

RV.1.22 21 =YV 34 44

तद्विप्रासः तस्य विष्णोर्यज्ञस्य यत् परमं पद ब्रह्मलक्षणम् । तद् विप्रासः ब्राह्मणाः विपन्यवो मेधाविनः । जागृवांसः असुप्ताः अप्रमत्ताः । ज्ञानकर्मसमुच्चयकारिणः । समिन्धते सन्दीपयन्ति । उपासनैर्निर्मलीकुर्वन्ति । U.

तस्य विष्णोः यज्ञस्य यत्परमं पदं ब्रह्मलक्षणं तद्विप्रासः विप्राः ब्राह्मणाः समिन्धते । णिचो लोपः । समिन्धयन्ति दीपयन्ति उपासते इत्यर्थः । किम्भूताः विप्राः ? विपन्यवः विगतः पन्युः संसाराव्यवहारो येभ्यः निष्कामाः । जागृवांसः जागरणशीलाः अप्रमत्ताः । ज्ञानकर्मसु समुच्चयकारिणः इत्यर्थः । Mah.

RV.1 23 6 =YV.33.46

वरुणः प्रावित । वरुणः प्रावित प्रकर्षेण अवित रक्षकः भुवन् भवतु । मित्रश्च । विश्वाभिः सर्वाभिः ऊतिभिः अवनैः पालनैः । किञ्च करतां कुरुतां च नः अस्मान् सुराधसः शोभनधनान् । U.

वरुणः मित्रश्च सर्वाभिः ऊतिभिः अवनैः रक्षणप्रकारैः प्रावित प्रकर्षेण रक्षको भुवत् भवतु । भवतेर्व्यत्ययेन तुदादित्वात् शप्रत्ययः 'इतश्च लोपः' (पा० ३।४।९७) इति तिप इलोपः धातोरुवङ् । किञ्च मित्रावरुणौ नोऽस्मान् सुराधसः शोभनधनान् करतां कुरुताम् । शोभनं राधो येषाम् । Mah.

[1]RV.1.23.19=YV.9.6.

अश्वानद्भिरभ्युक्षति । अप्स्वन्तः । अनवसाना पुरउष्णिक् अश्वदेवत्या । अप्सु अन्तरवस्थितममृतम् अप्सु च भेषजम् । तत्र हे अश्वाः ! यूयं भवत वाजिनः । वाज इत्यन्ननाम । तद्येषु विद्यते ते वाजिनः । अन्नवन्तो यूयं तत्र भवतेत्यर्थः । अपामुत प्रशस्तिषु । उत अपिच अपां प्रशस्तिषु प्रशस्तेषु पवित्रेषु भागेषु भवतेत्यनुषज्यते । U.

'अश्वान् प्रोक्षत्यपोऽवनीयमानान् स्नातान् वागतान् अप्स्वन्तरिति देवीराप इति वा समुच्चयो वेति' (का० १४।३।३।५) स्नानार्थमपो नीयमानान् स्नात्वागतान्वाश्वानप्स्वन्तरिति देवीराप इति मन्त्रेण वोभाभ्यां वा प्रोक्षेत् । अश्वदेवत्यावसानरहिता पुरउष्णिक् । अस्याः पाद आद्यो द्वादशाक्षरो द्वावष्टाक्षरौ । अप्सु उदकेषु अन्तर्मध्ये अमृतमवस्थितमप्सु भेषजमारोग्यपुष्टिकरमौषधं चावस्थितम् । हे अश्वाः ! यूयं तत्रामृतभेषजयुतास्वप्सु वाजिनोऽन्नवन्तो भवत । उतापिच अपां प्रशस्तिषु प्रशस्तेषु भागेषु यूयं भवत । Mah

[2]RV 1.23 22; 10.9.8=YV.6.17.

चात्वाले मार्जयन्ते इदमापः । व्यवसाना महापङ्क्तिरब्देवत्या पावमानश्चान्त्यः पादः । हे आपः ! इदं पशुसंज्ञपननिमित्तं पापं प्रवहत अपनयत । किञ्च अवद्यं च अवदनीयञ्च यद् अभिशापादि मलं च यत् । यच्च मलं शरीरसंलग्नं प्रसिद्धं तच्च प्रवहत । यच्चाभिदुद्रोहानृतम् । 'द्रुह जिघांसायाम्' । यदपि चाभिद्रुग्धवानस्मि असत्यमुच्चार्य । यच्च शेपे अभीरुणम् । आक्रोशेन यच्च शपितवानस्मि अभीरुणमनपराधिनम् । अनपराधी हि न बिभेति । यद्वा अभिलुनाति छिनत्ति कर्माणि यदुच्चरितं सत् तदभीरुणम् । आपो

---

[1] YV. reads प्रशस्तिष्वश्वाः for प्रशस्तये देवाः of the RV. and adds देवीरापो यो वः ऊर्मिः प्रतूर्तिः कुकुन्मान्वाजसास्तेनायं वाजं भेत्सेत् । at the end, to the stanza of the RV.

[2] YV. reads इदमापः प्रवहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् । आपो मा तस्मादेनसः पवमानश्च मुञ्चतु । for इदमापः प्र वहत यत्किं च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् । of the RV.

मां तस्मादेनसः पापात् पवमानश्च मुञ्चतु । पवमानः सोमो वायुर्वा मां मुञ्चतु पृथक्करोतु । U.

'चात्वाले मार्जयन्ते सपत्नीका इदमापः प्रवहतेति' (का० ६।६।२६)। सर्वे ऋत्विजश्चात्वालसमीपेऽद्भिरात्मानमभ्युक्षन्तीति सूत्रार्थः । अब्देवत्या व्यवसाना महापङ्क्तिः पावमानश्चान्त्यः पादः । यस्याः षट् पादा अष्टाक्षराः सा महापङ्क्तिः । हे आपः ! इदं पशुसंज्ञपननिमित्तं पापं प्रवहत । किञ्च यच्चावद्यमवदनीयमभिशापादि यच्च मलं शरीरलग्नं प्रसिद्धं तच्च प्रवहत अपनयत । किञ्च यदहमनृतमसत्यमुक्त्वाभिदुद्रोह द्रुग्धवानस्मि । 'द्रुह जिघांसायाम्' । यच्चाहमभीरुणं बिभेतीति भीरुः न भीरुरभीरुस्तमभीरुणमनपराधिनम् । अपराधी हि बिभेति । एवंविधं शेपे शपितवानस्मि । अनपराधिनं प्रति यन्मयाभिशापो दत्तः । आपः तस्मादेनसः पापाद् मा मां मुञ्चतु ? (मुञ्चन्तु) पृथक्कुर्वन्तु पवमानश्च सोमो वायुर्वा तस्मात्पापान्मां मुञ्चतु । Mah

[1] RV.1 24 8 – YV.8 23.

आपोऽवक्रमयन् वाचयति । उरुꣳ हि । वारुणी त्रिष्टुप् । एकं तावद् उरुं विस्तीर्णं हि अतिशयेन राजा वरुणः चकार कृतवान् । सूर्याय । षष्ठ्यर्थे चतुर्थी । सूर्यस्य पन्थानम् । अन्वेतवा उ अन्वेतवान् अन्वहमागमनाय । अपरम् । अपदे पादा प्रतिधातवेऽकः । यत्र पदं दत्तं प्रतिमुद्रान्यायेन नोपलक्ष्यते तस्मिन् पदे पथि अन्तरिक्षलोके पादा पादानाम् । षष्ठी-बहुवचनस्थाने आकारः । प्रतिधातवे प्रतिनिधाय अकः कृतवान् आलम्बनमिति शेषः । सूर्यस्येव । उतापवक्ता हृदयाविधश्चित् । उत अपिच । अपवक्ता अपवदिता आक्षेप्ता । हृदयाविधश्चित् । चिच्छब्दोऽप्यर्थे । हृदयं यो विध्यति मर्माण्युच्चार्योच्चार्य पिशुनः तस्याप्यपवदिता-किमुतान्येषामत्युक्तकारिणामिति । य इत्थम्भूतो वरुणः सोऽवभृथाय तीर्थं ददात्विति शेषः । U

'उरुꣳ हीति वाचयतीति' (का० १०।८।१५) अवभृथाय जिगमिषुरध्वर्युश्चात्वालसमीपस्थं प्राङ्मुखं यजमानं वाचयेत् । वरुणदेवत्या त्रिष्टुप्

---

[1] In YV. the words माहिर्भूर्मा पृदाकुः are added at the beginning and the words नमो वरुणायाधिष्ठतो वरुणस्य पाशः at the end of the Ṛgvedic stanza.

शुनःशेपदृष्टा । उशब्दोऽवधारणे । वरुण एव राजा सूर्याय अन्वेतवै । षष्ठ्यर्थे चतुर्थी । सूर्यस्यान्वेतुमनुक्रमेणान्वहं गन्तुं हि यस्माद् उरुं विस्तीर्णं पन्थां पन्थानं मार्गं चकार । क ? अपदे नास्ति पदं यस्मिन्, यत्र दत्तं पदं प्रतिमुद्रितं न भवति तस्मिन्नन्तरिक्षे मार्गं कृतवानित्यर्थः । तस्मादस्माकमपि अपदे अन्तरिक्षे पादा प्रतिधातवे पादौ निक्षेप्तुम् । विभक्तेराकारः । मार्गं कः करोतु, स्वर्गगमनाय मार्गं करोत्वित्यर्थः । करोतेरदादित्वेन लङि शपो लुक् अडभाव आर्षः । किञ्च यो वरुणः उतापिच हृदयाविधश्चिदपवक्ता हृदयं विध्यति मर्मोच्चारणेन पीडयति हृदयविद् 'नहिवृतिवृषि-' (पा० ६।३।११६) इत्यादिना क्विबन्ते व्यधौ परे हृदयस्य दीर्घः । तस्य हृदयाविधः पिशुनस्यापि अपवदिता, चिच्छब्दोऽप्यर्थे । निन्दकस्यापि तिरस्कर्ता किमुतान्येषां पापकारिणामित्यर्थः । ईदृशो वरुणोऽवभृथाय मार्गं ददात्वित्यर्थः । अन्वेतवै प्रतिधातवे । अनुपूर्वादिणः प्रतिपूर्वाद्धातेश्च 'तुमर्थे सेसे-' (पा० ३।४।९) इत्यादिना क्रमात्तवैतवेप्रत्ययौ । Mah.

RV 1 24.11 = YV.18 49, 21.2.

वारुण्या त्रिष्टुभा जुहोति । तत्त्वा । तदाशास्त इति तदः श्रवणादिह यदः प्रयोगः । यत्प्रयोजनं त्वां यामि याचामि ब्रह्मणा त्रयीलक्षणेन वन्दमानः स्तुवन् । तदीयं यजमान आशास्ते हविर्भिरभ्युद्यतैः । अतः अहेडमानः अक्रुध्यन् हे वरुण ! इह कर्मणि वर्तमान ! अस्माकं कं ? (किं) प्रयोजनं यज्ञसमाप्तिलक्षणं बोधि बुध्यस्व । बुद्ध्वा च हे उरुशंस ! बहुसंस्तव्यमान ! आयुः मा प्रमोषीः मा अस्माकमायुः खण्डय । U.

वरुणदेवत्या त्रिष्टुप् शुनःशेपदृष्टा । अत्र द्वौ तच्छब्दौ वर्तेते तत्रैकस्य यच्छब्दपरिणामः कार्यः । हे वरुण ! यजमानः हविर्भिः दत्तैः यद्धनपुत्रादिकमाशास्ते इच्छति, यत्कामस्तुभ्यं हविर्दत्ते तद् यजमानेष्टं त्वा त्वामहं यामि याचामि । तत्त्वया यजमानाय दीयतामित्यर्थः । यामीति याच्ञाकर्मसु पठितः । अथापि वर्णलोपो भवति । तत्त्वा यामीति (नि० २.१) यास्कोक्तेराकारलोपः । कीदृशोऽहम् ? ब्रह्मणा त्रयीलक्षणेन वेदेन वन्दमानः त्वां स्तुवानः । किञ्च हे उरुशंस ! शंसनं शंसः स्तुतिः 'शंसु स्तुतौ' उरुर्महान् शंसः स्तुतिर्यस्य स उरुशंसः तत्सम्बुद्धौ हे बहुस्तुते ! इहास्मिन् स्थाने अहेडमानः, हेडते क्रुध्यति हेडमानः न हेडमानोऽहेडमानः अक्रुध्यन् सन् त्वं बोधि बुध्यस्व त्वम् । मत्प्रार्थनां

जानीहीत्यर्थः । 'हुझल्भ्यो हेर्धिः' (वा छन्दसि) (पा० ३।४।८८) इति हेरपित्त्वाद्गुणः धलोपश्छान्दसः । किञ्च नोऽस्माकमायुर्जीवनं मा प्रमोषीः मा चोरय । 'मुष स्तेये' लुङ् 'न माङ्योगे' (पा० ६।४।७४) इत्यडभावः । पूर्णमायुश्च देहीत्यर्थः । Mah.

RV.1.24.15=YV.12.12.

पाशान् विमुञ्चति । उदुत्तमं वारुणी त्रिष्टुप् । उदित्ययमुपसर्गः श्रथायेत्यनेन सम्बध्यते । हे वरुण ! उत्तमं पाशम् उच्छ्रथय । 'श्रथ शैथिल्ये' । श्लथीकृत्योर्ध्वं नय । अस्मत् अस्मत्तः अवाधमम् अधमं च पाशम् अवाचीनं श्लथय । विमध्यमं स्थानस्थितमेव विश्लथय मध्यमम् । अथैवं कृते सति वयं हे आदित्य ! अदितेः पुत्र ! व्रते तव कर्मणि वर्तमानाः अनागसः अनपराधाः अदितये अदीनतायै स्याम भवेम । U.

'पाश उन्मुच्योदुत्तममिति' (का० १६।५।१७) । रुक्मपाशशिक्यपाशौ गलादूर्ध्वमार्गेण निष्कासयतीति सूत्रार्थः । वरुणदेवत्या त्रिष्टुप् शुनःशेपदृष्टा । उदित्युपसर्गोऽव वि एतावपि श्रथयेत्यनेन सम्बध्यन्ते । हे वरुण ! उत्तममुत्तमाङ्गे शिरसि स्थापितं त्वदीयं पाशमस्मत् अस्मत्तः सकाशात् उत् श्रथय उत्कृष्य विनाशय । अधममधमाङ्गे पादप्रदेशे स्थापितं त्वत्पाशमवश्रथय अवकृष्य अस्मत्तो विनाशय । मध्यमं मध्यमप्रदेशे स्थितं पाशं विश्रथय विच्छेदय । 'श्रथ बन्धे' मित्त्वाण्णिचि ह्रस्वः, लोटि मध्यमैकवचने रूपम् । श्रथायेति संहितायां दीर्घश्छान्दसः । यद्वा श्रथ क्र्यादिः लोटि मध्यमैकवचने 'छन्दसि शायजपि' (पा० ३।१।८४) इति श्नाप्रत्ययस्य स्थाने शायजादेशे श्रथायेति रूपम् । अथ पाशत्रयविनाशानन्तरं हे आदित्य ! अदितिपुत्र ! वरुण ! अनागसः अनपराधा निष्पापास्तव व्रते कर्मणि वर्तमानाः सन्तो वयमदितये अदीनतायै स्याम अखण्डितत्वाय योग्या भवेम । अथा इत्यत्र 'निपातस्य च' (पा० ६।३।१३६) इति दीर्घः । Mah.

RV.1.25.10=YV.10.27; 20.2.

यजमानस्य उरोऽभिमृश्य जपति । निषसाद धृतव्रतः । वारुणी गायत्री । अधियज्ञं यजमानो वरुणः निषसाद निषण्णः । धृतव्रतः धृतं व्रतं कर्म येन स तथोक्तः । 'धृतव्रतो वै राजा न वा एष सर्वस्या इव वदनाय न सर्वस्या इव कर्मणे यदेव साधु वदेद् यत्साधु कुर्यात् तस्मै वा एष श्रोत्रियश्च' इति श्रुतिः ।

पस्त्यासु प्रजासु आधिपत्येनेत्युपसर्गादर्थपरिपूर्तिः। साम्राज्याय 'सम्राड्भावाय राज्याय' इति श्रुतिः। सुक्रतुः सुकर्मा। शोभनप्रज्ञो वा। U.

'निषसादेत्युरोऽस्यालभत इति' (का० १७।४।७)। अध्वर्युर्यजमानहृदयं स्पृशति। वरुणदेवत्या गायत्री शुनःशेपदृष्टा अष्टषट्सप्तवर्णपादत्वाद्वर्धमाना गायत्री। असौ यजमानः पस्त्यासु विन्नु प्रजासु आ निषसाद। 'विशो वै पस्त्याः' (श० ५।४।४।५) इति श्रुतेः। आधिपत्येनोपविवेश। यदासन्द्यां निषण्णः स प्रजास्वेव निषण्ण इत्यर्थः। 'व्यवहिताश्च' (पा० १।४।८२) इति आङ उपसर्गस्य क्रियापदेन व्यवस्थानम्। किम्भूतो यजमानः? धृतव्रतो धृतं व्रतं यज्ञलक्षणं कर्म येन स्वीकृतयज्ञः। वरुणः वारयत्यनिष्टमिति वरुणः। तथा सुक्रतुः शोभनसंकल्पः शोभनप्रज्ञो वा। किमर्थं निषसाद? साम्राज्याय सम्राजो भावः साम्राज्यम् 'सम्राड्भावाय राज्याय' इति श्रुतेः। Mah

[1]आसन्द्यामुपविशति। निषसादेति व्याख्यातम्। U

'तस्मिन्नास्ते यजमानो निषसादेति' (का० १६।४।६)। यजमानः कृष्णाजिने उपविशेत्। व्याख्याता (अ० १०। क० २७) Mah

RV 1 25 19 YV 21.1.

इमं मे। इमं मेनानुवाकेनैष्टिकं हौत्रम्। वारुणी गायत्री वारुणस्य हविषो याज्या। हे वरुण! त्वं मे मम इममाह्वानं श्रुधि शृणु च। अपरम् अद्य मृडय सुखय कालविलम्बनं मा कृथाः। यतः अहम् अवस्युः आत्मनोऽवनं पालनमिच्छन् त्वाम् आचके। आचक इति कान्तिकर्मा। कामये। U.

'इमं मे तत्त्वेत्येककपालस्य' (का० १६।७।१३) अवभृथेष्टौ वारुणस्यैककपालस्य पुरोडाशस्य पुरोऽनुवाक्यमित्यर्थः। वरुणदेवत्या गायत्री शुनःशेपदृष्टा। हे वरुण! त्वं मम इममाह्वानं श्रुधि शृणु। 'शुशृणु' (पा० ६।४।१०२) इति हेर्धिः। संहितायां दीर्घः। च पुनः अद्य दिने मृडयास्मान् सुखय। यतोऽहं त्वां कामये। आचक इति कान्तिकर्मा। कीदृशोऽहम्? अवस्युः अवनमवः पालनम्। अवतेरसुन् तदिच्छति अवस्युः 'सुप आत्मनः

---

[1] In YV. 20. 2, the words मृत्योः पाहि विद्योत्पाहि are added at the end of the Rgvedic stanza.

क्यच्' (पा० ३।१।८) 'क्याच्छन्दसि' (पा० ३।२।१७०) इत्युप्रत्ययः। आत्मनो रक्षणमिच्छन् त्वामिच्छामीत्यर्थः। Mah.

RV.1.27.7=YV.6.29.

गायत्र्याग्नेयी। हे अग्ने! यं मनुष्यं सङ्ग्रामेषु अवाः अवसि, अवते रक्षणार्थस्यैतद्रूपम्। रक्षसि। वाजेषु। वाज इत्यन्ननाम। हविर्लक्षणेष्वन्नेषु अभ्युद्यतेषु। यं च पुरुषं जुनाः। जुनातिर्गत्यर्थः। अभिगच्छसि। स पुरुषो यन्ता जिनात्यन्नम्। तृजन्तमेतत्, आद्युदात्तत्वात्। लब्धा सततं भवति। शाश्वतिकाः। अन्नानि। U.

'प्रचरणीस्रुक्स्रवमग्निष्टोमे जुहोत्यभावे चतुर्गृहीतं यमग्ने' (का० ६।३।१६) इति अग्निष्टोमसंस्थे क्रतौ प्रचरणीपात्रलिप्तमाज्यशेषं जुहुयात् शेषाज्यस्य होमपर्याप्त्यभावे चतुर्गृहीतमादाय जुहोतीति सूत्रार्थः। आग्नेयी गायत्री। मधुच्छन्दोदृष्टा। हे अग्ने! संग्रामेषु यं मनुष्यं त्वमवसि रक्षसि। अवतेः 'इतश्च लोपः परस्मैपदेषु' (पा० ३।४।९७) इति सिप इकारलोपे 'लेटोऽडाटौ' (पा० ३।४।९४) इत्याडागमे वा इति रूपम्। किञ्च। वाज इत्यन्ननाम। हविर्लक्षणेष्वन्नेषु अन्ननिमित्तं यं पुरुषं त्वं जुनाः गच्छसि। हवींषि ग्रहीतुं यस्य सकाशं गच्छसीत्यर्थः। 'जु गतौ' क्राप्रत्ययः 'इतश्च लोपः'-(पा० ३।४।९७) इतीकारलोपे रूपं जुना इति। स मर्त्यस्त्वदनुग्रहेण नित्यान्यन्नानि धनरूपाणि यन्ता नियस्यति प्राप्स्यतीत्यर्थः। लुट्। स्वाहा सुहुतमस्तु। उक्थसंस्थे यमग्ने इति मन्त्रेणाद्यं परिधिं स्पृशेत्। षोडशिसंस्थे रराटीं स्पृशेत्। अतिरात्रे छदिः स्पृशेत्। अन्यसंस्थासु हविर्धानं प्रविशेत्। Mah.

RV.1.30.7 YV 11.14

अजमभिमन्त्रयते। गायत्री। योगेयोगे तवस्तरम्। तव इति बलनाम कर्मणि कर्मणि बलिनमुत्साहवन्तमेतमजम्। अन्ने अन्ने दातव्ये देवानां मनुष्याणाञ्चाह्वयामः। हे सखायः! ऋत्विग्यजमानाः! इन्द्रियवन्तं वीर्यवन्तम्। ऊतये अवनाय। आह्वयाम इति सम्बन्धः। U.

अजदेवत्या गायत्री शुनःशेपदृष्टा। अजं मन्त्रयते। सखायः परस्परसख्यं प्राप्ता ऋत्विग्यजमानाः, वयमिन्द्रियवन्तं वीर्यवन्तमिन्द्रियप्रदं वा अजमवनाय रक्षणाय आह्वयामः। ह्वः शपि सम्प्रसारणम्। क्व सति? तत्तदन्ने मनुष्याणां देवानां च दातव्ये सति तत्तदन्नप्राप्तिनिमित्तं वा। किम्भूतमजम्?

युज्यतेऽनुष्ठीयते इति योगः कर्म तस्मिन्। तत्तत्कर्मणि तवस्तरं बलवत्तरमुत्साहवन्तम्। तव इति बलनाम। तवो बलमस्यास्तीति तवस्वी। 'अस्माया'—(पा० ५।२।१२१) इत्यादिना विन्। अत्यन्तं तवस्वी तवस्तरस्तम्। अतिशये तरप् 'विन्मतोर्लुक्' (पा० ५।३।६५) इति तरपि विनो लुक्। Mah.

RV 1.31.1 - YV.34.12.

आग्नेयी जगती। हे अग्ने! त्वमाद्यः अङ्गिरा ऋषिः अभवः। त्वञ्च प्रथमः देवः देवानामभवः। कल्याणः। समानख्यानः। किञ्च तव कर्मणि वर्तमानाः क्रान्तदर्शनाः। विश्वना अपसः। अप इति कर्मनाम। विदितकर्माणः। संवृत्ता मरुतः। भ्राजन्त्य ऋष्टयः खड्गा येषां ते भ्राजदृष्टयः। यो हि शत्रून् जयति भ्राजन्ते तस्यायुधानि। U

आग्नेयी जगती। हे अग्ने! त्वं देवानां प्रथमः सखा अभवः भूतोऽसि। आद्यो मित्रभूतो देवानां त्वमेवेत्यर्थः। किम्भूतस्त्वम्? अङ्गिराः अङ्गानां रसः। यद्वा अङ्गिभ्य आत्मभ्यो यजमानेभ्यो राति सुखमित्यङ्गिराः। ऋषिर्द्रष्टा। द्योतमानः। कल्याणः। किञ्च तव व्रते कर्मणि वर्तमाने मरुतः ईदृशा अजायन्त। कीदृशाः? क्रान्तदर्शिनः। विश्वनापसः। अप इति कर्मनाम। विश्वना विदितानि अपांसि कर्माणि यैस्ते विदितकर्माणः। भ्राजदृष्टयः भ्राजन्त्यः शोभमानाः ऋष्टयः आयुधानि येषां ते तथा। शत्रुघातकत्वात्। विश्वनेति वेत्तेः कर्मणि मनिन्प्रत्ययः बहुलग्रहणात्ततो विभक्तेराकारः तस्य चालुक्। विश्वनापसः अजायन्त। जनेर्लङ् जादेशश्च श्यन्। Mah

RV.1.31.12 =YV.34.13.

आग्नेयी जगती। विषमोऽयं मन्त्रः साध्याहारः। त्वमस्माकम्, हे अग्ने! आश्रय इति शेषः। अथैवं सति तव हे देव! पालनैः धैर्यावलम्बिभिः पालिताः सन्तः आस्महे। किञ्च धनानि रक्ष। शरीराणि च रक्ष। हे वन्दितव्य! कस्मात्पुनस्त्वमेवमुच्यसे? यतः स्वभावत एव त्राता पुत्रस्य, तनयस्य पौत्रस्य च गवां च असि। कथम्? प्रमादमकुर्वन् रक्षमाणः। एवञ्चेन् मृदुहृदयतमोऽसि। तव कर्मणि वयं स्याम। अन्या देवताः परित्यज्य त्वामेव परिचराम इत्यभिप्रायः। U.

रक्षणार्थो मन्त्रः। हे अग्ने! हे देव! द्योतमान! हे स्तुत्य! तव कर्मणि वर्तमानान् धनवतो यजमानान् पालय। अस्माकं शरीराणि च रक्ष। कैः?

तव त्वदीयैः पालनैः । यतस्त्वं सावधानं पालयन् सन् पुत्रस्य तनये । विभक्ति-व्यत्ययः । तनयस्य पौत्रस्य गवां च रक्षकोऽसि । Mah.

RV.1.34.11=YV. 34.47.

आश्विनी जगती । आगच्छतम्, हे अश्विनौ ! त्रयस्त्रिंशद्भिर्देवैः सहितौ भूत्वा । तदुक्तम् अष्टौ वसव इत्यादि । इह । मधुः सोमः । सोमपानं प्रति । एत्य च प्रतारिष्टं प्रवर्धयतम् आयुः । 'मृजूष् शुद्धौ' । रपः पापमुच्यते । निःशोधयतं नाशयतम् । पापानि । सेधतं द्वेषः । 'षिधु गत्याम्' । गमयतं दौर्भाग्यम् । भवतश्च सहभुवौ सर्वकार्येषु संयुक्तौ । U

जगती अश्विदेवत्या । हे नासत्यौ ! हे अश्विनौ ! त्रिगुणैरेकादशभिः त्रयस्त्रिंशत्संख्याकैः देवैः इह स्थाने सोमपानं प्रति आगच्छतम् । मधुः सोमस्तस्य पेयं पानम् । किञ्च । आयुः प्रतारिष्टम् । तरतिर्वृद्ध्यर्थः प्रवर्द्धयतम् । पापानि निःशेषं शोधयतम् । नाशयतमित्यर्थः । दौर्भाग्यं सेधतम् । 'षिधु गत्याम्' गमयतं नाशयतमित्यर्थः । सचा इत्यव्ययं सहार्थे । सचा सह भवतस्तौ सचाभुवौ क्विप् । कार्येषु संयुक्तौ भवतम् । अष्टौ वसव इत्यादिना त्रयस्त्रिंशद्देवता गणिताः । तारिष्टम् । तरतेर्लुङि मध्यमद्विवचनं 'बहुलं छन्दस्यमाङ्योगेऽपि' (पा० ६।४।७५) इत्यडभावः । मृक्षतम् 'मृजूष् शुद्धौ' 'लेटोऽडाटौ' 'सिब्बहुलं लेटि' (पा० ३।१।३४) इति सिप् 'तस्थस्थमिपाम्' (पा० ३।४।१०१) इति व्यत्ययेन थसस्तमादेशः । Mah.

RV.1 35 2 - YV.33.43; 34.31.

पुनः पुनर्भ्रमणं कुर्वन् । कृष्णेन रजसा रात्रिलक्षणेन सह । स्वेषु स्वेषु प्रदेशेषु स्थापयन् देवादिकं मनुष्यादिकञ्च । हिरण्मयेन सविता रथेन । आयाति दानादिगुणयुक्तः भूतजातानि पश्यन् । कानि कानि साधु कुर्वन्ति कानि कानि वा असाध्विति स्वरूपानुवादः । U.

हिरण्यस्तूपदृष्टा त्रिष्टुप् सावित्रपुरोरुक् । सविता देवः हिरण्मयेन रथेन आगच्छति । किं कुर्वन् ? कृष्णेन रजसा रात्रिलक्षणेन सह पुनर्भ्रमणं

---

[1] According to the rule of Amarakośa—'विंशत्याद्याः सर्वैकत्वे' sing. number should have been used. The reading in that case should be त्रयस्त्रिंशता

कुर्वन् देवादिकं मनुष्यादिकञ्च स्वस्वप्रदेशेषु स्थापयन् भुवनानि पश्यन्। कानि साधु कुर्वन्ति कान्यसाध्वितिं विचारयन्। Mah.

RV.1.35.8=YV.34.24.

चतस्रः सावित्र्यः द्वितीया जगती त्रिष्टुभोऽन्याः। यः अष्टौ प्रकाशितवान् दिशः। चतस्रो दिशः चतस्रोऽवान्तरदिशः। पृथिव्याः सम्बन्धिनीः। त्रीणि धन्वानीति शब्दसमाधिः। धन्व इत्यन्तरिक्षनाम तदुपलक्षितावितरावपि लोकौ गृह्येते छत्रिणो यान्तीति यथा। यश्च त्रीन् लोकान् व्यख्यत्। यश्च योजनान् योजनगव्यूतिक्रोशादीन् मानविशेषान् व्यख्यत्। यश्च सप्तसिन्धून् सप्तसमुद्रान् व्यख्यत्। सोऽयं हिरण्याक्षः हिरण्यसदृशाक्षः अमृतदृष्टिर्वा सविता देव आगच्छतु। किं कुर्वन्? इत्यत आह—स्थापयन् रत्नमयानि धनानि। हवींषि दत्तवते यजमानाय। वरणीयानि। U.

चतस्रः सावित्र्यः द्वितीया जगती त्रिष्टुभोऽन्याः हिरण्यस्तृपदृष्टाः। स सविता देव आगच्छतु। 'इणो गा लुङि' (पा० २।४।४५) इतीणो गादेशः। किं कुर्वन्? हवींषि दत्तवते यजमानाय वरणीयानि रत्नानि ददत् स्थापयन् वा। कीदृशः? हिरण्यमिव कान्तियुक्ते अक्षिणी यस्य स हिरण्याक्षः अमृतदृष्टिर्वा। स कः? यः सविता पृथिव्याः सम्बन्धिनीः अष्टौ दिशः व्यख्यत् प्रकाशितवान्। यश्च त्रीणि धन्वानि लोकान् व्यख्यत्। धन्वेत्यन्तरिक्षनाम। तेन तदुपलक्षितावितरावपि लोकौ लक्ष्येते। छत्रिणो गच्छन्तीतिवत्। यश्च योजनानि योजनगव्यूतिक्रोशादीनध्वपरिमाणविशेषान् व्यख्यत्। यश्च सप्त समुद्रान् क्षीरोदाद्यान् व्यख्यत्। उपलक्षणमेतत्। सर्वजगत्प्रकाशकः सविता रत्नानि ददान आयात्वित्यर्थः। अख्यत् 'ख्या प्रकथने' 'अस्यतिवक्तिख्यातिभ्योऽङ्' (पा० ३।१।५२) इति च्लेरङ् आलोपश्च धातूनामनेकार्थत्वादत्र प्रकाशनार्थो ग्राह्यः। त्री योजना 'सुपां सुलुक्' (पा० ७।१।३९) इत्यादिना पूर्वसवर्णदीर्घो विभक्तेः। धन्व सुपो लुक्। रत्ना सुप आकारः। दाशुषो 'दाश्वान्साह्वान्' (पा० ६।१।१२) इति निपातः। वार्याणि 'ऋहलोर्ण्यत्' (पा० ३।१।१२४) इति वृणोतेर्ण्यत्। Mah.

RV.1.35.9=YV.34.25.

सुवर्णपाणिः सविता । विविधं द्रष्टा कृताकृतप्रत्यवेक्षकः उभे द्यावापृथिवी अन्तः । अधिकरणश्रुतेर्योग्यक्रियाया अध्याहारः । मध्ये स्थितः ईयते एति यदा । अथ तदा अपामीवां बाधते । अमीवां व्याधिम् । वेति विगतिकर्मा । गच्छति सूर्यरूपमवस्थाय । ततोऽस्तमनकाले । अभिकृष्णेन रजसा द्यामृणोति । अभिमृणोति अभिव्याप्नोति । कृष्णेन रजसा तमोलक्षणेन । द्यां द्युलोकम् । U.

प्रसविता सूर्य सूर्यः विभक्तिव्यत्ययः । उभयोः द्यावापृथिव्योः अन्तर्मध्ये आगच्छति यदा तदा व्याधिमपबाधते अन्धकारलक्षणं रोगं निवर्तयति । अथ यदा वेति अस्तमयसमये गच्छति तदा कृष्णेन रजसा अन्धकारलक्षणेन द्युलोकमभिव्याप्नोति । कीदृशः सूर्यः ? हिरण्यपाणिः सुवर्णपाणिः । विविधं द्रष्टा कृताकृतप्रत्यवेक्षकः । उभे द्यावापृथिवी षष्ठ्यर्थे द्वितीया । अन्तर्योगे वा । ईयते 'ईङ् गतौ' दिवादिः । Mah.

RV.1.35.10 YV.34.26.

द्वितीयोऽर्धर्चः प्रथमं व्याख्यायते सामर्थ्यात् । यः अपगमयन् रक्षसः यातुधानाँश्च असुखकारकान् । उदस्थात् । श्रुतिस्मृतिविहितधर्मपराङ्मुखानां यावन्तो दोषास्तावतः स्तुवन् उच्चारयन् गणयन् उपभोगार्थमित्यभिप्रायः । सोऽयं सविता हिरण्यहस्तः । हिरण्यदानार्थं हस्तौ यस्य स तथोक्तः । रूपेण वा स्तुतिः । असुरः 'रा दाने' असून् प्राणान्ददातीत्यसुरः । नीथा स्तुतिः । कल्याणस्तुतिः । साधु सुखयिता । स्ववान् । आत्मीयज्ञातिधनवचनः स्वशब्दः । यातु आयातु । अर्वागञ्चनः अस्मानभिमुखः । U.

यो देवो रविः राक्षसान् असुखकराँश्च अपगमयन् सन् उदस्थात् तदेति स देवः अर्वागञ्चनः अस्मदभिमुखः आयात्वित्यर्थः । कीदृशो देवः ? हिरण्यहस्तः हिरण्यं दानार्थं हस्ते यस्य स तथोक्तः । रूपेण वा स्तुतिः । असून् प्राणान् राति ददातीत्यसुरः । नीथा स्तुतिः कल्याणस्तुतिः । साधु सुखयिता । स्वबान्धवान् । प्रतिजनं यो दोषः प्रतिदोषः तम् । श्रुतिस्मृतिविहितधर्मपराङ्मुखानां यावन्तो दोषास्तावतः उच्चारयन् उपभोगार्थमित्यभिप्रायः । स्ववान् यातु इत्यत्र 'दीर्घादटि समानपादे' (पा० ८।३।९) इति नस्य

रुत्वे भोभगोअघोअपूर्वस्य योऽशि (पा० ८।३।१७) तस्य रोर्यादेशे 'हलि सर्वेषाम्' (पा० ८।३।२२) तस्य लोपः। रक्षस्शब्दस्य व्यत्ययेनाङ्गीवत्वम्। Mah.

RV.1.35.11=YV.34 27.

ये तव पन्थानः। वचनव्यत्ययः। हे सवितः! पूर्वेष्वपि कालेषु भवाः। अपांसुलाः साधुकृता धात्रा अन्तरिक्षे। तैः अस्मान् अद्य नयेति शेषः। पथिभिः साधुगमनैः अन्नपानप्रभूतैर्गच्छतः रक्ष च अस्मान्। अङ्गीकृत्य च ब्रूहि। यथा एते अस्मदीया इति। यद्वा यदस्माकं हितं पथ्यं तदुपदिश। हे दानादिगुणयुक्त! U

हे सवितः! हे देव! पन्थानो मार्गा अन्तरिक्षे साधुकृता धात्रा वर्तन्ते। कीदृशास्ते? पूर्वेषु कालेषु भवाः पूर्व्याः। अरेणवः नास्ति रेणुर्यत्र अपांसुलाः। तैः पथिभिः मार्गैः अस्मान् अद्य नयेति शेषः। च पुनः गच्छतोऽस्मान् रक्ष पालय। अङ्गीकृत्य ब्रूहि एते मदीया इति। यद्वा उपदिशास्माकं यद्धितं पथ्यं तत्। यद्वा अधिकान् वद एते महायाज्ञिका दातार इत्यादि। किम्भूतैः पथिभिः? सुगैः सुखेन गम्यते येषु तैः अन्नपानप्रभूतैरित्यर्थः। अधिकरणे गच्छतेर्डप्रत्ययः। पूर्वैः कृताः पूर्व्यासः 'पूर्वैः कृतमिनियौ च' (पा० ४।४। १३३) इति यप्रत्ययः। Mah

RV 1.36 9=YV 11.37

हे अग्ने! सङ्गत्य सीदस्व। यतः त्वं महानसि। दीप्यस्व। यतस्त्वम् अतिशयेन देवानामाप्यायिता। विमुञ्च च विधूमम् अरोचनम्। मियेध्य। यमेध्य इति प्राप्ते छान्दसोऽपकर्षः। हे प्रशस्तलक्षण! दर्शनीयमाहुतिपरिणाममूतम्। 'इतो वा अयमूर्ध्वं रेतः सिञ्चति धूमं सामुत्र वृष्टिर्भवति' इति श्रुतिः। U.

आग्नेयी बृहती प्रस्कण्वदृष्टा। तृतीयो द्वादशार्णोऽन्येऽष्टार्णाः। मेध्यशब्दस्य छान्दसो विप्रकर्षः। हे मियेध्य! हे मेध्य! यज्ञिय! यज्ञार्ह! हे प्रशस्त! उत्कृष्ट! अग्ने! त्वं संसीदस्व पुष्करपर्णे सम्यगुपविश। यस्त्वं महानसि अनेकक्रतुहेतुत्वात्। स त्वं शोचस्व 'शुच दीप्तौ' दीप्यस्व। कीदृशस्त्वम्? देवान् वेति तर्पयति देववीः 'वी कान्त्यादौ' क्विप्। अतिशयेन देववीः देववीतमः। किञ्च दर्शनीयमरोचनं धूमं विमुञ्च। वीत्युपसर्गः सृजेत्यनेन सम्बध्यते। 'इतो वा अयमूर्ध्वꣳ रेतः सिञ्चति धूमꣳ सामुत्र वृष्टिर्भवति' इति श्रुतिः। Mah.

RV.1.36.13=YV.11.42.

अथैनमित ऊर्ध्वं प्राञ्चं गृह्णाति । ऊर्ध्व ऊषुण बृहती आग्नेयी । ऊर्ध्वस्तिष्ठ । ऊषू पादपूरणे । अस्माकमवनाय । कथमूर्ध्वस्तिष्ठ ? देवो न सविता-नकार उपमार्थीयः । देव इव सविता ऊर्ध्वः स्थितः अन्नस्य सम्भक्ता । भविष्यसीति शेषः । यस्माद् व्यञ्जकैर्द्रव्याणां रश्मिभिः । हविषां वोढृभिः सहितं विविधमाह्वयामः । तदूर्ध्वस्तिष्ठेति सम्बन्धः । U

'ऊर्ध्वबाहुः प्राञ्चं प्रगृह्णात्यूर्ध्व ऊ षु ण इति' (का० १६।३।८) प्रसारितबाहुः प्राञ्चं पिण्डं गृह्णाति । अग्निदेवत्योपरिष्टाद्बृहती कण्वदृष्टा । चतुर्थः पादो द्वादशार्णोऽन्ये त्रयोऽष्टार्णाः सोपरिष्टाद्बृहती। हे अग्ने! अस्माकं रक्षणाय ऊर्ध्व एव सुतरामवस्थितो भव । 'द्व्यचोऽतस्तिङः' (पा० ६।३।१३५) इति दीर्घस्तिष्ठा इत्यत्र । 'नश्च धातुस्थोरुषुभ्यः' (पा० ८।४।२७) इति न इत्यत्र णत्वम् । क इव ? देवो न सविता । न इवार्थे । सविता देव इव । यथा सविता देव ऊर्ध्वः सन्नस्मानवति तद्वत् । स त्वमूर्ध्वः सन् देव ! अन्नस्य दाता भवेति शेषः । 'षणु दाने' । यद्यस्मात्कारणाद् मन्त्राभिव्यञ्जकैः हव्यवाहकैर्ऋत्विग्भिः सह त्वा विविधमाह्वयामः । तस्मादूर्ध्व एव तिष्ठेति पूर्वत्रान्वयः । अञ्जन्ति व्यक्तीकुर्वन्तीत्यञ्जिनस्तैः । यद्वा अञ्जिभिर्द्रव्याणां व्यञ्जकै रश्मिभिः सहितं त्वां विह्वयामहे । कीदृशैरञ्जिभिः ? वाघद्भिः हविषां वोढृभिः । Mah.

RV.1.40.1 - YV.34.56

ब्राह्मणस्पती बृहती । हे ब्रह्मणस्पते ! ऊर्ध्वो भव । आरुन्धकार्यो भव । यस्माद् देवान् कामयमानाः यजमानाः त्वां भवन्तं याचामहे आगच्छेति । भवन्तमागच्छन्तमुपसङ्गम्य आगच्छन्तु । मरुतः कल्याणदानाः । त्वं च हे इन्द्र ! प्रकर्षेण शीघ्रो भव सहगमनाय । U.

ब्राह्मणस्पतिदेवत्या बृहती । हे ब्रह्मणो देवस्य ? (वेदस्य) पते ! पालक ! ऊर्ध्वः आरुन्धकार्यो भव । यतो वयं देवान् कामयमानाः त्वां याचामहे, आगच्छेति । मरुतः भवन्तमागच्छन्तमुप समीपे आगच्छन्तु । किम्भूताः मरुतः ? शोभनं ददति ते सुदानवः । हे इन्द्र ! त्वमपि सहगमनाय प्रकर्षेण शीघ्रो भव । देवान् कामयन्ते देवयन्ति ततः शतृप्रत्ययः 'सुप आत्मनः क्यच्' (पा० ३।१।८) 'न छन्दस्यपुत्रस्य' (पा० ७।४।३५) इति निषेधात् 'क्यचि च'

(पा० ७।४।३३) इतीत्वाभावः, 'अश्वाघस्यात्' (पा० ७।४।३७) इत्यश्वाघयो-रेवाकारविधानात् 'अकृत्सार्वधातुकयोः' (पा० ७।४।२५) इति दीर्घोऽपि न स्यात् ? ईमहे याचतिकर्मसु पठितः। 'ई गतौ' दिवादित्वादागतस्य श्यनश्छान्दसो लोपः। सुदानवः, 'दाभाभ्यां नुः' (उणा० ३।३२) प्राशूः आशुशब्दे दीर्घश्छान्दसः। मवा संहितायां 'द्व्यचोऽतस्तिङः' (पा० ६।३।१३५) इति दीर्घः। Mah.

RV.1.40 3=YV 33.89

अस्मदीयं यज्ञं प्रति आगच्छतु। बृहस्पतिः। प्रैतु च देवी वाक्। शोभना सत्यवती त्रयीलक्षणा। कं प्रत्यागच्छतु ? इत्यत आह। अभि पुत्रं महावीरं वा। नृभ्यो हितमनुग्राहकम्। ब्रह्मपङ्क्तिसाधकम्। पङ्क्तिपा-वनमित्यर्थः। किञ्च देवा यज्ञं नयन्तु अस्माकम्। U

कण्वदृष्टा वैश्वदेवी। ब्रह्मणो वेदस्य पतिः हिरण्यगर्भः अस्माक यज्ञमच्छ यज्ञाभिमुखं प्रकर्षेणागच्छतु। ब्रह्मणस्पतिः 'ब्रह्मणः पाता पाल-यिता वा' (निरु० १०।१२) इति यास्कः। तथा देवी देवतात्मा प्रिय-सत्यस्वरूपा तस्यैव वाक् त्रयीरूपा यज्ञं प्रैतु। किञ्च देवा यष्टव्या अस्मान् यज्ञं नयन्तु प्रापयन्तु। यज्ञं कारयन्त्वित्यर्थः। कीदृशं यज्ञम् ? विशेषेणेरयति वीरस्तं शत्रूणां विशेषोन्मूलयितारम्। 'वीरो वीरयत्यमित्रान्' (निरु० १।७) इति यास्कः। नर्यं नृभ्यो मनुष्येभ्यो हितम् 'उगवादिभ्यः' (पा० ५।१।२) इति यत्। इन्द्रस्य पुरोडाशः, हर्योर्धानाः, पूष्णः करम्भः, सरस्वत्यै दधि मित्रावरुणयोः पयस्या एषा हविःपङ्क्तिः। द्विनाराशंसं प्रातःसवनम् द्विना-राशंसं माध्यन्दिनं सवनं सकृन्नाराशंसं तृतीयं सवनम्, एषा नाराशंसपङ्क्तिः। त्रीणि सवनानि पशुरुपवसथ्यः पशुरनुबन्ध्यः एषा सवनपङ्क्तिः। एताभिः पङ्क्तिभी राधः समृद्धिर्यस्य पङ्क्तयो राध्यन्ते साध्यन्ते यत्रेति वा पङ्क्तिराधाः तम्। ब्रह्मणस्पत्यादयः ईदृशं यज्ञमस्माभिः कारयन्त्विति सर्वार्थः। Mah.

RV.1.40.5=YV.34.57.

नूनमिति पादपूरणः। प्रोच्चारयति। ब्रह्मणस्पतिर्मन्त्रमुकथ्यम्। उकथ्यमिति शस्त्रमुच्यते तत्र सभमन् मन्त्र उकथ्यः। कथम्भूतोऽसौ मन्त्रः ?

यस्मिन् मन्त्रे इन्द्रश्च वरुणश्च अर्यमा च अन्ये देवाश्च ओकांसि । ओक इति निवासनाम । निवासानि[1] चक्रिरे कृतवन्तः । U.

ब्रह्मणस्पतिः नूनं निश्चितमुक्थ्यं शस्त्रयोग्यं मन्त्रं प्रकर्षेणोच्चारयति । यस्मिन् मन्त्रे इन्द्रः, वरुणः, मित्रः, अर्यमा अन्ये च देवाः निवासान् कृतवन्तः । सर्वदेवाधारभूतं शस्त्रं पठनीयं मन्त्रवदित्यर्थः । Mah.

RV 1.44.13 = YV.33.15.

हे अग्ने ! श्रुधि शृणु । 'श्रुशृणु' इत्यादिना धिभावः । सत्वरं यज्ञमाग्नेयम् । हे श्रुत्कर्ण ! शृणुतः कर्णावर्थिनां वचांसि यस्य स तथोक्त ! त्वयि श्रुतवति वोढृभिर्देवैः । सयावभिः । 'या प्रापणे' वनिप् । समानमाप्तिभिः सहिताः । आसीदन्तु बर्हिषि । मित्रः अर्यमा च अन्ये च । प्रातर्यावाणः प्रातरेव हविः प्राप्तिर्येषां ते तथोक्ताः । U

शृणुतः इति श्रुतौ अर्थिवचः श्रोतारौ कर्णौ यस्य स श्रुत्कर्णः । हे श्रुत्कर्ण ! देवैः सह त्वं यज्ञं शृणु । कीदृशैर्देवैः ? हवींषि वहन्ति ते वह्नयस्तैः । सह यान्ति ते सयावानः तैः । किञ्च मित्रः अर्यमा प्रातर्यावाणश्च देवाः बर्हिषि आसीदन्तु उपविशन्तु । प्रातर्यान्ति हविः प्राप्नुवन्ति प्रातःसवने येषां हविःप्राप्तिस्ते । Mah

RV.1.45.6 = YV 15.31.

हे अग्ने ! चित्रश्रवस्तम ! चित्रं नानारूपं श्रवो धनमतिशयेन यस्य स चित्रश्रवस्तमः तस्य सम्बोधनं हे चित्रश्रवस्तम ! त्वाम् आह्वयन्ति मनुष्येषु मध्ये व्यवस्थितम्, मनुष्याः । कथम्भूतम् ? शोचिष्केशम्-शोचन्ति दीप्यन्ते ज्वालाः केशस्थानीयाः अस्येति शोचिष्केशः । हे पुरुप्रिय ! बहवो यजमानाः प्रिया अस्य । बहूनां यजमानानां वा प्रियः । बहु वा हविः प्रियमस्येति समासविशेषाः । तस्य सम्बोधनं हे पुरुप्रिय ! किमर्थमाह्वयन्ति ? हव्याय वोढवे हवींषि वोढुं परियामः[2] U.

---

[1] **निवास** is in the masculine gender and the reading should therefore be **निवासान्**

[2] **परियामः** does not give any sense. The reading in the original is **हव्याय वोढवे**. The commentator means to say that the accusative should have been used: **हवींषि वोढुम्** so I suggest **विभक्तिविपरिणामः** for **परियामः**।

चित्रं नानाविधं श्रवो धनं कीर्तिर्वा यस्य स चित्रश्रवाः, अतिशयेन चित्रश्रवाश्चित्रश्रवस्तमस्तत्सम्बुद्धिः। पुरुप्रिय! पुरूणां बहूनां यजमानानां प्रियः। यद्वा पुरवः प्रिया यस्य, पुरु बहु हविः प्रियं यस्येति वा हे पुरुप्रिय! हे अग्ने! प्रजासु ऋत्विग्यजमानाः त्वाम् आह्वयन्ति। 'ह्वेञ् आह्वाने' 'ह्वः सम्प्रसारणम्' (पा० ६।१।३२) इति शपि सम्प्रसारणं गुणश्च। किं कर्तुम्? हव्यं वोढुं प्राप्तुम्। विभक्तिव्यत्ययः। 'तुमर्थे सेसेन्' (पा० ३।४।९) इति तुमर्थे तवेप्रत्ययः। Mah.

RV.1.46 15 YV.34.28.

आश्विनी गायत्री। उभौ सोमं पिबतं हे अश्विनौ! पीत्वा च सोममुभावपि अस्मभ्यं शरणं दत्तम्। किञ्च अविद्रियाभिः 'इ विदारणे' अविदीर्णाभिः अनवखण्डिताभिरूतिभिरवनैः रक्षतमिति शेषः। U.

आश्विनी गायत्री। हे अश्विनौ! उभौ द्वावपि युवां पिबतम्। सोममिति शेषः। द्वौ युवाम् अस्मभ्यं शरणं सुखं वा यच्छतम्। काभिः सह? अविदीर्णाभिः अखण्डिताभिरूतिभिः, अवनैः पालनैः सह। सुखं दत्तं पालयतं चेत्यर्थः। उभा अश्विना विभक्तेराकारः। विदीर्यन्ती?(न्त इ)ति विद्रियाः 'इ विदारणे' औणादिक इयक् प्रत्ययः। Mah

[1]RV.1.50 1 YV 7.41; 8 41; 33 31.

दाक्षिणानि जुहोति। सौरी गायत्री। उदित्ययमुपसर्गो वहन्तीत्यनेन सम्बध्यते। उद्वहन्ति। कम्? तं सूर्यम्। जातप्रज्ञानम्। दातारं द्युस्थानं वा। रश्मयः। किमर्थमुद्वहन्ति? दर्शनाय। विश्वाय षष्ठ्यर्थे चतुर्थी। विश्वस्य जगतः। U.

'शालाद्वार्ये दाक्षिणहोमो वासः प्रबद्धꣳ हिरण्यꣳ हवन्यामवधाय चतुर्गृहीतमुदुत्यमिति' (का० १०।२।४।५) वस्त्रबद्धं स्वर्णं जुह्वां निधाय शालाद्वार्येऽग्नौ चतुर्गृहीताज्येन दाक्षिणसंज्ञो होमः कार्यः। सौरी गायत्री प्रस्कण्वदृष्टा। तृतीयः पादः सप्तार्णः। उनिपातः पादपूरणः। त्यमिति

---

[1] In 7.41 and 33.31 YV. adds the word स्वाहा to the stanza of the RV. In 8.41 YV. adds उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय at the end, to the stanza of the RV.

त्यच्छब्दश्छान्दसः तच्छब्दार्थे । रश्मयः तं प्रसिद्धं सूर्यं देवमुद्वहन्ति । 'देवो दानाद् द्योतनाद्वा' (निरु० ७।२०) इति यास्कः । किम्भूतं सूर्यम् ? जातवेदसं जातं वेदो ज्ञानं धनं वा यस्मात्तम् । किमर्थमुद्वहन्ति ? विश्वाय दृशे । षष्ठ्यर्थे चतुर्थी । विश्वस्य दर्शनाय जगद् द्रष्टुम् इत्यर्थः । 'दृशे विख्ये च' (पा० ३।४।११) इति तुमर्थे निपातः तस्मै स्वाहा सुहुतमस्तु । Mah.

YV.8.41

विषुवति ग्रहं गृह्णाति । उदुत्यं जातवेदसम् । व्याख्यातम् । देवार्षं तु । U.

'उदुत्यमिति ग्रहग्रहणमिति' (का० १३।२।११) गवामयनाख्यस्य संवत्सरसत्रस्य विषुवन्नामके मध्यमेऽहनि सौर्यपशूपालम्भादूर्ध्वमतिग्राह्यग्रहणं कार्यम् । सौरी गायत्री । देवदृष्टा पुनर्व्याख्यायते (अ ७। क० ४१) तं प्रसिद्धं जातानां प्रजानां ज्ञातारं जातप्रज्ञं वा देवनशीलं सूर्यं केतवः प्रज्ञाहेतवः किरणा उ आशु उदयाचलादुद्गमयन्ति । किमर्थम् ? विश्वाय । षष्ठ्यर्थे चतुर्थी । विश्वस्य दर्शनाय सर्वं जगद्द्रष्टुमित्यर्थः । Mah

[1] RV 1 50 3 - YV.8.40

'दृशिर् प्रेक्षणे' अस्य कर्मणि प्रथमपुरुषबहुवचनस्थाने छान्दसं रूपमदृश्रमिति । दृश्यन्ते अस्य सूर्यस्य प्रज्ञानकृतत्वात् केतवो रश्मयः । केतुरिति प्रज्ञानामसु पठितम् । वि इत्यनर्थको निपातः । अथवा व्यदृश्रमिति सम्बन्धः जनान् अनु अनुगताः । भ्राजन्तो देदीप्यमानाः । कथम्भूता दृश्यन्ते ? अग्नय इव । U.

अतिग्राह्यमन्त्रः । सूर्यदेवत्या गायत्री प्रस्कण्वदृष्टा यजुरन्ता । दृशेर्लुङि 'इरितो वा' (पा० ३।१।५७) इति च्लेरङादेशे 'ऋदृशोऽङि गुणः' (पा० २।४।१६) इति उत्तमैकवचने अदर्शमिति प्राप्ते 'शीङो रुट्, वेत्तेर्विभाषा', 'बहुलं छन्दसि, (पा० ७।१।६-७-८), इति दृशेरुत्तरस्य मिबादेश-

---

[1] YV. adds उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय । सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् at the end, to the stanza of the RV.

स्यामो रुडागमो धातोर्गुणाभावश्छान्दसः । अदृश्रमिति रूपम् । कर्मणि लुङि प्रथमपुरुषबहुवचनस्थाने द्रष्टव्यमदृश्यन्तेत्यर्थे । वीत्युपसर्गोऽदृश्रमित्यनेन सम्बध्यते । केतुरिति प्रज्ञानामसु पठितम् । अस्य सूर्यस्य केतवः प्रज्ञाहेतवः सर्वपदार्थज्ञानकृतो रश्मयः किरणाः । जनाननु सर्वप्राणिनोऽनुगताः । वि अदृश्रम् विशेषेणादृश्यन्त । सूर्यकराः सर्वजनानुगता व्यापका दृश्यन्त इत्यर्थः । तत्र दृष्टान्तः, भ्राजन्तो ज्वलन्तोऽग्नयो वह्नयो यथा जनानुगता दृश्यन्ते तद्वत् । Mah

RV 1 50 4 -YV.33 36.

यस्त्वं तरणिरसि । तूर्णं वर्तसे । सर्वदर्शनीयश्चासि । ज्योतिषश्च कर्तासि । हे सूर्य ! तं त्वां प्रति तथा ब्रूमः त्वमेव विश्वं सर्वम् आभासि दीपयसि । रोचनं दीप्तम् अग्निविद्युद्ग्रहतारकारूपं त्वदीयमेवैकं ज्योतिः सर्वत्राभातीत्यर्थः । U

प्रस्कण्वदृष्टा गायत्री वैश्वदेवपुरोरुक् । हे सूर्य ! त्वं तेजसः कर्तासि । विश्वं प्रकाशयसि च । अग्निविद्युन्नक्षत्रचन्द्रग्रहतारकादिषु त्वदीयं तेज इत्यर्थः । कीदृशं विश्वम् ? दीप्यमानं त्वत्प्रकाशेनेति भावः । कीदृशस्त्वम् ? तरणिः तरत्यतिक्रामति नभोवर्त्मेति तरणिः । 'अश्यवितृभ्योऽनिः (उणा० २।६८) इति तरतेरनिप्रत्ययः । विश्वदर्शतः विश्वस्य दर्शनीयः । दृशेरतच् । Mah.

RV 1.50 6--YV.33.32.

गायत्री । सर्वमेधाग्निश्चीयते । तेन रूपेण आत्मानं सम्पाद्य क्षिप्रं यजमानो मोक्षं प्राप्नोति तदिह प्रार्थ्यते । येन हे पावक ! पावयितः ! येन दर्शनेन । भुरण्यन्तं जनान् अनु । शकुनिः क्षिप्रपाती भुरण्युरित्यभिधीयते । सर्वमेधायाजिनो जनान् अनुभुरण्यन्तं पक्षिरूपेणात्मानं सम्पाद्य क्षिप्रं गच्छन्तमित्यर्थः । त्वं हे वरुण ! सूर्य ! पश्यसि । तदोऽध्याहारेण वाक्यपरिपूर्तिः । येन जनान् अनुभुरण्यतः पश्येति । U

प्रस्कण्वदृष्टा गायत्री मैत्रावरुणपुरोरुक् । सर्वमेधे पक्ष्याकारेणाग्निश्चीयते । तद्रूपमात्मानं सम्पाद्य मुक्तिमाप्नोति तदत्र प्रार्थ्यते । हे पावक ! शोधक ! येन दर्शनेन त्वं भुरण्यन्तमनुपश्यसि । क्षिप्रपाती पक्षी भुरण्युः । भुरण्युमात्मानं करोति भुरण्यति, भुरण्यतीति भुरण्यन् तम् । क्विबन्तात् शतृप्रत्ययः । सर्वमेधयाजिनं भुरण्युपक्षिरूपमात्मानं कृत्वा स्वर्गच्छन्तं येन

चक्षसानुपश्यसीत्यर्थः । तेन चक्षसा जनानस्मानपि शुरण्यतः हे वरुण पश्य । वरुणः सूर्यः । Mah.

RV.1.50.10 YV.20.21; 27.10; 35.14; 38.24.

उत्तरति । उद्वयमनुष्टुप् सौरी । उदः अगन्मेत्याख्यातेन सम्ब उद्गताः स्म वयं तमसोऽधि तमोबहुलादस्माल्लोकात् । स्वर्गं लोकं पश्य उद्गततरमस्माल्लोकात् । ततोऽपि देवं सूर्यम् । देवेषु । उदगन्म । ज उत्तमं सर्वेभ्यो ज्योतिर्भ्यः । U

'सोमवदुत्क्रमणमागमनं च' (का० १६।५।१७) सोमवदिति यमिति मन्त्रेण जलान्निष्क्रमणम् । 'अपाम सोममृता अभूम' इति सर्वेषां त्रिपशुदेशमागमनमिति सूत्रार्थः । सूर्यदेवत्यानुष्टुप् प्रस्कण्व वयं तमसः सकाशात्तमोबहुलादस्माल्लोकाद् उद्गताः निर्गताः । गर्ग शपि लुप्ते मस्य नः । कीदृशा वयम् ? उत्कृष्टतरं स्वर्गम् ईक्षमाणाः । । देवलोके सूर्यं देवं पश्यन्तः सन्त उत्तमं ज्योतिर्ब्रह्मरूपं प्राप्ताः । Mah

RV.1 62.1 YV 34.16.

ऐन्द्री त्रिष्टुप् । प्रजानीमः । बलमाविष्कुर्वते । बलम् । आधोपं स्तो देवाय । कथमिव ? अङ्गिरसा तुल्यप्रज्ञानाय च । सुवृक्ताभिः शोभ स्तुतिभिः । स्तुवते स्तुवन्तीति विभक्तिव्यत्ययः सामर्थ्यात् । ऋङ् स्तुतिमयाय, अर्चनीयाय च । वयमुच्चारयामः । मन्त्रम् । नृरूपाय । बलदानादिलब्धख्यातये । U

ऐन्द्री त्रिष्टुप् । वयम् इन्द्राय इन्द्रार्थं स्तोमं त्रिवृदादिकं जान किम्भूतं स्तोमम् ? बलहेतुम् । मन्त्रञ्च । उच्चारयाम । धातूनामनेका दर्चतिरुच्चारणार्थः । अङ्गिरस इव । तैर्यथा स्तोमो ज्ञातो मन्त्रश्च स्तस्मै तद्वत् । किम्भूतायेन्द्राय ? शवसानाय शवो बलमात्मन इच्छति स्यति शवस्यतीति शवसानः तस्मै । बलमभिलषमाणाय । 'सुप आ क्यच्' (पा० ३।१।८) इति क्यच् तदन्ताच्छानच् शप् 'बहुलं छ (पा० २।४।२७) इति तस्य लुक् 'छन्दस्युभयथा' (पा० ३।४।१ इति तस्य शानचोऽप्यार्धधातुकत्वात् 'क्यस्य विभाषा' (पा० ६।४।५० क्यचो लोपः शवसान इति सिध्यति । पुनः कीदृशाय ? गिर्वणसे स्तुत्या वनयति सम्भाजयति आत्मानमभिलषितदानात्स्तोतृभ्य

गिर्वणाः । गीःशब्दोपपदाद् वनोतेरर्यन्तादसुनि वनेर्घटादित्वेन मित्संज्ञत्वात् ह्रस्वत्वं णिचो लोपः । गीर्वणा इति प्राप्ते दीर्घाभावश्छान्दसः । यद्वा स्वार्थे णिच् । गीर्भिरेनं देवा भजन्तीति गिर्वणाः तस्मै । गीर्वाणशब्देन समानार्थो गिर्वणःशब्दः । पुनः किम्भूताय ? शोभनाभिः स्तुतिभिः । स्तुवते स्तौतीति स्तुवन् तस्मै । यजमानानिति शेषः । तदुक्तं 'त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम्' (YV. ६।३७) इति । पुनः कीदृशाय ? ऋङ्मयाय वेदमयाय । मयडर्थे छान्दसो मियट् । यद्वा 'ऋच् स्तुतौ' इत्यस्मादृभावे औणादिको मक् कुत्वं जश्त्वम् । ऋङ्मः स्तुतिः । तमर्हति ऋङ्मियः अर्हार्थे घच् । स्तुतियोग्याय । पुनः कीदृशाय ? नरे नररूपाय । नृशब्दस्य ङे परे छान्दसो गुणः । पुनः कीदृशाय ? शौर्यदानबलादिभिर्लब्धख्यातये । Mah

RV 1 62 2 YV 34 17

ऐन्द्री त्रिष्टुप् । सामर्थ्याद् द्वितीयोऽर्धर्चः प्रथमं व्याख्यायते । येन साम्ना । अस्माकम् । पूर्वे । पितरः । आत्मसत्तत्त्ववेदिनः । स्तुवन्तः । अङ्गिरसः ऋषयः । आदित्यरश्मीन् । लब्धवन्तः । स हि साम्नां लोकः । तत्साम । प्रभरध्वमाहरध्वम् । वः यूयम्, प्रथमाबहुवचनस्य स्थाने व आदेशः । हे पुत्रपौत्रप्रपौत्राः ! महते इन्द्राय । महत्त्वम् । अन्नम् । आङ्गूष्यं स्तोमस्य च हितं साम । प्रभरध्वम् । बलमभिलषमाणाय । L

महते । बलमभिलषमाणाय । इन्द्राय । महत् । अन्नम् । यूयम् । प्रहरत समर्पयत । यूयमित्यर्थे व इत्यव्ययम् । मुनीनां पुत्रादीन् प्रति वचः । अङ्गपाय हितं साम । उच्चारयत । अस्माकम् । पूर्वे । पितरः अङ्गिरसः । येनान्नेन । साम्ना च । स्तुवन्तः सन्तः । सूर्यकिरणान् । लेभिरे । स हि साम्नां लोकः । तत्साम प्रभरध्वम् । कीदृशा अङ्गिरसः ? पदमात्मस्वरूपं जानन्तीति पदज्ञाः । Mah.

RV.1 71 8 -YV.33 11

मरुत्वतीया त्रिष्टुप् । व्यवहितपदप्रायः । आहुतिपरिणामवादिनी । आ उपसर्गः आनट् इत्यनेनाख्यातेन सम्बध्यते । यदा । अन्नाय । नितरां सिक्तं देवतोद्देशेन क्षिप्तम् । मन्त्रैः संस्कृतम् । जगदुत्पत्तिबीजम् । अग्निम् । आनट् अश्नोतेरिदं रूपम्, व्याप्नोति । ततोऽपि रेतो मध्य-

स्थानं व्याप्नोति विद्युल्लक्षणं तेजः। द्यौरपि-तस्याहुतिपरिणाममूतस्य रसस्य-निकट एव। वर्तते। तत्। अग्निः। बलं तस्य हेतुभूतम्। प्रशस्यम्। परिपक्वं रसम्। सुष्ठु ध्यानीयम्। सर्वोऽपि वृष्टिमभिलषति। जनयति अष्टभिर्मासैः। सूदयच्च। 'षूद क्षरणे' निष्पन्नमुदकं चतुर्भिर्मासैः क्षरति च वृष्टिद्वारेण। U.

त्रिष्टुप् पराशरदृष्टा मरुत्वतीयग्रहपुरोरुक् इन्द्र मरुत्व इत्यस्याः (YV. ७।३५) स्थाने। आ उपसर्गः आनडित्यनेन सम्बध्यते। यदा। तेजसो हेतुभूतं हविः। नृपतिं नुर्यजमानस्य पालकमग्निम्। अश्नुते, व्याप्नोति। यदाग्नौ हविर्हूयत इत्यर्थः। तदाऽग्निः। जगद्बीजभूतं जलम्। द्यौरभीके। प्रथमा षष्ठ्यर्थे। दिवः समीपे। अन्तरिक्षे। जनयति। मेघरूपेण च पुरः सूदयति क्षरति वृष्टिद्वारेण। 'षूद क्षरणे'। कीदृशं तेजः? वृष्टयै। देवतोद्देशेनाग्नौ सिक्तं हुतम्। मन्त्रसंस्कृतम्। कीदृशं रेतः? बलहेतुभूतम्। निर्दोषम्। 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' (पा० ३।१।१०१) इति गर्ह्यार्थेऽवद्यमिति निपातः। न अवद्यमनवद्यमगर्ह्यं प्रशस्यम्। युवतुल्यं परिपक्वरसम् दृढमित्यर्थः। सुष्ठु आ समन्ताद् ध्यायते चिन्त्यत इति स्वाध्यं चिन्तनीयम्। सर्वो वृष्टिमिच्छति। हविषा तर्पितोऽग्निरष्टमासैर्जलं निष्पाद्य वर्षाम् वर्षतीत्यर्थः। व्यवहितपदो मन्त्रः। Mah.

RV.1 74 1 YV 3 11.

अथ यजमानाग्न्युपस्थानम्। उपप्रयन्तो अध्वरं सुपोपः पोपैरित्यन्तं देवानामार्षम्। आग्नेयी गायत्री। उपगच्छन्तः। यज्ञम्। आर्षम्। ब्रूयाम। अग्नये। दूरेऽपि स्थिताय। अस्माकञ्च मन्त्रम्। शृण्वते। अस्मन्मन्त्रश्रवणादभिमुखायेत्यर्थः। U

'सायमाहुत्याश्च हुतायां यजमानोऽग्नी उपतिष्ठते वात्सप्रेण न वा तिस्रस्त्रिरुपप्रयन्तो ११ अस्य प्रत्नां १६ परिते ३६ चित्रावसविति १८ चेति' (का० ४।१२।१-३) आहवनीयगार्ह्यपत्यावग्नी उपप्रयन्तो अध्वरमित्यारभ्य सुपोपः पोपैरित्यन्तं ३७ बृहदुपस्थानं देवदृष्टम्। आग्नेयी गायत्री गोतमेनापि दृष्टा। आहवनीयोपस्थानमन्त्रा आदौ। वयमनुष्ठातारोऽग्नेऽग्न्यर्थं मन्त्रं मननेन त्राणकरं शब्दसमूहमुच्याम। किम्भूता वयम्? यज्ञमुपगच्छन्तः। किम्भूतायाग्नये? दूरे। अस्माकम्। समीपे इति शेषः। दूरे समीपे

चास्मदीयं वाक्यं श्रोतुमुद्युक्ताय। वोचेमेति वक्तेराशीर्लिङि परस्मैपदोत्तमबहुवचने परे 'लिङ्याशिष्यङ्' (पा० ३।१।८६) इत्यङ्। यासुट् 'अतो येयः' (पा० ७।२।८०) 'वच उम्' (पा० ७।४।२०) 'छन्दस्युभयथा' (पा० ३।४।११७) इति सार्वधातुकत्वात् 'लिङः सलोपोऽनन्त्यस्य' (पा० ७।२।७९) इति सलोपः। यलोपः। वोचेम। अस्मे 'सुपां सुलुक्' (पा० ७।१।३९) इति शेआदेश आत्मः। Mah.

RV.1.75.5 =YV 33.3.

मैत्रावरुणी गायत्री। यज। अस्माकम्। मित्रावरुणौ। यज च। देवान्। यज च। यज्ञम्। महान्तम्। हे अग्ने! यज च। स्वकीयं, गृहम्। U.

गायत्री गोतमदृष्टा मैत्रावरुणस्य पुरोरुक्। अयं वामित्यस्याः (YV ७।९) स्थाने। हे अग्ने! अस्माकम्। मित्रावरुणौ। यज। यज देवान्। यज महद् यज्ञम्। स्वं गृहं यज। Mah

RV 1.79.4=YV 15.35.

उष्णिक्। हे अग्ने! यस्त्वम्। अन्नस्य। गोभिः संयुक्तस्य। ईश्वरः। ह बलस्य पुत्र! सह इति बलनाम। यहुरिति पुत्रस्य नाम। मथ्यमानो जायते तस्मादेवमाह सहसस्पुत्रमित्यादि। स त्वम्। अस्मभ्यम्। देहि। हे जातवेदः! महत्। अन्नलक्षणं धनं गोभिः संयुक्तम्। U

'अपरा गायत्रीभ्य उष्णिहोऽग्ने वाजस्येति' (का० १७।१२।१३) गायत्रीभ्योऽपरास्तिस्रः उष्णिक्संज्ञा इष्टका अग्न इति ऋक्त्रयेणोपदधातीति सूत्रार्थः। उष्णिहस्तिस्रः। हे अग्ने! बलस्य पुत्र! सह इति बलनाम, यहुरिति पुत्रनाम। मन्थनाज्जायमानत्वाद्बलस्य पुत्रत्वम्। सहसस्पुत्रमित्युक्तञ्च। हे उत्पन्नज्ञान! अस्मभ्यम्। महत्। धनम्। देहि। कीदृशस्त्वम्? धेनुयुक्तस्य, अन्नस्य, ईश्वरः। अत एव धनं गाश्च देहीत्यर्थः। Mah.

RV.1 79 5 =YV 15.36

स उक्तगुणः। दीप्यमानः। उपकारभूतः वासयिता वा। मेधावी। अग्निः। स्तुत्यः। वाचा त्रयीलक्षणया। तत्रार्थवादः प्रत्यक्षकृतः ततो भिन्नं वाक्यं नेयम्। धनवत्। अस्मदर्थम्। हे बहुमुख! अनीकं मुखम्। पुरु बहुनाम। 'यतो ह्येव कुतश्चाग्नावभ्यादधाति तत एव प्रदहति' इति श्रुतिः।

दीप्यस्व । एकं वाक्यं कृत्वा व्याख्यायते यत्तदोर्व्यत्ययेन । वसु धनं तापपाकप्रकाशैरुपकारकः । क्रान्तदर्शनः । अग्निः । स्तुत्यः ऋषिभिः । वाचा । तं त्वां ब्रवीमि । धनवत् । अस्मदर्थम् । पुर्वणीक ! दीप्यस्व । U.

हे पुर्वणीक ! पुरु बहु अनीकं मुखं यस्य तत्सम्बुद्धिः । सर्वदाहकत्वात् । 'यतो ह्येव कुतश्चाग्नावभ्यादधाति तत एव प्रदहति' इति श्रुतेः । हे बहुमुखाग्ने ! अस्मदर्थे रयिवद् धनवद् यथा तथा स त्वं दीप्यस्व । दिवेः शपः श्लुः द्वित्वम् 'तुजादीनां दीर्घोऽभ्यासस्य' (पा० ६।१।७) इत्यभ्यासदीर्घः । 'लोपो व्योर्वलि' (पा० ६।१।६६) इति वलोपः । रयिर्विद्यते यत्र कर्मणि रेवत् 'रयेर्मतौ' (पा० ६।१।३७) इति सम्प्रसारणम् । तथा त्वया हविर्ग्राह्यं यथास्माकं धनादिर्भवतीत्यर्थः । स पूर्वोक्तः । कीदृशस्त्वम् ? दीप्यमानः । निवासहेतुः । क्रान्तदर्शी । अग्निः अग्रे नयतीत्यग्रणीः । प्रथमं यज्ञप्रवर्तक इति भावः । त्रयीलक्षणया वाचा ईडितुं योग्यः स्तुत्यः । औणादिक एन्यः । Mah

RV 1 79 6--YV.15 37

यस्त्वं क्षपयिता । हे राजन् ! रक्षसाम् । अध्यात्मनैव स्वभावत एव । हे अग्ने ! वस्तोः सह सम्बन्धिनां रक्षसाम् । उत अपि । उषसः सम्बन्धिनां सः । हे वज्रदंष्ट्र ! तिग्ममिति वज्रनाम । जम्भेति दंष्ट्रानाम । रक्षसः । दह । प्रत्येकम् । U

हे दीप्यमान ! हे तिग्मजम्भ ! तिग्मा तीक्ष्णा जम्भा दंष्ट्रा यस्य । यद्वा तिग्ममिति वज्रनाम । हे वज्रदंष्ट्र ! अग्ने ! वस्तोः अयःसम्बन्धिनः उतापि उषःकालसम्बन्धिनो राक्षसान् स त्वं प्रतिदह प्रत्येकं भस्मीकुरु । लिङ्गव्यत्ययेन रक्षःशब्दस्य पुंस्त्वम् । 'छन्दसि परेऽपि' (पा० १।४।८१) इति प्रत्युपसर्गस्य क्रियापदात्परत्वम् । कीदृशस्त्वम् ? आत्मनापि स्वभावतोऽपि । क्षपः क्षपयतीति क्षपः 'क्षप क्षेपे' चुरादिः पचाद्यच् । स्वभावतो रक्षसां क्षपयिता । 'मन्त्रेष्वाङ्यादेरात्मनः' (पा० ६।४।१४१) इत्यात्मन आकारलोपस्तृतीयैकवचने । Mah.

RV 1.82 2 -YV.3.51.

आहवनीयमुपतिष्ठते । ऐन्द्री पङ्क्तिः । पितृयज्ञे पितर उच्यन्ते । अत्तन् अदेर्लुङि घस्लादेशः । अदितवन्तः भुक्तवन्तः पितरः । कथं ज्ञायत

इति चेत् ? अमीमदन्त हि 'मद तृप्तौ' हिशब्दो यस्मादर्थे । यस्मात्तृप्तास्तस्माद् भुक्तवन्त इत्यनुमानम् । तृप्तिविशेषणान्युत्तराणि । अवाचीनमन्नवित्तिप्रियाः ? अन्नभक्तीरुपस्मृत्य अधूषत । 'धूञ् कम्पने' धुनन्ति गात्राणि । किञ्च अस्तोषत स्वभानवः । प्रियाः अन्नभक्तीरुपस्मृत्य दातॄन् स्तुवन्ति । अहो दत्तमहो दत्तं स्वाद्वन्नं बहु इति । स्वभानवः स्वयंदीप्तयः अन्नविस्मयात् । प्राप्तप्रज्ञाः मेधाविनः । नवतमया अपूर्वया मत्या स्तुवन्तीत्यनुवर्तते । एवं पितॄनुपलभ्याथेन्द्रमाह । योजयामि क्षिप्रम् । नु क्षिप्रनाम । हे इन्द्र ! तव हरितवर्णौ अश्वौ स्वभूतौ । तवापि गमनकालः प्राप्तः । U

ऐन्द्रीभ्यां पङ्क्तिभ्यां साकमेधगतपितृयज्ञाख्यकर्मणि आहवनीयोपस्थानम् । यस्या अष्टाक्षराः पञ्चपादाः सा पङ्क्तिः । 'यज्ञोपवीतिनः सर्वे निष्क्रम्योदश्वोऽन्नमीमदन्तेत्याहवनीयमुपतिष्ठन्ते द्वाभ्यामिति (का० ५।६।२१) पितृयज्ञाख्ये कर्मणि ये पितरः सन्ति तेऽस्माभिर्दत्तं हविःस्वरूपमन्नमत्तन् भक्षितवन्तः । कथमेतदवगम्यते ? हि यस्माद् हर्षं प्राप्ताः । अस्मदीयां भक्तिमवगम्य प्रीतियुक्ताः सन्तः स्वकीयं शिरः कम्पितवन्तः । यद्वा प्रियास्तनूरवाधूषत । किञ्च स्वयंदीप्तियुक्ताः मेधाविनः सन्तः नवतमया मत्या बुद्धया युक्ताः स्तुतिं कृतवन्तः । अहो स्वाद्वन्नं बहु दत्तमहो भक्तिरित्याद्यभिधानं स्तुतिः । अतो हे इन्द्र ! क्षिप्रं तव हरी एतन्नामकौ हरितवर्णावश्वौ गमनाय रथे योजय । तवाभीष्टायाः पितृतृप्तेः सम्पन्नत्वात्तैः पितृभिः सह त्वया गन्तव्यमित्यर्थः । अत्तन्-अदेर्लुङि 'लुङ्सनोर्घस्लृ' (पा० २।४।३७) इति घस्लादेशः । 'मन्त्रे घस—' (पा० २।४।८०) इत्यादिना च्लेर्लुक् । 'गमहन्—' (पा० ६।४।६८) इत्युपधालोपः । 'खरि च' (पा० ८।४।५५) इति चर्त्वम् । 'शासिवसि' (पा० ८।३।६०) इति षत्वम् । अडागमः । अमीमदन्त 'मद तृप्तियोगे' चुरादिरात्मनेपदी लुङि णिलोपादौ रूपम् । अधूषत 'धूञ् कम्पने' लुङि सिचि व्यत्ययेन गुणाभावः । मती 'सुपां सुलुक्-' (पा० ७।१।३९) इति तृतीयाया पूर्वसवर्णदीर्घः । योज 'युजिर् योगे' ण्यन्ताल्लोटि 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् 'णेरनिटि' (पा० ६।४।५१) इति णिलोपः । 'द्व्यचोतस्तिङः इति संहितायां दीर्घः । Mah.

RV.1.82.3;10.158.5=YV.3.52.

शोभनदर्शनम् । त्वाम् । वयम् । हे धनवन् ! वन्दिषीमहि 'वदि अभि-

वादनस्तुत्योः' अभिवादयामः। अभिवादनमाह। प्रयासि। निश्चयेन। पूर्णरथनीडः सन्। बन्धुरशब्दो रथनीडवचनः। स्तुतश्च स्तोतृभिः। वशान् 'वश कान्तौ' कामान्। अनुप्रयासि। यत एवमतो योजयामि क्षिप्रम्। इन्द्र! ते हरी। U.

हे मघवन्! वयम्। त्वाम्। स्तुतिकर्तारो भूयास्मेत्याशास्यते। किम्भूतं त्वाम्? सुष्ठु सम्यक् पश्यति सुसंदृक् तं शोभनदर्शनम्। अनुग्रहदृष्ट्या सर्वस्य द्रष्टारम्। इत्थमस्माभिः स्तुतः त्वम्। कामयमानान् यजमानान्। लक्षीकृत्य। अवश्यम्। गच्छसि। किम्भूतः? पूर्णबन्धुरः। बन्धुरशब्दो रथनीडवाची। स्तोतृभ्यो देयैर्धनैः सम्पूर्णरथनीडोपेतो भूत्वा गच्छसि। हे इन्द्र! स त्वं ते हरी योजेति पूर्ववत्। Mah

[1] RV i 84.2 VV 8 35.

तृतीयो मन्त्रविकल्पः। इच्छब्द एवार्थे। इन्द्रमेव। हरितवर्णावश्वौ। प्रापयतः। अत्र 'ऋक्सामे वै हरी' इति श्रुतेः द्विवचनान्तहरिशब्दस्य ऋक्सामवाचकत्वाद्धरितवर्णावश्वाविन्द्रमेनं वहतमिति व्याख्यानं न घटते। हरितवर्णयोर्ह्यश्वयोः सर्वत्र सुलभत्वात्। इन्द्राश्वयोर्हरितवर्णत्वमप्रसिद्धम् 'मयूररोमभिः पृषती अभूताम्' इत्यादिश्रुतेर्दर्शनात्। 'पशवो वै देवानां छन्दाꣳसि' इत्यादिश्रुतिपर्यालोचनया नानावर्णच्छन्दोमये ऋक्सामे एवेन्द्रं वहत इति युक्तं नतु हरितवर्णावश्वौ। कथम्भूतमिन्द्रम्? अप्रतिधृष्टशवसम्, न प्रतिधर्षयितुं शक्यते शवो बलं यस्य स अप्रतिधृष्टशवाः तमप्रतिधृष्टशवसम्! क्व वहत? इत्याह। ऋषीणाञ्च वसिष्ठप्रभृतीनां च स्तुतीः उप समीपे। यज्ञं च मनुष्याणां यजमानानां समीपे वहत इति वर्तते। U

षोडशिग्रहे तृतीयो मन्त्रविकल्पः। 'आग्रयणाद्वेन्द्रमिद्धरी इति गृह्णीत्वेति' कठसूत्रोक्तेः। इन्द्रदेवत्यानुष्टुप् गोतमदृष्टा। इत् एवार्थे। हरितवर्णावश्वौ वसिष्ठादीनां मुनीनां स्तुतिसमीपे इन्द्रमेव प्रापयतः। पुनः मानुषाणां यजमानानां यज्ञसमीपे च हरी इन्द्रं वहतः। किम्भूतमिन्द्रम्? अप्रतिधृष्टशवसम्—प्रतिधर्षयितुं पराभवितुं शक्यं प्रतिधृष्टं न प्रतिधृष्टमप्रतिधृष्टं शवो बलं यस्य सोऽप्रतिधृष्टशवास्तम्। Mah.

---

[1] YV. adds उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने at the end, to the stanza of the RV.

[1] RV.1.84.3=YV.8.33.

अथ षोडशी अग्ने पवस्वेत्येतस्मात् प्राक् । ऐन्द्री अनुष्टुप् । अधितिष्ठ आरोह । हे वृत्रस्य हन्तः ! रथम् । युक्तौ । तव । ब्रह्मणा त्रयीलक्षणेन । इन्द्रागच्छेत्यादिना । हरितवर्णावश्वौ । तौ हि आह्वानानीन्द्रस्योपश्रुत्य, प्राप्त आवयोर्नियोजनकाल इति मन्यमानौ स्वयमेवात्मानं रथे युञ्जाते । अत एवमाह युक्ता ते ब्रह्मणा हरी इति । अथेदानीं रथारूढस्य । अस्मदभिमुखम् । साधु । तव । मनः । हे इन्द्र ! ग्रावा सोमाभिषवकारी करोतु वग्नुना वग्नुरिति (निघ० १।११) वाङ्नामसु पठितम् । सोमाभिषवध्वनिना । U.

अथ षोडशी 'अग्ने पवस्व' (क० ३७) इत्यस्मात्प्राक् 'प्रातःसवने ऽतिग्राह्यान् गृहीत्वा षोडशिनं खादिरेण चतुःस्रक्तिनातिष्ठ युक्ष्वा हीति वेति' (का० १२।५।२) प्रातःसवने आग्रयणग्रहणानन्तरमाग्नेयमतिग्राह्यमादाय चतुःकोणेन खादिरोलूखलेनातिष्ठ युक्ष्वा हीति मन्त्रयोरन्यतरेण सोपयामेन षोडशिग्रहं गृह्णीयात् । इन्द्रदेवत्यानुष्टुप् गोतमदृष्टा । हे वृत्रहन्निन्द्र ! तव । हरितवर्णावश्वौ ब्रह्मणा त्रयीलक्षणेन इन्द्रागच्छेत्यादिमन्त्रेण । युक्ता रथे संयुक्तौ । अतस्त्वं रथमारोह । इन्द्राह्वानं श्रुत्वास्मन्नियोजनकालः प्राप्त इति मत्वाश्वौ स्वयमेव रथे युञ्जाते इति युक्ता इत्युक्तम् । किञ्च सोमाभिषवपाषाणः । तव रथारूढस्य । मनः । अस्मद्यज्ञाभिमुखं सुतरां करोतु । केन ? वग्नुना । वग्नुरिति (निघ० १।११) वाङ्नामसु पठितम् । वाचा श्रवणीयेन सोमाभिषवशब्देन । Mah.

RV.1 84.19 YV.6.37.

हे इन्द्र ! यतः । त्वम् । अङ्गेति क्षिप्रनाम क्षिप्रम् । प्रशंससि । देवः सन् । हे बलिष्ठ ! मनुष्यं यजमानम् । अतः कारणात् । न । त्वत्तः । अन्यः । हे धनवन् ! विद्यते । मर्डिता 'मृड सुखने' सुखयिता यजमानानाम् । इन्द्र ! ब्रवीमि । अत्यद्भुतम् । तव सम्बन्धि । वचनमार्षम् । U.

इन्द्रदेवत्या पथ्या बृहती गोतमदृष्टा । अङ्गेति क्षिप्रनाम । हे अतिशयेन बलवन् ! इन्द्र ! दीप्यमानस्त्वं मनुष्यं यजमानं प्रशंससि स्तौषि । समीचीनोऽयं

---

[1] YV. adds उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने at the end, to the stanza of the RV.

यजमानो होता श्रद्धावानित्यादिस्तुतिं करोपीत्यर्थः। 'शंसु हिंसास्तुत्योः' लडर्थे लेट्, मध्यमैकवचने सिबादेशः 'सिब्बहुलं लेटि' (का० ३।१।३४) सिप्प्रत्ययः। तस्य 'आर्धधातुकस्येड्वलादेः' (पा० ७।२।३५) इति इडागमः। 'लेटोऽडाटौ' (पा० ३।४।९४) इति सिपोऽडागमः। 'इतश्च लोपः परस्मैपदेषु' (पा० ३।४।९७) इति सिप इकारलोपः। तस्य रुत्वविसर्गौ षत्वम्। प्रशंसिष इति रूपम्। 'तिङ्ङतिङः' (पा० ८।१।२८) इति सर्वानुदात्तत्वम्। किञ्च हे मघवन्! धनवन्! इन्द्र! मर्डिता 'मृड सुखने' मृडतीति मर्डिता यजमानस्य सुखयिता त्वदन्यो नास्ति न विद्यते। अतो हे इन्द्र! तव वचः त्वमेव सुखयितेत्येवंरूपं त्वदीयं वचनमहं वदामि। Mah.

RV.1.86 1 = YV.8.31.

जुहोति। मारुती गायत्री। मरुतः। यस्य। निवासगृहे। 'क्षयो निवास' इत्याद्युदात्तः। पाथ 'पा पाने' शपो लुप्?(क्)। पिबथ पानादीन् कुरुथ। हे दिवोविमहसः! द्युलोकस्य महयितारः! पूजयितारः! स सुगुप्ततमो यजमानजनः। युष्मद्गुप्तानां न भयमस्तीत्यभिप्रायः। U

'शमिष्टयजुरन्ते शामित्र एव जुहुयात्तिष्ठन्मरुत इत्यस्वाहाकृत्येति (का० २५।१०।१८) शमिष्टयजुर्होमान्ते शामित्राग्नावेव स्वाहान्तेन मन्त्रेणोष्णीषवेष्टितं गर्भं जुहोति मन्त्रान्ते स्वाहाकारमनुच्चार्य जुहुयादित्यर्थः। मरुद्देवत्या गायत्री गोतमदृष्टा। हे दिवोविमहसः! विशिष्टं महो येषां ते द्युलोकसम्बन्धिना विशिष्टेन महसा तेजसा युक्ताः। यद्वा विशिष्टं महन्ति पूजयन्ति ते विमहसः द्युलोकस्य पूजयितारो हे मरुतः! यस्य यजमानस्य यज्ञगृहे यूयं सोमपानं कुरुथ। 'पा पाने' शपो लुक् पिबादेशाभावश्च छान्दसः। संहितायां दीर्घः 'द्व्यचोऽतस्तिङः' (पा० ६।३।१३५) इति सूत्रेण। हि निश्चितं स जनः यजमानाख्यः; सुगोपातमः, गोपायतीति गोपाः रक्षकः अत्यन्तं शोभनो गोपा यस्य स सुगोपातमः। युष्मद्गुप्तानां भयं नास्तीत्यर्थः। Mah.

RV.1.89.1 = YV.25.14.

वैश्वदेवानां पशूनां याज्यानुवाक्या दश। पञ्चाद्याः सप्तमी च जगत्यः त्रिष्टुभोऽन्याः। आगच्छन्तु। अस्माकम्। मन्दनीयाः स्तुत्याः।

यज्ञाः सङ्कल्पा वा । सर्वतः । अनुपहिंसिताः अपरिज्ञाताः केनचित् । उद्धेत्तारोऽन्येषां यज्ञक्रतूनां कल्पानां वा । किञ्च । देवाः । अस्माकम् । सदा । इच्छब्द एवार्थे । सदाकाल एव । वर्धनाय । स्युः भूयासुः । कथम्भूताः ? अप्रमाद्यन्तः रक्षितारश्च । अहन्यहनि । तथा भूयादिति वाक्यशेषः । U.

वैश्वदेवपशुवपापुरोडाशपशूनां याज्यानुवाक्या दश ऋचो विश्वदेवदेवत्या गोतमदृष्टाः । तत्रादौ पञ्च जगत्यः । यज्ञाः सङ्कल्पा वा । अस्मान् प्रति आगच्छन्तु । यज्ञकर्तारो वयं भवेमेत्यर्थः । कीदृशाः क्रतवः ? भन्दनीयाः 'भदि कल्याणे' कल्याणकारिणः । तथा सर्वतोऽनुपहिंसिताः । निर्विघ्ना इत्यर्थः । न परीता अपरीताः अपरिगता अज्ञाताः केनचित् । फलानुमेया इत्यर्थः । उद्भिदः उद्भिन्दन्ति प्रकटयन्ति उद्भिदः उद्धेत्तारः । यज्ञान्तराणां प्रकटीकर्तार इत्यर्थः । किञ्च । येन प्रकारेण । देवाः । अस्माकम् । सदैव । वृद्धयै । भवन्ति । तथा क्रतव आयान्त्वित्यर्थः । सदमिदित्यव्ययं सदार्थे । कीदृशा देवाः ? प्रकर्षेणायुवन्ति प्रमाद्यन्ति ते प्रायुवः । यौतेः क्विप् तुगभाव आर्षः । न प्रायुवः अप्रायुवः अनलसाः अस्माकं वृद्ध्यै भवन्त्वित्यर्थः । तथा अहन्यहनि प्रत्यहं पालकाः । Mah.

RV.1.89.2 - YV 25.15.

देवानाम् । भन्दनीया । कल्याणी मतिः । अभि नो निवर्ततामित्यनुषङ्गः । अस्मान् प्रत्यभिमुखीभवतु । कथम्भूतानां दवानाम् ? ऋजुगामिनाम् । यद्वा ऋजुकामिनाम् । ऋजुं प्रगुणं यजमानं कर्तुं कामयन्ते ते तथोक्ताः । किञ्च देवानाम् । दानम् । अस्मान् प्रति निवर्तताम् । ततो लब्धदानाः सन्तः । देवानाम् । सख्यिभावं यजमानाः सन्तः । प्राप्नुयाम । वयम् । ततो देवाः । अस्माकं भक्तानाम् । आयुः । प्रवर्धयन्तु । किमर्थम् ? चिरं जीवनाय । U.

कल्याणकारिणी । देवानाम् । शोभना बुद्धिः । अस्मदभिमुखीभवतु । कीदृशानां दवानाम् ? ऋजु अवक्रं यन्ति गच्छन्ति ऋजुयन्तस्तेषाम्-इणः शतृप्रत्ययः । अवक्रगामिनाम् । यद्वा ऋजुमवक्रं साधुं यजमानं कामयन्ते ते ऋजूयन्ति 'सुप आत्मनः क्यच्' ऋजूयन्ति ते ऋजूयन्तस्तेषाम् । क्यजन्ताच्छतृ । साधुं यजमानं कामयमानानामित्यर्थः । किञ्च देवानाम् ।

दानम् । अस्मानभिनिवर्तताम्, देवा अस्मभ्यं ददत्वित्यर्थः । देवेभ्यो लब्ध-दाना वयम् । देवानाम् । मैत्रीम् । प्रामुयाम । सदेर्लिटि उत्तमबहुत्वे रूपम् । संहितायां दीर्घः । देवाः । अस्माकं सखीनाम् । आयुः । जीवितुम् । प्रवर्धयन्तु । Mah.

RV.1.89.3=YV.25.16.

तान् देवान् । अकृत्रिमया स्वयम्भुवा । निविदा निविच्छब्दो वाग्वचनः । आह्वयामः । वयम् । तान् कान्? इत्यत आह-भगम्, मित्रम्, अदितिम्, दक्षम्, अस्रिधम्, अच्युतसद्भावम्, दक्षस्यैतद् विशेषणम्; अर्यमणम्, वरुणम्, सोमम्, अश्विनौ च । यैः सहिता । सरस्वती । सुभगा । अस्माकम् । सुखम् । करोत्विति । U

प्राचीनया अकृत्रिमया स्वयम्भुवा । वाचा वेदरूपया । वयम्, तान् प्रसिद्धान् देवान् । आह्वयामः । निविच्छब्दो वाग्वाचकः । तान् कान्? तत्राह भगम्, मित्रम्, देवमातरम्, प्रजापतिम्, अर्यमणम्, वरुणम्, सोमम्, अश्विनौ । अस्रधमिति भगादीनां विशेषणम् । न स्रेधते च्योतते सोऽस्रित् । तमच्युतसद्भावम् । किञ्च शोभनं भगं भाग्यं यस्याः सा सुभगा भजनीया सरस्वती भगादिसहिता । अस्माकम् । सुखम् । करोतु । Mah.

RV 1 89 4=YV 25 17

तद् । मेषजम् । सुखस्य भावयितृ । अस्माकम् । वातः । वातु अनुगृह्णातु । तच्च मेषजं माता पृथिवी अनुगृह्णातु । तच्च पिता द्यौः अनुगृह्णातु । तच्च ग्रावाणः । सोमसुतः सोमाभिषवकारिणः । सुखस्य भावयितारः । अनुगृह्णन्तु । तच्च हे अश्विनौ ! धारयितारौ । युवामपि । शृणुतम् । श्रुत्वा च अनुगृह्णीतम् । U.

पवनः । अस्माकम् । औषधम् । हितं यथा तथा वातु, 'वा गतिगन्धनयोः' लोट् प्रवातु । अनुगृह्णात्वित्यर्थः । ददात्विति यावत् । कीदृशं हितम्? मयः सुखं भवति यस्मात्तन्मयोभु सुखोत्पादकं हितं ददातु । जगन्निर्मात्री पृथिवी । तत् हितम् । वातु । पालकः स्वर्गः । तद् हितं वातु । सोमं सुन्वन्ति सोमसुतः सोमाभिषवकारिणः । दृषदः । तद् मेषजम् । वान्तु ददतु । कीदृशा ग्रावाणः? मयः सुखं भावयन्ति ते मयोभुवः

सुखस्य दातारः। हे अश्विनौ ! युवाम् । तद् वातादिभ्यो मेषजप्रार्थनं शृणुतम्। युवामपि हितं दत्तमित्यर्थः। कीदृशौ युवाम् ? धृष्ण्यौ गृहवद्धारयितारौ। Mah.

RV.1.89.5=YV.25.18.

तम् । रुद्रम् । कथम्भूतम् ? जङ्गमस्य । स्थावरस्य । पतिमिव पतिम् । धिया बुद्ध्या सङ्कल्पमात्रेण जिन्वति प्रीणातीति तं धियंजिन्वम् । यद्वा धिया कर्मणा जिन्वति प्रीणातीति धियंजिन्वम् । अवनाय तर्पणाय । आह्वयामः । वयम् । किञ्च पूषा । अस्माकम् । धनानाम् । भृयात् । वर्धनाय । रक्षिता च । वायुः । पाता च । अनुपहिंसितश्चान्येन केनचित् । अविनाशाय । तथा हूमहे आह्वयामो वयमित्यनुषङ्गः । U

वयम् । तं प्रसिद्धम् । रुद्रम् । आह्वयामः । कीदृशं तम् ? जङ्गमस्य । स्थावरस्य च । भूतजातस्य । पालकम् । धियं बुद्धिं जिन्वति प्रीणातीति धियंजिन्वस्तम् । अलुक् । बुद्धिसन्तोषकारकम् । जिन्वतिः प्रीणनार्थः । किमर्थं हूमहे ? अवितुं तर्पयितुम् । तुमर्थे असेप्रत्ययः । यथा येन प्रकारेण पूषा । अस्माकम् । वृद्धये । कल्याणाय च । भवतु । तथा हूमहे इत्यर्थः । कीदृशः पूषा ? धनानां ज्ञानानां वा रक्षकः । पालकः पुत्रादीनाम् । अनुपहिंसितः । Mah

RV.1 89.6 -YV.25 19.

स्वस्त्ययनम् । अस्माकम् । इन्द्रः । स्थापयतु । कथम्भूतः ? प्रभूतधनः । महाशब्दो महाकीर्तिर्वा । स्वस्ति । अस्माकम् । पूषा । दधातु । कथम्भूतः ? विश्ववेदाः सर्वज्ञो वा । स्वस्ति नः तार्क्ष्यो दधातु । कथम्भूतः ? अनुपहिंसितासुः । स्वस्ति । अस्माकम् । बृहस्पतिश्च । दधातु । U

विराट्स्थाना । आद्यौ पादौ नववर्णौ तृतीयो दशकः तुर्यो व्यूहेनैकादशकः । 'नवकौ वैराजस्त्रैष्टुभश्च' इति वचनात् । इन्द्रः । अस्मभ्यम् । अविनाशं शुभम् । ददातु । कीदृशः ? वृद्धश्रवाः वृद्धं महत् श्रवः कीर्तिर्यस्य सः । पूषा । नः । स्वस्ति । ददातु । कीदृशः ? विश्ववेदाः विश्वं सर्वं वेदो धनं यस्य विश्वं वेत्तीति वा विश्ववेदाः । रथो गरुडो वा । नः । स्वस्ति । ददातु । कीदृशः ? अरिष्टनेमिः अरिष्टा अनुपहिंसिता नेमिश्चक्रधारा पक्षो वा यस्य सः । गरुः । अस्मभ्यम् । स्वस्ति । ददातु । Mah.

RV.1.89.7=YV.25.20.

पृषन्तः शबला अश्वा येषां ते पृषदश्वाः । पृश्निः द्यौर्माता येषां त एव-मुच्यन्ते । शुभं कर्तुं जनान् प्रति ये यान्ति ते शुभंयावानः । 'आतो मनिन्क्व-निब्वनिपश्च' इति वनिप् । यज्ञेषु । गमनशीलाः । 'आदृगमहन' इति किः । य इत्थम्भूता मरुतस्ते । अग्नेन हविर्लक्षणेन आहूताः सन्तः । आगमन् आगच्छन्तु इहेत्यनुषङ्गः । ये च अग्निमुखाहुतादा इत्यर्थः । मनवः चतुर्दश । ते च अवसा गमन्निह । ये च आदित्यदर्शनाः विश्वदेवाः ते च । अस्माकम् । अवसा गमन्निह यज्ञे । U.

जगती । देवाः । अग्नेन हविर्लक्षणेन हेतुना । इह यज्ञे । आगच्छन्तु । कीदृशा मरुतः ? पृषत्यः पृषतीसंज्ञा अश्वा बडवा वाहनं येषां ते पृषदश्वाः । पुंवद्भावः । 'पृषत्यो मरुताम्' इति(१.१५)निघण्टुवचनात् । यद्वा पृषन्तः शबलाः अश्वाः येषां ते । पृश्निः द्यौर्गौर्दितिर्वा जननी येषां ते पृश्निमातरः । शुभं कल्याणं यान्ति प्राप्नुवन्ति प्रापयन्ति वा शुभंयावानः 'आतो मनिन्-' (पा० ३।२।७४) इति वनिप्प्रत्ययः । यज्ञगृहेषु । गमनशीलाः । 'आदृगमहन-' (पा० ३।२।१७१) इति किः । अग्निर्जिह्वा भोजनसाधनं येषां ते 'अग्निमुखा वै देवाः' इति श्रुतेः । हुताद इत्यर्थः । मन्यन्ते जानन्ति मनवः सर्वज्ञाः । सूरः सूर्यश्चक्षः चक्षुर्येषां ते, सूर्यं चक्षते पश्यन्ति वा सूरचक्षसः । किञ्च न केवलं मरुतः, विश्वे सर्वे देवाः च अस्माकं यज्ञे आगच्छन्तु । Mah.

[1] RV.1.89.8 YV.25.21.

अनुकूलम् । कर्णाभ्याम् । शृणुयाम हे देवाः ! भद्रम् । पश्येम । अक्षिभ्याम् । हे यजनीयाः ! किञ्च अशिथिलैः । अङ्गैः । देवान् स्तुतवन्तः । भार्यापुत्रपौत्रादिकाभिः तनूभिः सहिताः । व्यश्नुवीमहि । देवैर्यत् स्थापितम् । मनुष्याणामायुः । तद् व्यश्नुवीमहि । U

तिस्रस्त्रिष्टुभः । हे देवाः ! कर्णैः । कल्याणमनुकूलम् । वयं शृणुयाम । हे यजत्राः ! यजन्तं त्रायन्ते रक्षन्ति यजत्राः ! यजमानपालकाः ! नेत्रैः भद्रम् । वयम् । पश्येम । 'बहुलं छन्दसि' (पा० ७।१।७६) इति हलादौ अक्षि-शब्दस्यानङादेशः । किञ्च देवैः स्थापितं, देवानां हितं, देवोपासनयोग्यं

---

[1] YV. reads व्यशेमहि for व्यशेम of the RV.

वा यदायुः जीवनम् । तद्वयम् । व्यश्नुवीमहि । प्राप्नुयाम । कीदृशा वयम् ? दृढैः । अवयवैः करचरणादिभिः शरीरैश्च पुत्रादिभिर्वा युताः । भवतः स्तुतवन्तः सन्तः । Mah.

RV 1.899=YV.25.22.

शतमपि । शरदः । अन्तिके समीपे भवथ । हे देवाः ! आकल्पकालमित्यभिप्रायः । ऋषिभिरुदितमेतत् । यस्मिन् शरदां शते । अस्माकम् । यूयं कृतवन्तः । जराम् । तनूनाम् । जरानिमित्तां शक्तिमित्यभिप्रायः । किञ्च पुत्रा अग्रयः । यत्र शरदां शते । यजमानस्य जनितारो भवन्ति । तदुक्तम् 'तत्र वै प्रजापतिः प्रजाः ससृजे' इत्युपक्रम्य 'तस्माज्जनयित्वा बिभृही' ति । यत्र पितरो भवन्ति । एतदप्युक्तमेव । 'स यत्र म्रियते यत्रैनमग्नावभ्यादधाति तदेषोऽग्नेरधिजायते स एष पुत्रः सन् पिता भवति अथवा पुत्रा एव पितॄणामौर्ध्वदेहिकं कुर्वाणाः पितरो यत्र सम्पद्यन्ते तदपि शरदां शतमन्तिक एवेति' । यत एवमतो ब्रूमः । मा हिंसिष्ट । अस्माकम् । मध्ये, अकाल एव । आयुः । गन्तृ गमनशीलम् । उक्तं च 'सञ्चिन्त्य सञ्चिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य । वर्षासु सिक्ता इव चर्मबन्धाः सर्वे प्रयत्नाः शिथिलीभवन्ति' इति । U

हे देवाः ! शतम् । अपि । वर्षाणि । शतवर्षपर्यन्तं यूयम् । अन्तिके समीपे । भवतेति शेषः । यत्र शरच्छते । अस्माकम् । शरीराणाम् । यूयम् । जराम् । कुरुथ । करोतेर्लिटि मध्यमबहुवचनम् । 'द्व्यचोऽतस्तिङः' (पा० ६।३।१३५) इति चक्रेत्यत्र संहितायां दीर्घः । 'निपातस्य च' (पा० ६।३।१३६) इति यत्रेत्यत्र दीर्घः । वार्धकावधि यूयं समीपे भवतेत्यर्थः । यत्रास्माकं जरायाम् । अस्मत्पुत्राः । पुत्रवन्तः । भवन्ति । यावदस्माकं पौत्रा भवन्तीत्यर्थः । तावद् मध्ये । अस्माकम् । आयुः । मा हिंसिष्ट । रिषतेर्हिंसार्थस्य णिजन्तस्य चङि रूपम् । कीदृशमायुः ? गमनशीलम् । तदुक्तम् 'सञ्चिन्त्य सञ्चिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य । वर्षासु सिक्ता इव चर्मदण्डाः सर्वे प्रयत्नाः शिथिलीभवन्ति' । Mah.

RV.1.89.10=Y.V.25.23

सर्वात्मकत्वेनादितिं मन्त्रदृक् स्तौति । अदितिश्च द्यौः अदितिश्च अन्तरिक्षम् । अदितिश्च माता । स च पिता । स च पुत्रः । स इति छान्दसो

लिङ्गव्यत्ययः। विश्वे च देवाः, मनुष्याश्च अदितिः। किं बहुनोक्तेन, अदितिरेव भूतम्। अदितिरेव जनिष्यमाणम्। अथवा नैवादितिरनेनोच्यते किम्पुनः? एतान्येव द्यौःप्रभृतीनि अदीनानि महाभाग्ययुक्तानीति।U.

मन्त्रदृक् सर्वात्मकत्वेनादितिं स्तौति। स्वर्गोऽदितिः तदधिष्ठातृत्वात्। एवमग्रेऽपि अन्तरिक्षमदितिर्माता पुत्रश्च स सादितिरेव। लिङ्गव्यत्ययः। सर्वे देवा अदितिः। मनुष्या अप्यदितिः। किम्बहुना उत्पन्नं प्राणिजातं जनिष्यमाणञ्च सर्वमदितिरेव। यद्वादितिर्मन्त्रेण नोच्यते द्यौरित्यादीनि सर्वाणि जनित्वान्तानि अदितीनि अदीनानि महाभाग्ययुक्तानि सन्तु। Mah.

RV.1.90 6 -YV.13.27.

कूर्मं दधिमधुघृतैरभ्यनक्ति। गायत्र्यस्तृचो वैश्वदेव्यः। मधुमन्तो वा रसवन्तः। वाताः। वान्तिवति शेषः। कस्मै? यज्ञमिच्छते। उदकम्। क्षरन्तु। स्यन्दमाना नद्यः। मधुमत्यः। अस्माकम्। भवन्तु। ओषधयः।

'कूर्मं दधिमधुघृतैरनक्ति मधु वाता इति' (का० १७।४।२७) मिश्रितैर्दधिमधुघृतैर्ऋक्त्रयेण कच्छपमनक्ति। गोतमदृष्टा विश्वदेवदेवत्यास्तिस्रो गायत्र्यः। ऋतं यज्ञमिच्छतीति ऋतयन् तस्मै ऋतयते यजमानाय। वायवः। मधुमन्तो रसवन्तो वान्तिवति शेषः। ऋतयतीत्यत्र 'क्यचि च' (पा० ७।४।३३) इति प्राप्तस्येत्वस्य 'न छन्दस्यपुत्रस्य' (पा० ७।४।३५) इत्यभावः। 'अश्वाघस्यात्' (पा० ७।४।३७) इत्यश्वाघयोरेव क्यच्यात्वविधानात् 'अकृत्सार्वधातुकयोः' (पा० ७।४।२५) इत्यात्वमपि न। संहितायां तु छान्दसो दीर्घः। मधु मधुमान् इत्यग्रे मतुप्प्रत्ययदर्शनात्सर्वत्र मधुशब्दाग्रे मतुब् ज्ञेयः। सिन्धवः स्यन्दमाना नद्यः समुद्रा वा। मधुमत् रसवत् उदकम्। स्रवन्त्वित्यर्थः। ओषधयः। अस्माकम्। मधुररसोपेताः सन्तु। Mah

RV.1.90.7—YV.13.28.

मधुमत्। रात्रिः। अस्तु। अपि च। उषसः। मधुमत्यः। सन्तु। रसवत्। पार्थिवम्। लोकः। अस्तु। मातृभूतः। मधुमदित्ययं मतुप् सर्वेषां मधुशब्दानामनुषङ्गो द्रष्टव्यः साकाङ्क्षत्वात्। मधुमती। द्यौरस्तु। अस्माकं पितृभूता। U.

रात्रिः । अस्माकम् । मधुमत् मधुररसोपेतमानन्दकरमस्तु । अपि च । दिवसा अपि । मधुमन्तः सन्तु । पृथिवीलोको मातृभूतो मधुररसोपेतमस्तु । पितृभूतः । द्युलोकः । मधुमान् मधुररसोपेतोऽस्तु । Mah.

RV.1.90.8=YV.13 29.

रसमान् । अस्माकम् । वनस्पतिर्यज्ञस्य साधनभूतोऽस्तु । सोमो वा वनस्पतिः । मधुमान् अस्तु सूर्यः यज्ञसाधनभूतः । मधुमत्यो रसवत्यः । गावः यज्ञसाधनभूताः पशवो रश्मयो वा । भवन्तु । अस्माकम् । 'रसो वै मधु' इति श्रुतिः । वाय्वादीनि रसवन्त्यस्माकं भोग्यानि सन्त्विति समस्तार्थः । U.

वनस्पतिरश्वत्थादिः । अस्माकम् । रसवान् यज्ञसाधनभूतोऽस्तु । सूर्यो मधुमान् सन्तापराहित्यलक्षणमाधुर्यरसोपेतोऽस्तु । गावः यज्ञसाधनभूता रश्मयः नोऽस्माकं मधुमत्यो रसवत्यो भवन्तु । 'रसो वै मधु' (श० ७।५।१।४) इति श्रुतेः । वातादीनि रसवन्त्यस्माकं भोग्यानि भवन्त्विति सर्वोऽर्थः । Mah.

RV 1 90.9 - YV.36 9

अनुष्टुप् । महावीरप्रसादादादौ च । सुखरूपः । अस्माकम् । भवतु मित्रः । शञ्च । नः । वरुणः । भवतु । शञ्च । नः । भवतु । अर्यमा । शञ्च । नः । इन्द्रः । बृहस्पतिः । शञ्च । नः । विष्णुः । उरुर्विस्तीर्णः क्रमो यस्य स उरुक्रमः । शेषं दर्शितया (दिशा) व्याख्येयम् । U

अनुष्टुप् । मित्रवरुणादयो देवताः । मित्रो देवोऽस्माकं सुखरूपो भवतु महावीरप्रसादात् । मेद्यति भक्तेषु स्निह्यतीति मित्रः । वरुणः सुखरूपो भवतु । वृणोत्यङ्गीकरोति भक्तमिति वरुणः । अर्यमास्माकं शम्भवतु । इयर्ति गच्छति भक्तं प्रतीत्यर्यमा । इन्द्रो देवेशोऽस्माकं शं भवतु । देवगुरुरस्माकं शं भवतु । बृहतां देवानां पतिः पालकः । उरुर्विस्तीर्णः क्रमः पादन्यासो यस्य स विष्णुः अस्माकं शं भवतु । वेवेष्टि व्याप्नोतीति विष्णुः । Mah.

RV.1 91.1=YV.19.52.

हे सोम ! चिकित्वान् प्रकर्षेण चेतनावान् विशिष्टचैतन्ययुक्तस्त्वम् । मनीषा । मनस इच्छा विशिष्टतरा भवति यज्वनाम् । यद्वा हे सोम ! त्वम् । प्रचिकितः । 'कित ज्ञाने' प्रकर्षेण ज्ञातासि । यावत् ज्ञातव्यम् मनीषया

स्वया प्रज्ञया । त्वं च । ऋजुतरम् देवयानाख्यम् । अनुनयसि । पन्थानम् । किञ्च । तव । प्रणयनेन, अभ्यनुज्ञानेन । पितरः । अस्माकम् । हे इन्दो ! देवेषु मध्ये । रमणीयं यज्ञफलम् । अभजन्त । धीमन्तः । U.

त्वं मनीषया स्वप्रज्ञया ऋजुतमं देवयानं पन्थानमनुनयसि प्रापयसि । मनीषा तृतीयैकवचने पूर्वसवर्णदीर्घः । अत्यन्तमृजुः रजिष्ठः । 'अतिशायने तमबिष्ठनौ' (पा० ५।३।५५) 'विभाषर्जोश्छन्दसि' (पा० ६।४।१६२) इत्यृकारस्य र इष्ठादिषु । पन्थाम् 'अयस्मयादीनि छन्दसि' (पा० १।४।२०) इति सर्वनामस्थानेऽपि पदसंज्ञायां 'नलोपः प्रातिपदिकान्तस्य' (पा० ८।२।७) नलोपे सवर्णदीर्घे पन्थामिति रूपम् । अनुनेषि—नयतेः शपि लुप्ते गुणे लटि रूपम् । कीदृशस्त्वम् ? प्रचिकितः 'कित ज्ञाने' प्रकर्षेण चिकितः चेतनावान् विशिष्टचैतन्ययुतः । किञ्च हे इन्दो ! सोम ! अस्माकम् । पितरः । तव । प्रणीत्या प्रणयनेनाभ्यनुज्ञानेन देवेषु विषये । रमणीयं यज्ञफलम् । सिषेविरे । सोमयागेनैव स्वर्गाप्तेः । कीदृशाः पितरः ? धीमन्तः, यज्ञज्ञानवन्तः । Mah.

RV.1.91.16; 9.31 4 = YV.12.112.

सिकता अभिमृशति । तिस्रः सौम्याः [1]गायत्रीत्रिष्टुबुष्णिहः वा गायत्र्यः द्वाभ्यां विनियोगः । आत्मानमभिवर्धय । कथं कृत्वा ? समागच्छतु । तव । सर्वतः । हे सोम ! वृष्ण्यं सर्वभूतबीजम् । ततस्त्वं सर्वभूतोत्पत्तिना वृष्ण्येन भव । अन्नस्य । सङ्गमने । अन्नभावं प्राप्नुहि अन्नं वा प्राप्नुहि । U.

'आप्यायस्वेति सिकतालम्भनमृग्भ्याम्' (का० १७।३।१६) आत्मनि विस्तारिताः सिकताः स्पृशति ऋग्द्वयेन । गोतमदृष्टाः सोमदेवत्यास्तिस्रो गायत्रीत्रिष्टुबुष्णिकछन्दस्काः 'आप्यायस्व मदिन्तम' (YV. १२. ११४) इति तृतीयस्या विनियोगः सूत्रे नास्ति । हे सोम ! सर्वस्मात् । वीर्यं सर्वभूतोत्पत्तिकृद्बीजम् । तव । समागच्छतु । तेन च वीर्येण त्वम् । सर्वतः । वर्धस्व । किञ्च । अन्नस्य । सङ्गमननिमित्तम् । भव । अन्नमस्मासु सङ्गमयेत्यर्थः । Mah.

---

[1] The metres of stanzas in the RV. are Gāyatrī, Uṣnik, and Triṣṭubh whereas in the YV. the metres are as stated by U. and Mah.

RV.1.91.17=YV.12.114.

हे सोम ! त्वम् । आत्मानमाप्यायस्व । मदयितृतम ! यद्वा मदोऽस्यास्तीति मदी अतिशयेन मदी मदिन्तमः । 'नादृघस्य' इति नुट् । सर्वैः । अंशुभिः । ततः समर्थः सन् । भव । अस्माकम् । सर्वतः प्रथयितृतमः । सखा । वर्धनाय । U.

हे मदिन्तम ! मदयति तर्पयति मदी ग्रहादित्वाण्णिनिप्रत्ययः (पा० ३।१।१३४) यद्वा मदस्तृप्तिरस्यास्तीति मदी 'अत इनिठनौ' (पा० ५।२।११५) इतीन्, अतिशयेन मदी मदिन्तमः 'नादृघस्य' (पा० ८।२।१७) इति नान्तात्परस्य तमपो नुडागमः । ईदृश ! हे सोम ! विश्वैः सर्वैः । सूक्ष्मांशैः । प्रवृद्धो भव, वृद्धः सन् । अस्माकम् । वर्धनाय । सहायः । भव । 'द्वयचोऽतस्तिङः' (पा० ६।३।१३५) इति संहितायां दीर्घः । कीदृशस्त्वम् ? अत्यन्तं सप्रथाः सकीर्तिः सप्रथस्तमः । Mah

RV 1.91.18 –YV.12.113.

संयन्तु । तव । रसाः । सारभूताः । संयन्तु च । अन्नानि । संयन्तु च रेतांसि । पाप्मनोऽभिभवतु सोमस्य । ततस्तैः पयोऽन्नवृष्ण्यैः आप्यायमानः । अमृताय । भव । प्रजात्यै अमरणधर्मिण्यै भव । 'प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृता' इति श्रुतिः । हे सोम ! ततो द्युलोके । श्रवांसि चन्द्रपाणि । उत्तमानि आहुतिपरिणामजनितानि । धारयस्व । U

हे सोम ! पातव्या रसाः । तव । सङ्गच्छन्ताम् । अपि च अन्नानि संयन्तु । रेतांसि ते संयन्तु । कीदृशस्य ते ? अभिमातिषाहः अभिमातिं पाप्मानं सहतेऽभिभवतीत्यभिमातिसाट् तस्याभिमातिसाहः । पत्वं छान्दसम् । हे सोम ! पयोऽमृतवृष्ण्यैः वर्धमानः सन् अमरणधर्मिण्यै प्रजात्यै पुत्रादिवृद्ध्यै यजमानस्य भवेति शेषः । अमृतशब्देन श्रुत्या प्रजातिर्व्याख्याता । तथा च श्रुतिः 'प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृतेति' (श.७।३।१।४६) किञ्च । द्युलोके । उत्कृष्टानि । अन्नानि । आहुतिपरिणामजनितानि, धारय सम्पादय । लोकद्वयभोगं सम्पादयेत्यर्थः । 'धि धारणे' तुदादिः विकरणव्यत्ययः । आत्मनेपदञ्च छान्दसम् । 'बहुलं छन्दसि' (पा० २।४।७३) इत्युक्ते 'सुधितवसुधित' (पा० ७।४।४५) इति सूत्रेण दधातेर्निपातो वा धत्स्वेत्यर्थे । Mah.

RV.1.91.19=YV.4.37.

सोमं प्रवेशयन् वाचयति। सौमी त्रिष्टुप् हे सोम ! या ते धामानि 'धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति'। यानि। तव सम्बन्धीनि। धामानि नामानि। हविषा। यजन्ति। यष्टारः। तानि। तव। सर्वाणि। परिभूः, नपुंसकबहुवचनस्थाने पुंल्लिङ्गैकवचनम्। परिभूणि सर्वतो भवितॄणि। अस्तु, एतदपि बहुवचनं वाच्यसंयोगात्। सन्तु। यज्ञं सर्वतः। गृह्णे भवन्त्वित्यर्थः। यद्वा यज्ञशब्देन प्रथमान्तानि च धामानि तव विश्वानि नामानि यज्ञः परिभूः भवतु। यज्ञः परिगृह्य वर्ततामित्यर्थः। त्वं च। गृहस्य पुत्रपशुभूहिरण्यादिभिर्वर्धयिता। प्रतरन्ति येनापदः स प्रतरणः। शोभनवीरः। अहन्ता वीराणाम्। इत्थम्भूतस्त्वं परिभ्रम। सोम ! गृहानस्मदीयान्। U

'या त इति वाचयतीति' (का० ७।६।३२) सोमदेवत्या त्रिष्टुप् गोतमदृष्टा। हे सोम ! तव। यानि। प्रातःसवनादीनि स्थानानि। प्राप्येति शेषः। त्वदीयरसरूपेण यजन्ति ऋत्विजो यागङ्कुर्वन्ति। यज्ञमभिलक्ष्येति शेषः। तव। तानि। सर्वाणि। स्थानानि। परिभूः। अस्तु। परितो भवति प्राप्नोतीति परिभूः। 'भू प्राप्तौ'। भवान् परितः प्राप्तवान् भवतु। ऋत्विजो येषु स्थानेषु यजन्ति तानि त्वं प्राप्नुहीत्यर्थः। यद्वा ऋत्विजो यानि धामानि प्राप्य यजन्ति तानि सर्वाणि तव यज्ञं परिभूरस्तु यज्ञं परितो भवितॄणि यज्ञव्यापकानि सन्तु। नपुंसकबहुवचनस्थाने पुंल्लिङ्गैकवचनमार्षम्। किञ्च हे सोम ! त्वं दुर्यान् गृहान् प्राप्नुहि। दुर्या इति गृहनाम। 'द्व्यचोऽतस्तिङः' (पा० ६।३।१३५) इति संहितायां प्रचरेति दीर्घः। किम्भूतस्त्वम् ? गयस्फानः, गय इति गृहनाम। (निघ० ३।४।१) 'स्फायी वृद्धौ'। गयान् स्फाययतीति गयस्फानः गृहाभिवर्धकः। प्रकर्षेण तरन्त्यापदो येन स प्रतरणः। यद्वा प्रतारयति यज्ञपारं प्रापयतीति प्रतरणः। सुवीरः शोभनास्त्वत्प्रसादलब्धा वीरा अस्मत्पुत्रपौत्रा यस्य तव स त्वं सुवीरः। न वीरान् हन्तीति वीराणां परिपालक इत्यर्थः। Mah.

RV.1.91.20 - YV.34 21.

सोमः। धेनुम्। ददाति। सोम एव। अश्वम्। शीघ्रगतिम्। ददाति। सोम एव। पुत्रम्। कर्मसु साधुम्। ददाति। तमेव विशिनष्टि-सदने साधुम्।

विदथे यज्ञे साधुम्। समामर्हति सभेयस्तम्। पितुरनुशासने स्थितम्, विनीतमित्यर्थः। यः यजमानः। ददाशत्। सोमाय। हविः! तस्मै सोमो धेन्वादीन् ददाति इति सम्बन्धः। U.

यो यजमानः। अस्मै सोमाय। ददाति हविः। तस्मै सोमः। धेनुम्। ददाति। शोघ्रम्। अश्वञ्च। सोमः। ददाति। सोमश्च तस्मै। पुत्रं ददाति कीदृशं वीरम्? कर्मणि साधुम्। सदने गृहे साधुम्। विदथो यज्ञस्तत्र साधुम्। सभामर्हति सभेयस्तम्। पितरं शृणोति पितृश्रवणः पित्राज्ञाकारिणं विनीतमित्यर्थः। कर्मण्यमित्यादौ 'तत्र साधुः' (पा० ४।४।९८) इति यत्। सभेयं 'ढश्छन्दसि' (पा० ४।४।१०६) इति सभायाः साध्वर्थे ढप्रत्ययः। तस्येयादेशः 'आयनेयी-' (पा० ७।१।२) ददाशत्-'दाशृ दाने' 'बहुलं छन्दसि' (पा० २।४।७६) इति शपः श्लुः द्वित्वम्। 'इतश्च लोपः परस्मैपदेषु' (पा० ३।४।९७) इति तिप इलोपः। 'लेटोऽडाटौ' (पा० ३।४।९४) इत्यडागमः। Mah

RV 1 91.21=YV 34.20.

असोढम्। युद्धेषु सैन्येषु। पप्रिम्-'पॄ पालनपूरणयोः' इत्यस्यैतद्रूपम् नतु 'प्रा पूरणे' इत्यस्य। पालनशीलम्। स्वर्षां स्वर्दिवं सनोति स तथा तम्। अप्साम्-अपः सनोति सम्भजते स तथा तम्। बलस्य। गोप्तारम्। भरेषुजाम्, जयतेरेतद्रूपम् नतु जानातेः, संग्रामेषु जेतारम्। सुनिवासम्। कल्याणकर्मकारित्वेन प्रसिद्धम्। परसैन्यानि जयन्तम्। त्वां दृष्ट्वा। उत्साद्यन्ते तद् दृष्ट्वा। मदेर्मोदनार्थस्य ग्रहणम्। प्रहृष्टाः स्याम। हे सोम! U.

सोमदेवत्या त्रिष्टुप्। हे सोम! त्वाम्। उत्कर्षेण वर्तमानम् अनु। वयं मदेम हृष्टाः स्याम। किम्भूतं त्वाम्? युद्धेषु। असहनमनभिभूतम्। पुनः कीदृशम्? सेनासु। पालयितारम्। स्वर्दिवं सनोति सम्भजते स स्वर्षाः तम्। अपो जलानि सनोतीत्यप्साः तम्। बलस्य। रक्षकम्। संग्रामेषु जेतारम्। सुनिवासम्। शोभनं श्रवः कीर्तिर्यस्य स सुश्रवाः तम्। असाढम्-सह्यतेऽसौ साढः न साढः असाढस्तम्। सहेः क्तः ढत्वम्। 'हो ढः' (पा० ८।२।३१) 'झषस्तथोः-' (पा० ८।२।४०) धत्वम् 'ष्टुना ष्टुः' (पा० ८।४।४१) 'ढो ढे लोपः' (पा० ८।३।१३) 'ढ्लोपे पूर्वस्य दीर्घोऽणः' (पा० ६।३।१११) बाहुलकात् 'सहिवहोरोदवर्णस्य' (पा० ६।३।११२) इत्यस्याप्रवृत्तिः।

षत्वं छान्दसम्। पप्रिम्' पॄ पालनपूरणयोः' 'आदृगमहन-' (पा० ३।२।१७१) इति किः द्वित्वादिः। स्वर्षाम्-स्वःपूर्वात्सनोतेर्विट् 'विड्वनोरनुनासिकस्यात्' (पा० ६।३।४१) एवमप्साम्। गोपायतीति गोपाः—किप् अतो लोपः। यलोपः। भरेषुजाम्-भरेषु संग्रामेषु जयति शत्रूनिति भरेषुजाः 'हलदन्तात्सप्तम्या अलुक्' (पा० ६।३।६) इति अलुक्। जयतेरौणादिको डाप्रत्ययः। मदेम 'मदी हर्षे' लिङ् व्यत्ययेन शप्। Mah.

RV.1.91 22 =YV.34.22.

हे सोम ! त्वम् इमाः। ओषधीः। सर्वाः। जनितवानसि। त्वम्। अपः। अजनयः। त्वञ्च। गाः। अजनयः। त्वम्। आततवानसि। विस्तीर्णम्। अन्तरिक्षम्। त्वम्। ज्योतिषा। विवृणोषि। तमः। त्वमेवादित्यात्मना तमोऽपनयसि। सर्वात्मत्वेन स्तुतिः। U.

हे सोम ! त्वम्। इमाः। सर्वाः। ओषधीः। जलानि। धेनूः। जनितवानसि। त्वम्। विस्तीर्णम्। अन्तरिक्षम्। विस्तारितवानसि। त्वञ्च। तेजसा। अन्धकारम्। विवृणोषि। आदित्यात्मना सर्वं तमोऽपनयसीति सर्वात्मत्वमित्यर्थः। 'बभूथाततन्थजगृम्भववर्थेति निगमे' (पा० ७।२।६४) इति निपातः। Mah.

RV.1 91.23 YV.34.23.

दैवेनेति प्राप्ते तद्धितलोपश्छान्दसः। दैवेन। मनसा सह। अस्मभ्यम्। धनस्य। भागम्। सहःशब्दो बलवचनः सान्तः। तत्र अकारागमश्छान्दसः। हे सहस्वन्! अभियुध्य। युध्यतिर्गत्यर्थानां मध्ये पठ्यते। अन्तर्भावितण्यर्थश्च गृह्यते। अभिगमय देहीत्यर्थः। एवं दानप्रवृत्तं त्वां कश्चित्प्रतिबध्नीयादित्यत आह। मा च। त्वाम्। आतनत्। तनोतिः प्रतिबन्धार्थः। प्रतिबध्नातु। कुतस्त्वमेवमुच्यसे ? इति चेत्, ईशिषे वीर्यस्य यतस्त्वं स्वकीयस्य वीरकर्मणः ईशिषे ईश्वरो यस्त्वमित्यभिप्रायः। किञ्च उभयेभ्यः प्रचिकित्स उभयलोकप्राप्त्यर्थं व्याध्यपगमं कुर्वित्यभिप्रायः। गविष्टौ, गोशब्देनात्र द्युलोकोऽभिप्रेतः। स्वर्गैषणायाञ्च विषयभूतायाम् अस्मान् प्रचिकित्स। दैवं मनः प्राप्य लब्धधना अरोगाश्च यथा स्वर्गं यास्यामस्तथा कुर्विति वाक्यार्थः। U.

हे देव ! सोम ! हे सहसावन् ! बलवन् ! देवसम्बन्धिना मनसा सह। धनस्य। भागम्। अस्मभ्यम्। अभियुध्य। युध्यतिर्गतिकर्मा अन्तर्भावितण्यर्थश्च। अभिगमय देहीत्यर्थः। एवं दानप्रवृत्तं त्वां कश्चिन्मा आतनोतु प्रतिबध्नातु। तनोतिः प्रतिबन्धार्थः। कुतस्त्वमेवमुच्यसे ? इति चेत्, यतस्त्वं वीरकर्मण ईश्वरो भवसि। 'अधीगर्थ' (पा० २।३।५२) इति कर्मणि षष्ठी। किञ्च गोः स्वर्गस्य इष्टौ इच्छायां स्वर्गैषणायां विषयभूतायां सत्याम्। उभयलोकप्राप्त्यर्थं चिकित्सां कुरु। व्याध्यपगमं कुरु। उभयलोकप्रतिबन्धकं विघ्नं निवर्तयेत्यर्थः। दैवं मनः प्राप्य लब्धधना अरोगाश्च सत्कर्म कुर्वाणाः यथा स्वर्गं यास्यामस्तथा कुर्विति वाक्यार्थः। देवेन देवानामिदं देवम्, तद्धितप्रत्ययलोपः। सहसावन्, प्रथमार्थे तृतीया। सहसा सहो बलमस्यास्तीति सहसावान् अलुक्। तनत्, तनोतेः परस्य लेटोऽडागम इलोपश्च। चिकित्सा 'गुप्तिज्किद्भ्यः सन्' (पा० ३।१।५) 'अन्येषामपि दृश्यते' (पा ६।३।१३७) इति दीर्घः। Mah.

RV.1 92.13=YV.34.33.

उषोदेवत्या पुरोष्णिक् ? पुरउष्णिक्। हे उषः ! तत्। चायनीयं महनीयं धनम्। आहर। अस्मभ्यम्। हे अन्नवति ! येन धनेन। पुत्रम्। पौत्रं च। दध्महे। U.

उषोदेवत्या पुरोष्णिक् ? पुरउष्णिक्। हे उषः ! हे अन्नवति ! अस्मभ्यम्। तत् प्रसिद्धम्। चायनीयमाश्चर्यकारि महनीयं धनम्। आहर देहि। येन धनेन। वयम्। पुत्रम्। पौत्रञ्च। सर्वं सन्तानवर्गम्। दध्महे पुष्णीमः। धामहे दधातेः शपो लुकि रूपम्। Mah.

RV.1.95.1=YV.33.5.

त्रिष्टुप् शुक्रस्य। द्वे रात्र्यहनी। नानारूपे। कृष्णा रात्रिः शुक्लमहः चरतः आदित्येन सहाहश्चरति इतरत्र अग्निना तु रात्रिः। शोभनार्थे। अन्या एका रात्रिः एकमग्निरूपं वत्सम्, अन्या एकमहः एकमादित्यरूपं वत्सम् उप धापयेते, रात्रिरग्निदेवत्यमग्निहोत्रम्, अहः सूर्यदेवत्यमग्निहोत्रं वत्समित्याशयः। किञ्च हरितवर्णोऽग्निः। अन्यस्यां रात्रौ। अन्नवान्—उपभोग्यः। तापपाकप्रकाशैर्भवति। शुक्लवर्ण आदित्यः। अन्यस्यामहनि दृश्यते। सुतेजाः। यद्वा द्वे द्यावापृथिव्यौ नानारूपे परस्परापेक्षया चरतः।

कल्याणप्रयोजने। अन्या पृथिवी अग्निं वत्सम् अन्या द्यौः आदित्यं वत्सम्। पोषयतः। किञ्च हरिरग्निः। अन्यस्याम्। पृथिव्याम्। स्वधावान्। भवति। शुक्र आदित्यश्च अन्यस्यां दिवि। दृश्यते। सुतेजाः। U.

शुक्रग्रहपुरोरुक् कुत्सदृष्टा त्रिष्टुप्। तं प्रत्नथेत्यस्याः स्थाने। द्वे रात्र्यहनी। निरन्तरं प्रवर्तेते। कीदृशे? विरूपे विविधं रूपं ययोस्ते। कृष्णा रात्रिः शुक्लमहः। स्वर्थे शोभनोऽर्थो ययोस्ते कल्याणप्रयोजने। अन्या च अन्या च। वत्सं क्षीरं पाययतः। अन्या एका रात्रिः वत्समग्निमुपधापयते रात्रावग्निदेवत्यमग्निहोत्रम्। अन्या दिवसरूपा वत्समादित्यमुपधापयते अह्नि सूर्यदेवत्यमग्निहोत्रम्। किञ्च तदेवाह अन्यस्यां रात्रौ। हरितवर्णोऽग्निः अन्नवान् भवति अन्यस्यामहनि शुक्लः आदित्यः शोभनतेजा ददृशे दृश्यते। यद्वा द्यावापृथिव्यौ। अग्निर्भूमौ स्वधावान् रविर्दिवि सुवर्चाः दृश्यते। Mah

[1] RV 1.98.1 = YV.26.7.

द्वितीयः पादः पूर्वं व्याख्यायते। यः वैश्वानरः। दीप्तः। हिकमिति निपातसमाहारोऽनर्थकः। यश्च वैश्वानरः। भूतजातानाम्। अभ्याश्रयणीयः सर्वोपकारसामर्थ्यात्। यश्च। अरणितः कुतश्चिद्वा। उत्पन्नः सन्। सर्वमिदम्। अभिविपश्यति। यथा द्रष्टव्यं कर्मानुरूपेण। यश्च वैश्वानरः। स्पर्धते। सूर्येण सह स्वकीयदीप्त्या। तस्य वैश्वानरस्य। कल्याणमतौ। वयं स्यामेति प्रार्थना। U.

त्रिष्टुप् कुत्सदृष्टा। वैश्वानरस्य। शोभनबुद्धौ। वयं स्याम भवेम। कं निपातः पादपूरणः। हि यस्माद्धेतोः वैश्वानरः। अरणितः। उत्पन्नः सन्। इदं सर्वम्। कर्मानुरूपं पश्यति। सूर्येण सह स्पर्धते च। सूर्यसमतेजा इत्यर्थः। कीदृशोऽग्निः? राजते दीप्यते राजा। भूतजातानाम्। आश्रयणीयः। अभि समन्तात् श्रीयते सेव्यतेऽभिश्रीः। कर्मणि क्विप्। Mah.

RV.1.98.2 = YV.18.73.

योऽग्निर्वैश्वानरः पृष्टः कोऽयमिति? दिवि आदित्यात्मना व्यवस्थितो

---

[1] YV. adds उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा at the end, to the stanza of the RV.

मुमुक्षुभिः । तत्र ह्येवं श्रूयते । 'यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिः स ब्रह्म' इति । यश्च वैश्वानरोऽग्निर्विद्युदात्मना प्रावृषि स्थितः पृथिव्याम् अन्तरिक्षे लोके । पृथिवीत्यन्तरिक्षनामसु पठितम् । उदकार्थिभिः कोऽयं नाम द्विपदचतुष्पदजीवनहेतुः ? यश्चाग्निर्वैश्वानरोऽस्मिन् लोके व्यवस्थितः पृष्टोऽग्निहोत्रभिर्होतृपर्यन्तैः कोऽयं तापपाकप्रकाशैरुपकृत्य विश्वा ओषधीः आविष्टः ? यश्च वैश्वानरोऽग्निः बलेन मथ्यमानोऽध्वर्युणा 'कोऽयं निर्ममन्थ' ? इति पृष्टो दिद्युभिः सः । अस्मान् । अहनि । रक्षतु । स च । रात्रौ । पातु । विनाशात् । रिषतिर्हिंसाकर्मा । दिवा नक्तमिति सन्तातार्थं वचनम् । U.

वैश्वानरदेवत्या त्रिष्टुप् कुत्सदृष्टा । वैश्वानरः सर्वनरेभ्यो हितोऽग्निः । दिवसे । अस्मान् । रक्षतु । स च । रात्रौ नः पातु । सर्वदास्मान् रक्षत्वित्यर्थः । स कः ? योऽग्निः । द्युलोके । कोऽयमादित्यात्मना तपतीति मुमुक्षुभिः पृष्टः । अन्तरिक्षे 'यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद् ब्रह्म' इति श्रुतेः । यश्चाग्निः पृथिव्यामन्तरिक्षलोके कोऽयं विद्युदात्मना स्थितः ? इति जलार्थिभिः पृष्टः । अन्तरिक्षनामसु पृथिवीति पठितम् । यश्च । सर्वाः । व्रीह्याद्योषधीः प्रविष्टः सन् पृष्टः कोऽयं प्रजानां जीवनहेतुस्तापपाकप्रकाशैरुपकरोति ? यश्च बलेनाध्वर्युणा मथ्यमानः सन् पृष्टः कोऽयं मथ्यत इति ? सोऽयमग्निर्दिवानक्तं रिषो वधात् पातु । रिषतिर्हिंसाकर्मा । मास्मान्नाशयत्वित्यर्थः । Mah

RV.1.102 1 –YV.33 29.

हे इन्द्र ! इमाम् । तव । स्तुतिम् । प्रहरामि शपयामि । कथम्भूतस्य ते ? महतः । कथम्भूतां धियम् ? महतीम् । अस्य यज्ञस्य । स्तोत्रे । वाक् । यस्मात् । तव । स्वभूतान् गुणान् । अभिव्यनक्ति । ऐन्द्रमेव यज्ञं प्रकाशयति । किञ्च तमेवेन्द्रम् । अभ्युदये च । अभ्यनुज्ञानाय । विषयभूतायाम् । शत्रूणामभिभवितारम् । देवा अपि । बलेन । अभिष्टुवन्ति । पूर्वोऽर्धर्चः प्रत्यक्षकृतः उत्तरस्तु परोक्षकृतः । अतो वाक्यभेदेन व्याख्यानम् । U.

कुत्सदृष्टा जगती सावित्रपुरोरुक् वाममद्येत्यस्याः (YV. ८।६) स्थाने । हे इन्द्र ! इमां मामकीम् । बुद्धिं स्तुतिं वा कर्म वा तुभ्यं प्रहरे समर्पयामि । कीदृशस्य ते ? महतः पूज्यस्य । कीदृशीं धियम् ? महतीम् । यस्माद् यजमा-

नस्यास्य बुद्धिर्वाग्वा । स्तोत्रे क्रियमाणे । तव । त्वां व्यनक्ति । कर्मणि षष्ठी । अञ्जेर्लिटि नलोपश्छान्दसः । किञ्च देवाः । तमिन्द्रम् । अनुमदन्ति स्तुवन्ति । 'छन्दसि परेऽपि' (पा० १।४।८१) इत्यनोः परः प्रयोगः । क्व स्तुवन्ति ? अभ्युदये । गुर्वाद्यनुज्ञायां सत्याम् । यद्वा प्रसवे पुत्राद्युत्पत्तिरूपे उत्सवे इन्द्रं स्तुवन्ति । कीदृशमिन्द्रम् ? बलेन । सासहिं सहते सासहिः शत्रूणामभिभवितारम् । चौ समुच्चये । Mah.

RV.1.105.1=YV.33.90.

आहुतिपरिणामोऽत्रोच्यते । योऽसौ चन्द्रमाः स तथा सोमरूपापन्नः । अभिषुतः अप्सु । अन्तः मध्ये । रसरूपेण आस्थितः । अग्नौ हुतः सन् । सुपतनः । धावते । दिवि । तस्मात्पर्जन्यरूपमास्थाय उदकदानद्वारेण । धनम् । पीतवर्णम् । असंख्यातम् । बहवो यत्र स्पृहयन्ति । सोम एति । पर्जन्यरूपेणात्यर्थं स्तनितं कुर्वन् । U.

त्रितदृष्टाहुतिपरिणामवादिन्यैन्द्री । 'आहुतेर्होमद्रव्यस्य परिणामो द्युपर्जन्यपृथिवीपुरुषयोपात्मकपञ्चाग्निक्रमेण परिपाकः 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति श्रुत्योक्तः तं वदत्येषा ऋक् अधियज्ञं तावदर्थः । चन्द्रं देवानामाह्लादं मिमीते करोति चन्द्रमाः लतारूपः सोमोऽभिषुतः सन् । वसतीवरीनिग्राभ्यादिजलेषु अन्तर्मध्ये रसरूपेण स्थिताग्नौ हुतः सन् गरुडाकृतिः साधुपतनो भूत्वा दिवि शीघ्रं गच्छति । 'सृ गतौ' इत्यस्य शीघ्रगतौ धावादेशः । 'तृतीयस्यामितो दिवि सोम आसीत्' इति श्रुतेः । 'हरिः सोमो हरितवर्णः' (निरु० ४।१९) इति यास्कोक्तेर्हरिः पूर्वोक्तः सोम एव दिवि गतः पर्जन्यरूपमास्थायोदकदानद्वारेण रयिमेति । 'रयिरिति धननाम' (निरु० ४।१७) इति यास्कः । धान्यभावं प्राप्नोति व्रीहियवाद्यन्नरूपो भवतीत्यर्थः । कीदृशं रयिम् ? पिशङ्गम् परिपाकेन व्रीहियवादिकं धान्यं पीतवर्णं भवति । असङ्ख्यातम् । चतुर्विधभूतग्रामजीवनपर्याप्तमित्यर्थः । पुरुस्पृहं पुरूणां बहूनामपि स्पृहा लिप्सा यत्र तम् । बहवोऽपि यद्धान्यमिच्छन्ति तद्रूपो भवतीत्यर्थः । कीदृशो हरिः ? पर्जन्यरूपात्यर्थस्तनितं कुर्वन् । 'दाधर्ति (पा० ७।४।६३) इत्यादि निपातः । Mah

RV.1.107.1=YV.8.4; 33.68.

दध्रा श्रीणाति । त्रिष्टुप् यजुरन्ता आदित्यदेवत्या । 'आदित्येभ्यस्त्वा'

इति यजुः । यस्माद्यज्ञो देवतानामादित्यानां सुखं कर्तुं प्रत्येति तस्माद्धेतोः हे आदित्याः ! आदित्या एव आदित्यासः । आज्ञसेरसुक् । भवता मृडयन्तः । 'मृड सुखने' तृचोऽर्थे शतृप्रत्ययोऽत्र छान्दसः । मृडयितारः सुखयितारो भवतास्माकम् । आवृता भवतु । युष्मत्सम्बन्धिनी । सुमतिः । अस्मदभिमुखा च । अंहुः पापकारी । चिच्छब्दोऽप्यर्थे । अंहोः पापकारिणोऽपि या सुमतिः । वरिवोवित्तराः । वरिव इति धननाम । अतिशयेन धनस्य लब्धी भवतु । सा सुमतिः अस्मदभिमुखी आववृत्यादिति सम्बन्धः । U

'दध्ना श्रीणात्येनं पश्चिमेऽन्ते मध्ये वा यज्ञो देवानामिति, (का० १०। ४।६) एनमादित्यग्रहं दध्ना मिश्रीकुर्यात् । आदित्यदेवत्या यजुरन्ता त्रिष्टुप् कुत्सदृष्टा । 'आदित्येभ्यस्त्वा' इति यजुः । यज्ञो देवानामादित्यानां सुखं कर्तुं प्रत्यागच्छति । अतो हे आदित्याः ! यूयं सुखयन्तः सुखकर्तारोऽस्माकं भवत । 'अन्येषामपि दृश्यते' (पा० ६।३।१३७) इति संहितायां दीर्घः । किञ्च युष्माकं या शोभनबुद्धिर्भक्तानुग्रहपरा सा अस्मदभिमुखी आवर्तताम् । 'बहुलं छन्दसि' (पा० २।४।७६) इति वर्ततेर्लिङि जुहोत्यादित्वाच्छपः श्लुर्द्वित्वञ्च । किञ्च अंहोश्चित् अंहुः पापकारी । चिदप्यर्थे । अंहोर्हननशीलस्य पापिनोऽपि या सुमतिर्वरिवोवित्तरा वरिवो धनं विन्दति लभत इति वरिवोवित्, अत्यन्तं वरिवोवित् वरिवोवित्तमः पापिनो या सुमतिर्धनलब्धी भवेत् सा सुमतिरस्मदभिमुखी आववृत्यादिति सम्बन्धः । हे सोम ! आदित्येभ्यो देवेभ्यस्त्वां दध्ना मिश्रयामीति शेषः । Mah

RV 1.112.24 =YV.34 29

अम्र इति कर्मनाम । कर्मवतीम् । हे अश्विनौ ! वाचम् । अस्माकम् । कुरुतम् । किञ्च अस्माकम् । हे दस्रौ ! दर्शनीयौ ! हे वर्षितारौ ! युवानावित्यर्थः । मनसः सम्बन्धिनीमिच्छां च । अम्रस्वतीमेव कृतम् । कस्मात्पुनरहमेवं ब्रवीमि ? यतः अद्यूत्ये अवसे द्यूते भवमवसमन्नं द्यूत्यं द्यूतादागतं कर्मण्यं न भवति अत एवमुच्यते । अद्यूते अन्ने निमित्तभूते । आह्वयामि युवाम् । आगत्य च । वर्धनाय च अस्माकम् भवतम् । वाजसम्भजननिमित्तभूते सङ्ग्रामे च यज्ञे वा वर्धनायैव भवतम् । U.

हे अश्विनौ ! हे दर्शनीयौ ! हे वर्षितारौ ! सेक्तारौ ! युवानौ ! अस्माकं वाचं कर्मवतीं युवां कुरुतम् । तथा अस्माकं मनस इच्छामम्रस्वतीमेव कुरुतम् ।

मनसा वचसा च यज्ञं कुर्मस्तथा कुरुतमित्यर्थः। यतोऽहं युवाम् आह्वयामि किंनिमित्तम् ? अद्यूत्ये सन्मार्गागते अन्ने। अन्ननिमित्तम्। तदानार्थमित्यर्थः। द्यूतादागतं द्यूते भवं वा द्यूत्यम्, न द्यूत्यमद्यूत्यं तस्मिन्। द्यूतादागतं कर्मण्यं न भवतीत्येवमुच्यते। द्यूतमन्येषामप्यन्याय्यधनागमानामुपलक्षकम्। किञ्च वाजसातौ वाजानामन्नानां सातिः सम्भजनं यस्मिन् स वाजसातिः तस्मिन् यज्ञे अस्माकं वृद्धये भवतम्। अस्मे विभक्तेः शेआदेशः। कृतं करोतेः 'बहुलं छन्दसि' (पा० २।४।७३) इति शपि लुप्ते लोएमध्यमद्विवचने रूपम्। वृषणा वृषणौ 'वा सपूर्वस्य निगमे' (पा० ६।४।६) इत्युपधादीर्घाभावः। वृधे, वर्धनं वृत् सम्पदादित्वाद्भावे क्विप्। Mah

RV.1 112.25 = VV.34 30.

अहोभिः करणभूतैः। अक्तुभिः अक्तू रात्रिः रात्रिभिश्च करणभूताभिः। अधिकरणविवक्षा वा। काले हि द्युषु रात्रिषु वा। परि सर्वतः पातं पालयतं युवाम्। अस्मान्। न केवलं द्युभिरक्तुभिः परिपातम्, किं तर्हि ? अनुपहिंसितैः। हे अश्विनौ ! सौभगेभिः, भग इति धननाम, शोभनैश्च धनैः। योजयतमित्यध्याहारः। तत्। अस्माकम्। मित्रः। वरुणश्च। पूजयन्ताम्। अदितिश्च, सिन्धुश्च पृथिवी च। अपि च। द्यौः। U

हे अश्विनौ ! दिवसैः। रात्रिभिः। सप्तम्यर्थे तृतीया। दिवसेषु रात्रिषु च अहोरात्रम्। अस्मान्। सर्वतो रक्षतम्। कैः ? सौभगैः, भग इति धननाम। शोभनैः धनैः। किम्भूतैः ? अनुपहिंसितैः, अखण्डितैर्धनैरस्मान् रक्षतमित्यर्थः। किञ्च मित्रः, वरुणः, अदितिः, समुद्रः, अपि च द्यौः, एते। अस्माकम्। तद् भवत्कृतं रक्षणं पूजयन्ताम्। अनुमन्यन्तामित्यर्थः। द्युरित्यह्नो नाम, अक्तुरिति रात्रेः। मामहन्ताम् 'मह पूजायाम्' 'बहुलं छन्दसि' (पा० २।४।७६) शपः श्लुः 'श्लौ' (पा० ६।१।१०) द्वित्वं 'तुजादीनां' दीर्घोऽभ्यासस्य' (पा० ६।१।७) इत्यभ्यासदीर्घः। Mah.

RV.1 114.1 = VV.16.48.

जगती। इमाः। स्तुतीः, याभिः स्तूयते ताः। रुद्राय। महते, बलवते वा। उभयत्र हि तवःशब्दः पठ्यते। जटामुकुटधारिणे। क्षयद्वीराय, क्षयन्ति वसन्ति अस्मिन् वीरा इति क्षयद्वीरः तस्मै क्षयद्वीराय। प्रेरयामः।

तथा वयं प्रेरयामः । येन प्रकारेण । शं सुखम् । असद् भवति । द्विपदां चतुष्पदाञ्च । यथा । सर्वम् । समृद्धम् । ग्रामे । अस्मिन् । आपद्रहितं स्वस्थम् । भवति । U.

कुत्सदृष्टा जगती । वयमिमा अस्मदीयाः । बुद्धीः । शङ्कराय । प्रहरामहे समर्पयामः । रुद्रं स्मराम इत्यर्थः । 'हृग्रहोर्भः' । कीदृशे ? महते बलवते वा । उभयत्र तवःशब्दः पठितः । जटिलाय । क्षयन्तो निवसन्तो वीराः शूराः यत्र स क्षयद्वीरः तस्मै । शूरायेत्यर्थः । क्षयन्तः नश्यन्तो वीरा रिपवो यस्मात् इति वा । पुत्रादये । गवादिपशवे । सप्तमी वा द्विपदचतुष्पद-विषये । येन प्रकारेण । शं सुखं भवति । अस्मिन् । वासस्थाने । सर्वं प्राणिजातम् । समृद्धम् । निरुपद्रवं स्वस्थञ्च । यथा असत् तथा मतिं हरे समर्पयाम इत्यर्थः । Mah.

RV.1 114.7 -YV.16 15.

मा वधीः । अस्माकम् । वृद्धं वयःप्रभृतिभिः । अपिच । मा वधीः । अस्माकम् । अल्पम् । मा वधीः । अस्माकम् । उक्षन्तम्, 'उक्ष सेचने' सिञ्चन्तं तरुणमिति यावत् । अपिच । मा वधीः । अस्माकम् । सिक्तं गर्भस्थमित्यर्थः । मा वधीः । अस्माकम् । पितरम् । आदरार्थं पुनर्वचनम् । महान्तमिति सिद्धत्वात् । मा वधीः । अपिच । मातरम् । रिषतिर्हिंसार्थः । मा हिंसीः । अस्माकम् । प्रियाणि । शरीराणि । पुत्रपौत्रलक्षणानि । हे रुद्र ! U.

हे रुद्र ! अस्माकम् । वृद्धं गुरुपितृव्यादिकम् । मा हिंसीः । उतापि । अस्माकम् । बालम् । मा वधीः । अस्माकम् । सिञ्चन्तं तरुणम् । मा वधीः । उतापि । अस्माकम् । सिक्तम्, गर्भस्थञ्च मा वधीः । जनकम् । मा वधीः । उतापि । अस्माकम् । जननीम् । मा वधीः । महान्तमित्यनेन सिद्धयोर्मातापित्रोः पुनरादानमादरार्थम् । अस्माकम् । वल्लभाः । तनूः शरीराणि । पुत्रपौत्ररूपाणि । मा हिंसीः । रिषतिर्हिंसाकर्मा । Mah

RV.1.114.8 – YV.16.16.

मा रोरिषः, रिषतिर्हिंसाकर्मा । मा हिंसीः । अस्माकम् । पुत्रविषये । मा हिंसीः । पौत्रविषये । मा हिंसीः । अस्माकम् । आयुषि विषयभूते । मा हिंसीः । अस्माकम् । गोषु विषयभूतासु । मा हिंसीः । अस्माकम् । अश्वेषु

विषयभूतेषु । यद्वा विभक्तिव्यत्ययेन व्याख्यानम् । मा रीरिषः अस्माकं तोकं, तनयम्, आयुः, गाः, अश्वानिति । मा वधीः अस्माकं वीरान् । हे रुद्र ! भामिनः । भाम क्रोधे । क्रोधसंयुक्तान् । कः प्रत्युपकार इति चेत् ? हविषा संयुक्ताः । सदाकालम् । इच्छब्द एवार्थे । त्वामेव । आह्वयामः । यागार्थम् । अनन्यशरणा वयमित्यर्थः । U.

हे रुद्र ! अस्माकम् । पुत्रे । पौत्रे । मा हिंसीः । नः । जीवने । मा हिंसीः । नः । धेनुषु मा रीरिषः । नः । तुरगेषु । मा रीरिषः । विभक्तिव्यत्ययो वा । तोकं तनयमायुर्गा अश्वान् मा हिंसीः । 'भाम क्रोधे' भामिनः क्रोधयुतानपि । अस्माकम् । भृत्यान् । मा वधीः । क उपकार इति चेत् ? हविर्युक्ताः सदैव । त्वाम् । वयम् । यागायाह्वयामः । त्वदेकशरणा वयमिति भावः । Mah.

RV 1 115 1 VV.7 42, 13 46.

द्वितीयं जुहोति । सौरी त्रिष्टुप् । सूपश्चात्र परापररूपेणावस्थितः स्तूयते । उदयकालादारभ्य तावदपररूपेण स्तूयते । चित्रमिति क्रियाविशेषणम् । यः । चित्रम् आश्चर्यभूतम् । उदगमत् । आश्चर्यं हि यः स्वकीयेन ज्योतिषा शार्वरं तमोऽपहत्यान्येषां ज्योतिषां ज्योतिरादायोद्गच्छति । यद्वा चित्रं चायनीयं पूजनीयमुदगमत् । देवानामनीकमित्यनयोः पदयोः सम्बन्धः । देवानां रश्मीनाम् । अनीकं मुखम् । यच्च । चक्षुः । मित्रादिकस्य सदेवमनुष्यस्य जगतः । आदित्योदये हि रूपाण्यभिव्यज्यन्ते । यच्च उदयसमनन्तरमेव । आ अप्राः । 'प्रा पूरणे' आपूरितवत् स्वकीयेन प्रकाशेन । द्यावापृथिव्यौ । अन्तरिक्षञ्च । अधस्तनानि विशेषणानि मण्डलाभिप्रायान्नपुंसकलिङ्गान्यनूद्य अथेदानीं पररूपेण स्तौति । सूर्यः । आत्मा । पुरुषाभिप्रायमेतत् । जङ्गमस्य स्थितिमतः स्थावरस्य चेत्यर्थः । तथा च श्रुतिः 'यमेत मादित्ये पुरुषं वेदयन्ते स इन्द्रः प्रजापतिस्तद् ब्रह्म' इति । सूर्याद्वैतमनेन मन्त्रेण ख्याप्यते स सूर्यात्मत्वेनोपास्यः । एवं तावदधियज्ञं गतोऽप्ययं मन्त्रोऽधिदैवमाचष्टे । अध्यात्मं तु वक्ष्यति । 'यो वासावादित्ये पुरुषः' इत्यादिना । U.

'चित्रं देवानामिति द्वितीयामिति' (का० १०।२।६) चतुर्गृहीतेन शालाद्वार्ये द्वितीयामाहुतिं जुहोति । सौरी त्रिष्टुप् कुत्सदृष्टा । परापररूपेण

स्थितः सूर्योऽत्र स्तूयते । सूर्यः । आश्चर्यं यथा तथा । उदयं प्राप्तः उद्गच्छति वा । लङर्थे लुङ् । उदयन्नेव स्वतेजसा नैशं तमो हन्ति अन्येषां ज्योतींषि आदत्त इत्याश्चर्यम् । किम्भूतः सूर्यः ? दीव्यन्ति द्योतन्ते इति देवाः किरणास्तेषाम् । मुखम् । आश्रय इत्यर्थः । यद्वानीकं समूहः । किरणपुञ्ज इत्यर्थः । तथा मित्रस्य, वरुणस्य, अग्नेः नेत्रवत्प्रकाशक इत्यर्थः । मित्रादय उपलक्षकाः सर्वस्य सदेवमनुष्यस्य विश्वस्य रूपाणि सूर्योदयेऽभिव्यज्यन्ते । अतो मित्रादीनां चक्षुः स सूर्य उद्गतः सन् दिवम् । भूमिम् । अन्तरिक्षञ्च । आपूरितवान् । आपूरयति वा स्वतेजसेति शेषः । एवमपररूपेण स्तुत्वा पररूपेण स्तौति । किम्भूतः सूर्यः ? जङ्गमस्य । स्थावरस्य च । जगत आत्मान्तर्यामी । 'यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद् ब्रह्म' इति श्रुतेः सूर्याद्वैतमनेनोच्यत इति भावः । तस्मै स्वाहा सुहुतमस्तु । Mah.

YV 13 46.

होमे व्याख्यातम् । U

चित्रं देवानामित्यर्धर्चशः स्रुग्वाहुती मध्यमे' (का० १७।५।१८) अर्धर्चद्वयेन पुरुषशिरस्याहुतिद्वयं जुहोतीत्यर्थः । व्याख्याता (अ० ७। क० ४२) । Mah

RV 1 115.4 YV 33 37

द्वे त्रिष्टुभौ । तदेव । सूर्यस्य । देवत्वम् । तच्च महाभाग्यम् । तत्किम् ? इत्यत आह—मध्या मध्ये इत्यर्थः । कर्तोः कर्मण इत्यर्थः । मध्ये यत्कर्मणां क्रियमाणानां देवासुरमनुष्यसम्बन्धिनाम् । विततम् । रश्मिजालम् अहर्लक्षणम् । सञ्जभार । अयमेव संहरति नान्य एतत्तनितुं शक्नोति न चोपसंहर्तुमित्यभिप्रायः । किञ्च यदा । प्रयुङ्क्ते आत्मनि । आत्ममंस्थान् करोति । हरितवर्णान् रश्मीन् । ते हि अस्तमनकाले लोहिततां यन्ति । सहस्थानाद् आहृत्य पृथिव्यादिलोकत्रयं तेषां सहस्थानम् । तत्र हि ते निपतन्ति । आद् अथानन्तरम् । रात्री । तमोमयं वासः । विस्तारयति । सर्वस्मै । जगति एकत्रादित्यसहितं ज्योतिरेकत्र तम आदित्यप्रभावात्प्रभ्रमतीत्यभिप्रायः । U

कुत्सदृष्टे द्वे त्रिष्टुभौ मरुत्वतीययोः पुरोरुचौ । सूर्यस्य तद् देवत्वं देवतानुभावः । तच्च महाभाग्यमैश्वर्यम् । तत् किम् ? कर्तोः 'ईश्वरे तोसुन्कसुनौ' (पा० ३।४।१३) करोतेस्तोसुन्प्रत्ययः । कार्यश्रेष्ठस्य जगद्रूपस्य । मध्ये ।

विस्तारितम् अंशुजालम् । संजहार संहरते । न ह्यन्य एतादृशमंशु-जालं प्रसारयितुं संहर्तुं वा शक्नोतीत्यर्थः । किञ्च । यदैव । हरितवर्णान् रश्मीन् । युङ्क्ते आत्मनि आरोपयति सह तिष्ठन्त्यंशवो यत्र तत्सधस्थं व्योममण्डलम् । 'सधमादस्थयोश्छन्दसि' (पा० ६।३।१६) इति सहस्य सधादेशः । सन्ध्याकाले पीतवर्णानंशून् यदा व्योममण्डलात् स्वस्मिन् योजयति । अनन्तरमेव निशा । सिमस्मै । वासः । तनुते । सर्वं वस्तु तमसाच्छादयतीत्यर्थः । सूर्यास्तादनन्तरं रात्रिसद्भावात् । सिमशब्दः सर्वपर्यायः । Mah

RV.1.115 5 YV.33.38

सूर्यः । तद्रूपं ज्योतिः । कुरुते । द्योर्लोकस्य । उत्सङ्गे । मित्रस्य । वरुणस्य । अदर्शनाय । मित्रो हि सुकृतिनो गृह्णाति, वरुणो दुष्कृतिनो गृह्णाति, एवमनेन प्रकारेण जगदनुगृह्णातीत्यभिप्रायः । किञ्च । अपर्यन्तं कालतः देशतश्च । अन्यद् एकम् । शुक्रं जरामरणादिभिर्वियुक्तम् । विज्ञानघनानन्दम् । अस्य सूर्यस्य पाजः । पाज इति बलनाम इह तु रूपमुच्यते । रूपमस्तीति शेषः । तच्चाद्वैतलक्षणम् । कृष्णं द्वैतलक्षणम् । अपरं रूपम् । हरिणा इन्द्रियवृत्तयः सम्भरन्ति निदानभूता भवन्ति । U.

सूर्यो द्युलोकस्य उत्सङ्गे मित्रस्य वरुणस्य च तद्रूपं कुरुते । येन रूपेण जनान् अभिचष्टे पश्यति । मित्ररूपेण सुकृतिनोऽनुगृह्णाति वरुणरूपेण दुष्कृतिनो निगृह्णातीत्यर्थः । अस्य सूर्यस्य । अन्यद् एकम् । रूपम् । कालतो देशतश्चापरिच्छेद्यम् । शुक्रं दीप्यमानं विज्ञानघनानन्दं ब्रह्मैव । अन्यत् । कृष्णं द्वैतलक्षणं रूपम् । दिश इन्द्रियवृत्तयो वा धारयन्ति । इन्द्रियग्राह्यं द्वैतरूपमेकम् । एकं शुद्धं चैतन्यमद्वैतमिति द्वे रूपे सूर्यस्य, सगुणनिर्गुणं ब्रह्म सूर्य एवेत्यर्थः । पाज इति बलनाम इह रूपमुच्यते । रोचत इति रुशत् । औणादिकेऽतिप्रत्यये चकारस्य[1] शकारो गुणाभावश्च निपात्यते । यद्वा 'रुश् हिंसायाम्' रुच्यर्थे वर्तमानादस्माल्लटः शतरि रुशदिति रूपम् । Mah.

---

[1] The reading in Pansikar's edition of Mahīdhara's commentary on the YV. is 'पौणादिकेऽतिप्रत्यये चकारो रस्य शकारो गुणाभावश्च निपात्यते'। पौणादिके is evidently wrong. चकारो रस्य should be चकारस्य.

RV.1.115.6=YV.33.42.

त्रिष्टुप्। अस्मिन्नहनि। हे देवाः! रश्मयः उदयकाले सूर्यस्य। निरंहसः पिपृत निष्पिपृत निर्मुञ्चत अंहसः पापात्सकाशात्[1].....विपरीतात् निरवद्यात् निष्पिपृत च निर्मुञ्चत च अवद्याद् अवदनीयात्। येन दुर्यशो भवति तदवद्यम्। तदेतदुच्यमानम्। अस्माकम्। मित्रावरुणः पूजयतु। अदितिः सिन्धुः नदी, पृथिवी उतापि च द्यौः। U.

कुत्सदृष्टा त्रिष्टुप्। दक्षादित्यग्रहश्रयणे विनियोगः। दीव्यन्ति दीप्यन्ते इति देवाः रश्मयः हे देवाः! अस्मान् अंहसः पापात् निःपिपृत निर्मुञ्चत। अवद्याद् दुर्यशसोऽपि निःपिपृत पृथक् कुरुत। अस्माकं पापानि दुर्यशांसि च नाशयतेत्यर्थः। क्व? अद्यास्मिन् दिने। सूर्यस्य उदिता उदिते उदये अद्य सूर्योदयेऽस्मान् शुद्धान् कुरुतेत्यर्थः। अद्येत्यत्र 'द्व्यचोऽतस्तिङः' 'निपातस्य च' (पा० ६।३।१३५,१३६) इति दीर्घः। 'अन्येषामपि दृश्यते' (पा० ६।३।१३७) इति दीर्घः पिपृतेत्यत्र। किञ्च मित्रादयः तद् असद्वचनं पूजयन्तु। अङ्गीकुर्वन्त्वित्यर्थः। के? मित्रः, वरुणः, अदितिः देवमाता, सिन्धुः समुद्रो नदी वा, पृथिवी उतापिच द्यौः स्वर्गः। Mah.

---

[1] The omitted passage contains doubtful reading.

APPENDIX III

Extracts from the commentary of Dyā Dvivedā on such stanzas of the first *maṇḍala* of the *Ṛgveda* as are quoted and explained by him in his *Nitimañjarī*.

अत्र मधुच्छन्दा अग्ने प्राधान्य दर्शयन् गायत्रेण छन्दसा अग्नि तुष्टाव। 'अग्निमीळे' मधुच्छन्दा अग्निर्गायत्री। 'यस्य वाक्य स ऋषि'[1]। 'ऋषिर्दर्शनात्'इति **यास्कः** (नि०२ ११)। तेन वाक्येन या देवनोच्यते सा देवता[2]। 'यत्काम ऋषिर्यस्या देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवत स मन्त्रो भवति'इति (नि० ७ १)। 'देवो दानात्'इति **यास्कः** (नि० ७ १५)। 'यदक्षरपरिमाण तच्छन्द'[3]। 'छन्दामि छादनात्'इति **यास्कः** (नि० ७ १२)।

तथा**नुक्रमणी**। 'अग्नि नव मधुच्छन्दा वैश्वामित्र'[4] इति। 'मण्डलादिष्वाग्नेयमैन्द्रान्'[5] इति। अग्निर्देवता। 'आदौ गायत्र प्राग्धिरण्यस्तूपात्'इति गायत्रीछन्द। 'अष्टाक्षरास्त्रय पादाश्चतुर्विंशत्यक्षरा गायत्री'[6] इति लक्षणम्। तर्हि पादे पादेऽवसानं कुतो न भवति। उच्यते। **शौनकेन** ऋग्लक्षणे 'द्वाभ्यामवस्येत्पिपदामु पूर्वं पादेन पश्चात्'[7], इत्युक्तत्वात्।

अथ विनियोग। प्रातरनुवाके आग्नेये क्रतौ। 'आग्नेयं गायत्र क्रतुम्'[8]। 'उपप्रयन्तो अध्वरम्'[9]। 'अग्निमीळे पुरोहितम्'[10]इति सूत्रम्। तथा अग्निष्टुति—"अग्निमीळे पुरोहित-मित्युन्नीयमानेभ्य" इति[11]। उपाकर्मणि होमे चाथ ह स्माह **कौषीतकिः**। अग्निमीळे पुरोहित-मित्येकेतिगृह्ये(?)। **शौनकेनोक्तमुग्विधाने**— आग्नेय मुक्तमाद्य तु मुख्य ब्रह्मर्षिसम्मितम्[12]।

तथा ऋष्यादिज्ञाने फल सामगानाम्। ऋषीणा विषयेज्ञा य(?)शरीरादिति। देवताफल **बृहद्देवतायाम्** (१ २)—

वेदितव्य दैवत हि मन्त्रे मन्त्रे प्रयत्नत ।
दैवतज्ञो हि मन्त्राणा तदर्थमवगच्छति ॥ इति।
छन्दसा चैव सायुज्य छन्दोज्ञानादवाप्नुयात्॥ इति।

छन्दोज्ञाने फलम्। अज्ञाने प्रत्यवाय। 'अनेवविदो यातयामानि छन्दासि भवन्ति'[13] **इत्यनुक्रमणीकारोक्तेः**।

---

[1] **का० स० द्वा० का०** २ ४. p.1. [2] **या तेनोच्यते सा देवता। का० स० द्वा० का०** २. ५. p.1. [3] **का० स० द्वा० का०** २. ६. p.1. [4] **का० स०** १. १ १. p.5. [5] **का० स० द्वा० का०** १२ १२ p.5. [6] **का० स० द्वा० का०** १२. १४. p.5. [7] RPR. 16.16. [8] **ऋ० प्रा०** १८ ४६. [9] **शां० औ० सू०** ६. ३. ११. [10] **शां० औ० सू०** ६. ४. १. [11] **शां० औ० सू०** ६. ४. १. [12] **शां० औ० सू०** १४. ५२.१. [13] Ṛgvidh, I.13.5. [14] **का० स० द्वा० का०** १. p.1.

'अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु स.' ॥ इति। वे० दी० १।२।

प्राग्यजुषामार्षं इति आर्षी गायत्री—एव चतुर्भिश्चतुर्भिर्वर्धमाना आर्ष्युष्णिहादय·। तत्र प्रथमेऽनुवाके त्रीणि सूक्तानि। 'अग्निमीळे त्रिसूक्तस्तु सुरूपेन्द्रचतु सूक्तौ' इत्यनुवाकानुक्रमणी[1] ॥ तत्र ऋक्—

ऋ० १.१.१.

अस्या ऋचोऽर्थ.—अहमग्नि देवमीळे स्तौमि, याचामि। 'ईळिरध्येषणाकर्मा'इति यास्कः (नि०७ १५.)। यद्यप्यस्मच्छब्दोऽप्रयुक्तस्तथापि'अस्मद्युत्तम.' इत्युत्तमपुरुषप्रयोगाज्ज्ञेय। 'उत्तमपुरुषयोगाद् अहमिति चैतेन सर्वनाम्ना[2]'इति यास्केन स्पष्टमुक्तम्। ईडे, स्तुत्यर्थो धातु। डकारस्य ळत्व वैदिकलक्षणे—शौनकेनोक्तम् 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकार' इति (ऋ० प्रा० १ ५२)। अनयो स्वरयोर्मध्यत्वाद् ळत्वम्। ईडच इत्यमः यत्वान्न। कीदृशमग्निम्? पुरोहित देवाना पौरोहित्ये वर्तमानम्। यथा राज्ञ पुरोहितो राज्ञोऽभीष्ट साधयति तथा अग्निरपि देवानामभीष्ट होम साधयति। पुन किम्भूतम्? यज्ञस्य देव दीपक द्योतक वा। अग्नि विना यज्ञो न द्योतते। अतो यज्ञस्य देवम्। पुन कीदृशम्? होतारम् ऋत्विज देवाना यज्ञेषु होतृनामक ऋत्विगग्निरेव। तथा श्रूयते—'अग्निर्वै देवाना होता'इति (तै० स० २.५ ६ ५)

तथा निगमा —अग्निर्होता नो अध्वरे (ऋ० ४ १५ १)।
अग्निर्होता पुरोहित (ऋ० ३ ११ १)।
अग्निमें दैवो होता (शा० श्रौ० सू० ५.१ ६)

तथा ब्राह्मणे प्रतर्दनप्रश्ने कौषीतकिप्रकथने 'सर्वं तदग्निर्वै होताऽनुल्बणम्'[3] इत्यादिभिरग्नेरेव होतृत्व प्रसिद्धम्। पुन किम्भूतम्? रत्नधातमम्—रमणीयाना धनाना धारयितार दातृतममिति वा।

अथ सर्वाणि पदानि यास्केन व्याख्यातानि तदाह—'अग्नि कस्मात्? अग्रणीर्भवत्यग्र यज्ञेषु प्रणीयते'[4]। 'ईळिरध्येषणाकर्मा पूजाकर्मा वा'[5]। 'पुरोहित पुर एन दधति'[6]इति। 'यज्ञ कस्मात्? प्रख्यात यजति'[7]इति। 'देवो दानाद्वा'[8]इति। 'ऋत्विक् कस्मात्? ईरण, ऋग्यष्टा भवति'[9]इति। 'होतार ह्वातार रत्नधातम रमणीयाना धनाना दातृतमम्'[10]इति च।

नन्वग्ने: पुरोहितत्वम् आर्त्विज्य रत्नदातृत्व च कथ सम्भवति? अविग्रहत्वात्। कर्माणि तु विग्रहवतां सम्भवन्ति। उच्यते। देवता विग्रहवत्यविग्रहवती च यास्केनोक्ता (Cf. नि० ७ ६,७)। विग्रहवतीपक्षे सर्वं सम्भवति पुरुषाङ्गवद्यथेन्द्रस्तुति —

ऋष्वात इन्द्र स्थविरस्य बाहू (ऋ० ६ ४७ ८),
इतीन्द्रस्य बाहुमत्त्व यष्टिमत्त्व च सञ्जातम्, इन्द्रस्य पुरुषद्रव्यवत्स्तुति.।
आ द्वाभ्या हरिभ्या० (ऋ० २ १८. ४),
कल्याणीर्जाया सुरण गृहे ते० (ऋ० ३ ५३ ६),

---

[1] Anu. १५ [2] N. 7.2. reads उत्तमपुरुषयोगाः [3] शां० ब्रा० २६.५. reads देवो for वै। [4] N. 7.14. [5] N.7.15. [6] N.2.12. [7] N.3.19. The Nirukta reads यजतिकर्मेति नैरुक्ताः। [8] N.7.15. [9] N.3.19. [10] N.7.15. * Pa.1.4.107.

इतीन्द्रस्याश्वजायावस्वं सञ्जातम् ।

अद्धीन्द्र पिब च (ऋ० १०. ११६. ७) इत्यदनं पानं च,

आशृत्कर्ण (ऋ० १. १०. ६) इति श्रोत्रवत्त्वम् ॥

एवमग्नेर्विग्रहवत. पुरोहितत्वादि युक्तम् । तत्राग्निमित्यत्र 'स्वरानुस्वारोपहितो द्वित्यच्यते[1] सयोगादि.' इति गकारस्य द्वित्वम् । 'स्पर्शायमाननुनासिकान् स्वरान् परेषु स्पर्शेष्वनुनासिकेषु[2]' इति नासिक्यान्नासिक्येति नकारस्य द्वित्वम् । रत्नधातमम् । तथोक्तं च—अनन्त्यश्च भवेत्पूर्वो ह्यन्त्यश्चेत्परतो यदि । तत्र मध्ये यमस्तिष्ठेदिति यमस्थान सम्यगुक्तम् । ईळ इत्येतस्मिन् 'तिङ्ङतिङः' (पा० ८ १ २८) इत्यनेन सर्वानुदात्ते परे अग्निशब्देन द्वितीयान्तेनान्तोदात्तेन सन्धौ क्रियमाणे "उदात्तपूर्व नियत विवृत्या व्यञ्जनेन वा" (ऋ० प्रा० ३ १७) इति स्वरितत्वम्—ळे इत्यस्य प्रचयत्व स्वरितादनुदात्तानामित्येकारस्योदात्तश्रुति· । 'अग्निमीळेऽग्नि याचामि' इति निरुक्तं (नि० ७ १५) द्रष्टव्यम् ।

ऋ० १ १. ६.

मधुच्छन्दा गायत्र्याऽग्निं तुष्टाव । अङ्गेत्यभिमुखीकरणे । अङ्ग हे अग्ने ! त्व दाशुषे हवि प्रदात्रे यजमानाय यद्भद्र वित्तगृहप्रजापशुरूप कल्याण करिष्यसि तत्तवेत् तवैव सुखहेतु । हे अङ्गिर ! 'अङ्गारेष्वङ्गिर.'[3] (नि० ३ १७) इति यास्कोक्तेरङ्गिर शब्दोऽग्निपर्याय । हे अग्ने ! एतच्च सत्यम् । नात्रत्र विसवादोऽस्ति । अत यजमानस्य वित्तादिसम्पत्तौ सत्याम् उत्तरत्र ऋत्वनुष्ठानेऽनेरेव सुख भवति । भद्रशब्दार्थ शाटायनिनः समामनन्ति । "यद्वै पुरुषस्य वित्त तद्भद्र प्रजा भद्र पशवो भद्रम्[4]" इति । करिष्यसीति 'तिङ्ङतिङ.' (पा० ८ १ २८.) इत्यनुदात्तत्वे प्राप्ते यच्छब्दान्निघाताभाव ।

ऋ० १ १ ६.

पूर्ववत् सर्वम् । हे अग्ने ! स त्व न अस्मभ्यम् अस्मदर्थं सूपायन शोभनमुपायन यस्य स शोभनधनादिप्राप्तियुक्तो भव । क इव ? पिता सूनवे इव । यथा पिता पुत्राय सूपायनो भवति तद्वत्, न अस्माक स्वस्तये अविनाशाय सचस्व सेवस्व । 'सिषक्तु सचत इति सेवमानस्य' (नि० ३ २१) । 'सेवस्व न स्वस्तये' इति यास्कः (नि० ३ २१)। 'त्व तमग्ने' (ऋ० १ ३१ ७) इति निगमान्तरम् । अथ यत्स्वैरग्निभिर्यजमान सस्थापयन्तीति यजमानस्याग्ने सकाशादमृतत्वमुक्तम् । अग्ने इत्यामन्त्रितत्वेन सर्वानुदात्तत्वे प्राप्ते पादादित्वान्न (Cf. पा० ८ १ १६) । स न इति "एतत्तदो" (पा० ६ १ १३२) इति सुलोप· । सूनवेऽग्ने इति पादादित्वात्"एकीभवति पादादिरकार." (ऋ० प्रा० २ ३४) इत्येकीभाव । सचस्वा न. स्वस्तय (ऋ० प्रा०८ १४.) इति स्वस्तये ग्रहणाद्दीर्घ· ।

ऋ० १. ४. ६.

इत्यनयर्चा वसु धनमयाचन । मधुच्छन्दा गायत्र्या इन्द्रं स्तौति । षष्ठेऽहनि ब्राह्मणाच्छसिनोऽनुरूपस्य तृतीया सूत्रिता । 'सुरूपकृत्नुमिति (ऋ० १ ४ १) स्तोत्रियानुरूपौ'[5] इति ।

---

[1]RPR. 6.1. [2]RPR.(6.29) reads **'स्पर्शा यमाननुनासिकाः स्वान् परेषु स्पर्शेष्वनुनासिकेषु'** [3]N. reads **अङ्गिराः** [4]B. Ghosh, *Fragments of Lost Brāhmaṇās*, p 1. [5]शां० श्रौ० सू० १२.४.१५

अयमर्थः—हे दस्म ! शत्रूणामुपक्षपयितः ! इन्द्र ! दसु उपक्षये। त्वत्प्रसादाद् अरिरुत—अरयोऽपि वचनव्यत्ययः। उतशब्दोऽप्यर्थे। अप्येक इति चेत्। नः अस्मान् सुभगान् शोभनधनोपेतान् वोचेयुः उच्यासुः। भग इति धननाम (निघण्टु २ १०.)। यद्यप्यरयोऽप्येव वदन्ति तर्हि कृष्टय अस्मिन् मित्रभूता मनुष्याः। कृष्टय इति मनुष्यनाम (निघण्टु २. ३)। अस्मान् ऋद्धान् इति वदन्ति तत्र किं वक्तव्यम् ? ततो धनसम्पन्ना वयम् इन्द्रस्य शर्मणि इन्द्रप्रसादलब्धे सुखे स्याम भवेम। धन सर्वोऽपि याचते परन्त्वयमत्यन्त विलपति। तस्मात्सीदन्निन्द्र इति सिद्धम्। न इति 'युष्मदस्मदो षष्ठी' (पा० ८ १ २०) इति निघात। वोचेयु स्यामेति पादादित्वान्निघाताभाव.। 'तिङ्ङतिङ' (पा० ८ १ २८) इति सूत्रस्य प्राप्तिर्न। दस्मेत्यामन्त्रितत्वान्निघात (Cf. पा० ८ १ १९)। सुभगाँ अरि—'नकार आकारोपध०' (ऋ० प्रा० ४ ६५) इति नलोपे कृते, 'नकारस्य लोपरेफोष्मभावे०' (ऋ० प्रा० ४ ८०) इत्युपधानुनासिकत्वम्।

ऋ० १. १०. २.

इन्धनार्थमृषिः कश्चिन्निर्जगाम वनाद् बहि ।
पर्वतभ्रमण कुर्वन् सानोर्वै सानुमारुहत् ॥१॥
अचेतीदर्थमिन्द्रस्त सोमार्थ भ्रमति ह्ययम् ।
इति सञ्चिन्त्य सुत्रामा देवयूथेन चाचलत् ॥२॥
मधुच्छन्दा इन्द्रो गायत्री महदुक्थे तृच विनियुक्तम् ।
इन्द्र वृत्राय हन्तवे (ऋ० ३ ३७ ५)
गायन्ति त्वा गायत्रिण (ऋ० १ १० १) ॥

ऋचोऽयमर्थ—यद् यदा सानो सानुमारुहद् यजमान समिदाद्याहरणाय एकस्मात् पर्वतशिखराद् अपर पर्वतशिखरम् आरूढवान् तदा इन्द्र अय भूरि महत् प्रभूत वा कर्त्वं ज्योतिष्टोमादिक कर्म कर्तु करिष्यतीत्यस्पष्ट स्पृष्टवान् उपक्रान्तवान्। तत्तदानीमिन्द्रोऽर्थं प्रयोजनम् एतदेव चेतति—अचेतीत्। ज्ञात्वा च यूथेन देवयूथेन सह वृष्णि कामाना वर्षिता सन् एजति चकम्पे। एजृ कम्पने। स्वस्ववाहनादियुक्तो यज्ञभूमिमागन्तु चलचित्तोऽभूदित्यर्थ। एवमर्थित्व प्राप्य इन्द्रेणापि धैर्यं त्यक्तमिति तात्पर्यार्थ। आरुहत्—'निपातैर्यद्यदिहन्त' (पा० ८ १ ३०) इति निघाताभाव। चेतति—'तिङ्ङतिङ.' (पा० ८ १ २८) इति निघात। एजतीति तद्वत्।

ऋ० १. ११. ५.

मधुच्छन्दा गायत्र्येन्द्र नुष्टाव। स्वरसाम्नि निष्केवल्ये विनियुक्तम्। 'इन्द्र विश्वा अवीवृधन् (ऋ० १. ११ १) इत्यानुष्टभ निष्केवल्यम्[1] इत्युक्तम्।

अयमर्थ—पुरा वलनामक कश्चिदसुर [2]परनिन्दापवादनिरतो[2] देवसम्बन्धिनीर्गा अपहृत्य कस्मिंश्चित्पर्वतबिले गोपितवान्। तदानीमिन्द्रस्तद् बिलं स्वसैन्येन समावृत्य बृहस्पतिना सह तस्माद् बिलान्निःसारयामास। 'इन्द्रो वलस्य बिलमपौर्णोत्' (तै स २ १ ५ १.) इति ब्राह्मणे प्रसिद्धम्। अद्रिरस्यास्तीत्यद्रिवः। हे वज्रयुक्त ! इन्द्र ! त्व वलस्य वलनामकस्यासुरस्य सम्बन्धि गोभतः गोभिर्युक्तस्य पर्वतस्य बिलम् अपाव स्वसैन्यमुखेनापावृतवानसि। तदानी देवास्त्वामाविषु

---

[1] Cf. शां० श्रौ० सू० १८. १८. १, ३. [2] सायणभाष्ये विशेषणमिदं नास्ति।

त्वां प्राप्तवन्तः । तुज्यमानासः बलेन हिंस्यमानाः । तुजिर्हिंसार्थः । पुनः कीदृशाः ? अविभ्युषः त्वया रक्षिता बलादभीता. । तथेन्द्रेषु बार्हस्पत्येषु निगमा ।

इन्द्रो यदभिनद्बलम् (ऋ० ८. १४. ७),
इन्द्रो बल रक्षितारम् (ऋ० १०. ६७. ६),
यो गा उदाजत् (ऋ० २. १२. ३) इत्येवमादयः ।

अव. 'वरवराव.' (ऋ० प्रा० १ ९९) इति रेफ । अमुना प्रकारेण निन्दावादाद्बलो हत इति ॥

ऋ० १. १८. १

कक्षीवत उशिक्पुत्रत्व वदाम । अङ्गराज कस्मिंश्चिद्दिवसे स्वकीयाभिर्योषिद्भि सह गङ्गाया जलक्रीडा चक्रे । तस्मिन्दिवसे दीर्घतमा नाम ऋषि स्वभार्यापुत्रभृत्यादिभिश्च दुर्बलत्वात् किमपि कुर्वन्न ? (कर्तुं न) शक्नोतीति द्वेषेण गङ्गामध्ये प्रचिक्षिपे । स च ऋषि केनचित्प्लवेन अङ्गराजस्य क्रीडादेश प्रति समाजगाम । स च राजा सर्वज्ञ तमृषिमवगम्य प्लवादवतार्यैवमवोचत् । हे भगवन् ! मम पुत्रो नास्तीति । एषा महिषी । अस्या कञ्चित्पुत्रमुत्पादयेति । स तथेत्यब्रवीत् । सा महिषी राजान प्रति तथेत्युक्त्वा अय वृद्धतर , जुगुप्सितो मम योग्यो न भवतीति बुद्ध्या स्वकीयाम् उशिक्सञ्ज्ञिका दासी प्राहैषीत् । तेन सर्वज्ञेन ऋषिणा मन्त्रपूतेन वारिणा अभ्युक्षिता सती सैव ऋषिपत्नी बभूव । तस्यामुत्पन्न कक्षीवान् नाम ऋषि स एव राज्ञ पुत्रोऽभूत् ।

तथा च बृहद्देवता (४ २१—२५)—
जीर्ण तु दीर्घतमस खिन्नास्तत्परिचारका [1]
दासा बद्ध्वा नदीतोये दृष्टिहीनमवादधु ॥२१॥
तत्रैकस्त्वेतनो नाम शस्त्रेणैनमपाहनत् ।
शिरश्चामावुरश्चैव स्वयमेव न्यकृन्तत ॥२२॥
हत्वा दीर्घतमास्त तु पापेन महता वृतम् ।
[2]अङ्गराजसमीपे तु न नद्य समुदक्षिपन् ॥२३॥
आत्माङ्गान्यनुदच्चैव तत्रोदोन्मोहितो भृशम् ॥
अङ्गराजगृहे दासीमुशिज पुत्रकाम्यया ॥२४॥
[3]राज्ञा च प्रहिता ज्ञात्वा शुद्धा कृत्वारमन्मुनि ।
सा च कक्षीवत जज्ञे ॥२५॥ इति कथा ।

इति कक्षीवत उशिक्पुत्रत्वमुक्तम् । मेधातिथिर्ब्रह्मणस्पतिं गायत्र्या स्तौति । 'सोमानमिति पञ्च ब्राह्मणस्पत्या'[4] इत्यनुक्रमणी ।

---

[1] Bṛhaddevatā reads **परिचारिणः** ।

[2] Bṛhaddevatā reads this verse after **आत्माङ्गान्यनुदच्चैवेत्यादि**

[3] **एवमयं श्लोको बृहद्देवतायां दृश्यते :—**
राज्ञा च प्रहितां दासीं भक्तां मत्वा महातपाः ।
जनयामास चोत्थाय कक्षीवत्प्रमुखानृषीन् ॥२५॥

[4] **का० स० १ मण्डल १८.** p. 6.

अयमर्थः—हे ब्रह्मणस्पते! एतन्नामक! देव! सोमानं सोमानामभिषवस्य कर्तारम् अनुष्ठातार स्वरणं देवेषु प्रकाशनवन्तं कृणुहि कुरु। कमिव? औशिजः उशिक्पुत्र. कक्षीवान् सोमाभिषवकर्ता तमिव। लुप्तोपमानमेतत्। कक्षीवतोऽनुष्ठातृषु मुनिप्रसिद्धि·।

कक्षीवते वृचयामिन्द्र सुन्वते० (ऋ० १.५१.१३) कक्षीवन्त स्तोतार (ऋ० १.११२.११) अहं कक्षीवाँ ऋषिः (ऋ०४.२६.१) इत्यादि।

कक्षीवानुशिक्पुत्रोपि यदि सोमसुत् ज्यायान्। य. कुलीनोऽपि यदि सुन्वान स द्विजपरिवृढो ज्ञेय इत्युक्तमृग्दृष्टान्तेन। "सोमाना सोतार प्रकाशनवन्त कुरु ब्रह्मणस्पते! कक्षीवन्तमिव य औशिज। कक्षीवान् कक्ष्यावान्। औशिज उशिज पुत्र। उशिग्वष्टे कान्तिकर्मण.। अपि त्वयं मनुष्यकक्ष एवाभिप्रेत स्यात्त सोमाना सोतार मा प्रकाशनवन्त कुरु ब्रह्मणस्पते" इति यास्कः (नि० ६.१०)।

ब्रह्मणस्पते-'पतिशब्दे द्व्यक्षरे०' (ऋ० प्रा० ४.४२) इत्युपाचरितसन्धि। 'सुबामन्त्रिते .' (पा० २.१.२) इति पराङ्गवद्भावात् पदद्वयस्य निघात।

ऋ० १.२०.४.

मेधातिथि ऋभून् गायत्र्या स्तौति। द्वितीये छन्दोमे वैश्वदेवे विनियुक्त तृचम्। 'मही द्यौ (ऋ० १.२२.१३) युवाना पितरा (ऋ०१.२०.४) इति तृची[1]'इति।

ऋभव एतन्नामका देवा। पितरौ स्वकीयौ मातापितरौ। पूर्वं वृद्धावपि युवाना पुन तरुणौ अक्रन कृतवन्त। कीदृशा? सत्यमन्त्रा। सत्या यथार्था मन्त्रा येषा ते तथोक्ता तस्माज्जीर्णयो पित्रोर्यूवत्व सम्पादयितु समर्था। पुन कीदृशा? ऋजूयव ऋजुत्वमात्मन इच्छन्ति तथोक्ता। छलरहिता इत्यर्थ। पुन कीदृशा? विष्टी विष्टयो व्याप्तियुक्ता। विष्लृ व्याप्तौ। युवाना पितरेति—'सुपा सुलुक्' (पा० ७.१.३९) इत्यादिना द्विवचनस्याकार। पुन—'वारपुन पुन' (ऋ० प्रा० १.१०३) इति रेफ। ऋजूयव 'पृशनाजिरर्जु०'इति (ऋ० प्रा० ९.१६) यकारपरत्वाद्दीर्घ। तथा निगमा—जिन्वी यत्मन्ता पितरा (ऋ ४.३६.३)

पुनर्ये चक्रु पितरा (ऋ० ४.३३.३),
तक्षन्पितृभ्यामृभवो (ऋ० १.१११.१) इत्येवमादय।

ऋ० १.२०.६.

तत्र बृहद्देवता—(३.८३–९०)—
सुधन्वन आङ्गिरसस्यासन् पुत्रास्त्रय. पुरा।
ऋभुर्विभ्वा च वाजश्च शिष्यास्त्वष्टुश्च तेऽभवन् ॥८३॥
शिक्षयामास तास्त्वष्टा त्वाष्ट्र यत्कर्म किञ्चन।
परिनिष्ठितकर्माणो विश्वे देवा उपाह्वयन् ॥८४॥
विश्वेषा ते ततश्चक्रुर्वाहनान्यायुधानि तु।
धेनुं सबर्दुघा चक्रुरमृत सबरुच्यते ॥८५॥
बृहस्पतेरथाश्विभ्यां रथ दिव्य त्रिबन्धुरम्।
इन्द्राय च हरी देवप्रहितेनाग्निनापि यत् ॥८६॥

---

[1] शां० औ० सू० १०.१०.७.

एकं चमसमित्युक्ते[1] ज्येष्ठ आहेत्यथो[2] दिवि ।
उक्त्वा ततक्षुश्चमसान् यथोक्त तेन हर्षिता[3] ॥८७॥
त्वष्टा च सविता चैव देवदेव. प्रजापति. ।
सर्वान् देवान् समामन्त्र्य अमृतत्व ददुश्च ते ॥८८॥
तेषामाद्यान्त्ययोर्नाम्ना दृश्यते बहुवत्स्तव ।
तृतीयसवने तेषा तैस्तु भाग प्रकल्पित ॥८९॥
अपिबत्सोममिन्द्रश्च तैस्तत्र सवने सह ।
तेषा स्तुतिरिद सूक्त त्वयमित्यष्टक[4] परम् ॥९०॥ इति ।

वेदभाष्येऽपि—ऋभवो नाम सुधन्वन आङ्गिरसस्य[5] त्रय पुत्रा ऋभुविभ्वा वाज इति। ते च मनुष्या सन्त. (सुकर्मणा) देवत्व प्राप्य कदाचित्कर्मकाले सोमपानाय प्रवृत्ता । तान्प्रति देवै प्रेरितोऽग्नि परस्पर समानरूपान्दृष्ट्वा स्वयमपि तदाकार देह धृत्वा तेषु मध्ये स्वयमपि चतुर्थ सन् पातु प्रवृत्त । ते च ऋभव आगत त समानरूपमवलोक्य विवेक्तुमसमर्था परस्परमेव सन्देह[6] कृत्वा ज्येष्ठ आहेत्युक्त (ऋ० १ १६१ १–५) सवाद कृत्वा त्वष्ट्रा निर्मितम् एक चमस चतुर्धा कृत्वा त सोममग्निना सह पपु , इति (ऋ० १ १६१ १) ।

ऋष्यादि पूर्ववत् । अयमर्थ —उतापि च त्वष्टुरेतन्नामकस्य देवस्य सम्बन्धलक्षण-व्यापार , त्य त नव नूतन चमस सोमधारणक्षम काष्ठपात्रविशेष निष्कृत नि शेषेण सम्पादितम् अकरोद् इति शेष । लक्षणव्यापारकुशलस्य तस्य त्वष्टु शिष्या ऋभव , तेन निर्मितम् एक चमस सन्त पुनरपि चतुर कर्ता ज्येष्ठ आहेत्युक्त सवाद कृत्वा चतुर्धा विभक्तान् चमसान् कृतवन्त ।

तत्र **निरुक्तम्**—'ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रय पुत्रा बभूवु । तेषा प्रथमोत्तमाभ्या बहुवन्निगमा भवन्ति न मध्यमेन । तदेतदृभोश्च बहुवचनेन चमसस्य च सस्तवेन बहूनि दाशतयीषु सूक्तानि भवन्ति' (नि० ११ १६) इति ।

तथा निगमा —एक चमस चतुरस्कृणोतन (ऋ० १ १६१ २),
यदा वाख्यच्चमसाञ्चतुर कृतान् (ऋ० १ १६१ ४),
एक वि चक्र चमस चतुर्वयम् (ऋ० ४ ३६ ४),
व्यकृणोत चमस चतुर्धा (ऋ० ४ ३५ ३) ।

ऋ० १. २४. १

इम षष्ठमनुवाक यूपे बद्ध. शुन शेपो बन्धमोक्षार्थं ददर्श । तस्य 'कस्येति' प्रथम सूक्त वारुण त्रैष्टुभ पञ्चदशर्चम् । आदौ काय्याग्नेय्यौ । तत्रानुक्रमणी—'कस्य पञ्चोनाजीगर्ति शुन.शेप. स कृत्रिमो वैश्वामित्रो देवरातो वारुण तु त्रैष्टुभमादौ काय्याग्नेय्यौ सावित्रस्तृचो गायत्रोऽस्यान्त्या भागी वा'[7] इति । **ऋग्विधानोक्तविनियोग**—'शुन शेपमृषि बद्ध स निरुद्धोऽथवा जपेत्' इति (१. १७ ६.)। तथा सूत्रम्—'शुन.शेप प्रथमम् । यथा शुन:शेप आजीगर्तिर्यूपे नियुक्तो

---

[1] ऋ० १.१६१ २ [2] ऋ० ४.३३.५ [3] ऋ० १.२०. [4] सायणभाष्ये 'आङ्गिरसस्य' नास्ति । [5] सायणभाष्ये 'सन्विहते' इति पाठः, अत्रैव आख्यानसमाप्तिः । [6] का० स० १ मण्डल २४ सूत्र, p.6.

मुमुचे। प्रथमे च सूक्ते निगदेत्'[1] इति। शुन शेप पित्रा यूपे बद्ध इत्यर्थे कथा 'हरिश्चन्द्रो ह वैधस.' (ऐ० ब्रा० ३३ १) इत्यध्यायार्थोक्ता—अनुक्रमणीभाष्यकारेणोक्ता[2]—

तत्रेतिहास श्रुत्युक्त सम्यगेव प्रवर्ण्यते ।
हरिश्चन्द्रो ह वैधस इत्यादिब्राह्मणेऽग्नि ।
राजसूये क्रतावेष शौन शेप इति श्रुत ॥१॥
शतभार्यो हरिश्चन्द्र ऐक्ष्वाक पुत्रकाम्यया ।
नारदोक्ताद्धि पुत्रार्थे वरुणान् सुतमाप्तवान् ॥२॥
जाते पुत्रे ह्यनेन त्वा यक्ष्येऽहमिति चोक्तवान् ।
वरुणस्तनये जाते निर्दशे जातदन्तके ॥३॥
च्युतदन्ते पुनर्जातदन्ते वर्मचरे[3] तथा ।
मेध्यस्थे तदवस्थोऽसाविति राजा प्रतारित ॥४॥
निर्बध्य स नृप प्रोचे पुत्रेणाद्यैव मा यज ।
इत्युक्तो वरुणेनोचे स्वपुत्र रोहित नृप ॥५॥
एन यक्ष्ये त्वयाद्येति नेति सोऽभ्यद्रवद्वनम् ।
वनस्थो रोहित श्रुत्वा नृप जातमहोदरम् ॥६॥
दिदृक्षु पञ्चवर्षेषु विप्ररूपेन्द्रवारित ।
षष्ठेऽजीगर्तनामान त्रिपुत्र बाधित क्षुधा ॥७॥
आसाद्यास्य शुन शेप मध्यम जगृहे सुतम् ।
गत्वा शतेन पित्रे पुरस्य दृष्टवान् सुत ॥८॥
मया कार्यमनेन त्व कुरु तातेति चाब्रवीत् ।
वरुणोपि नृपेणाक्त शुन शेपपशु क्रतुम् ॥९॥
राजसूय सोऽनुमेने तेनायष्ट च भूमिप ।
तदाभिषेचनीयेऽह्नि शुन शेपनियोजने ॥१०॥
अन्याभावाद् गोशतार्थी त्वजीगर्तो युयोज तम् ।
पुनर्विशसन कर्तु पिता जग्राह गोशतम् ॥११॥
यूपे बद्ध शुन शेपो जिवासु पितर तत ।
दृष्ट्वा चाहाहमेवान्या उपधावामि देवता ॥१२॥
अस्तौत्कर्मादावग्नि च सवितार भग तथा ।
वरुण पुनरप्यग्नि विश्वान्देवानथो स्वनु ॥१३॥
इन्द्र च पूर्वव्यापारमसम्प्राप्तस्तुतिमुप्रियम् ।
हिरण्मयरथस्यापि स्वस्मै दातारमेव च ॥१४॥
अश्विना उषस चापि तृचाभ्यामन्तनस्तदा ।
अतिप्रीतियुतैर्देवैस्तैर्यूपान्मोचितस्तदा ॥१५॥

---

[1] शां० श्रौ० सू० १६. ११. १–३. [2] वेदार्थदीपिका A.A. Macdonell's edition, p. 84. [3] वर्महरे is suggested for वर्मचरे

ऋत्विग्गणै. प्रार्थितोऽसावञ्ज सवमकारयत् ।
गतरोगो हरिश्चन्द्रो 'यत्र ग्रावेति सूक्तत ॥१६॥
अज्ज सवो राजसूये प्रयोग पश्विष्टिदिव्यादिविहीन एक ।
यतोऽञ्जसाभिष्टुवतेऽत्र साम्ना यच्चाञ्जसा देवतास्त लभन्ते ॥१७॥
स पित्रा प्रार्थितस्त्यक्त्वा तात गाधिसुत गत. ।
पुत्रत्वेन गृहीतश्च विश्वामित्रेण धीमता ॥१८॥
देवरात इति प्रोक्तो देवैर्दत्तो यत स्वयम् ।
दत्तपुत्रविधेर्योगाद्विश्वामित्र स कृत्रिम ॥१९॥
आर्षानुक्रमेण चोक्त कस्य नून शुन शेप ।
आजीगर्ति. कृत्रिमस्तु वैश्वामित्रो देवरात ॥२०॥
इति कृत्रिमपुत्रत्व देवरातत्वमेव च ।
अजीगर्तसुतत्व च वैश्वामित्रत्वमेव च ॥२१॥
शुन शेपमहर्पेस्तु सम्यगत्र प्रवर्णितम् ।
बन्धक्षयकरी पाशमोचनीया कथेरिता ॥२२॥

राजसूयेऽभिषेचनीयेऽहनि एषोऽनुवाक आख्यातव्य । तथाहाश्वलायनसूत्रे 'सम्थिते मरुत्वतीये दक्षिणत आहवनीयस्य (आ० श्रौ० सू० उत्तरषट्के ३ ३ ६)। 'हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञ शौन शेपमाचक्षीत' इति ब्राह्मणम्[1]। 'एवैतच्छौन शेपमाख्यान न हास्मिन्नल्प च नैन पारिशिष्यते' इति (ऐ० ब्रा० ३३ ६) । शुन शेपो यूपे बद्ध प्रजापतिं त्रिष्टुभा स्तौति । तथाऽम्नातम्--'स प्रजापतिमेव प्रथमम्' इति (ऐ० ब्रा० ३३ ४) ।

अयमर्थ -वय शुन शेपनामका अमृतानां देवानां मध्ये कतमस्य किञ्जातीयस्य देवस्य चारु मनोहर नाम मनामहे उच्चारयाम [2] को देव न अस्मान् मुमूर्षून् महे महत्यै अदितये पृथिव्यै पुनर्दाद् दद्यात् [3] 'अदिति इळा' इति तन्नामसु पाठात् (निघण्टु १ १)। तेन दानेनाहममृत सन् पितर मातर च दृशेय पश्येयम् । मनामहे इति पादादित्वान्निघाताभाव.। दृशेयमिति मातर चेत्यत्र 'च'शब्दाद् दृशेयमित्यनुपज्यते अतस्तदपेक्षया एषा तिङ्विभक्ति प्रथमा 'चवायोगे प्रथमा' (पा० ८ १ ५६) इति न निहन्यते । पुनर्दादिति 'वारंपुन पुनर्' (ऋ० प्रा० १ १०३) इति रेफ ।

ऋ० १. ३०. १६.

देवेन्द्र परमैश्वर्यसम्पूर्णोऽपि शुन शेपेन 'यच्चिद्धि,' (ऋ० १ २५, १ २८ ५) 'सत्ये च'[4] इति सूक्ताभ्या यत्नेन स्तुत स ईप्सित सौवर्ण सुवर्णमय रथ तस्मै शुन शेपाय ददौ दत्तवान् । तथा सर्वोपि स्तुतिप्रियो भवतीत्यर्थ । शुन इव शेपो यस्येति समासे 'शेफपुच्छलाङ्गूलेषु शुन सज्ञायाम्' (पा० वा० ६ ३ २१) इति षष्ठया अलुक् ।

तथा बृहद्देवता (३ १०३)—
स्तूयमान शश्वदिति प्रीतस्तु मनसा ददौ ।
शुन:शेपाय दिव्य तु रथ सर्व हिरण्मयम् ॥१०३॥

---

[1] ऋ० १. २८. [2] Cf. तवेतत्. . शौन:शेपमाख्यानम्—तद्धोता राज्ञेऽभिषिक्तायाचष्टे, हिरण्यकशिपावासीन आचष्टे । AB. 33.6. [3] Cf. RV. I.29., BD. ३. १०२.

तत्प्रकार. यूपे बद्ध' शुन शेप कस्येत्यनुवाकेन क्रमेण एकया प्रजापतिम् एकयाग्नि तृचेन सवितारम् एकत्रिंशता वरुण पुनर्द्वात्रिंशत्या अग्निम् एकया विश्वान् देवान् द्वात्रिंशत्येन्द्र च स्तुत्वा त्रयोविंशत्या 'शश्वदिन्द्र' इत्यनया तुष्टाव इन्द्रश्च सौवर्ण रथ प्रादादित्युच्यते ।

शुन शेप इन्द्र त्रिष्टुभा स्तौति । इन्द्र शश्वन्निरन्तरम् एव धनानि वैरिसम्बन्धीनि जिगाय जितवान् । कै ? अश्वैरिति शेष । कीदृशै ? पोप्रुथद्भि घासभक्षणानन्तरभाविनम् ओष्ठशब्द कुर्वद्भि । पुन कीदृशै ? नानदद्भि नादम् आस्यगत हेषादिशब्द कुर्वद्भि । पुन कीदृशै ? शाश्वसद्भि पुन पुनर्भृश वा श्वसद्भि । सनिता दाता । षणु दाने । स इन्द्र न अस्माक सनये सभजनार्थं हिरण्यरथ सुवर्णेन निर्मित रथमदात् दत्तवान् । किलक्षण ? दसना-वान् कर्मवान् । स नोऽदादिति 'अदादवर्त्रो०' (ऋ० प्रा० २ ४०) इत्यभिनिहितसन्धि । स नो द्विरुक्तिरादरार्था । 'अभ्यासे भूयाममर्थं मन्यन्ते' इति यास्कः (नि० १० ४२) ।

ऋ० १ ३२ ११

हिरण्यस्तूप इन्द्र स्तौति त्रिष्टुभा । 'अथापि स्तुतिरेव भवति नाशीर्वाद —इन्द्रस्य नु वीर्याणि प्र वोचम्' (नि० ७ ३) इति यास्केन स्तुतिस्क्ता । ज्योतिष्टोमे निष्केवल्ये विनियुक्त महाव्रते च । 'इन्द्रस्य नु वीर्याणीति (ऋ० १ ३२) रथन्तरपृष्ठे'[1] इति सूत्रितम् ।

अयमर्थ -दास विश्वोपक्षयहेतु वृत्र पति स्वामी यासा ता । दसु उपक्षये । अहि-गोपा अहिर्गोपा वृत्रो रक्षको यासा ता । गोपन नाम यथा स्वच्छन्देन न प्रविशन्ति तथा निरो-धनम् । एवविधा आप निरुद्धा अतिष्ठन् स्थिता । केनेव ? पणिना गाव इव । यथा पणिना असुरेण पूर्व गा अपहृत्य बिले स्थापयित्वा बिलद्वार निरुद्ध तथाऽनेनापा द्वार निरुद्धमित्यर्थ । यद् यदा अपा यद् बिल प्रवहणद्वारम् अपिहित वृत्रेण निरुद्धम् आसीत् तदा इन्द्र वृत्र विश्वशत्रु जघन्वान् । हत्वा अपववार अपवृतमकरोत् । वृत्रकृतमपा निरोध परिहृतवान् ।

'विवृद्धचा शरीरस्य स्रोतासि निवार्याऽन्धकार । तस्मिन्हते प्रसस्यन्दिर आप ' (नि० २ १६) इति । 'दासपत्नीर्दासाधिपत्न्य ' इति यास्क (नि० २ १७) । जघन्वाँ—'नकार आकारोपध०' (ऋ० प्रा० ४ ६५) इति नलोप । इन्द्रस्य वृत्रवधो बहुधा प्रपञ्चित —

अहन्वृत्र वृत्रतर (ऋ० १ ३२ ५),
वृत्र जघानाशन्येव वृक्षम् (ऋ० २ १४ २),
जघान वृत्र स्वधितिर्वनेव (ऋ० १० ८९ ७) इत्येवमादय ।

ऋ० १ ३३ ५.

हिरण्यस्तूपस्त्रिष्टुभा इन्द्र स्तौति । आभिप्लविके पञ्चमे विनियुक्तम् । 'एतायामोप गव्यन्त इन्द्रमिति (ऋ० १ ३३) निष्केवल्यम्[2] इति ।

हे हरिव ! हरिनामकाश्वयुक्तेन्द्र ! हे स्थात ! स्थितियुक्त ! युद्धे पलायनरहित ! उग्र ! शौर्ययुक्त ! यद् यदा दिवोऽन्तरिक्षाद् रोदस्यो द्यावापृथिव्यो सकाशाच्च अव्रतान् व्रतमिति ज्योतिष्टोमादिक कर्म तद्रहितान् नि प्राधम नि शेषेण धमन वध कृतवान् असि । 'धमति'इति वधकर्मा (निघण्टु २ १९) । तदानी ते अयज्वान स्वय यागरहिता प्रत्युत यज्वभि सह

---

[1] शां० श्रौ० सू० ७.२०.८. [2] Cf. शां० श्रौ० सू० ११.८.५. अत्र सूत्रे 'उप गव्यन्त इन्द्रम्' इत्येतावानंशो नोपलभ्यते ।

यागानुष्ठानकर्तृभिः सह स्पर्धमानाः शीर्षा शीर्षाणि स्वकीयानि शिरांसि परावव्रजुः तत्यजुः । वृजी वर्जने । 'असयोगाल्लिट् कित्' (पा० १ २. ५) इति किस्वाद् गुणाभावः । त्वया हता सन्त शीर्षाणि त्यक्त्वा मृता इत्यर्थः । अतो यज्वनो निन्दा न कुर्यादिति प्रसिद्धम् । शीर्षा—बहुवचनस्य डादेशः (Cf. पा० ७ १ ३९) । ववृजुस्ते इति विसर्जनीयस्य षत्वे प्राप्ते 'त्वा त इत्यनुदात्तयोः' (ऋ० प्रा० ५ ३२) इत्यनुदात्तत्वाभावान्न । स्थात 'स्थातर्जरितर्' (ऋ० प्रा० १ १०१) इति रेफः ।

ऋ० १ ३५. ९.

अत्राख्यानम्—देवकर्तृकत्वे यागे सविता ब्रह्मत्वेनावस्थित । तदानीं कस्याञ्चिद्दिष्टौ अध्वर्यव तस्मै सवित्रे ब्रह्मणे प्राशित्रेण कर्मपुरोडाशभाग दत्तवन्त । तच्च प्राशित्र हस्ते सवित्रा अमन्त्रेण गृहीत सत् तदीय पाणि प्रचिच्छेद । तत प्राशित्रस्य दातारोऽध्वर्यव सुवर्णमय पाणि निर्माय प्रक्षिप्तवन्त । तद्भागाय दत्तवन्त । तस्याक्षिणी निर्जघान । ईक्षणाभावाद्भगोऽन्धोऽभूत् । तत्पूष्णे दत्तवन्त । तस्य दन्तलग्नाद् दन्तान्पुरोडाश आप । तस्मादाहुरदन्तक पूषेति । तत्र कौषीतकिब्राह्मणम्—'अथ यत्र ह तद्देवा यज्ञमतन्वत तत्सवित्र प्राशित्र परिजह्रुस्तस्य पाणी प्रचिच्छेद तस्मै हिरण्मयौ प्रतिदधुस्तस्माद्धिरण्यपाणिरिति स्तुत[1]' इति । यथाह यास्कः—अन्धो भग इत्याहुरनुत्सृप्त[2]' इति (नि० १२ १४) 'अदन्तक पूषेति[3] च ब्राह्मणमिनि' (नि० ६ ३१) । अतो देवैः शुभाशुभानि कर्माणि भक्तानीति दर्शितम् ।

हिरण्यस्तूप सवितार जगत्या तुष्टाव । अयमर्थः—हिरण्यपाणि सुवर्णमयहस्त । यद्वा यजमानेभ्यो दातृ हिरण्य हस्ते धृतवान् । सविता सर्वस्य प्रसविता देव । विचर्षणि विविधदर्शनयुक्त । 'विश्वचर्षणिः' (निघण्टु ३ ११) इति नामसु पाठात् सविता देव पश्यतीत्यर्थः । उभे द्यावापृथिवी अन्त उभयोर्लोकयोर्मध्ये ईयते गच्छति । अमीवा रोगादिबाधाम् अपबाधते सम्यङ् निराकरोति । तथा वेति सूर्य सूर्य गच्छति । वी गतौ । यद्यपि सवितृसूर्ययोरेकदेवतात्व तथापि मूर्तिभेदेन गन्तृगन्तव्यभाव । कृष्णेन तमस कर्षकेण निवर्तकेन रजसा । 'ज्योतीं रज उच्यते' (नि० ४ १९) । द्यामाकाशम् अभ्यृणोति । ऋणु गतौ । तनादित्वादु । सर्वतो व्याप्नोति । द्यौश्च पृथिवी च द्यावापृथिवी । 'दिवसश्च पृथिव्याम्' (पा० ६ ३ ३०) इति चशब्दाद् द्यावादेश । द्यावापृथिवी अन्त—'षष्ठादयश्च द्विवचोऽन्तभाज०' (ऋ० प्रा० १. ७१) इति प्रकृतिभाव । 'अन्तोदात्तमन्त' इति (ऋ० प्रा० १ ७८) अन्त शब्दादिप्रिति । एव सवितुर्भाग्यवत्त्व सिद्धम् ।

ऋ० १. ४५. ३.

तृतीयेऽह्नि आज्ये विनियुक्तम् । 'त्वमग्ने वसूनिति (ऋ० १ ४५) समूहळे'[4] इति सूत्रे । प्रस्कण्वोऽनुष्टुभाग्नि तुष्टाव । हे महिव्रत ! प्रभूतकर्मन् ! हे जातवेद ! अग्ने ! प्रस्कण्वस्य कण्वपुत्रस्य मम हवम् आह्वान श्रुधि शृणु । 'श्रुशृणुपृकृवृभ्य०' (पा० ६ ४ १०२) इति हेर्धि ।

---

[1] A fragment of कौ० ब्रा० 6. 13.

[2] Nirukta reads अन्धो भग इत्याहुरनुत्सृप्तो न दृश्यते ।
प्राशित्रमस्याक्षिणी निर्जघान । इति च ब्राह्मणम् ।

[3] कौ० ब्रा० ६.१३. [4] शां० श्रौ० सू० १०. ४. ३.

तत्र चत्वारो दृष्टान्ता । प्रियमेधात्रिविरूपाङ्गिरोनामका ब्रह्मपुत्रा एतेषामाह्वान यथा शृणोषि । तद्वन्मम शृणु इत्यन्वय. । 'प्रियमेध , प्रिया अस्य मेधा' इति **यास्कः** (नि० ३ १७) । श्रुधी हव–"षष्ठ चाष्टाक्षरे०" (ऋ० प्रा० ८ ३६) इति दीर्घ ।

ऋ० १.५१.१.

सव्यो जगत्या इन्द्र तुष्टाव । प्रथमे होतु पर्याये विनियुक्तम् । अभि त्य मेषमिति (ऋ० १ ५१) जागतम्[1] इति सूत्रम् । ऋचोऽयमर्थ —त्य त प्रसिद्धम् इन्द्रम् । त्यच्छन्दश्छन्दसि तदर्थ । उद्वहन्ति तमिनिवत् । हे ऋत्विज ! गीभि स्तुतिभि मदत हर्ष प्रापयत । मदी हर्षे । कीदृशम्-मेषम् ? मेधातिथेर्मेषम् । कण्वपुत्र मेधातिथिम् ऋषिम् इन्द्र आगत्य एवमवोचत् मह्य देहीति सोमम् । त्व मेषरूप यदि करोषि तर्हि सोम दद्यामिति । ततो मेषरूपमास्थाय इन्द्रस्तदीय सोम पपौ । स ऋषिस्त मेष इत्यवोचत् । अत इदानीमपि मेष इन्द्रोऽभिधीयते । 'मेधातिथेर्मेष ' इति[2] सुब्रह्मण्यायाम् । 'मेधातिथि हि काण्वायनि मेषो भूत्वा जहार'[3] इति मेषत्व बहुभि प्रतिपादितम् । पुन कीदृशम् ? पुरुहूत बहुभिर्यजमानैराहूतम् । पुन कीदृशम् ? ऋग्मियम् । ऋग्भिर्मीयते शब्द्यत इति ऋग्मी । 'ऋचिऋधानुभ्रुवा० (पा० ६ ४ ७७) इनीयङ् । पुन कीदृशम् ? वस्वो ऋणवम् । तस्वो धनस्य ऋणव वासभूतम् । यस्य इन्द्रस्य कर्माणि मानुषा मनुष्याणा हितानि भुजे भोगाय विचरन्ति विशेषेण प्रवर्तन्ते । तत्र दृष्टान्त । द्यावो न । अय न उपमार्थीय । 'उपमार्थीय उपरिष्टादुपचारस्तस्य'इति **यास्क.** (नि० १ ४), अश्व न त्वेतिवत् । यथा द्याव सूर्यस्य रश्मय सर्वेषा हितकरा भवन्ति । त महिष्ठम् अतिशयेन महिता महिष्ठस्तम् । 'तुश्छन्दसि इति (पा० ५ ३ ५९) इष्ठन् प्रत्यय । विप्र मेधाविनम् । 'विप्रो विप्र ' (निघण्टु ३ १५) इति तन्नाम । अर्चत पूजयत हे ऋत्विज ! अर्च पूजायाम् । मदत—'दधिम मदत०' (ऋ० प्रा० ८ १५) इति दीर्घ ।

ऋ० १.५१.१३

इन्द्र वृचया पुत्रीम् आत्मजा सोमाकाङ्क्षया सुन्वते सोमाभिषव कुर्वते कक्षीवते ऋषये वृचयाख्यामर्भाम् अल्पाम् । दभ्रमर्भकमित्यल्पमर्थेति **यास्क.** (निघण्टु ३ २) । युवति-मित्यर्थ । एवविधा पुत्रीमददा अदा । तथा । सुक्रतो ! सुकर्मन् ! सुप्रज्ञ ! वा । 'क्रतु ' कर्मनामसु पठित (निघण्टु २ १), प्रज्ञानामसु वा (निघण्टु ३ ९) । त्व वृषणश्वस्य राज्ञो मेनाऽभव । मेना नाम कन्याऽभू । तथा **शाट्यायनिभि** सुब्रह्मण्याया मन्त्रैकदेशे ब्राह्मणमेवमाम्नायते 'वृषणश्वस्य मेने[4]' इति । 'वृषणश्वस्य मेना भूत्वा मघवा कुलमुवासेति ता च प्राप्तयौवना स्वयमेवेन्द्रश्चकमे'[5] इति । 'वृषणश्वस्य मेना दुहिताऽऽस तामिन्द्रश्चकम' इति **ताण्ड्ये**[6] स्पष्टमुक्तम् । अत उक्तानि कर्माणि ते त्वदीयानि तानि विश्वेत् सर्वाण्येव सवनेषु यज्ञेषु प्रवाच्या प्रकर्षेण वक्तव्यानि । स्तुतिभिर्वक्तव्यानीत्यर्थ ।

---

[1] शां० श्रौ० सू० ९.७.४. [2] ŚVB.I.I [3] ŚVB I.I. reads **मेधातिथि ह काण्वायनर्ष्टिमेषो भूत्वा जहार ।** [4] श० ब्रा० ३.३.४.१८; तै० ब्रा० १.१२.३; B. Ghosh, op.cit. p.6. [5] Quotation is untraced in the Tāndya. Cf. ŚVB.I.I. **'वृषणश्वस्य मेन इति, वृषणश्वस्य ह मेनस्य मेनका नाम दुहिताऽऽस ताꣳ हेन्द्रश्चकमे' इति ।**

ऋ० १. ५३. १.

सव्यो जगत्या इन्द्र तुष्टाव। ब्राह्मणाच्छंसिन प्रथमे पर्याये विनियुक्तम्। 'वयमु त्वा तदिदर्था' इति खण्डे 'न्यू षु वाचमिति जागतम्'इति सूत्रितम् (शा० श्रौ० सू० ९ ९ ४)।

प्रथम सव्यस्य इन्द्रतुल्यत्व प्रतिपाद्यते। अङ्गिरा इन्द्रतुल्य पुत्रमात्मन कामयमानो देवता उपासाञ्चक्रे। तस्य सव्याख्य इन्द्ररूप स्वय जज्ञे, जगति मत्तुल्यो मा भूदिति बुद्धया। तथा चानुक्रमणी—'अङ्गिरा इन्द्रतुल्य पुत्रमिच्छन्नभ्यध्यायत्[1]''इति। अयमर्थ—महे महते इन्द्राय सुवाच शोभना स्तुति नि प्रभरामहे नितरा प्रयुञ्ज्महे। यत विवस्वत परिचरतो यजमानस्य सदने यज्ञगृहे इन्द्राय गिर स्तुतय क्रियन्त इति शेष। हि यस्मात्स इन्द्र नृचित् क्षिप्रमेव पुराण नव च। रत्न रमणीय धनम् असुराणामविदत् विन्दति। तत्र दृष्टान्त। सम-तामिव यथा स्वपता पुरुषाणा चौर धन लभते तद्वत्। अतोऽस्मभ्य धन दातु शक्त इति भाव। द्रविणोदेषु धनदातृषु पुरुषेषु दुष्टुतिरसमीचीना स्तुति न शस्यते नाभिधीयते। अत सुवाच प्रभरामहे। न्यू षु इति। 'उकार्योश्च प्रश्लेषे' क्षैप्राविक्षैप्रसन्धित्वात् (ऋ० प्रा० ३ १३) स्वरित कृत्वा जात्याऽभिनिहत (ऋ० प्रा० ३ ३४) इति कम्प। उकारो यजस्य सुधा इति उकारस्य दीर्घ 'स्वरद्वक्षरण इति (ऋ० प्रा० ४ ५) पत्वम्। नृचिदिति अशादित्वात्पादादौ दीर्घ (Cf ऋ० प्रा० ७ ३३)। नचिदिति निपात पुराणनवयोर्नूनेति च इति यास्क. (नि ४ १७)। न दुष्टुति—अन्यपूर्वे इति पत्वम् (ऋ० प्रा० ४ २१)।

ऋ० १ ५४. ६

सव्यो जगत्या इन्द्र तुष्टाव। अच्छावाकस्य प्रथमे पर्याय विनियुक्तम्। 'इन्द्राय मद्वन इति खण्डे 'मा नो अस्मिन्निति (ऋ० १ ५४ १) जागतम् इति सूत्रम् (शा० श्रौ० सू० ९ १० १)।

अयमर्थ—हे इन्द्र! त्व नर्य नरहित त्व तुर्वश, यदु, वय्यकुलज तुर्वीतिम् आविथ ररक्षिथ। तथा नर्यादीना चतुर्णा राजा रथम् एतशम् अश्वम एतत्व एतश इत्यश्वनाम (निघण्टु १ १४)। कृत्व्ये कर्तव्य इति वर्णविकार पृषोदरादित्वात (Cf. पा० ६ ३ १०९)। घने सङ्ग्रामे आविथ। हे शतक्रतो! बहुकर्मन! तथा शम्बरस्य नवति नवोत्तरनवति नव पुरो नवति चेति उक्तसख्याका पुर पुराणि दम्भय हिंसितवान्। दम्भोति इति वधकर्मस पाठात् (निघण्टु २ १९)। एतेषा सर्वदेवस्तुतौ फलमुक्तम्—

अग्निना तुर्वश यदु (ऋ० १ ३६ १८) इत्यग्निस्तुतौ।

याभि कुत्स श्रुतर्य० (ऋ० १ ११२ ९)

याभि कुत्समार्जनेय० (ऋ० १ ११२ २२) इत्यश्विना स्तुतौ तुर्वीतिरक्षणमुक्तम्।

प्रमन्थ स्थाग्नि श्राणा भून् (ऋ० ८ ७९ २) इति सोमस्तुतौ बन्धश्रोणरक्षणमुक्तम्। सर्वैर्देवैरत्र निर्मला पालिना इति, देवा रक्षन्तीत्युक्तम्।

ऋ० १. ६१. १५

नोधाग्विष्टुभा इन्द्र तुष्टाव। उत्तमे छन्दोमे निष्केवल्ये विनियुक्तम्। 'अष्टाचत्वा-रिंशत् इति खण्डे सूत्रितम्—'आ सत्यो यातु० (ऋ० ४ १६) अस्मा इदु' (ऋ० १ ६१) इति (शा० श्रौ० सू० १० ११ ७)। अथोनरार्द्धचस्येतिहास—स्वश्वो नाम कश्चिद्राजा। स

---

[1] का० स० १ म० ५१ pp.7,8.

च पुत्रकाम सूर्यमुपासाञ्चक्रे। तस्य स सूर्य पुत्ररूपी स्वयमेव तत्रोत्पन्न सन् एतशेन महर्षिणा सार्द्ध युद्ध चकार। तदानी स ऋषि युद्धे जयार्थमिन्द्र तुष्टाव। स इन्द्रस्तेन स्तूयमान शश्वत् पुत्रस्य सूर्यसम्बन्धिन सङ्ग्राम एनम् एतशम् अपालयदिति।

अयमर्थ.—य इन्द्र एक एव सन् भूरेर्बहुविधस्य धनस्येशान स्वामी एषा स्तोतृणा सम्बन्धि यत् स्तोत्र वन्ने ययाचे। वनु याचने। इत्येतन् प्रसिद्ध स्तोत्रमस्मै इन्द्राय अस्माभिरनुदायि अकारीत्यर्थ। 'बहुल छन्दस्यमाङ्०' (पा० ६ ४ ७५) इति अडभाव। अर्यमिन्द्र सूर्ये पस्पृधान स्पर्धायमान सुष्वि सोमानामभिपोतारम्। पुत्र अभिगवे। किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनाद् इति वार्तिकेन किन् (Cf. पा० ३ २ १७१ वा०)। एतशम् ऋषि प्रावत् प्रारक्षत्। कीदृशे सूर्य? सौवश्व्ये स्वश्वपुत्रे। सुष्विम्—'युष्मान्तस्थादन्तमूलीयपूर्वे' (ऋ० प्रा० ५ २०) इति दन्तमूलीयपूर्वत्वात्पत्वम्॥

तत्रेतिहास—सरमा नाम देवशुनी। पणिभिर्गोष्वपहृतासु तद्गवेषणाय ता सरमाम् इन्द्र प्राहैषीत्। यथा लोके व्याधो वनान्तर्गतमृगान्वेषणाय श्वान विसृजति तद्वत्। सा सरमा एवमवाचत्। हे इन्द्र! अस्मदीयाय शिशवे तद्गवा सम्बन्धि यदि क्षीरादिद्रव्य प्रयच्छसि तर्हि गमिष्यामीति। स तथेत्यब्रवीत्। तथा शाट्यायने—'अन्नादा ते प्रजा करोमीति यदि नो गा अन्वविन्द इति। ततो गत्वा गवा स्थानमज्ञासीत्। ज्ञात्वा च तस्मै निवेदयति। अथ निवेदितासु गोषु तानसुरान्हत्वा गा स इन्द्रोऽलभत इति—

तदर्थमृक् १ ६२. ३.

किमिच्छन्तीति सूक्ते (ऋ० १० १०८) प्रोक्त सरमासम्बन्धीतिहासो **बृहद्देवतायामेव** वर्णितोऽस्ति—

बृहद्देवता (८. २४–३६)—

असुरा पणयो नाम रसापारनिवासिन।
गास्तेऽपजह्रुरिन्द्रस्य न्यगूहश्च प्रयत्नत ॥२४॥

बृहस्पतिस्तथाऽपश्यद् दृष्ट्वेन्द्राय शशस च।
प्राहिणोत्तत्र दूत्येऽथ सरमा पाकशासन ॥२५॥

किमित्यत्रायुजाभिस्ता पप्रच्छु पणयोऽसुरा।
कुत कस्यासि कल्याणि! कि वा कार्यमिहास्ति ते? ॥२६॥

अथाब्रवीत्तान्सरमा दूत्येन्द्री विचराम्यहम्।
युष्मान्व्रज चान्विष्यन्ती गाश्चैवेन्द्रस्य पृच्छत ॥२७॥

विदित्वेन्द्रस्य दूती तामसुरा पापचेतस।
ऊचुर्मा सरमे! गास्त्वमिहास्माक स्वसा भव ॥२८॥

विभजामो गवा भाग माहिता हि तत पुन।
सूक्तस्यास्यान्त्यया चर्चा युग्माभिस्त्वेव सर्वश ॥२९॥

---

[1] Cf. B. Ghosh, op. cit. pp. 12-13.

साऽब्रवीन्नाहमिच्छामि स्वसृत्व वा धनानि वा ।
पिबेयं तु पयस्तासा गवा यास्ता निगूहथ ॥३०॥

असुरास्ता तथेत्युक्त्वा तदाजह्रु. पयस्तत ।
सा स्वभावाच्च लौल्याच्च पीत्वा तत्पय आसुरम् ॥३१॥

पर मवनन हृद्य बलपुष्टिकर तत ।
शतयोजनविस्तारामतरत्ता रसा पुन ॥३२॥

यस्या पारे परे तेषा पुरमासीत्सुदुर्जयम् ।
पप्रच्छेन्द्रश्च सरमा कच्चिद् गा दृष्टवत्यसि ? ॥३३॥

सा नेति प्रत्युवाचेन्द्र प्रभावादसुरस्य तु ।
ता जघान पदा क्रुद्ध उद्गिरन्ती पयस्तत ॥३४॥

जगाम मा भयोद्विग्ना पुनरेव पणीन्प्रति ।
पदानुसारिपद्धत्या रथेन हरिवाहन ॥३५॥

गत्वा जघान च पणोन् गाश्च ता पुनराहरत् ॥ इति ।

नोधा इन्द्र तुष्टाव । वाचस्तोमे विनियोग ।

ऋचोऽयमर्थ —इन्द्रस्याङ्गिरसाम् ऋषीणा च इष्टौ प्रेषणे सति सरमा देवशुनी तनयाय स्वपुत्राय । 'तोक तनय' (निघण्टु २.२) अपत्यनामसु पाठात् । धामिम् 'अन्न क्षुद् धामि (निघण्टु २ ७) अन्ननामसु पाठात् । विदत् अविन्दत् । विद्लृ लाभे—लृदित्त्वाल्लुङि अड् (Cf. पा० ३ १ ५५) 'बहुल छन्दस्यमाङ्०' (पा० ६ ४.७५) इत्यडभाव । बृहस्पति तया गासु निवेदितासु अद्रि पर्वत भिनत् अभिन्दत्—भित्त्वा गा विदन् अविन्दत् । ततो नरो नेतारो देवा उस्रियाभि । 'उस्रिया'इति गोनामेति यास्क (निघण्टु २ ११.) । आभि सम सह वावशन्त भृश हर्षशब्दमकुर्वन् । वाशृ शब्दे । बृहस्पति—'तद्बृहतो०' (पा० वा० ६ १ १५७.) इति सुट् । 'उभे वनस्पत्यादिषु युगपत्' (पा० ६ २ १४०) इति प्रकृतिस्वरत्वम् ।

ऋ० १ ८४. १३

तत्रेतिहास —आथर्वणस्य दधीचो जीवतो दर्शनेनासुरा परिबभूवु । अथ तस्मिन्नन्तर्गते असुरै परिपूर्णा पृथिव्यभवत् । अथेन्द्रस्तैरसुरै सह योद्धुमशक्नुवन्तमृषिमन्विच्छन् स्वर्गं गत इति शुश्राव । अथ तत्रत्यान् पप्रच्छ नेह किमस्य किञ्चित्परिशिष्टमङ्गमस्तीति । तस्मै अब्रवीद् अस्त्येतदश्व शीर्ष—येन शिरसा अश्विभ्या मधुविद्या प्राब्रवीत् । तन्तु न विदमो यत्राभवदिति । पुनरिन्द्रोऽब्रवीत् तदन्विच्छतेति । तद्वान्वैषिषु तच्छर्यणावत्यनुविद्याजह्रु । शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्धे सर स्यन्दते तस्य शिरसोऽस्थिभिरिन्द्रोऽसुराञ्जघानेति- ममर्थमनयोनरया च ऋचाऽऽह । गोतमो गायत्र्येन्द्र स्तौति । षोडश्या विनियोग । 'षोडशिन' इति खण्डे 'इन्द्रो दधीच०' (शा० श्रौ० सू० ९ ६ ११) इति सूत्रितम् ।

अस्या ऋचोऽयमर्थ —अस्थभि । 'छन्दस्यपि दृश्यते' (पा० ७ १.७६) इत्यनजादावप्यस्थिशब्दस्यानङादेश: । स चोदात्त । दधीचोऽश्वशिरस. । इन्द्र. । अप्रतिष्कुत. परैरप्रतिशब्दित: प्रतिकूलशब्दरहित: । नवतीर्नव । नवसंख्याका नवती: । दशोत्तराष्टशतसंख्याका ।

वृत्राण्यावरकाण्यसुरजातानि । जघान हतवान् । अप्रतिष्कुत इति 'अन्यपूर्वे' (ऋ० प्रा० ५.२१) इति षत्वम् ।

एषाऽपरा—

ऋ० १. ८४. १४.

गायत्री छन्द । दधीच ऋषि । इन्द्रो देवता । पर्वतेषु पर्ववत्सु गिरिष्वपश्रितम-पगत्य स्थितम् । अश्वस्य अश्वमम्बन्धि यच्छिर दधीच इच्छन् इन्द्रो वर्तते । इप इच्छाया तुदादित्वाच्छ (Cf. पा० ३ १ ७७) । शर्यणावति एतन्नामके मरुमि तच्छिरोऽविदद् अविन्दत् । इत्यमुना मृतेनापि दधीचा इन्द्र सुखीकृत इत्यर्थ । शर्यणावति—शर्यणा नाम देशास्तेषामदूरभव सर शर्यणावत् । मध्वादिषु शर्यणाशब्दस्य पाठात् । 'मध्वादिभ्यश्च' (पा० ४ २ ८६) इति चातुरर्थिको मतुप् । 'मज्ञायाम्' (पा० ८ २.११) इति मतुपो वत्वम् । 'मतौ वह्वचोऽनजिरादीनाम्', (पा० ६ ३ ११९) इति दीर्घ ।

ऋ० १. ८५. १०.

गोतमस्त्रिष्टुभा मरुत स्तुष्टाव । चतुर्थेऽहन्यग्निमारुते विनियुक्तम् । 'होताऽजनिष्टेत्याज्य'० इति खण्डे सूत्रितम्—'प्र ये शुम्भन्ते (ऋ० १ ८५) जनस्य गोषा (ऋ० ५ ११) इति' (शा० श्रौ० सू० ११ ७ १२) । तत्रेतिहास —गोतम ऋषि पिपासया पीडित सन् मरुत उदक ययाचे । तदनन्तर मरुतो दूरस्थ कूपमुद्धृत्य यत्र स गोतम ऋषिस्तिष्ठति ता दिश नीत्वा ऋषिसमीप (समीपे कूप) मवस्थाप्य तत्पार्श्वे आहाव च कृत्वा तस्मिन्नाहावे कूपमुत्सिच्य तमृषि तेनोदकेन तर्पयाञ्चक्रु । अयमर्थोऽनया उत्तरया च प्रतिपाद्यते ।

अयमर्थ —हे मरुत ! अवत कूपम् । 'अवत' इति कूपनाम (निघण्टु ३ २३) । ओजसा बलेन ऊर्ध्वम् उपरि नुनुद्रे प्रेरितवन्त । 'णुद प्रेरणे । 'इरयो रे' (पा० ६ ४ ७६) इति रेआदेश । उत्वातवन्त । एव कूपमुत्सिच्य ऋषेराश्रम प्रति नयन्तो मरुत मार्गमध्ये ददृहाण प्रवृद्ध प्रवृद्धगतिनिरोधकम् । 'दृह दृहि वृद्धौ'—'लिट कानच्' (पा० ३ २ १०६) । पर्वत शिलोच्चय चिद् अपि विबिभिदु । विशेषेण बभञ्जु । 'छन्दसि परेऽपि' (पा० १ ४ ८१) इति परप्रयोग । तथा सुदानव शोभनदानास्ते मरुत । वाणम् । वाण पवि शब्दनाम (निघण्टु १ ११) । शतनन्त्रीभिर्युक्त वीणाविशेष बभन्तो वादयन्त । सोमस्य मदे सोमपानेन हर्षे सति रण्यानि रमणीयानि स्तुत्यानि धनानि चक्रिरे स्तोतृभ्य कुर्वन्ति । नुनुद्रेऽवतम्—'यकाराद्यक्षर पर वकाराद्यपि वा' (ऋ० प्रा० २ ३५) इत्यभिहितसन्धि । दादृहाणम्—श्रावयादित्वाद्दीर्घ. (Cf. ऋ० प्रा० ९ ३१.३२) ।

एषाऽपरा—

ऋ० १. ८५. ११.

ऋष्यादि पूर्ववत् । ऋचोऽयमर्थ —मरुतोऽवतमुद्धृत्य त कूप यस्या दिशि ऋषिर्वसति तया दिशा जिह्म वक्र तिर्यञ्च नुनुद्रे प्रेरितवन्त । एव कूप नीत्वा ऋष्याश्रमेऽवस्थाप्य तृष्णजे तृषिताय गोतमाय ऋषये तदर्थम् उत्स जलप्रवाह कूपादुद्धृत्य असिञ्चन् आहावे सेचनमकुर्वन् । एव कृत्वा ईमेनं स्तोतारम् ऋषि चित्रभानव. विचित्रदीप्तय ते मरुत अवसा ईदृशेन रक्षणेन सह आगच्छन्ति । तत्समीपं प्राप्नुवन्ति । प्राप्य च विप्रस्य मेधाविनो गोतमस्य काममभिलाषं धामभिरायुषो धारकैः उदकैस्तर्पयन्त अतर्पयन् ।

ऋ० १. ९७. १.

तत्रेतिहास—दीर्घजिह्वी नाम राक्षसी सर्वान् यज्ञान् बबाधे। एतां हन्तुमिन्द्रोऽशक्तः सन् सर्वस्य मित्रभूत कुत्समब्रवीत्। एषा हन्तव्येति। स चावधीत्। तं वागभ्यवदद् अनुचितं त्वयाऽऽचरितम्, यस्त्व सर्वेषा मित्रभूत. सन् क्रूरमकार्षीरिति। स ऋषि शोकं प्राप्नोत्। स ऋषि 'अप न.' (ऋ० १ ९७.) इत्यनेन सूक्तेनाग्निं स्तुत्वा शोकमपागमयत्। 'सौमित्र भवति, दीर्घजिह्वी वा इद रक्षो यज्ञहा यज्ञियानवलिहत्यचरत्तामिन्द्र कयाचन मायया हन्तु नाशसत' इत्यादि छान्दोग्यपञ्चविंशं ब्राह्मणम् (१३. ६. ८, ९)। तथा ऋग्विधानम्—अनेन सूक्तेन मध्याह्ने स्नात्वा शुचिकामो घृत प्रत्यृच जुहुयात्। अथवा अष्टौ समिध. प्रत्यृच जुहुयात्।

अप न. शोशुचदिति स्नात्वा मध्यन्दिने रवौ।
शुद्धिकामो यताहार प्रत्यृच जुहुयाद् घृतम् ॥ इति[1]

कुत्सो गायत्र्याऽग्नि तुष्टाव। आप्रायण्या धूमशानने विनियुक्त महाव्याहृती. सावित्री चोदाहृत्याप नः शोशुचदघमित्येतेन सूक्तेनेति गृह्ये। ऋचोऽयमर्थ—

हे अग्ने। नोऽस्माकम् अघ पापम् अपशोशुचत् शोकग्रस्त सद्विनश्यतु, यद्वाऽस्मदीय शत्रु शोचयतु। अपि चास्माक रयिमासमन्ताच्छशुग्धि प्रकाशित कुरु। शुच दीप्तौ। द्विरुक्तिरादरातिशयद्योतनाय। इति कुत्सेन परार्थमकृत्य कृतमिति दर्शितम्।

ऋ० १. १०१. ८.

कुत्सस्त्रिष्टुभा इन्द्र तुष्टाव। उत्तमे छन्दोमे मरुत्वतीये विनियुक्तम्। अष्टाचत्वारिंशत्खण्डे 'गायत्साम (ऋ० १ १७३), प्रमन्दिने' (ऋ० १ १०१) इति सूत्रितम्[2]।

ऋचोऽयमर्थ—हे मरुत्व! 'मतुवसो०' (पा० ८ ३ १) इति सम्बुद्धौ नस्य रुत्वम्। मरुद्भिर्युक्तेन्द्र! परमे उत्कृष्टे सधस्थे सहस्थाने गृहे—'सधमादस्थयो' (पा० ६ ३ ९६) इति सहस्य सधादेश। यद्वा यदि वा अवमे अर्वाचीने नीचीने वृजने—वृज्यते रिक्तीक्रियते धनमस्मिन्निति वृजन गृहम्। तस्मिन्मादयासे तृप्तो वर्तसे। 'मद तृप्तौ'। अतोऽस्मादुभयविधात्स्थानाद् नोऽस्माकमध्वर हिंसारहित यज्ञम्। तथा यास्कः—'अध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा। तत्प्रतिषेध' (नि० १ ८) इति। तथा दीर्घतमाश्च व्यर्थहिंसाया अभावात् 'न वा उ एतन्म्रियसे०' (ऋ० १ १६२ २१) इति जीवन्तमिव स्तौति। तस्मादध्वर हिंसारहित यज्ञम् अच्छ आभिमुख्येन आयाहि आगच्छ। अच्छाभेराप्तुमिति' शाकपूणेर्मतम्[3] (नि० ५. २८)। हे सत्यराध! सत्यधन! त्वाया त्वत्कामनया वय हविश्चकृम कृतवन्त.। चकृम-दधिम मदतादित्वाद् दीर्घ. (Cf. ऋ० प्रा० ८ १५)। 'अथ[4] सर्वा ह वै देवता: पशुमालभ्यमान समुपगच्छन्ते[5] मम नामेति' (कौ० ब्रा० १० ६)। 'अत्रैव पशवो हिंस्या'[6] इत्यादि श्रुतिस्मृत्युदित मारणमपि हिंसा नेति सिद्धम्।

---

[1] Rgvidh. I. 22. 2–3

[2] A fragment of the शां० श्रौ० सू० १०.११.६.

[3] Nirukta reads शाकपूणिः instead of शाकपूणेर्मतम्।

[4] 'अथ' नास्ति ब्राह्मणपाठे। [5] 'मुपसङ्गच्छन्ते' इति कौषीतकिब्राह्मणे।

[6] Manu. 5. 41.

तत्र ऋक्० १.१०३.८.

पिप्रुकुयवादीनां द्विषां दृष्टान्तेन द्रढयति। यथा पिप्रुकुयवशुष्णशम्बरादीन् इन्द्रोऽवधीत्—'हनो वध लिङि' (पा० २.४.४२) 'लुङि च' (पा० २.४.४३.) इति वधादेश। यत एतान् द्विषः, एतेषां केषाम्? इत्याह ऋजिश्वन पिप्रुद्विट्—कुयवशुष्णौ कुत्सस्य द्विषौ। शम्बरो दिवोदासस्यातिथिग्वस्य। यो दिवोदासः सोऽतिथिग्व।

त्वं पिप्रोर्नृमणः प्रारुज पुर (ऋ० १.५१.५)

त्व पिप्रु मृगयं शुश्रुवांसमृजिश्वने (ऋ० ४.१६.१३) इति पिप्रोर्द्विट्त्वे निगमौ।

त्वं ह त्यदिन्द्र कुत्समाव (ऋ० ७.१९.२)

स रन्धयत्सदिव सारथये शुष्णमशुष कुयव कुत्साय (ऋ० २.१९.६) इति शुष्णस्य कुयवस्य द्विट्त्वे निगमौ।

दिवोदासाय शम्बरम् (ऋ० ९.६१.२)

अरन्धयोऽतिथिग्वाय शम्बरम्। (ऋ० १.५१.६) इति शम्बरस्य द्विट्त्वे निगमौ।

अनुक्ता अन्ये बहव। इन्द्र एतेभ्य ऋजिश्वादिभ्य एतान् पिप्रुवादीन् द्विषोऽवधीत्।

कुत्सस्त्रिष्टुभा इन्द्र स्तौति। उत्तमे छन्दोमे विनियुक्तम्। तत्त इन्द्रियम् (ऋ० १.१०३) अह भुवम् (ऋ० १०.४८) इति गूत्रम् (Cf शा० श्रौ० सू० १०.११.७)

ऋचोऽयमर्थ—हे इन्द्र! त्व शुष्णादीन् चतुरो द्विष असुरान् यदाऽवधी हतवानसि, तदानी शम्बरस्यासुरस्य पुरः नगराणि विदारितवानसि। यदनेन सूक्तेन उक्त प्रार्थिन तन्नोऽस्माक मित्रादयो देवा मामहन्ता पूजित कुर्वन्तु। मामहन्ताम्—मह पूजायाम्। श्रावयादित्वाद्दीर्घ (Cf. ऋ० प्रा० ९.३१, ३२.)। इतीन्द्रेण द्विषो हतास्तस्माद्द्वेषो न कर्तव्य इत्युक्तम्।

ऋ० १.१०४.५

परस्मै सुख दत्त्वा पुण्यवान्, परस्मै दुःख दत्त्वा पापवान् इति यदुक्त तदत्र विपरीत भवति। उक्तत्वात्। यदुक्तमग्नीषोमीय पशुमालभेत इत्यादिभिर्वाक्यैस्तद् दुःखरूपमपि स्वर्गसाधन भवति। यद्यग्निपिद्ध परस्त्रीसम्भोगजनितसुखादि तत्सुखरूपमपि नरकाय भवति—इत्येतत्सम्यगुक्तम्। कुत्सस्त्रिष्टुभा इन्द्र तुष्टाव। ऋचोऽयमर्थ—हे मघवन्! धनवन्निन्द्र! यद् यदा नीथा नयनहेतुभूता स्या सा पदवी अस्माभि प्रत्यदर्शि दृष्टाऽभूत्—सा च पदवी दस्योरुपक्षपयितु कुयवस्यासुरस्य सदन गृहम् अद्य अभिमुख्येन गान् गता प्राप्ता। तत्र दृष्टान्त, जानती स्वकीय वत्समभिजानती गौ ओको न। ओक निवासस्थान स्वकीय गोष्ठम्। 'ओक इति निवासनाम...'(नि० ३.३) इति यास्कः। यथा प्राप्नोति तद्वन्मार्गोऽप्यसुरस्य गृह प्राप्त। अथानन्तरमेव चर्कृतात् पुन पुनस्तेनासुरेण कृताद् उपद्रवाद् नोऽस्मान् रक्षेति शेष। इत् पूरणार्थ.। 'मिताक्षरेष्वनर्थका कर्मीमिद्विति'इति (नि० १.९)। रक्षयित्वा नोऽस्मभ्य निष्पपी स्त्रीकामो भवति तस्य मघेव धनानीव परा दा स निष्पपी अस्पृश्यो जारो भूत्वा धनानि विनाशयति। यथाऽस्थाने परित्यजति तद्वत्। मा परा दा—डुदाञ् दाने—'गातिस्था'इति (पा० २.४.७७.) सिचो लुक्। 'बहुल छन्दस्यमाङ्योगेऽपि' (पा० ६.४.७५) इत्यडभावः। 'निष्पपी स्त्रीकामो भवति विनिर्गतसप। सप सपते स्पृशतिकर्मण' इति यास्कः (नि० ५.१६)। अछेति 'सुता याहि' (ऋ० प्रा० ७.६) इति दीर्घ.। स्म 'दधिममदत०' (ऋ० प्रा० ८.१५) इति दीर्घः। अनुक्तं सुखरूपमपि न कार्यमिति निष्पपीदृष्टान्तेन दर्शितम्।

तत्र ऋक्० १. १०५. १७.

अन्यो यः सुहृज्जन. प्रीतिकरः स एव भ्राता । सहोदरोऽपि समानोदरोऽपि यद्यप्रीतिकर द्विट् स एव भ्राता शत्रु. । एतमर्थमुदाहरणतया दृढयति ? (द्रढयति) यथाश्विभ्या सुहृद्भ्या प्रीतिकराभ्या भुज्युस्तौग्यस्तारित. समुद्रात् । भ्रातृत्व कृतमित्यर्थ.। तदग्रे 'तुग्रो ह भुज्युम्' (ऋ० १ ११६.३) इति दर्शयिष्यते। अत्र तु भ्रातृभ्या सहोदराभ्या द्वितैकताभ्या त्रित कनीयान् कूपे निपातित शत्रुत्व कृत तद्वदाम ।

स यथा बृहद्देवता (३ १३२—१३७)—

त्रित गास्त्वनुगच्छन्त शूरा[1] मालावृकीमुना ।
कूपे प्रक्षिप्य गा सर्वास्तत एवापजह्निरे ॥१३२॥
स तत्र सुषुवे सोम मन्त्रविन्मन्त्रवित्तम ।
देवाश्चावाहयत्सर्वांस्तच्छुश्राव बृहस्पति ॥१३३॥
आगच्छतोऽथ तान् दृष्ट्वा क्व वसत्यस्य तत्त्वत ।
सर्वदृक्त्वञ्च वरुणस्यार्यम्णश्चेत्यपान्नभत् ॥१३४॥
कूपेष्टकाभिर्व्रणितान्यङ्गान्येवाभवन्मम ।
दृष्ट्वा सर्वानह स्तौमि यद्यप्येको न पश्यति ॥१३५॥
बृहस्पतिप्रचोदिता विश्वे देवगणास्त्रय ।
जग्मुस्त्रितस्य त यज्ञ भागाश्च जगृहु सह ॥१३६॥
बृहस्पतिस्त्रितस्यैतज्ज्ञान विज्ञानमेव च ।
तृचेनान्त्येन सूक्तस्य जगादार्षिरसाविति ॥१३७॥

तत्रेतिहास—एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो भ्रातरो बभूवु । ते कदाचिन्मरुभूमावरण्ये वर्तमाना पिपासामन्तप्तगात्रा सन्त एक कूपमविन्दन्। तत्र त्रिनाम्न्य एको जलपानाय कूप प्राविशत्। स्वय पीत्वा इतरयोश्च पानाय कूपादु(दकम्)दधृत्य प्रादात्। तौ तदुदक पीत्वा त्रित कूपे पातयित्वा तदीय धन सर्वमपहृत्य कूपक (कूपञ्च) रथचक्रेण पिधाय प्रास्थिषाताम्। तत कूपे पतित मन् स त्रित कूपादुत्तरीतुमशक्नुवन्, सर्वे देवा मामुद्धरन्विति मनसा सस्मार ततस्तेषा स्तावकमिद सूक्त ददर्श। तत्र रात्रौ कूपस्यान्तश्चन्द्रमसो रश्मीन् पश्यन् परिदेवयते। कुत्स त्रितो वानेन सूक्तेन विश्वान्देवान् स्तौति। तथा **चानुक्रमणी**—"चन्द्रमा एकोनाप्त्यस्त्रितो वा वैश्वदेवे हि पाङ्क्तमन्त्या त्रिष्टुबष्टमी महाबृहती यवमध्या[2]" इति। ऋचोऽयमर्थ—कूपेऽवहित पतित त्रित एतत्सञ्ज ऋषि ऊतये रक्षणाय देवान् हवते स्तुतिभिराकारयति। तदेतदाह्वान बृहस्पतिर्देव शुश्राव श्रुतवान्। किं कर्तृ शुश्राव ? अहूरणात् पापरूपादस्मात् कूपात्। 'अहुरोऽहस्वानहूरणमित्यप्येतस्य भवति' इति **यास्कः** (नि० ६ २७)। उग्रीय उरु विस्तीर्णं शोभन कृण्वन् कुर्वन् रोदसी द्यावापृथिव्यौ मे मम अस्य कूपपतितस्य यद्दुःख तद्वित्त जानीतम्। कूपेऽवहित—'यकाराद्यक्षर पर वकाराद्यपि' (ऋ० प्रा० २. ३५) इति वपरत्वात् पूर्वरूपम्। इति भ्रातृभ्या शत्रुत्व कृतमित्युक्तम्।

---

[1] Bṛhaddevatā reads **कूराः**। [2] ऋ० १.१०५.१६-१८

[3] का० सं० १ म० १०५. p.9.

ऋ० १. ११०. ४.

कुत्सस्त्रिष्टुभा ऋभूस्तुष्टाव । आभिप्लविके पञ्चमेऽहनि विनियुक्तम् । आयुः पञ्चमम्-मिति खण्डे 'तत मे अपस्तदु तायते पुन[1] (ऋ० १. ११० १) इत्यार्भवम्' (शां० श्रौ० सू० ११ ५ ४) । ऋचोऽयमर्थ —वाघत ऋत्विग्रूपास्ते ऋभव । तरणित्वेन क्षिप्रत्वेन विष्ट्वी–शमी (निघण्टु २ १) एते कर्मनामनी । विपृ व्याप्तौ–'स्नात्व्यादयश्च' (पा० ७ १ ४९) इति क्त्वाप्रत्ययस्य ईकारान्तादेश. । ते सर्वकर्माणि व्याप्य मर्तास मनुष्या सन्त. अमृतत्व देवत्वम् आनशु । कृतै कर्मभिर्देवत्वमानशिरे । देवत्व प्राप्य सौधन्वना. सुधन्वन आङ्गिरसस्य त्रय पुत्रा· ऋभुविभ्वा वाज इति । एतेन ऋभव सूरचक्षस सूर्यसमानप्रकाशा सवत्सरे सवत्सरावयवभूते वसन्तादिकाले धीनिभिरनुष्ठेयैर्ज्योतिष्टोमादिभि कर्मभि समपृच्यन्त । सम्पृक्ता अभवन् । देवै सह यज्ञभागार्हा बभूवुरित्यर्थ । अत्र **निरुक्तम्** "कृत्वा कर्माणि क्षिप्रत्वेन वोऽहारो मेधाविनो वा मर्तास सन्तोऽमृतत्वमानशिरे । सौधन्वना ऋभव सूरस्यानां वा, सूरप्रज्ञा वा, सवत्सरे समपृच्यन्त धीनिभि कर्मभि" (नि० ११ १६) इति ।

अथा देवेष्वमृतत्वमानश (ऋ० ४ ३६ ४) इति निगम ।

ते शोभनकर्मकरणेन सुहस्ता उक्तास्तद्यथा—

श न ऋभव सुकृत सुहस्ता (ऋ० ७ ३५ १२),
गण देवानामृभव सुहस्ता (ऋ० ४ ३५ ३),
कर्मणा सुहस्ता निविशत्[2]—इत्येवमादय ।

ऋ० १. ११०. ८.

तत्रेतिहास —पुरा कस्यचिदृषेर्धेनुर्मृता । स ऋषिस्तस्या धेनोर्वत्स दीन दृष्ट्वा ऋभ-स्तुष्टाव । ऋभवस्तादृशीमन्या धेन् कृत्वा तदीयेन चर्मणा सवार्य तेन वत्सेन समयोजयन्निति । ऋष्यादि पूर्ववत् । ऋचोऽयमर्थ —हे ऋभव ! यूय चर्मण । तृतीयार्थे षष्ठी । चर्मणा त्वचा गा धेनु निरपिशत । नि शेपेण मयुक्तामकुरुत तदनन्तर मातर गा पुनर्वत्सेन सममृजत। सश्लिष्टामकुरुत । अपिच—हे सौधन्वनास ! सुधन्वन पुत्रा ! नर ! नेतार ! स्वपस्यया शोभन अप कर्म स्वप तदिच्छा स्वपस्या तया शोभनकर्मेच्छया । जिन्वी जीर्णौ वृद्धौ पितरा मातापितरौ युवाना पुन यौवनोपेतौ अकृणोतन । 'तप्तनप्त०'इति (पा० ७ १ ४५) तनबादेश । यूयमकृण्वम् । पुनर्—'वारपुन पुनर् इति (ऋ० प्रा० १ १०३) रेफ । 'असृजता मातरम्' (ऋ० प्रा० ८ ३१) इति पूर्वपदान्तदीर्घ । इति ऋभुभिर्देवत्वेऽप्युपकारो न त्यक्त इत्युक्तम् । तथा निगमा —

निश्चर्मणो गामरिणीत धीतिभि (ऋ० १ १६१ ७),
यया धिया गामरिणीत चर्मण (ऋ० ३ ६० २) इत्येवमादय ।

ऋ० १. ११४. ६.

तत्र कथा—पुरा कदाचिदिन्द्रोऽसुराज् जिगाय । तदानी दितिरसुरमाता इन्द्रहनन-समर्थं पुत्र कामयमाना तपसा भर्तु सकाशाद् गर्भं लेभे । इम वृत्तान्तमवगच्छन्निन्द्रो वज्रहस्त

---

[1] सूत्रे 'अपस्तदु तायते पुनः' इति नास्ति ।
[2] शां० श्रौ० सू० ८. २०. १. सूत्रे निविशदिति नास्ति ।

सन् सूक्ष्मरूपो भूत्वा तस्या उदरं प्रविश्य तं गर्भं सप्तधा बिभेद । पुनरप्येकैकं सप्तखण्डमकरोत् । ते सर्वे गर्भैकदेशा योनेर्निगत्यारुदन् । एतस्मिन्नन्तरे (अवसरे) लीलार्थं गच्छन्तौ पार्वतीपरमेश्वरौ इमान् ददृशतु । महेश्वरं प्रति पार्वत्येवमवोचत्, इमे मांसखण्डा यथा प्रत्येक तव पुत्रा. सम्पद्यन्ताम् एवं त्वया कार्यं मयि चेत्प्रीतिरस्तीति । स च महेश्वरस्तान्समानरूपान् समानवयस समानालङ्कारान् पुत्रान्कृत्वा गौर्यै प्रददौ, तवेमे पुत्रा सन्त्विति । अत. सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति स्तूयन्ते , रौद्रेषु च मरुता पिता रुद्र इति ।

केचिच्[1] श्लोकैर्वर्णयन्ति—

कथ ह्यभून्मरुता वै पितृत्व जगद्गुरोर्देवदेवस्य शम्भो ।
यथा रुद्रो मरुता वै पिताऽऽसीत्तथेतिहास प्रदर्श्यतेऽधुना ॥१॥

शतक्रतोरसुरारेर्वधार्थं दितिस्तु गर्भं लभते स्म भर्तु ।
शुश्रूषमाण किल तामथेन्द्रो मायाविदामग्रणी रन्ध्रदर्शी ॥२॥

प्रकीर्णकेशी च दितिं प्रसुप्तामवेक्ष्य वज्री ह्यणुमात्ररूप ।
प्रविश्य कुक्षिं प्रविभेद गर्भं मा रोद रोदेति वदन्तु गर्भम् ॥३॥

भित्त्वा गर्भं निर्गते वै महेन्द्रे प्रबुद्धा सा रोदिति स्मार्तरूपा ।
अत्रान्तरे त्वन्तरिक्षे नदामीज्जगज्जनित्री त्वखिलेशपत्नी ॥४॥

वृषेन्द्रमारुह्य गिरीन्द्रपुत्री सुरेन्द्रवृन्दैरभिवन्द्यमाना ।
नद्याह्वतं पङ्कजकुण्डलाद्यैर्हारेण सम्भूषितसर्वदेहा ॥५॥

---

[1] षड्गुरुशिष्यविरचितकात्यायनसर्वानुक्रमणीवृत्तौ (१०१ पृष्ठे) वेदार्थदीपिकायां ऋग्वेदीयद्वितीयमण्डलस्थत्रयस्त्रिंशसूक्तानुक्रमव्याख्यानावसरे विंशतिः श्लोकाः कुत्रत्या सङ्गृहीता दृश्यन्ते । तेषामाद्यषट्क विहायोत्तरचतुर्दश श्लोका अत्र नीतिमञ्जर्यामुद्धृता. । आद्याः षड् ये तत्र सन्ति ते यथा—

अश्वादिमोक्षान्तफलप्रसिद्ध्यै तुष्टो मुनिर्गृत्समदाभिधानः ।
त्रिष्टुप्छन्द. पञ्चदशर्चकेन भिषक्तम रुद्रमस्तौन्महात्मा ॥१॥

आ ते पितर्मरुतां (ऋ०२. ३३) यवि रुद्रसूक्तं मरुद्गण कीर्त्यते द्वि: किमत्र ।
त्रयोदश्यामाद्यमन्त्रे च रुद्रः सर्वत्र वा मारुते स्तूयते किम् ॥२॥

निपातभाजो मरुतो न चात्र प्रायेणैन्द्रे मरुतः सूत्रवृष्टेः ।
नैतद्रुद्रो मरुतां यत्पिताऽऽसीन्निपातभाजो मरुतस्ततोऽत्र ॥३॥

निपातभाङ् मारुते न तु रुद्रः प्रायेणैन्द्रेत्यादि सूत्रं च तत्र ।
इन्द्रेण सख्यतिशयादनुक्तं तेषां च तस्यापि च सख्यमेतत् ॥४॥

हनिष्यन्तं वृत्रमन्ये पुरेन्द्रं हित्वा जहुर्मरुतोऽवर्धयंस्तम् ।
प्रायेणैन्द्रेत्यादिसूत्रेऽपि वाच्यं रौद्रे चेति खलु किं तत्र नोक्तम् ॥५॥

प्रायग्रहो बहुलार्थं यतोऽत्र तस्मादैन्द्रे बहुशो योग एषाम् ।
अनैन्द्रेषु त्वल्पशो योग एषामित्येषोऽर्थो वेदितव्यो हि तत्र ॥६॥

[2] 'कुण्डलार्घैः' is suggested for कुण्डलाद्यैः ।

ससारवृक्षस्य कुठारकेण शशाङ्कचूडामणिमण्डितेन ।
देवेन सार्द्धं सुरसिद्धसङ्घैः स स्त्रीगणैश्चाप्यभिपूज्यमाना ॥६॥

गर्भस्य मातुश्च तदार्तनाद श्रुश्राव चाकाशगता यदृच्छया ।
सुराङ्गनानामवलोक्य वृन्द कृपापरा साथ हर ययाचे ॥७॥

वज्रेण रुग्णानि रुषातिदेव ! खण्डानि गर्भस्य तनूनि चापि ।
सप्तात्मके सप्तकभेदनेन बहूनि खण्डानि बहूनि चापि ॥८॥

एकैकमेषा लभता शरीर मदर्थमेतत् क्रियता महेश !
स्युश्चैव सर्वे तरुणा मदैव स्वलङ्कृतास्ते मरुतस्तवैव ॥९॥

मा रोद वादान्मृतियोगतो वा ख्यातास्तु लोके मरुतस्तु नाम्ना ।
सख्य च तैरस्तु महेश्वरस्य सुरैश्च तुल्य मरुता महेश ! ॥१०॥

न ज्येष्ठता नापि कनिष्ठतैषा वेषो वयश्चैव समानमेषाम् ।
(घृणाब्धित्व व्यक्तमेव तव स्यान्मयि प्रीतिश्चानुला वै महेश !) ॥११॥

पादादिकेशान्तमलङ्कृताश्च भवन्त्वेते सर्वमेतत् समास्तु ।
तथेति देव प्रतिपन्नवाक्यो देव्या यथोक्त प्रचकार सर्वम् ॥१२॥

इत्थन्तु सिद्ध मरुता पितृत्व जगद्गुरोदवदेवस्य शम्भो ।
अथापरं वर्णयन्तीतिहास यथा रुद्रो मरुता वै पिताऽऽसीत् ॥१३॥

इमा हि गोरूपधरा तु पृश्निर्वृषोऽथ भूत्वा रमयन् महेश ।
अजीजनन्मरुत पृश्निपुत्रा रुद्रस्य पुत्रा अपि ते बभूवु ॥१४॥ इति ।

पुरा कदाचिद्देवासुरसङ्ग्रामेऽन्यात्मको रुद्रो देवैर्निक्षिप्त धनमपहृत्य निरगात् । असुराञ् जित्वा देवा एनमन्विष्य दृष्ट्वा धन चापाहरन् । तदानीमरुदत् तस्माद्रुद्रस्य[1] रुद्रत्वम् । **अत्र यास्क** (नि० १० ५)–'रुद्रो रौतीति सत । रोरूयमाणो द्रवतीति वा रोदयतेर्वा । यदरुदत्तद्रुद्रस्य रुद्रत्वम् इति **काठकम्** । यदरोदीत्तद्रुद्रस्य रुद्रत्वम् इति **हारिद्रविकम्**' इति । कुत्सस्तादृश रुद्र जगत्या स्तौति । शूलगवे पशौ उपस्थाने विनियुक्तम्

---

[1] अत्र सायणभाष्ये रुद्रशब्दस्य व्याख्यानमेवमस्ति—(ऋ० १ ११४ १) रोदयति सर्वमन्तकाले इति रुद्रः ।

यद्वा—रुत् संसाराख्यं दुःखं तद्द्रावयति अपगमयति विनाशयतीति रुद्रः ।

यद्वा—रुतः शब्दरूपा उपनिषदः ताभिर्द्रूयते गम्यते प्रतिपाद्यते इति रुद्रः ।

यद्वा—रुत् शब्दात्मिका वाणी तत्प्रतिपाद्याऽऽत्मविद्या वा । तामुपासकेभ्यो राति ददातीति रुद्रः ।

यद्वा—रुणद्धि आवृणोतीति रुद् अन्धकारादिः । तं वृणाति विदारयतीति रुद्रः ।

यद्वा—कदाचिद्देवासुरसङ्ग्रामेऽन्यात्मको रुद्रो देवैर्निक्षिप्तं धनमपहृत्य निरगात् । असुराञ् जित्वा देवा एनमन्विष्य दृष्ट्वा धनमहरन् । तदानीमरुदत् । तस्माद्रुद्र इत्याख्यायते । तथा च तैत्तिरीयकम् (तै० सं० १. ५.१.१.)

'...सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्...' इति ।

इदं पित्र (ऋ० १.११४.६) इति। 'भूपते' इति खण्डे सूत्रितं 'कद्रुद्राय (ऋ० १.४३) इमा रुद्राय (ऋ० १.११४) इति' (शां० श्रौ० सू० ४.२०.२)।

ऋचोऽयमर्थ.—इदम् एव स्तुतिलक्षणं वच मरुताम् एकोनपञ्चाशत्संख्याकाना देवविशेषाणा पित्रे जनकाय रुद्राय उच्यते उच्चार्यते। कीदृशम्? स्वादो स्वादीय रसवतो मधुघृतादेरपि स्वादुतरम्। अतिशयेन हर्षजनकमित्यर्थ। पुन कीदृशम्? वर्धन स्तुत्यस्य प्रवर्धकम्। स्तोत्रेण हि देवता हृष्टा सती प्रवर्धते। अमृत मरणरहित रुद्र मर्तभोजन—मर्त्याना मनुष्याणा धन यत्तन्नोऽस्मभ्य रास्व प्रयच्छ। तथा त्मने आत्मने। 'मन्त्रेष्वाङयादे०' (पा० ६.४.१४१) इत्यालोप। द्वितीयार्थे चतुर्थी। मा तोकाय तोक पुत्र तनयाय तनय पौत्र च मृळ सुखय। मृड सुखने। एतयोरपत्यनामसु (निघण्टु २.२)। पाठे सति 'मा नस्त्व पुत्रेषु च पौत्रेषु च रीरिष.' (नि० १०.७) इति यास्केन विशेष उक्त। रास्व—'रास्वा चोरू न शग्धी न' (ऋ० प्रा० ७.५३) इति दीर्घ।

ऋ० १.११५.१.

कुत्समित्रिष्टुभा सूर्यं स्तौति। विपुवति सूर्यषट्के तथा स्तोत्रियायाम्। एकविंशस्तोम बृहत्पृष्ठमिति खण्डे 'चित्र देवानामिति पुरोनुवाक्या० इति (Cf. शा० श्रौ० सू० ११.१३.६)। 'चित्र देवानामिति स्तोत्रिय (Cf. शा० श्रौ० सू० १२.६.१३)। सौर्ये क्रतौ 'उदु त्य जातवेदस .'(ऋ० १.५०.१) 'चित्र देवानाम् (ऋ० १.११५.१) इति (शा० श्रौ० सू० ६.२०.२२.२३)। उत्सर्ग सूर्योपस्थाने, चित्र देवानाम् (ऋ० १.११५.१) नमो मित्रस्य (ऋ० १०.३७.१) इति गृह्ये। तथा ऋग्विधानम्—चित्रमित्युपतिष्ठेत सूक्तेनानेन भास्करमिति।[1]

ऋचोऽयमर्थ—देवाना[2] देवजनाना मध्ये अनीक तेजसमूहरूप चित्र चायनीय सूर्यमण्डलम् उदगाद् उदयाचल प्राप्तमासीत्। कीदृशम्? मित्रस्य वरुणस्याग्नेश्चोपलक्षणमेतत्। एतदुपलक्षिताना जगता चक्षु प्रकाशकम्। चक्षुरिन्द्रियस्थानीय वा। उदय प्राप्य द्यावापृथिवी। दिव च पृथिवी च अन्तरिक्ष च आप्रा। स्वकीयेन तेजसा आ समन्तादपपूरत्। ईदृग्भूतमण्डलवर्ती सूर्यो जगतो जङ्गमस्य तस्थुष स्थावरस्य च आत्मा। इति सूर्यस्य जगदात्मत्वमुक्तम्। तत्र निरुक्तम्—"चायनीय देवानामुदगमदनीक ख्यान मित्रस्य वरुणस्याग्नेश्चापपूरद् द्यावापृथिव्यो चान्तरिक्ष च महत्त्वेन तेन सूर्य आत्मा जङ्गमस्य च स्थावरस्य च' (नि० १२.१६) इति। इति महता विश्वप्रकाशकत्व सूर्योपस्थानेनोक्तम्।

ऋ० १.११६.१.

य सत्यवान् तस्य या समृद्धि ता समृद्धि सूपकारेण शोभनो य उपकारस्तेन सार्थकी नासत्यवत्कुर्यात्। यथा नासत्याऽन नासत्ययो अन रथ वैमद्या. विमदस्त्रिया. सकाशात् सार्थको जात.। जाहुषाच्च। हि यस्मात् नासत्यौ सत्यरूपौ। नासत्याभ्या विमदोजाहुषयो

---

[1] Rgvidh. 1.24.4. अयं पूर्णश्लोक ऋग्विधानस्य एवम्—
"तिष्ठन्नुद्यन्तमादित्यं समित्पाणिः शुचिः सदा।
चित्रमित्युपतिष्ठेत सूक्तेनानेन भास्करम्" ॥ इति।

[2] दीप्यन्तीति देवा रश्मयस्तेषाम्। देवजनानामेव वा। सा० भा०

वहनेन स्वरूपः सार्थक. कृत इत्यर्थ । जाहुषवहनम् अग्रे परिविष्टमित्यस्या (ऋ० १.११६ २०) दर्शयिष्यते । इदानी नासत्याभ्या बर्हिरिवेति (ऋ० १.११६.१) नासत्ययो वैमदीवहन वदाम.। कक्षीवान्त्रिष्टुभा अश्विनौ स्तौति। प्रातरनुवाके आश्विने क्रतौ 'नासत्याभ्यामिति त्रीणि[1]'।

ऋचोऽयमर्थ.—अह नासत्याभ्या सत्यरूपाभ्याम् अश्विभ्या स्तोमान् स्तुती प्रेर्याम्मि सम्पादयामि। तत्र दृष्टान्त, बर्हिरिव। यथा कश्चिद्यजमानो यागार्थं बर्हि. प्रवृञ्जं प्रकर्षेण यागार्थं दर्भमन्यूनानतिरिक्त वृङ्क्ते छिनत्ति सम्पादयति तद्वत्। अभ्रियेव—यथा अभ्रियाणि अभ्रेषु मेघेष्ववस्थितान्युदकानि वातो वायुर्बहुश प्रेरणार्थं बहुश प्रेरयति एवमहमश्विभ्यां स्तोत्राणीर्यामि बहुश प्ररयामि। यावश्विनौ अभंगाय तरुणाय विमदाय ऋषये जार्या स्वकीयेन रथेन न्यूहतु तदीय गृह प्रापयामासतु। कीदृशेन रथेन? सेनाजुवा शत्रुसेनाया. प्रेरकेण। एव वैमदीवहनेन नासत्याभ्या रथसमृद्धि सार्थीकृतेत्याह। तथा निगमा.—

युव शचीभिर्विमदाय जाया (ऋ० १ ११७ २०),
युव रथेन विमदाय शुन्ध्युव न्यूहथु (ऋ० १० ३९ ७),
कमद्युव विमदायोहथुर्युवम् (ऋ० १० ६५ १२) इत्येवमादय ॥

अन्य सुहृज्जनो भ्राता इति पूर्वमुक्तम्, तत्प्रदर्शनायेतिहासपूर्विका ऋक्—

ऋ० १.११६.३.

तुग्रो नाम कश्चिदश्विनो प्रियो राजर्षि । स च द्वीपान्तरवर्तिभि शत्रुभिरत्यन्तमुपद्रुत सन् तेषा जयाय स्वपुत्र भुज्यु सेनया सह नावा प्राहैषीत्। सा च नौर्मध्येसमुद्रमतिदूर गत्वा वायुवशेन भिन्नाऽऽसीत्। तदानी स भुज्यु शीघ्रमश्विनौ तुष्टाव। स्तुती च तौ सेनया सहितमात्मीयासु चतसृषु नौष्वारोप्य त्रिभी रथै षळश्वै शतपद्भि[2] सह पितुस्तुग्रस्य समीप त्रिभिरहोरात्रै प्रापयामासतुरिति। अयमर्थ. इदमादिकेन तृचेन (ऋ० १ ११६ ३–५) प्रतिपाद्यते। 'ह' शब्द प्रसिद्धौ। तुग्र खल् पूर्व शत्रुभि पीडित सन् तज्जयार्थमुदमेघे उदकौमिह्यते सिच्यत इत्युदमेघ समुद्र तस्मिन् समुद्रे भुज्युमेतत्सज्ञ प्रिय पुत्रम् अवाहा नावा गन्तु पर्यत्याक्षीत्। तत्र दृष्टान्त, ममृवान् म्रियमाण सन् धनलोभी कश्चिन्मनुष्यो रयि न यथा धन परित्यजति तद्वत्। हे अश्विनौ! न च भुज्यु मध्येसमुद्र निमग्न नौभि पितृसमीपम् ऊहथु युवा प्रापितवन्तौ। कीदृशीभि? आत्मन्वतीभि आत्मीयाभि युवयो स्वभूताभिरित्यर्थ। यद्वा धृनिरात्मा धारणवतीभिरित्यर्थ। अन्तरिक्षप्रुद्भि अन्तिस्वच्छत्वादन्तरिक्षे जलस्योपरिष्टादेव गन्त्रीभि अपोदकाभि सुश्लिष्टत्वादपगतोदकाभि अप्रविष्टोदकाभिरित्यर्थः। ममृवान्—'नकार आकारोपध०' (ऋ० प्रा० ४ ६५) इति नलोप। तथा निगमा —

अव विद्ध तौग्र्यमप्स्व१न्तर (ऋ० १ १८२ ६),
ता भुज्य विभिरूहथ समुद्रात् (ऋ० ६ ६२ ६),
निष्टौग्र्यं पारयथ समुद्रात् (ऋ० १ ११८ ६) इत्येवमादय ।

---

[1] A fragment of शां० श्रौ० सू० ६.६.६.

[2] शतेन पवातिभिः is suggested for शतपद्भिः

ऋ० १. ११६. ६.

पेदुर्नाम कश्चित्सोऽश्विनौ तुष्टाव। तस्मै प्रीतौ कञ्चित् श्वेत(वर्ण) मश्वं दत्तवन्तौ। स चाश्व प्रौढं जय चकारेत्येतदत्र प्रतिपाद्यते। अथाश्विनोरश्वादुत्पत्ति। तत्र बृहद्देवता (६. १६२,१६३; ७ १–७)—

अभवन्मिथुनं त्वाष्ट्रे सरण्यूस्त्रिशिराविह।
स वै सरण्यू प्रायच्छत्स्वयमेव विवस्वते ॥१६२॥
तत सरण्यां जज्ञाते यमयम्यौ विवस्वत।
तौ चाप्युभौ यमावेव ज्यायास्ताभ्यां तु वै यम ॥१६३॥
[1]दृष्ट्वा भर्तृ परोक्षं तु सरण्यू सदृशीं स्त्रियम्।
निक्षिप्य मिथुनौ तस्यामश्वौ भूत्वाऽपचक्रमे ॥१॥
अविज्ञानाद्विवस्वान् हि तस्यामजनयन्मनुम्।
राजर्षिरासीत्स मनुर्विवस्वानिव तेजसा ॥२॥
स विज्ञाय त्वपक्रान्ता सरण्यूमश्वरूपिणीम्।
त्वाष्ट्री प्रतिजगामाशु वाजी भूत्वा सलक्षण ॥३॥
सरण्यूस्तु विवस्वन्त विज्ञाय हयरूपिणम्।
मिथुनायोपचक्राम ता च तत्रारुरोह म ॥४॥
ततस्तयोस्तु वेगेन शुक्र तदपतद् भुवि।
उपाजिघ्रच्च सा त्वश्वा तच्छुक्र गर्भकाम्यया ॥५॥
आघ्रातमात्राच्छुक्रात्तु कुमारौ सम्बभूवतु।
नासत्यश्चैव दस्रश्च यौ सुतावश्विनाविति ॥६॥
इतिहासमिद यास्क सरण्यूदेवते ब्रूचे।
विवस्वतश्च त्वाष्ट्रेश्च त्वाष्टेति सह मन्यते ॥७॥

अथ यास्कः—"तत्रेतिहासमाचक्षते—त्वाष्ट्री सरण्यूर्विवस्वत आदित्यायमौ मिथुनौ जनयाञ्चकार। सा सवर्णामन्या प्रतिनिधायाश्व रूप कृत्वा प्रदुद्राव, स विवस्वानादित्य आश्वमेव रूप कृत्वा तामनुसृत्य सम्बभूव। ततोऽश्विनौ जज्ञाते सवर्णाया मनु" (नि० १२ १०) इति। "अश्वैरश्विनाविन्यौर्णवाभः" (नि० १२ १) इति च। इत्यश्विनोरश्वादुत्पत्ति।

ऋचोऽयमर्थ —हे अश्विना अश्विनौ! युवाम् अघाश्वाय अहन्तव्याश्वाय पेदुनाम्ने राजर्षये य श्वेत श्वेतवर्णम् अश्व ददथु दत्तवन्तौ सोऽश्वस्तस्मै स्वस्तिजयलक्षण मङ्गल शश्वदित् नित्यमेव चकार। वा युवयोस्तद्दान महि महद् अतिगम्भीरम् अत एव कीर्तनीय सर्वै कीर्तनीय प्रशस्य भूत् अभूत्। तस्मात् पैद्व पेदो सम्बन्धी पतनशील शीघ्रगामी वा। अय शत्रूणा प्रेरयिता युद्धे प्रेरयितव्यो वा वाजी वजनवान् सोऽश्व सदमित् सदैव हव्य अस्माभिराह्वातव्य। तथा निगमा—

'युव श्वेत पेदवेऽश्विनाऽश्व (ऋ० १० ३९.१०),
युव पेदवे पुरुवारमश्विना (ऋ० १ ११९ १०),
नि पेदव ऊहथुराशुमश्वम्' (ऋ० १ ११७.९) इत्यादयः।

---

[1] Bṛhaddevatā reads **सृष्ट्वा**।

ऋक् १.११६.७

विद्वत्त्वमिच्छता पुसा विद्वज्जनाना गुणकीर्तन कक्षीवत् कुर्यात् ?(क्रियेत), यथा कक्षीवान् ऋषि. तिरोहितज्ञानोऽश्विनोर्विदुषो । अश्विनोर्विद्वत्त्व मन्त्रान्तरे प्रतिपादितम्—

ता विद्वांसा हवामहे वा (ऋ० १ १२० ३),
विद्वासाविद्दुर पृच्छेद (ऋ० १ १२० २),
यद्विद्वासा निधिमिवापगूळ्ह (ऋ० १ ११६ ११) इत्यादय ।

नासत्याभ्यामिति कीर्त्या (ऋ० १ ११६) सुधी शोभनबुद्धियुक्तोऽभवत् । कक्षीवान् पुरा तमसा तिरोहितज्ञान सन् ज्ञानार्थमश्विनावाजुहाव, तस्मै अश्विनौ प्रभूतां धिय दत्तवन्तौ । तदाह—हे नरा ! नेतारावश्विनौ ! युव युवा स्तुवते युवयो स्तुति कुर्वते पज्रियाय पज्रा इत्यङ्गिरसामाख्या । तेषा कुले जाताय कक्षीवते कक्ष्या रज्जुरश्वस्य तद्वते एतत्संज्ञाय पुरन्धि प्रभूता धिय बुद्धि 'पुरन्धिर्बहुधी 'इति यास्कः (नि० ६ १३) । अरदत व्यलिखतम् । यथा सर्वार्थगोचरा भवति तथा कृतवन्तावित्यर्थ । अपि च कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेष तस्मिन्सुराया स्रावण क्रियते लुप्तोपमानमेतत् । सुराया स्रावका कारोतरात् यथा सुरा स्रावयन्ति एवमेव युवा वृष्ण सेचनसमर्थस्य युष्मदीयस्याश्वस्य शफात् खुरात् सुराया शतकुम्भान् असंख्यातान् सुराघटान् अभिञ्चनम् अक्षारयतम् ।

तद्वा नरा शस्य पज्रियेण (ऋ० १ ११७ ६),
यया वाचा यजति पज्रियो वाम् (ऋ० १ १२० ५),
पज्रेषु स्तोमो दुर्यो न यूप (ऋ० १ ५१ १४) इति निगमान्तरणि ।

ऋ० १.११६ ८

अत्राख्यानम्—अत्रिम् ऋषिम् असुरा शतद्वारपीडायन्त्रगृहे प्रवेश्य तुषाग्निना अवाधिषत । तदानी तेन ऋषिणा स्तुतावश्विनौ अग्निमुदकेनोपशमय्य तस्मात्पीडायन्त्र-गृहाद् अविकलेन्द्रियवर्गं सन्त निरगमयतामिति ।

ऋचोऽयमर्थ —अश्विना ! हे अश्विनौ ! हिमेन हिमवच्छीतलेनोदकेन घ्रस दीप्यमानम् अत्रेर्बन्धनार्थमसुरै प्रक्षिप्त तुषाग्निमवारयेथा युवा निवारितवन्तौ । शीतीकृतवन्तावित्यर्थ । अपिचास्मै (असुरपीडाकार्य प्राप्ताय) अत्रये पितुमतीम् । 'पितु 'इत्यन्ननाम (निघण्टु २ ७) अन्नयुक्ताम् ऊर्जं बलप्रद रसात्मक क्षीरादिकमधत्त पुष्टयर्थ प्रायच्छतम् । ऋबीसे अपगत-प्रकाशे पीडायन्त्रगृहेऽवनीतम् अवाङ्मुखतया असुरै प्रापितम् अत्रि सर्वगण (गणः समूह. सर्वेषाम् इन्द्रियाणा पुत्रादीनां वा गणेनोपेत) पुत्रादिगणोपेत स्वस्ति अविनाशो यथा भवति तथा उन्निन्यथुः तस्माद् गृहादुद्गमय्य युवा स्वगृहे प्रापितवन्तौ । यद्वा हिमेन शीतेन वृष्ट्युदकेन अग्निम् अग्निवत्तीक्ष्णम् । 'घ्रसम्' अहर्नामैतत् (निघण्टु १.९) सामर्थ्यान्निदाघ-कालीनमह अवारयेथा तस्यात्तस्तीक्ष्ण्य निवारितवन्तौ । अपि चास्मै अग्नये पितुमती चरुपुरोडाशादिलक्षणान्नोपेतम् ऊर्जं बलकर रसात्मकम् उपस्तरणाभिधारणात्मक घृतमधत्तम् । वृष्ट्युत्पादनेनाग्नेर्यागार्थं हवीषि निष्पादितवन्तावित्यर्थ । ऋबीसे अपगततेजस्के पृथिवी-द्रव्ये अवनीतम् ओषधीनामुत्पादनाय अवस्तान्नीतम् । पार्थिवाग्निना परिपक्वा उदकेन क्लिन्ना ह्योषधिवनस्पतयो विरोहन्ति । अत्रिं हविषामत्तारम् ओषधिवनस्पत्यादीना वा एवविधम् अग्निं सर्वगणं ग्रीष्मादयोषधिगणोपेत हे अश्विनौ ! युवा स्वस्ति अविनाशो

यथा भवति तथा उन्निन्यथु. व्रीह्यादयोषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवन्तौ। कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकम् अश्विनौ प्रवर्षणेन व्यक्तीकृतवन्तावित्यर्थ.। अयं पक्षो **यास्केन** 'हिमेनोदकेन'इत्यादिनोक्त (नि० ६ ३६)। पितुमतीम्-'ह्रस्वनुड्भ्या मतुप्'इति (पा०६.१.१७६) मतुप उदात्तत्वम्। तथा निगमा —

अत्रिर्यद्वामवरोहन्नृबीसम् (ऋ० ५ ७८ ४),
युवमृबीसमुत तप्तमत्रये (ऋ० १० ३९ ९),
ऋबीसादत्रि मुञ्चथो गणेन (ऋ० १ ११७ ३) इत्येवमादय ।

ऋ० १. ११६. ९

कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुर्गोतमस्य ऋषे समीप देशान्तरे वर्तमान कूपमुत्वाय अश्विनौ प्रापयेता प्रापय्य च कूप स्नानपानादिसौकर्य्याय उपरिमूलमधोविलमवास्थापयताम्।

ऋचोऽयमर्थ -हे नासत्यौ ! सत्यस्य नेतारौ ! अश्विनौ ! युवाम् अवत कूप गोतमस्य ऋषे समीप परानुदेथा प्रेरिषाथाम्। तदनन्तर न कूपम् उच्चाबुध्नम् उच्चैरुपरिष्टात् बुध्न मूल यस्य तम्। (तथा च) जिह्मद्वार जिह्ममधस्ताद्वर्तमान (तथा वक्र) द्वार द्वार यस्य (तथोक्त) तम् एवविध चक्रथु युवामकृणाथाम्। तस्मात्कूपात् तृप्यते पिपासतो गोतमस्य पायनाय पानार्थम् आपो न आप सम्प्रति तदानीमेव क्षरन् (प्रवाहरूपेण निरगमन्)। अय नकार सम्प्रत्यर्थ, 'अस्न्युपमानस्य सम्प्रत्यर्थे प्रयोग' इति **यास्क** (नि० ७ ३१)। कीदृशम्य ? राये षष्ठ्यर्थे चतुर्थी, हवींषि दत्तवत। पुन कीदृशम्य ? सहस्राय सहनशीलाय। एह मर्षणे। रा दाने। 'ऊडिदम् ' (पा० ६ १ १७१) इति विभक्तेरुदात्तत्वम्। यद्वा सहस्रसख्याय राये धनाय एतत्सख्यधनलाभार्थं च क्षरन्।

ऋ० १. ११६. १०

अत्रेदमाख्यानम्-वलीपलितादिभिरुपेतो जीर्णाङ्ग पुत्रादिभि परित्यक्तश्च्यवनाख्य ऋषि. अश्विनौ तुष्टाव (स्तु)तावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति।

तथा एत भवति[1] (ता० ब्रा० १४ ६ १०)—"च्यवनो ह वै दाधीचोऽश्विनो प्रिय आसीत् सोऽजरस्तं . पुनर्युवानमकुरुताम्" इति। ऋष्यादिपूर्ववत्। ऋचोऽयमर्थ —नासत्यौ अश्विनौ जुजुरुष[2] जीर्णात्-ज्या वयोहानौ च्यवानात् च्यवनाख्यस्य[3] ऋषे सकाशाद् वव्रि—वृञ् वरणे, 'आदृगमहन०' (पा० ३ २ १७१) इति किप्रत्यय.। 'वव्रिरिति रूपनाम वृणोतीति सत' इति **यास्कः** (नि० २ ९)—कृत्स्न शरीरमाश्रित्य (आवृत्य वा) स्थिता जरा

---

[1] ताण्ड्यब्राह्मणे वचनमिदमेवमस्ति—(ता० ब्रा० १४.६.१०) "च्यवनो वै दाधीचोऽश्विनोः प्रिय आसीत्। सोऽजीर्यत्समेतेन साम्नाऽप्सु व्यंकूयताम्। तं पुनर्युवानमकुरुतां तद्वावतौ तर्हाकामयेताम्—" इति। (व्यंकूयताम्=व्यचलयताम्)

[2] जुजुरुषः—जृष् वयोहानौ। लिटः क्वसुः (पा० ३.२.१०७)। बहुलं छन्दसीत्युत्वम्। द्विर्भावः (पा० ६.१.८)। पञ्चम्येकवचने वसोः सम्प्रसारणम् (पा० ६.४.१३१) इति सम्प्रसारणम्। शासिवसिघसीनाञ्च (पा० ८.३.६०) इति षत्वम्।

[3] 'च्यवनाख्यादृषेः सकाशात्' इति वे० भा०।

प्रामुञ्चतम् प्रकर्षेण अमोचयतम्। तत्र दृष्टान्त —द्रापिमिव। द्रापिरिति कवचस्याख्या यथा कश्चित् कवच कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात्पृथक्करोति तद्वत्। उत अपिच हे दस्रौ! दर्शनीयौ! 'अह्नं दुहन्तौ मनुष्याय दर्शनीयौ" इति यास्कः (नि० ६ २६)। जहितस्य पुत्रादिभि. परित्यक्तस्य ऋषे। ओहाक् त्यागे। आयुर्जीवन प्रातिरत प्रावर्धयतम्। प्रपूर्वस्तिरतिर्वर्धनार्थ। 'प्रवर्धय च न आयु.'इति (नि० १० ४०) यास्कदर्शनात्। आदिद् अनन्तरमेव युवान मन्त कनीना कन्याना पति भर्तारम् अकृणुतम् अकुरुतम्। 'जार' कनीना जरयिता कन्यानाम्'इति यास्कदर्शनात् (नि० १० २१) कनीशब्द कन्यावाची। तथा निगमा —

युव च्यवान सनय यथा रथ (ऋ० १० ३९ ४),
युव च्यवानमश्विना जरन्त (ऋ० १ ११७ १३),
पुनश्च्यवान चक्रथुर्युवानम् (ऋ० १ ११८ ६)

ऋ० १. ११६. ११.

अत्रेदमाख्यानम्—वन्दनो नाम कश्चिदृषिर्दैत्याश्रम गत्वा कञ्चित्काल स्थित। कस्मिंश्चिद्दिवसे[1] तै कूपे निपातित उत्तरीतुमशक्नुवन् अश्विनावस्तौत्। तमश्विनौ कूपादुन्नि-न्यतुरिति। ऋष्यादिक पूर्ववत्—ऋत्वोऽयमर्थ —हे नरा! 'सुपा सुलुक्' (पा० ७ १ ३९) इत्यौकारस्यात्वम्, आरोग्यस्य नेतारौ! हे नासत्या! अश्विनौ! वा युवयो तत्कर्म शस्य-मस्माभि प्रशसनीय राध्यम् आराधनीय च अभिष्टिमत् आभिमुख्येन प्राप्तव्य वरूथ वरणीय कामयितव्य यत्कर्म विद्वासा जानन्तौ युवा निधिमिव निक्षिप्तधनमिव अपगूळहम् अरण्ये निर्जन-देशे कूपस्य मध्ये असुरैर्निगूढ वन्दनाय वन्दनमृषिम्, कर्मण सम्प्रदानत्वाच्चतुर्थी। दर्शताद् अध्वर्गे. पिपासुभिर्द्रष्टव्यात्कूपाद् उदूपथु उदहार्ष्टम् (एव यदेतत्कूपादुद्धरण तदित्यर्थ)। तथा निगमा —शुभे रुक्म न दर्शत निखातम् (ऋ० १ ११७ ५),

युव वन्दन निर्ऋत जरण्यया (ऋ० १ ११९ ७),
युव वन्दनमृश्यदादुदूपथु (ऋ० १० ३९ ८), इत्येवमादय।

अपगूळहम्—'ळहकारतामेति स एव चास्य०' (ऋ० प्रा० १ ५२) इति ढकारस्य ळहकारत्वम्।

ऋ० १. ११६ १२

ऋष्यादि पूर्ववत्। अत्राख्यानम्—"इन्द्रो दधीचे प्रवर्ग्यविद्या मधुविद्या चोपदिश्य यदीमामन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच। ततोऽश्विनावश्वस्य शिरश्छित्त्वा दधीच शिर प्रच्छिद्यान्यत्र निधाय तत्राश्व्य शिर प्रत्यधत्ताम्। तेन च दध्यङ् ऋच सामानि यजूषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादक ब्राह्मण चाश्विनावध्यापयामास। तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत्। अथाश्विनौ (तस्य) स्वकीय मानुष शिर प्रत्यधत्ताम्" इति।

---

[1] 'दैत्या .....दिवसे' इयत्सायणभाष्ये नास्ति। 'निपातितः' इत्यस्य च स्थान सायणभाष्ये 'निखातः' इत्यस्ति।

तथा च बृहद्देवता (३. १८–२४)—

प्रादादिन्द्रोऽपि[1] सुप्रीत सुताय तदथर्वण. ।
स चाभवदृषिस्तेन ब्रह्मणा दीप्तिमत्तर ॥१८॥
तमृषि निषिषेधेन्द्रो मेद वोच क्वचिन्मधु ।
न हि प्रोक्ते मधुन्यस्मिञ् जीवन्त त्वोत्सृजाम्यहम् ॥१९॥
तमृषि त्वश्विनौ देवौ विविक्ते मध्वयाचताम् ।
स च ताभ्या तन्नाचष्टे[2] यदुवाच शचीपति ॥२०॥
तमब्रूता तु नासत्यावाश्व्येन शिरसा भवान् ॥
मध्वासु ग्राहयत्वावा मेन्द्रश्च त्वावधीत्तत ॥२१॥
आश्व्येन शिरसा तौ तु दध्यङ्डाह यदश्विनौ ।
तदस्येन्द्रो हरद्धन्यन्न्यधत्तामस्य यच्छिर ॥२२॥
दधीचश्च शिरश्चाश्व्य कृत्त वज्रेण वज्रिणा ।
पपात सरसो मध्ये पर्वते शर्यणावति ॥२३॥
तदद्भ्यस्तु समुत्थाय भूतेभ्यो विविधान्वरान् ।
प्रादाय युगपर्यन्त तास्वेवाप्सु निमज्जति ॥२४॥ इति

तथा **शतपथे** "इद वै तन्मधु दध्यङ्डाथर्वणोऽश्विभ्यामुवाच तदेतदृषि पश्यन्नवोचत्" इति (श० ब्रा० १४५५१७)। ऋचोऽयमर्थ —नरा ! हे नरौ ! अश्विनौ ! वा युवयो सम्बन्धि, 'युष्मदस्मदो पष्ठीचतुर्थी०' (पा० ८१२०) इति द्विवचनस्यानुदात्तो वामादेश। उग्रम् उद्गूर्णम् (अन्यै दुशक) दस कर्म (कर्मनामैतत्, निघण्टु २.१) युवाभ्या पुरा कृत (तत् कर्म) सनये लाभाय (धनलाभार्थम्)आविष्कृणोमि प्रकटीकरोमि। तत्र दृष्टान्त — तन्यतुर्न, यथा मेघस्थ शब्दो वृष्टि (मेघान्तर्वर्तमानमुदक प्रवर्षणेन) सर्वत्र प्रकटयति तद्वत्। किम् ? तत्कर्म आथर्वण अथर्वण पुत्रो दध्यङ्। एतत्साम ऋषि। अश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वा युवाभ्याम् ईम् इमा मधुविद्या यद्ध यदा खलु प्रोवाच प्रोक्तवान् तदानीम् अश्वस्य शिरस मन्धानलक्षण पुनर्मानुषस्य शिरस प्रतिमन्धानलक्षण च यद्भवदीय कर्म तदाविष्कृणोमीत्यर्थ। एतेन दध्यङ् मधुविद्याप्रदानार्थ शिरसो द्वय तत्याजेति सिद्धम्। आविष्कृणोमि—'आविर्हविर्ज्योतिर्'(ऋ० प्रा० ४ ४७)इति षत्वम्। तथा निगमा:—

आथर्वणायाश्विना दधीचे (ऋ० १ ११७ २२),
युव दधीचो मन आ विवासथो (ऋ० १ ११९ ९),
अहमिन्द्रो रोधो वक्षो अथर्वण (ऋ० १० ४८ २) इत्येवमादय ।

ऋ० १. ११६. १३

अत्रेदमाख्यानम्—'वध्रिमती नाम कस्यचिद्राजर्षे पुत्री सा नपुसकभर्तृका पुत्रलाभायाश्विनावाजुहाव। तदाह्वान श्रुत्वाऽश्विनावागत्य तस्यै हिरण्यहस्ताख्य पुत्र ददतु:'[3] इति ।

---

[1] Bṛhaddevatā reads **ब्रह्मापि** । [2] Bṛhaddevatā reads **तवाचष्टे** ।
[3] Bṛhaddevatā reads **'तदस्येन्द्रोऽहरत् स्वं तन्यधत्तामस्य यच्छिर.'**
[4] The passage is borrowed from the commentary of Sāyaṇa with slight variation.

ऋष्यादि पूर्ववत् । ऋचोऽयमर्थ.—हे नासत्यौ ! करा ! करौ ! अभिमतकर्तारौ ! करोतेः पचाद्यच् (Cf. पा० ३.१ १३४)। पुरुभुजा बहुभुजौ महे महनीये पूजनीये यामन् यामनि-याति गच्छतीति याम स्तोत्र तस्मिन्सति। 'आतो मनिन्' (पा० ३ २ ७४) इति मनिन्। 'सुपा सुलुक्' (पा० ७.१.३९.) इति सप्तम्या लुक्। वा युवा पुरन्धिर्बहुधी. वध्रिमती (वध्रि. पुत्रोत्पादनाशक्त. पण्डक तद्वती) एतत्संज्ञा राजपुत्री अजोहवीत् पुन. पुन स्तुत्या पुत्रलाभार्थम् आहूतवती। युवा वध्रिमत्यास्तदाह्वान श्रुतम् आशृणुतम्। तत्र दृष्टान्त—शासुरिव, यथा शासुराचार्यस्य वचन शिष्योऽवहित सन् ऐकाग्र्येण (एकाग्रमना) शृणोति तद्वत्। श्रुत्वा च हे अश्विनौ ! तस्यै हिरण्यहस्त सुवर्णमयपाणि पुत्रम् अदत्तम् प्रायच्छतम्।

हिरण्यहस्तमश्विना रराणा (ऋ० १ ११७ २४) इति निगमान्तरम्।
एव वध्रिमत्यै पुत्र दत्त्वाऽश्विभ्या रुपादिसार्थ कृतमित्यर्थ ।

ऋ० १. ११६. १४.

तत्राख्यानम्—'वर्तिका चटकसदृशस्य पक्षिण स्त्री ताम् अरण्ये वर्तमानेन शुना ग्रस्ताम् अश्विनावमोचयताम्[१]' इति। ऋचोऽयमर्थ—ह नरा ! नरौ ! नासत्या ! अश्विनौ ! वृकस्य विकर्तकस्य शुन आस्न आस्यात् युव युवाम् अभीके अभिगते वृकवर्तिकयो सङ्ग्रामे वर्तिका चटकसदृशीम् अमुमुक्तम् अमोचयतम्। उतो अपिच कविर्मृपि हे पुरुभुजा ! बहुपालकौ ! (युव ह युवामेव) युव युवा कृपमाण स्तुत्य (कृपमाण सन्त) विचक्षे विविध द्रष्टुम् अकृणुतम् अकुरुतम्। 'तुमर्थे०'(पा० ३ ४ ९)इति सेन्। कृपमाणम्-कृपि स्तुतिकर्मा तुदादिपु द्रष्टव्य। कृपायतिकृपण्यती अर्चतिकर्माणौ (निघण्टु ३ १४)।

अजोहवीदश्विना वर्तिका वाम् (ऋ० १ ११७ १६),
वृकस्य चिद्वर्तिकामन्तरास्या (ऋ० १० ३९ १३),
याभिर्वर्तिका ग्रसिताममुञ्चतम् (ऋ० १ ११२ ८) इत्येवमादयो निगमा ॥

ऋ० १. ११६. १५.

अत्राख्यानम्—'अगस्त्यपुरोहित खेलो नाम राजा तस्य सम्बन्धिनी विश्पला नाम स्त्री सङ्ग्रामे शत्रुभिश्छिन्नपादाऽऽसीत्। पुरोहितेनागस्त्येन स्तुताववश्विनौ रात्रावागत्य तस्या अयोमय पाद समधत्ताम्[१]' इति।

ऋष्यादि पूर्ववत्। ऋचोऽयमर्थ—आजा आजौ सङ्ग्रामे परितक्म्याया रात्रौ अगस्त्य-पुरोहितस्य खेलस्य राज्ञ सम्बन्धिन्या विश्पलाया चरित्र चरणम्—'अतिलूधू(सू)खनसहचर इत्र.' (पा० ३ २ १८४) इति करणे इत्र। वे पक्षिण पर्ण प(त)त्रमिव अच्छेदि हि पुरा छिन्नमभूत् (खलु)। हे अश्विनौ ! युवाम् (अगस्त्येन स्तुतौ सन्तौ) सद्यस्तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गन्तु विश्पलायै आयसीम् अयोमयी जङ्घा जङ्घोपलक्षित पाद प्रत्यधत्त सन्धानमेकीकरण कृतवन्तावित्यर्थ। तथा निगमा—अगस्त्ये ब्रह्मणा वावृधाना (ऋ० १ ११७ ११),

---

[१] The passage is borrowed from the commentary of Sāyaṇa with slight variation.

प्रति जङ्घा विश्पलाया अधत्तम् (ऋ० १.११८ ८),
युव सद्यो विश्पलामेतवे कृथ (ऋ० १० ३९ ८),
याभिर्विश्पला धनसामथर्व्यं (ऋ० १ ११२ १०) ।

ऋ० १.११६.१६.

तत्राख्यानम्—'वृषागिर पुत्र ऋज्राश्वो (नाम) राजर्षि । तस्य समीपेऽश्विनोर्वाहनभूतो रासभो वृकीभूत्वाऽवतस्थे। स च तस्या आहारार्थमेकोत्तरशतसख्याकान् मेषान् शकलीकृत्य स्वभूतजनाना पौरजनाना प्रददौ । [ऋज्राश्व शतमेक च मेषान् (ऋ० १ ११७ १८) इति मन्त्रान्तरे दर्शनात्] एव पौराहिते (पौराणामहिते) प्रवृत्त पिता शापेन नेत्रहीनमकरोत् । तेन स्तूयमानावश्विनौ अस्मद्वाहननिमित्तमस्यान्धता जातेति जानन्तौ तस्मै अक्षिणी प्रायच्छताम्'[1] इति । ऋचोऽयमर्थ —य ऋज्राश्व वृक्ये आत्मना पोषितायै वृकस्त्रियै शत शतसख्याकान् मेषान् शकलीकृत्य प्रादात् त चक्षदान क्षदतिरत्र शकलीकरणार्थे. । शकलीकृत्य दत्तवन्तम् ऋज्राश्व पिता शापेनान्ध दृष्टिहीन चकार कृतवान् । हे नासत्या ! नासत्यौ ! दस्रौ ! भिषजौ ! देववैद्यौ ! 'सुपा सुलुक्' (पा० ७ १ ३९) इति सर्वत्राकार. । आमन्त्रितत्वात् सर्वानुदात्तत्वम् (Cf. पा० ८ १ १९) । तस्मै ऋज्राश्वाय अक्षी चक्षुषी विचक्षे विविध द्रष्टुम् आधत्त व्यधत्तमकुरुतम् । कीदृशे अक्षिणी ? अनर्वन् अनर्वणी (द्रष्टव्य प्रति) पितृशापाद् गमनरहिते, ऋ गतौ—'अन्येभ्य०' (पा० ३ २ १७८) इति भावे वनिप् । अर्व गमन विषय प्रति अनयोर्नास्तीति अनर्वन्—'सुपा सुलुक्' (पा० ७ १ ३९) इति द्विवचनस्य लुक् नलोपाभावश्छान्दस । बहुव्रीहौ 'नञ्सुभ्याम्' (पा० ६ २ १७२) इति उत्तरपदान्तोदात्तत्वम् । शत मेषान्वृक्ये मामहानम् (ऋ० १ ११७ १७) इति निगमान्तरम् ।

ऋ० १.११६.१७

'सविता स्वदुहितर सूर्यारूपा सोमाय राज्ञे प्रदातुमैच्छत् । ता सूर्यां सर्वे देवा वरयामासु । तेऽन्योऽन्यमूचु । आदित्यमर्वाध कृत्वाऽऽजि धावाम योऽस्माक मध्ये उज्जेष्यति तस्येय भविष्यतीति । तत्राश्विनावुदजयताम् । सा च सूर्या जितवतोस्तयो रथमारुरोह'[1] । "अथ यत्र ह तत्सविता सूर्यां प्रायच्छत्सोमाय राज्ञे" इत्यादि ब्राह्मणम् (कौ० ब्रा० १८ १) ।

ऋचोऽयमर्थ —हे अश्विनौ ! वा युवयो रथम् अर्वता युष्मदीयेनाश्वेन जयन्ती जीयमाना सूर्यस्य सवितु दुहिता अतिष्ठत् आरूढवती । तत्र दृष्टान्त —काष्मेव, काष्म-शब्द काष्ठवाची यथा काष्ठमाजिधावनस्यावधिनया निर्दिष्ट लक्ष्यम् आशुगामी कश्चित् सर्वेभ्यो धावद्भ्य पूर्व निष्ठति पश्चाद्विश्वेदेवा. एतदारोहणस्थान हृद्भि हृदयै । 'पद्दन्' (पा० ६ १ ६३) इति हृदयस्य हृद्भाव । अन्वमन्यन्त अन्वजानन् । तदानी हे नासत्यावश्विनौ ! श्रिया ऋक्सहस्रलाभरूपया (सम्पदा) कान्त्या वा युवा ससचेथे सङ्गच्छेथे । 'पच समवाये' स्वरितेत्त्वादात्मनेपदम् (Cf. पा० १ ३ ७२) जयन्ती—व्यत्ययेन कर्मणि शतृप्रत्यय. ।

युवो रथ दुहिता सूर्यस्य (ऋ० १ ११७.१३) इति निगमान्तरम् ।

---

[1] The passage is borrowed from the commentary of Sāyaṇa with a few slight changes.

ऋ० १.११६.२०.

ऋचोऽयमर्थ —हे नासत्यावश्विनौ ! जाहुषो नाम कश्चिद् (राजा) तं विश्वत सर्वतः परिविष्टं शत्रुभि परिवृत राजानं नक्त रात्रौ सुगेभि सुष्टु गन्तु शक्यै रजोभि रञ्जकैर्मार्गै विभिन्दुना विशेषेण सर्वस्य भेदकेन आत्मीयेन रथेन ऊहथु । तस्माच्छत्रुसमूहान्निरगमयतम् । 'सीमिति परिग्रहार्थीयो वा पदपूरणो वा' (नि० १ ७) इति पादपूरणाय। हे अजरयू ! न जरा अजरा ताम् आत्मन इच्छत । 'सुप आत्मन क्यच्' (पा० ३ १.८) 'क्याच्छन्दसि' (पा० ३ २ १७०) इति । (जरारहितौ) नित्यतरुणौ ! (निर्गतेन) तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान् व्ययात विशेषेणागच्छतम्। एव जाहुषान्नासत्ययो रथ सार्थो जात इत्युक्तम्। नासत्ययोर्गोतमजलदान 'परावतम्' (ऋ० १ ११६ ९) इत्यनयोक्तम्। शरजलदानमाह, 'शरस्य चित्' (ऋ० १ ११६ २२) अनया ऋचा।

'नि जाहुष शिथिरे धातमन्त ' (ऋ० ७ ७१ ५) इति निगमान्तरम् ।

ऋ० १.११६.२२.

ऋचोऽयमर्थ —हे नासत्या ! नासत्यौ ! सत्यरूपौ ! नासिकाप्रभवौ ! वा युवाम् आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य चिद् एतत्सज्ञस्यापि (स्तोतु) पिपासितस्य पातवे पानाय, पा पाने– 'तुमर्थे०' (पा० ३ ४ ९) इति तवेन्। नीचाद् नीचीनाद् अवतात् कूपाद् उच्चा उच्चैरुपरिष्टाद् वा उदकम् आचक्रथु (आभिमुख्येन) कृतवन्तौ। तथा शचीभि युष्मदीयै कर्मभि परिचरणै जमुरये श्रान्ताय, जमु हिंसायाम्। शयवे चित् शयुनाम्ने ऋषये । स्तर्य निवृत्तप्रसवाम्, स्तीर्यते आच्छाद्यते प्रसवसामर्थ्याभावेनेति स्तरी ता गा पिप्यथु अग्निहोत्रार्थ पयसो दोग्ध्री पयसाऽपूरितवन्तौ। ओप्यायी वृद्धौ। 'लिड्यटोश्च' (पा० ६ १ २९) इति पीभाव वा —'वारपुनर्' (ऋ० प्रा० १ १०३) इति रेफ ।

'अघेन् दस्रा स्तर्य १ न्विपक्ताम्' (ऋ० १ ११७ २०) इति निगम । एव नासत्याभ्या नासिकायोनिभ्या विवस्वद्बीजाभ्या शयौ पुरुषार्थमुक्त्वा पौरुषे कारण बीजमित्युक्तम् ॥

विश्वके पुत्रदानाद्रूपादिपञ्चक सार्थमभूदित्युक्त पूर्व तदाह—

ऋ० १.११६.२३.

अवस्यते अवन रक्षणमात्मन इच्छते, 'सुप आत्मन०' (पा० ३ १ ८.) इति क्यच्। स्तुवते स्तुति कुर्वते कृष्णियाय, कृष्णपुत्राय छान्दसोऽपत्यार्थे घ । ऋजूयते आर्जवमिच्छते विश्वकाय एतत्सज्ञकाय ऋषये हे नासत्यौ ! युवा शचीभि आत्मीयै कर्मभि विष्णाप्वं विष्णाप्वनामान पुत्र दर्शनाय दर्शनार्थ ददथु दत्तवन्तौ। तत्र दृष्टान्त —पशु न नष्टमिव यथा कश्चिद्विनष्ट पशु स्वामिनो दृष्टिपथ प्रापयति तद्वत्। ऋजूयते—'पूशनार्जिरर्जु' (ऋ० प्रा० ९.१६) इति दीर्घ. ।

'युव नरा स्तुवते कृष्णियाय . विष्णवाप्व ददथुर्विश्वकाय' (ऋ० १ ११७.७) इति निगमः ॥ रेभकूपोद्धरणमश्विनोर्वदाम. । तत्रर्चमाह—

ऋ० १.११६.२४.

'पुरा खलु रेभमृषि पाशैर्बद्ध्वा असुरा कूपे कस्यचिद्दिवसस्य सायङ्काले प्रचिक्षिपु' । स चाश्विनौ स्तुवन् दश रात्रीर्नवाहानि च कूपमध्ये तथैवावतस्थे। दशमेऽह्नि प्रातरश्विनौ तं

कूपादुद्तारयताम्[1]' ऋचोऽयमर्थ'—दशरात्री' दशसख्याका निशाः। नव द्यून् नव संख्याकान्यहानि, अत्यन्तसयोगे द्वितीया (Cf. पा० २ ३.५)। एतावन्त कालम् अशिवेन दु खहेतुना दाम्ना अवनद्ध बद्ध—णह बन्धने, श्नथित शत्रुभिस्ताडितम्, 'श्नथ ताडने' श्नथतिर्वधकर्मा (निघण्टु २ १९)। अप्सु (कूपान्तर्वर्तमानासु) अन्तर्मध्ये असुरै. पातितम् अत एव उदनि उदके—'पद्भ्नोमा०' (पा०६ १ ६३) इत्युदकस्योदादेश। विप्रुत विप्लुत व्याक्षिप्तसर्वाङ्ग प्रवृक्त लुप्तोपमानमेतत्, प्रवृञ्जनेन सन्तप्त घर्ममिव व्यथया सन्तप्यमानम् एवम्भूत रेभ हे अश्विनौ! युवाम् उन्नित्यथु। तस्मात्कूपाद् उत्तीर्ण (उन्नीत) कृतवन्तौ। तत्र दृष्टान्त—यथा सोममिव यथा अग्निहोत्रहोमार्थम् अभिषुत सोमरस कूपसदृशे अग्निहोत्रस्थालीमध्ये वर्तमान स्रुवेणाध्वर्युरुन्नयति तद्वत्। अशिवेनेति 'एकादशिद्वादशिनोर्लघावष्टममक्षरम्' (ऋ० प्रा० ८. ३६) इति दीर्घ।

'युव रेभ परिषूतेरुरुप्यथो' (ऋ० १ ११९ ६) इति निगमान्तरम्।
कक्षीवानप्यश्विनौ कर्मान्ते आशिषमाशास्ते तथा वयमपि। तत्र ऋक्—

१. ११६. २५.

ऋचोऽयमर्थ—हे अश्विनौ! वा युवयो दसामि पुरा कृतानि कर्माणि दस वेश (निघण्टु २ १) इति तन्नामानि प्रावोच कक्षीवानहमुक्तवानस्मि। सुगव शोभनगोयुक्त सुवीर शोभनवीरो भूत्वा अस्य धनादे पति स्याम्। उतापिच पश्यन् अक्षिभ्या पश्यन्। उपलक्षणमेतत्, सर्वैरिन्द्रियै स्वस्वविषयदर्शनसमर्थै दीर्घ वर्षशतरूपेणायतम् आयुर्जीवितञ्चाश्नुवन् प्राप्नुवन्नहम् अस्तमिवेत् यथा गृह स्वामी निष्कण्टक प्रविशति एव नि शङ्केन जरिमाण जरा जगम्या (कण्टकराहित्येन प्राप्नुयाम्) वृद्ध सन् चिरकाल निवसेयमित्यर्थ। पति स्यामिति 'पदादयश्च स्यति०' (ऋ० प्रा० ५ ६) इति यत्वे प्राप्ते, 'पति स्या दित्ससि०' (ऋ० प्रा० ५ १९) इति निषेधान्न॥

'कक्षीवन्त यदी पुनरथ न कृणुथो नवम्' (ऋ० १० १४३.१) इत्यत्रिणोक्तम् (सख्यपुत्रेण)। तस्य कक्षीवतो दुहिता योषा स्वीया।

तदर्थेयमाख्यानपूर्विका ऋक्—

ऋ० १. ११७. ७

अत्राख्यानम्—'घोषा नाम ब्रह्मवादिनी कक्षीवतो दुहिता। सा कुष्ठिनी सती कस्मैचिद्वरायादत्ता पितृगृहे निषण्णा जीर्णाऽऽसीत्। साऽश्विनोरनुग्रहान्नष्टकुष्ठा सती पति लेभे[1]'।

तथा **बृहद्देवता** (७ ४२–४८)—

आसीत्काक्षीवती घोषा पापरोगेण दुर्भगा।
उवास षष्टि वर्षाणि पितुरेव गृहे पुरा॥४२॥

---

[1] The passage is borrowed from the commentary of Sāyaṇa with slight variation.

आतस्थे महती चिन्ता न पुत्रो न पतिर्मम ।
जरा प्राप्ता मुधा तस्मात् प्रपद्येह शुभस्पती ॥४३॥
यथैतौ मामकस्तात आराध्यावाप यौवनम् ।
आयुरारोग्यमैश्वर्यं सर्वभूतहने विषम् ॥४४॥
रूपवत्ता च सौभाग्यमह तस्य सुता यदि ।
ममापि मन्त्रा सिद्धा स्युर्यैस्तोष्येते मयाश्विनौ ॥४५॥
चिन्तयन्तीति सूक्ते द्वे 'यो वा परि'[1] ददर्श सा ।
स्तुतौ तावश्विनौ देवौ प्रीतौ तस्या भगान्तरम् ॥४६॥
प्रविश्य विजरारोगा सुभगा चक्रतुश्च तौ ।
भर्तारं ददतुस्तस्यै सुहस्त्य च सुत मुने ? (मुनिम्) ॥४७॥

ऋचोऽयमर्थ —हे नरा ! नेतारावश्विनौ ! युव युवा स्तुवते स्तोत्र कुर्वते कृष्णियाय कृष्णास्यस्य पुत्राय विश्वकाय विष्णाप्व ददथु । विष्णाप्वनामान विनष्ट पुत्र दत्तवन्तौ । हे अश्विनौ ! पितृपदे पित्रा सम्बद्धे दुरोणे स्वकीये जनकगृहे कुष्ठरोगेण भर्तारमप्राप्य पितृषदे पितृसमीपे निपण्णायै । जूर्यन्त्यै जरा प्राप्नुवत्यै घोषायै चिद् एतत्सज्ञायै ब्रह्मवादिन्यै अपि रोगोपशमनेन पति भर्तारम् अदत्तम् युवा दत्तवन्तौ । पितृपदे इति 'अन्यपूर्वे०' (ऋ० प्रा० ५ २१) इति षत्वम् । एवमकार्यमपि कृत्वा स्वीयपीडाऽश्विभ्या दूरीकृतेत्युक्तम् ।

ऋ० १. ११७. ८.

हे अश्विनौ ! युव युवा कण्वाय श्यावाय कुष्ठरोगेण श्यामवर्णाय ऋषये रुशती दीप्तित्वम् ? (दीप्तत्वचम्) अदत्त प्रायच्छतम् । अपिच तस्मै कण्वाय क्षोणस्य क्षोणाय— चतुर्थ्यर्थे षष्ठी । क्षि निवासे । पृषोदरादित्वात्क्षोणभाव । दृष्टिराहित्येन गन्तुमशक्तस्सन् एकस्मिन्नेव स्थाने निवसते निवासकायेत्यर्थ । (ऋषये) मह तेज तेजस चक्षुरिन्द्रियम् अदत्तमिति शेष । (तथा) हे वृषणा ! कामाना वर्षितारौ ! वा युवयो तत्कृत कर्म अस्माभि. प्रवाच्य (प्रकर्षेण) वाचनीय शसनीयम् । नार्षदाय नृषदपुत्राय कण्वाय ऋषये (बधिराय) —'ऋष्यन्धक०' (पा० ४ १ ११४) इत्यण् । 'उत कण्व नृषद पुत्रमाहु०' (ऋ० १० ३१ ११) इति मन्त्रान्तरे उक्तम् । तस्मै श्रव श्रवणेन्द्रिय यदध्यधत्त दत्तवन्तौ स्थ (इति यत् तदित्यर्थ) । अपर आह—ब्राह्मणस्य परीक्षार्थम् असुरा कण्वमृषि गूढे तमसि निदधु अत्रैव स्थित सन् व्युष्टामुषस विजानीहि यदि त्व ब्राह्मणोऽसीति । तमश्विनावागत्योचतु व्युष्टाया हर्म्यस्योपरि वीणा वादयन्तावावामागमिष्याव । त शब्द श्रुत्वा व्युष्टामुषस ब्रूहि तदेतत्प्रतिपाद्यते । हे वृषणा ! कामाना वर्षितारौ ! अश्विनौ वा युवयो तत्कृत कर्म प्रवाच्य प्रशसनीय यत् नार्षदाय नृषदपुत्राय कण्वाय क्षोणस्य क्षोण शब्दकारी वीणाविशेष महो महत क्षोणस्य श्रव शब्दम् अध्यधत्तम् उषसो विज्ञानार्थमधिकमकुरुतम् । इति । 'गोष्ठादिव गोषतमा०' (ऋ० प्रा० ५. ३०) इति निपातनान्नार्षदायेति षत्वम् । श्रवो अधि—'अयेऽयोऽवे०' (ऋ० प्रा० २ ३७) इत्यभिहिते प्राप्ते 'श्रवो अधि साऽर्ज्जयो०' (ऋ० प्रा० २ ५०) इति निषेधान्न ।

'युव कण्वायापिरिप्ताय चक्षु.०' (ऋ० १ ११८. ७) इति निगमः ॥

---

[1] ऋ० १०.३९; ४०.

ऋ० १.१२२.५.

'कक्षीवान् विराड्रूपया एकादशिनस्त्रयोऽष्टकश्चेत्येवलक्ष(क्ष्य)लक्षणया' (का० स० ब्रा० का० ६.६ पृ० ४) ऋचा विश्वान् देवास्तुष्टाव । कक्षीवानित्यन्वर्थसंज्ञा । 'कक्षीवान् कक्ष्यावान्'इति (नि० ६ १०) । 'कक्ष्या रज्जुरश्वस्य'इति यास्केनोक्ता (नि० २.२) । अत्राक्षेप, नन्वश्वबन्धन राज्ञ एवोचितम् । कक्षीवानिति राज्ञो नाम । अतोऽस्य राजत्वात् प्राता रत्नीयोक्त. (ऋ० १ १२५) प्रतिग्रहो नोपपद्यते, कुत ? 'याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह.'(मनु०१० ७६) इत्युक्तम्, (तत्र) ब्राह्मणस्यैवाधिकारो न क्षत्रियस्येति । नैष दोषोऽस्य । यद्यप्यसौ कलिङ्गाख्यस्य राज्ञ पुत्रस्तत्कथ कलिङ्गजेन स्वय वृद्धत्वादपत्योत्पादनाय सामर्थ्यमलभमानेन तदुत्पादनाय याचितो दीर्घतमा ऋषिरपत्योत्पादनाय प्रेषितया राजमहिष्या-ऽतिजरठेन महर्षिणा सह रन्तु लज्जमानया स्ववस्त्राभरणैरलङ्कृत्य स्वप्रतिनिधित्वेन प्रेषिता-मुशिङ्नामिका योषित दासीमित्यवगत्य ऋषिणा स्वमन्त्रपूतेन जलेनाभिषिच्य ऋषिपुत्री कृत्वा तया सह रेमे । एतदुत्पन्न कक्षीवान् राज्ञ पुत्रोऽभूत्[1], दासीपुत्र औशिज. कक्षीवान् कलिङ्गस्य पुत्रोऽभूदिति तात्पर्यार्थ ।

तथा **बृहद्देवता** (४ २४,२५)—

अङ्गराजगृहे दासीमुशिज पुत्रकाम्यया ॥२४॥
राज्ञा च प्रहिता मत्वा शुद्धा कृत्वाऽऽरमन्मुनि ॥इति॥
'व्याङ्परिभ्यो रम ' (पा० १ ३ ८३) इति रमनेराङ्पूर्वत्वात्परस्मैपदम् ।

ऋचोऽयमर्थ —हे अश्विनौ ! औशिज उशिक्पुत्र कक्षीवानहम् । आहुवध्यै युष्मदाह्वा-नाय वो युष्मत्सम्बन्धिन रुवण्यु रवणीय शब्दनीय शस स्तोत्रम् अच्छ आभिमुख्येनाप्तु वोचेय ब्रवीमि । बहुवचन पूजार्थम् । 'लिङ्याशिष्यङ्' (पा० ३ १ ८६) इत्यङ् । 'वच उम्' (पा० ७ ४ २०) इति वचेरुम् । केव ? घोषेव, यथा घोषा अस्मत्पुत्री ब्रह्मवादिनी सा यथा अर्जुनस्य श्वेतवर्णस्य शरीरगतत्वग्रोगस्य नशे नाशनाय युवयो शस स्तोत्रमकार्षीत् तद्वदहमपीत्यर्थ । हे देवा. ! वो युष्मत्सम्बन्धिने दावनेऽभीष्टदात्रे पूष्णे पोषकाय एतन्नामकाय अच्छाभि प्राप्तु शस वोचेय स्तौमि । किञ्च अग्नेर्वसुतांति तत्सम्बन्धि वसुदानमपि वोचेय स्तौमि । दावन आँ अच्छेति 'एकारान्त मित्रयोर्०' (ऋ० प्रा० २ ६१) इति सचादित्वाद् (ऋ० प्रा० २ ६७) प्रकृतिभावानुनासिकोपधात्वम् । 'आडोऽनुनासिकश्छन्दसि'इति (पा० ६ १ १२६) 'सुता या-हि-'इत्यन्यत्वात् (ऋ० प्रा० ७ ६) अच्छेति सामवशसन्धि ॥

ऋ० १.१२५.७.

'स्वनयस्य दानस्तुत्युत्पत्तये इतिहास —दीर्घतमस पुत्र कक्षीवाञ्नाम ऋषि ब्रह्मचर्य चरन् वेदाभ्यामाय गुरुकुले बहुतरकाल स्थित्वा वेदान्सम्यगधीत्य व्रतानि (च) चरित्वा तेनानुज्ञात स्वगृह प्रति (प्र) यास्यन् मध्येमार्ग रात्रौ विश्रान्त (सुष्वाप) । प्रभाते भावयव्यस्य पुत्र स्वनयो नाम राजा सानुचर सङ्क्रीडमाण अकस्मात् कक्षीवतोऽन्ति-कमागत. । स च रभसात् प्रतिबुद्ध. सहसोत्तस्थौ । त च राजा पाणौ गृहीत्वा स्वकीय-

---

[1] The passage is borrowed from the commentary of Sāyaṇa with slight variation.

मासनमुपवेश्यास्य सौन्दर्यमवगत्य स्वकन्याप्रदानमना. पप्रच्छ । भगवन्[1] कस्य पुत्रः किन्नामा त्वम् ? इति । स च पृष्टो मातर पितर स्ववृत्तान्त च आचष्टे स्म । (स च) राजा सम्भाव्य इत्यवगत्य मुदितमनाः स्वगृह प्रापय्य तस्मै मधुपर्कमाचरिष्यन् वस्त्रमाल्यादिभि पूजयित्वा सरथा दश कन्या निष्कशतमश्वशत पुङ्गवाना शत गवा षष्ट्युत्तरसहस्र पुनरेकादश रथाश्च प्रादात् । स च सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोऽन्तिकमागत्य तस्मै प्रादर्शयत्[1]। दर्शयित्वा परोक्ष प्राता रत्नमिति (ऋ० १ १२५) अनेन प्रशसति राजान स्वनयम् ।

तथा **बृहद्देवता** (३ १४०–१५०)—

ऋषिर्दान तु भाव्यस्य [2]'प्रातरित्यत्र शसति ॥१४०॥

काक्षीवत 'कदित्थेति[3] यदैन्द्रमुपदिश्यते ।
परोक्ष वैश्वदेव तत् प्रदिष्ट स्वरसाममु ॥१४१॥

अधिगम्य गुरोर्विद्या गच्छन् स्व निलय प्रति ।
कक्षीवानध्वनि श्रान्त सुप्वापारण्यगोचर ॥१४२॥

त राजा स्वनयो नाम भावयव्यसुतो व्रजन् ।
क्रीडार्थ सानुगोऽपश्यत् सभार्य सपुरोहित ॥१४३॥

अथैन रूपसम्पन्न दृष्ट्वा देवसुनोपमम् ।
कन्यादाने मति चक्रे वर्णगोत्राविरोधत ॥१४४॥

सम्बोध्यैन स पप्रच्छ वर्णगोत्रादिक तथा ।
राजन्नाङ्गिरसोऽस्मीति कुमार प्रत्युवाच तम् ॥१४५॥

पुत्रोऽह दीर्घतमस औचथ्यस्य ऋषेर्नृप ।
अथास्मै स ददौ कन्या दशाभरणभूषिता ॥१४६॥

नावतश्च रथाञ् श्यावान् वीड्वङ्गान्वे चतुर्युज ।
वधूना वाहनार्थाय धनकुप्यमजाविकम ॥१४७॥

निष्काणा वृषभाणा च शत शतमदात्पुन ।
एतत्तदुत्तरे सूक्ते [4]'शतमित्यादिपूच्यते ॥१४८॥

शतमश्वाञ्छत निष्कान् रथान् दश वधूमत ।
चतुर्युजो गवा चैव सहस्र षष्टयधिकम् ॥१४९॥

स्वनयाद्भावयव्याद्य. कक्षीवान्प्रत्यपद्यत ।
प्रतिगृह्य च तुष्टाव तत पित्रे शशस च ॥१५०॥ इति ।

तथा सूत्रम्—"कक्षीवन्त द्वितीयम्,[5] कक्षीवानौशिज स्वनये भावयव्ये सनि ससान. उत्तमे सूक्ते नाराशसे निगदेत्" इति (शा० श्रौ० सू० १६ ११ ४–६)। "येन[6] नरा. प्रशस्यन्ते

---

[1] The passage is borrowed from the commentary of Sāyana.
[2] ऋ० १.१२५ [3] ऋ० १ १२१ [4] ऋ० १.१२६ २
[5] 'यथा' इति, उत्तमे 'च' इति चाधिकं सूत्रे, 'नाराशसे' इति तु नास्ति ।
[6] इदं निरुक्ते नास्ति ।

तत्सूक्तं नाराशंसम् । येन नरा प्रशंसन्ते[1] स नाराशंसो मन्त्र" इति **यास्कः** (नि० ९.९) । नाराशसानि भवन्तीति सूक्तम् । कक्षीवास्त्रिष्टुभा स्वनय स्तौति—पृणन्त. (प्र) यच्छन्तः दातारो जना. दुरित दु.खम् एन पाप (च) मारन् मा प्राप्नुवन् । ये सूरयः विद्वास· सुव्रतास देवाना याजका. मा जारिषु जरया जीर्णा मा भवेयु । तर्हि एनोभाजन·* क उच्यते ? तेषा दातृणा सूरीणा चान्य. तेभ्योऽदाताऽसूरि कश्चित्परिधि पापाना परितो धारकोऽस्तु । अपृणन्तमदातारम् । पृणक्षि पृणातीति दानकर्मसु पाठात् (निघण्टु ३ २०) देवादीनाम् अपृणन्त शोका दु खानि अभि आभिमुख्येन सयन्तु सम्यक् प्राप्नुवन्तु । इति दाता सुखी सूरिरजर इति सिद्धम् ॥

ऋ० १. १२६. ६.

'भावयव्यरोमशयोर्दम्पत्यो सवाद' इत्य**नुक्रमणी** (का० स० १ १२६ पृ० १०) ।
तथा **बृहद्देवता** (३ १५५–५६, ४ १–३)—

पञ्चामन्दान्भावयव्यस्य गीता जायापत्योर्द्वे ऋचौ सम्प्रवाद[2] ॥
(सम्प्रवाद रोमशयेन्द्रगार्ग्योरेते ऋची मन्यते शाकपूणि ॥१५५॥

इन्द्रेण जायापत्योश्चेतिहास दृचेऽस्मिन्मन्यते शाकटायन) ॥
[3]प्रादाच्च ता रोमशा नाम साम्ना बृहस्पतिर्भावयव्याय राज्ञ ॥१५६॥

ततस्तमर्थ हरिवान् विदित्वा प्रिय सखाय स्वनय दिदृक्षु ॥
अभ्याजगामाशु शचीसहाय प्रीत्याऽर्चयत्त विधिनैव राजा ॥१॥

अभ्याजगामाङ्गिरसी च तत्र हृष्टा तयो सा चरणौ ववन्दे ॥
इन्द्र सखित्वादथ तामुवाच रोमाणि ते सन्ति न सन्ति राज्ञि ! ॥२॥

सा बालभावादथ त जगाद उपोप मे शक ! परामृशेति ॥
(ता पूर्वथा[4] सान्त्व्य नृप प्रहृष्टो अन्वव्रजत्साथ पति पतिव्रता) ॥३॥

सम्भोगाय प्रार्थितो भावयव्य स्वभार्या रोमशाम् अप्रौढा मत्वा परिहसन्ननुष्टुभाऽऽह—अयमर्थ—भोज्या भोगयाग्या एषा आगधिताऽसमन्ताद् गृहीता स्वीकृता तथा परिगधिता परितो गृहीता । आदरार्थं पुनर्वचनम् । 'गध्य गृह्णाते' इति **यास्क**. (नि० ५ १५) । यद्वा आगधिता आ समन्ताद्भावेन मिश्रयन्ती आत्मन प्रजननेन बाह्य भुजादिभिरित्यर्थ । 'गध्यर्तिर्मिश्रीभावकर्मा' इति **यास्क**· (नि० ५ १५) । पूर्वपक्षे पुरुषस्य प्राधान्यम् उत्तरपक्षे योषित इति भेद । कीदृशी सा ? या जङ्घहे अन्यर्थं गृह्णाति कदापि न मुञ्चति । अत्यागे दृष्टान्त—कशीकेव कशीका नाम सूनवत्या नकुली सा यथा पत्या सह चिरकाल क्रीडति न कदाचिदपि मुञ्चति तथैषापि । किञ्चैषा भोग्या यादुरी यादुरित्युदकम् । रेतोलक्षणमुदक राति (आ) ददाति यादुरी, बहुरेतोयुक्तेत्यर्थ । तादृशी सती याशूना सम्भोगाना, याशु (वे० भा० यश)

---

[1] Nirukta reads **प्रशस्यन्ते ।**
[2] Bṛhaddevatā reads **जायापत्योः सम्प्रवादो द्वृचेन ।**
[3] **प्रादात्सुतां रोमशां नाम नाम्ना ।** [4] Bṛhaddevatā reads **पूर्वया ।**
* **० भाजनं** is suggested for **० भाजनः**

इति प्रजननम । तत्सम्बन्धीनि कर्माणि यानि भोगा. । तेषां शता शतानि असख्यातानि मह्य ददातीति ॥

रोमशा नाम बृहस्पते पुत्री परिहसन्त स्वभर्तारं प्रत्याह—

ऋ० १. १२६. ७.

भो पते[1] मे मा द्वितीयार्थे चतुर्थी । उपोप उपेत्योपेत्य परामृश सम्यक् स्पृश भोगयोग्यामवगच्छेत्यर्थ । मे ममाङ्गानि दभ्राणि अल्परोमाणि । 'दभ्रमल्पकमित्यत्पस्य'इति यास्कः (नि० ३ २०) । मा मन्यथा मा बुध्यस्व । अदभ्रत्व विशदयति—अह सर्वा रोमशा बहुरोमयुक्ताऽस्मि—यतोऽहमीदृशी अत सम्पूर्णावयवाऽस्मि । रोमशत्वे दृष्टान्त —गन्धारीणामविकेव । गन्धारा (ये) देशा तेषा सम्बन्धिन्यविजातिरिव तद्देशस्था अवयो मेषा यथा रोमशा तथाहमस्मि । यद्वा यथा गन्धारीणा गर्भधारिणीना स्त्रीणाम् अविका अत्यर्थ तर्पयन्ती योनिरिव तासाम् आप्रमत्व रोमादिविकर्तनस्य शास्त्रनिषिद्धत्वात् योनि रोमशा भवति । यतोऽहमीदृशी अतो माम् अप्रौढा मा बुध्यस्वेत्यर्थ । **सामगृह्ये**—'नाजातलोम्न्योपहासमिच्छेद्[1]' इति । तथा **कर्मप्रदीपे**—'अजातव्यञ्जनाऽलोम्नी न तया सह सविशेत्[2]' इति ।

ऋ० १. १४७. ३.

अत्रेतिहास—'उचथ्यबृहस्पतिनामानौ द्वावृषी आस्ताम् । तत्रोचथ्यस्य ममता नाम भार्या सा च गर्भिणी । ता बृहस्पतिर्गृहीत्वाऽगमयत्, शुक्रनिर्गमनावसरे प्राप्ते गर्भस्थ रेत प्रावादीत्, हे मुने[1] रेतो मा त्याक्षी । पूर्वमह सवसामि रेत सङ्कर मा कार्षीरिति । एवमुक्तो बृहस्पति बलात् प्रतिरुद्धरेतस्क सन् शशाप । हे गर्भ[1] त्व यतो रेतोरोधमकरो अतस्त्व दीर्घ तम प्राप्नुहि, जात्यन्धो भवेति । एव शापतो (शप्तो) ममताया दीर्घतमा अजायतेति । स चोत्पन्नस्तमोव्ययाय अग्निमस्तौषीत् । स च स्तुत्या प्रीत आन्ध्य पर्यहरत्[3]' इति ।

तथाऽनुक्रमणीवृत्तौ षड्गुरुशिष्य (६ ५२ पृ० १२७)—

इतिहासो हेतुभूतो विस्पष्टार्थ प्रवर्ण्यते ॥१॥

प्रजापते पुत्र आसीदङ्गिरा नाम वै मुनि ।
तस्य पुत्रास्त्रयस्त्वासस्त्वेताग्निसमतेजस ॥२॥

उचथ्यो ज्येष्ठ इत्येव मध्यमस्तु बृहस्पति ।
सवर्तस्तु कनिष्ठोऽथ ज्येष्ठो गुणगणैर्विभु ॥३॥

(य सवर्तो मत इति प्रथितो भारते भृशम्) ।
उचथ्यभार्या ममता नाम्नाऽऽसीद् वरवर्णिनी ॥४॥

उचथ्याहितगर्भां तां चकमेऽथ बृहस्पति. ।
उचथ्यपुत्रो ममतागर्भस्थोऽवोचदुत्तरम् ॥५॥

---

[1] गो० गृ० सू० ३. ५. [2] गो० स्मृ० ३. १३६. [3] The passage is borrowed from the commentary of Sāyaṇa.

ज्येष्ठपत्नी मातृकल्पां मैनां गन्तु मन कृथाः ।
(अहो कामस्य दौरात्म्य यदि मां त्वमिहागतः ॥६॥

किञ्चाहमत्र प्रविष्टः क्व ते गर्भो निधीयताम्) ।
अमोघरेतास्त्वं चासि न द्वयोरिह सम्भव ॥७॥

(द्वितीयस्तात ! मा मैवमकार्य च कृथा महत् ।
इति गर्भवच श्रुत्वा शशापैव (न) बृहस्पति) ॥८॥

दीर्घं तमस्त्व प्रविश मद्वाक्यादन्ध एव च ।
ततो दीर्घतमा नाम ह्यचथ्यतनयोऽभवद् ॥९॥ इति

तथा **बृहद्देवता** (४ ११–१५)—

द्वावचथ्यबृहस्पती ऋषिपुत्रौ बभूवतु ।
आसीदुचथ्यभार्या तु ममता नाम भार्गवी ॥११॥

ता कनीयान् बृहस्पतिर्मैथुनायोपचक्रमे ।
शुक्रस्योत्सर्गकाले तु गर्भस्त प्रत्यभाषत ॥१२॥

इहास्मि पूर्वमम्भूतो न कार्यं शुक्रमद्धुर ।
त शुक्रप्रनिषेध तु न ममर्ष बृहस्पति ॥१३॥

स व्याजहार गर्भ त तमस्ते दीर्घमस्विति ।
स च दीर्घतमा नाम बभूवौरुचथ्यज ॥१४॥

स जातोऽभ्यपतद्देवानकस्मादन्धता गत ।
ददर्देवास्तु तत्रेत्रे ततोऽनन्धो बभूव स ॥१५॥ इति ।

दीर्घतमास्त्रिष्टुभा अग्नि तुष्टाव। अग्निष्टुनि आग्नि अग्निमारुते याम्यतृचस्थाने "कथा ते अग्ने शुचयन्त आयोरिति निस्रो यामीनाम्" (शा० श्रौ० सू० १४५७ १२) इति सूत्रे विनियोग । ऋचोऽयमर्थ—हे अग्ने ! ते तव सम्बन्धिनो ये पायव प्रसिद्धा पालयितारो रश्मय मामतेय ममताया पुत्र दीर्घतमसम् अन्ध पश्यन्त रक्षणीयोऽस्माभिरित्यवगच्छन्त दुरितात् दुःखादन्धत्वादरक्षन् । तान् रश्मीन् सुकृत सुष्ठकर्तॄन् विश्ववेदा विश्वप्रज्ञोऽग्नि ररक्ष रक्षति, अस्मत्पालनायेति भाव । तैरस्मान् रक्षतीत्यर्थ । एव रक्षितानस्मान् दिप्सन्त दम्भितुमिच्छन्त रिपव कामादयो नाह देभु, 'अहेति विनिग्रहार्थीय' (नि० १५), न खलु दम्भितु शक्नुवन्ति। तान्प्रकृत—'सकारोदयो तकारम्'इति (ऋ० प्रा० ४ १७) नकारस्य पक्षे तकारागम । एव धीमद्भिरग्निराराध्य इति सिद्धम् ॥

उक्त च—एकाहमपि कर्मस्थो योऽग्निशुश्रूषण शुचि. ।
नयत्यत्र तदेवास्य शताहु दिवि जायते ॥ इति ॥

ऋ० १. १५८. ५.

अत्रारुयानम्—'जराजर्जरितगात्र जात्यन्ध दीर्घतमसं मामतेय वरीवसितुम् अशक्नुवानाः स्वगृहदासा अग्नौ दाहाय प्रचिक्षिपु । स प्रक्षिप्तोऽग्नौ अश्विनावस्तावीत् । तौ चैनमरक्षताम् । ततोऽप्यम्रियमाणमुदकेषु प्रापातयन् । तत्र निमग्न. पुनरश्विनौ तुष्टाव । तुष्टौ सन्तौ तौ जलादु-

दहाष्टाम्। एवमवध्यं त त्रैतनो नाम कश्चिद्दासोऽस्य शिरोऽमौ वक्षश्चाविध्यत्। ततोऽप्यपालयताम्[1]।

तथा **बृहद्देवता** (४ २१–२४)—

जीर्णं तु दीर्घतमस खिन्नास्तत्परिचारिका[2]।
दासा अग्नौ नदीनोये दृष्टिहीनमवादधु ॥२१॥

तत्रैकस्त्रैतनो नाम शस्त्रेणैनमपाहनत्।
शिरश्चासावुरश्चैव स्वयमेव न्यकृन्तत ॥२२॥

हत्वा दीर्घतमास्त तु पापेन महता वृतम्।
आत्माङ्गान्यनुदच्चैव तत्रोदोन्मोहितो भृशम् ॥२३॥

अङ्गदेशसमीपे तु त नद्य समुदक्षिपन् ॥ इत्यादि।

आततायिव्याघ्रभये ऋग्विधाने उक्तम्—

आततायिनमायान्त दृष्ट्वा व्याघ्रमथो वृकम्।
न मा गरन्निति जपस्तेभ्य एव प्रमुच्यते ॥[3]

त्रिरात्रोपोषितो रात्रौ जपेदासूर्यदर्शनात्।
आप्लुत्य प्रयत सूर्यमुपतिष्ठेद्दिवाकरम् ॥[4]

पश्यन्ति तस्करा नैन तथान्ये पापबुद्धय।
एक शतानि त्रायेत तस्करेभ्यश्चरन् पथि ॥[5] इति।

दीर्घतमा अश्विनौ त्रिष्टुभा तुष्टाव। नद्यो नदनशीला मातृतमा मातृवज्जगता हितकारिण्य आप मा मा दीर्घतमस न गरन् न गिरेयु। निमग्न मा कुर्यु। 'गृ निगरणे' लेटि व्यत्ययेन शप्। गरणप्राप्ति दर्शयति—यद् यस्माद् दासा अस्मदुपक्षपयितारो मदीयगर्भदासा ईम् इम दीर्घतमस मा सुसमुब्ध सुष्ठु सङ्कुचितमर्वाङ्गम्। अवाधु अवाङ्मुखमपातयन्। किञ्च अस्य मम शिरस्त्रैतन एतन्नामको दासोऽत्यन्त निर्घृण सन् यद् यदा वितक्षत्। न केवल शिर एव अपि तु मदीयम् उर वक्षस्थलम् असौ च ग्रथ हतवान्। विदारितवानित्यर्थ। हन्तेर्लुडि छान्दसमेतद्रूपम्। तत स्वकीयमुर असावपि स्वशस्त्रेणैव तथा कृत्तवान्। तद्युवयोर्माहात्म्यमिति भाव। सुसमुब्धमिति 'अन्यपूर्वे०' (ऋ० प्रा० ५ २१) इति पदादित्वेन षत्वे प्राप्ते 'सस्पृक्स्वृमर्०' (ऋ० प्रा० ५ २४) इति निषेधान्न॥

ऋ० १. १५८. ६.

दीर्घतमास्स्वात्मानमनुष्टुभाऽश्विनोर्महानुभावत्व ब्रवीति। तथा **ब्राह्मणम्**—"[6]यद्येतदृषिराह दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे इति तदेतदायुष्कामस्य शस्त्रमिति" (शा०

---

[1] The passage is borrowed from the commentary of Sāyaṇa with slight variation. [2] Bṛhaddevatā reads **तत्परिचारिणः। दासा बद्धवा।**

[3] Ṛgvidh. 1.25.6. [4] Ṛgvidh. 1.25.7.

[5] Ṛgvidh. 1.26.1. [6] S. A. reads **तदप्येतदृषि०**

आ० २.१७)। अयमर्थ.—दीर्घतमा एतन्नामा ऋषि स च मामतेय· ममताया. पुत्र·। दशमे युगे दशयुगपर्यन्त महानुभावयोरश्विनो प्रसादात् पूर्वोक्ताद् दु खाद्विमुक्तोऽत्यन्त सुखी स्वपुत्र-भार्यादिभि सहित जीवितवान्। दशमे युगेऽतीते सति जुजुर्वान् जीर्ण· वलीपलितगात्रो बभूव। एवम्भूत सन् अपाम् अपसा कर्मणाम् अर्थं प्रयोजन यतीनां प्राप्तुवन्तीना तासा प्रजाना (ब्रह्मा ब्रह्मसदृश परिवृढो भवति) किञ्च सारथिस्तन्निर्वाहको भवति देवो भवतीत्यर्थ।

ऋ० १.१६१.६

दीर्घतमा जगत्या ऋभूस्तुष्टाव। पष्ठेऽहन्यग्निमारुते विनियुक्तम्। 'अय जायत' इति खण्डे 'कतरा पूर्वा (ऋ० १ १८५) किमु श्रेष्ठ०' (ऋ० १ १६१) इति सूत्रितम्[1]। ऋचोऽय-मर्थ—इन्द्रो हरी एतन्नामकावश्वौ रथे युयुजे योजितवान्। 'हरी इन्द्रस्य'इति निघण्टु: (१ १५)। तथाऽश्विना अश्विनौ रथ योजितवन्तौ। तथा बृहस्पति एतन्नामको देवो विश्व-रूपा नानारूपा गाम् उपाजत उपागमत्। स्वीकृतवानित्यर्थ। 'विश्वरूपा बृहस्पते' इति (निघण्टु. १ १५)। तत्र तस्माद् ऋभुविभ्वा वाजश्च यूय देवानिन्द्रादीनगच्छत। गत्वा च हे स्वपस ! शोभनाश्वरथादिकर्मवन्त यूय यज्ञिय यज्ञार्ह भाग सोमरूपम् ऐतन प्राप्नुत। कर्मसामर्थ्येन हविर्भुजो भवतेत्यर्थ। ऋभूणाम् अश्वादिकरणे निगमा—

तक्षन् रथ सुवृत विद्मनापस (ऋ० १ १११ १),
अश्व कर्त्वो रथ उतेह कर्त्व (ऋ० १ १६१ ३),
रथ ये चक्रु सुवृत नरेष्ठा (ऋ० ४ ३३ ८) इत्येवमादय।

ऋ. १.१६२ ६

त एव धन्या ये पशुना निरूढाग्नीषोमीयसवनीयशूलगवादिना देवान् द्योतमानान् इन्द्रा-दीन् यजन्ते तर्पयन्ति। कुत ? त्रिभिर्ऋणैर्ऋणवान् जायते देवेज्यया देवानामनृणा भवन्तीति धन्यत्वम्। ब्राह्मणे तथोक्तम्—'तद्यदुपवसथेऽग्नीषोमीय पशुमालभत आत्मनिष्क्रयणो हैवास्यैष तेनात्मान निष्क्रीयानृणो भूत्वाऽथ यजते' इत्यनृणत्वमुक्तम् (कौ० ब्रा० १०.३)। त एव वैष्णवा विष्णुरूपेऽग्नौ जुह्वतीति वैष्णवा। विष्णुरग्निरित्युक्तत्वात्। अत एव वैष्णवा. देवा पशुना कथ हृष्टा भवन्तीत्याह—'अथ मनोतामन्वाह सर्वा ह वै देवता पशुमालभमानमुपगच्छन्ते मम नाम ग्रहीष्यति' इति ब्राह्मणमुक्तम् (कौ० ब्रा० १० ६)। एव सति यदि शमितु विशसनकर्तु नखस्थ हस्तस्थञ्च मक्षिकाभिराश्रित यदामिषञ्च तद्वेष्ट भवति। तर्हि सुसस्कृतामिषस्य का कथा। अस्मिन्नर्थे दैर्घतमसी अश्वस्तुतौ त्रिष्टुब् ऋक्। अश्वमेधे 'अध्रिगो शमीध्वमिति परिशिष्य मा नो मित्र इति' (ऋ० १.१६२) विनियुक्तम् (शां० श्रौ० सू० १६.३.२२)। ऋचोऽयमर्थ—अश्वस्य तदवयवभूतस्य क्रविष: आममासस्य यदङ्ग मक्षिका आश अभक्षयत्। 'अश भोजने'। यद्वा कर्मणि षष्टी। अश्वस्य यन्माम भक्षयति वा। अथवा स्वरौ पश्वञ्जनकाले यद् रिप्तं लिप्तमस्ति। स्वरुणा पशुमनक्तीति

---

[1] A fragment of the शां० श्रौ० सू० 10.8.14.

[2] ०मालभ्यमानमुपसङ्गच्छन्ते is the reading of the Brāhmaṇa.

श्रुतेः (Cf. तै० सं० ५.५७.१), अथवा स्वधितौ छेदनकाले अवदानकाले यल्लिप्तमस्ति शमितुर्हस्तयो यच्च विशसनकाले तस्य नखेषु लिप्तमस्ति ता सर्वा तानि सर्वाणि हे अश्व ! तव सम्बन्धीनि देवेष्वस्तु देवसन्तोषणार्थाय भवन्तु । अश्व इत्युपलक्षणम् । सर्वेषु पशुष्वेव सन्तोषाय भवन्त्वित्यर्थ. ॥

ऋ० १ १७०. १.

इन्द्रदृष्टान्तेन द्रढयति—इन्द्रेण परमैश्वर्येणागस्त्यसवादे सूक्ते न नूनमित्यस्मिन्नेष धर्म उदाहृत । तत्रानुक्रमणी "न नून पञ्चागस्त्येनैन्द्रे हविषि मरुतामुद्यत इन्द्रागस्त्ययो सवाद ऐन्द्रस्तत्राद्या" (KSA. १ १७० पृ० १२) इति । तथाह यास्क.—"अगस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्य सम्प्रदित्साञ्चकार । स इन्द्र एत्य परिदेवयाञ्चक्रे' (नि० १ ५) इति परिदेवना नाम मन्युपूर्वको विलाप ।

तथा बृहद्देवता (४ ४९—५३)—

[1]निरुप्य यद्धविश्चैन्द्र मरुद्भ्यो दातुमिच्छत [1] ॥४९॥
विज्ञायावेक्ष्य तद्भावमिन्द्रो नेति तमब्रवीत् ।
न श्वो नाद्यतन ह्यस्ति वेद कस्तद्यदद्भुतम् ॥५०॥
कस्यचित्त्वर्थमञ्चारे चित्तमेव विनश्यति ।
किं न[2] इत्यब्रवीदिन्द्रमगस्त्यो भ्रातरस्तव ॥५१॥
मरुद्भि सम्प्रकल्पस्व वधीर्मा न शतक्रतो !
किं नो[3] भ्रातरिति त्वस्यामिन्द्रो मान्यमुपालभत् ॥५२॥
अगस्त्यस्त्वरमित्यस्या क्षुब्धमिन्द्र प्रशामयन् ।
प्रादात्सवनन कृत्वा तेभ्य एव च तद्धवि ॥५३॥ इति ।

बृहत्या इन्द्रोऽगस्त्य तुष्टाव । परिदेवनाप्रकार प्रतिपाद्यते । (इन्द्र आह) अद्यतन यदस्ति तन्नूनमद्य नास्ति । 'नूनमिति विचिकित्सार्थीय' (नि० १ ५) विचिकित्सा नाम विवेकपूर्वोऽवधारणाभिप्राय । अत्राद्येति यद्यपि नास्ति तथाप्युत्तरपदे श्वरिति निर्देशादद्येति गम्यते । तथा श्वोऽपि नून नो श्वस्तनमपि नैवास्ति । अद्य यथा अस्मभ्य निरुप्तमस्मदर्थ नास्ति किल श्व कथ लप्स्यते ? इति भाव । यदद्भुतम् अन्यस्मै निरुप्य अन्यस्मै दत्तमिति यदस्ति वैपरीत्य तत् को वेद ? यद्वा यदद्भतम् अभूत भाविकार्य यदस्ति तत् को वेद ? अनेन श्वो लप्स्यत इत्याशा न कार्येत्युक्त भवति । तदेवाह—अभिसञ्चरेण्य सर्वत सञ्चारि अन्यस्य चित्त मानस को जानातीति शेष । उतापि च आधीतम् आध्यात चिरकाल चिन्तितमपि विनश्यति किमु सकृत्स्मृत नश्यतीति धर्मे विलम्बो न कर्तव्य इत्युक्त भवति । तथोक्तमन्यत्र—

श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्यु. कृत वा यदि वाऽकृतम् ॥

म० भा० शा० प० १७५ १५, ३२१ ७३

---

[1] निरुप्तं तद् . . मिच्छति is the reading of BD.
[2] RV. I. 170. 2 [3] RV.I.170 3 [4] RV.I.170 4

इदमद्य त्विदं श्वोऽपि नैतन्मर्त्यस्य युज्यते ।
अवश्यम्भाविना श्वोऽपि (श्वो वा) नैतस्मिन्भविता भवान् ॥
यस्य स्यान्मृत्युना सख्यं येन पीतमुतामृतम् ।
तेनेद युज्यते वक्तुमिद मे श्वो भविष्यति ॥
आदान च प्रदानं च कर्तव्यस्य च कर्मण ।
क्षिप्रमक्रियमाणस्य काल. पिबति तद्रसम् ॥ इत्यादि ।

ऋ० १. १७९. १

पूर्वीरहमित्यनेनानयोर्दम्पत्यो भोगार्थं सवाद । तथा**नुक्रमणी**—"पूर्वी षड् जायापत्यो-र्लोपामुद्राया अगस्त्यस्य च द्वृचाभ्या रत्यर्थं सवाद०[1]" (KSA. १ १७९ पृ० १२) इति।

तथा **बृहद्देवता** (४ ५७–६०)—

[2]अगस्त्यस्य ऋषेर्भार्या लोपामुद्रा यशस्विनी ।
उपजल्पितुमारेभे रह सम्भोगकाम्यया ॥५७॥
द्वाभ्या सा त्वब्रवीदृग्भ्या पूर्वीरिति चिकीर्षितम् ।
रिरमुस्तामथागस्त्य उत्तराभ्यामतोषयत् ॥५८॥
विदित्वा तपसा सर्वं तयोर्भाव रिरमतो ।
[3]न त्वेन. कृतवानग्नि ब्रह्मचार्युत्तमे जगौ ॥५९॥
प्रशस्य त परिष्वज्य गुरू मूर्ध्न्यवजिघ्रतु [4] ।
स्मित्वैनमाहतुश्चोभावनागा असि पुत्रक [5] ॥६०॥ इति ।

द्वाभ्या पूर्वं लोपामुद्रा ततो द्वाभ्यामगस्त्य । ततो द्वाभ्या ब्रह्मचार्यन्तेवासी । एव त्रय ऋषय । सर्वत्र रतिर्देवता । त्रैष्टुभम् । उपान्त्या बृहती । लोपामुद्राऽऽह—हे अगस्त्य ! अह लोपामुद्रा पूर्वी शरद. पुरातनान् असख्यातान् सवत्सरान् दोषा रात्री वस्तो अहानि उपस उप कालाश्च तथा देह जरयन्ती । सर्वत्रात्यन्तमयोगे द्वितीया । अद्यतनकालपर्यन्त बहुसवत्सर कात्स्न्र्येन त्वच्छुश्रूषया शश्रमाणा श्रान्ताऽभूवम् । इदानी तु जरिमा जरा तनूनामङ्गाना श्रिय सौन्दर्यं मिनाति हिनस्ति। एवमपि नानुगृह्णासीत्यर्थ । अप्यूनु । अपीति सम्भावनायाम् । उ इत्यवधारणे । नु इति वितर्के । इदानीमपि कि सम्भावनीयम् ? लोके हि पत्नी स्वपत्नी वृषण. सेक्तार: पुरुषा जगम्यु गच्छेयु सम्भोग कुर्यु । अतो मा किमित्यवमन्यसे ? इदानीमपि वा सम्भावयेत्यर्थ । 'सरुद्धप्रजननस्य ब्रह्मचारिण इत्यृषिपुत्र्या विलपित वेदयन्ते' इति (नि० ५ २) **यास्कः**। अप्यूनु—'नु चाप्लुतम्'[6]इति दीर्घ । एव निर्लज्जा भोगतो हीना भवेदित्युक्तम् ।

---

[1] **'श्रुत्वान्तेवासी ब्रह्मचार्यन्त्ये बृहत्यादौ अपश्यत्' इत्यस्यावशिष्टो भाग:।**

[2] **ऋतौ स्नातामृषिभार्यां लोपामुद्रां यशस्विनीम्।** A. A. Macdonell's edition.

[3] **श्रुत्वैन:** is the reading of BD. [4] BD. reads **अवजघ्रतु:**

[5] RPR. 8.1

ऋ० १.१८२.३.

अस्या जगत्या अयमर्थः—हे दस्रा ! दर्शनीयावश्विनौ ! 'अन्न दुहन्तौ मनुष्याय दर्शनीयौ' इति यास्क. (नि० ६.२६)। युवा य. कश्चिज्जन. अहवि· यज्ञार्थं हविर्यस्य नास्ति स.। महीयते स्वात्मान पूजयते 'मह पूजाया' (न युष्मान् पूजयति) स आत्मम्भरि । तत. त जनम् अतिक्रमिष्टम् अतिक्रम्य तिष्ठतम्। अत्रास्मिन्नहविष्के जने युवा कि कृणुथ ? कि कुरुथ. ? हविषाम-भावात्तत्रैव किमासाथे किमुपविशथ ? तमतिक्रम्य तिष्ठतमिति । न केवलमतिक्रमणमात्र किन्तु पणेर्वणिग्भूतस्य लुब्धकस्य अयष्टुरस्यासु प्राण जुरतम् अहिंसिष्टम्। अनीनशतम्। मिनोति जूर्वति धमतीति पाठात् (निघण्टु २ १९)। विप्राय मेधाविने। विप्र विग्र इति (निघण्टु ३.१५) तन्नामसु पाठात्। वचस्यवे य युष्मत्स्तुतिरूप वच आत्मन इच्छति स वचस्युस्तस्मै मह्य ज्योतिर्महत्तेज कृणुत कुरुतम्। महीयते 'निपातैर्यद्यदि' (पा० ८.१ ३०) इति निषेधाद् महच्छब्दादनिघात । जुरतमिति तिङ्परत्वाच्च न (Cf. पा० ८ १ २८)। तथा भगवतोक्तम्—

कर्म ब्रह्मोद्भव विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगत ब्रह्म नित्य यज्ञे प्रतिष्ठितम्॥

एव प्रवर्तित चक्र नानुवर्तयतीह य ।
अघायुरिन्द्रियारामो मोघ पार्थ ! स जीवति । (भ० गी० ३ १५–१६)

APPENDIX IV

Gunavisnu is supposed to be a pre-Sāyana commentator. He has written a commentary on the *Chāndogyamantra*. It is edited by D. Bhattacharya and published by Sanskrit Sahitya Parishad, Calcutta, 1930.

The following passages are extracts from Gunavisnu's commentary on such stanzas of the first *Mandala* of the RV. as occur in the *Chāndogyamantra*

RV 1 1 1 =CHMB.6.45,p.116.

ऋग्वेदादिमन्त्रोऽयम्, गायत्री छन्द, मधुच्छन्दा द्रष्टा, देवता अग्नि, विनियोगो ब्रह्मयज्ञे। अहम् 'अग्निम्' 'ईळे' स्तौमि। किम्भूतम्? 'पुरोहित प्रथमत आहितम् अर्पितमिति यावत्। तथा 'देव' स्तुत्यम्। तथा 'यज्ञस्य ऋत्विजम्' यजमानानुरोधेन यागकारी ऋत्विग् भवति, अग्निरपि यजमानाभ्युदयाय यागकारी ऋत्विगुच्यते। तथा 'होतार' होमस्य प्रधानसाधकत्वेन कर्तृभूतम्। तथा 'रत्नधातम' रत्न सुवर्णादिक तद् दधातीति रत्नधा, अतिशयेन रत्नधा रत्नधातम। प्रथम धनदातारम् अग्नि स्तौमि, तत स्तुत स मह्य धन ददात्विति वाक्यार्थ ॥

RV 1 3 7b =CHMB.8 13,p.131.

हे 'विश्वे देवास'! विश्वे देवा! यूयम् 'आगत' आगच्छत।

The second pāda only of the Ṛgvedic stanza 1 3 7. is identical with the first pāda of the stanza, quoted by the *Chāndogyamantra*. The quotation of the *Chāndogyamantra* is however identical with RV. II 41. 13. and RV VI. 52.7 The commentary of Gunavisnu on the Ṛgvedic stanza in *toto* is given on RV. II. 41 13.

RV.1.3.10.=CHMB.6.1,p.97.

गायत्रीय सरस्वतीदेवताका भरद्वाजदृष्टा तीर्थनमस्कारे विनियुक्ता। 'पावका' पावयित्री, 'वाजिनीवती' वाज अन्न तत्कारणतया वाजिनी पृथिवी तद्वती। एवम्भूता 'सरस्वती' 'न' अस्माक 'यज्ञ' 'वष्टु' वहतु 'वाजेभि' साधनै, वाज अन्नानि, अनेन च अन्नकारणभूता मृद आपश्च लक्ष्यन्ते। 'धियावसु' इति धीशब्द कर्मवचन सारस्वतमन्त्राख्येन कर्मणा सह वसतीति तथोच्यते। वसु इति वसेरौणादिक उ। पावका इति "न यासयो:" (पा० ७.३.४५) इत्यत्र "पावकादीनां छन्दसि" (वा०) इति इत्वप्रतिषेध.। वाजेभि. इति "बहुल छन्दसि"

(पा० ३ १.१०) इति भिसो नैस्। सप्तव्याहृतिपूर्विकया गायत्र्या करस्थमुदक सप्तकृत्वः अनुमन्त्र्य यथाविधि सकृदाचम्य पुनरपि यथाविधि आचामेत् ॥

RV.1.6.3 =CHMB 2.18,p.22.

हे 'केतो'! ध्वजरूप! त्व 'समजायथा' मज्जातो भव। कैर्जन्यमान? 'उपद्भि' वसद्भि गृहस्थैरित्यर्थ। कि कुर्वन्? 'मर्या' मर्त्येभ्य 'केतु' ज्ञान 'कृण्वन्' कुर्वन्। न केवल ज्ञानम्, अपि तु 'पेश' कुर्वन्, पेश शब्देन सुवर्ण सौन्दर्य वा अभिधीयते, तथा च शारीरब्राह्मणम् "पेशस्कारी पेशसो मात्रामुपादाय"[1] इत्यादि। किम्भूतेभ्यो मनुष्येभ्य? 'अकेतवे' अज्ञानेभ्य, 'अपेशसे' निर्धनेभ्य कुरूपेभ्यो वा। 'केतुम्' इति "कित ज्ञाने" इत्यस्य रूपम्। अपेशसे इति व्यत्ययेन बहुवचनस्यैकवचनम्। मर्या इति "निष्टर्क्य०" (पा० ३ १ १२३) आदिसूत्रेण निपातित, व्यत्ययेन चतुर्थ्या स्थाने प्रथमा। उपद्भि इति व्यत्ययेन सम्प्रसारणम्। समजायथा इति व्यवहितोपसर्गसम्बन्ध ॥

RV 1.18 6 =CHMB 4.22,p.61.

गायत्रीयम् इन्द्रदेवताका मर्षि प्राशने विनियुक्ता। 'सदस' सभाया 'पति' मुख्यम् 'अद्भुतम्' आश्चर्यरूप 'प्रियम् इन्द्रस्य' इन्द्रस्य वल्लभ 'काम्यम्' अभीष्टार्थसम्पादक 'मेधा सनि' "धीर्धारणावती मेधा" तस्या दातार मुनाचार्यम् अहम् 'अयासिष' शरणत्वेन प्राप्तवानस्मि, स अस्मै कुमाराय मेधा ददातु इत्याशसा वाक्यार्थ। सनिम् इति "छन्दसि वनसनरक्षिमथाम्" (पा० ३ २ २७) इति इन्। अयासिषम् इति यातेर्लुङि सिप्। मेधामिति व्यत्ययेन षष्ठ्या द्वितीया ॥

RV 1 22.16 =CHMB 6 10,pp 100,103

यत 'पृथिव्या' 'अधिसानवि' सानुभवा भूमिमधिश्रित्य 'विष्णु' 'विचक्रमे' पर्वतैकदेश-भूमौ पाद दत्त्वा त्रैलोक्यम् आक्रम्य देवेभ्यो ददौ, 'अत' भूचरान् 'न' अस्मान् 'देवा' 'अवन्तु' रक्षन्तु। अधिसानवि इति सानौ भवा सानवी ततो विभक्त्यर्थेऽव्ययीभाव। इत्थम्भूताया भूमे सम्बन्धिनी मृत् पापापनोदनाय मया मृद्यत इति तात्पर्यम्।

RV.1.22.18.=CHMB.1.5,pp 3,4,6 5,p 100,8 31,p.138.

गायत्रीय, विष्णुदेवता, अयज्ञियवाग्वचननिमित्तजपे विनियुक्ता। 'विष्णु' व्यापक स भगवान् 'इद जगत् विचक्रमे' आक्रान्तवान्। कथमाक्रान्तवान्? 'त्रेधा निदधे पदम्', पृथिव्याम् आकाशे स्वर्गे च पदत्रयम् अर्पितवान् इत्यर्थ। 'अस्य' [2]'पाशुले' पाशुयुक्ताया भूमौ पद 'समूढं' सम्यङ्निविष्टम्। अयमर्थ —विष्णुर्भूम्याकाशस्वर्गात्मक जगत् पादेनाक्रान्तवान्, तस्य पद भूम्या सम्यङ्निविष्टम्। एतेन विष्णुपदसम्बन्धेन भूमिरतीव शुद्धेति सा भूमिरस्मिन् सदने दुरुक्तादिक समाधास्यतीति।

---

[1] Bṛh. Up. 4.4.4.

[2] Guṇaviṣṇu reads **'पांशुले'** instead of **'पांसुरे'**।

षडिमा गायत्र्यो मधुच्छन्दोदृष्टा· वैष्णव्यः मृन्मर्दने विनियुक्ताः। आद्या व्याख्याता। (१.५) p. 100.

व्याख्यातम् (१.५) अत्र च विष्ण्वाक्रान्तत्वात् पृथिव्या. पावनत्वेन तद्विकारस्य अन्नस्य अतिपावनत्वम्॥ p. 138.

RV.1.22.18.=CHMB.6.6,pp.100,101.

'त्रीणि पदा' त्रीन् पादविक्षेपान् 'विष्णु' विचक्रमे। 'गोपा' गोप्ता धर्माणाम्। 'अदाभ्यः' अहिंस्य। अत पृथिवीम् आरभ्य विराट्स्थान यावत् 'धर्मान्' यागादीन् 'धारयन्' अकृच्छ्रेण धारयति। ते हि धर्मा पृथिव्याम् अनुष्ठीयन्ते उत्तरेषु लोकेषु फलानि भुज्यन्ते इत्येवम्। पदा इति "शेश्छन्दसि बहुलम्" (पा० ६ १ ७०) इति शेर्लोप, नलोप। गोपा इति गुपे. आय-प्रत्ययान्तात् क्विप्, "अतो लोप" (पा० ६ ४.४८) वलि यलोपश्च (Cf. पा० ६ १ ६६)। अदाभ्य. इति दन्भेर्हिंसार्थात् "कृत्यल्युटो बहुलम्" (पा० ३ ३.११३) इति यद्विषये ण्यत्। धर्माणि इति तत्साधने नपुसकम् इति नपुसकत्वम्॥

RV.1.22.19.=CHMB.6.7,pp.100,101,102.

हे धर्मानुष्ठातार! तस्य 'विष्णो' 'कर्माणि' 'पश्यत' निरूपयत। 'यत' य विष्णु पृथिवीत आरभ्य विराज स्थान यावत् 'व्रतानि' कर्माणि क्रियमाणानि भुज्यमानानि च 'पस्पशे' सम्यङ् निरूपयति। पस्पशे इति निर्णयार्थे लटस्त, छान्दस. श्लु, 'लोपस्त आत्मनेपदेषु" (पा० ७.१ ४१) इति तलोप। यश्च 'इन्द्रस्य सखा' 'युज्य' योग्य। बाहुलकात् क्यप्। यत इति प्रथमान्तात् आद्यादित्वात् तसि॥

RV.1.22.20.=CHMB.6.8.pp.100,102.

तच्छब्दवाच्य विराट्स्थान 'विष्णो' यत् 'परमम्' उत्कृष्ट 'पद' तत् 'सूरय' ज्ञानिन 'सदा' 'पश्यन्ति' साक्षात्कुर्वन्ति, न ते कर्ममात्रपर्यवसायिन। कथ पश्यन्ति? 'दिवीव चक्षुरात-तम्' यथा दिवि आकाशे आतत विस्फारित चक्षु दृश्यान्तर पश्यति॥

RV 1.22.21.=CHMB.6.9,pp.100,102.

'विष्णो यत् परम पद' 'तत्' 'विप्रास' मेधाविन 'विपन्यव' पनति अर्चनकर्मा, वर्णा-श्रमविहितै धर्मै विविध वासुदेवम् अर्चयन्त, 'जागृवास' जागरूका ससारभयोद्वेगेन प्रबुद्धा 'समिन्धते' सन्दीपयन्ति अभेद यावत् ध्यायन्तीत्यर्थ। विप्रास इति "प्रा पूरणे" असुश्नन्त· धारणा-वतीधीवचन। विपन्यव इति पनेर्विपूर्वाद् आयप्रत्ययाभावपक्षे भावे क्विप् विपन्, तस्मात् इच्छाया क्यच्, अयस्मयादिपाठेन भत्वात् नलोपाभाव. "क्याच्छन्दसि" (पा० ३.२ १७०) इति उप्रत्यय। जागृवास इति जागर्ते लिट. क्वसु। समिन्धते इति "इन्धी दीप्तौ" रौधादिक:, लट् झ. अदादेश, "श्नाश्नलोप" (पा० ६.४.२३), "श्नसोरल्लोप." (पा० ६.४.१११)॥

RV.1.24.15.=CHMB.4.100,pp.81,82;6.12,p.104.

त्रिष्टुबियम्, शुन.शेप ऋषि:, वरुणो देवता, मेखलामोचने विनियोग.। अनया त्रिष्टुभा शुन:शेप ऋषि. त्रिभि. पाशैर्बद्ध. तद्विमोक्षाय वरुण प्रार्थयामास—हे 'वरुण'! 'अस्मत्'—सका-

शात् 'उत्तमम्' कण्ठावस्थितं 'पाशम्' बन्धनम् 'उच्छ्रथाय' ऊर्ध्वम् उत्तानय। 'अधमं' पादावस्थितम् 'अवश्रथाय' अधस्तात् अवतारय। मध्यम कटिदेशावस्थित 'विश्रथाय' तत्रस्थमेव शिथिलीकुरु। अथ पाशावमोक्षानन्तरं शुन.शेपेन वरुण. प्रार्थ्यते—हे 'आदित्य'! अदितिपुत्र! वरुण! 'अथ' पाशमोक्षानन्तर 'तव' 'व्रते' परिचर्यालक्षणे 'वयम्' 'अनागस' अनपराधा. सन्त 'स्याम' भवेम। न केवल तव, 'अदितये' अदितेश्च त्वन्मातु। श्रथाय इति श्रथ्नातेर्लोट् सिप्, "छन्दसि शायजपि" (पा० ३.१ ८४) इति शायच्। उत्, अव, वि, इत्येते व्यवहिता। आदित्यैनि "दित्यदित्यादित्य०" (पा० ४ १.८५) इति ण्य।

RV 1.35.2 =CHMB 2.10,p.17.

'सविता' आदित्य 'आयाति' आगच्छति। 'देव' दानादिगुणयुक्त। केन? 'रथेन'। किम्भूतेन? 'हिरण्ययेन' सुवर्णमयेन। कि कुर्वन्? 'भुवनानि पश्यन्' भुवनवर्तिनो मनुष्यान् प्रकाशाप्रकाशपापकर्तॄन् साक्षिवन्निरीक्षमाण। तथा 'निवेशयन्' स्वेषु स्वेषु व्यापारेषु समावेशयन्। कम्? 'अमृत मर्त्यञ्च' देवान् मनुष्याश्च। सूर्योदये मनुष्या स्वेषु कर्मसु वर्तमाना देवान् प्रीणयन्ति, प्रीताश्च देवा वृष्ट्यादिना मनुष्यानाप्याययन्ति, तेन देवमनुष्याणा परस्परोपसश्लेष। किम्भूत सविता? 'रजसा' रात्रिकालेन सह 'कृष्णेन' मलिनेन 'आवर्तमान' अनुदिन परावर्तमान। प्रायेण रात्रिकालस्य रागजनकत्वात् रजस्त्वम्, पुण्यकर्मणामवरोधाच्च कृष्णत्वम्। अयमर्थ—य सविता देवमनुष्यव्यापारे व्यवस्थापक, यश्च कर्मभूमिर्वर्तिना पापपुण्यसाक्षी प्रत्यह समायानि, तस्मै वयमर्चना कुर्म। आवर्तमान, आयानि, इति व्यवहितोपसर्गसम्बन्ध। हिरण्ययेन इति "ऋत्व्यवास्त्व्य०" इत्यादिना (पा० ६ ४ १७५) हिरण्ययशब्द छन्दसि निपातित.॥

RV.1.44 1.=CHMB.2 13,pp.18,19.

हे 'अग्ने'! 'जातवेद'! स्मार्तश्रौताग्निसम्बोधनम्। 'त्वम्' 'उषर्बुध' असि उषसि बुध्यसे प्रातराहुतिग्रहणाय जागर्षि, अत एव त्व बुधरूपोऽसि, सोऽपि उषसि बुध्यते, आदित्यानुगतत्वात् तस्य। एतेन बुधरूपित्व वह्नेरादर्शितम्। एवञ्च देवान्' प्रधानकर्मभूतान् 'अद्या' अद्यान् प्रातराहुतौ प्रयुज्यमानान् भक्ष्यगणान् 'आवह' प्रापय। किम्भूतस्त्व बुधश्च? 'राध' आराधनीय, 'अमर्त्य' देवस्वरूप। किमर्थम् आवह? 'विवस्वत्' विवस्वते सूर्यार्थम्। "अग्नौ प्रास्ताहुति सम्यगादित्यमुपतिष्ठते' इति स्मरणात्। वह्निना सूर्यार्थम् ऊढाम् आहुति देवा अदन्ति। किम्भूताय विवस्वते? 'उषस' उषसि 'चित्र' रूपम् 'आदाशुषे' उपास्तवते। विवस्वदिति सुब्लुक्। उषस' इति "चतुर्थ्यर्थे बहुल छन्दसि" (पा० २ ३.६९) इति बहुलवचनात् सप्तम्यर्थे षष्ठी। राध इति कर्मणि घञ्। आदाशुषे इति "दाशृ दाने" आङ्पूर्व., लिट क्वसु, "दाश्वान् साह्वान् मीढ्वाश्च" (पा० ६.१ १२) इति अद्वित्वम् अनिट्त्वञ्च, चतुर्थ्येकवचने "वसो सम्प्रसारणम्" (पा० ६.४.१३१) "शासिवसिघसीनाञ्च" (पा० ८ ३.६०) इति षत्वम्। वहा इति "छन्दसि परेऽपि" (पा० १.४.८१) इत्याङ परप्रयोग:। अद्या इति "कृत्यल्युटो बहुलम्" (पा० ३ ३.११३) इति ण्यद्विषये यत्, व्यत्ययेन शसो जस्। देवा इति "दीर्घादटि समानपादे" (पा० ८.३.९) इति रुत्वम्, "आतोऽटि नित्यम्" (पा० ८.३ ३) इत्यनुनासिक, रेफस्य यत्व यलोपश्च। उषर्बुध इति पृषोदरादित्वात् सकारस्य रेफ। बुधस्वरूपित्वमग्ने. प्रकटयन्ती बुधार्चने युज्यते ऋगियम्॥

RV.1.50.1. =CHMB.5.13,pp.94,95;6.39,p.113.

'त्यं' तं 'देवं' 'केतव.' रश्मय. 'उद्वहन्ति'। किम्भूतम्? 'जातवेदस' तेजोमयम्। किमर्थम् उद्वहन्ति? 'विश्वाय' विश्वस्य 'दृशे' दर्शनाय। अयमर्थ'—तेजःस्वरूप सूर्य विश्व-प्रकाशनाय रश्मय उद्वहन्ति। उदु इत्युकार सम्बोधने। दृशे इति "दृशे विख्ये च" (पा० ३ ४.११) इति तुमर्थे केप्रत्यय.। विश्वाय इति षष्ठ्यर्थे चतुर्थी॥

RV.1.50.2. =CHMB.6.42,p.114.

अकारो निषेधवाची। 'क्षत्रा' सारथिना 'त्यक्तुभि,' अतिवेगात् प्राप्तदेशपरिहारशीलैः वाजिभि. 'अय' सूर्यभक्त' 'सूराय' आदित्याय 'विश्वचक्षसे' जगदवलोकयित्रे न 'पत्येत' न नीयेत इति 'न' अपि तु नीयेत। अत्र दृष्टान्त —'यथा' 'आयव' प्राणिना जीवितकाला। ते यथा ज्योति पथादागत्य सूर्यसारथिना तद्वाहै सूर्यसकाश नीयन्ते। त्यक्तुभि. इति "सितनिगमि०" (उ० १ ७०) इत्यादिना तुन् बहुलवचनात् त्यजेरपि भवति॥

RV 1.50.4. =CHMB 6.43,pp.114,115.

हे 'सूर्य'! त्व 'तरणि' 'असि' तारक भवसि। तथा 'विश्वदर्शित' असि अन्धकारे मग्न विश्व दर्शित येन स विश्वदर्शित इति आहिताग्न्यादित्वाद् निष्ठाया. परनिपात। तथा 'ज्योतिष्कृत्' असि आलोककारी भवसि। तथा 'विश्वम्' 'आभासि' दीपयसि, अन्तर्भावितण्यर्थो भाति। किम्भूत विश्वम्? 'रोचन' सूर्यलोकसम्पर्काद् दीप्यमानम्। "अनुदात्तेतश्च हलादे"। (पा० ३ २ १४९) इति युच्॥

RV.1.50.7. =CHMB.6.44,pp.114,115.

हे 'सूर्य'! त्व 'पृथ्वहा' पृथुवासर' 'उदेषि'। किं कुर्वन्? 'द्या' दिव 'रज' भूतल-सन्निविष्टं 'मिमान' परिच्छिन्दन्, तथा 'जन्मनि पश्यन्' उत्पत्तिभाजाम् उत्पत्ती अवलोकयन्। कै. उदेषि? 'अक्तुभि.' कुटिलगमनै हयै इत्यर्थ। उदेषि इति व्यवहितोपसर्गसम्बन्ध.। पृथ्वहा इति पृथूनि अहानि यस्मात् पृथ्वहा, मेषादिषट्के भारते वर्षे, तुलादिषट्के कुरुषु उत्तरेषु तेनाय सर्वकाल पृथ्वहा सूर्यो भवति। सर्वमेतत् स्तुतिपरम्। अक्तुभि इति "अक कुटिलाया गतौ" तस्मात् "सितनिगमि०" (उ० १ ७०) इत्यादिना बहुवचनात् तुन्। एवम्भूत भगवन्तम् उपतिष्ठ इति तात्पर्यम्॥

RV.1 50.10.=CHMB.6.11,p.103.

त्रिष्टुबिय प्रस्कण्वदृष्टा सूर्यदेवता तदवेक्षणे विनियुक्ता। 'तमसस्परि' नैशात्तमस उपरि 'ज्योति:' प्रकाशक 'वयम्' 'उत्पश्यन्त' 'सूर्यम्' 'अगन्म' इति सम्बन्ध.। "आशंसायां भूत-वच्च" (पा० ३ ३ १३२) इति गच्छाम इत्यर्थ.। कीदृशं ज्योति.? 'उत्तरम्' उत्कृष्टम्। 'स्व. पश्यन्त उत्तरम्', स्वरिति सूर्यस्य नाम, ज्योतिर्मध्ये सूर्यं देवमुत्कृष्टम्। 'देवत्रा' 'देवं' पूजयितु पश्यन्तः। ततः सूर्यस्य मण्डलं भित्त्वा 'उत्तमं' 'ज्योतिः' ब्रह्माख्यम् अगन्म इति वाक्यपरिस-

माप्तिः। देवत्रेति "देवमनुष्य०" (पा० ५ ४ ५६) इत्यादिना द्वितीयान्तात् त्राप्रत्ययः। अगन्मेति गमे. "मन्त्रे घसह्वर०" (पा० २ ४.८०) इति च्लेर्लुक्, "मो नो धातो" (पा० ८.२ ६४) इत्यनुवृत्तौ "म्वोश्च" (पा० ८.२.६५) इति नकार ।

RV.1.82.2.=CHMB.8.38,pp.141-143.

पितर 'अक्षन्' अखादिषु हवीपि इति शेप । 'हि' यस्मात् 'ते' 'अवप्रिया.' अवन्ति तर्पयन्ति यानि हवीषि तानि प्रियाणि येपा ते अवप्रिया । अत 'अमीमदन्त', स्वार्थे णिच्, अमाद्यन् हर्षम् अलभन्त। तथा 'अधूषत' अकम्पिपत रोमाञ्चयुक्ता इत्यर्थ । तथा 'अस्तोपत' श्राद्धकर्त्रा पृष्टा सन्तो भक्ष्यद्रव्याणि अश्लाघिषत। किम्भूता ते ? 'स्वभानव' स्वकीया भानवः दीप्तय येषाम् तृप्तिविशेषेण दीप्तिविशेपसम्पन्ने । तथा 'य' ये पितर 'विप्रा' पात्रब्राह्मणदेहस्था तात्स्थ्येन तच्छब्दप्रयोग, विप्रशरीरस्था सर्वमेतच्चक्रु इत्यर्थ । 'नविष्ठया' 'मती' अत्यन्ताभिनवया बुद्धया 'नु' हे 'इन्द्र'! परमैश्वर्ययुक्त! सूर्य! 'ते' तव 'हरी' हरीन् अश्वान् 'योजा' एकचित्तीभूय निरूपयति। अमावस्याशेषत्रिभागे चन्द्रमण्डलस्य सूर्यमण्डलाद्रधस्तादवस्थिते पितृणा चन्द्रमण्डलाधारत्वात् सूर्याश्वनिरूपण तेपा युज्यते। एतच्च विसर्जिताना विप्रदेहात् पुनश्चन्द्रमण्डलमुपगताना तृप्त्या स्वस्थचित्ताना च इत्युन्नेयम्। यथा च ते हरीन् निरूपयन्ति तथा अहमपि पिण्डान् सुवर्तुलान् कर्तु निरूपयामि इति तात्पर्यम्। अक्षन् इति अदे लुङ् "मन्त्रे घसह्वर" इत्यादिना (पा० २ ४ ८०) च्लेर्लुक् "गमहन०" (पा० ६ ४ ९८) इत्युपधालोप, चर्त्वम्, "शासिवसि०" (पा० ८ ३.६०) इति षत्वम्। अधूषत इति "धूञ् कम्पने" गुणाभाव छान्दस । नविष्ठया इति नवशब्दादातिशायनिक इष्ठन्। मती इति "सुपा सुलुक्" (पा० ७ १ ९) इत्यादिना पूर्वसवर्ण । योजेति समाधिवचनाद् युजेर्ण्यत्ययेन शप्, झेर्लुक्, "द्व्यचोऽतस्तिङ" (पा० ६.३ १३५) इति दीर्घ । हरी इति "इयाडियाजीकाराणामुपसंख्यानम्" (वा०—पा० ७ १ ३९) इति शस ईकार ॥

RV.1.89.6.=CHMB 2.29,pp.25,26.

'न' अस्मभ्यम् 'इन्द्र.' 'स्वस्ति' शान्ति 'दधातु'। किम्भूत ? 'वृद्धश्रवा.' वृद्धवाक्यकारी। तथा 'पूषा', 'विश्ववेदा' सर्वज्ञ, तथा 'तार्क्ष्य', 'अरिष्टनेमि' अव्याहतगतिप्रसर., तथा 'बृहस्पति'। स्वस्ति न. दधातु । "एताश्चतस्रो गातव्या वा" इति गृह्यम्।

RV.1.90 6.=CHMB.8.32,pp,138,139.

'वाताः' वायव 'मधु' 'ऋतायते' वहन्तीत्यर्थ । 'सिन्धव.' नद्य 'मधु' 'क्षरन्ति'। 'ओषधी.' धान्यादयः 'माध्वी' मधुयुक्ता 'सन्तु'। 'न' इति स्थानत्रयेऽपि योज्यम् ॥

ऋतायते इति वचनव्यत्यय । माध्वी इति "ऋत्व्यवास्त्व्य" इत्यादिना (पा० ६.४.१७५) माध्वीशब्दो निपातितः, "वा छन्दसि" (पा० ६.१ १०६) इति पूर्वसवर्णः। एवम् ओषधीः इत्यत्र ॥

RV.1.90.7.=CHMB.8.33,pp.138,139.

तथा 'नक्तं' 'मधु' 'अस्तु' रात्रिः मधुमयी भवतु। 'उत' अपि च 'उषस.' अपि मधमत्यः

सन्तु। 'पार्थिवम्' पृथिवीसम्बन्धि 'रज.' 'मधुमत्' अस्तु। 'द्यौ.' स्वर्ग. 'पिता' पितेव सर्वस्याधिगम्यत्वाद् 'मधु' 'अस्तु' मधुमयी भवतु ॥

RV.1.90.8. =CHMB.8.34,p.139.

'वनस्पति.' च 'मधुमान्' 'अस्तु'। 'न' इति सर्वत्र योज्यम्। 'सूर्य.' च 'मधुमान्' अस्तु। 'गाव.' च 'माध्वी.' मधुमत्यो 'भवन्तु'। 'न' अस्माकम् ॥

मधुमाँ अस्तु इति पूर्ववत् रुत्वादि ॥

RV.1.91.16.=CHMB 2.11,pp.17,18.

हे 'सोम' 'वृष्ण्य' वृष्टिभव जल 'ते' तव 'मयेतु' सङ्गच्छता त्वत्सान्निध्य यातु। अतस्त्व 'विश्वत' विश्वम् 'आप्यायस्व'। अत एव 'वाजस्य' अर्थे 'सङ्गथे' सङ्गमे 'भवा' भव। "वृष्टेरन्नम्"[1] इति स्मृते। चन्द्रस्तुतिरेषा। आप्यायस्व इत्यन्तर्भावितण्यर्थ सकर्मक। विश्वत इत्याद्यादित्वेन द्वितीयान्तात्तसि। वृष्ण्यमिति वृष्णो वामवाद्भवनीति "भवे छन्दसि" (पा० ४ ४ ११०) इति यत्, छान्दस उपधालोप। भवा इति "द्वयचोऽतस्तिङ" (पा० ६.३ १३५) इति दीर्घ.। सङ्गथशब्द. सङ्गमवाची ॥

RV.1.94. 1.=CHMB.1.7,pp 4,5.

जगतीत्रयमिदम्, कौत्स ऋषि, अग्निर्देवता, पृष्ठ्यस्य षडहस्य षष्ठेऽहनि आग्निमारुते शस्त्रे परिसमूहने च विनियोग। तथा च गृह्यम् (गो० ४ ५ ५) "इम-भराम-शकेमेति तृचेन परिसमूहेत्"। 'इम' 'स्तोम' स्तव 'वय' 'सम्महेम', "मह पूजायाम्" सम्यक् पूजोपकरणयुक्त कुर्याम। कस्मै? 'जातवेदसे' जातविद्यो वा जातधनो वा जातविज्ञानो वा जातवेदा, तस्मै। किम्भूताय? 'अर्हते' स्तुतियोग्याय। कया? 'मनीषया' प्रज्ञया। 'रथमिव' सारथिरित्यध्याहार्य्यम्। 'हि' यस्मात् 'न' अस्माकम् 'अस्य' अग्ने सकाशात् 'भद्रा' कल्याणी मुख्या वा 'प्रमति.' प्रकृष्टा बुद्धि 'ससदि' जनसमाजे जायते, यथा वयमपि स्तोतु जानीम, तस्मात् हे 'अग्ने'! यस्त्वमेवम्भूतस्तस्य 'तव' 'सख्ये' मित्रत्वे स्थिता 'वयं' केनचिद् दुरात्मना 'मा रिषाम' मा हिंसिष्महि तदाशास्यते। सम्महेमेति रिषामेति चात्र "अन्येषामपि दृश्यते" (पा० ६ ३ १३७) इति दीर्घ. ॥

RV.1.94 3.=CHMB.1.9,pp.5,6,7.

हे 'अग्ने'! 'त्वम्' अस्माक 'धिय' कर्माणि बुद्धीर्वा 'साधय' त्वदाराधनयोग्या निष्पादय, यथा 'वय' 'त्वा' त्वा 'समिध शकेम' परिचरितु शक्नुयाम। 'ते' त्वयि 'आहुत हवि' 'देवा.' इन्द्रादय. 'अदन्ति' भक्षयन्ति, त्वन्मुखत्वात् तेषाम्। अतस्त्व 'तान्' 'आदित्यान्' अदितेः पुत्रान् आवाहय; 'हि' यस्मात् तान् आदित्यान् वयम् 'उश्मसि' कामयामहे उद्देश्यत्वेन इच्छामः। 'अग्ने, सख्ये, मा रिषाम वय तव' इति सर्व्वत्र तुल्यम्। शकेम इति "लिङ्घाशिष्यङ्" (पा० ३.१.८६)।

---

[1] Maitri. Up. 6.37

समिधमिति तुमर्थे "शकि णमुल्कमुलौ" (पा० ३.४ १२) इति कमुल्। साधया इति "अन्येषामपि" (पा० ६ ३.१३७) इति दीर्घ । ते इति सप्तम्यर्थे षष्ठी। 'आदित्यौ' 'तौ' इति "दीर्घादटि समानपादे" (पा० ८ ३ ९) इति रुत्व, यलोप, "आतोऽटि नित्यम्" (पा० ८.३.३) इत्यनुनासिकः। 'उश्मसि' इति वश कान्तौ, "ग्रहि" इत्यादि (पा० ६ २ १६) सूत्रेण सम्प्रसारणम्, "इदन्तो मसि" (पा० ७ १.४६) इति इकारान्तता ॥

RV.1.94.4.=CHMB.1 8,pp.4,5,6.

हे 'अग्ने'! त्वदर्थम् 'इध्म' यज्ञदारु 'भराम' आहराम। 'हवीषि' चरुप्रभृतीनि 'पर्वणा पर्वणा' पर्वणि पर्वणि 'चिन्तयन्त' उपपादयन्त वय 'कृणवाम' सम्पादयाम निर्वपामेति यावत्। तथा च श्रुति—'अमावास्यायामामावास्येन यजेत पौर्णमास्या पौर्णमासेन" इति। किमर्थम्? 'प्रतराम्' अतिशयेन प्रकृष्ट सुदीर्घकाल 'जीवातवे' जीवनाय। किञ्च 'साधय धिय'—धीरिति कर्मणो नाम, तेनैतदुक्त भवति,—अस्माभि क्रियमाणानि कर्माणि साधय सफलानि कुरु इत्यर्थ। भरामेति—"हृग्रहोर्भश्छन्दसि" इति हकारस्य भकार। पर्वणा पर्वणेति "सुपा सुलुक्"—(पा० ७.१ ३९) इत्यादिना सप्तम्या आल्। कृणवामा इति साधया इति "अन्येषामपि दृश्यते" (पा० ६.३ १३७) इति दीर्घ ॥

RV.1.97.1 =CHMB 8.69,p.151.

हे तोय! 'न' अस्मान् 'अपशोशुचत्' अत्यर्थमपगतशोकान् कुर्वन् 'अघम्' ज्ञातिमरणजनित पाप शमयेति शेष। अतोऽत्र जले स्नान करवाम यथा पुरा ईदृश दु खमस्माआनुशोचयति। अपशोशुचदिति शुचेर्यङ्लुगन्ताच्छतृप्रत्यय, व्यवहितोपसर्गसम्बन्ध ॥

RV.1 99 1.=CHMB.5 16,p.96.

त्रिष्टुबियम् आग्नेयी काश्यपदृष्टा आत्मरक्षाया विनियुक्ता। वय 'जातवेदसे' अग्नये 'सोम' यज्ञविशेष 'सुनवाम' सन्दधीमहि। 'स' जानवेदा 'अरातीयत' अरातिहितान् 'निदहाति' भस्मीकरोति। तथा 'वेद' वेद परिषदनि राशीकरोति। 'न' अस्माकम् इत्युभयत्र योज्यम्। तथा 'विश्वा' विश्वम् 'अग्नि' अग्निना 'दुर्गाणि' 'दुरितानि' अतिक्रामति 'नावा सिन्धुमिव' नौकया नदीमिव। सुनवाम इति लोट् उत्तमपुरुषबहुवचन मस्, "नित्य ङित" (पा० ३ ४.९९) इति सकारलोपः आट् गुण। अरातीयत इति अरातिशब्दात् हितार्थे "प्राक्क्रीताच्छ." (पा० ५.१.१) आद्यादित्वात् द्वितीयान्तात् तसि। निदहाति इति लेट् आट्। वेद इति द्वितीयार्थे प्रथमा। परिषदति इति लेट्, "सदिरप्रते." (पा० ८.३.६६) इति षत्वम्। विश्वा इति "सुपा सुलुक्" (पा० ७.१.३९) इत्यादिना सो आत्वम्। दुरिताति इति दु खेन इत दुरित, दुरित इवाचरति इत्याचारे क्विप् ततो लेट् आट्। अग्निः इति तृतीयैकवचनस्य सुः॥

RV.1.115.1.=CHMB.5.14,p.95;6.40,p 113.

असौ सूर्यः 'उदगात्' उदित अभवत्। किम्भूत? 'मित्रस्य वरुणस्य अग्ने' त्रयाणा देवानां 'चक्षुः'। पुनः किम्भूतः? 'देवानाम्' 'अनीक' समूहरूप। कथम् उदगात्? 'चित्रम्'

आश्चर्य्यं यथा भवति। उदयानन्तर 'द्यावापृथिवी अन्तरिक्ष' च 'आप्रा.' पूरितवान् स्वेन रश्मिजालेन इत्यर्थ.। पुन. किम्भूतः ? 'जगत' जङ्गमस्य 'तस्थुष' स्थावरस्य च 'आत्मा', स्थावरजङ्गमात्मकसकलससारमय अयमेव सूर्य इत्यर्थ.। [1]एतौ च मन्त्रौ सूर्योपस्थाने विनियुक्तौ सूर्यदैवतौ गायत्रीत्रिष्टुप्छन्दसौ प्रस्कण्व-कौत्सदृष्टौ यथाक्रमम्। आप्रा. इति व्यत्ययेन तेः सिः ॥

[1] The dual number refers to the Mantras RV. 1.50.1. and RV. 1.115.1.

मुद्रक—जे० के० शर्मा, इलाहाबाद लॉ जर्नल प्रेस, इलाहाबाद
प्रकाशक—मोतीलाल बनारसीदास, पञ्जाब संस्कृत बुक डिपो, लाहौर

PADAPĀṬHA

1. 122

प्र । वः । पान्तम् । रघुऽमन्यवः । अन्धः । यज्ञम् । रुद्राय । मीळ्हुषे । मरुत्वम् । दिवः । अस्तोषि । असुरस्य । वीरैः । इषुध्याऽइव । मरुतः । रोदस्योः ॥ १ ॥ पत्नीऽइव । पूर्वऽहूतिम् । वनृधध्यै । उषसानक्ता । पुरुधा । विदाने इति । स्तरीः । न । अर्तकम् । विऽउतम् । वसाना । सूर्यस्य । श्रिया । सुऽदृशी । हिरण्यैः ॥२॥ ममत्तु । नः । परिऽज्मा । वसर्हा । ममत्तु । वातः । अपाम् । वृषण्ऽवान् । शिशीतम् । इन्द्रापर्वता । युवम् । नः । तत् । नः । विश्वे । वरिवस्यन्तु । देवाः ॥३॥ उत । त्या । मे । यशसा । शेतनायै । व्यन्ता । पान्ता । औशिजः । हुवध्यै । प्र । वः । नपातम् । अपाम् । कृणुध्वम् । प्र । मातरा । रास्पिनस्य । आयोः ॥४॥ आ । वः । रुवण्युम् । औशिजः । हुवध्यै । घोषाऽइव । शंसम् । अर्जुनस्य । नंशे । प्र । वः । पूष्णे । दावने । आ । अच्छ । वोचेय । वसुऽतातिम् । अग्नेः ॥५॥ श्रुतम् । मे । मित्रावरुणा । हवा । इमा । उत । श्रुतम् । सदने । विश्वतः । सीम् । श्रोतु । नः । श्रोतुऽरातिः । सुऽश्रोतुः । सुऽक्षेत्रा । सिन्धुः । अद्ऽभिः ॥६॥ स्तुषे । सा । वाम् । वरुण । मित्र । रातिः । गवाम् । शता । पृक्षऽयामेषु । पज्रे । श्रुतऽरथे । प्रियऽरथे । दधानाः । सद्यः । पुष्टिम् । निऽरुन्धानासः । अग्मन् ॥७॥ अस्य । स्तुषे । महिऽमघस्य । राधः । सचा । सनेम । नहुषः । सुऽवीराः । जनः । यः । पज्रेभ्यः । वाजिनीऽवान् । अश्वऽवतः । रथिनः । मघऽत्सु । सूरिः ॥८॥ जनः । यः । मित्रावरुणौ । अभिऽद्रुक् । अपः । न । वाम् । सुनोति । अक्ष्णयाऽद्रुक् । स्वयम् । सः । यक्ष्मम् । हृदये । नि । धत्ते । आपः । यत् । ईम् । होत्राभिः । ऋतऽवा ॥९॥ सः । प्राचैतः ।

नहुषः। दम्ऽसुजूतः। शर्धैःऽतरः। नराम्। गूर्तऽश्रवाः। विसृष्टऽरातिः। याति। वाळ्हऽसूत्वा। विश्वासु। पृत्ऽसु। सदम्। इत्। शूरः ॥१०॥ अधं। ग्मन्त। नहुषः। हवम्। सूरेः। श्रोत। राजानः। अमृतस्य। मन्द्राः। नभःऽजुवः। यत्। निरवस्य। राधः। प्रऽशस्तये। महिना। रथंऽवते ॥११॥ एतम्। शर्धम्। धाम। यस्य। सूरेः। इति। अवोचन्। दशऽतयस्य। नंशे। द्युम्नानि। येषु। वसुऽतातिः। ररन्। विश्वे। सन्वन्तु। प्रऽभृथेषु। वाजम् ॥१२॥ मन्दामहे। दशऽतयस्य। धासेः। द्विः। यत्। पञ्च। बिभ्रतः। यन्ति। अश्वा। किम्। इष्टऽअश्वः। इष्टऽरश्मिः। एते। ईशानासः। तरुषः। ऋज्जते। नॄन् ॥१३॥ हिरण्यऽकर्णम्। मणिऽग्रीवम्। अर्णः। तत्। नः। विश्वे। वरिवस्यन्तु। देवाः। अर्यः। गिरः। सद्यः। आ। जग्मुषीः। आ। उस्राः। चाकन्तु। उभयेषु। अस्मे इति ॥१४॥ चत्वारः। मा। मशर्शारस्य। शिश्वः। त्रयः। राज्ञः। आयवसस्य। जिष्णोः। रथः। वाम्। मित्रावरुणा। दीर्घऽअप्साः। स्यूमंऽगभस्तिः। सूरः। न। अद्यौत् ॥ १५ ॥

1. 123

पृथुः। रथः। दक्षिणायाः। अयोजि। आ। एनम्। देवासः। अमृतासः। अस्थुः। कृष्णात्। उत्। अस्थात्। अर्यी। विऽहायाः। चिकित्सन्ती। मानुषाय। क्षयाय ॥१॥ पूर्वी। विश्वस्मात्। भुवनात्। अबोधि। जयन्ती। वाजम्। बृहती। सनुत्री। उषा। वि। अरुन्धत्। युवतिः। पुनःऽभूः। आ। उषाः। अगन्। प्रथमा। पूर्वऽहूतौ ॥२॥ यत्। अद्य। भागम्। विऽभजासि। नृऽभ्यः। उषः। देवि। मर्त्यऽत्रा।

सुऽजाते । देवः । नः । अत्र । सविता । दमूनाः । अनागसः । वोचति । सूर्याय ॥३॥ गृहम्ऽगृहम् । अहना । याति । अच्छ । दिवेऽदिवे । अधि । नाम । दधाना । सिसासन्ती । द्योतना । शश्वत् । आ । अगात् । अग्रम्ऽअग्रम् । इत् । भजते । वसूनाम् ॥४॥ भगस्य । स्वसा । वरुणस्य । जामिः । उषः । सनते । प्रथमा । जरस्व । पश्चा । सः । दध्याः । यः । अघस्य । धाता । जयेम । तम् । दक्षिणया । रथेन ॥५॥ उत् । ईरताम् । सूनृताः । उत् । पुरम्ऽधीः । उत् । अग्नयः । शुशुचानासः । अस्थुः । स्पार्हा । वसूनि । तमसा । अपऽगूळ्हा । आविः । कृण्वन्ति । उषसः । विऽभातीः ॥६॥ अप । अन्यत् । एति । अभि । अन्यत् । एति । विषुरूपे इति विषुऽरूपे । अहनी इति । सम् । चरेते इति । परिऽक्षितोः । तमः । अन्या । गुहा । अकः । अद्यौत् । उषाः । शोशुचता । रथेन ॥७॥ सऽदृशीः । अद्य । सऽदृशीः । इत् । ऊँ इति । श्वः । दीर्घम् । सचन्ते । वरुणस्य । धाम । अनवद्याः । त्रिंशतम् । योजनानि । एकाऽएका । क्रतुम् । परि । यन्ति । सद्यः ॥८॥ जानती । अह्नः । प्रथमस्य । नाम । शुक्रा । कृष्णात् । अजनिष्ट । श्वितीची । ऋतस्य । योषा । न । मिनाति । धाम । अहःऽअहः । निःऽकृतम् । आऽचरन्ती ॥९॥ कन्याऽइव । तन्वा । शाशदाना । एषि । देवि । देवम् । इयक्षमाणम् । सम्ऽस्मयमाना । युवतिः । पुरस्तात् । आविः । वक्षांसि । कृणुषे । विऽभाती ॥१०॥ सुऽसंकाशा । मातृमृष्टाऽइव । योषा । आविः । तन्वम् । कृणुषे । दृशे । कम् । भद्रा । त्वम् । उषः । विऽतरम् । वि । उच्छ । न । तत् । ते । अन्याः । उषसः । नशन्त ॥११॥ अश्वऽवतीः । गोऽमतीः । विश्वऽवाराः । यतमानाः । रश्मिऽभिः ।

सूर्यस्य । परा । च । यन्ति । पुनः । आ । च । यन्ति । भद्रा । नाम । वहमानाः । उषसः ॥१२॥ ऋतस्य । रश्मिम् । अनुऽयच्छमाना । भद्रम्ऽभद्रम् । क्रतुम् । अस्मासु । धेहि । उषः । नः । अह । सुऽहवा । वि । उच्छ । अस्मासु । रायः । मघवत्ऽसु । च । स्युरिति स्युः ॥१३॥

1. 124

उषाः । उच्छन्ती । सम्ऽइधाने । अग्नौ । उत्ऽयन् । सूर्यः । उर्विया । ज्योतिः । अश्रेत् । देवः । नः । अत्र । सविता । नु । अर्यम् । प्र । असावीत् । द्विऽपत् । प्र । चतुःऽपत् । इत्यै ॥१॥ अमिनती । दैव्यानि । व्रतानि । प्रऽमिनती । मनुष्या । युगानि । ईयुषीणाम् । उपऽमा । शश्वतीनाम् । आऽयतीनाम् । प्रथमा । उषाः । वि । अद्यौत् ॥२॥ एषा । दिवः । दुहिता । प्रति । अदर्शि । ज्योतिः । वसाना । समना । पुरस्तात् । ऋतस्य । पन्थाम् । अनु । एति । साधु । प्रजानतीऽइव । न । दिशः । मिनाति ॥३॥ उषो इति । अदर्शि । शुन्ध्युवः । न । वक्षः । नोधाःऽइव । आविः । अकृत । प्रियाणि । अधऽसत् । न । ससतः । बोधयन्ती । शश्वत्ऽतमा । आ । अगात् । पुनः । आऽईयुषीणाम् ॥४॥ पूर्वे । अर्धे । रजसः । अप्यस्य । गवाम् । जनित्री । अकृत । प्र । केतुम् । वि । ऊँ इति । प्रथते । विऽस्तरम् । वरीयः । आ । उभा । पृणन्ती । पित्रोः । उपऽस्था ॥५॥ एव । इत् । एषा । पुरुऽतमा । दृशे । कम् । न । अजामिम् । न । परि । वृणक्ति । जामिम् । अरेपसा । तन्वा । शाशदाना । न । अर्भात् । ईषते । न । महः । विऽभाती ॥६॥ अभ्राताऽइव । पुंसः । एति । प्रतीची । गर्तऽआरुगिव । सनये । धनानाम् । जायाऽइव । पत्ये । उ-

शती । सुऽवासाः । उषाः । हस्राऽइव । नि । रिणीते । अप्सः ॥७॥ स्वसा । स्वसे । ज्यायस्यै । योनिम् । अरैक् । अप । एति । अस्याः । प्रतिचक्ष्यऽइव । विऽउच्छन्ती । रश्मिऽभिः । सूर्यस्य । अञ्जि । अङ्क्ते । समनगाःऽइव । व्राः ॥८॥ आसाम् । पूर्वीसाम् । अहंऽसु । स्वसॄणाम् । अपरा । पूर्वीम् । अभि । एति । पश्चात् । ताः । प्रत्नऽवत् । नव्यसीः । नूनम् । अस्मे इति । रेवत् । उच्छन्तु । सुऽदिनाः । उषसः ॥९॥ प्र । बोधय । उषः । पृणतः । मघोनि । अवुंध्यमानाः । पणयः । ससन्तु । रेवत् । उच्छ । मघवत्ऽभ्यः । मघोनि । रेवत् । स्तोत्रे । सूनृते । जरयन्ती ॥१०॥ अर्व । इयम् । अश्वैत् । युवतिः । पुरस्तात् । युङ्क्ते । गवाम् । अरुणानाम् । अनीकम् । वि । नूनम् । उच्छात् । असति । प्र । केतुः । गृहम्ऽगृहम् । उप । तिष्ठाते । अग्निः ॥११॥ उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ । अमा । सते । वहसि । भूरि । वामम् । उषः । देवि । दाशुषे । मर्त्याय ॥१२॥ अस्तोढ्वम् । स्तोम्याः । ब्रह्मणा । मे । अवीवृधध्वम् । उशतीः । उषसः । युष्माकम् । देवीः । अवसा । सनेम । सहस्रिणम् । च । शतिनम् । च । वाजम् ॥१३॥

1. 125

प्रातरिति । रत्नम् । प्रातःऽइत्वा । दधाति । तम् । चिकित्वान् । प्रतिऽगृह्य । नि । धत्ते । तेन । प्रऽजाम् । वर्धयमानः । आयुः । रायः । पोषेण । सचते । सुऽवीरः ॥१॥ सुऽगुः । असत् । सुऽहिरण्यः । सुऽअश्वः । बृहत् । अस्मै । वयः । इन्द्रः । दधाति । यः । त्वा । आऽद्यन्तम् । वसुना । प्रातःऽइत्वः । सुचीजयाऽइव । पार्दिम् । उत्ऽसिनाति

॥२॥ आयम् । अद्य । सुऽकृतम् । प्रातः । इच्छन् । इष्टेः । पुत्रम् । वसुऽमता । रथेन । अंशोः । सुतम् । पायय । मत्सरस्य । क्षयत्ऽवीरम् । वर्धय । सूनृताभिः ॥३॥ उप । क्षरन्ति । सिन्धवः । मयःऽभुवः । ईजानम् । च । यक्ष्यमाणम् । च । धेनवः । पृणन्तम् । च । पपुरिम् । च । श्रवस्यवः । घृतस्य । धाराः । उप । यन्ति । विश्वतः ॥४॥ नाकस्य । पृष्ठे । अधि । तिष्ठति । श्रितः । यः । पृणाति । सः । ह । देवेषु । गच्छति । तस्मै । आपः । घृतम् । अर्षन्ति । सिन्धवः । तस्मै । इयम् । दक्षिणा । पिन्वते । सदा ॥५॥ दक्षिणाऽवताम् । इत् । इमानि । चित्रा । दक्षिणाऽवताम् । दिवि । सूर्यासः । दक्षिणाऽवन्तः । अमृतम् । भजन्ते । दक्षिणाऽवन्तः । प्र । तिरन्ते । आयुः ॥६॥ मा । पृणन्तः । दुःऽइतम् । एनः । आ । अरन् । मा । जारिषुः । सूरयः । सुऽव्रतासः । अन्यः । तेषाम् । परिऽधिः । अस्तु । कः । चित् । अपृणन्तम् । अभि । सम् । यन्तु । शोकाः ॥७॥

1. 126

अमन्दान् । स्तोमान् । प्र । भरे । मनीषा । सिन्धौ । अधि । क्षियतः । भाव्यस्य । यः । मे । सहस्रम् । अमिमीत । सवान् । अतूर्तः । राजा । श्रवः । इच्छमानः ॥१॥ शतम् । राज्ञः । नाधमानस्य । निष्कान् । शतम् । अश्वान् । प्रऽयतान् । सद्यः । आदम् । शतम् । कक्षीवान् । असुरस्य । गोनाम् । दिवि । श्रवः । अजरम् । आ । ततान ॥२॥ उप । मा । श्यावः । स्वनयेन । दत्ताः । वधूऽमन्तः । दश । रथासः । अस्थुः । षष्टिः । सहस्रम् । अनु । गव्यम् । आ । अगात् । सनत् । कक्षीवान् । अभिऽपित्वे । अह्नाम् ॥३॥ चत्वारिंशत् । दशऽरथस्य । शोणाः । सहस्रस्य । अग्रे । श्रे-

णिम् । नयन्ति । मदऽच्युतः । कृशनऽवतः । अत्यान् । कक्षीवन्तः । उत् । अमृक्षन्त । पज्राः ॥४॥ पूर्वीम् । अनु । प्रऽयतिम् । आ । ददे । वः । त्रीन् । युक्तान् । अष्टौ । अरिऽधायसः । गाः । सुऽबन्धवः । ये । विश्याःऽइव । व्राः । अनस्वन्तः । श्रवः । ऐषन्त । पज्राः ॥५॥ आऽगधिता । परिऽगधिता । या । कशीकाऽइव । जङ्घहे । ददाति । मह्यम् । यादुरी । याशूनाम् । भोज्या । शता ॥६॥ उपऽउप । मे । परा । मृश । मा । मे । दभ्राणि । । मन्यथाः । सर्वा । अहम् । अस्मि । रोमशा । गन्धारीणाम्ऽइव । अविका ॥७॥

1. 127

अग्निम् । होतारम् । मन्ये । दास्वन्तम् । वसुम् । सूनुम् । सहसः । जातऽवेदसम् । विप्रम् । न । जातऽवेदसम् । यः । ऊर्ध्वया । सुऽअध्वरः । देवः । देवाच्या । कृपा । घृतस्य । विऽभ्राष्टिम् । अनु । वष्टि । शोचिषा । आऽजुह्वानस्य । सर्पिषः ॥१॥ यजिष्ठम् । त्वा । यजमानाः । हुवेम । ज्येष्ठम् । अङ्गिरसाम् । विप्र । मन्मऽभिः । विप्रेभिः । शुक्र । मन्मऽभिः । परिज्मानम्ऽइव । द्याम् । होतारम् । चर्षणीनाम् । शोचिःऽकेशम् । वृषणम् । यम् । इमाः । विशः । प्र । अवन्तु । जूतये । विशः ॥२॥ सः । हि । पुरु । चित् । ओजसा । विरुक्मता । दीद्यानः । भवति । द्रुहम्ऽतरः । परशुः । न । द्रुहम्ऽतरः । वीळु । चित् । यस्य । समृक्तौ । श्रुवत् । वनाऽइव । यत् । स्थिरम् । निःऽसहमानः । यमते । न । अयते । धन्वऽसहा । न । अयते ॥३॥ दध्वा । चित् । अस्मै । अनु । दुः । यथा । विदे । तेजिष्ठाभिः । अरणिऽभिः । दाष्टि । अवसे । अग्नये । दाष्टि । अवसे । प्र । यः । पुरूणि । गाहते । तक्षत् । वनाऽइव । शोचिषा । स्थिरा । चित् । अन्ना । नि । रिणाति । ओजसा ।

नि । स्थिरासि । चित् । ओजसा ॥४॥ तम् । अस्य । पृक्षम् । उपरासु । धीमहि । नक्तम् । यः । सुदर्शऽतरः । दिवाऽतरात् । अप्रऽआयुषे । दिवाऽतरात् । आत् । अस्य । आयुः । प्रमंणऽवत् । वीळु । शर्मे । न । सूनवे । भक्तम् । अभक्तम् । अवः । व्यन्तः । अजराः । अग्नयः । व्यन्तः । अजराः ॥५॥ सः । हि । शर्धः । न । मारुतम् । तुविऽस्वनिः । अग्नेऽस्वतीषु । उर्वरासु । इष्टनिः । आर्तनासु । इष्टनिः । आदत् । हव्यानि । आऽददिः । यज्ञस्य । केतुः । अर्हणा । अध । स्म । अस्य । हर्षतः । हृषीवतः । विश्वे । जुषन्त । पन्थाम् । नरः । शुभे । न । पन्थाम् ॥६॥ द्विता । यत् । ईम् । कीस्तासः । अभिऽद्यवः । नमस्यन्तः । उपऽवोचन्त । भृगवः । मथ्नन्तः । दाशा । भृगवः । अग्निः । ईशे । वसूनाम् । शुचिः । यः । घर्मिः । एषाम् । प्रियान् । अपिऽधीन् । वनिषीष्ट । मेधिरः । आ । वनिषीष्ट । मेधिरः ॥७॥ विश्वासाम् । त्वा । विशाम् । पतिम् । हवामहे । सर्वीसाम् । समानम् । दम्ऽपतिम् । शुजे । सत्यऽगिर्वाहसम् । शुजे । अतिथिम् । मानुषाणाम् । पितुः । न । यस्य । आसया । अमी इति । च । विश्वे । अमृतासः । आ । वयः । हव्या । देवेषु । आ । वयः ॥८॥ त्वम् । अग्ने । सहसा । सहन्ऽतमः । शुष्मिन्ऽतमः । जायसे । देवऽतातये । रयिः । न । देवऽतातये । शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः । अध । स्म । ते । परि । चरन्ति । अजर । भृष्टीऽवानः । न । अजर ॥९॥ प्र । वः । महे । सहसा । सहस्वते । उषःऽबुधे । पशुऽसे । न । अग्नये । स्तोमः । बभूतु । अग्नये । प्रति । यत् । ईम् । हविष्मान् । विश्वासु । चारु । जोगुवे । अग्ने । रेभः । न । जरते । ऋणम् । जूर्णिः । होता । ऋणम् ॥१०॥ सः । नः । नेदिष्ठम् । दद्दशानः । आ

भर । अग्ने । देवेभिः । सऽचनाः । सुऽचेतुना । महः । रायः । सुऽचेतुना । महि । श्रविष्ठ । नः । कृधि । सम्ऽचन्द्रे । भुजे । अस्यै । महि । स्तोतृऽभ्यः । मघऽवन् । सुऽवीर्यम् । मथीः । उग्रः । न । शवसा ॥११॥

1. 128

अयम् । जायत । मनुषः । धरीमणि । होता । यजिष्ठः । उशिजाम् । अनु । व्रतम् । अग्निः । स्वम् । अनु । व्रतम् । विश्वऽश्रुष्टिः । सखिऽयते । रयिःऽइव । श्रवस्यते । अदब्धः । होता । नि । सदत् । इळः । पदे । परिऽईतः । इळः । पदे ॥१॥ तम् । यज्ञऽसाधम् । अपि । वातयामसि । ऋतस्य । पथा । नमसा । हविष्मता । देवऽताता । हविष्मता ॥ सः । नः । ऊर्जाम् । उपऽआभृति । अया । कृपा । न । जूर्यति । यम् । मातरिश्वा । मनवे । पराऽवतः । देवम् । भारिति । भाः । पराऽवतः ॥२॥ एवेन । सद्यः । परि । एति । पार्थिवम् । मुहुःऽगीः । रेतः । वृषभः । कनिक्रदत् । दधत् । रेतः । कनिक्रदत् । शतम् । चर्षणीः । अक्षऽभिः । देवः । वनेषु । तुर्वणिः । सदः । दधानः । उपरेषु । सानुषु । अग्निः । परेषु । सानुषु ॥३॥ सः । सुऽक्रतुः । पुरःऽहितः । दमेऽदमे । अग्निः । यज्ञस्य । अध्वरस्य । चेतति । क्रत्वा । यज्ञस्य । चेतति । क्रत्वा । वेधाः । इषुऽयते । विश्वा । जातानि । पस्पशे । यतः । घृतऽश्रीः । अतिथिः । अजायत । वहिः । वेधाः । अजायत ॥४॥ क्रत्वा । यत् । अस्य । तविषीषु । पृञ्चते । अग्नेः । अवेन । मरुताम् । न । भोज्या । इषिराय । न । भोज्या । सः । हि । स्म । दानम् । इन्वति । वसूनाम् । च । मज्मना । सः । नः । त्रासते । दुःऽइतात् । अभिऽह्रुतः । अंसात् । अघात् । अभिऽह्रुतः ॥५॥ विश्वः । विऽहायाः ।

अरतिः । वसुः । दधे । हस्ते । दक्षिणे । तरणिः । न । शिश्रथत् । श्रवस्यया । न । शिश्रथत् । विश्वस्मै । इत् । इषुध्यते । देवऽत्रा । हव्यम् । आ । ऊहिषे । विश्वस्मै । इत् । सुऽकृते । वारम् । ऋण्वति । अग्निः । द्वारा । वि । ऋण्वति । ॥६॥ सः । मानुषे । वृजने । शम्ऽतमः । हितः । अग्निः । यज्ञेषु । जेन्यः । न । विश्पतिः । प्रियः । यज्ञेषु । विश्पतिः । सः । हव्या । मानुषाणाम् । इळा । कृतानि । पत्यते । सः । नः । त्रासते । वरुणस्य । धूर्तेः । महः । देवस्य । धूर्तेः ॥७॥ अग्निम् । होतारम् । ईळते । वसुऽधितिम् । प्रियम् । चेतिष्ठम् । अरतिम् । नि । एरिरे । हव्यऽवाहम् । नि । एरिरे । विश्वऽआयुम् । विश्वऽवेदसम् । होतारम् । यजतम् । कविम् । देवासः । रण्वम् । अवसे । वसुऽयवः । गीःऽभिः । रण्वम् । वसुऽयवः ॥८॥

1. 129

यम् । त्वम् । रथम् । इन्द्र । मेधऽसातये । अपाका । सन्तम् । इषिर । प्रऽनयसि । प्र । अनवद्य । नयसि । सद्यः । चित् । तम् । अभिष्टये । करः । वशः । च । वाजिनम् । सः । अस्माकम् । अनवद्य । तुतुजान । वेधसाम् । इमाम् । वाचम् । न । वेधसाम् ॥१॥ सः । श्रुधि । यः । स्म । पृतनासु । कासु । चित् । दक्षाय्यः । इन्द्र । भरेऽहूतये । नृऽभिः । असि । प्रऽतूर्तये । नृऽभिः । यः । शूरैः । स्वःऽइति स्वः । सनिता । यः । विप्रैः । वाजम् । तरुता । तम् । ईशानासः । इरधन्त । वाजिनम् । पृक्षम् । अत्यम् । न । वाजिनम् ॥२॥ दस्मः । हि । स्म । वृषणम् । पिन्वसि । त्वचम् । कम् । चित् । यावीः । अररुम् । शूर । मर्त्यम् । परिऽह्वणसि । मर्त्यम् । इन्द्र । उत । तुभ्यम् । तत् । दिवे ।

तत् । रुद्राय । स्वऽयशसे । मित्राय । वोचम् । वरुणाय । सऽप्रथः । सुऽमृळीकाय । सऽप्रथः ॥३॥ अस्माकम् । वः । इन्द्रम् । उश्मसि । इष्टये । सखायम् । विश्वऽआयुम् । प्रऽसहम् । युजम् । वाजेषु । प्रऽसहम् । युजम् । अस्माकम् । ब्रह्म । ऊतये । अव । पृत्सुषु । कासु । चित् । नहि । त्वा । शत्रुः । स्तरते । स्तृणोषि । यम् । विश्वम् । शत्रुम् । स्तृणोषि । यम् ॥४॥ नि । सु । नम । अतिऽमतिम् । कयस्य । चित् । तेजिष्ठाभिः । अरणिऽभिः । न । ऊतिऽभिः । उग्राभिः । उग्र । ऊतिऽभिः । नेषि । नः । यथा । पुरा । अनेनाः । शूर । मन्यसे । विश्वानि । पूरोः । अप । पर्षि । वह्निः । आसा । वह्निः । नः । अच्छ ॥५॥ प्र । तत् । वोचेयम् । भव्याय । इन्दवे । हव्यः । न । यः । इषऽवान् । मन्म । रेजति । रक्षःऽहा । मन्म । रेजति । स्वयम् । सः । अस्मत् । आ । निदः । वधैः । अजेत । दुःऽमतिम् । अव । स्रवेत् । अघऽशैसः । अवऽतरम् । अव । क्षुद्रम्ऽइव । स्रवेत् ॥६॥ वनेम । तत् । होत्रया । चितन्त्या । वनेम । रयिम् । रयिऽवः । सुऽवीर्यम् । रण्वम् । सन्तम् । सुऽवीर्यम् । दुःऽमन्मानम् । सुमन्तुऽभिः । आ । ईम् । इषा । पृचीमहि । आ । सत्याभिः । इन्द्रम् । द्युम्नहूतिऽभिः । यजत्रम् । द्युम्नहूतिऽभिः ॥७॥ प्रऽअग्ने । वः । अस्मे इति । स्वयशःऽभिः । ऊती । परिऽवर्गे । इन्द्रः । दुःऽमतीनाम् । दरीमन् । दुःऽमतीनाम् । स्वयम् । सा । रिषयध्यै । या । नः । उपऽईषे । अत्रैः । हता । ईम् । असत् । न । वक्षति । क्षिप्रा । जूर्णिः । न । वक्षति । ॥८॥ त्वम् । नः । इन्द्र । राया । परीणसा । याहि । पथा । अनेहसा । पुरः । याहि । अरक्षसा । सचस्व । नः । पराके । आ । सचस्व । अस्तम्ऽईके । आ । पाहि । नः । दूरात् । आरात् । अभिष्टिऽभिः ।

सदा । पाहि । अभिष्टिऽभिः ॥९॥ त्वम् । नः । इन्द्र । राया । तरुषसा । उग्रम् । चित् । त्वा । महिमा । सचत् । अवसे । महे । मित्रम् । न । अवसे । ओजिष्ठ । त्रातः । अवितरिति । रथम् । कम् । चित् । अमर्त्य । अन्यम् । अस्मत् । रिरिषेः । कम् । चित् । अद्रिऽवः । रिरिक्षन्तम् । चित् । अद्रिऽवः ॥१०॥ पाहि । नः । इन्द्र । सुऽस्तुत । स्निधः । अवऽयाता । सदम् । इत् । दुःऽमतीनाम् । देवः । सन् । दुःऽमतीनाम् । हन्ता । पापस्य । रक्षसः । त्राता । विप्रस्य । माऽवतः । अध । हि । त्वा । जनिता । जीजनत् । वसो इति । रक्षःऽहनम् । त्वा । जीजनत् । वसो इति ॥११॥

1. 130

आ । इन्द्र । याहि । उप । नः । पराऽवतः । न । अयम् । अच्छ । विदथानिऽइव । सत्ऽपतिः । अस्तम् । राजाऽइव । सत्ऽपतिः । हवामहे । त्वा । वयम् । प्रयस्वन्तः । सुते । सचा । पुत्रासः । न । पितरम् । वाजऽसातये । मंहिष्ठम् । वाजऽसातये ॥१॥ पिब । सोमम् । इन्द्र । सुवानम् । अद्रिऽभिः । कोशेन । सिक्तम् । अवतम् । न । वंसगः । तृषाणः । न । वंसगः । मदाय । हर्यताय । ते । तुविःऽतमाय । धायसे । आ । त्वा । यच्छन्तु । हरितः । न । सूर्यम् । अहा । विश्वाऽइव । सूर्यम् ॥२॥ अविन्दत् । दिवः । निऽहितम् । गुहा । निऽधिम् । वेः । न । गर्भम् । परिऽवीतम् । अश्मनि । अनन्ते । अन्तः । अश्मनि । व्रजम् । वज्री । गवाम्ऽइव । सिसासन् । अङ्गिरःऽतमः । अप । अवृणोत् । इषः । इन्द्रः । परिऽवृताः । द्वारः । इषः । परिऽवृताः ॥३॥ दद्हाणः । वज्रम् । इन्द्रः । गभस्त्योः । क्षयाऽइव । तिग्मम् । अस-

नाय । सम् । श्यत् । अहिऽहत्याय । सम् । श्यत् । सम्ऽविव्यानः । ओजसा । शवःऽभिः । इन्द्र । मज्मना । तष्टाऽइव । वृक्षम् । वनिनः । नि । वृश्चसि । परशाऽइव । नि । वृश्चसि ॥४॥ त्वम् । वृथा । नद्यः । इन्द्र । सर्तवे । अच्छ । समुद्रम् । असृजः । रथान्ऽइव । वाजऽयतः । रथान्ऽइव । इतः । ऊतीः । अयुञ्जत । समानम् । अर्थम् । अञ्चितम् । धेनूःऽइव । मनवे । विश्वऽदोहसः । जनाय । विश्वऽदोहसः ॥५॥ इमाम् । ते । वाचम् । वसुऽयन्तः । आयवः । रथम् । न । धीरः । सुऽअपाः । अतक्षिषुः । सुम्नाय । त्वाम् । अतक्षिषुः । शुम्भन्तः । जेन्यम् । यथा । वाजेषु । विप्र । वाजिनम् । अत्यम्ऽइव । शवसे । सातये । धनाः । विश्वा । धनानि । सातये ॥६॥ भिनत् । पुरः । नवतिम् । इन्द्र । पूरवे । दिवःऽदासाय । महि । दाशुषे । नृतो इति । वज्रेण । दाशुषे । नृतो इति । अतिथिऽग्वाय । शम्बरम् । गिरेः । उग्रः । अव । अभरत् । महः । धनानि । दयमानः । ओजसा । विश्वा । धनानि । ओजसा ॥७॥ इन्द्रः । समत्ऽसु । यजमानम् । आर्यम् । प्र । आवत् । विश्वेषु । शतम्ऽऊतिः । आजिषु । स्वःऽमीळ्हेषु । आजिषु । मनवे । शासत् । अव्रतान् । त्वचम् । कृष्णाम् । अरन्धयत् । धक्षत् । न । विश्वम् । ततृषाणम् । ओषति । नि । अर्शसानम् । ओषति ॥८॥ सूरः । चक्रम् । प्र । वृहत् । जातः । ओजसा । प्रऽपित्वे । वाचम् । अरुणः । मुषायति । ईशानः । आ । मुषायति । उशना । यत् । पराऽवतः । अजगन् । ऊतये । कवे । सुम्नानि । विश्वा । मनुषाऽइव । तुर्वणिः । अहा । विश्वाऽइव । तुर्वणिः । ॥९॥ सः । नः । नव्येभिः । वृषऽकर्मन् । उक्थैः । पुराम् । दर्तरिति । दर्तः । पायुऽभिः । पाहि । शग्मैः । दिवःऽदासेभिः । इन्द्र । स्तवानः ।

वृधीथाः । अहोभिःऽइव । द्यौः ॥१०॥

1. 131

इन्द्राय । हि । द्यौः । असुरः । अनमत । इन्द्राय । मही । पृथिवी । वरीमऽभिः । घुम्नऽसाता । वरीमऽभिः । इन्द्रम् । विश्वे । सऽजोषसः । देवासः । दधिरे । पुरः । इन्द्राय । विश्वा । सवनानि । मानुषा । रातानि । सन्तु । मानुषा ॥१॥ विश्वेषु । हि । त्वा । सवनेषु । तुञ्जते । समानम् । एकम् । वृषऽमन्यवः । पृथक् । स्वऽरितिं स्वः । सनिष्यवः । पृथक् । तम् । त्वा । नावम् । न । पर्षणिम् । शूषस्य । धुरि । धीमहि । इन्द्रम् । न । यज्ञैः । चितयन्तः । आयवः । स्तोमेभिः । इन्द्रम् । आयवः ॥२॥ वि । त्वा । ततस्रे । मिथुनाः । अवस्यवः । व्रजस्य । साता । गव्यस्य । निःऽसृजः । सन्तः । इन्द्र । निःऽसृजः । यत् । गव्यन्ता । द्वा । जना । स्वः । यन्ता । सम्ऽऊहसि । आविः । करिक्रत् । वृषणम् । सचाऽशुवम् । वज्रम् । इन्द्र । सचाऽशुवम् ॥३॥ विदुः । ते । अस्य । वीर्यस्य । पूरवः । पुरः । यत् । इन्द्र । शारदीः । अवऽअतिरः । ससहानः । अवऽअतिरः । शासः । तम् । इन्द्र । मर्त्यम् । अयज्युम् । शवसः । पते । महीम् । अमुष्णाः । पृथिवीम् । इमाः । अपः । मन्दसानः । इमाः । अपः ॥४॥ आत् । इत् । ते । अस्य । वीर्यस्य । चर्किरन् । मदेषु । वृषन् । उशिजः । यत् । आविथ । सखिऽयतः । यत् । आविथ । चकर्थ । कारम् । एभ्यः । पृतनासु । प्रऽवन्तवे । ते । अन्याम्ऽअन्याम् । नद्यम् । सनिष्णत । श्रवस्यन्तः । सनिष्णत ॥५॥ उतो इति । नः । अस्याः । उषसः । जुषेत । हि । अर्कस्य । बोधि । हविषः । हवीमऽभिः । स्वःऽसाता । हवीमऽभिः । यत् । इन्द्र । हन्तवे । मृधः ।

वृषा । वज्रिन् । चिकेतसि । आ । मे । अस्य । वेधसः । नवीयसः । मन्म । श्रुधि । नवीयसः ॥६॥ त्वम् । तम् । इन्द्र । ववृधानः । अस्मऽयुः । अमित्रऽयन्तम् । तुविऽजात । मर्त्यम् । वज्रेण । शूर । मर्त्यम् । जहि । यः । नः । अघऽयति । शृणुष्व । सुश्रवःऽतमः । रिष्टम् । न । यामन् । अप । भूतु । दुःऽमतिः । विश्वा । अप । भूतु । दुःऽमतिः ॥७॥

1. 132

त्वया । वयम् । मघऽवन् । पूर्व्ये । धने । इन्द्रत्वाऽऊताः । सस-ह्याम । पृतन्यतः । वनुयाम । वनुष्यतः । नेदिष्ठे । अस्मिन् । अहनि । अधि । वोच । नु । सुन्वते । अस्मिन् । यज्ञे । वि । चयेम । भरे । कृ-तम् । वाजऽयन्तः । भरे । कृतम् ॥१॥ स्वःऽजेषे । भरे । आप्रस्य । व-क्मनि । उषःऽबुधः । स्वस्मिन् । अञ्जसि । क्राणस्य । स्वस्मिन् । अञ्ज-सि । अहन् । इन्द्रः । यथा । विदे । शीर्ष्णाऽशीर्ष्णा । उपऽवाच्यः । अस्म-ऽत्रा । ते । सधर्यक् । सन्तु । रातयः । भद्राः । भद्रस्य । रातयः ॥२॥ तत् । तु । प्रयः । प्रत्नऽथा । ते । शुशुक्वनम् । यस्मिन् । यज्ञे । वारम् । अकृण्वत । क्षयम् । ऋतस्य । वाः । असि । क्षयम् । वि । तत् । वोचेः । अध । द्विता । अन्तरिति । पश्यन्ति । रश्मिऽभिः । सः । घ । विदे । अनु । इन्द्रः । गोऽएषणः । बन्धुक्षित्ऽभ्यः । गोऽएषणः ॥३॥ नु । इ-त्था । ते । पूर्वऽथा । च । प्रऽवाच्यम् । यत् । अङ्गिरःऽभ्यः । अ-वृणोः । अप । व्रजम् । इन्द्र । शिक्षन् । अप । व्रजम् । आ । एभ्यः । समान्या । दिशा । अस्मभ्यम् । जेषि । योत्सि । च । सुन्वत्ऽभ्यः । रन्धय । कम् । चित् । अव्रतम् । हृणायन्तम् । चित् । अव्रतम् ॥४॥ सम् । यत् । जनान् । क्रतुऽभिः । शूरः । ईक्षयत् । धने । हिते । तरु-

षन्त । श्रवस्यवः । प्र । यन्त । श्रवस्यवः । तस्मै । आयुः । प्रजा-ऽवत् । इत् । वाघे । अर्चन्ति । ओजसा । इन्द्रे । ओक्यम् । दिधिषन्त । धीतयः । देवान् । अच्छ । न । धीतयः ॥५॥ युवम् । तम् । इन्द्रा-पर्वता । पुरःऽयुधा । यः । नः । पृतन्यात् । अप । तम्ऽतम् । इत् । हतम् । वज्रेण । तम्ऽतम् । इत् । हतम् । दूरे । चत्ताय । छत्सत् । गहनम् । यत् । इनक्षत् । अस्माकम् । शत्रून् । परि । शूर । विश्वतः । दर्मा । दर्षीष्ट । विश्वतः ॥६॥

1. 133

उभे इति । पुनामि । रोदसी इति । ऋतेन । द्रुहः । दहामि । सम् । महीः । अनिन्द्राः । अभिऽव्लग्य । यत्र । हताः । अमित्राः । वैलऽस्थानम् । परि । तृळ्हाः । अशेरन् ॥१॥ अभिऽव्लग्य । चित् । अद्रिऽवः । शीर्षा । यातुऽमतीनाम् । छिन्धि । वटूरिणा । पदा । महाऽवट्टूरिणा । पदा ॥२॥ अव । आसाम् । मघऽवन् । जहि । शर्धः । यातुऽमतीनाम् । वैलऽस्थानके । अर्मके । महाऽवैलस्थे । अर्मके ॥३॥ यासाम् । तिस्रः । पञ्चाशतः । अभिऽव्लङ्गैः । अपऽअवपः । तत् । सु । ते । मनायति । तकत् । सु । ते । मनायति ॥४॥ पिशङ्गऽभृष्टिम् । अम्भृ-णम् । पिशाचिम् । इन्द्र । सम् । मृण । सर्वम् । रक्षः । नि । बर्हय ॥५॥ अवः । महः । इन्द्र । दद्हि । श्रुधि । नः । शुशोच । हि । द्यौः । क्षाः । न । भीषा । अद्रिऽवः । घृणात् । न । भीषा । अद्रिऽवः । शुष्मिन्ऽतमः । हि । शुष्मिऽभिः । वधैः । उग्रेभिः । ईयसे । अपुरुष-ऽघ्नः । अप्रतिऽइत । शूर । सत्वऽभिः । त्रिऽसप्तैः । शूर । सत्वऽभिः ॥६॥ वनोति । हि । सुन्वन् । क्षयम् । परीणसः । सुन्वानः । हि ।

स्म । यजति । अर्व । द्विषः । देवानाम् । अर्व । द्विषः । सुन्वानः । इत् । सिसासति । सहस्रा । वाजी । अदृतः । सुन्वानाय । इन्द्रः । ददाति । आऽशुर्वम् । रयिम् । ददाति । आऽशुर्वम् ॥७॥

1. 134

आ । त्वा । जुवः । ररहाणाः । अभि । प्रयः । वायो इति । वहन्तु । इह । पूर्वऽपीतये । सोमस्य । पूर्वऽपीतये । ऊर्ध्वा । ते । अनु । सूनृता । मनः । तिष्ठतु । जानती । नियुत्वता । रथेन । आ । याहि । दावने । वायो इति । मखस्य । दावने ॥१॥ मन्दन्तु । त्वा । मन्दिनः । वायो इति । इन्दवः । अस्मत् । क्राणासः । सुऽकृताः । अभिऽद्यवः । गोभिः । क्राणाः । अभिऽद्यवः । यत् । ह । क्राणाः । इरध्यै । दक्षम् । सचन्ते । ऊतयः । सध्रीचीनाः । निऽयुतः । दावने । धियः । उप । ब्रुवते । ईम् । धियः ॥२॥ वायुः । युङ्क्ते । रोहिता । वायुः । अरुणा । वायुः । रथे । अजिरा । धुरि । वोळ्हवे । वहिष्ठा । धुरि । वोळ्हवे । प्र । बोधय । पुरम्ऽधिम् । जारः । आ । ससतीम्ऽइव । प्र । चक्षय । रोदसी इति । वासय । उषसः । श्रवसे । वासय । उषसः ॥३॥ तुभ्यम् । उषसः । शुचयः । पराऽवति । भद्रा । वस्त्रा । तन्वते । दम्ऽसु । रश्मिषु । चित्रा । नव्येषु । रश्मिषु । तुभ्यम् । धेनुः । सबःऽदुघा । विश्वा । वसूनि । दोहते । अजनयः । मरुतः । वक्षणाभ्यः । दिवः । आ । वक्षणाभ्यः ॥४॥ तुभ्यम् । शुक्रासः । शुचयः । तुरण्यवः । मदेषु । उग्राः । इषणन्त । भुर्वणि । अपाम् । इषन्त । भुर्वणि । त्वाम् । त्सारी । दसमानः । भगम् । ईट्टे । तक्ऽवीयन् । त्वम् । विश्वस्मात् । भुवनात् । पासि । धर्मणा । असुर्यात् । पासि ।

धर्मणा ॥५॥ त्वम् । नः । वायो इति । एषाम् । अपूर्व्यः । सोमानाम् । प्रथमः । पीतिम् । अर्हसि । सुतानाम् । पीतिम् । अर्हसि । उतो इति । विहुत्मतीनाम् । विशाम् । ववर्जुषीणाम् । विश्वाः । इत् । ते । धेनवः । दुहे । आऽशिरम् । घृतम् । दुहते । आऽशिरम् ॥६॥

1. 135.

स्तीर्णम् । बर्हिः । उप । नः । याहि । वीतये । सहस्रेण । निऽयुता । नियुत्वते । शतिनीभिः । नियुत्वते । तुभ्यम् । हि । पूर्वऽपीतये । देवाः । देवाय । येमिरे । प्र । ते । सुतासः । मधुऽमन्तः । अस्थिरन् । मदाय । क्रत्वे । अस्थिरन् ॥१॥ तुभ्य । अयम् । सोमः । परिऽपूतः । अद्रिऽभिः । स्पार्हा । वसानः । परि । कोशम् । अर्षति । शुक्रा । वसानः । अर्षति । तव । अयम् । भागः । आयुषु । सोमः । देवेषु । हूयते । वहे । वायो इति । निऽयुतः । याहि । अस्मऽयुः । जुषाणः । याहि । अस्मऽयुः ॥२॥ आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरम् । सहस्रिणीभिः । उप । याहि । वीतये । वायो इति । हव्यानि । वीतये । तव । अयम् । भागः । ऋत्वियः । सऽरश्मिः । सूर्ये । सचा । अध्वर्युऽभिः । भरमाणाः । अयंसत । वायो इति । शुक्राः । अयंसत ॥३॥ आ । वाम् । रथः । नियुत्वान् । वक्षत् । अवसे । अभि । प्रयांसि । सुऽधितानि । वीतये । वायो इति । हव्यानि । वीतये । पिबतम् । मध्वः । अन्धसः । पूर्वऽपेयम् । हि । वाम् । हितम् । वायो इति । आ । चन्द्रेण । राधसा । आ । गतम् । इन्द्रः । च । राधसा । आ । गतम् ॥४॥ आ । वाम् । धियः । ववृत्युः । अध्वरान् । उप । इमम् । इन्दुम् । मर्मृजन्त । वाजिनम् । आशुम् । अत्यम् । न । वाजिनम् । तेषाम् । पिबतम् ।

अस्मयू । इत्यस्मऽयू । आ । नः । गन्तम् । इह । ऊत्या । इन्द्रवायू इति । सुतानाम् । अद्रिऽभिः । युवम् । मदाय । वाजऽदा । युवम् ॥५॥ इमे । वाम् । सोमाः । अप्ऽसु । आ । सुताः । इह । अध्वर्यु-ऽभिः । भरमाणाः । अयंसत । वायो इति । शुक्राः । अयंसत । एते । वाम् । अभि । असृक्षत । तिरः । पवित्रम् । आशवः । युवाऽयवः । अति । रोमाणि । अव्यया । सोमासः । अति । अव्यया ॥६॥ अति । वायो इति । ससतः । याहि । शश्वतः । यत्र । ग्रावा । वदति । तत्र । गच्छतम् । गृहम् । इन्द्रः । च । गच्छतम् । वि । सूनृता । ददृशे । रीयते । घृतम् । आ । पूर्णया । निऽयुता । याथः । अध्वरम् । इन्द्रः । च । याथः । अध्वरम् ॥७॥ अत्र । अह । तत् । वहेथे इति । मध्वः । आऽहुतिम् । यम् । अश्वत्थम् । उपऽतिष्ठन्त । जायवः । अस्मे इति । ते । सन्तु । जायवः । साकम् । गावः । सुवते । पच्यते । यवः । न । ते । वायो इति । उप । दस्यन्ति । धेनवः । न । अप । दस्यन्ति । धेनवः ॥८॥ इमे । ये । ते । सु । वायो इति । बाहुऽओजसः । अन्तः । नदी इति । ते । पतयन्ति । उक्षणः । महि । व्राधन्तः । उक्षणः । धन्वन् । चित् । ये । अनाशवः । जीराः । चित् । अगिराऽओकसः । सूर्यस्यऽइव । रश्मयः । दुःऽनियन्तवः । हस्तयोः । दुःऽनियन्तवः ॥९॥

1. 136.

प्र । सु । ज्येष्ठम् । निऽचिराभ्याम् । बृहत् । नमः । हव्यम् । मतिम् । भरत । मृळयत्ऽभ्याम् । स्वादिष्ठम् । मृळयत्ऽभ्याम् । ता । सम्ऽराजा । घृतासुती इति घृतऽआसुती । यज्ञेऽयज्ञे । उपऽस्तुता । अथ । एनोः । क्षत्रम् । न । कुतः । चन । आऽधृषे । देवऽत्वम् ।

नु । चित् । आऽहृषे ॥१॥ अदर्शि । गातुः । उरवे । वरीयसी । पन्थाः । ऋतस्य । सम् । अयंस्त । रश्मिऽभिः । चक्षुः । भगस्य । रश्मिऽभिः । द्युक्षम् । मित्रस्य । सदनम् । अर्यम्णः । वरुणस्य । च । अर्थ । दधाते इति । बृहत् । उक्थ्यम् । वयः । उपऽस्तुत्यम् । बृहत् । वयः ॥२॥ ज्योतिष्मतीम् । अदितिम् । धारयत्ऽधितिम् । स्वःऽवतीम् । आ । सचेते इति । दिवेऽदिवे । जागृऽवांसा । दिवेऽदिवे । ज्योतिष्मत् । क्षत्रम् । आशाते इति । आदित्या । दानुनः । पती इति । मित्रः । तयोः । वरुणः । यातयत्ऽजनः । अर्यमा । यातयत्ऽजनः ॥३॥ अयम् । मित्राय । वरुणाय । शम्ऽतमः । सोमः । भूतु । अवऽपानेषु । आऽभगः । देवः । देवेषु । आऽभगः । तम् । देवासः । जुषेरत । विश्वे । अद्य । सऽजोषसः । तथा । राजाना । करथः । यत् । ईमहे । ऋतऽवाना । यत् । ईमहे ॥४॥ यः । मित्राय । वरुणाय । अविधत् । जनः । अनर्वाणम् । तम् । परि । पातः । अंहसः । दाश्वांसम् । मर्तम् । अंहसः । तम् । अर्यमा । अभि । रक्षति । ऋजुऽयन्तम् । अनु । व्रतम् । उक्थैः । यः । एनोः । परिऽभूषति । व्रतम् । स्तोमैः । आऽभूषति । व्रतम् ॥५॥ नमः । दिवे । बृहते । रोदसीभ्याम् । मित्राय । वोचम् । वरुणाय । मीळ्हुषे । सुऽमृळीकाय । मीळ्हुषे । इन्द्रम् । अग्निम् । उप । स्तुहि । द्युक्षम् । अर्यमणम् । भगम् । ज्योक् । जीवन्तः । प्रऽजया । सचेमहि । सोमस्य । ऊती । सचेमहि ॥६॥ ऊती । देवानाम् । वयम् । इन्द्रऽवन्तः । मंसीमहि । स्वऽयशसः । मरुत्ऽभिः । अग्निः । मित्रः । वरुणः । शर्म । यंसन् । तत् । अश्याम । मघऽवानः । वयम् । च ॥७॥

1. 137

सुसुम । आ । यातम् । अद्रिंऽभिः । गोऽश्रीताः । मत्सराः । इमे । सोमासः । मत्सराः । इमे । आ । राजाना । दिविऽस्पृशा । अस्मऽत्रा । गन्तम् । उप । नः । इमे । वाम् । मित्रावरुणा । गोऽआशिरः । सोमाः । शुक्राः । गोऽआशिरः ॥१॥ इमे । आ । यातम् । इन्दवः । सोमासः । दधिंऽआशिरः । सुतासः । दधिंऽआशिरः । उत । वाम् । उषसः । बुधि । साकम् । सूर्यस्य । रश्मिऽभिः । सुतः । मित्राय । वरुणाय । पीतये । चारुः । ऋताय । पीतये ॥२॥ ताम् । वाम् । धेनुम् । न । वासरीम् । अंशुम् । दुहन्ति । अद्रिंऽभिः । सोमम् । दुहन्ति । अद्रिंऽभिः । अस्मऽत्रा । गन्तम् । उप । नः । अर्वाञ्चा । सोमऽपीतये । अयम् । वाम् । मित्रावरुणा । नृऽभिः । सुतः । सोमः । आ । पीतये । सुतः ॥३॥

1. 138

प्रऽप्र । पूष्णः । तुविऽजातस्य । शस्यते । महिऽत्वम् । अस्य । तवसः । न । तन्दते । स्तोत्रम् । अस्य । न । तन्दते । अर्चामि । सुम्नऽयन् । अहम् । अन्तिऽऊतिम् । मयःऽभुवम् । विश्वस्य । यः । मनः । आऽयुयुवे । मखः । देवः । आऽयुयुवे । मखः ॥१॥ प्र । हि । त्वा । पूषन् । अजिरम् । न । यामनि । स्तोमेभिः । कृण्वे । ऋणवः । यथा । मृधः । उष्ट्रः । न । पीपरः । मृधः । हुवे । यत् । त्वा । मयःऽभुवम् । देवम् । सख्याय । मर्त्यः । अस्माकम् । आङ्गूषान् । द्युम्निनः । कृधि । वाजेषु । द्युम्निनः । कृधि ॥२॥ यस्य । ते । पूषन् । सख्ये । विपन्यवः । क्रत्वा । चित् । सन्तः । अवसा । बुभुजिरे । इति । क्रत्वा । बुभुजिरे । ताम् । अनु । त्वा । नवीयसीम् । निऽयुतम् । रायः । ईमहे ।

अहेळमानः । उरुऽशंस । सरी । भव । वाजेऽवाजे । सरी । भव ॥३॥
अस्याः । ऊँ इति । सु । नः । उप । सातये । भुवः । अहेळमानः ।
ररिऽवान् । अजऽअश्व । श्रवस्यताम् । अजऽअश्व । ओ इति । सु । त्वा ।
ववृतीमहि । स्तोमेभिः । दस्म । साधुऽभिः । नहि । त्वा । पूषन् । अति-
ऽमन्ये । आघृणे । न । ते । सख्यम् । अपऽह्नवे ॥४॥

1. 139

अस्तु । श्रौषट् । पुरः । अग्निम् । धिया । दधे । आ । नु । तत् ।
शर्धः । दिव्यम् । वृणीमहे । इन्द्रवायू इति । वृणीमहे । यत् । ह ।
क्राणा । विवस्वति । नाभा । सम्ऽदायि । नव्यसी । अध । प्र । सु ।
नः । उप । यन्तु । धीतयः । देवान् । अच्छ । न । धीतयः ॥१॥ यत् ।
ह । त्यत् । मित्रावरुणौ । ऋतात् । अधि । आददाथे इत्याऽददाथे ।
अनृतम् । स्वेन । मन्युना । दक्षस्य । स्वेन । मन्युना । युवोः । इत्था ।
अधि । सद्मऽसु । अपश्याम । हिरण्ययम् । धीभिः । चन । मनसा ।
स्वेभिः । अक्षऽभिः । सोमस्य । स्वेभिः । अक्षऽभिः ॥२॥ युवाम् । स्तो-
मेभिः । देवऽयन्तः । अश्विना । आश्रवयन्तःऽइव । श्लोकम् । आयवः ।
युवाम् । हव्या । अभि । आयवः । युवोः । विश्वाः । अधि । श्रियः ।
पृक्षः । च । विश्वऽवेदसा । प्रुषायन्ते । वाम् । पवयः । हिरण्ययै । रथे ।
दस्रा । हिरण्ययै ॥३॥ अचेति । दस्रा । वि । ऊँ इति । नाकम् ।
ऋण्वथः । युञ्जते । वाम् । रथऽयुजः । दिविऽदिष्टिषु । अध्वस्मानः । दिवि-
ऽदिष्टिषु । अधि । वाम् । स्थाम । वन्धुरे । रथे । दस्रा । हिरण्ययै । पथा-
ईव । यन्तौ । अनुऽशासता । रजः । अञ्जसा । शासता । रजः ॥४॥
शचीभिः । नः । शचीवसू इति शचीऽवसू । दिवा । नक्तम् । दश-

स्तम् । मा । वाम् । रातिः । उप । दसत् । कदा । चन । अस्मत् । रातिः । कदा । चन ॥५॥ वृषन् । इन्द्र । वृषऽपानासः । इन्दवः । इमे । सुताः । अद्रिऽसुतासः । उत्ऽअभिदः । तुभ्यम् । सुतासः । उत्ऽअभिदः । ते । त्वा । मन्दन्तु । दावने । महे । चित्राय । राधसे । गीःऽभिः । गिर्वाहः । स्तवमानः । आ । गहि । सुऽमृळीकः । नः । आ । गहि ॥६॥ ओ इति । सु । नः । अग्ने । शृणुहि । त्वम् । ईळितः । देवेभ्यः । ब्रवसि । यज्ञियेभ्यः । राजऽभ्यः । यज्ञियेभ्यः । यत् । ह । त्याम् । अङ्गिरःऽभ्यः । धेनुम् । देवाः । अदत्तन । वि । ताम् । दुहे । अर्यमा । कर्तरि । सचा । एषः । ताम् । वेद । मे । सचा ॥७॥ मो इति । सु । वः । अस्मत् । अभि । तानि । पौंस्या । सना । भूवन् । द्युम्नानि । मा । उत । जारिषुः । अस्मत् । पुरा । उत । जारिषुः । यत् । वः । चित्रम् । युगेऽयुगे । नव्यम् । घोषात् । अमर्त्यम् । अस्मासु । तत् । मरुतः । यत् । च । दुस्तरम् । दिधृत । यत् । च । दुस्तरम् ॥८॥ दध्यङ् । ह । मे । जघनुम् । पूर्वः । अङ्गिराः । प्रियऽमेधः । कण्वः । अत्रिः । मनुः । विदुः । ते । मे । पूर्वे । मनुः । विदुः । तेषाम् । देवेषु । आऽयतिः । अस्माकम् । तेषु । नाभयः । तेषाम् । पदेन । महि । आ । नमे । गिरा । इन्द्राग्नी इति । आ । नमे । गिरा ॥९॥ होता । यक्षत् । वनिनः । वन्त । वार्यम् । बृहस्पतिः । यजति । वेनः । उक्षऽभिः । पुरुऽवारेभिः । उक्षऽभिः । जगृभ्म । दूरेऽआदिशम् । श्लोकम् । अद्रेः । अध । त्मना । अधारयत् । अररिन्दानि । सुऽकृतुः । पुरु । सद्मानि । सुऽकृतुः ॥१०॥ ये । देवासः । दिवि । एकादश । स्थ । पृथिव्याम् । अधि । एकादश । स्थ । अप्सुऽक्षितः । महिना । एकादश । स्थ । ते ।

देवासः । यज्ञम् । इमम् । जुषध्वम् ॥११॥

1. 140

वेदिऽसदे । प्रियऽधामाय । सुऽद्युते । धासिम्ऽइव । प्र । भर । योनिम् । अग्नये । वस्त्रेणऽइव । वासय । मन्मना । शुचिम् । ज्योतिःऽरथम् । शुक्रऽवर्णम् । तमःऽहनम् ॥१॥ अभि । द्विऽजन्मा । त्रिऽवृत् । अश्वम् । क्रीऽयते । संवत्सरे । वपुषे । जगधम् । ईमिति । पुनरिति । अन्यस्य । आसा । जिह्वया । जेन्यः । वृषा । नि । अन्येन । वनिनः । मृष्ट । वारणः ॥२॥ कृष्णऽप्रुतौ । वेविजे इति । अस्य । सऽचितौ । उभा । तरेते इति । अभि । मातरा । शिशुम् । प्राचाऽजिह्वम् । ध्वसयन्तम् । तृषुऽच्युतम् । आ । साच्यम् । कुपयम् । वर्धनम् । पितुः ॥३॥ सुमृक्ऽवः । मनवे । मानवस्यते । रघुऽद्रुवः । कृष्णऽसीतासः । ऊँ इति । जुवः । असमनाः । अजिरासः । रघुऽस्यदः । वातऽजूताः । उप । युज्यन्ते । आशवः ॥४॥ आत् । अस्य । ते । ध्वसयन्तः । वृथा । ईरते । कृष्णम् । अम्बम् । महि । वर्पः । करिक्रतः । यत् । सीम् । महीम् । अवनिम् । प्र । अभि । मर्मृशत् । अभिऽश्वसन् । स्तनयन् । एति । नानदत् ॥५॥ भूषन् । न । यः । अधि । बभ्रुषु । नम्नते । वृषाऽइव । पत्नीः । अभि । एति । रोरुवत् । ओजायमानः । तन्वः । च । शुम्भते । भीमः । न । शृङ्गा । दविधाव । दुःऽगृभिः ॥६॥ सः । सम्ऽस्तिरः । विऽस्तिरः । सम् । गृभायति । जानन् । एव । जानतीः । नित्यः । आ । शये । पुनः । वर्धन्ते । अपि । यन्ति । देव्यम् । अन्वत् । वर्पः । पित्रोः । कृण्वते । सचा ॥७॥ तम् । अग्रुवः । केशिनीः । सम् । हि । रेभिरे । ऊर्ध्वाः । तस्थुः । मन्मनीः । प्र । आयवे । पुनरिति । तासाम् । जराम् ।

प्रऽमुञ्चन् । एति । नानदत् । असुम् । परम् । जनयन् । जीवम् । अस्तृतम् ॥८॥ अधीवासम् । परि । मातुः । रिहन् । अहं । तुविऽग्रेभिः । सत्वऽभिः । याति । वि । जयः । वयः । दधत् । पत्ऽवते । रेरिहत् । सदा । अनु । श्येनी । सचते । वर्तनिः । अहं ॥९॥ अस्माकम् । अग्ने । मघवत्ऽसु । दीदिहि । अध । श्वसीवान् । वृषभः । दमूनाः । अवऽअस्य । शिशुऽमतीः । अदीदेः । वर्मऽइव । युत्ऽसु । परिऽजर्भुराणः ॥१०॥ इदम् । अग्ने । सुऽधितम् । दुःऽधितात् । अधि । प्रियात् । ऊँ इति । चित् । मन्मनः । प्रेयः । अस्तु । ते । यत् । ते । शुक्रम् । तन्वः । रोचते । शुचि । तेन । अस्मभ्यम् । वनसे । रत्नम् । आ । त्वम् ॥११॥ रथाय । नावम् । उत । नः । गृहाय । नित्यऽआरित्राम् । पत्ऽवतीम् । रासि । अग्ने । अस्माकम् । वीरान् । उत । नः । मघोनः । जनान् । च । या । पारयात् । शर्म । या । च ॥१२॥ अभि । नः । अग्ने । उक्थम् । इत् । जुगुर्याः । द्यावाक्षामा । सिन्धवः । च । स्वऽगूर्ताः । गव्यम् । यव्यम् । यन्तः । दीर्घा । अहा । इषम् । वरम् । अरुण्यः । वरन्त ॥१३॥

1. 141

वट् । इत्था । तत् । वपुषे । धायि । दर्शतम् । देवस्य । भर्गः । सहसः । यतः । जनि । यत् । ईम् । उप । द्वरते । साधते । मतिः । ऋतस्य । धेनाः । अनयन्त । सऽस्रुतः ॥१॥ पृक्षः । वपुः । पितुऽमान् । नित्यः । आ । शये । द्वितीयम् । आ । सप्तऽशिवासु । मातृषु । तृतीयम् । अस्य । वृषभस्य । दोहसे । दशऽप्रमतिम् । जनयन्त । योषणः ॥२॥ निः । यत् । ईम् । बुध्नात् । महिषस्य । वर्पसः । ईशा-

नासः । शवसा । क्रन्ते । सूर्यः । यत् । ईम् । अनु । प्रऽदिवः । मध्वः । आऽधवे । गुहा । सन्तम् । मातरिश्वा । मथायति ॥३॥ प्र । यत् । पितुः । परमात् । नीयते । परि । आ । पृक्षुधः । वीरुधः । दम्ऽसु । रोहति । उभा । यत् । अस्य । जनुषम् । यत् । इन्वतः । आत् । इत् । यविष्ठः । अभवत् । घृणा । शुचिः ॥४॥ आत् । इत् । मातृः । आ । अविशत् । यासु । आ । शुचिः । अहिंस्यमानः । उर्विया । वि । वव्रथे । अनु । यत् । पूर्वीः । अरुहत् । सनाऽजुवः । नि । नव्यसीषु । अवरासु । धावते ॥५॥ आत् । इत् । होतारम् । वृणते । दिविष्टिषु । भगम्ऽइव । पपृचानासः । ऋञ्जते । देवान् । यत् । क्रत्वा । मज्मना । पुरुऽस्तुतः । मर्तम् । शंसम् । विश्वधा । वेति । धायसे ॥६॥ वि । यत् । अस्थात् । यजतः । वातऽचोदितः । ह्वारः । न । वक्वा । जरणाः । अनाकृतः । तस्य । पत्मन् । धक्षुषः । कृष्णऽजंहसः । शुचिऽजन्मनः । रजः । आ । विऽअध्वनः ॥७॥ रथः । न । यातः । शिक्वऽभिः । कृतः । द्याम् । अङ्गेभिः । अरुषेभिः । ईयते । आत् । अस्य । ते । कृष्णासः । धक्षि । सूर्यः । शूरस्यऽइव । त्वेषथात् । ईषते । वयः ॥८॥ त्वया । हि । अग्ने । वरुणः । धृतऽव्रतः । मित्रः । शाशद्रे । अर्यमा । सुऽदानवः । यत् । सीम् । अनु । क्रतुना । विश्वऽत्था । विऽभुः । अरान् । न । नेमिः । परिऽभूः । अजायथाः ॥९॥ त्वम् । अग्ने । शशमानाय । सुन्वते । रत्नम् । यविष्ठ । देवऽतातिम् । इन्वसि । तम् । त्वा । नु । नव्यम् । सहसः । युवन् । वयम् । भगम् । न । कारे । महिऽरत्न । धीमहि ॥१०॥ अग्ने इति । रयिम् । न । सुऽअर्यम् । दमूनसम् । भगम् । दक्षम् । न । पपृचासि । धर्णसिम् । रश्मीन्ऽइव । यमन् ।

यः । यमति । जन्मनी इति । उभ इति । देवानाम् । शंसम् । ऋते । आ । च । सुऽक्रतुः ॥११॥ उत । नः । सुऽद्योत्मा । जीरऽअश्वः । होता । मन्द्रः । शृणवत् । चन्द्रऽरथः । सः । नः । नेषत् । नेषऽतमैः । अमूरः । अग्निः । वामम् । सुवितम् । वस्यः । अच्छ ॥१२॥ अस्तावि । अग्निः । शिमीवत्ऽभिः । अर्कैः । साम्ऽराज्याय । प्रऽतरम् । दधानः । अमी इति । च । ये । मघऽवानः । वयम् । च । मिहम् । न । सूरः । अति । निः । ततन्युः ॥१३॥

1. 142

सम्ऽइद्धः । अग्ने । आ । वह । देवान् । अद्य । यतऽस्रुचे । तन्तुम् । तनुष्व । पूर्व्यम् । सुतऽसोमाय । दाशुषे ॥१॥ घृतऽवन्तम् । उप । मासि । मधुऽमन्तम् । तनूऽनपात् । यज्ञम् । विप्रस्य । माऽवतः । शशमानस्य । दाशुषः ॥२॥ शुचिः । पावकः । अद्भुतः । मध्वा । यज्ञम् । मिमिक्षति । नराशंसः । त्रिः । आ । दिवः । देवः । देवेषु । यज्ञियः ॥३॥ ईळितः । अग्ने । आ । वह । इन्द्रम् । चित्रम् । इह । प्रियम् । इयम् । हि । त्वा । मतिः । मम । अच्छ । सुऽजिह्व । वच्यते ॥४॥ स्तृणानासः । यतऽस्रुचः । बर्हिः । यज्ञे । सुऽअध्वरे । वृञ्जे । देवव्यचःऽतमम् । इन्द्राय । शर्म । सऽप्रथः ॥५॥ वि । श्रयन्ताम् । ऋतऽवृधः । प्रऽयै । देवेभ्यः । महीः । पावकासः । पुरुऽस्पृहः । द्वारः । देवीः । असश्चतः ॥६॥ आ । भन्दमाने इति । उषासे इति । नक्तोषसा । सुऽपेशसा । यह्वी इति । ऋतस्य । मातरा । सीदताम् । बर्हिः । आ । सुऽमत् ॥७॥ मन्द्रऽजिह्वा । जुगुर्वणी इति । होतारा । दैव्या । कवी इति । यज्ञम् । नः । यक्षताम् । इमम् । सिधम् । अद्य । दिविऽस्पृशम्

॥८॥ शुचिः । देवेषु । अर्पिता । होत्रा । मरुत्ऽसु । भारती । इळा । सरस्वती । मही । बर्हिः । सीदन्तु । यज्ञियाः ॥९॥ तत् । नः । तुरीपम् । अद्भुतम् । पुरु । वा । अरम् । पुरु । त्मना । त्वष्टा । पोषाय । वि । स्यतु । राये । नाभा । नः । अस्मऽयुः ॥१०॥ अवऽसृजन् । उप । त्मना । देवान् । यक्षि । वनस्पते । अग्निः । हव्या । सुषूदति । देवः । देवेषु । मेधिरः ॥११॥ पूषण्ऽवते । मरुत्वते । विश्वऽदेवाय । वायवे । स्वाहा । गायत्रऽवेपसे । हव्यम् । इन्द्राय । कर्तन ॥१२॥ स्वाहाऽकृतानि । आ । गहि । उप । हव्यानि । वीतये । इन्द्र । आ । गहि । श्रुधि । हवम् । त्वाम् । हवन्ते । अध्वरे ॥१३॥

1. 143

प्र । तव्यसीम् । नव्यसीम् । धीतिम् । अग्नये । वाचः । मतिम् । सहसः । सूनवे । भरे । अपाम् । नपात् । यः । वसुऽभिः । सह । प्रियः । होता । पृथिव्याम् । नि । असीदत् । ऋत्वियः ॥१॥ सः । जायमानः । परमे । विऽओमनि । आविः । अग्निः । अभवत् । मातरिश्वने । अस्य । क्रत्वा । समिद्धऽधानस्य । मज्मना । प्र । द्यावा । शोचिः । पृथिवी इति । अरोचयत् ॥२॥ अस्य । त्वेषाः । अजराः । अस्य । भानवः । सुऽसंदृशः । सुऽप्रतीकस्य । सुऽद्युतः । माऽत्वक्षसः । अति । अक्तुः । न । सिन्धवः । अग्नेः । रेजन्ते । असंसन्तः । अजराः ॥३॥ यम् । आऽईरिरे । भृगवः । विश्वऽवेदसम् । नाभा । पृथिव्याः । भुवनस्य । मज्मना । अग्निम् । तम् । गीःऽभिः । हिनुहि । स्वे । आ । दमे । यः । एकः । वस्वः । वरुणः । न । राजति ॥४॥ न । यः । वराय । मरुताम्ऽइव । स्वनः । सेनाऽइव । सृष्टा । दिव्या । यथा । अशनिः । अग्निः । जम्भैः ।

तिगितैः । अञ्चि । मर्वति । योधः । न । शत्रून् । सः । वना । नि । ऋञ्जते ॥५॥ कुवित् । नः । अग्निः । उचथस्य । वीः । असत् । वसुः । कुवित् । वसुऽभिः । कामम् । आऽवरत् । चोदः । कुवित् । तुतुज्यात् । सातये । धियः । शुचिऽप्रतीकम् । तम् । अया । धिया । गृणे ॥६॥ घृतऽप्रतीकम् । वः । ऋतस्य । धूःऽसदम् । अग्निम् । मित्रम् । न । सम्ऽइधानः । ऋञ्जते । इन्धानः । अक्रः । विदथेषु । दीद्यत् । शुक्रऽवर्णाम् । उत् । ऊँ इति । नः । यंसते । धियम् ॥७॥ अप्रऽयुच्छन् । अप्रयुच्छत्ऽभिः । अग्ने । शिवेभिः । नः । पायुऽभिः । पाहि । शग्मैः । अदब्धेभिः । अदृपितेभिः । इष्टे । अनिमिषत्ऽभिः । परि । पाहि । नः । जाः ॥८॥

1. 144

एति । प्र । होता । व्रतम् । अस्य । मायया । ऊर्ध्वाम् । दधानः । शुचिऽपेशसम् । धियम् । अभि । स्रुचः । क्रमते । दक्षिणाऽआवृतः । याः । अस्य । धाम । प्रथमम् । ह । निंसते ॥१॥ अभि । ईम् । ऋतस्य । दोहनाः । अनूषत । योनौ । देवस्य । सदने । परिऽवृताः । अपाम् । उपऽस्थे । विऽभृतः । यत् । आ । अवसत् । अध । स्वधाः । अधयत् । याभिः । ईयते ॥२॥ युयूषतः । सऽवयसा । तत् । इत् । वपुः । समानम् । अर्थम् । विऽतरित्रता । मिथः । आत् । ईम् । भगः । न । हव्यः । सम् । अस्मत् । आ । वोळ्हुः । न । रश्मीन् । सम् । अयंस्त । सारथिः ॥३॥ यम् । ईम् । द्वा । सऽवयसा । सपर्यतः । समाने । योना । मिथुना । सम्ऽओकसा । दिवा । न । नक्तम् । पलितः । युवा । अजनि । पुरु । चरन् । अजरः । मानुषा । युगा ॥४॥ तम् ।

ईम् । हिन्वन्ति । धीतयः । दश । विशः । देवम् । मर्तासः । ऊतये । हवामहे । धनोः । अधि । प्रऽवतः । आ । सः । ऋण्वति । अभिव्रजत्ऽभिः । वयुना । नवा । अधित ॥५॥ त्वम् । हि । अग्ने । दिव्यस्य । राजसि । त्वम् । पार्थिवस्य । पशुपाःऽइव । त्मना । एनी इति । ते । एते इति । बृहती इति । अभिऽश्रिया । हिरण्ययी इति । वक्करी इति । बर्हिः । आशाते इति ॥६॥ अग्ने । जुषस्व । प्रति । हर्य । तत् । वचः । मन्द्र । स्वधाऽवः । ऋतऽजात । सुक्रतो इति सुऽक्रतो । यः । विश्वतः । प्रत्यङ् । असि । दर्शतः । रण्वः । सम्ऽदृष्टौ । पितुमान्ऽइव । क्षयः ॥७॥

1. 145.

तम् । पृच्छत । सः । जगाम । सः । वेद । सः । चिकित्वान् । ईयते । सः । नु । ईयते । तस्मिन् । सन्ति । प्रऽशिषः । तस्मिन् । इष्टयः । सः । वाजस्य । शवसः । शुष्मिणः । पतिः ॥१॥ तम् । इत् । पृच्छन्ति । न । सिमः । वि । पृच्छति । स्वेनऽइव । धीरः । मनसा । यत् । अग्रभीत् । न । मृष्यते । प्रथमम् । न । अपरम् । वचः । अस्य । क्रत्वा । सचते । अग्रऽदक्षितः ॥२॥ तम् । इत् । गच्छन्ति । जुह्वः । तम् । अर्वतीः । विश्वानि । एकः । शृणवत् । वचांसि । मे । पुरुऽप्रैषः । ततुरिः । यज्ञऽसाधनः । अच्छिद्रऽऊतिः । शिशुः । आ । अदत्त । सम् । रभः ॥३॥ उपऽस्थाय । चरति । यत् । सम्ऽआरत । सद्यः । जातः । तत्सार । युज्येभिः । अभि । श्वान्तम् । मृशते । नान्द्ये । मुदे । यत् । ईम् । गच्छन्ति । उशतीः । अपिऽस्थितम् ॥४॥ सः । ईम् । मृगः । अप्यः । वनर्गुः । उप । त्वचि । उपऽमस्याम् । नि । धायि । वि । अब्रवीत् । वयुना । मर्त्येभ्यः । अग्निः । विद्वान् । ऋतऽचित् । हि । सत्यः ॥५॥

1. 146

त्रिऽमूर्धानम् । सप्तऽरश्मिम् । गृणीषे । अनूनम् । अग्निम् । पित्रोः । उपऽस्थे । निऽसत्तम् । अस्य । चरतः । ध्रुवस्य । विश्वा । दिवः । रोचना । आपप्रिऽवांसम् ॥१॥ उत्ऽआ । महान् । अभि । ववक्षे । एने इति । अजरः । तस्थौ । इतःऽऊतिः । ऋष्वः । उर्व्याः । पदः । नि । दधाति । सानौ । रिहन्ति । ऊधः । अरुषासः । अस्य ॥२॥ समानम् । वत्सम् । अभि । संचरन्ती इति सम्ऽचरन्ती । विष्वक् । धेनू इति । वि । चरतः । सुमेके इति सुऽमेके । अनपऽवृज्यान् । अध्वनः । मिमाने इति । विश्वान् । केतान् । अधि । महः । दधाने इति ॥३॥ धीरासः । पदम् । कवयः । नयन्ति । नाना । हृदा । रक्षमाणाः । अजुर्यम् । सिसासन्तः । परि । अपश्यन्त । सिन्धुम् । आविः । एभ्यः । अभवत् । सूर्यः । नॄन् ॥४॥ दिदृक्षेण्यः । परि । काष्ठासु । जेन्यः । ईळेन्यः । महः । अर्भाय । जीवसे । पुरुऽत्रा । यत् । अभवत् । सूः । अह । एभ्यः । गर्भेभ्यः । मघऽवा । विश्वऽदर्शतः ॥५॥

1. 147.

कथा । ते । अग्ने । शुचयन्तः । आयोः । ददाशुः । वाजेभिः । आशुषाणाः । उभे इति । यत् । तोके इति । तनये । दधानाः । ऋतस्य । सामन् । रणयन्त । देवाः ॥१॥ बोध । मे । अस्य । वचसः । यविष्ठ । महिष्ठस्य । प्रऽभृतस्य । स्वधाऽवः । पीयति । त्वः । अनु । त्वः । गृणाति । वन्दारुः । ते । तन्वम् । वन्दे । अग्ने ॥२॥ ये । पायवः । मामतेयम् । ते । अग्ने । पश्यन्तः । अन्धम् । दुःऽइतात् । अरक्षन् । ररक्ष । तान् । सुऽकृतः । विश्वऽवेदाः । दिप्सन्तः । इत् । रिपवः । न ।

अहे । देवासः ॥३॥ यः । नः । अग्ने । अररिऽवान् । अघऽयुः । अरातिऽवा । मर्चयति । द्वयेन । मन्त्रः । गुरुः । पुनः । अस्तु । सः । अस्मै । अनु । मृक्षीष्ट । तन्वम् । दुःऽउक्तैः ॥४॥ उत । वा । यः । सहस्य । प्रऽविद्वान् । मर्तः । मर्तम् । मर्चयति । द्वयेन । अतः । पाहि । स्तवमान । स्तुवन्तम् । अग्ने । माकिः । नः । दुःऽइतायै । धायीः ॥५॥

1. 148.

मथीत् । यत् । ईम् । विष्टः । मातरिश्वा । होतारम् । विश्वऽअप्सुम् । विश्वऽदेव्यम् । नि । यम् । दधुः । मनुष्यासु । विक्षु । स्वः । न । चित्रम् । वपुषे । विभाऽवम् ॥१॥ ददानम् । इत् । न । ददभन्त । मन्म । अग्निः । वरूथम् । मम । तस्य । चाकन् । जुषन्त । विश्वानि । अस्य । कर्म । उपऽस्तुतिम् । भरमाणस्य । कारोः ॥२॥ नित्ये । चित् । नु । यम् । सदने । जगृभ्रे । प्रशस्तिऽभिः । दधिरे । यज्ञियासः । प्र । सु । नयन्त । गृभयन्तः । इष्टौ । अश्वासः । न । रथ्यः । ररहाणाः ॥३॥ पुरूणि । दस्मः । नि । रिणाति । जम्भैः । आत् । रोचते । वने । आ । विभाऽवा । आत् । अस्य । वातः । अनु । वाति । शोचिः । अस्तुः । न । शर्याम् । असनाम् । अनु । द्यून् ॥४॥ न । यम् । रिपवः । न । रिषण्यवः । गर्भे । सन्तम् । रेषणाः । रेषयन्ति । अन्धाः । अपश्याः । न । दभन् । अभिऽख्या । नित्यासः । ईम् । प्रेतारः । अरक्षन् ॥५॥

1. 149.

महः । सः । रायः । आ । ईषते । पतिः । दन् । इनः । इनस्य । वसुनः । पदे । आ । उप । व्रजन्तम् । अद्रयः । विधन् । इत् ॥१॥ सः । यः । वृषा । नराम् । न । रोदस्योः । अर्वःऽभिः । अस्ति ।

जीवयीतऽसर्गः । प्र । यः । सस्राणः । शिश्रीत । योनौ ॥२॥ आ । यः । पुरम् । नार्मिणीम् । अदीदेत् । अत्यः । कविः । नमन्यः । न । अर्वा । सूरः । न । रुरुक्वान् । शतऽआत्मा ॥३॥ अभि । द्विऽजन्मा । त्री । रोचनानि । विश्वा । रजांसि । शुशुचानः । अस्थात् । होता । यजिष्ठः । अपाम् । सधऽस्थे ॥४॥ अयम् । सः । होता । यः । द्विऽजन्मा । विश्वा । दधे । वार्याणि । श्रवस्या । मर्तः । यः । अस्मै । सुऽतुकः । ददाश ॥५॥

1. 150

पुरु । त्वा । दाश्वान् । वोचे । अरिः । अग्ने । तव । स्वित् । आ । तोदस्यऽइव । शरणे । आ । महस्य ॥१॥ वि । अनिनस्य । धनिनः । प्रऽहोषे । चित् । अरुषः । कदा । चन । प्रऽजिगतः । अदेवऽयोः ॥२॥ सः । चन्द्रः । विप्र । मर्त्यः । महः । व्राधन्ऽतमः । दिवि । प्रऽस्र । इत् । ते । अग्ने । वनुषः । स्याम ॥३॥

1. 151

मित्रम् । न । यम् । शिम्या । गोषु । गव्यवः । सुऽआर्ष्यः । विदथे । अप्ऽसु । जीजनन् । अरेजेताम् । रोदसी इति । पाजसा । गिरा । प्रति । प्रियम् । यजतम् । जनुषाम् । अवः ॥१॥ यत् । ह । त्यत् । वाम् । पुरुऽमीळ्हस्य । सोमिनः । प्र । मित्रासः । न । दधिरे । सुऽआयवः । अध । क्रतुम् । विदतम् । गातुम् । अर्चते । उत । श्रुतम् । वृषणा । पस्त्यऽवतः ॥२॥ आ । वाम् । भूषन् । क्षितयः । जन्म । रोदस्योः । प्रऽवाच्यम् । वृषणा । दक्षसे । महे । यत् । ईम् । ऋताय । भरथः । यत् । अर्वते । प्र । होत्रया । शिम्या । वीथः । अध्वरम् ॥३॥ प्र । सा ।

क्षितिः । असुरा । या । महि । प्रिया । ऋतऽवानौ । ऋतम् । आ । घोषथः । बृहत् । युवम् । दिवः । बृहतः । दक्षम् । आऽशुवम् । गाम् । न । धुरि । उप । युञ्जाथे इति । अपः ॥४॥ मही इति । अत्र । महिना । वारम् । ऋण्वथः । अरेणवः । तुजः । आ । सधन् । धेनवः । स्वरन्ति । ताः । उपरऽताति । सूर्यम् । आ । निऽअञ्चः । उषसः । तक्वीऽइव ॥५॥ आ । वाम् । ऋताय । केशिनीः । अनूषत । मित्र । यत्र । वरुण । गातुम् । अचैथः । अव । त्मना । सृजतम् । पिन्वतम् । धियः । युवम् । विप्रस्य । मन्मनाम् । इरज्यथः ॥६॥ यः । वाम् । यज्ञैः । शशमानः । ह । दाशति । कविः । होता । यजति । मन्मऽसाधनः । उप । अह । तम् । गच्छथः । वीथः । अध्वरम् । अच्छ । गिरः । सुऽमतिम् । गन्तम् । अस्मयू इत्यस्मऽयू ॥७॥ युवाम् । यज्ञैः । प्रथमा । गोभिः । अञ्जते । ऋतऽवाना । मनसः । न । प्रऽयुक्तिषु । भरन्ति । वाम् । मन्मना । सम्ऽयता । गिरः । अदृप्यता । मनसा । रेवत् । आशाथे इति ॥८॥ रेवत् । वयः । दधाथे इति । रेवत् । आशाथे इति । नरा । मायाभिः । इतःऽऊति । माहिनम् । न । वाम् । द्यावः । अहऽभिः । न । उत । सिन्धवः । न । देवऽत्वम् । पणयः । न । आनशुः । मघम् ॥९॥

1. 152.

युवम् । वस्त्राणि । पीवसा । वसाथे इति । युवोः । अच्छिद्राः । मन्तवः । ह । सर्गाः । अव । अतिरतम् । अनृतानि । विश्वा । ऋतेन । मित्रावरुणा । सचेथे इति ॥१॥ एतत् । चन । त्वः । वि । चिकेतत् । एषाम् । सत्यः । मन्त्रः । कविऽशस्तः । ऋघावान् । त्रिःऽअश्रिम् । हन्ति । चतुःऽअश्रिः । उग्रः । देवऽनिदः । ह । प्रथमाः । अजूर्यन् ॥२॥

अपात् । एति । प्रथमा । पत्ऽवतीनाम् । कः । तत् । वाम् । मित्रा-
वरुणा । आ । चिकेत । गर्भः । भारम् । भरति । आ । चित् । अस्य ।
ऋतम् । पिपर्ति । अनृतम् । नि । तारीत् ॥३॥ प्रऽयन्तम् । इत् । परि ।
जारम् । कनीनाम् । पश्यामसि । न । उपऽनिपद्यमानम् । अनवऽपृग्णा ।
विऽततता । वसानम् । प्रियम् । मित्रस्य । वरुणस्य । धाम ॥४॥ अनश्वः ।
जातः । अनभीशुः । अर्वा । कनिक्रदत् । पतयत् । ऊर्ध्वऽसानुः । अचि-
त्तम् । ब्रह्म । जुजुषुः । युवानः । प्र । मित्रे । धाम । वरुणे । गृणन्तः
॥५॥ आ । धेनवः । मामतेयम् । अवन्तीः । ब्रह्मऽप्रियम् । पीपयन् ।
सस्मिन् । ऊधन् । पित्वः । भिक्षेत । वयुनानि । विद्वान् । आसा ।
आऽविवासन् । अदितिम् । उरुष्येत् ॥६॥ आ । वाम् । मित्रावरुणा ।
हव्यऽजुष्टिम् । नमसा । देवौ । अवसा । ववृत्याम् । अस्माकम् । ब्रह्म ।
पृतनासु । सह्याः । अस्माकम् । वृष्टिः । दिव्या । सुऽपारा ॥७॥

1. 153

यजामहे । वाम् । महः । सऽजोषाः । हव्येभिः । मित्रावरुणा । नमः-
ऽभिः । घृतैः । घृतस्नू इति घृतऽस्नू । अध । यत् । वाम् । अस्मे इति ।
अध्वर्यवः । न । धीतिऽभिः । भरन्ति ॥१॥ प्रऽस्तुतिः । वाम् । धाम ।
न । प्रऽयुक्तिः । अयामि । मित्रावरुणा । सुऽवृक्तिः । अनक्ति । यत् ।
वाम् । विदथेषु । होता । सुम्नम् । वाम् । सूरिः । वृषणौ । इयक्षन् ॥२॥
पीपाय । धेनुः । अदितिः । ऋताय । जनाय । मित्रावरुणा । हविःऽदे ।
हिनोति । यत् । वाम् । विदथे । सपर्यन् । सः । रातऽहव्यः । मानुषः ।
न । होता ॥३॥ उत । वाम् । विक्षु । मद्यासु । अन्धः । गावः । आपः ।
च । पीपयन्त । देवीः । उतो इति । नः । अस्य । पूर्व्यः । पतिः । दन् ।

वीतम् । पातम् । पर्यसः । उस्रियायाः ॥४॥

1. 154

विष्णोः । नु । कम् । वीर्याणि । प्र । वोचम् । यः । पार्थिवानि । विऽममे । रजांसि । यः । अस्कभायत् । उत्ऽतरम् । सधऽस्थम् । विऽचक्रमाणः । त्रेधा । ऊरुऽगायः ॥१॥ प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिऽस्थाः । यस्य । उरुषु । त्रिषु । विऽक्रमणेषु । अधिऽक्षियन्ति । भुवनानि । विश्वा ॥२॥ प्र । विष्णवे । शूषम् । एतु । मन्म । गिरिऽक्षितें । ऊरुऽगायाय । वृष्णे । यः । इदम् । दीर्घम् । प्रऽयतम् । सधऽस्थम् । एकः । विऽममे । त्रिऽभिः । इत् । पदेभिः ॥३॥ यस्य । त्री । पूर्णा । मधुना । पदानि । अक्षीयमाणा । स्वधया । मदन्ति । यः । ऊँ इति । त्रिऽधातु । पृथिवीम् । उत । द्याम् । एकः । दाधार । भुवनानि । विश्वा । ॥४॥ तत् । अस्य । प्रियम् । अभि । पाथः । अश्याम् । नरः । यत्र । देवऽयवः । मदन्ति । उरुऽक्रमस्य । सः । हि । बन्धुः । इत्था । विष्णोः । पदे । परमे । मध्वः । उत्सः ॥५॥ ता । वाम् । वास्तूनि । उश्मसि । गमध्यै । यत्र । गावः । भूरिऽशृङ्गाः । अयासः । अत्र । अह । तत् । उरुऽगायस्य । वृष्णः । परमम् । पदम् । अव । भाति । भूरि ॥६॥

1. 155

प्र । वः । पान्तम् । अन्धसः । धियाऽयते । महे । शूराय । विष्णवे । च । अर्चत । या । सानुनि । पर्वतानाम् । अदाभ्या । महः । तस्थतुः । अर्वताऽइव । साधुना ॥१॥ त्वेषम् । इत्था । समुऽअरणम् । शिमीऽवतोः । इन्द्राविष्णू इति । सुतऽपाः । वाम् । उरुष्यति । या ।

मर्त्यीय । प्रतिऽधीयमानम् । इत् । कृशानोः । अस्तुः । असनाम् । उरुऽव्यथः ॥२॥ ताः । ईम् । वर्धन्ति । महि । अस्य । पौंस्यम् । नि । मातरा । नयति । रेतसे । भुजे । दधाति । पुत्रः । अवरम् । परम् । पितुः । नाम । तृतीयम् । अधि । रोचने । दिवः ॥३॥ तत्ऽतत् । इत् । अस्य । पौंस्यम् । गृणीमसि । इनस्य । त्रातुः । अवृकस्य । मीळ्हुषः । यः । पार्थिवानि । त्रिऽभिः । इत् । विगामऽभिः । उरु । क्रमिष्ट । उरुऽगायाय । जीवसे ॥४॥ द्वे इति । इत् । अस्य । क्रमणे इति । स्वःऽदृशः । अभिऽख्याय । मर्त्यः । भुरण्यति । तृतीयम् । अस्य । नकिः । आ । दधर्षति । वयः । चन । पतयन्तः । पतत्रिणः ॥५॥ चतुर्भिः । साकम् । नवतिम् । च । नामऽभिः । चक्रम् । न । वृत्तम् । व्यतीन् । अवीविपत् । बृहत्ऽशरीरः । विऽमिमानः । ऋक्वऽभिः । युवा । अकुमारः । प्रति । एति । आऽहवम् ॥६॥

1. 156.

भव । मित्रः । न । शेव्यः । घृतऽआसुतिः । विभूतऽद्युम्नः । एवऽया: । ऊँ इति । सऽप्रथाः । अघे । ते । विष्णो इति । विदुषा । चित् । अर्ध्यः । स्तोमः । यज्ञः । च । राध्यः । हविष्मता ॥१॥ यः । पूर्व्याय । वेधसे । नवीयसे । सुमत्ऽजानये । विष्णवे । ददाशति । यः । जातम् । अस्य । महतः । महि । ब्रवत् । सः । इत् । ऊँ इति । श्रवःऽभिः । युज्यम् । चित् । अभि । असत् ॥२॥ तम् । ऊँ इति । स्तोतारः । पूर्व्यम् । यथा । विद । ऋतस्य । गर्भम् । जनुषा । पिपर्तन । आ । अस्य । जानन्तः । नाम । चित् । विवक्तन । महः । ते । विष्णो इति । सुऽमतिम् । भजामहे ॥३॥ तम् । अस्य । राजा । वरुणः । तम् । अश्विना । क्रतुम् ।

सचन्त । मारुतस्य । वेधसः । दाधार । दक्षम् । उत्ऽतमम् । अहःऽविदम् । व्रजम् । च । विष्णुः । सखिऽवान् । अपऽऊर्णुते ॥४॥ आ । यः । विवाय । सचथाय । दैव्यः । इन्द्राय । विष्णुः । सुऽकृते । सुकृत्ऽतरः । वेधाः । अजिन्वत् । त्रिऽसधस्थः । आर्यम् । ऋतस्य । भागे । यजमानम् । आ । अभजत् ॥५॥

1. 157.

अबोधि । अग्निः । ज्मः । उत् । एति । सूर्यः । वि । उषाः । चन्द्रा । मही । आवः । अर्चिषा । अयुक्षाताम् । अश्विना । यातवे । रथम् । प्र । असावीत् । देवः । सविता । जगत् । पृथक् ॥१॥ यत् । युञ्जाथे इति । वृषणम् । अश्विना । रथम् । घृतेन । नः । मधुना । क्षत्रम् । उक्षतम् । अस्माकम् । ब्रह्म । पृतनासु । जिन्वतम् । वयम् । धना । शूरऽसाता । भजेमहि ॥२॥ अर्वाङ् । त्रिऽचक्रः । मधुऽवाहनः । रथः । जीरऽअश्वः । अश्विनोः । यातु । सुऽस्तुतः । त्रिऽवन्धुरः । मघऽवा । विश्वऽसौभगः । शम् । नः । आ । वक्षत् । द्विऽपदे । चतुःऽपदे ॥३॥ आ । नः । ऊर्जम् । वहतम् । अश्विना । युवम् । मधुऽमत्या । नः । कशया । मिमिक्षतम् । प्र । आयुः । तारिष्टम् । निः । रपांसि । मृक्षतम् । सेधतम् । द्वेषः । भवतम् । सचाऽभुवा ॥४॥ युवम् । ह । गर्भम् । जगतीषु । धत्थः । युवम् । विश्वेषु । भुवनेषु । अन्तरिति । युवम् । अग्निम् । च । वृषणौ । अपः । च । वनस्पतीन् । अश्विनौ । ऐरयेथाम् ॥५॥ युवम् । ह । स्थः । भिषजा । भेषजेभिः । अथो इति । ह । स्थः । रथ्या । रथ्येभिरिति रथ्येभिः । अथो इति । ह । क्षत्रम् । अधि । धत्थः । उग्रा । यः । वाम् । हविष्मान् । मनसा । ददाश ॥६॥

1. 158.

वसू इति । रुद्रा । पुरुमन्तू इति पुरुऽमन्तू । वृधन्ता । दशस्यतम् । नः । वृषणौ । अभिष्टौ । दस्रा । ह । यत् । रेकणः । औचथ्यः । वाम् । प्र । यत् । सस्राथे इति । अकवाभिः । ऊती ॥१॥ कः । वाम् । दाशत् । सुऽमतये । चित् । अस्यै । वसू इति । यत् । धेथे इति । नमसा । पदे । गोः । जिगृतम् । अस्मे इति । रेवतीः । पुरम्ऽधीः । कामप्रेणेऽइव । मनसा । चरन्ता ॥२॥ युक्तः । ह । यत् । वाम् । तौग्र्यायं । पेरुः । वि । मध्ये । अर्णसः । धायि । पज्रः । उप । वाम् । अवः । शरणम् । गमेयम् । शूरः । न । अज्मं । पतयत्ऽभिः । एवैः ॥३॥ उपऽस्तुतिः । औचथ्यम् । उरुष्येत् । मा । माम् । इमे इति । पतत्रिणी इति । वि । दुग्धाम् । मा । माम् । एधः । दशऽतयः । चितः । धाक् । प्र । यत् । वाम् । वद्धः । त्मनि । खादति । क्षाम् ॥४॥ न । मा । गरन् । नद्यः । मातृऽतमाः । दासाः । यत् । ईम् । सुऽसमुब्धम् । अवऽअधुः । शिरः । यत् । अस्य । त्रैतनः । विऽतक्षत् । स्वयम् । दासः । उरः । अंसौ । अपि । ग्धेति ग्ध ॥५॥ दीर्घऽतमाः । मामतेयः । जुजुर्वान् । दशमे । युगे । अपाम् । अर्थम् । यतीनाम् । ब्रह्मा । भवति । सारथिः ॥६॥

1. 159.

प्र । द्यावा । यज्ञैः । पृथिवी इति । ऋतऽवृधा । मही इति । स्तुषे । विदथेषु । प्रऽचेतसा । देवेभिः । ये इति । देवपुत्रे इति देवऽपुत्रे । सुऽदंससा । इत्था । धिया । वार्याणि । प्रऽभूषतः ॥१॥ उत । मन्ये । पितुः । अद्रुहः । मनः । मातुः । महि । स्वऽतवः । तत् । हवीमऽभिः । सुऽरेतसा । पितरा । भूम । चक्रतुः । उरु । प्रऽजायाः । अमृतम् ।

वरीमऽभिः ॥२॥ ते । सूनवः । सुऽअपसः । सुऽदंससः । मही इति । जह्नुः । मातरा । पूर्वऽचित्तये । स्थातुः । च । सत्यम् । जगतः । च । धर्मणि । पुत्रस्य । पाथः । पदम् । अद्वयाविनः ॥३॥ ते । मायिनः । ममिरे । सुऽप्रचेतसः । जामी इति । सयोनी इति सऽयोनी । मिथुना । समूऽओकसा । नव्यम्ऽनव्यम् । तन्तुम् । आ । तन्वते । दिवि । समुद्रे । अन्तरिति । कवयः । सुऽदीतयः ॥४॥ तत् । राधः । अद्य । सवितुः । वरेण्यम् । वयम् । देवस्य । प्रऽसवे । मनामहे । अस्मभ्यम् । द्यावापृथिवी इति । सुऽचेतुना । रयिम् । धत्तम् । वसुऽमन्तम् । शतऽग्विनम् ॥ ५ ॥

1. 160

ते इति । हि । द्यावापृथिवी इति । विश्वऽशंभुवा । ऋतावरी इत्यृतऽवरी । रजसः । धारयत्कवी इति धारयत्ऽकवी । सुजन्मनी इति सुऽजन्मनी । धिषणे इति । अन्तः । ईयते । देवः । देवी इति । धर्मणा । सूर्यः । शुचिः ॥१॥ उरुऽव्यचसा । महिनी इति । असश्चता । पिता । माता । च । भुवनानि । रक्षतः । सुदृष्टमे इति सुऽदृष्टमे । वपुष्ये३ इति । न । रोदसी इति । पिता । यत् । सीम् । अभि । रूपैः । अवासयत् ॥२॥ सः । वह्निः । पुत्रः । पित्रोः । पवित्रऽवान् । पुनाति । धीरः । भुवनानि । मायया । धेनुम् । च । पृश्निम् । वृषभम् । सुऽरेतसम् । विश्वाहा । शुक्रम् । पयः । अस्य । दुक्षत ॥३॥ अयम् । देवानाम् । अपसाम् । अपःऽतमः । यः । जजान । रोदसी इति । विश्वऽशंभुवा । वि । यः । ममे । रजसी इति । सुकृतुऽयया । अजरेभिः । स्कम्भनेभिः । सम् । आनृचे ॥४॥ ते इति । नः । गृणाने इति ।

महिनी इति । महि । श्रवः । क्षत्रम् । द्यावापृथिवी इति । घासथः । बृहत् । येन । अभि । कृष्टीः । ततनाम । विश्वहा । पनाय्यम् । ओजः । अस्मे इति । सम् । इन्वतम् ॥५॥

1. 161

किम् । ऊँ इति । श्रेष्ठः । किम् । यविष्ठः । नः । आ । अजगन् । किम् । ईयते । दूत्यम् । कत् । यत् । ऊचिम । न । निन्दिम । चमसम् । यः । महाऽकुलः । अग्रे । भ्रातः । द्रुणः । इत् । भूतिम् । ऊदिम ॥१॥ एकम् । चमसम् । चतुरः । कृणोतन । तत् । वः । देवाः । अब्रवन् । तत् । वः । आ । अगमम् । सौधन्वनाः । यदि । एव । करिष्यथ । साकम् । देवैः । यज्ञियासः । भविष्यथ ॥२॥ अग्निम् । दूतम् । प्रति । यत् । अब्रवीतन । अश्वः । कर्त्वः । रथः । उत । इह । कर्त्वः । धेनुः । कर्त्वी । युवशा । कर्त्वी । द्वा । तानि । भ्रातः । अनु । वः । कृत्वी । आ । इमसि ॥३॥ चकृऽवांसः । ऋभवः । तत् । अपृच्छत । क्व । इत् । अभूत् । यः । स्यः । दूतः । नः । आ । अजगन् । यदा । अवऽअख्यत् । चमसान् । चतुरः । कृतान् । आत् । इत् । त्वष्टा । ग्नासु । अन्तः । नि । आनजे ॥४॥ हनाम । एनान् । इति । त्वष्टा । यत् । अब्रवीत् । चमसम् । ये । देवऽपानम् । अनिन्दिषुः । अन्या । नामानि । कृण्वते । सुते । सचा । अन्यैः । एनान् । कन्या । नामऽभिः । स्परत् ॥५॥ इन्द्रः । हरी इति । युयुजे । अश्विना । रथम् । बृहस्पतिः । विश्वऽरूपाम् । उप । आजत । ऋभुः । विऽभ्वा । वाजः । देवान् । अगच्छत । सुऽअपसः । यज्ञियम् । भागम् । ऐतन ॥६॥ निः । चर्मणः । गाम् । अरिणीत । धीतिऽभिः । या । जरन्ता । युवशा । ता । अकृणोतन ।

सौधन्वनाः । अश्वात् । अश्वम् । अतक्षत । युक्त्वा । रथम् । उप । देवान् । अयातन ॥७॥ इदम् । उदकम् । पिबत । इति । अब्रवीतन । इदम् । वा । घ । पिबत । मुञ्जऽनेजनम् । सौधन्वनाः । यदि । तत् । नऽइव । हर्यथ । तृतीये । घ । सवने । मादयाध्वै ॥८॥ आपः । भूयिष्ठाः । इति । एकः । अब्रवीत् । अग्निः । भूयिष्ठः । इति । अन्यः । अब्रवीत् । वधःऽयन्तीम् । बहुऽभ्यः । प्र । एकः । अब्रवीत् । ऋता । वदन्तः । चमसान् । अपिंशत ॥९॥ श्रोणाम् । एकः । उदकम् । गाम् । अव । अजति । मांसम् । एकः । पिंशति । सूनया । आऽभृतम् । आ । निऽअर्चः । शकृत् । एकः । अप । अमरत् । किम् । स्वित् । पुत्रेभ्यः । पितरौ । उप । आवतुः ॥१०॥ उद्वत्ऽसु । अस्मै । अकृणोतन । तृणम् । निवत्ऽसु । अपः । सुऽअपस्यया । नरः । अगोह्यस्य । यत् । असस्तन । गृहे । तत् । अद्य । इदम् । ऋभवः । न । अनु । गच्छथ ॥११॥ सम्ऽमील्य । यत् । भुवना । परिऽअसर्पत । क्व । स्वित् । तात्या । पितरा । वः । आसतुः । अशपत । यः । करस्नम् । वः । आऽददे । यः । प्र । अब्रवीत् । प्रो इति । तस्मै । अब्रवीतन ॥१२॥ सुसुप्वांसः । ऋभवः । तत् । अपृच्छत । अगोह्य । कः । इदम् । नः । अबूबुधत् । श्वानम् । वस्तः । बोधयितारम् । अब्रवीत् । संवत्सरे । इदम् । अद्य । वि । अख्यत ॥१३॥ दिवा । यान्ति । मरुतः । भूम्याः । अग्निः । अयम् । वातः । अन्तरिक्षेण । याति । अद्भिः । याति । वरुणः । समुद्रैः । युष्मान् । इच्छन्तः । शवसः । नपातः ॥१४॥

1. 162

मा । नः । मित्रः । वरुणः । अर्यमा । आयुः । इन्द्रः । ऋभुक्षाः ।

मरुतः । परि । ख्यन् । यत् । वाजिनः । देवऽजातस्य । सप्तेः । प्रऽवक्ष्यामः । विदथे । वीर्याणि ॥१॥ यत् । निःऽनिजा । रेक्णसा । प्रावृत्तस्य । रातिम् । गृभीताम् । मुखतः । नयन्ति । सुऽग्राङ् । अजः । मेम्यत् । विश्वऽरूपः । इन्द्रापूष्णोः । प्रियम् । अपि । एति । पाथः ॥२॥ एषः । छागः । पुरः । अश्वेन । वाजिना । पूष्णः । भागः । नीयते । विश्वऽदेव्यः । अभिऽप्रियम् । यत् । पुरोळाशम् । अर्वता । त्वष्टा । इत् । एनम् । सौश्रवसाय । जिन्वति ॥३॥ यत् । हविष्यम् । ऋतुऽशः । देवयानम् । त्रिः । मानुषाः । परि । अश्वम् । नयन्ति । अत्र । पूष्णः । प्रथमः । भागः । एति । यज्ञम् । देवेभ्यः । प्रतिऽवेदयन् । अजः ॥४॥ होता । अध्वर्युः । आऽवया । अग्निम्ऽइन्धः । ग्रावऽग्राभः । उत । शंस्ता । सुऽविप्रः । तेन । यज्ञेन । सुऽअरंकृतेन । सुऽइष्टेन । वक्षणाः । आ । पृणध्वम् ॥५॥ यूपऽव्रस्काः । उत । ये । यूपऽवाहाः । चषालम् । ये । अश्वऽयूपाय । तक्षति । ये । च । अर्वते । पचनम् । सम्ऽभरन्ति । उतो इति । तेषाम् । अभिऽगूर्तिः । नः । इन्वतु ॥६॥ उप । प्र । अगात् । सुऽमत् । मे । अधायि । मन्म । देवानाम् । आशाः । उप । वीतऽपृष्ठः । अनु । एनम् । विप्राः । ऋषयः । मदन्ति । देवानाम् । पुष्टे । चक्रम । सुऽबन्धुम् ॥७॥ यत् । वाजिनः । दाम । सम्ऽदानम् । अर्वतः । या । शीर्षण्या । रशना । रज्जुः । अस्य । यत् । वा । घ । अस्य । प्रऽभृतम् । आस्ये । तृणम् । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥८॥ यत् । अश्वस्य । क्रविषः । मक्षिका । आश । यत् । वा । स्वरौ । स्वऽधितौ । रिप्तम् । अस्ति । यत् । हस्तयोः । शमितुः । यत् । नखेषु । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥९॥ यत् । ऊवध्यम् ।

उदरस्य । अपऽवार्ति । यः । आमस्य । क्रविषः । गन्धः । अस्ति । सुऽकृता । तत् । शमितारः । कृण्वन्तु । उत । मेधम् । शृतऽपाकम् । पचन्तु ॥१०॥ यत् । ते । गात्रात् । अग्निना । पच्यमानात् । अभि । शूलम् । निऽहतस्य । अवऽधावति । मा । तत् । भूम्याम् । आ । श्रिषत् । मा । तृणेषु । देवेभ्यः । तत् । उशत्ऽभ्यः । रातम् । अस्तु ॥११॥ ये । वाजिनम् । परिऽपश्यन्ति । पक्वम् । ये । ईम् । आहुः । सुरभिः । निः । हर । इति । ये । च । अर्वतः । मांसऽभिक्षाम् । उपऽआसते । उतो इति । तेषाम् । अभिऽगूर्तिः । नः । इन्वतु ॥१२॥ यत् । निऽई-क्षणम् । मांसपचन्याः । उखायाः । या । पात्राणि । यूष्णः । आऽसेच-नानि । ऊष्मण्या । अपिऽधाना । चरूणाम् । अङ्काः । सूनाः । परि । भूषन्ति । अश्वम् ॥१३॥ निऽक्रमणम् । निऽसदनम् । विऽवर्तनम् । यत् । च । पड्बीशम् । अर्वतः । यत् । च । पपौ । यत् । च । घासिम् । जघास । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥१४॥ मा । त्वा । अग्निः । ध्वनयीत् । धूमऽगन्धिः । मा । उखा । भ्राजन्ती । अभि । विक्त । जघ्रिः । इष्टम् । वीतम् । अभिऽगूर्तम् । वषट्ऽकृतम् । तम् । देवासः । प्रति । गृभ्णन्ति । अश्वम् ॥१५॥ यत् । अश्वाय । वासः । उप-ऽस्तृणन्ति । अधीवासम् । या । हिरण्यानि । अस्मै । सम्ऽदानम् । अर्व-न्तम् । पड्बीशम् । प्रिया । देवेषु । आ । यमयन्ति ॥१६॥ यत् । ते । सादे । महसा । शूकृतस्य । पार्ष्ण्या । वा । कशया । तुतोद । स्रुचाऽइव । ता । हविषः । अध्वरेषु । सर्वा । ता । ते । ब्रह्मणा । सूद-यामि ॥१७॥ चतुःऽत्रिंशत् । वाजिनः । देवऽबन्धोः । वङ्क्रीः । अश्व-स्य । स्वऽधितिः । सम् । एति । अच्छिद्रा । गात्रा । वयुना । कृणोत ।

परःऽपरः । अनुऽघुर्य । वि । शस्त ॥१८॥ एकः । त्वष्टुः । अश्वस्य । विऽशस्ता । द्वा । यन्तारा । भवतः । तथा । ऋतुः । या । ते । गात्राणाम् । ऋतुऽथा । कृणोमि । ताऽता । पिण्डानाम् । प्र । जुहोमि । अग्नौ ॥१९॥ मा । त्वा । तपत् । प्रियः । आत्मा । अपिऽयन्तम् । मा । स्वऽधितिः । तन्वः । आ । तिस्थिपत् । ते । मा । ते । गृध्नुः । अविऽशस्ता । अतिऽहाय । छिद्रा । गात्राणि । असिना । मिथु । करितिऽकः ॥२०॥ न । वै । ऊँ इति । एतत् । म्रियसे । न । रिष्यसि । देवान् । इत् । एषि । पथिऽभिः । सुऽगेभिः । हरी इति । ते । युञ्जा । पृषती इति । अभूताम् । उप । अस्थात् । वाजी । धुरि । रासभस्य ॥२२॥ सुऽगव्यम् । नः । वाजी । सुऽअश्व्यम् । पुंसः । पुत्रान् । उत । विश्वऽपुष्यम् । रयिम् । अनागाःऽत्वम् । नः । अदितिः । कृणोतु । क्षत्रम् । नः । अश्वः । वनताम् । हविष्मान् ॥२२॥

1. 163

यत् । अक्रन्दः । प्रथमम् । जायमानः । उतऽयन् । समुद्रात् । उत । वा । पुरीषात् । श्येनस्य । पक्षा । हरिणस्य । बाहू इति । उपऽस्तुत्यम् । महि । जातम् । ते । अर्वन् ॥१॥ यमेन । दत्तम् । त्रितः । एनम् । अयुनक् । इन्द्रः । एनम् । प्रथमः । अधि । अतिष्ठत् । गन्धर्वः । अस्य । रशनाम् । अगृभ्णात् । सूरात् । अश्वम् । वसवः । निः । अतष्ट ॥२॥ असि । यमः । असि । आदित्यः । अर्वन् । असि । त्रितः । गुहेन । व्रतेन । असि । सोमेन । समया । विऽपृक्तः । आहुः । ते । त्रीणि । दिवि । बन्धनानि ॥३॥ त्रीणि । ते । आहुः । दिवि । बन्धनानि । त्रीणि । अप्ऽसु । त्रीणि । अन्तरिति । समुद्रे । उतऽईव । मे ।

वरुणः । छन्त्सि । अर्वन् । यत्र । ते । आहुः । परमम् । जनित्रम् ॥४॥ इमा । ते । वाजिन् । अवऽमार्जनानि । इमा । शफानाम् । सनितुः । निऽधाना । अत्र । ते । भद्राः । रशनाः । अपश्यम् । ऋतस्य । याः । अभिऽरक्षन्ति । गोपाः ॥५॥ आत्मानम् । ते । मनसा । आरात् । अजानाम् । अवः । दिवा । पतयन्तम् । पतङ्गम् । शिरः । अपश्यम् । पथिऽभिः । सुऽगेभिः । अरेणुऽभिः । जेहमानम् । पतत्रि ॥६॥ अत्र । ते । रूपम् । उत्ऽतमम् । अपश्यम् । जिगीषमाणम् । इषः । आ । पदे । गोः । यदा । ते । मर्तः । अनु । भोगम् । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः । अजीगरितिं ॥७॥ अनु । त्वा । रथः । अनु । मर्यः । अर्वन् । अनु । गावः । अनु । भगः । कनीनाम् । अनु । व्रातासः । तव । सख्यम् । ईयुः । अनु । देवाः । ममिरे । वीर्यम् । ते ॥८॥ हिरण्यऽश्मश्रुः । अयः । अस्य । पादाः । मनःऽजवाः । अवरः । इन्द्रः । आसीत् । देवाः । इत् । अस्य । हविःऽअद्यम् । आयन् । यः । अर्वन्तम् । प्रथमः । अधिऽअतिष्ठत् ॥९॥ ईर्मऽअन्तासः । सिलिकऽमध्यमासः । सम् । शूरणासः । दिव्यासः । अत्याः । हंसाःऽइव । श्रेणिऽशः । यतन्ते । यत् । आचिषुः । दिव्यम् । अज्मम् । अश्वाः ॥१०॥ तव । शरीरम् । पतयिष्णु । अर्वन् । तव । चित्तम् । वातःऽइव । ध्रजीमान् । तव । शृङ्गाणि । विऽस्थिता । पुरुऽत्रा । अरण्येषु । जर्भुराणा । चरन्ति ॥११॥ उप । प्र । अगात् । शसनम् । वाजी । अर्वा । देवऽद्रीचा । मनसा । दीध्यानः । अजः । पुरः । नीयते । नाभिः । अस्य । अनु । पश्चात् । कवयः । यन्ति । रेभाः ॥१२॥ उप । प्र । अगात् । परमम् । यत् । सधऽस्थम् । अर्वान् । अच्छ । पितरम् । मातरम् । च । अग्ग । देवान् ।

जुष्टऽतमः । हि । गम्याः । अथ । आ । शास्ते । दाशुषे । वार्याणि ॥१३॥

1. 164.

अस्य । वामस्य । पलितस्य । होतुः । तस्य । भ्राता । मध्यमः । अस्ति । अश्नः । तृतीयः । भ्राता । घृतऽपृष्ठः । अस्य । अत्र । अपश्यम् । विश्पतिम् । सप्तऽपुत्रम् ॥१॥ सप्त । युञ्जन्ति । रथम् । एकऽचक्रम् । एकः । अश्वः । वहति । सप्तऽनामा । त्रिऽनाभि । चक्रम् । अजरम् । अनर्वम् । यत्र । इमा । विश्वा । भुवना । अधि । तस्थुः ॥२॥ इमम् । रथम् । अधि । ये । सप्त । तस्थुः । सप्तऽचक्रम् । सप्त । वहन्ति । अश्वाः । सप्त । स्वसारः । अभि । सम् । नवन्ते । यत्र । गवाम् । निऽहिता । सप्त । नाम ॥३॥ कः । ददर्श । प्रथमम् । जायमानम् । अस्थन्ऽवन्तम् । यत् । अनस्था । बिभर्ति । भूम्याः । असुः । असृक् । आत्मा । क्व । स्वित् । कः । विद्वांसम् । उप । गात् । प्रष्टुम् । एतत् ॥४॥ पाकः । पृच्छामि । मनसा । अविऽजानन् । देवानाम् । एना । निऽहिता । पदानि । वत्से । बष्कये । अधि । सप्त । तन्तून् । वि । तत्निरे । कवयः । ओतवै । ऊँ इति ॥५॥ अचिकित्वान् । चिकितुषः । चित् । अत्र । कवीन् । पृच्छामि । विद्मने । न । विद्वान् । वि । यः । तस्तम्भ । षट् । इमा । रजाँसि । अजस्य । रूपे । किम् । अपि । स्वित् । एकम् ॥६॥ इह । ब्रवीतु । यः । ईम् । अङ्ग । वेद । अस्य । वामस्य । निऽहितम् । पदम् । वेरिति वेः । शीर्ष्णः । क्षीरम् । दुहते । गावः । अस्य । वविम् । वसानाः । उदकम् । पदा । अपुः ॥७॥ माता । पितरम् । ऋते । आ । बभाज । धीती । अग्रे । मनसा । सम् । हि । जग्मे । सा । बीभत्सुः । गर्भैऽरसा । निऽविद्धा । नमस्वन्तः । इत् । उपऽवाकम् । ईयुः

॥८॥ युक्ता । माता । आसीत् । धुरि । दक्षिणायाः । अतिष्ठत् । गर्भः । वृजनीषु । अन्तरिति । अमीमेत् । वत्सः । अनु । गाम् । अपश्यत् । विश्वऽरूप्यम् । त्रिषु । योजनेषु ॥९॥ तिस्रः । मातॄः । त्रीन् । पितॄन् । बिभ्रत् । एकः । ऊर्ध्वः । तस्थौ । न । ईम् । अव । ग्लपयन्ति । मन्त्रयन्ते । दिवः । अमुष्य । पृष्ठे । विश्वऽविदम् । वाचम् । अविश्वऽमिन्वाम् ॥१०॥ द्वादशऽअरम् । नहि । तत् । जराय । वर्वर्ति । चक्रम् । परि । द्याम् । ऋतस्य । आ । पुत्राः । अग्ने । मिथुनासः । अत्र । सप्त । शतानि । विंशतिः । च । तस्थुः ॥११॥ पञ्चऽपादम् । पितरम् । द्वादशऽआकृतिम् । दिवः । आहुः । परे । अर्धे । पुरीषिणम् । अथ । इमे । अन्ये । उपरे । विऽचक्षणम् । सप्तऽचक्रे । षट्ऽअरे । आहुः । अर्पितम् ॥१२॥ पञ्चऽअरे । चक्रे । परिऽवर्तमाने । तस्मिन् । आ । तस्थुः । भुवनानि । विश्वा । तस्य । न । अक्षः । तप्यते । भूरिऽभारः । सनात् । एव । न । शीर्यते । सऽनाभिः ॥१३॥ सऽनेमि । चक्रम् । अजरम् । वि । वावृते । उत्तानायाम् । दश । युक्ताः । वहन्ति । सूर्यस्य । चक्षुः । रजसा । एति । आऽवृतम् । तस्मिन् । आर्पिता । भुवनानि । विश्वा ॥१४॥ साकम्ऽजानाम् । सप्तथम् । आहुः । एकऽजम् । षट् । इत् । यमाः । ऋषयः । देवऽजाः । इति । तेषाम् । इष्टानि । विऽहितानि । धामऽशः । स्थात्रे । रेजन्ते । विऽकृतानि । रूपऽशः ॥१५॥ स्त्रियः । सतीः । ताम् । ऊँ इति । मे । पुंसः । आहुः । पश्यत् । अक्षण्ऽवान् । न । वि । चेतत् । अन्धः । कविः । यः । पुत्रः । सः । ईम् । आ । चिकेत । यः । ता । विऽजानात् । सः । पितुः । पिता । असत् ॥१६॥ अवः । परेण । परः । एना । अवरेण । पदा । वत्सम् । बिभ्रती । गौः ।

उत् । अस्थात् । सा । कद्रीचीं । कम् । स्वित् । अर्धम् । परा । अगात् । क । स्वित् । सूते । नहि । यूथे । अन्तरिति ॥१७॥ अवः । परेण । पितरम् । यः । अस्य । अनुऽवेद । परः । एना । अवरेण । कविऽयमानः । कः । इह । प्र । वोचत् । देवम् । मनः । कुतः । अधि । प्रऽजातम् ॥१८॥ ये । अर्वाञ्चः । तान् । ऊँ इति । पराचः । आहुः । ये । पराञ्चः । तान् । ऊँ इति । अर्वाचः । आहुः । इन्द्रः । च । या । चक्रथुः । सोम । तानि । धुरा । न । युक्ताः । रजसः । वहन्ति ॥१९॥ द्वा । सुऽपर्णा । सऽयुजा । सखाया । समानम् । वृक्षम् । परि । सस्वजाते इति । तयोः । अन्यः । पिप्पलम् । स्वादु । अत्ति । अनश्नन् । अन्यः । अभि । चाकशीति ॥२०॥ यत्र । सुऽपर्णाः । अमृतस्य । भागम् । अनिऽमेषम् । विदथा । अभिऽस्वरन्ति । इनः । विश्वस्य । भुवनस्य । गोपाः । सः । मा । धीरः । पाकम् । अत्र । आ । विवेश ॥२१॥ यस्मिन् । वृक्षे । मधुऽअदः । सुऽपर्णाः । निऽविशन्ते । सुवते । च । अधि । विश्वे । तस्य । इत् । आहुः । पिप्पलम् । स्वादु । अग्रे । तत् । न । उत् । नशत् । यः । पितरम् । न । वेद ॥२२॥ यत् । गायत्रे । अधि । गायत्रम् । आऽहितम् । त्रैस्तुभात् । वा । त्रैस्तुभम् । निःऽअतक्षत । यत् । वा । जगत् । जगति । आऽहितम् । पदम् । ये । इत् । तत् । विदुः । ते । अमृतऽत्वम् । आनशुः ॥२३॥ गायत्रेण । प्रति । मिमीते । अर्कम् । अर्केण । साम । त्रैस्तुभेन । वाकम् । वाकेन । वाकम् । द्विऽपदा । चतुःऽपदा । अक्षरेण । मिमते । सप्त । वाणीः ॥२४॥ जगता । सिन्धुम् । दिवि । अस्तभायत् । रथम्ऽतरे । सूर्यम् । परि । अपश्यत् । गायत्रस्य । समिऽधः । तिस्रः । आहुः । ततः । मह्ना ।

प्र । रिरिचे । महिऽत्वा ॥२५॥ उपं । ह्वये । सुऽदुघाम् । धेनुम् । एताम् । सुऽहस्तैः । गोऽधुक् । उत । दोहत् । एनाम् । श्रेष्ठम् । सवम् । सविता । साविषत् । नः । अभिऽईद्धः । घर्मः । तत् । ऊँ इति । सु । प्र । वोचम् ॥२६॥ हिङ्ऽकृण्वती । वसुऽपत्नी । वसूनाम् । वत्सम् । इच्छन्ती । मनसा । अभि । आ । अगात् । दुहाम् । अश्विऽभ्याम् । पयः । अघ्न्या । इयम् । सा । वर्धताम् । महते । सौभगाय ॥२७॥ गौः । अमीमेत् । अनु । वत्सम् । मिषन्तम् । मूर्धानम् । हिङ् । अकृणोत् । मातवै । ऊँ इति । सृक्कणम् । घर्मम् । अभि । वावशाना । मिमाति । मायुम् । पयते । पयःऽभिः ॥२८॥ अयम् । सः । शिङ्क्ते । येन । गौः । अभिऽवृता । मिमाति । मायुम् । ध्वसनौ । अधि । श्रिता । सा । चित्तिऽभिः । नि । हि । चकार । मर्त्यम् । विऽद्युत् । भवन्ती । प्रति । वव्रिम् । औहत ॥२९॥ अनत् । शये । तुरऽगातु । जीवम् । एजत् । ध्रुवम् । मध्ये । आ । पस्त्यानाम् । जीवः । मृतस्य । चरति । स्वधाभिः । अमर्त्यः । मर्त्येन । सऽयोनिः ॥३०॥ अपश्यम् । गोपाम् । अनिऽपद्यमानम् । आ । च । परा । च । पथिऽभिः । चरन्तम् । सः । सध्रीचीः । सः । विषूचीः । वसानः । आ । वरीवर्ति । भुवनेषु । अन्तरिति ॥३१॥ यः । ईम् । चकार । न । सः । अस्य । वेद । यः । ईम् । ददर्श । हिरुक् । इत् । नु । तस्मात् । सः । मातुः । योना । परिऽवीतः । अन्तः । बहुऽप्रजाः । निःऽऋतिम् । आ । विवेश ॥३२॥ द्यौः । मे । पिता । जनिता । नाभिः । अत्र । बन्धुः । मे । माता । पृथिवी । मही । इयम् । उत्तानयोः । चम्वोः । योनिः । अन्तः । अत्र । पिता । दुहितुः । गर्भम् । आ । अधात् ॥३३॥ पृच्छामि । त्वा । परम् । अन्तम् ।

पृथिव्याः । पृच्छामि । यत्र । भुवनस्य । नाभिः । पृच्छामि । त्वा ।
वृष्णः । अश्वस्य । रेतः । पृच्छामि । वाचः । परमम् । विऽओम ॥३४॥
इयम् । वेदिः । परः । अन्तः । पृथिव्याः । अयम् । यज्ञः । भुवनस्य ।
नाभिः । अयम् । सोमः । वृष्णः । अश्वस्य । रेतः । ब्रह्मा । अयम् ।
वाचः । परमम् । विऽओम ॥३५॥ सप्त । अर्धऽगर्माः । भुवनस्य । रेतः ।
विष्णोः । तिष्ठन्ति । प्रऽदिशा । विऽधर्मणि । ते । धीतिऽभिः । मनसा ।
ते । विपःऽचितः । परिऽभुवः । परि । भवन्ति । विश्वतः ॥३६॥ न । वि ।
जानामि । यत्ऽइव । इदम् । अस्मि । निण्यः । सम्ऽनद्धः । मनसा ।
चरामि । यदा । मा । आ । अगन् । प्रथमऽजाः । ऋतस्य । आत् ।
इत् । वाचः । अश्नुवे । भागम् । अस्याः ॥ ३७ ॥ अपाङ् । प्राङ् ।
एति । स्वधया । गृभीतः । अमर्त्यः । मर्त्येन । सऽयोनिः । ता । शश्वन्ता ।
विषूचीना । विऽयन्ता । नि । अन्यम् । चिक्युः । न । नि । चिक्युः ।
अन्यम् ॥ ३८ ॥ ऋचः । अक्षरे । परमे । विऽओमन् । यस्मिन् । देवाः ।
अधि । विश्वे । निऽसेदुः । यः । तत् । न । वेद । किम् । ऋचा ।
करिष्यति । ये । इत् । तत् । विदुः । ते । इमे । सम् । आसते ॥ ३९ ॥
सुयवसऽअत् । भगऽवती । हि । भूयाः । अथो इति । वयम् । भगऽवन्तः ।
स्याम । अद्धि । तृणम् । अघ्न्ये । विश्वऽदानीम् । पिब । शुद्धम् ।
उदकम् । आऽचरन्ती ॥ ४० ॥ गौरीः । मिमाय । सलिलानि । तक्षती ।
एकऽपदी । द्विऽपदी । सा । चतुःऽपदी । अष्टाऽपदी । नवऽपदी ।
बभूवुषी । सहस्रऽअक्षरा । परमे । विऽओमन् ॥ ४१ ॥ तस्याः ।
समुद्राः । अधि । वि । क्षरन्ति । तेन । जीवन्ति । प्रऽदिशः । चतस्रः ।
ततः । क्षरति । अक्षरम् । तत् । विश्वम् । उप । जीवति ॥ ४२ ॥ शक-

ऽमर्त्यम् । धूमम् । आरात् । अपश्यम् । विषुऽवता । परः । एना । अवरेण ।
उक्षाणम् । पृश्निम् । अपचन्त । वीराः । तानि । धर्माणि । प्रथमानि ।
आसन् ॥ ४३ ॥ त्रयः । केशिनः । ऋतुऽथा । वि । चक्षते । संवत्सरे ।
वपते । एकः । एषाम् । विश्वम् । एकः । अभि । चष्टे । शचीभिः । ध्राजिः
एकस्य । ददृशे । न । रूपम् ॥ ४४ ॥ चत्वारि । वाक् । परिऽमिता ।
पदानि । तानि । विदुः । ब्राह्मणाः । ये । मनीषिणः । गुहा । त्रीणि ।
निऽहिता । न । इङ्गयन्ति । तुरीयम् । वाचः । मनुष्याः । वदन्ति ॥४५॥
इन्द्रम् । मित्रम् । वरुणम् । अग्निम् । आहुः । अथो इति । दिव्यः । सः ।
सुऽपर्णः । गरुत्मान् । एकम् । सत् । विप्राः । बहुधा । वदन्ति । अग्निम् ।
यमम् । मातरिश्वानम् । आहुः ॥४६॥ कृष्णम् । निऽयानम् । हरयः ।
सुऽपर्णाः । अपः । वसानाः । दिवम् । उत् । पतन्ति । ते । आ ।
अवऽवृत्रन् । सदनात् । ऋतस्य । आत् । इत् । घृतेन । पृथिवी । वि ।
उद्यते ॥ ४७ ॥ द्वादश । प्रऽधयः । चक्रम् । एकम् । त्रीणि । नभ्यानि ।
कः । ऊँ इति । तत् । चिकेत । तस्मिन् । साकम् । त्रिऽशताः । न ।
शङ्कवः । अर्पिताः । षष्टिः । न । चलाचलासः ॥ ४८ ॥ यः । ते ।
स्तनः । शशयः । यः । मयःऽभूः । येन । विश्वा । पुष्यसि । वार्याणि ।
यः । रत्नऽधाः । वसुऽवित् । यः । सुऽदत्रः । सरस्वति । तम् । इह ।
धातवे । करिति कः ॥ ४९ ॥ यज्ञेन । यज्ञम् । अयजन्त । देवाः ।
तानि । धर्माणि । प्रथमानि । आसन् । ते । ह । नाकम् । महिमानः ।
सचन्त । यत्र । पूर्वे । साध्याः । सन्ति । देवाः ॥ ५० ॥ समानम् ।
एतत् । उदकम् । उत् । च । एति । अव । च । अहऽभिः । भूमिम् ।
पर्जन्याः । जिन्वन्ति । दिवम् । जिन्वन्ति । अग्नयः ॥ ५१ ॥ दिव्यम् ।

सुऽपर्णम् । वायसम् । बृहन्तम् । अपाम् । गर्भम् । दर्शतम् । ओषधीनाम् ।
अभीपतः । वृष्टिऽभिः । तर्पयन्तम् । सरस्वन्तम् । अवसे । जोहवीमि ॥५२॥

1. 165

कया । शुभा । सऽवयसः । सऽनीळाः । समान्या । मरुतः । सम् ।
मिमिक्षुः । कया । मती । कुतः । आऽइतासः । एते । अर्चन्ति । शुष्मम् ।
वृषणः । वसुऽया ॥ १ ॥ कस्य । ब्रह्माणि । जुजुषुः । युवानः । कः ।
अध्वरे । मरुतः । आ । ववर्त । श्येनान्ऽइव । ध्रजतः । अन्तरिक्षे ।
केन । महा । मनसा । रीरमाम ॥ २ ॥ कुतः । त्वम् । इन्द्र । माहिनः ।
सन् । एकः । यासि । सत्ऽपते । किम् । ते । इत्था । सम् । पृच्छसे ।
समुऽअराणः । शुभानैः । वोचेः । तत् । नः । हरिऽवः । यत् । ते ।
अस्मे इति ॥ ३ ॥ ब्रह्माणि । मे । मतयः । शम् । सुतासः । शुष्मः ।
इयर्ति । प्रऽभृतः । मे । अद्रिः । आ । शासते । प्रति । हर्यन्ति । उक्था ।
इमा । हरी इति । वहतः । ता । नः । अच्छ ॥ ४ ॥ अतः । वयम् ।
अन्तमेभिः । युजानाः । स्वऽक्षत्रेभिः । तन्वः । शुम्भमानाः । महःऽभिः ।
एतान् । उप । युज्महे । नु । इन्द्रे । स्वधाम् । अनु । हि । नः । बभूथ ॥५॥
कः । स्या । वः । मरुतः । स्वधा । आसीत् । यत् । माम् । एकम् ।
समुऽअधत्त । अहिऽहत्ये । अहम् । हि । उग्रः । तविषः । तुविष्मान् ।
विश्वस्य । शत्रोः । अनमम् । वधऽस्नैः ॥ ६ ॥ भूरि । चकर्थ । युज्येभिः ।
अस्मे इति । समानेभिः । वृषभ । पौंस्येभिः । भूरीणि । हि । कृणवाम ।
शविष्ठ । इन्द्र । क्रत्वा । मरुतः । यत् । वशाम ॥ ७ ॥ वधीम् । वृत्रम् ।
मरुतः । इन्द्रियेण । स्वेन । भामेन । तविषः । बभूवान् । अहम् ।
एताः । मनवे । विश्वऽचन्द्राः । सुऽगाः । अपः । चकर । वज्रऽबाहुः ॥८॥

अनुत्तम् । आ । ते । मघऽवन् । नकिः । नु । न । त्वाऽवान् । अस्ति ।
देवता । विदानः । न । जायमानः । नशते । न । जातः । यानि ।
करिष्या । कृणुहि । प्रऽवृद्ध ॥ ९ ॥ एकस्य । चित् । मे । विऽभु ।
अस्तु । ओजः । या । नु । दधृष्वान् । कृणवै । मनीषा । अहम् । हि ।
उग्रः । मरुतः । विदानः । यानि । च्यवम् । इन्द्रः । इत् । ईशे ।
एषाम् ॥ १० ॥ अमन्दत् । मा । मरुतः । स्तोमः । अत्र । यत् । मे ।
नरः । श्रुत्यम् । ब्रह्म । चक्र । इन्द्राय । वृष्णे । सुऽसखाय । मह्यम् ।
सख्ये । सखायः । तन्वे । तनूभिः ॥ ११ ॥ एव । इत् । एते । प्रति ।
मा । रोचमानाः । अनेद्यः । श्रवः । आ । इषः । दधानाः । सम्ऽचक्ष्य ।
मरुतः । चन्द्रऽवर्णाः । अच्छान्त । मे । छदयाथ । च । नूनम् ॥ १२ ॥
कः । नु । अत्र । मरुतः । ममहे । वः । प्र । यातन । सखीन् । अच्छ ।
सखायः । मन्मानि । चित्राः । अपिऽवातयन्तः । एषाम् । भूत । नवेदाः ।
मे । ऋतानाम् ॥ १३ ॥ आ । यत् । दुवस्यात् । दुवसे । न । कारुः ।
अस्मान् । चक्रे । मान्यस्य । मेधा । ओ इति । सु । वर्त्त । मरुतः ।
विप्रम् । अच्छ । इमा । ब्रह्माणि । जरिता । वः । अर्चत् ॥ १४ ॥
एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य ।
कारोः । आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् ।
वृजनम् । जीरऽदानुम् ॥ १५ ॥

1. 166.

तत् । नु । वोचाम । रभसाय । जन्मने । पूर्वम् । महिऽत्वम् । वृष-
भस्य । केतवे । एधाऽइव । यामन् । मरुतः । तुविऽस्वनः । युधाऽइव ।
शुक्राः । तविषाणि । कर्तन ॥ १ ॥ नित्यम् । न । सूनुम् । मधु । बिभ्रतः ।

उर्व । क्रीळन्ति । क्रीळाः । विदथेषु । घृष्वयः । नर्दन्ति । रुद्राः ।
अर्वसा । नमस्विनम् । न । मर्धन्ति । स्वऽतवसः । हविःऽकृतम् ॥२॥
यस्मै । ऊमासः । अमृताः । अरासत । रायः । पोषम् । च । हविषा ।
ददाशुषे । उद्वन्ति । अस्मै । मरुतः । हिताःऽइव । पुरु । रजांसि । पर्यसा ।
मयःऽभुवः ॥३॥ आ । ये । रजांसि । तविषीभिः । अव्यत । प्र । वः ।
एवासः । स्वऽयतासः । अध्रजन् । भयन्ते । विश्वा । भुवनानि । हर्म्या ।
चित्रः । वः । यामः । प्रऽयतासु । ऋष्टिषु ॥४॥ यत् । त्वेषऽयामाः ।
नदयन्त । पर्वतान् । दिवः । वा । पृष्ठम् । नर्याः । अचुच्यवुः । विश्वः ।
वः । अज्मन् । भयते । वनस्पतिः । रथियन्तीऽइव । प्र । जिहीते ।
ओषधिः ॥५॥ यूयम् । नः । उग्राः । मरुतः । सुऽचेतुना । अरिष्टऽग्रामाः । सुऽमतिम् । पिपर्तन । यत्र । वः । दिद्युत् । रदति । क्रिविःऽदती । रिणाति । पश्वः । सुधिताऽइव । बर्हणा ॥६॥ प्र । स्कम्भऽदेष्णाः । अनवभ्रऽराधसः । अलातृणासः । विदथेषु । सुऽस्तुताः । अर्चन्ति । अर्कम् । मदिरस्य । पीतये । विदुः । वीरस्य । प्रथमानि । पौंस्या ॥७॥ शतभुजिऽभिः । तम् । अभिऽहुतेः । अघात् । पूःऽभिः । रक्षत । मरुतः । यम् । आवत । जनम् । यम् । उग्राः । तवसः । विऽरप्शिनः । पाथन । शंसात् । तनयस्य । पुष्टिषु ॥८॥ विश्वानि । भद्रा । मरुतः । रथेषु । वः । मिथस्पृध्याऽइव । तविषाणि । आऽहिता । अंसेषु । आ । वः । प्रऽपथेषु । खादयः । अक्षः । वः । चक्रा । समया । वि । वर्तते ॥९॥ भूरीणि । भद्रा । नर्येषु । बाहुषु । वक्षःऽसु । रुक्माः । रभसासः । अञ्जयः । अंसेषु । एताः । पविषु । क्षुराः । अधि । वयः । न । पक्षान् । वि । अनु । श्रियः । धिरे ॥१०॥ महान्तः । महा । विऽभ्वः । विऽ-

भृतयः । दूरेऽदृशः । ये । दिव्याःऽइव । स्तृऽभिः । मन्द्राः । सुऽजिह्वाः । स्वरितारः । आसऽभिः । सम्ऽमिश्लाः । इन्द्रे । मरुतः । परिऽस्तुभः ॥११॥ तत् । वः । सुऽजाताः । मरुतः । महिऽत्वनम् । दीर्घम् । वः । दात्रम् । अदितेःऽइव । व्रतम् । इन्द्रः । चन । त्यजसा । वि । हृणाति । तत् । जनाय । यत्ऽयै । सुऽकृते । अरांध्वम् ॥१२॥ तत् । वः । जामिऽत्वम् । मरुतः । परे । युगे । पुरु । यत् । शंसम् । अमृतासः । आवत । अया । धिया । मनवे । भुष्टिम् । आर्य्य । साकम् । नरः । दंसनैः । आ । चिकित्रिरे ॥१३॥ येन । दीर्घम् । मरुतः । शूशवाम । युष्माकेन । परीणसा । तुरासः । आ । यत् । ततनन् । वृजने । जनासः । एभिः । यज्ञेभिः । तत् । अभि । इष्टिम् । अश्याम् ॥१४॥ एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥१५॥

1. 167

सहस्रम् । ते । इन्द्र । ऊतयः । नः । सहस्रम् । इषः । हरिऽवः । गूर्तऽतमाः । सहस्रम् । रायः । मादयध्यै । सहस्रिणः । उप । नः । यन्तु । वाजाः ॥१॥ आ । नः । अवः ऽभिः । मरुतः । यान्तु । अच्छ । ज्येष्ठेभिः । वा । बृहत्ऽदिवैः । सुऽमायाः । अध । यत् । एषाम् । निऽष्युतः । परमाः । समुद्रस्य । चित् । धनयन्त । पारे ॥२॥ मिम्यक्ष । येषु । सुऽधिता । घृताची । हिरण्यऽनिर्निक् । उपरा । न । सृष्टिः । गुहा । चरन्ती । मनुषः । न । योषा । सभाऽवती । विदथ्याऽइव । सम् । वाक् ॥३॥ परा । शुभ्राः । अयासः । यन्या । साधारण्याऽइव । मरुतः । मिमिक्षुः । न । रोदसी इति । अप । नुदन्त । घोराः । जुषन्त । इषम् ।

सख्याय । देवाः ॥४॥ जोषत् । यत् । ईम् । असुर्या । सचध्यै । विसितऽस्तुका । रोदसी । नृऽमनाः । आ । सूर्याऽइव । विधतः । रथम् । गात् । त्वेषऽप्रतीका । नमसः । न । इत्या ॥५॥ आ । अस्थापयन्त । युवतिम् । युवानः । शुभे । निऽमिश्लाम् । विदथेषु । पज्राम् । अर्कैः । यत् । वः । मरुतः । हविष्मान् । गायत् । गाथम् । सुतऽसोमः । दुवस्यन् ॥६॥ प्र । तम् । विवक्मि । वक्म्यः । यः । एषाम् । मरुताम् । महिमा । सत्यः । अस्ति । सचा । यत् । ईम् । वृषऽमनाः । अहम्ऽयुः । स्थिरा । चित् । जनीः । वहते । सुऽभागाः ॥७॥ पान्ति । मित्रावरुणौ । अवद्यात् । चयते । ईम् । अर्यमो इति । अप्रऽशस्तान् । उत । च्यवन्ते । अच्युता । ध्रुवाणि । वहधे । ईम् । मरुतः । दातिऽवारः ॥८॥ नहि । नु । वः । मरुतः । अन्ति । अस्मे इति । आरात्तात् । चित् । शवसः । अन्तम् । आपुः । ते । भृष्णुना । शवसा । शूशुऽवांसः । अर्णः । न । द्वेषः । धृषता । परि । स्युः ॥९॥ वयम् । अद्य । इन्द्रस्य । प्रेष्ठाः । वयम् । श्वः । वोचेमहि । सऽमर्ये । वयम् । पुरा । महि । च । नः । अनु । द्यून् । तत् । नः । ऋभुक्षाः । नराम् । अनु । स्यात् ॥१०॥ एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥११॥

1. 168.

यज्ञाऽयज्ञा । वः । समना । ततुर्वणिः । धियम्ऽधियम् । वः । देवऽवाः । ऊँ इति । दधिध्वे । आ । वः । अर्वाचः । सुविताय । रोदस्योः । महे । वहत्याम् । अवसे । सुवृक्तिऽभिः ॥१॥ वव्रासः । न । ये । स्वऽजाः । स्वऽतवसः । इषम् । स्वः । अभिऽजायन्त । धूतयः । सहस्रियासः ।

अपाम् । न । ऊर्मयः । आसा । गावः । वन्वासः । न । उक्षणः ॥२॥ सोमासः । न । ये । सुताः । तृप्तऽअंशवः । हृत्ऽसु । पीतासः । दुवसः । न । आसते । आ । एषाम् । अंसेषु । रम्भिणीऽइव । ररमे । हस्तेषु । खादिः । च । कृतिः । च । सम् । दधे ॥३॥ अव । स्वऽयुक्ताः । दिवः । आ । वृथा । ययुः । अमर्त्याः । कशया । चोदत । त्मना । अरेणवः । तुविऽजाताः । अचुच्यवुः । दव्हानि । चित् । मरुतः । आजत्ऽऋष्टयः ॥४॥ कः । वः । अन्तः । मरुतः । ऋष्टिऽविद्युतः । रेजति । त्मना । हन्वाऽइव । जिह्वया । धन्वऽच्युतः । इषाम् । न । यामनि । पुरुऽप्रैषाः । अहन्यः । न । एतशः ॥५॥ कः । खित् । अस्य । रजसः । महः । परम् । कः । अवरम् । मरुतः । यस्मिन् । आऽययथ । यत् । च्यवथ । विधुराऽइव । सम्ऽहितम् । वि । अद्रिणा । पतथ । त्वेषम् । अर्णवम् ॥६॥ सातिः । न । वः । अमऽवती । स्वःऽवती । त्वेषा । विऽपाका । मरुतः । पिपिष्वती । भद्रा । वः । रातिः । पृणतः । न । दक्षिणा । पृथुऽज्रयी । असुर्यीऽइव । जञ्जती ॥७॥ प्रति । स्तोभन्ति । सिन्धवः । पविऽभ्यः । यत् । अभ्रियाम् । वाचम् । उत्ऽईरयन्ति । अव । स्मयन्त । विऽद्युतः । पृथिव्याम् । यदि । घृतम् । मरुतः । प्रऽस्कुवन्ति ॥८॥ अक्षत । पृश्निः । महते । रणाय । त्वेषम् । अयासाम् । मरुताम् । अनीकम् । ते । सप्सरासः । अजनयन्त । अम्बम् । आत् । इत् । स्वधाम् । इषिराम् । परि । अपश्यन् ॥९॥ एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥१०॥

1. 169.

महः । चित् । त्वम् । इन्द्र । यतः । एतान् । महः । चित् । असि ।
त्यजसः । वरूता । सः । नः । वेधः । मरुताम् । चिकित्वान् । सुम्ना ।
वनुष्व । तवं । हि । प्रेष्ठा ॥१॥ अयुज्रन् । ते । इन्द्र । विश्वऽकृष्टीः ।
विदानासः । निःऽसिधः । मर्त्यऽत्रा । मरुताम् । पृत्सुतिः । हासमाना ।
स्वःऽमीळ्हस्य । प्रऽधनस्य । सातौ ॥२॥ अर्म्यक् । सा । ते । इन्द्र ।
ऋष्टिः । अस्मे इति । सनेमि । अभ्वम् । मरुतः । जुनन्ति । अग्निः ।
चित् । हि । स्म । अतसे । शुशुक्वान् । आपः । न । द्वीपम् । दधति ।
प्रयांसि ॥३॥ त्वम् । तु । नः । इन्द्र । तम् । रयिम् । दाः । ओजिष्ठया ।
दक्षिणयाऽइव । रातिम् । स्तुतः । च । याः । ते । चकनन्त । वायोः ।
स्तनम् । न । मध्वः । पीपयन्त । वाजैः ॥४॥ त्वे इति । रायः । इन्द्र ।
तोशऽतमाः । प्रऽनेतारः । कस्य । चित् । ऋतऽयोः । ते । सु । नः । मरुतः ।
मृळयन्तु । ये । स्म । पुरा । गातुयन्तिऽइव । देवाः ॥५॥ प्रति । प्र ।
याहि । इन्द्र । मीळ्हुषः । नॄन् । महः । पार्थिवे । सदने । यतस्व ।
अर्ध । यत् । एषाम् । पृथुऽबुध्नासः । एताः । तीर्थे । न । अर्यः ।
पौंस्यानि । तस्थुः ॥६॥ प्रति । घोराणाम् । एतानाम् । अयासाम् ।
मरुताम् । शृण्वे । आऽयताम् । उपब्दिः । ये । मर्त्यम् । पृतनाऽयन्तम् ।
ऊमैः । ऋणऽवानम् । न । पतयन्त । सर्गैः ॥७॥ त्वम् । मानेभ्यः ।
इन्द्र । विश्वऽजन्या । रदं । मरुत्ऽभिः । शुरुधः । गोऽअग्राः । स्तवा-
नेभिः । स्तवसे । देव । देवैः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥८॥

1. 170

न । नूनम् । अस्ति । नो इति । श्वः । कः । तत् । वेद । यत् ।

अद्भुतम् । अन्यस्य । चित्तम् । अभि । सम्ऽचरेण्यम् । उत । आऽधीतम् । वि । नश्यति ॥१॥ किम् । नः । इन्द्र । जिघांससि । भ्रातरः । मरुतः । तव । तेभिः । कल्पस्व । साधुऽया । मा । नः । समऽअरणे । वधीः ॥२॥ किम् । नः । भ्रातः । अगस्त्य । सखा । सन् । अति । मन्यसे । विद्म । हि । ते । यथा । मनः । अस्मभ्यम् । इत् । न । दित्ससि ॥३॥ अरम् । कृण्वन्तु । वेदिम् । सम् । अग्निम् । इन्धताम् । पुरः । तत्र । अमृतस्य । चेतनम् । यज्ञम् । ते । तनवावहै ॥४॥ त्वम् । ईशिषे । वसुऽपते । वसूनाम् । त्वम् । मित्राणाम् । मित्रऽपते । धेष्ठः । इन्द्र । त्वम् । मरुत्ऽभिः । सम् । वदस्व । अध । प्र । अशान । ऋतुऽया । हवींषि ॥५॥

1. 171

प्रति । वः । एना । नमसा । अहम् । एमि । सुऽउक्तेन । भिक्षे । सुऽमतिम् । तुराणाम् । रराणताम् । मरुतः । वेद्याभिः । नि । हेळः । धत्त । वि । मुचध्वम् । अश्वान् ॥१॥ एषः । वः । स्तोमः । मरुतः । नमस्वान् । हृदा । तष्टः । मनसा । धायि । देवाः । उप । ईम् । आ । यात । मनसा । जुषाणाः । यूयम् । हि । स्थ । नमसः । इत् । वृधासः ॥२॥ स्तुतासः । नः । मरुतः । मृळयन्तु । उत । स्तुतः । मघऽवा । शम्ऽभविष्ठः । ऊर्ध्वा । नः । सन्तु । कोम्या । वनानि । अहानि । विश्वा । मरुतः । जिगीषा ॥३॥ अस्मात् । अहम् । तविषात् । ईषमाणः । इन्द्रात् । भिया । मरुतः । रेजमानः । युष्मद्ऽयम् । हव्या । निऽदधे । तानि । आसन् । तानि । आरे । चकृम । मृळत । नः ॥४॥ येन । मानासः । पितरः । उक्षाः । विऽउहिषु । वयसा । वयन्तीनाम् । सः ।

नः । मरुत्ऽभिः । वृषभ । श्रवः । धाः । उग्रः । उग्रेभिः । स्थविरः । सहःऽदाः ॥५॥ त्वम् । पाहि । इन्द्र । सहीयसः । नॄन् । भवे । मरुत्ऽभिः । अवयातऽहेळाः । सुऽप्रकेतेभिः । ससहिः । दधानः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

1. 172.

चित्रः । वः । अस्तु । यामः । चित्रः । ऊती । सुऽदानवः । मरुतः । अहिंऽभानवः ॥१॥ आरे । सा । वः । सुऽदानवः । मरुतः । ऋञ्जती । शरुः । आरे । अश्मा । यम् । अस्थित ॥२॥ तृणऽस्कन्दस्य । नु । विशः । परि । वृङ्क्त । सुऽदानवः । ऊर्ध्वान् । नः । कर्त । जीवसे ॥३॥

1. 173

गायत् । साम । नभन्यम् । यथा । वेः । अर्चाम । तत् । वपुषा-नम् । खेःऽवत् । गावः । धेनवः । बर्हिषि । अदन्ध्वाः । आ । यत् । सद्मानम् । दिव्यम् । विवासान् ॥१॥ अर्चत् । वृषा । वृषऽभिः । स्वऽइदुहव्यैः । मृगः । न । अश्नः । अति । यत् । जुगुर्यात् । प्र । मन्दयुः । मनाम् । गूर्त । होता । भरते । मर्यः । मिथुना । यजत्रः ॥२॥ नवत् । होता । परि । सद्म । मिता । यन् । भरत् । गर्भम् । आ । शरदः । पृथिव्याः । क्रन्दत् । अग्निः । नयमानः । रुवत् । गौः । अन्तः । दूतः । न । रोदसी इति । चरत् । वाक् ॥३॥ ता । कर्म । अपऽतरा । अस्मै । प्र । ज्यौत्नानि । देवऽयन्तः । भरन्ते । जुजोषत् । इन्द्रः । दक्षऽवर्चाः । नासत्याऽइव । सुगम्यः । रथेऽस्थाः ॥४॥ तम् । ऊँ इति । स्तुहि । इन्द्रम् । यः । ह । सत्वा । यः । शूरः । मघऽवा । यः । रथेऽस्थाः । प्रतीचः । चित् । योधीयान् । वृषण्ऽवान् । ववव्रषः । चित् । तमसः । विऽअञ्जना ॥५॥ प्र । यत् । इत्था । महिना । नृऽभ्यः । अस्ति । अरम् ।

रोदसी इति । कृत्ये इति । न । अस्मै । सम् । विव्ये । इन्द्रः । वृजनम् । न । भूम । भरति । स्वधाऽवान् । ओपशम्ऽइव । द्याम् ॥६॥ समत्ऽसु । त्वा । शूर । सताम् । उराणम् । प्रपथिन्ऽतमम् । परिऽतंसयध्यै । सऽजोषसः । इन्द्रम् । मदे । चोणीः । सूरिम् । चित् । ये । अनुऽमदन्ति । वाजैः ॥७॥ एव । हि । ते । शम् । सवना । समुद्रे । आपः । यत् । ते । आसु । मदन्ति । देवीः । विश्वा । ते । अनु । जोष्या । भूत् । गौः । सूरीन् । चित् । यदि । धिषा । वेषि । जनान् ॥८॥ असाम । यथा । सुऽसखायः । एन । सुऽअभिष्टयः । नराम् । न । शंसैः । असत् । यथा । नः । इन्द्रः । वन्दनेऽस्थाः । तुरः । न । कर्म । नयमानः । उक्था ॥९॥ विऽस्पर्धसः । नराम् । न । शंसैः । अस्माकं । असत् । इन्द्रः । वज्रऽहस्तः । मित्रऽयुवः । न । पूःऽपतिम् । सुऽशिष्टौ । मघऽयुवः । उप । शिक्षन्ति । यज्ञैः ॥१०॥ यज्ञः । हि । स्म । इन्द्रम् । कः । चित् । ऋन्धन् । जुहुराणः । चित् । मनसा । परिऽयन् । तीर्थे । न । अच्छ । ततृषाणम् । ओकः । दीर्घः । न । सिध्रम् । आ । कृणोति । अध्वा ॥११॥ मो इति । सु । नः । इन्द्र । अत्र । पृत्ऽसु । देवैः । अस्ति । हि । स्म । ते । शुष्मिन् । अवऽयाः । महः । चित् । यस्य । मीळ्हुषः । यव्या । हविष्मतः । मरुतः । वन्दते । गीः ॥१२॥ एषः । स्तोमः । इन्द्र । तुभ्यम् । अक्षो इति । एतेन । गातुम् । हरिऽवः । विदः । नः । आ । नः । वृत्याः । सुवितायं । देव । विधाम । इषम् । वृजनम् । जीरऽदानुम् ॥१३॥

1. 174.

त्वम् । राजा । इन्द्र । ये । च । देवाः । रक्षे । नृन् । पाहि ।

असुर । त्वम् । अस्मान् । त्वम् । सत्ऽपतिः । मघऽवा । नः । तरुत्रः । त्वम् । सत्यः । वसवानः । सहःऽदाः ॥१॥ दनः । विशः । इन्द्र । मृध्रऽवाचः । सप्त । यत् । पुरः । शर्म । शारदीः । दर्त् । ऋणोः । अपः । अनवद्य । अर्णीः । यूने । वृत्रम् । पुरुऽकुत्साय । रन्धीः ॥२॥ अजः । वृतः । इन्द्र । शूरऽपत्नीः । द्याम् । च । येभिः । पुरुऽहूत । नूनम् । रक्षो इति । अग्निम् । अशुषम् । तूर्वयाणम् । सिंहः । न । दमे । अपांसि । वस्तोः ॥३॥ शेषन् । नु । ते । इन्द्र । सस्मिन् । योनौ । प्रऽशस्तये । पवीरवस्य । महा । सृजत् । अर्णांसि । अव । यत् । युधा । गाः । तिष्ठत् । हरी इति । धृषता । मृष्ट । वाजान् ॥४॥ वहे । कुत्सम् । इन्द्र । यस्मिन् । चाकन् । स्यूमन्यू इति । ऋजा । वातस्य । अश्वा । प्र । सूरः । चक्रम् । बृहतात् । अभीके । अभि । स्पृधः । यासिषत् । वज्रऽबाहुः ॥५॥ जघन्वान् । इन्द्र । मित्रेरूत् । चोदऽप्रबुद्धः । हरिऽअः । अदाशून् । प्र । ये । पश्यन् । अर्यमणम् । सचा । आयोः । त्वया । शूर्ताः । वहमानाः । अपत्यम् ॥६॥ रपत् । कविः । इन्द्र । अर्कसातौ । द्याम् । दासाय । उपऽबर्हणीम् । करिति कः । करत् । तिस्रः । मघऽवा । दानुऽचित्राः । नि । दुर्योणे । कुयवाचम् । मृधि । श्रेत् ॥७॥ सना । ता । ते । इन्द्र । नव्याः । आ । अगुः । सहः । नभः । अविंऽरणाय । पूर्वीः । भिनत् । पुरः । न । भिदः । अदेवीः । ननमः । वधः । अदेवस्य । पीयोः ॥८॥ त्वम् । धुनिः । इन्द्र । धुनिऽमतीः । ऋणोः । अपः । सीराः । न । स्रवन्तीः । प्र । यत् । समुद्रम् । अति । शूर । पर्षि । पारय । तुर्वशम् । यदुम् । स्वस्ति ॥९॥ त्वम् । अस्माकम् । इन्द्र । विश्वधा । स्याः । अवृकऽतमः । नराम् । नृऽपाता । सः । नः । विश्वासाम् । स्पृधाम् । सहःऽदाः । विधाम । इषम् ।

वृजनम् । जीरऽदानुम् ॥ १० ॥

1. 175

मत्सि । अपांयि । ते । महः । पात्रस्यऽइव । हरिऽवः । मत्सरः । मदः । वृषा । ते । वृष्णे । इन्दुः । वाजी । सहस्रऽसातमः ॥१॥ आ । नः । ते । गन्तु । मत्सरः । वृषा । मदः । वरेण्यः । सहऽवान् । इन्द्र । सानसिः । पृतनाषाट् । अमर्त्यः ॥२॥ त्वम् । हि । शूरः । सनिता । चोदयः । मनुषः । रथम् । सहऽवान् । दस्युम् । अव्रतम् । ओषः । पात्रम् । न । शोचिषा ॥३॥ शुषाय । सूर्यम् । कवे । चक्रम् । ईशानः । ओजसा । वहे । शुष्णाय । वधम् । कुत्सम् । वातस्य । अश्वैः ॥४॥ शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः । वृत्रऽहा । वरिवःऽविदा । मंसीष्ठाः । अश्वऽसातमः ॥५॥ यथा । पूर्वेभ्यः । जरितृऽभ्यः । इन्द्र । मयःऽइव । आपः । न । तृष्यते । नभूथ । ताम् । अनु । त्वा । निऽविदम् । जोहवीमि । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

1. 176

मत्सि । नः । वर्स्यःऽइष्टये । इन्द्रम् । इन्दो इति । वृषा । आ । विश । ऋषायमाणः । इन्वसि । शत्रुम् । अन्ति । न । विन्दसि ॥१॥ तस्मिन् । आ । वेशय । गिरः । यः । एकः । चर्षणीनाम् । अनु । स्वधा । यम् । उप्यते । यवम् । न । चर्कृषत् । वृषा ॥२॥ यस्य । विश्वानि । हस्तयोः । पञ्च । क्षितीनाम् । वसु । स्पाशयस्व । यः । अस्मऽभ्यम् । दिव्याऽइव । अशनिः । जहि ॥३॥ असुन्वन्तम् । । समम् । जहि । दुःऽनाशम् । यः । न । ते । मयः । अस्मभ्यम् । अस्व । वेदनम् । दद्धि । सूरिः । चित् । ओहते ॥४॥ आदंः । यस्य । हिऽबर्हसः ।

केषु । सानुषक् । असत् । आजौ । इन्द्रस्य । इन्दो इति । प्र । आवः ।
जेषु । वाजिनम् ॥५॥ यथा । पूर्वेभ्यः । जरितृऽभ्यः । इन्द्र । मयःऽ-
इ । आपः । न । तृष्यते । बभूथ । ताम् । अनु । त्वा । निऽविदम् ।
हवीमि । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

1. 177.

आ । चर्षणिऽप्राः । वृषभः । जनानाम् । राजा । कृष्टीनाम् । पुरु-
हूतः । इन्द्रः । स्तुतः । श्रवस्यन् । अवसा । उप । मद्रिक् । युक्त्वा ।
ी इति । वृषणा । आ । याहि । अर्वाङ् ॥१॥ ये । ते । वृषणः ।
भासः । इन्द्र । ब्रह्मऽयुजः । वृषऽरथासः । अत्याः । तान् । आ ।
ष्ठ । तेभिः । आ । याहि । अर्वाङ् । हवामहे । त्वा । सुते । इन्द्र ।
में ॥२॥ आ । तिष्ठ । रथम् । वृषणम् । वृषा । ते । सुतः । सोमः ।
रीऽसिक्ता । मधूनि । युक्त्वा । वृषऽभ्याम् । वृषभ । क्षितीनाम् । हरि-
भ्याम् । याहि । प्रऽवता । उप । मद्रिक् ॥३॥ अयम् । यज्ञः । देव-
ाः । अयम् । मियेधः । इमा । ब्रह्माणि । अयम् । इन्द्र । सोमः ।
र्णम् । बर्हिः । आ । तु । शक्र । प्र । याहि । पिब । निऽसद्य । वि ।
ञ्च । हरी इति । इह ॥४॥ ओ इति । सुऽस्तुतः । इन्द्र । याहि ।
ार्वाङ् । उप । ब्रह्माणि । मान्यस्य । कारोः । विद्याम । वस्तोः ।
ासा । गृणन्तः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥५॥

1. 178.

यत् । ह । स्या । ते । इन्द्र । श्रुष्टिः । अस्ति । यया । बभूथ । जरि-
भ्यः । ऊती । मा । नः । कामम् । महयन्तम् । आ । धक् । विश्वा ।
। अश्याम् । परि । आपः । आयोः ॥१॥ न । घ । राजा । इन्द्रः ।

आ । दमत् । नः । या । नु । स्वसारा । कृणवन्त । योनौ । आपः । चित् । अस्मै । सुऽतुकाः । अवेषन् । गमत् । नः । इन्द्रः । सख्या । वयः । च ॥२॥ जेता । नृऽभिः । इन्द्रः । धृत्ऽसु । शूरः । भोता । हवम् । नाधमानस्य । कारोः । प्रऽभर्ता । रथम् । दाशुषः । उपाके । उत्ऽयन्ता । गिरः । यदि । च । त्मना । भूत् ॥३॥ एव । नृऽभिः । इन्द्रः । सुऽश्रवस्या । प्रऽखादः । पृक्षः । अभि । मित्रिणः । भूत् । सऽमर्ये । इषः । स्तवते । विऽवाचि । सत्राऽकरः । यजमानस्य । शंसः ॥४॥ त्वया । वयम् । मघऽवन् । इन्द्र । शत्रून् । अभि । स्याम । महतः । मन्यमानान् । त्वम् । त्राता । त्वम् । ऊँ इति । नः । वृधे । भूः । विधाम । हवम् । वृजनम् । जीरऽदानुम् ॥५॥

1. 179.

पूर्वीः । अहम् । शरदः । शश्रमाणा । दोषाः । वस्तोः । उषसः । जरयन्तीः । मिनाति । श्रियम् । जरिमा । तनूनाम् । अपि । ऊँ इति । नु । पत्नीः । वृषणः । जगम्युः ॥१॥ ये । चित् । हि । पूर्वे । ऋतऽसापः । आसन् । साकम् । देवेभिः । अवदन् । ऋतानि । ते । चित् । अवः । असुः । नहि । अन्तम् । आपुः । सम् । ऊँ इति । नु । पत्नीः । वृषऽभिः । जगम्युः ॥२॥ न । मृषा । श्रान्तम् । यत् । अवन्ति । देवाः । विश्वाः । इत् । स्पृधः । अभि । अश्नवाव । जयाव । इत् । अत्र । शतऽनीथम् । आजिम् । यत् । सम्यञ्चा । मिथुनौ । अभि । अजाव ॥३॥ नदस्य । मा । रुधतः । कामः । आ । अगन् । इतः । आऽजातः । अमुतः । कुतः । चित् । लोपाऽमुद्रा । वृषणम् । निः । रिणाति । धीरम् । अधीरा । धयति । श्वसन्तम् ॥४॥ इमम् । नु । सोमम् । अन्तितः । हृत्ऽसु ।

पीतम् । उप । ब्रुवे । यत् । सीम् । आगः । चकृम । तत् । सु । मृळतु । पुलुऽकामः । हि । मर्त्यः ॥५॥ अगस्त्यः । खनमानः । खनित्रैः । प्रऽजाम् । अपत्यम् । बलम् । इच्छमानः । उमौ । वर्णौ । ऋषिः । उग्रः । पुपोष । सत्याः । देवेषु । आऽशिषः । जगाम ॥६॥

1. 180.

युवोः । रजांसि । सुऽयमासः । अश्वाः । रथः । यत् । वाम् । परि । अर्णांसि । दीयत् । हिरण्ययाः । वाम् । पवयः । प्रुषायन् । मध्वः । पिबन्तौ । उषसः । सचेथे इति ॥१॥ युवम् । अत्यस्य । अवं । नक्षथः । यत् । विऽपर्त्मनः । नर्यस्य । प्रऽयज्योः । स्वसा । यत् । वाम् । विश्वऽगूर्ती इति विश्वऽगूर्ती । भरति । वाजाय । ईट्टे । मधुऽपौ । इषे । च ॥२॥ युवम् । पयः । उस्रियायाम् । अधत्तम् । पक्वम् । आमायाम् । अवं । पूर्व्यम् । गोः । अन्तः । यत् । वनिनः । वाम् । ऋतप्सू इत्यृतऽप्सू । द्वारः । न । शुचिः । यजते । हविष्मान् । ॥३॥ युवम् । ह । घर्मम् । मधुऽमन्तम् । अत्रये । अपः । न । चोदः । अवृणीतम् । एषे । तत् । वाम् । नरौ । अश्विना । पश्वःऽइष्टिः । रथ्याऽइव । चक्रा । प्रति । यन्ति । मध्वः ॥४॥ आ । वाम् । दानाय । वयतीय । दस्रा । गोः । ओहेन । तौग्र्यः । न । जिह्रेः । अपः । चोणी इति । सचते । माहिना । वाम् । जूर्णः । वाम् । अक्षुः । अंहसः । यजत्रा ॥५॥ नि । यत् । युवेथे इति । निऽयुतः । सुदानू इति सुऽदानू । उप । स्वधाभिः । सृजथः । पुरम्ऽधिम् । प्रेषत् । वेषत् । वातः । न । सूरिः । आ । महे । ददे । सुऽव्रतः । न । वाजम् ॥६॥ वयम् । चित् । हि । वाम् । जरितारः । सत्याः । विपन्यामहे । वि । पणिः । हितऽवान् । अर्ध । चित् । हि ।

स्म । अश्विनौ । अनिन्द्या । पाथः । हि । स्म । वृषणौ । अन्तिऽदेवम् ॥७॥ युवाम् । चित् । हि । स्म । अश्विनौ । अनु । द्यून् । विऽरुद्रस्य । प्रऽस्रवणस्य । सातौ । अगस्त्यः । नराम् । नृषु । प्रऽशस्तः । कारांधुनीऽइव । चितयत् । सहस्रैः ॥८॥ प्र । यत् । वहेथे इति । महिना । रथस्य । प्र । स्यन्द्रा । याथः । मनुषः । न । होता । धत्तम् । सूरिऽभ्यः । उत । वा । सुऽअश्व्यम् । नासत्या । रयिऽसाचः । स्याम ॥९॥ तम् । वाम् । रथम् । वयम् । अद्य । हुवेम । स्तोमैः । अश्विना । सुविताय । नव्यम् । अरिष्टऽनेमिम् । परि । द्याम् । इयानम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥१०॥

1. 181.

कत् । ऊँ इति । प्रेष्ठौ । इषाम् । रयीणाम् । अध्वर्यन्ता । यत् । उत्ऽनिनीथः । अपाम् । अयम् । वाम् । यज्ञः । अकृत । प्रऽशस्तिम् । वसुधिती इति वसुऽधिती । अविंतारा । जनानाम् ॥१॥ आ । वाम् । अश्वासः । शुचयः । पयःऽपाः । वातऽरंहसः । दिव्यासः । अत्याः । मनःऽजुवः । वृषणः । वीतऽपृष्ठाः । आ । इह । स्वऽराजः । अश्विना । वहन्तु ॥२॥ आ । वाम् । रथः । अवनिः । न । प्रवत्वान् । सुप्रऽवन्धुरः । सुविताय । गम्याः । वृष्णः । स्यातारा । मनसः । जवीयान् । अहम्ऽपूर्वः । यजतः । धिष्ण्या । यः ॥३॥ इहऽइह । जाता । सम् । अवावशीताम् । अरेपसा । तन्वा । नामऽभिः । स्वैः । जिष्णुः । वाम् । अन्यः । सुऽमंगलस्य । सूरिः । दिवः । अन्यः । सुऽभगः । पुत्रः । ऊह्हे ॥४॥ प्र । वाम् । निऽचेरुः । ककुहः । वशान् । अनु । पिशङ्गऽरूपः । सदनानि । गम्याः । हरी इति । अन्यस्य । पीपयन्त । वाजैः । मध्वा । रजांसि । अश्विना । वि । घोषैः ॥५॥ प्र ।

वाम् । शरत्ऽवान् । वृषभः । न । निष्षाट् । पूर्वीः । इषः । चरति । मध्वः । इष्णन् । एवैः । अन्यस्य । पीपयन्त । वाजैः । वेषन्तीः । ऊर्ध्वाः । नयंः । नः । आ । अगुः ॥६॥ असंजि । वाम् । स्थविरा । वेधसा । गीः । बाळ्हे । अश्विना । त्रेधा । चरन्ती । उपऽस्तुतौ । अवतम् । नाधमानम् । यामन् । अयामन् । शृणुतम् । हवम् । मे ॥७॥ उत । स्या । वाम् । रुशतः । वप्ससः । गीः । त्रिऽबर्हिषि । सदसि । पिन्वते । नॄन् । वृषा । वाम् । मेघः । वृषणा । पीपाय । गोः । न । सेके । मनुषः । दशस्यन् ॥८॥ युवाम् । पूषाऽइव । अश्विना । पुरम्ऽधिः । अग्निम् । उषाम् । न । जरते । हविष्मान् । हुवे । यत् । वाम् । वरिवस्या । गृणानः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥९॥

1. 182.

अभूत् । इदम् । वयुनम् । ओ इति । सु । भूषत । रथः । वृषण्ऽवान् । मदंत । मनीषिणः । धियम्ऽजिन्वा । धिष्ण्या । विश्पलावसू इति । दिवः । नपाता । सुऽकृते । शुचिऽव्रता ॥१॥ इन्द्रंऽतमा । हि । धिष्ण्या । मरुत्ऽतमा । दस्रा । दंसिष्ठा । रथ्या । रथिऽतमा । पूर्णम् । रथम् । वहेथे इति । मध्वः । आऽचितम् । तेन । दाश्वांसम् । उप । याथः । अश्विना ॥२॥ किम् । अत्र । दस्रा । कृणुथः । किम् । आसाथे इति । जनः । यः । कः । चित् । अहविः । महीयते । अति । क्रमिष्टम् । जुरतम् । पणेः । असुम् । ज्योतिः । विप्राय । कृणुतम् । वचस्यवे ॥३॥ जम्भयतम् । अभितः । रायतः । शुनः । हतम् । मृधः । विदथुः । तानि । अश्विना । वाचम्ऽवाचम् । जरितुः । रत्निनीम् । कृतम् । उभा । शंसम् । नासत्या । अवतम् । मम ॥४॥ युवम् । एतम् । चक्रथुः । सिन्धुषु । प्लवम् । आत्मन्ऽवन्तम् ।

पक्षिणम् । तौग्र्याय । कम् । येन । देवऽत्रा । मनसा । निःऽऊह्थुः । सुऽपत्नि । पेतथुः । क्षोदसः । महः ॥५॥ अवऽविद्धम् । तौग्र्यम् । अप्ऽसु । अन्तः । अनारम्भणे । तमसि । प्रऽविद्धम् । चतस्रः । नावः । जठलस्य । जुष्टाः । उत् । अश्विऽभ्याम् । इषिताः । पारयन्ति ॥६॥ कः । स्वित् । वृक्षः । निःऽस्थितः । मध्ये । अर्णसः । यम् । तौग्र्यः । नाधितः । परिऽअसस्वजत् । पर्णा । मृगस्य । पतरोःऽइव । आऽरभे । उत् । अश्विनौ । ऊह्थुः । श्रोमताय । कम् ॥७॥ तत् । वाम् । नरा । नासत्यौ । अनु । स्यात् । यत् । वाम् । मानासः । उचथम् । अवोचन् । अस्मात् । अद्य । सदसः । सोम्यात् । आ । विधाम । इषम् । वृजनम् । जीरऽदानुम् ॥८॥

1. 183.

तम् । युञ्जाथाम् । मनसः । यः । जवीयान् । त्रिऽवन्धुरः । वृषणा । यः । त्रिऽचक्रः । येन । उपऽयाथः । सुऽकृतः । दुरोणम् । त्रिऽधातुना । पतथः । विः । न । पर्णैः ॥१॥ सुऽवृत् । रथः । वर्तते । यन् । अभि । त्वाम् । यत् । तिष्ठथः । क्रतुऽमन्ता । अनु । पृक्षे । वपुः । वपुष्या । सचताम् । इयम् । गीः । दिवः । दुहित्रा । उषसा । सचेथे इति ॥२॥ आ । तिष्ठतम् । सुऽवृतम् । यः । रथः । वाम् । अनु । व्रतानि । वर्तते । हविष्मान् । येन । नरा । नासत्या । इषयध्यै । वर्तिः । याथः । तनयाय । त्मने । च ॥३॥ मा । वाम् । वृकः । मा । वृकीः । आ । दधर्षीत् । मा । परि । वर्क्तम् । उत । मा । अतिं । धक्तम् । अयम् । वाम् । भागः । निऽहितः । इयम् । गीः । दस्रौ । इमे । वाम् । निऽधयः । मधूनाम् ॥४॥ युवाम् । गोतमः । पुरुऽमीळ्हः । अत्रिः । दस्रा । हवते । अवसे । हविष्मान् । दिशम् । न । दिष्टाम् । ऋजुयाऽइव । यन्ता ।

आ । मे । हवम् । नासत्या । उप । यातम् ॥५॥ अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः । अश्विनौ । अधायि । आ । इह । यातम् । पथिऽभिः । देवऽयानैः । विधातम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

1. 184.

ता । वाम् । अद्य । तौ । अपरम् । हुवेम । उच्छन्त्याम् । उषसि । वह्निः । उक्थैः । नासत्या । कुह । चित् । सन्तौ । अर्यः । दिवः । नपाता । सुदाःऽतराय ॥१॥ अस्मे इति । ऊँ इति । सु । वृषणा । मादयेथाम् । उत् । पणीन् । हतम् । ऊर्म्या । मदन्ता । श्रुतम् । मे । अच्छोक्तिऽभिः । मतीनाम् । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥२॥ श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुम् । सूर्यायाः । वच्यन्ते । वाम् । ककुहाः । अप्ऽसु । जाताः । युगा । जूर्णाऽइव । वरुणस्य । भूरेः ॥३॥ अस्मे इति । सा । वाम् । माध्वी इति । रातिः । अस्तु । स्तोमम् । हिनोतम् । मान्यस्य । कारोः । अनु । यत् । वाम् । श्रवस्या । सुदानू इति सुऽदानू । सुऽवीर्याय । चर्षणयः । मदन्ति ॥४॥ एषः । वाम् । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽवाना । सुऽवृक्ति । यातम् । वर्तिः । तनयाय । त्मने । च । अगस्त्ये । नासत्या । मदन्ता ॥५॥ अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः । अश्विनौ । अधायि । आ । इह । यातम् । पथिऽभिः । देवऽयानैः । विधातम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

1. 185.

कतरा । पूर्वी । कतरा । अपरा । अयोः । कथा । जाते इति ।

कवयः । कः । वि । वेद । विश्वम् । त्मना । बिभृतः । यत् । ह । नाम । वि । वर्तेते इति । अहनी इति । चक्रियाऽइव ॥१॥ भूरिम् । द्वे इति । अचरन्ती इति । चरन्तम् । पत्ऽवन्तम् । गर्भम् । अपदी इति । दधाते इति । नित्यम् । नः । सूनुम् । पित्रोः । उपऽस्थे । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥२॥ अनेहः । दात्रम् । अदितेः । अनर्वम् । हुवे । स्वःऽवत् । अवधम् । नमस्वत् । तत् । रोदसी इति । जनयतम् । जरित्रे । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥३॥ अतप्यमाने इति । अवसा । अवन्ती इति । अनु । स्याम । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । उभे इति । देवानाम् । उभयेभिः । अह्नाम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥४॥ संगच्छमाने इति सम्ऽगच्छमाने । युवती इति । समन्ते इति सम्ऽअन्ते । स्वसारा । जामी इति । पित्रोः । उपऽस्थे ॥ अभिजिघ्रन्ती इत्यभिऽजिघ्रन्ती । भुवनस्य । नाभिम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥५॥ उर्वी इति । सदनी इति । बृहती इति । ऋतेन । हुवे । देवानाम् । अवसा । जनित्री इति । दधाते इति । ये इति । अमृतम् । सुऽप्रतीके इति सुप्रतीके । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥६॥ उर्वी इति । पृथ्वी इति । बहुले इति । दूरेअन्ते इति दूरेऽअन्ते । उप । ब्रुवे । नमसा । यज्ञे । अस्मिन् । दधाते इति । ये इति । सुभगे इति सुऽभगे । सुप्रतूर्ती इति सुऽप्रतूर्ती । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥७॥ देवान् । वा । यत् । चकृम । कत् । चित् । आगः । सखायम् । वा । सदम् । इत् । जाःपतिम् । वा । इयम् । श्रीः । भूयाः । अवऽयानम् । एषाम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥८॥ उमा । शंसा । नद्यौ । धाम् । अविष्टाम् ।

उभे इति । माम् । ऊती इति । अवसा । सचेताम् । भूरि । चित् । अर्यः । सुदाःऽतराय । इषा । मदन्तः । इषयेम । देवाः ॥९॥ ऋतम् । दिवे । तत् । अवोचम् । पृथिव्यै । अभिऽश्रावाय । प्रथमम् । सुऽमेधाः । पाताम् । अवद्यात् । दुःऽइतात् । अभीके । पिता । माता । च । रक्षताम् । अवःऽभिः ॥१०॥ इदम् । द्यावापृथिवी इति । सत्यम् । अस्तु । पितः । मातः । यत् । इह । उपऽब्रुवे । वाम् । भूतम् । देवानाम् । अवमे इति । अवःऽभिः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥११॥

I. 186.

आ । नः । इळाभिः । विदथे । सुऽशस्ति । विश्वानरः । सविता । देवः । एतु । अपि । यथा । युवानः । मत्सथ । नः । विश्वम् । जगत् । अभिऽपित्वे । मनीषा ॥१॥ आ । नः । विश्वे । आस्क्राः । गमन्तु । देवाः । मित्रः । अर्यमा । वरुणः । सऽजोषाः । भुवन् । यथा । नः । विश्वे । वृधासः । करन् । सुऽसहा । विथुरम् । न । शवः ॥२॥ प्रेष्ठम् । वः । अतिथिम् । गृणीषे । अग्निम् । शस्तिऽभिः । तुर्वणिः । सऽजोषाः । असत् । यथा । नः । वरुणः । सुऽकीर्तिः । इषः । च । पर्षत् । अरिऽगूर्तः । सूरिः ॥३॥ उप । वः । आ । ईषे । नमसा । जिगीषा । उषासानक्ता । सुदुघाऽइव । धेनुः । समाने । अहन् । विऽमिमानः । अर्कम् । विषुऽरूपे । पयसि । सस्मिन् । ऊधन् ॥४॥ उत । नः । अहिः । बुध्न्यः । मयः । करिति । कः । शिशुम् । न । पिप्युषीऽइव । वेति । सिन्धुः । वनं । नपातम् । अपाम् । जुनाम । मनःऽजुवः । वृषणः । यम् । वहन्ति ॥५॥ उत । नः । ईम् । त्वष्टा । आ । गन्तु । अच्छ । स्वऽतः । अरिऽभिः । अभिऽपित्वे । सऽजोषाः । आ । वृत्रऽहा । इन्द्रः । चर्ष-

णिऽप्राः । तुविःऽतमः । नराम् । नः । इह । गम्याः ॥६॥ उत । नः । ईम् । मतयः । अश्वऽयोगाः । शिशुम् । न । गावः । तरुणम् । रिहन्ति । तम् । ईम् । गिरः । जनयः । न । पत्नीः । सुराभिःऽतमम् । नराम् । नसन्त ॥७॥ उत । नः । ईम् । मरुतः । वृद्धऽसेनाः । स्मत् । रोदसी इति । सऽमनसः । सदन्तु । पृषत्ऽअश्वासः । अवनयः । न । रथाः । रिशादसः । मित्रऽयुजः । न । देवाः ॥८॥ प्र । नु । यत् । एषाम् । महिना । चिकित्रे । प्र । युञ्जते । प्रऽयुजः । ते । सुऽवृक्ति । अधि । यत् । एषाम् । सुऽदितौ । न । शरुः । विश्वम् । आ । इरिणम् । प्रपान्त । सेनाः ॥९॥ प्रो इति । अश्विनौ । अवसे । कृणुध्वम् । प्र । पूषणम् । स्वऽतवसः । हि । सन्ति । अद्वेषः । विष्णुः । वातः । ऋभुक्षाः । अच्छ । सुम्नाय । वावृतीय । देवान् ॥१०॥ इयम् । सा । वः । अस्मे इति । दीधितिः । यजत्राः । अपिऽप्राणी । च । सदनी । च । भूयाः । नि । या । देवेषु । यतते । वसुऽयुः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥११॥

1. 187.

पितुम् । नु । स्तोषम् । महः । धर्माणम् । तविषीम् । यस्य । त्रितः । वि । ओजसा । वृत्रम् । विऽपर्वम् । अर्दयत् ॥१॥ स्वादो इति । पितो इति । मधो इति । पितो इति । वयम् । त्वा । ववृमहे । अस्माकम् । अविता । भव ॥२॥ उप । नः । पितो इति । आ । चर । शिवः । शिवाभिः । ऊतिऽभिः । मयःऽभुः । अद्विषेण्यः । सखा । सुऽशेवः । अद्वयाः ॥३॥ तव । त्ये । पितो इति । रसाः । रजाँसि । अनु । विऽस्थिताः । दिवि । वाताःऽइव । श्रिताः ॥४॥ तव । त्ये । पितो इति

ददतः । तवं । स्वादिष्ठ । ते । पितो इतिं । प्र । स्वाद्मानः । रसानाम् । तुविग्रीवाःऽइव । ईरते ॥५॥ त्वे इतिं । पितो इतिं । महानाम् । देवानाम् । मनः । हितम् । अकारि । चारु । केतुना । तवं । अहिम् । अवसा । अवधीत् ॥६॥ यत् । अदः । पितो इतिं । अजगन् । विवस्वं । पर्वतानाम् । अत्र । चित् । नः । मधो इतिं । पितो इतिं । अरम् । भक्षाय । गम्याः ॥७॥ यत् । अपाम् । ओषधीनाम् । परिशम् । आऽरिशामहे । वातापे । पीवः । इत् । भव ॥८॥ यत् । ते । सोम । गोऽआशिरः । यवऽआशिरः । भजामहे । वातापे । पीवः । इत् । भव ॥९॥ करम्भः । ओषधे । भव । पीवः । वृक्कः । उदारथिः । वातापे । पीवः । इत् । भव ॥१०॥ तम् । त्वा । वयम् । पितो इतिं । वचःऽभिः । गावः । न । हव्या । सुसूदिम । देवेभ्यः । त्वा । सधऽमादम् । अस्मभ्यम् । त्वा । सधऽमादम् ॥११॥

1. 188.

सम्ऽईद्धः । अद्य । राजसि । देवः । देवैः । सहस्रऽजित् । दूतः । हव्या । कविः । वह ॥१॥ तनूऽनपात् । ऋतम् । यते । मध्वा । यज्ञः । सम् । अज्यते । दधत् । सहस्रिणीः । इषः ॥२॥ आऽजुह्वानः । नः । ईड्यः । देवान् । आ । वक्षि । यज्ञियान् । अग्ने । सहस्रऽसाः । असि ॥३॥ प्राचीनम् । बर्हिः । ओजसा । सहस्रऽवीरम् । अस्तृणन् । यत्र । आदित्याः । विऽराजथ ॥४॥ विऽराट् । सम्ऽराट् । विऽभ्वीः । प्रऽभ्वीः । बह्वीः । च । भूयसीः । च । याः । दुरः । घृतानि । अक्षरन् ॥५॥ सुरुक्मे इतिं सुऽरुक्मे । हि । सुऽपेशसा । अधि । श्रिया । विऽराजतः । उषसौ । आ । इह । सीदताम् ॥६॥ प्रथमा । हि । सुऽवा-

चसा । होतारा । दैव्या । कवी इति । यज्ञम् । नः । यक्षताम् । इमम् ॥७॥ भारति । इळे । सरस्वति । याः । वः । सर्वाः । उपऽब्रुवे । ताः । नः । चोदयत । श्रिये ॥८॥ त्वष्टा । रूपाणि । हि । प्रऽभुः । पशून् । विश्वान् । सम्ऽआनजे । तेषाम् । नः । स्फातिम् । आ । यज ॥९॥ उप । त्मन्या । वनस्पते । पाथः । देवेभ्यः । सृज । अग्निः । हव्यानि । सिस्वदत् ॥१०॥ पुरःऽगाः । अग्निः । देवानाम् । गायत्रेण । सम् । अज्यते । स्वाहाऽकृतीषु । रोचते ॥११॥

1. 189.

अग्ने । नय । सुऽपथा । राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् । युयोधि । अस्मत् । जुहुराणम् । एनः । भूयिष्ठाम् । ते । नमःऽउक्तिम् । विधेम ॥१॥ अग्ने । त्वम् । पारय । नव्यः । अस्मान् । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा । पूः । च । पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शम् । योः ॥२॥ अग्ने । त्वम् । अस्मत् । युयोधि । अमीवाः । अनग्निऽत्राः । अभि । अमन्त । कृष्टीः । पुनः । अस्मभ्यम् । सुविताय । देव । रायः । विश्वेभिः । अमृतेभिः । यजत्र ॥३॥ पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुक्वान् । मा । ते । भयम् । जरितारम् । यविष्ठ । नूनम् । विदत् । मा । अपरम् । सहस्वः ॥४॥ मा । नः । अग्ने । अव । सृजः । अघाय । अविष्यवे । रिपवे । दुच्छुनायै । मा । दत्वते । दशते । मा । अदत्ते । नः । मा । रिषते । सहसाऽवन् । परा । दाः ॥५॥ वि । घ । त्वाऽवान् । ऋतऽजात । यंसत् । गृणानः । अग्ने । तन्वे । वरूथम् । विश्वात् । रिरिक्षोः । उत । वा । निनित्सोः । अभिऽद्रुताम् । असि । हि

देव । विष्पट् ॥६॥ त्वम् । तान् । अग्ने । उभयान् । वि । विद्वान् । वेषि । प्रऽपित्वे । मनुषः । यजत्र । अभिऽपित्वे । मनवे । शास्यः । भूः । मर्मृजेन्यः । उशिक्ऽभिः । न । अक्रः ॥७॥ अवोचाम । निऽवचनानि । अस्मिन् । मानस्य । सूनुः । सहसाने । अग्नौ । वयम् । सहस्रम् । ऋषिऽभिः । सनेम । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥८॥

1. 190.

अनर्वाणम् । वृषभम् । मन्द्रऽजिह्वम् । बृहस्पतिम् । वर्धय । नव्यम् । अर्कैः । गाथान्यः । सुऽरुचः । यस्य । देवाः । आऽशृण्वन्ति । नवमानस्य । मर्तीः ॥१॥ तम् । ऋत्वियाः । उप । वाचः । सचन्ते । सर्गैः । न । यः । देवऽयताम् । असर्जि । बृहस्पतिः । सः । हि । अञ्जः । वरांसि । विऽम्वा । अभवत् । सम् । ऋते । मातरिश्वा ॥२॥ उपऽस्तुतिम् । नमसः । उत्ऽयतिम् । च । श्लोकम् । यंसत् । सविताऽइव । प्र । बाहू इति । अस्य । क्रत्वा । अहन्यः । यः । अस्ति । मृगः । न । भीमः । अरक्षसः । तुविष्मान् ॥३॥ अस्य । श्लोकः । दिवि । ईयते । पृथिव्याम् । अत्यः । न । यंसत् । यक्षऽभृत् । विऽचेताः । मृगाणाम् । न । हेतयः । यन्ति । च । इमाः । बृहस्पतेः । अहिंऽमायान् । अभि । द्यून् ॥४॥ ये । त्वा । देव । उशिक्मम् । मन्यमानाः । पापाः । भद्रम् । उपऽजीवन्ति । पज्राः । न । दुःऽध्यै । अनु । ददासि । वामम् । बृहस्पते । चयसे । इत् । पियारुम् ॥५॥ सुऽप्रैतुः । सुऽयवसः । न । पन्थाः । दुःऽनियन्तुः । परिऽप्रीतः । न । मित्रः । अनर्वाणः । अभि । ये । चक्षते । नः । अपिऽवृताः । अपऽऊर्णुवन्तः । अस्थुः ॥६॥ सम् । यम् । स्तुभः । अवनयः । न । यन्ति । समुद्रम् । न । स्रवतः । रोधऽचक्राः । सः । विद्वान् ।

उभयम् । चष्टे । अन्तः । बृहस्पतिः । तरः । आपः । च । गृध्रः ॥७॥ एव । महः । तुविऽजातः । तुविष्मान् । बृहस्पतिः । वृषभः । धायि । देवः । सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । विधाम । इषम् । वृजनम् । जीरऽदानुम् ॥८॥

1. 191.

कङ्कतः । न । कङ्कतः । अथो इति । सतीनऽकङ्कतः । द्वौ । इति । प्लुषी इति । इति । नि । अदृष्टाः । अलिप्सत ॥१॥ अदृष्टान् । हन्ति । आऽयती । अथो इति । हन्ति । पराऽयती । अथो इति । अवऽभृती । हन्ति । अथो इति । पिनष्टि । पिंषती ॥२॥ शरासः । कुशरासः । दर्भासः । सैर्याः । उत । मौञ्जाः । अदृष्टाः । वैरिणाः । सर्वे । साकम् । नि । अलिप्सत ॥३॥ नि । गावः । गोऽस्थे । असदन् । नि । मृगासः । अविक्षत । नि । केतवः । जनानाम् । नि । अदृष्टाः । अलिप्सत ॥४॥ एते । ऊँ इति । त्ये । प्रति । अदृश्रन् । प्रऽदोषम् । तस्कराःऽइव । अदृष्टाः । विश्वऽदृष्टाः । प्रतिऽबुद्धाः । अभूतन ॥५॥ द्यौः । वः । पिता । पृथिवी । माता । सोमः । भ्राता । अदितिः । स्वसा । अदृष्टाः । विश्वऽदृष्टाः । तिष्ठत । इलयत । सु । कम् ॥६॥ ये । अस्याः । ये । अज्रयाः । सूचीकाः । ये । प्रऽकङ्कताः । अदृष्टाः । किम् । चन । इह । वः । सर्वे । साकम् । नि । जस्यत ॥७॥ उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा । अदृष्टान् । सर्वान् । जम्भयन् । सर्वाः । च । यातुऽधान्यः ॥८॥ उत् । अपप्तत् । असौ । सूर्यः । पुरु । विश्वानि । जूर्वन् । आदित्यः । पर्वतेभ्यः । विश्वऽदृष्टः । अदृष्टऽहा ॥९॥ सूर्ये । विषम् । आ । सजामि । दृतिम् । सुराऽवतः । गृहे । सः । चित् ।

नु । न । मराति । नो इति । वयम् । मराम । आरे । अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥१०॥ इयत्तिका । शकुन्तिका । रुक्ष । जघास । ते । विषम् । सो इति । चित् । नु । न । मराति । नो इति । वयम् । मराम । आरे । अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥११॥ त्रिः । सप्त । विष्पुलिङ्गकाः । विषस्य । पुष्यम् । अचन् । ताः । चित् । नु । न । मरन्ति । नो इति । वयम् । मराम । आरे । अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥१२॥ नवानाम् । नवतीनाम् । विषस्य । रोपुषीणाम् । सर्वासाम् । अग्रभम् । नाम । आरे । अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥१३॥ त्रिः । सप्त । मयूर्यः । सप्त । स्वसारः । अग्रुवः । ताः । ते । विषम् । वि । जभ्रिरे । उदकम् । कुम्भिनीःऽइव ॥१४॥ इयत्तकः । कुषुम्भकः । तकम् । भिनद्मि । अश्मना । ततः । विषम् । प्र । वदृते । परांचीः । अनु । सम्ऽवर्तः ॥१५॥ कुषुम्भकः । तत् । अब्रवीत् । गिरेः । प्रऽवर्तमानकः । वृश्चिकस्य । अरसम् । विषम् । अरसम् । वृश्चिक । ते । विषम् ॥१६॥